सुतस्याभिषुतस्य वेधसोऽभिलषितस्य विधातुर्यस्य सोमस्य धारा प्रियं प्रीतिकरं मध्वमृतमधुक्षत दुग्धे स सुक्रतुः सुकर्मा सोमोऽपो वसतीवरीर्वसिष्ट । आच्छादयति ॥

॥ अथ चतुर्थी ॥

महांतं त्वा महीरन्वापो अर्षंति सिंधवः । यद्गोभिर्वासयिष्यसे ॥४॥

महांतं । त्वा । महीः । अनु । आपः । अर्षंति । सिंधवः । यत् । गोभिः । वासयिष्यसे ॥४॥

हे सोम त्वं यद्यदा यज्ञे गोभिर्गोविकारैः पयोभिर्वासयिष्यस आच्छादयिष्यसे तत्तदा महांतं त्वामनु प्रति सिंधवः स्यंदमाना महीर्महत्य आपोऽर्षंति । गच्छंति ॥

॥ अथ पंचमी ॥

समुद्रो अप्सु मामृजे विष्टंभो धरुणो दिवः । सोमः पवित्रे अस्मयुः ॥५॥

समुद्रः । अप्ऽसु । ममृजे । विष्टंभः । धरुणः । दिवः । सोमः । पवित्रे । अस्मऽयुः ॥५॥

समुद्रः समुद्रवंत्यस्माद्रसा इति समुद्रः । विष्टंभो दिवः स्वर्गस्य धरुणो धारकश्चास्मयुरस्मत्कामः सोमोऽप्सूदकेषु ममृजे । मृज्यते । पवित्रेऽभिषिच्यत इत्यर्थः ॥

॥ इति षष्ठस्य सप्तमेऽष्टादशो वर्गः ॥

॥ अथ षष्ठी ॥

अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः । सं सूर्येण रोचते ॥६॥

अचिक्रदत् । वृषा । हरिः । महान् । मित्रः । न । दर्शतः । सं । सूर्येण । रोचते ॥६॥

वृषा कामानां वर्षको हरिर्हरितवर्णो महान् सर्वोत्तमो मित्रो न यथा सखा तद्वद्दर्शतो दर्शनीयो योऽयं सोमोऽचिक्रदत् शब्दं करोति सोऽयं सोमः सूर्येण सह रोचते । दिवि प्रकाशते ॥

॥ अथ सप्तमी ॥

गिरस्त इंद ओजसा मर्मृज्यंते अपस्युवः । याभिर्मदाय शुंभसे ॥७॥

गिरः । ते । इंदो इति । ओजसा । मर्मृज्यंते । अपस्युवः । याभिः । मदाय । शुंभसे ॥७॥

हे इंदो ते तवौजसा बलेनापस्युवः कर्मेच्छासंबंधिन्यस्ता गिरः स्तुतयो मर्मृज्यंते शोध्यंते याभिर्गीर्भिस्त्वं मदाय हर्षाय शुंभसेऽलंक्रियसे ॥

॥ अथाष्टमी ॥

तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे । तव प्रशस्तयो महीः ॥८॥

तं । त्वा । मदाय । घृष्वये । ऊं इति । लोकऽकृत्नुं । ईमहे । तव । प्रऽशस्तयः । महीः ॥८॥

हे सोम यस्य ते तव प्रशस्तयः प्रशंसा महीर्महत्यो घृष्वय उ त्वत्प्रसादाच्छत्रूणां घर्षणशीलाय यजमानायैव लोककृत्नुमुत्तमस्य लोकस्य कर्तारं तं त्वां सोमं मदायेमहे । वयं याचामहे ॥

॥ अथ नवमी ॥

अस्मभ्यमिंदविंद्रयुर्मध्वः पवस्व धारया । पर्जन्यो वृष्टिमाँ इव ॥९॥

अस्मभ्यं । इंदो इति । इंद्रऽयुः । मध्वः । पवस्व । धारया । पर्जन्यः । वृष्टिमान्ऽइव ॥९॥

हे इंदो सोम इंद्रयुरिंद्रकामस्त्वं मध्वो मदकरस्यामृतस्य धारया पर्जन्यो वृष्टिमानिव यथा वर्षवान्पर्जन्यो मेघस्तथास्मभ्यं मेधातिथिभ्यः पवस्व । क्षर ॥

॥ अथ दशमी ॥

गोषा इंदो नृषा अस्यश्वसा वाजसा उत । आत्मा यज्ञस्य पूर्व्यः ॥१०॥

गोऽसाः । इंदो इति । नृऽसाः । असि । अश्वऽसाः । वाजऽसाः । उत । आत्मा । यज्ञस्य । पूर्व्यः ॥१०॥

हे इंदो यज्ञस्य पूर्व्यः प्रत्न आत्मात्मभूतस्त्वं गोषा अस्मभ्यं गवां दातासि । भवसि । नृषाः पुत्राणां दाता चासि । अश्वसा अश्वानां दाता चासि । उतापि च वाजसा अन्नानां दाता चासि ॥

॥ इति षष्ठस्य सप्तम एकोनविंशो वर्गः ॥

एष देव इति दशर्चं तृतीयं सूक्तमाजीगर्तेः शुनःशेपस्यार्षं गायत्रं पवमानसोमदेवताकं । अनुक्रांतं च । एष शुनःशेप इति । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

एष देवो अमर्त्यः पर्णवीरिव दीयति । अभि द्रोणान्यासदं ॥१॥

एषः । देवः । अमर्त्यः । पर्णवीःऽइव । दीयति । अभि । द्रोणानि । आऽसदं ॥१॥

देवो द्योतमानोऽमर्त्यो मरणरहित एष सोमो द्रोणानि द्रोणकलशान्यभि अभिलक्ष्यासदमासदनार्थं पर्णवीरिव यथा पक्षी तथा वेगेन दीयति। गच्छति ॥

॥ अथ द्वितीया ॥

एष देवो विपा कृतोऽति ह्वरांसि धावति। पवमानो अदाभ्यः ॥२॥

एषः। देवः। विपा। कृतः। अति। ह्वरांसि। धावति। पवमानः। अदाभ्यः ॥२॥

विपांगुल्या। अथर्यो विप इत्यंगुलिनामसु पाठात्। कृतोऽभिषुत एष सोमो देवः पवमानः क्षरन् अदाभ्यः केनाप्यहिंसितश्च सन् ह्वरांसि शत्रूनतिधावति। हंतुमभिगच्छति ॥

॥ अथ तृतीया ॥

एष देवो विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृज्यते ॥३॥

एषः। देवः। विपन्युऽभिः। पवमानः। ऋतयुऽभिः। हरिः। वाजाय। मृज्यते ॥३॥

पवमानः क्षरन्नेष सोमो देवो विपन्युभिः स्तोतृभिर्ऋतायुभिर्यज्ञकामैर्हरिरश्व इव वाजाय संग्रामार्थं मृज्यते। स्तुतिभिरलंक्रियते ॥

॥ अथ चतुर्थी ॥

एष विश्वानि वार्या शूरो यन्निव सत्वभिः। पवमानः सिषासति ॥४॥

एषः। विश्वानि। वार्या। शूरः। यन्ऽइव। सत्वऽभिः। पवमानः। सिसासति ॥४॥

पवमानः क्षरन् शूरो वीर एष सोमो देवो विश्वानि सर्वाणि वार्या वरणीयानि धनानि सत्वभिर्बलैर्यन्निव गच्छन्निव सिषासति। अस्मदर्थं संभक्तुमिच्छति ॥

॥ अथ पंचमी ॥

एष देवो रथर्यति पवमानो दशस्यति। आविष्कृणोति वग्वनुं ॥५॥

एषः। देवः। रथर्यति। पवमानः। दशस्यति। आविः। कृणोति। वग्वनुं ॥५॥

पवमानः क्षरन्नेष सोमो देवो रथर्यति। अस्मदीयं यागं प्रत्यागमनाय रथं कामयते। दशस्यति। आगत्य चास्मभ्यमभिलषितं प्रयच्छति। वग्वनुं शब्दमाविष्कृणोति। अभिषूयमाणः प्रकटयति ॥

॥ इति षष्ठस्य सप्तमे विंशो वर्गः ॥

॥ अथ षष्ठी ॥

एष विप्रैरभिष्टुतोऽपो देवो वि गाहते । दधद्रत्नानि दाशुषे ॥६॥

एषः । विप्रैः । अभिऽस्तुतः । अपः । देवः । वि । गाहते । दधत् । रत्नानि । दाशुषे ॥६॥

विप्रैर्मेधाविभिः स्तोतृभिरभिष्टुतः परितः स्तुत एष सोमो देवो दाशुषे हविषां प्रदात्रे यजमानाय रत्नानि रमणीयानि धनानि दधद्धारयन् प्रयच्छन् अपो वसतीवरीर्वि गाहते । प्रविशति ॥

॥ अथ सप्तमी ॥

एष दिवं वि धावति तिरो रजांसि धारया । पवमानः कनिक्रदत् ॥७॥

एषः । दिवं । वि । धावति । तिरः । रजांसि । धारया । पवमानः । कनिक्रदत् ॥७॥

धारया पवमानः क्षरन्नेष सोमः कनिक्रदद्भिषूयमाणः शब्दं कुर्वन् रजांसि लोकान् तिरस्तिरस्कुर्वन्यागाद्दिवं स्वर्गं वि धावति । गच्छति ॥

॥ अथाष्टमी ॥

एष दिवं व्यासरत्तिरो रजांस्यस्पृतः । पवमानः स्वध्वरः ॥८॥

एषः । दिवं । वि । आ । असरत् । तिरः । रजांसि । अस्पृतः । पवमानः । सुऽअध्वरः ॥८॥

पवमानः क्षरन्नेष सोमः स्वध्वरः सुयज्ञोऽस्पृतः केनाप्यहिंसितश्च सन् रजांसि लोकान् तिरस्तिरस्कुर्वन्यज्ञाद्दिवं प्रति व्यासरत् । विसरति । गच्छति ॥

॥ अथ नवमी ॥

एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः । हरिः पवित्रे अर्षति ॥९॥

एषः । प्रत्नेन । जन्मना । देवः । देवेभ्यः । सुतः । हरिः । पवित्रे । अर्षति ॥९॥

हरिर्हरितवर्णो देवो द्योतमान एष सोमः प्रत्नेन पुराणेन जन्मना जननेन देवेभ्यो देवार्थं सुतोऽभिषुतः सन् पवित्रे स्थातुमर्षति । गच्छति ॥

॥ अथ दशमी ॥

एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः । धारया पवते सुतः ॥१०॥

एषः । ऊं इति । स्यः । पुरुऽव्रतः । जज्ञानः । जनयन् । इषः । धारया । पवते । सुतः ॥१०॥

स्य एष उ सोम एव पुरुव्रतो बहुकर्मा जज्ञानो जायमान एवेषोऽन्नानि जनयन्नुत्पादयन् सुतोऽभिषुतः सन् धारया पवते । क्षरति ॥

॥ इति षष्ठस्य सप्तम एकविंशो वर्गः ॥

सना चेति दशर्चं चतुर्थं सूक्तमांगिरसकुलस्य हिरण्यस्तूपस्यार्षं गायत्रं पवमानसोमदेवताकं । अनुक्रांतं च । सना हिरण्यस्तूप इति । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

सना च सोम जेषि च पवमान महि श्रवः । अथा नो वस्यसस्कृधि ॥१॥

सन । च । सोम । जेषि । च । पवमान । महि । श्रवः । अथ । नः । वस्यसः । कृधि ॥१॥

हे महि श्रवो महदन्नं पवमान सोम सन । अस्मद्यागे यजनीयान्देवान्भज । जेषि च । यागविध्वंसकारिणो राक्षसांश्च जय । अथ देवान्प्राप्य रक्षसांश्च जित्वानंतरं नोऽस्मान्वस्यसः श्रेयसः कृधि । कुरु । श्रेयोऽस्मभ्यं देहीत्यर्थः ॥

॥ अथ द्वितीया ॥

सना ज्योतिः सना स्व१र्विश्वा च सोम सौभगा । अथा नो वस्यसस्कृधि ॥२॥

सन । ज्योतिः । सन । स्वः । विश्वा । च । सोम । सौभगा । अथ । नः । वस्यसः । कृधि ॥२॥

हे सोम त्वं ज्योतिस्तेजः सन । अस्मभ्यं प्रयच्छ । अपि च स्वः स्वर्गं सन । अस्मभ्यं देहि । विश्वा विश्वानि सौभगा सौभाग्यानि च सन । सिद्धमन्यत् ॥

॥ अथ तृतीया ॥

सना दक्षमुत क्रतुमप सोम मृधो जहि । अथा नो वस्यसस्कृधि ॥३॥

सन । दक्षं । उत । क्रतुं । अप । सोम । मृधः । जहि । अथ । नः । वस्यसः । कृधि ॥३॥

हे सोम त्वं दक्षं बलं सन । अस्मभ्यं देहि । उतापि च क्रतुं प्रज्ञानं सन । मृधो हिंसकाञ्छत्रूंश्चापजहि । मारय । सिद्धमन्यत् ॥

॥ अथ चतुर्थी ॥

पवीतारः पुनीतन सोममिंद्राय पातवे । अथा नो वस्यसस्कृधि ॥४॥

पवितारः । पुनीतन । सोमं । इंद्राय । पातवे । अथ । नः । वस्यसः । कृधि ॥४॥

हे पवीतारः सोमाभिषवकर्तारो यूयमिंद्राय पातवे पातुं सोमं पुनीतन। अभिषुणुत। सिद्धमन्यत् ॥

॥ अथ पंचमी ॥

त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः। अथा नो वस्यसस्कृधि ॥५॥

त्वं। सूर्ये। नः। आ। भज। तव। क्रत्वा। तव। ऊतिऽभिः। अथ। नः। वस्यसः। कृधि ॥५॥

हे सोम त्वं तव क्रत्वा तवोतिभिस्त्वत्कर्तृकेण कर्मणा त्वत्कर्तृकाभी रक्षाभिश्च नोऽस्मान् सूर्ये आभज। प्रापय। सिद्धमन्यत् ॥

॥ इति षष्ठस्य सप्तमे द्वाविंशो वर्गः ॥

॥ अथ षष्ठी ॥

तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यं। अथा नो वस्यसस्कृधि ॥६॥

तव। क्रत्वा। तव। ऊतिऽभिः। ज्योक्। पश्येम। सूर्यं। अथ। नः। वस्यसः। कृधि ॥६॥

हे सोम तव क्रत्वा प्रज्ञानेन तवोतिभी रक्षाभिश्च ज्योक् चिरं पश्येम सूर्यं। पश्याम। द्रक्ष्यामः। सिद्धमन्यत् ॥

॥ अथ सप्तमी ॥

अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिं। अथा नो वस्यसस्कृधि ॥७॥

अभि। अर्ष। सुऽआयुध। सोम। द्विऽबर्हसं। रयिं। अथ। नः। वस्यसः। कृधि ॥७॥

हे स्वायुध शोभनायुध सोम त्वं द्विबर्हसं द्वयोर्द्यावापृथिव्योः स्थानयोः परिवृढं रयिं धनमभ्यर्ष। अस्मानभिगमय। सिद्धमन्यत् ॥

॥ अथाष्टमी ॥

अभ्य१र्षानपच्युतो रयिं समत्सु सासहिः। अथा नो वस्यसस्कृधि ॥८॥

अभि। अर्ष। अनपऽच्युतः। रयिं। समत्ऽसु। ससहिः। अथ। नः। वस्यसः। कृधि ॥८॥

हे सोम समत्सु संग्रामेष्वनपच्युतः शत्रुभिरनाहतः सासहिः शत्रूणामभिभविता त्वं रयिं धनमभ्यर्ष। अस्मानभिगमय। सिद्धमन्यत् ॥

॥ अथ नवमी ॥

त्वां यज्ञैरवीवृधन्पवमान विधर्मणि। अथा नो वस्यसस्कृधि ॥९॥

त्वां। यज्ञैः। अवीवृधन्। पवमान। विऽधर्मणि। अथ। नः। वस्यसः। कृधि ॥९॥

हे पवमान सोम यजमानानां विधारणाय प्रवृत्तं त्वां यज्ञैर्विधर्मण्यात्मविधारणार्थमवीवृधन्। यजमाना वर्धयंति। सिद्धमन्यत् ॥

॥ अथ दशमी ॥

रयिं नश्चित्रमश्विनमिंदो विश्वायुमा भर। अथा नो वस्यसस्कृधि ॥१०॥

रयिं। नः। चित्रं। अश्विनं। इंदो इति। विश्वऽआयुं। आ। भर। अथ। नः। वस्यसः। कृधि ॥१०॥

हे इंदो यागेषु क्लिद्यमान सोम त्वं चित्रं नानाविधमश्विनमश्ववंतं च विश्वायुं सर्वगामिनं रयिं नोऽस्मभ्यमाभर। आहर। सिद्धमन्यत् ॥

॥ इति षष्ठस्य सप्तमे त्रयोविंशो वर्गः ॥

समिद्ध इत्येकादशर्चं पंचमं सूक्तं काश्यपस्यासितस्य देवलस्य वार्षं। अष्टम्याद्याश्चतस्रोऽनुष्टुभः शिष्टाः सप्त गायत्र्यः। नराशंसवर्जिताः समिदादयः क्रमेण प्रत्यृचं देवताः। तथा चानुक्रांतं। समिद्ध एकादश काश्यपोऽसितो देवलो वा विंशतिः सूक्तान्याद्यमाप्रियश्चतुरनुष्टुबंतमिति ॥ काश्यपस्य पावमानमिदमाप्रीसूक्तं। सूचितं च। समिद्धो अद्येति सर्वेषां यथर्षि वा। आ० ३.२। इति ॥

॥ तत्र प्रथमा ॥

समिद्धो विश्वतस्पतिः पवमानो वि राजति। प्रीणन्वृषा कनिक्रदत् ॥१॥

संऽइद्धः। विश्वतः। पतिः। पवमानः। वि। राजति। प्रीणन्। वृषा। कनिक्रदत् ॥१॥

आप्रीवत्सोमस्तुतिरत्र। समिद्धः सम्यग्दीप्तो विश्वतस्पतिः सर्वतः स्वामी वृषा कामानां वर्षिता पवमानः सोमः कनिक्रदद्भिषूयमाणः शब्दं कुर्वन्प्रीणन्देवान्प्रीणयन्विराजति। यागेषु प्रकाशते ॥

॥ अथ द्वितीया ॥

तनूनपात्पवमानः शृंगे शिशानो अर्षति । अंतरिक्षेण रारजत् ॥२॥

तनूऽनपात् । पवमानः । शृंगे इति । शिशानः । अर्षति । अंतरिक्षेण । रारजत् ॥२॥

तनूनपात्पवमानः सोमः । तनूनपादत्र सोमो भवति । तथा च श्रूयते । अप्सोऽंशवो जायंते ततः सोमो जायत इति । शृंगे दीप्ते उन्नतप्रदेशे । हरिणः शृंगाणीति ज्वलन्नामसु पाठात् । शिशानस्तीक्ष्णीकुर्वन्नंतरिक्षेण रारजदर्षति । द्रोणकलशं प्रति गच्छति । तथा चाम्नायते । द्वाभ्यां धाराभ्यामाग्रयणं गृह्णातीति ॥

॥ अथ तृतीया ॥

ईळेन्यः पवमानो रयिर्वि राजति द्युमान् । मधोर्धाराभिरोजसा ॥३॥

ईळेन्यः । पवमानः । रयिः । वि । राजति । द्युऽमान् । मधोः । धाराभिः । ओजसा ॥३॥

ईळेन्यः स्तुत्यः पवमानः सोमो रयिरभीष्टस्य दाता द्युमान्दीप्तिमांश्च सन्मधोरुदकस्य धाराभिः सह क्षरन्नोजसा बलेन विराजति । प्रकाशते ॥

॥ अथ चतुर्थी ॥

बर्हिः प्राचीनमोजसा पवमानः स्तृणन्हरिः । देवेषु देव ईयते ॥४॥

बर्हिः । प्राचीनं । ओजसा । पवमानः । स्तृणन् । हरिः । देवेषु । देवः । ईयते ॥४॥

हरिर्हरितवर्णो देवो द्योतमानः सोमः पवमानो देवेषु यज्ञेषु बर्हिः प्राचीनं प्राचीनाग्रं स्तृणन्स्तारयन्नोजसा बलेनेयते । गच्छति ॥

॥ अथ पंचमी ॥

उदातैर्जिहते बृहद्द्वारो देवीर्हिरण्ययीः । पवमानेन सुष्टुताः ॥५॥

उत् । आतैः । जिहते । बृहत् । द्वारः । देवीः । हिरण्ययीः । पवमानेन । सुऽस्तुताः ॥५॥

हिरण्ययीर्हिरण्मय्यो द्वारो देवीर्द्वारो देव्यः पवमानेन सोमेन सह सुष्टुताः स्तोतृभिः सम्यक् स्तुताः सत्यो बृहद्बृहतीभ्यो महतीभ्य आतैराताभ्यो दिग्भ्यः । आता आशा इति दिङ्नामसु पाठात् । उज्जिहते । उद्गच्छंति ॥

॥ इति षष्ठस्य सप्तमे चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

सुशिल्पे बृहती मही पवमानो वृषण्यति । नक्तोषासा न दर्शते ॥६॥

सुशिल्पे इति सुऽशिल्पे । बृहती इति । मही इति । पवमानः । वृषण्यति ।
नक्तोषसा । न । दर्शते इति ॥६॥

सुशिल्पे सुरूपे बृहती परिवृढे मही महत्यौ न संप्रति दर्शते दर्शनीये नक्तोषासा नक्तोषासौ पवमानः सोमो वृषण्यति । कामयते ॥

॥ अथ सप्तमी ॥

उभा देवा नृचक्षसा होतारा दैव्या हुवे । पवमान इंद्रो वृषा ॥७॥

उभा । देवा । नृऽचक्षसा । होतारा । दैव्या । हुवे । पवमानः । इंद्रः । वृषा ॥७॥

नृचक्षसा मनुष्याणां द्रष्टारौ दैव्या दैव्यौ देवसंबंधिनौ होतारा होतारावुभोभौ देवा देवौ हुवे । आह्वयामि यज्ञे । पवमानः सोम इंद्रो दीप्तः । तथा च यास्कः । इंद्र इरां दृणातीति वेरां दारयत इति वेरां धारयतीति वेंधे भूतानीति वा । तद्यदेनं प्राणैः समैंधत तदिंद्रस्येंद्रत्वमिति विज्ञायते । नि॰ १०.८.। इति । वृषा कामानां वर्षिता च भवतीति ॥

॥ अथाष्टमी ॥

भारती पवमानस्य सरस्वतीळा मही ।
इमं नो यज्ञमा गमन्तिस्रो देवीः सुपेशसः ॥८॥

भारती । पवमानस्य । सरस्वती । इळा । मही ।
इमं । नः । यज्ञं । आ । गमन् । तिस्रः । देवीः । सुऽपेशसः ॥८॥

भारती भारत्याख्या सरस्वती सरस्वत्याख्या च मही महतीलाख्या च तिस्रः सुपेशसः सुरूपा देवीर्देव्यो नोऽस्माकं पवमानस्य सोमस्य संबंधिनमिमं यज्ञं प्रत्यागमन् । आगच्छंतु ॥

॥ अथ नवमी ॥

त्वष्टारमग्रजां गोपां पुरोयावानमा हुवे ।
इंदुरिंद्रो वृषा हरिः पवमानः प्रजापतिः ॥९॥

त्वष्टा॑रं । अ॒ग्र॒ऽजां । गो॒पां । पु॒रः॒ऽयावा॑नं । आ । हु॒वे॒ ।
इंदुः॑ । इंद्रः॑ । वृषा॑ । हरिः॑ । पव॑मानः । प्र॒जाऽप॑तिः ॥९॥

अग्रजामग्रे जातं गोपां प्रजानां पालयितारं पुरोयावानं देवानां पुरस्तागंतारं त्वष्टारं देवमाहुवे । आह्वयामि यज्ञे । हरिर्हरितवर्णः पवमान इंदुः सोम इंद्रो देवानामीश्वरो वृषा कामानां वर्षिता च प्रजापतिः प्रजानां पालयिता च भवतीति ॥

॥ अथ दशमी ॥

वन॒स्पतिं॑ पवमान॒ मध्वा॒ सम॑ंग्धि॒ धार॑या ।
स॒हस्र॑वल्शं॒ हरि॑तं॒ भ्राज॑मानं हि॒र॒ण्यय॑ं ॥१०॥
व॒न॒स्पतिं॑ । प॒व॒मा॒न॒ । मध्वा॑ । सं । अ॒ंग्धि॒ । धार॑या ।
स॒हस्र॑ऽवल्शं । हरि॑तं । भ्राज॑मानं । हि॒र॒ण्यय॑ं ॥१०॥

हे पवमान सोम हरितं हरितवर्णं हिरण्ययं कदाचिद्धिरण्मयवर्णं च भ्राजमानं दीप्यमानं सहस्रवल्शं सहस्रशाखं वनस्पतिं देवं धारया धारामयेण मध्वा मधुना समंग्धि । अंक्ष्व । संस्कुर्वित्यर्थः ॥

॥ अथैकादशी ॥

विश्वे॑ दे॒वाः स्वाहा॑कृतिं॒ पव॑मान॒स्या ग॑त ।
वा॒युर्बृह॒स्पतिः॒ सूर्यो॒ऽग्निरिंद्रः॑ स॒जोष॑सः ॥११॥
विश्वे॑ । दे॒वाः॑ । स्वाहा॑ऽकृतिं । पव॑मानस्य । आ । ग॒त॒ ।
वा॒युः । बृ॒हस्पतिः॑ । सूर्यः॑ । अ॒ग्निः । इंद्रः॑ । स॒ऽजोष॑सः ॥११॥

हे विश्वे देवा वायुर्बृहस्पतिश्च सूर्यश्चाग्निश्चेंद्रश्च सर्वे यूयं सजोषसः संगताः संतः पवमानस्य सोमस्य स्वाहाकृतिं स्वाहाकारं प्रत्यागत । प्रत्यागच्छत ॥

॥ इति षष्ठस्य सप्तमे पंचविंशो वर्गः ॥

मंद्रयेति नवर्चं षष्ठं सूक्तं काश्यपस्यासितस्य देवलस्य वार्षं गायत्रं पवमानसोमदेवताकं ॥

॥ तत्र प्रथमा ॥

मंद्रया सोम धारया वृषा पवस्व देवयुः । अव्यो वारेष्वस्मयुः ॥१॥

मंद्रया । सोम । धारया । वृषा । पवस्व । देवऽयुः । अव्यः । वारेषु । अस्मऽयुः ॥१॥

हे सोम वृषा कामानां वर्षिता देवयुर्देवकामोऽस्मयुरस्मत्कामश्चाव्योऽवेर्वारेषु वालेषु दशापवित्रे मंद्रया मदकरया धारया पवस्व । क्षर ॥

॥ अथ द्वितीया ॥

अभि त्यं मद्यं मदमिंदविंद्र इति क्षर । अभि वाजिनो अर्वतः ॥२॥

अभि । त्यं । मद्यं । मदं । इंदो इति । इंद्रः । इति । क्षर । अभि । वाजिनः । अर्वतः ॥२॥

हे इंदो सोम त्वमिंद्र ईश्वर इति कृत्वा त्यं तं मद्यं मदकरं मदं रसमभि क्षर । वर्ष । वाजिनो बलवतोऽर्वतोऽश्वांश्चास्मदर्थमभिक्षरेत्यर्थः ॥

॥ अथ तृतीया ॥

अभि त्यं पूर्व्यं मदं सुवानो अर्ष पवित्र आ । अभि वाजमुत श्रवः ॥३॥

अभि । त्यं । पूर्व्यं । मदं । सुवानः । अर्ष । पवित्रे । आ । अभि । वाजं । उत । श्रवः ॥३॥

हे सोम सुवानोऽभिषूयमाणस्त्वं पूर्व्यं प्रत्नं त्यं तं प्रसिद्धं मदं मदकरं रसं पवित्र आ समंतादभ्यर्ष । अभिगमय । वाजं बलमस्मानभ्यर्ष । उतापि च श्रवोऽन्नमभ्यर्ष ॥

॥ अथ चतुर्थी ॥

अनु द्रप्सास इंदव आपो न प्रवतासरन् । पुनाना इंद्रमाशत ॥४॥

अनु । द्रप्सासः । इंदवः । आपः । न । प्रऽवता । असरन् । पुनानाः । इंद्रं । आशत ॥४॥

द्रप्सासो द्रुतगतयः पुनानाः क्षरंत इंदवः सोमाः प्रवता प्रवणेन मार्गेणापो नाप इवेंद्रमन्वसरन् । अनुगच्छंति । आशत । व्याप्नुवंति च ॥

॥ अथ पंचमी ॥

यमत्यमिव वाजिनं मृजंति योषणो दश । वने क्रीळंतमत्यविं ॥५॥

यं । अत्यंऽइव । वाजिनं । मृजंति । योषणः । दश । वने । क्रीळंतं । अतिऽअविं ॥५॥

अत्यविं दशापवित्रमतिक्रम्य वनेऽरण्ये क्रीळंतं वर्तमानं यं सोमं दश दशसंख्याका योषणः स्त्रियोऽंगुलय इत्यर्थः। तथा च निगमांतरं। तमीमण्वीः समर्ये आ गृभ्णंति योषणो दश। ऋग्वे° ९.१.७.। इति। वाजिनं बलिनमत्य-मिवाश्वमिव मृजंति परिचरंति। उत्तरया सहान्वयः ॥ .

॥ इति षष्ठस्य सप्तमे षड्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

तं गोभिर्वृषणं रसं मदाय देववीतये। सुतं भराय सं सृज ॥६॥

तं। गोभिः। वृषणं। रसं। मदाय। देवऽवीतये। सुतं। भराय। सं। सृज ॥६॥

वृषणं कामानां वर्षितारं देववीतये देवानां पानाय मदाय सुतमभिषुतं तं रसं भराय संग्रामाय गोभिः पयोभिः संसृज। संयोजय ॥

॥ अथ सप्तमी ॥

देवो देवाय धारयेंद्राय पवते सुतः। पयो यदस्य पीपयत् ॥७॥

देवः। देवाय। धारया। इंद्राय। पवते। सुतः। पयः। यत्। अस्य। पीपयत् ॥७॥

देवाय द्योतमानायेंद्राय सुतोऽभिषुतो देवो द्योतमानः सोमो धारया पवते। क्षरति। यद्यस्मादस्य सोमस्य पयः पीपयत् इंद्रमाप्यायितवत्। तस्माद्धारया पवत इत्यर्थः ॥

॥ अथाष्टमी ॥

आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः। प्रत्नं नि पाति काव्यं ॥८॥

आत्मा। यज्ञस्य। रंह्या। सुस्वानः। पवते। सुतः। प्रत्नं। नि। पाति। काव्यं ॥८॥

यज्ञस्यात्मभूतः सुतोऽभिषुतः सोमः सुष्वाणो यजमानेभ्यः कामान्प्रेरयन् रंह्या वेगेन पवते। क्षरति। प्रत्नं पुरातनं काव्यमात्मनः कवित्वं च निपाति। अभिरक्षति ॥

॥ अथ नवमी ॥

एवा पुनान इंद्रयुर्मदं मदिष्ठ वीतये। गुहा चिद्दधिषे गिरः ॥९॥

एव। पुनानः। इंद्रऽयुः। मदं। मदिष्ठ। वीतये। गुहा। चित्। दधिषे। गिरः ॥९॥

हे मदिष्ठातिशयेन मदकर सोमेंद्रयुरिंद्रकामस्त्वं वीतय इंद्रस्य पानायैवं

मदं पुनानः क्षरन्गुहा गुहायां । यज्ञशालायामित्यर्थः । गिरश्चिच्छब्दानपि दधिषे । अभिषववेलायामुपरवेषु धारयसि । करोषीत्यर्थः ॥

॥ इति षष्ठस्य सप्तमे सप्तविंशो वर्गः ॥

असृग्रमिति नवर्चं सप्तमं सूक्तं। असृग्रमित्यनुक्रांतं। असितो देवलो वर्षिः। तौ च कश्यपगोत्रजौ। गायत्रं छंदः सोमः पवमानो देवता। उक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

असृग्रमिंदवः पथा धर्मन्नृतस्य सुश्रियः। विदाना अस्य योजनं ॥१॥

असृग्रं। इंदवः। पथा। धर्मन्। ऋतस्य। सुऽश्रियः। विदानाः। अस्य। योजनं ॥१॥

सुश्रियः शोभनश्रयणा अस्येंद्रस्य योजनं संबंधं विदाना जानंत इंदवः सोमा धर्मन् कर्मण्यृतस्य यज्ञस्य पथा मार्गेणासृग्रं। सृज्यंते ॥

॥ अथ द्वितीया ॥

प्र धारा मध्वो अग्रियो महीरपो वि गाहते। हविर्हविष्षु वंद्यः ॥२॥

प्र। धाराः। मध्वः। अग्रियः। महीः। अपः। वि। गाहते। हविः। हविष्षु। वंद्यः ॥२॥

हविःषु हविषां मध्ये वंद्यः स्तुत्यो हविर्हविरात्मको यः सोमो महीर्महतीरपो वसतीवरीर्विगाहते तस्य मध्वः सोमस्याग्रियो मुख्या धाराः प्रपतंतीत्यर्थः ॥

॥ अथ तृतीया ॥

प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने। सद्माभि सत्यो अध्वरः ॥३॥

प्र। युजः। वाचः। अग्रियः। वृषा। अव। चक्रदत्। वने। सद्म। अभि। सत्यः। अध्वरः ॥३॥

एतदेव दर्शयति। वृषा कामानां वर्षकः सत्यः सत्यभूतोऽध्वरो हिंसावर्जितोऽग्रियो मुख्यः सोमः सद्म यज्ञगृहमभि प्रति वन उदके युजो युक्ता वाचः प्रावचक्रदत्। अवक्रंदति। शब्दान्करोतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

परि यत्काव्या कविर्नृम्णा वसानो अर्षति। स्वर्वाजी सिषासति ॥४॥

परि। यत्। काव्या। कविः। नृम्णा। वसानः। अर्षति। स्वः। वाजी। सिसासति ॥४॥

कविः क्रांतकर्मा सोमो नृम्णा नृम्णानि धनानि वसान आच्छादयन्स्तोतॄणां काव्या काव्यानि कविकर्माणि स्तोत्राणि यद्यदा पर्येषति परिगच्छति तदा स्वः स्वर्गे वाजी बलवानन्नवान्वेंद्रः सिषासति। यागं प्रत्यागंतुं स्वकीयं बलं संभक्तुमिच्छति ॥

॥ अथ पंचमी ॥

पवमानो अभि स्पृधो विशो राजेव सीदति। यदीमृण्वंति वेधसः ॥५॥

पवमानः। अभि। स्पृधः। विशः। राजाऽइव। सीदति। यत्। ई। ऋण्वंति। वेधसः ॥५॥

यद्यदेमेनं सोमं वेधसः कर्मणां कर्तार ऋण्वंति प्रेरयंति तदा पवमानः क्षरन्नेष सोमः स्पृधः स्पर्धमानान्यागविघ्नकारिणो राक्षसान्विशः स्पर्धमानान्मनुष्यान् राजेव यथा राजा तद्वदभिषीदति। नाशयितुमभिगच्छति ॥

॥ इति षष्ठस्य सप्तमेऽष्टाविंशो वर्गः ॥

॥ अथ षष्ठी ॥

अव्यो वारे परि प्रियो हरिर्वनेषु सीदति। रेभो वनुष्यते मती ॥६॥

अव्यः। वारे। परि। प्रियः। हरिः। वनेषु। सीदति। रेभः। वनुष्यते। मती ॥६॥

हरिर्हरितवर्णः प्रियो देवानां प्रियतम एव सोमो वनेषूदकेषु संपृक्तोऽव्योऽवेर्वारे वालोपेते परिषीदति। किंच रेभोऽभिषववेलायामुपरवेषु शब्दं कुर्वन्मती मत्या स्तुत्या वनुष्यते। सेव्यते ॥

॥ अथ सप्तमी ॥

स वायुमिंद्रमश्विना साकं मदेन गच्छति। रणा यो अस्य धर्मभिः ॥७॥

सः। वायुं। इंद्रं। अश्विना। साकं। मदेन। गच्छति। रण। यः। अस्य। धर्मऽभिः ॥७॥

यो यजमानोऽस्य सोमस्य धर्मभिः कर्मभिः क्रयणाभिषवादिभी रण रमते स यजमानो वायुमिंद्रं चाश्विनाश्विनौ च मदेन साकं सह गच्छति। प्राप्नोति ॥

॥ अथाष्टमी ॥

आ मित्रावरुणा भगं मध्वः पवंत ऊर्मयः। विदाना अस्य शक्मभिः ॥८॥

आ। मित्रावरुणा। भगं। मध्वः। पवंते। ऊर्मयः। विदानाः। अस्य। शक्मऽभिः ॥८॥

येषां यजमानानां मध्वः सोमस्योर्मयस्तरंगा मित्रावरुणा मित्रावरुणौ देवौ भगं भगाख्यं देवं च प्रति पवंते क्षरंति ते यजमाना अस्य सोमस्येमं सोमं विदाना जानंतः शक्मभिः सुखैः संगच्छंत इति शेषः ॥

॥ अथ नवमी ॥

अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये। श्रवो वसूनि सं जितं ॥९॥

अस्मभ्यं। रोदसीऽइति। रयिं। मध्वः। वाजस्य। सातये। श्रवः। वसूनि। सं। जितं ॥९॥

हे रोदसी द्यावापृथिव्यौ युवां मध्वो देवानां मोदयितुर्वाजस्य सोमात्मकस्यान्नस्य सातये लाभायास्मभ्यं काश्यपासितेभ्यः काश्यपदेवलेभ्यो वा रयिं धनं श्रवोऽन्नं च वसूनि वासकान्यन्यान्यपि पश्वादीनि धनानि संजितं। संजयतं। प्रयच्छतमित्यर्थः ॥

॥ इति षष्ठस्य सप्तम एकोनत्रिंशो वर्गः ॥

एते सोमा इति नवर्चमष्टमं सूक्तं। ऋष्याद्याः पूर्ववत्। अनुक्रांतं च। एते सोमा इति। उक्तः सूक्तविनियोगः ॥ ग्रावस्तोत्रे गाणगारिमतेनाभिरूपकरणे सोमे मृज्यमाने मृजंति त्वेत्येषा। सूचितं च। अथापरमभिरूपं कुर्यादिति गाणगारिराप्यायस्व समेतु त इति तिस्रो मृजंति त्वा दश क्षिपः। आ० ५.१२.। इति ॥

॥ तत्र प्रथमा ॥

एते सोमा अभि प्रियमिंद्रस्य काममक्षरन्। वर्धंतो अस्य वीर्यं ॥१॥

एते। सोमाः। अभि। प्रियं। इंद्रस्य। कामं। अक्षरन्। वर्धंतः। अस्य। वीर्यं ॥१॥

एत अभिषुता इमे सोमा अस्येंद्रस्य वीर्यं शक्तिं वर्धंतो वर्धयंत इंद्रस्य कामं काम्यं प्रियं प्रीतिकरं रसमभ्यक्षरन्। अभिपवंते। अभ्यवर्षन् ॥

॥ अथ द्वितीया ॥

पुनानासश्चमूषदो गच्छंतो वायुमश्विना। ते नो धांतु सुवीर्यं ॥२॥

पुनानासः। चमूऽसदः। गच्छंतः। वायुं। अश्विना। ते। नः। धांतु। सुऽवीर्यं ॥२॥

ते प्रसिद्धाः सोमाः पुनानासः पुनाना अभिषूयमाणाश्चमूषदश्चमसेषु सीदंतो वायुमश्विनाश्विनौ च गच्छंतः प्राप्नुवंतो नोऽस्मभ्यं सुवीर्यं शोभनवीर्यं धांतु। धारयंतु। प्रयच्छंत्वित्यर्थः ॥

॥ अथ तृतीया ॥

इंद्रस्य सोम राधसे पुनानो हार्दि चोदय । ऋतस्य योनिमासदं ॥३॥

इंद्रस्य । सोम । राधसे । पुनानः । हार्दि । चोदय । ऋतस्य । योनिं । आऽसदं ॥३॥

हे सोम पुनानोऽभिषूयमाणो हार्दमभिलषितस्त्वमिंद्रस्य राधसे संराधनायर्तस्य यज्ञस्य योनिं स्थानमासदं यथेंद्र आसीदति तथेंद्रं चोदय । प्रेरय ॥

॥ अथ चतुर्थी ॥

मृजंति त्वा दश क्षिपो हिन्वंति सप्त धीतयः । अनु विप्रा अमादिषुः ॥४॥

मृजंति । त्वा । दश । क्षिपः । हिन्वंति । सप्त । धीतयः । अनु । विप्राः । अमादिषुः ॥४॥

हे सोम त्वा त्वां दश दशसंख्याकाः क्षिपोऽगुलयः । क्षिपः क्षिप इत्यंगुलिनामसु पाठात् । मृजंति । परिचरंति । सप्त सप्तसंख्याका धीतयो होत्रकाश्च त्वा त्वां हिन्वंति । स्वस्वव्यापारैः प्रीणयंति । विप्रा मेधाविनश्च त्वामन्वमादिषुः । अनुमादयंति ॥

॥ अथ पंचमी ॥

देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः । सं गोभिर्वासयामसि ॥५॥

देवेभ्यः । त्वा । मदाय । कं । सृजानं । अति । मेष्यः । सं । गोभिः । वासयामसि ॥५॥

हे सोम मेष्योऽवेर्लोमानि कमुदकं चात्यभि सृजानं त्वा त्वां देवेभ्यो देवानां । विभक्तिव्यत्ययः । मदाय मदार्थं गोभिर्गोविकारैः पयोभिः संवासयामसि । संवासयामः ॥

॥ इति षष्ठस्य सप्तमे त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः । परि गव्यान्यव्यत ॥६॥

पुनानः । कलशेषु । आ । वस्त्राणि । अरुषः । हरिः । परि । गव्यानि । अव्यत ॥६॥

पुनानः पूयमानः कलशेषु कुंभेषु निषिच्यमानोऽरुष आरोचमानो हरिर्हरितवर्णः सोमो गव्यानि दध्यादीनि वस्त्राणि वासांसीव पर्यव्यत । पर्याच्छादयति ॥

॥ अथ सप्तमी ॥

मघोन आ पवस्व नो जहि विश्वा अप द्विषः । इंदो सखायमा विश ॥७॥

मघोनः । आ । पवस्व । नः । जहि । विश्वाः । अप । द्विषः । इंदो इति । सखायं । आ । विश ॥७॥

हे इंदो सोम मघोनो धनवतो नोऽस्मान्प्रति पवस्व । क्षर । विश्वा विश्वान्द्विषो द्वेष्टॄनपजहि । मारय च । सखायं प्रियमिंद्रमाविश । आप्नुहि च ॥

॥ अथाष्टमी ॥

वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि । सहो नः सोम पृत्सु धाः ॥८॥

वृष्टिं । दिवः । परि । स्रव । द्युम्नं । पृथिव्याः । अधि । सहः । नः । सोम । पृत्ऽसु । धाः ॥८॥

हे सोम त्वं दिवो द्युलोकाद्वृष्टिं वर्षं परिस्रव । वर्ष । पृथिव्या अधि पृथिव्यां । अधिः सप्तम्यर्थानुवादः । द्युम्नमन्नं चोत्पादयेति शेषः । नोऽस्माकं सहो बलं च पृत्सु संग्रामेषु धाः । धेहि ॥

॥ अथ नवमी ॥

नृचक्षसं त्वा वयमिंद्रपीतं स्वर्विदं । भक्षीमहि प्रजामिषं ॥९॥

नृऽचक्षसं । त्वा । वयं । इंद्रऽपीतं । स्वःऽविदं । भक्षीमहि । प्रऽजां । इषं ॥९॥

हे सोम नृचक्षसं नृणां द्रष्टारं स्वर्विदं सर्वज्ञमिंद्रपीतमिंद्रेण पीतं त्वा त्वां पिबंतो वयं काश्यपासिताः काश्यपदेवला वा प्रजां पुत्रादिकामिषमन्नं च भक्षीमहि । भजेमहि ॥

॥ इति षष्ठस्य सप्तम एकत्रिंशो वर्गः ॥

परि प्रियेति नवर्चं नवमं सूक्तं । ऋष्याद्याः पूर्ववत् । परि प्रियेत्यनुक्रांतं । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः । सुवानो याति कविक्रतुः ॥१॥

परि । प्रिया । दिवः । कविः । वयांसि । नप्त्योः । हितः । सुवानः । याति । कविऽक्रतुः ॥१॥

कविर्मेधावी कविक्रतुः क्रांतप्रज्ञः क्रांतकर्मा वा सोमो नप्त्योरधिषवणफल-

कयोर्हितो निहितः सुवानोऽभिषूयमाणो दिवो द्युलोकस्य परि प्रियातिप्रियाणि वयांसि ग्राव्णः ॥ तथा च मंत्रवर्णः । वयांसि श्येना अतिथयः पर्वतानां ककुभ इति ॥ याति । गच्छति ॥

॥ अथ द्वितीया ॥

प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे । वीत्यर्ष चनिष्ठया ॥२॥

प्रऽप्र । क्षयाय । पन्यसे । जनाय । जुष्टः । अद्रुहे । वीती । अर्ष । चनिष्ठया ॥२॥

हे सोम प्र प्रात्यंतं क्षयाय तव निवासभूतायाद्रुहेऽद्रोग्ध्रे च पन्यसे स्तोत्रे जनाय मनुष्याय वीती वीत्यै भक्षणाय जुष्टः पर्याप्तस्त्वं चनिष्ठयान्नवत्तमया धारयार्ष । यागं प्रति गच्छ ॥

॥ अथ तृतीया ॥

स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् । महान्मही ऋतावृधा ॥३॥

सः । सूनुः । मातरा । शुचिः । जातः । जाते इति । अरोचयत् । महान् । मही इति । ऋतऽवृधा ॥३॥

जात उत्पन्नः शुचिर्विशुद्धो महान्हविरुत्तमः स सोमाख्यः सूनुः पुत्रो मही महत्यावृतावृधा यज्ञस्य वर्धयित्र्यौ जाते विश्वस्य जनयित्र्यौ मातरात्मनो मातरौ द्यावापृथिव्यावरोचयत् । रोचयति । दीपयति ॥

॥ अथ चतुर्थी ॥

स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः । या एकमक्षि वावृधुः ॥४॥

सः । सप्त । धीतिऽभिः । हितः । नद्यः । अजिन्वत् । अद्रुहः । याः । एकं । अक्षि । ववृधुः ॥४॥

या नद्यो यमेकं मुख्यं सोममक्ष्यक्षीणं ववृधुर्वर्धयंति स सोमो धीतिभिरंगुलिभिः । रशना धीतय इत्यंगुलिनामसु पाठात् । हितो निहितः सन्नद्रुहो द्रोहवर्जिताः सप्त सप्तसंख्याका नद्यो नदीरजिन्वत् । प्रीणयति ॥

॥ अथ पंचमी ॥

ता अभि संतमस्तृतं महे युवानमा दधुः । इंदुमिंद्र तव व्रते ॥५॥

ताः । अभि । संतं । अस्तृतं । महे । युवानं । आ । दधुः । इंदुं । इंद्र । तव । व्रते ॥५॥

हे इंद्र तव त्वदीये व्रते कर्मणि ता अंगुल्यः । पूर्वत्र धीतिभिरित्यंगुलीनामुपात्तत्वात्तच्छब्देन परामर्शः । संतं विद्यमानमस्तृतमहिंसितं युवानं नित्यतरुणमिंदुं सोमं महे महतेऽभिषवादिलक्षणाय कर्मणेऽभ्यादधुः ॥

॥ इति षष्ठस्य सप्तमे द्वात्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

अभि वह्निरमर्त्यः सप्त पश्यति वावहिः । क्रिविर्देवीरतर्पयत् ॥६॥

अभि । वह्निः । अमर्त्यः । सप्त । पश्यति । वावहिः । क्रिविः । देवीः । अतर्पयत् ॥६॥

यो वह्निर्यज्ञस्य धुरो वोढामर्त्यो मरणरहितो वावहिर्देवानां तृप्तेरत्यंतं वोढा च सोमः सप्त नदीः पश्यति सोऽयं क्रिविः कूपरूपेण पूर्णोऽवस्थितः सन्देवीर्नदीरतर्पयत् । तर्पयति ॥

॥ अथ सप्तमी ॥

अवा कल्पेषु नः पुमस्तमांसि सोम योध्या । तानि पुनान जंघनः ॥७॥

अव । कल्पेषु । नः । पुमः । तमांसि । सोम । योध्या । तानि । पुनान । जंघनः ॥७॥

हे पुमः पुमन्सोम कल्पेषु कल्पनीयेष्वहःसु नोऽस्मानव । रक्ष । अपि च पुनान हे पवमान सोम त्वं योध्या योधनीयानि तमांसि रक्षांसि यानि तानि जंघनः । नाशय ॥

॥ अथाष्टमी ॥

नू नव्यसे नवीयसे सूक्ताय साधया पथः । प्रत्नवद्रोचया रुचः ॥८॥

नु । नव्यसे । नवीयसे । सुऽउक्ताय । साधय । पथः । प्रत्नऽवत् । रोचय । रुचः ॥८॥

हे सोम नव्यसे नव्याय नूतनाय नवीयसे स्तुत्यायास्माकं सूक्ताय पथो मार्गान्नु क्षिप्रं साधय । अभिगच्छ । अपि च प्रत्नवद्यथापूर्वं रुचः स्वदीप्ती रोचय । प्रकाशय ॥

॥ अथ नवमी ॥

पवमान महि श्रवो गामश्वं रासि वीरवत् । सना मेधां सना स्वः ॥९॥

पवमान । महि । श्रवः । गां । अश्वं । रासि । वीरऽवत् । सन । मेधां । सन । स्व१रिति स्वः ॥९॥

हे पवमान सोम यस्त्वं वीरवत्पुत्रवद्गहि महच्छ्रवोऽन्नं गां चाश्वं च रासि अस्मभ्यं प्रयच्छसि स त्वं मेधां सन। अस्मभ्यं प्रयच्छ। अपि च स्वर्यदस्मदभिलषितं तत्सर्वं सन। देहि ॥

॥ इति षष्ठस्य सप्तमे त्रयस्त्रिंशो वर्गः ॥

प्र स्वानास इति नवर्चं दशमं सूक्तं। ऋष्याद्याः पूर्ववत्। प्र स्वानास इत्यनुक्रांतं। उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र स्वानासो रथा इवार्वंतो न श्रवस्यवः। सोमासो राये अक्रमुः ॥१॥

प्र। स्वानासः। रथाःऽइव। अर्वंतः। न। श्रवस्यवः। सोमासः। राये। अक्रमुः ॥१॥

प्र स्वानासोऽभिषववेलायामुपरवेषु शब्दं कुर्वंतः सोमासः सोमा रथा इव यथा शब्दं कुर्वंतो रथा अर्वंतो न यथा शब्दं कुर्वंतोऽश्वास्तथा श्रवस्यवः शत्रुभ्योऽन्नमिच्छंतो राये यजमानानां धनायाक्रमुः। आगच्छन् ॥

॥ अथ द्वितीया ॥

हिन्वानासो रथा इव दधन्विरे गभस्त्योः। भरासः कारिणामिव ॥२॥

हिन्वानासः। रथाःऽइव। दधन्विरे। गभस्त्योः। भरासः। कारिणांऽइव ॥२॥

सोमा रथा इव यथा रथास्तथा हिन्वानासो हिन्वाना यागदेशं प्रति गच्छंतो भरासो भराः कारिणामिव यथा भारवाहिनां बाह्वोर्धीयंते तथा गभस्त्योर्ऋत्विजां बाह्वोः। गभस्ती बाहू इति बाहुनामसु पाठात्। दधन्विरे। धीयंते ॥

॥ अथ तृतीया ॥

राजानो न प्रशस्तिभिः सोमासो गोभिरंजते। यज्ञो न सप्त धातृभिः ॥३॥

राजानः। न। प्रशस्तिऽभिः। सोमासः। गोभिः। अंजते। यज्ञः। न। सप्त। धातृऽभिः ॥३॥

सोमासः सोमाः प्रशस्तिभिः प्रशस्ताभिः स्तुतिरूपाभिर्वाग्भी राजानो न यथा राजानः सप्त धातृभिः सप्त होत्राभिर्यज्ञो न यथा च यज्ञस्तथा गोभिर्गोविकारैः पयोभिरंजते। अज्यंते। संस्क्रियंत इत्यर्थः ॥

॥ अथ चतुर्थी ॥

परि सुवानास इंदवो मदाय बर्हणा गिरा। सुता अर्षंति धारया ॥४॥

परि। सुवानासः। इंदवः। मदाय। बर्हणा। गिरा। सुताः। अर्षंति। धारया ॥४॥

सुवानासः सुवाना अभिषूयमाणा इंदवः सोमा बर्हणा महत्या गिरा स्तुतिरूपया वाचा सुता अभिषुताः संतो मदाय मदार्थं धारया पर्यर्षंति। परितो गच्छंति ॥

॥ अथ पंचमी ॥

आपानासो विवस्वतो जनंत उषसो भगं। सूरा अण्वं वि तन्वते ॥५॥

आपानासः। विवस्वतः। जनंतः। उषसः। भगं। सूराः। अण्वं। वि। तन्वते ॥५॥

विवस्वत इंद्रस्यापानास आपानभूता उषसो भगं जनंतो जनयंतः सूराः सरंतः सोमा अण्वं वितन्वते। अभिषववेलायामुपरवेषु शब्दं कुर्वंति ॥

॥ इति षष्ठस्य सप्तमे चतुस्त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

अप द्वारा मतीनां प्रत्ना ऋण्वंति कारवः। वृष्णो हरस आयवः ॥६॥

अप। द्वारा। मतीनां। प्रत्नाः। ऋण्वंति। कारवः। वृष्णः। हरसे। आयवः ॥६॥

मतीनां स्तुतीनां कारवः कर्तार ऋत्विजः प्रत्नाः पुराणा वृष्णः सेचकस्य सोमस्य हरस आहरस आहर्तारश्चायवो मनुष्या द्वारा यज्ञस्य द्वाराण्यपार्ण्वंति ॥

॥ अथ सप्तमी ॥

समीचीनास आसते होतारः सप्तजामयः। पदमेकस्य पिप्रतः ॥७॥

संऽईचीनासः। आसते। होतारः। सप्तऽजामयः। पदं। एकस्य। पिप्रतः ॥७॥

समीचीनासः समीचीना जामयो जामिसदृशा एकस्य सोमस्य पदं स्थानं पिप्रतः पूरयंतः सप्त होतारः सप्त होत्रका आसते। यज्ञ उपविशंति ॥

॥ अथाष्टमी ॥

नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा। कवेरपत्यमा दुहे ॥८॥

नाभा। नाभिं। नः। आ। ददे। चक्षुः। चित्। सूर्ये। सचा। कवेः। अपत्यं। आ। दुहे ॥८॥

नाभिं यज्ञस्य नाभिभूतं सोमं नोऽस्माकं नाभा नाभावहमाददे । पिबामीत्यर्थः ॥ पीतसोमानामस्माकं चक्षुश्चिच्चक्षुरपि सूर्ये सचा संगतं भवति । किंच कवेः क्रांतकर्मणः सोमस्यापत्यमंशुमादुहे । आपूरयामि ॥

॥ अथ नवमी ॥

अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितं । सूरः पश्यति चक्षसा ॥९॥

अभि । प्रिया । दिवः । पदं । अध्वर्युऽभिः । गुहा । हितं । सूरः । पश्यति । चक्षसा ॥९॥

सूरः सुवीर्य इंद्रश्चक्षसा चक्षुषा दिवो दीप्तस्यात्मनः प्रिया प्रियं पदमध्वर्युभिर्गुहा गुहायां हृदये हितं निहितं पीतं सोममथभिपश्यति ॥

॥ इति षष्ठस्य सप्तमे पंचत्रिंशो वर्गः ॥

उपास्मा इति नवर्चमेकादशं सूक्तं । ऋष्याद्याः पूर्ववत् । उपास्मा इत्यनुक्रांतं । उक्तः सूक्तविनियोगः । अभिष्टवे घर्मदुघावत्सेऽपनीयमाने नमसेदुपेत्येषा । सूचितं च । नमसेदुप सीदत संजानाना उप सीदन्नभिज्ञु । आ० ४.७. । इति ॥

॥ तत्र प्रथमा ॥

उपास्मै गायता नरः पवमानायेंदवे । अभि देवाँ इयक्षते ॥१॥

उप । अस्मै । गायत । नरः । पवमानाय । इंदवे । अभि । देवान् । इयक्षते ॥१॥

हे नरो नेतार ऋत्विजो यज्ञस्य देवानिंद्रादीनभीयक्षत आभिमुख्येन यष्टुमिच्छते पवमानाय क्षरतेऽस्मा अभिषूयमाणायेंदवे सोमायोपगायत । उपगानं कुरुत ॥

॥ अथ द्वितीया ॥

अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः । देवं देवाय देवयु ॥२॥

अभि । ते । मधुना । पयः । अथर्वाणः । अशिश्रयुः । देवं । देवाय । देवऽयु ॥२॥

हे सोम ते तव देवं देवनशीलं देवयु देवयुं देवकामं रसं देवाय देवनशीलायेंद्राय मधुना पयो गव्येन पयसाथर्वाण ऋषयोऽभ्यशिश्रयुः । अभ्यश्रीणन् । समस्कुर्वन्नित्यर्थः ॥

॥ अथ तृतीया ॥

स नः पवस्व शं गवे शं जनाय शमर्वते । शं राजन्नोषधीभ्यः ॥३॥

सः । नः । पवस्व । शं । गवे । शं । जनाय । शं । अर्वते । शं । राजन् । ओषधीभ्यः ॥३॥

हे राजन्दीप्यमान सोम स प्रसिद्धस्त्वं नोऽस्माकं गवे शं सुखं पवस्व। क्षर। जनाय पुत्रादये च शं पवस्व। अर्वतेऽश्वाय च शं पवस्व। ओषधीभ्यश्च शं पवस्व ॥

॥ अथ चतुर्थी ॥

बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे। सोमाय गाथमर्चत ॥४॥

बभ्रवे। नु। स्वऽतवसे। अरुणाय। दिविऽस्पृशे। सोमाय। गाथं। अर्चत ॥४॥

हे स्तोतारो बभ्रवे बभ्रुवर्णाय स्वतवसे स्वबलायारुणाय कदाचिदरुणवर्णाय दिविस्पृशे दिवं स्पृशते सोमाय नु क्षिप्रं गाथं स्तुतिरूपां वाचमर्चत। उच्चारयतेत्यर्थः ॥

॥ अथ पंचमी ॥

हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन। मधावा धावता मधु ॥५॥

हस्तऽच्युतेभिः। अद्रिऽभिः। सुतं। सोमं। पुनीतन। मधौ। आ। धावत। मधु ॥५॥

हे ऋत्विजो हस्तच्युतेभिर्हस्तप्रच्युतैरद्रिभिरभिषवग्रावभिः सुतमभिषुतं सोमं पुनीतन। पवित्रे पावयत। अपि च मधौ मदकरे सोमे मधु गव्यं पय आधावत। प्रक्षिपत ॥

॥ इति षष्ठस्य सप्तमे षट्त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

नमसेदुप सीदत दध्नेदभि श्रीणीतन। इंदुमिंद्रे दधातन ॥६॥

नमसा। इत्। उप। सीदत। दध्ना। इत्। अभि। श्रीणीतन। इंदुं। इंद्रे। दधातन ॥६॥

हे ऋत्विजो नमसेन्नमस्कारेणैवोपसीदत। सोममुपगच्छत। दध्नेद्दध्नैवाभिश्रीणीतन। अभिश्रीणीत च। इंद्रे इंदुं सोमं दधातन। धत्त च ॥

॥ अथ सप्तमी ॥

अमित्रहा विचर्षणिः पवस्व सोम शं गवे। देवेभ्यो अनुकामकृत् ॥७॥

अमित्रऽहा। विऽचर्षणिः। पवस्व। सोम। शं। गवे। देवेभ्यः। अनुकामऽकृत् ॥७॥

हे सोमामित्रहामित्राणां हंता विचर्षणिर्विद्रष्टा देवेभ्योऽनुकामकृदभीष्टस्य कर्ता त्वं गवेऽस्माकं गवे शं सुखं पवस्व। क्षर ॥

॥ अथाष्टमी ॥

इंद्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ॥८॥

इंद्राय । सोम । पातवे । मदाय । परि । सिच्यसे । मनःऽचित् । मनसः । पतिः ॥८॥

हे सोम मनश्चिन्मनसो ज्ञाता मनसस्पतिरीश्वरस्त्वमिंद्रायेंद्रस्य पातवे पानाय मदाय च परिषिच्यसे । परितः पात्रेषु सिच्यसे ॥

॥ अथ नवमी ॥

पवमान सुवीर्यं रयिं सोम रिरीहि नः । इंदविंद्रेण नो युजा ॥९॥

पवमान । सुऽवीर्यं । रयिं । सोम । रिरीहि । नः । इंदो इति । इंद्रेण । नः । युजा ॥९॥

हे इंदो क्लिद्यमान पवमान सोम त्वं सुवीर्यं शोभनवीर्योपेतं रयिं धनं नोऽस्माकं संबंधिनेंद्रेण युजा सहायेन नोऽस्मभ्यं रिरीहि । देहि ॥

॥ इति षष्ठस्य सप्तमे सप्तत्रिंशो वर्गः ॥

सोमा असृग्रमिति नवर्चं द्वादशं सूक्तं । ऋष्याद्याः पूर्ववत् । सोमा असृग्रमित्यनुक्रांतं । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

सोमा असृग्रमिंदवः सुता ऋतस्य सादने । इंद्राय मधुमत्तमाः ॥१॥

सोमाः । असृग्रं । इंदवः । सुताः । ऋतस्य । सदने । इंद्राय । मधुमत्ऽतमाः ॥१॥

सुता अभिषुता मधुमत्तमा अतिशयेन मधुमंत इंदवः सोमा ऋतस्य यज्ञस्य सादने गृह इंद्रायेंद्रार्थमसृग्रं । सृज्यंते ॥

॥ अथ द्वितीया ॥

अभि विप्रा अनूषत गावो वत्सं न मातरः । इंद्रं सोमस्य पीतये ॥२॥

अभि । विप्राः । अनूषत । गावः । वत्सं । न । मातरः । इंद्रं । सोमस्य । पीतये ॥२॥

विप्रा मेधाविनः सोमस्य पीतये पानायेंद्रं मातरो जनयित्र्यो गावो वत्सं न यथा वत्सं प्रति तद्वदभ्यनूषत । अभिशब्दयंति ॥

॥ अथ तृतीया ॥

मदच्युत्क्षेति सादने सिंधोरूर्मा विपश्चित्। सोमो गौरी अधि श्रितः ॥३॥

मदऽच्युत्। क्षेति। सदने। सिंधोः। ऊर्मा। विपःऽचित्। सोमः। गौरी इति। अधि। श्रितः ॥३॥

मदच्युन्मदकरस्य रसस्य च्यावयिता सोमः सादने। संहितायां दीर्घश्छांदसः। स्थाने क्षेति। निवसति। एतदेव विवृणोति। सिंधोर्नद्या ऊर्मावूर्मौ तरंगे। वसतीवरीष्वित्यर्थः। विपश्चिद्विद्वान्सोमो गौरी अधि गौर्यामधि। अधीति सप्तम्यर्थानुवादः। माध्यमिकायां वाचि। गौरी गांधर्वीति वाङ्नामसु पाठात्। श्रितः। मिश्रयति ॥

॥ अथ चतुर्थी ॥

दिवो नाभा विचक्षणोऽव्यो वारे महीयते। सोमो यः सुक्रतुः कविः ॥४॥

दिवः। नाभा। विऽचक्षणः। अव्यः। वारे। महीयते। सोमः। यः। सुऽक्रतुः। कविः ॥४॥

यः सुक्रतुः सुप्रज्ञः कविः क्रांतकर्मा विचक्षणो विद्रष्टा स सोमो दिवोऽंतरिक्षस्य नाभा नाभौ नाभिभूतेऽव्योऽवेर्वारे वाले महीयते। पूज्यते। पूयमानः स्तूयत इत्यर्थः ॥

॥ अथ पंचमी ॥

यः सोमः कलशेष्वाँ अंतः पवित्र आहितः। तमिंदुः परि षस्वजे ॥५॥

यः। सोमः। कलशेषु। आ। अंतरिति। पवित्रे। आऽहितः। तं। इंदुः। परि। सस्वजे ॥५॥

यः सोमः कलशेषु कुंभेष्वा। आस्ते। यश्च पवित्रे पवित्रस्यांतर्मध्य आहितो निहितस्तं स्वांशभूतं सोममिंदुः सोमो देवः परिषस्वजे। प्रविशति ॥

॥ इति षष्ठस्य सप्तमेऽष्टत्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

प्र वाचमिंदुरिष्यति समुद्रस्याधि विष्टपि। जिन्वन्कोशं मधुश्चुतं ॥६॥

प्र। वाचं। इंदुः। इष्यति। समुद्रस्य। अधि। विष्टपि। जिन्वन्। कोशं। मधुऽश्चुतं ॥६॥

इंदुः सोमो मधुश्चुतं मधुनश्च्यावकं कोशं मेघं। असुरः कोश इति मेघनामसु

पाठात्। जिन्वन्प्रीणयन्समुद्रस्यांतरिक्षस्याधि विष्टपि विष्टब्धे स्थाने वाचं प्रेष्यति। प्रेरयति। पवित्रे पूयमानः शब्दं करोतीत्यर्थः॥

॥ अथ सप्तमी ॥

नित्यस्तोत्रो वनस्पतिर्धीनामंतः सबर्दुघः। हिन्वानो मानुषा युगा ॥७॥

नित्यऽस्तोत्रः। वनस्पतिः। धीनां। अंतरिति। सबःऽदुघः। हिन्वानः। मानुषा। युगा॥७॥

नित्यस्तोत्रः संततस्तोत्रः सबर्दुघोऽमृतस्य दोग्धा वनस्पतिर्वनानां पालयिता सोमो मानुषा मानुषाणि युगा युगान्यहीनैकाहात्मकानि हिन्वानः प्रीणयन्धीनां कर्मणामंतर्मध्ये निवसतीत्यर्थः॥

॥ अथाष्टमी ॥

अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति। विप्रस्य धारया कविः ॥८॥

अभि। प्रिया। दिवः। पदा। सोमः। हिन्वानः। अर्षति। विप्रस्य। धारया। कविः॥८॥

कविः क्रांतकर्मा सोमो दिवोऽतरिक्षाद्धिन्वानः प्रेर्यमाणो विप्रस्य मेधाविनः स्वस्य धारया प्रिया प्रियाणि पदानि स्थानान्यभ्यर्षति। अभिगच्छति॥

॥ अथ नवमी ॥

आ पवमान धारय रयिं सहस्रवर्चसं। अस्मे इंदो स्वाभुवं ॥९॥

आ। पवमान। धारय। रयिं। सहस्रऽवर्चसं। अस्मे इति। इंदो इति। सुऽआभुवं॥९॥

हे पवमानेंदो सोम त्वं सहस्रवर्चसं बहुदीप्तिं स्वाभुवं शोभनभवनं रयिं धनमस्मे अस्मासु धारय। प्रक्षिपेत्यर्थः॥

॥ इति षष्ठस्य सप्तम एकोनचत्वारिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टके सप्तमोऽध्यायः॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
षष्ठस्य सप्तमोऽध्यायः संग्रहात्संप्रदर्शितः ।
अथाष्टमः सुमतिना संगमेन प्रदर्श्यते ॥

तत्र सोमः पुनान इति नवर्चं त्रयोदशं सूक्तं । असितो देवलो वर्षिः । सोमो देवता ॥ पवमानगुणः सोमो विज्ञेयः काश्यपावृषी इति विद्यादनुक्तेऽपि लाघवाया हळ्हच्युतात्। सोम इत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

सोमः पुनानो अर्षति सहस्रधारो अत्यविः । वायोरिंद्रस्य निष्कृतं ॥१॥

सोमः। पुनानः। अर्षति। सहस्रऽधारः। अतिऽअविः। वायोः। इंद्रस्य। निःऽकृतं ॥१॥

अयं पुनानः पावकः सोमोऽर्षति। गच्छति। कीदृशोऽयं पवमानः। सहस्रधारोऽपरिमितधारोऽत्यविः । अत्राविशब्देन तल्लोमान्युच्यंते । अविलोमभिर्निष्पादितं दशापवित्रमित्यर्थः । तदतिक्रम्य गच्छतीत्यत्यविः । किमर्थं । वायोरिंद्रस्य च पानायेति शेषः । किं प्रति । निष्कृतं । निरित्येष समित्येतस्मिन्नर्थे। संस्कृतं पात्रं प्रति ॥

॥ अथ द्वितीया ॥

पवमानमवस्यवो विप्रमभि प्र गायत। सुष्वाणं देववीतये ॥२॥

पवमानं। अवस्यवः। विप्रं। अभि। प्र। गायत। सुस्वानं। देवऽवीतये ॥२॥

हे अवस्यवो रक्षणकामा उद्गात्रादयो यूयं पवमानं शोधकं विप्रं विशेषेण देवानां प्रीणयितारं विप्रवच्छुद्धं वा। अथवा विप्र इति मेधाविनाम। मेधाविनं देववीतये देवपानाय सुष्वाणं सूयमानमभिप्रगायत। आभिमुख्येन प्रकर्षेण स्तुत॥

॥ अथ तृतीया ॥

पवंते वाजसातये सोमाः सहस्रपाजसः । गृणाना देववीतये ॥३॥

पवंते। वाजऽसातये। सोमाः। सहस्रऽपाजसः। गृणानाः। देवऽवीतये ॥३॥

पवंते क्षरंति सोमाः । किमर्थं । वाजसातयेऽन्नस्य लाभाय । कीदृशाः । सहस्रपाजसो बहुबलाः । पातॄणां बलप्रदा इत्यर्थः । गृणानाः । कर्मणि कर्तृप्रत्ययः । स्तूयमानाः । पुनः किमर्थं । देववीतये । देवानां वीतिर्गतिः प्राप्तिर्भक्षणं वा यस्मिन्स देववीतिर्यज्ञः । तदर्थं । यज्ञसिद्धिः साक्षात्प्रयोजनं तद्द्वारा वाजलाभ इति ॥

॥ अथ चतुर्थी ॥

उत नो वाजसातये पवस्व बृहतीरिषः । द्युमदिंदो सुवीर्यं ॥४॥

उत । नः । वाजऽसातये । पवस्व । बृहतीः । इषः । द्युऽमत् । इंदो इति । सुऽवीर्यं ॥४॥

उतापि च नोऽस्माकं वाजसातयेऽन्नलाभाय हे इंदो सोम बृहतीरिषो महती रसधारा द्युमद्दीप्तिमत्सुवीर्यं शोभनसामर्थ्यं च पवस्व । क्षर । शोभनसामर्थ्योपेता धाराः पवस्वेत्यर्थः । अथवा वाजसातये संग्रामाय बृहतीरिषो द्युमत्सुवीर्यं संपादयितुं पवस्वेति योज्यं ॥

॥ अथ पंचमी ॥

ते नः सहस्रिणं रयिं पवंतामा सुवीर्यं । सुवाना देवास इंदवः ॥५॥

ते । नः । सहस्रिणं । रयिं । पवंतां । आ । सुऽवीर्यं । सुवानाः । देवासः । इंदवः ॥५॥

त इंदवः सोमा नोऽस्माकं सहस्रिणं सहस्रसंख्योपेतं रयिं धनं सुवीर्यं चापवंतां । कीदृशास्ते । सुवानाः सूयमाना देवासो द्योतनादिगुणयुक्ताः ॥

॥ इति षष्ठस्याष्टमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

अत्या हियाना न हेतृभिरसृग्रं वाजसातये । वि वारमव्यमाशवः ॥६॥

अत्याः । हियानाः । न । हेतृऽभिः । असृग्रं । वाजऽसातये । वि । वारं । अव्यं । आशवः ॥६॥

वाजसातये संग्रामाय हियानाः प्रेर्यमाणा अत्या नाश्वा इव । ते यथा प्रेरकैः प्रेर्यमाणाः संग्रामाय शीघ्रं धावंति तद्वद्धेतृभिः प्रेरकैः प्रेर्यमाणा आशवः शीघ्रगामिनः सोमा वाजसातयेऽन्नलाभायाव्यं वारं दशापवित्रं व्यसृग्रं । व्यतिसृज्यंते ॥

॥ अथ सप्तमी ॥

वाश्रा अर्षंतीदवोऽभि वत्सं न धेनवः । दधन्विरे गभस्त्योः ॥७॥

वाश्राः । अर्षंति । इंदवः । अभि । वत्सं । न । धेनवः । दधन्विरे । गभस्त्योः ॥७॥

वाश्राः शब्दयंत इंदवः सोमा अभ्यर्षंत्यभिगच्छंति पात्रं प्रति वाश्राः शब्दकारिण्यो धेनवो न । ता यथा शब्दयंत्यो वत्सं प्रत्यागच्छंति तद्वत् । त एव गभस्त्योर्बाह्वोर्दधन्विरे । ध्रियंते च ॥

॥ अथाष्टमी ॥

जुष्ट इंद्राय मत्सरः पवमान कनिक्रदत् । विश्वा अप द्विषो जहि ॥८॥

जुष्टः । इंद्राय । मत्सरः । पवमान । कनिक्रदत् । विश्वाः । अप । द्विषः । जहि ॥८॥

इंद्राय जुष्टः प्रियः पर्याप्तो मत्सरः सोमो भवतीति शेषः । मत्सरः सोमो मंदतेस्तृप्तिकर्मण इति निरुक्तं । नि० २.५. । हे पवमान त्वं कनिक्रदच्छब्दयन्विश्वा द्विषः सर्वानस्माकं द्वेष्टॄनपजहि ॥

॥ अथ नवमी ॥

अपघ्नंतो अराव्णः पवमानाः स्वर्दृशः । योनावृतस्य सीदत ॥९॥

अपऽघ्नंतः । अराव्णः । पवमानाः । स्वःऽदृशः । योनौ । ऋतस्य । सीदत ॥९॥

हे पवमाना अराव्णोऽदानानयजमानानपघ्नंतो हिंसंतः स्वर्दृशः सर्वस्य द्रष्टारश्च यूयमृतस्य योनौ यज्ञस्य स्थाने सीदत । अथवा सोमपानार्थमुक्तलक्षणा देवा ऋतस्य योनौ सीदतेति योज्यं ॥

॥ इति षष्ठस्याष्टमे द्वितीयो वर्गः ॥

परि प्रेत्यष्टर्चं चतुर्दशं सूक्तं । ऋष्यादि पूर्ववत् । परि प्रासिष्यदित्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

परि प्रासिष्यदत्कविः सिंधोरूर्मावधि श्रितः । कारं बिभ्रत्पुरुस्पृहं ॥१॥

परि । प्र । असिस्यदत् । कविः । सिंधोः । ऊर्मौ । अधि । श्रितः । कारं । बिभ्रत् । पुरुऽस्पृहं ॥१॥

परि प्रासिष्यदत्परिप्रस्यंदते कविर्मेधावी सोमः सिंधोरूर्मौ तरंगे वसती-

वर्युदकरसेऽधिश्रित आश्रितः। पुरुस्पृहं बहुभिः स्पृहणीयं कारं शब्दं बिभ्रद्वारयन्परिस्यंदत इति संबंधः ॥

॥ अथ द्वितीया ॥

गिरा यदी सबंधवः पंच व्राता अपस्यवः। परिष्कृण्वंति धर्णसिं ॥२॥

गिरा। यदि। सऽबंधवः। पंच। व्राताः। अपस्यवः। परिऽकृण्वंति। धर्णसिं ॥२॥

सबंधवः समानबंधनाः पंच व्राताः पंच जना मनुष्या यजमाना अपस्यवः कर्मेच्छवो यद्यदेमेनं धर्णसिं धारकं सोमं गिरा स्तुत्या परिष्कृण्वंत्यलंकुर्वंति। अस्योत्तरत्रान्वयः ॥

॥ अथ तृतीया ॥

आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत। यदी गोभिर्वसायते ॥३॥

आत्। अस्य। शुष्मिणः। रसे। विश्वे। देवाः। अमत्सत। यदि। गोभिः। वसायते ॥३॥

आत्परिष्करणानंतरमेव शुष्मिणो बलवतोऽस्य सोमस्य रसे विश्वे देवा अमत्सत। अमाद्यंत। यदि यदा गोभिर्गोविकारैः। विकारे प्रकृतिशब्दः। क्षीरादिभिर्वसायते। आच्छाद्यते ॥

॥ अथ चतुर्थी ॥

निरिणानो वि धावति जहच्छर्याणि तान्वा। अत्रा सं जिघ्नते युजा ॥४॥

निऽरिणानः। वि। धावति। जहत्। शर्याणि। तान्वा। अत्र। सं। जिघ्नते। युजा ॥४॥

अयं सोमो निरिणानो दशापवित्रादधो गच्छन्विधावति। विविधं धावति। ---- यदा तान्वा। तनु दशापवित्रवस्त्रं। तत्संबंधीनि शर्याणि द्वाराणि जहदधः सरति। अत्रास्मिन्यज्ञे युजा सखिभूतेनेंद्रेण सह संजिघ्नते। संगतो भवति। वस्त्रसुषिराद्विनिर्गत्य दशापवित्रादधः सत्पात्रं विविधं गच्छन् होमद्वारेणेंद्रेण संगतो भवतीत्यर्थः ॥

॥ अथ पंचमी ॥

नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा। गाः कृण्वानो न निर्णिजं ॥५॥

नप्तीभिः। यः। विवस्वतः। शुभ्रः। न। ममृजे। युवा। गाः। कृण्वानः। न। निःऽनिजं ॥५॥

यः सोमो विवस्वतः परिचरणवतो यजमानस्य नप्तीभिः पौत्रस्थानीयाभिः।

तस्य हस्तः पुत्रोऽङ्गुलयः पौत्रस्थानीया इत्यभिप्रायः । मामृजे मृज्यते शुभ्रो न दीप्तोऽश्वो युवेव । यथाप्रवृद्धोऽश्वो मृज्यते स्वपरिचारकैस्तद्वत्स एव युवा मिश्रणशीलः सोमो निर्णिजं । निर्णिगिति रूपनाम । स्वकीयं रूपं गा न कृण्वानो गोविकारांश्च कुर्वाणो भवतीति शेषः ॥

॥ इति षष्ठस्याष्टमे तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

अति श्रिती तिरश्चता गव्या जिगात्यण्व्या । वग्नुमियर्ति यं विदे ॥६॥

अति । श्रिती । तिरश्चता । गव्या । जिगाति । अण्व्या । वग्नुं । इयर्ति । यं । विदे ॥६॥

अण्व्यांगुल्याभिषूयमाणः सोमो गव्या गव्यानि श्रिती श्रित्यै श्रयणार्थं तिरश्चता तिरश्चीनमति जिगाति । अंशुमतिक्रम्य गच्छति । तथांगुल्याभिषूयमाणो वग्नुं शब्दमियर्ति । प्रेरयति ॥

॥ अथ सप्तमी ॥

अभि क्षिपः समग्मत मर्जयंतीरिषस्पतिं । पृष्ठा गृभ्णत वाजिनः ॥७॥

अभि । क्षिपः । सं । अग्मत । मर्जयंतीः । इषः । पतिं । पृष्ठा । गृभ्णत । वाजिनः ॥७॥

क्षिपोऽङ्गुलयो मर्जयंतीरभिमृशंत्य इषस्पतिमन्नानां स्वामिनं सोममभिसमग्मत । अभिसंगच्छंते । संगत्य च वाजिनो बलवतः सोमस्य पृष्ठा पृष्ठानि गृभ्णत । गृह्णंत्यभिषवांगुलयः ॥

॥ अथाष्टमी ॥

परि दिव्यानि मर्मृशद्विश्वानि सोम पार्थिवा । वसूनि याह्यस्मयुः ॥८॥

परि । दिव्यानि । मर्मृशत् । विश्वानि । सोम । पार्थिवा । वसूनि । याहि । अस्मऽयुः ॥८॥

हे सोम दिव्यानि पार्थिवानि च विश्वानि सर्वाणि वसूनि धनानि परिमर्मृशत्परिमृशन्परिगृह्णन्नस्मयुरस्मान्कामयमानो याहि । आगच्छ । एवमभिषुण्वन्नसं संबोध्य ब्रूते ॥

॥ इति षष्ठस्याष्टमे चतुर्थो वर्गः ॥

एष धियेत्यष्टर्चं पंचदशं सूक्तं । ऋष्याद्याः पूर्ववत् । एष धियेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः । गच्छन्निंद्रस्य निष्कृतं ॥१॥

एषः । धिया । याति । अण्व्या । शूरः । रथेभिः । आशुऽभिः । गच्छन् । इंद्रस्य । निःऽकृतं ॥१॥

एष सोमः शूरो विक्रांतोऽण्व्यांगुल्याभिषुतो धिया कर्मणा याति । गच्छति । कं देशं प्रति । उच्यते । इंद्रस्य निष्कृतं स्थानं दिवं प्रति रथेभी रथैराशुभिः शीघ्रगामिभिर्गच्छन् इंद्रेण रथेऽवस्थाप्य स्वस्थाननयनाय । अंगुल्याभिषूयमाणः सन् होमद्वाराग्निं निष्पीडनद्वारा पात्रं वा गच्छतीत्यर्थः ॥

॥ अथ द्वितीया ॥

एष पुरू धियायते बृहते देवतातये । यत्रामृतास आसते ॥२॥

एषः । पुरु । धियाऽयते । बृहते । देवऽतातये । यत्र । अमृतासः । आसते ॥२॥

एष सोमः पुरु बहुलं धियायते । धियं कर्मेच्छति ॥ धीशब्दाद्यकारोपजनः । यद्वा द्वितीयार्थे तृतीया छांदसश्चालुक् ॥ कस्मै । बृहते महते देवतातये यज्ञाय । यत्र यस्मिन्यज्ञेऽमृतासोऽमृता देवा आसते वसंति तदर्थं ॥

॥ अथ तृतीया ॥

एष हितो वि नीयतेऽंतः शुभ्रावता पथा । यदी तुंजंति भूर्णयः ॥३॥

एषः । हितः । वि । नीयते । अंतरिति । शुभ्रऽवता । पथा । यदि । तुंजंति । भूर्णयः ॥३॥

एष सोमो हितो निहितो हविर्धाने विनीयते तस्मात्स्थानादाहवनीयं प्रति । अंतस्तयोर्मध्यदेशे शुभ्रावता शोभावता पथा मार्गेण यदि यदा तुंजंति प्रयच्छंति देवेभ्यो भूर्णयो भरणशीला अध्वर्य्वादयस्तदा विनीयत इति समन्वयः ॥

॥ अथ चतुर्थी ॥

एष शृंगाणि दोधुवच्छिशीते यूथ्यो३ वृषा । नृम्णा दधान ओजसा ॥४॥

एषः । शृंगाणि । दोधुवत् । शिशीते । यूथ्यः । वृषा । नृम्णा । दधानः । ओजसा ॥४॥

एष सोमः शृंगाणि शृंगवदुन्नतानंशूनभिषवकाले दोधुवत् । धूनोति । यूथ्यो

यूथार्हो यूथपतिर्वृषा वृषभो यथा शिशीते तीक्ष्णे शृंगे धूनोति तद्वत्। कीदृश एषः। ओजसा बलेन नृम्णा नृम्णानि धनानि दधानोऽस्मदर्थं धारयन्॥

॥ अथ पंचमी ॥

एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः। पतिः सिंधूनां भवन्॥५॥

एषः। रुक्मिऽभिः। ईयते। वाजी। शुभ्रेभिः। अंशुऽभिः। पतिः। सिंधूनां। भवन्॥५॥

एष सोमो रुक्मिभिरध्वर्य्वादिभिः सहेयते। गच्छति। कीदृश एषः। वाजी वेजनवाञ्शुभ्रेभिः शुभ्रैर्दीप्तैरंशुभिर्विशिष्टः। अथवा रुक्मिभिरित्येतदप्यंशुविशेषणं। सिंधूनां स्यंदमानानां रसानां पतिर्भवन्। स ईयत इति॥

॥ अथ षष्ठी ॥

एष वसूनि पिब्दना परुषा ययिवाँ अति। अव शादेषु गच्छति॥६॥

एषः। वसूनि। पिब्दना। परुषा। ययिऽवान्। अति। अव। शादेषु। गच्छति॥६॥

एष सोमो वसून्याच्छादकानि पिब्दना पिब्दनानि पीडितानि रक्षांसि परुषा पर्वणात्यतिक्रम्य ययिवान्गच्छञ्शादेषु शातनीयेषु रक्षःस्ववगच्छति॥

॥ अथ सप्तमी ॥

एतं मृजंति मर्ज्यमुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः॥७॥

एतं। मृजंति। मर्ज्यं। उप। द्रोणेषु। आयवः। प्रऽचक्राणं। महीः। इषः॥७॥

आयवो मनुष्या ऋत्विज एतं सोमं मर्ज्यं मार्जनीयमुपमृजंति। निष्पीडयंतीत्यर्थः। कुत्र। द्रोणेषु द्रोणकलशेषु। कीदृशं। महीरिषो महांत्यन्नानि प्रचक्राणं कुर्वाणं। प्रभूतरसस्राविणमित्यर्थः॥

यावस्तोत्रे गाणगारिमतेनाभिरूपकरणे मृज्यमाने सोम एतमु त्यमित्येषा। सूचितं च॥ एतमु त्यं दश क्षिपो मृज्यमानः सुहस्त्या। आ॰ ५.१२.। इति॥

॥ सैषाष्टमी ॥

एतमु त्यं दश क्षिपो मृजंति सप्त धीतयः। स्वायुधं मदिंतमं॥८॥

एतं। ऊं इति। त्यं। दश। क्षिपः। मृजंति। सप्त। धीतयः। सुऽआयुधं। मदिन्ऽतमं॥८॥

त्वं तमेतमेव सोमं दश क्षिपो दशांगुलयो मृजंति । परिचरंति । सप्त धीतयः सप्तर्त्विजश्च । ऋत्विजोऽंगुलिभिर्मृजंतीत्यर्थः । कीदृशमेतं । स्वायुधं शोभनायुधं मदिंतमं मादयितृतमं । रक्षोहननसामर्थ्यप्रदर्शनाय स्वायुधशब्दश्रवणं ॥

॥ इति षष्ठस्याष्टमे पंचमो वर्गः ॥

प्र ते सोतार इत्यष्टर्चं षोडशं सूक्तं । ऋष्याद्याः पूर्ववत् । प्र त इत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र ते॒ सोता॑र ओ॒ण्यो॒३॑ रसं॒ मदा॑य घृ॒ष्वये॑ । सर्गो॒ न त॒क्त्येत॑शः ॥१॥

प्र । ते॒ । सोता॑रः । ओ॒ण्योः॑ । रस॑ं । मदा॑य । घृ॒ष्वये॑ । सर्गः॑ । न । त॒क्ति॒ । एत॑शः ॥१॥

हे सोम ते तव रसं सोतारः सोमाभिषवकर्तार ओण्यो रसं । लुप्तोपममेतत् । द्यावापृथिव्यो रसमुदकमिव । अथवौण्योर्द्यावापृथिव्योर्मध्ये तयोः संबंधिनं वा रसं प्रस्रावयंतीति शेषः । किमर्थं । घृष्वये शत्रुघर्षणशीलाय मदायेंद्रस्य मदाय । अभिषवजनितः सोमः सर्गः सृष्ट एतशो नाश्व इव तक्ति । गच्छति पात्रं प्रति ॥

॥ अथ द्वितीया ॥

क्रत्वा॒ दक्ष॑स्य र॒थ्य॑मपो॒ वसा॑न॒मंध॑सा । गो॒षामण्वे॑षु सश्चिम ॥२॥

क्रत्वा॑ । दक्ष॑स्य । र॒थ्य॑ं । अ॒पः । वसा॑नं । अंध॑सा । गो॒ऽसां । अण्वे॑षु । स॒श्चि॒म॒ ॥२॥

वयमभिषोतारो दक्षस्य बलस्य रथ्यं नेतारमप उदकानि रसान्वसानमाच्छादयंतमंधसा श्रयणान्नेन सहितं गोषां गवां सोतारमेवमुक्तलक्षणं सोमं क्रत्वा कर्मणाण्वेष्वंगुलीषु सश्चिम । संयोजयामः ॥

॥ अथ तृतीया ॥

अन॑प्तमप्सु दु॒ष्टरं॒ सोमं॑ प॒वित्र॒ आ सृ॑ज । पु॒नी॒हींद्रा॑य॒ पात॑वे ॥३॥

अन॑प्तं । अ॒प्ऽसु । दु॒स्तरं॑ । सोमं॑ । प॒वित्रे॑ । आ । सृ॒ज॒ । पु॒नी॒हि । इंद्रा॑य । पात॑वे ॥३॥

अनप्तं शत्रुभिरनाप्तमप्स्वांतरिक्ष्यासु वर्तमानमिति शेषः । दुष्टरमन्यैरनभिभाव्यं । न हि सोमं कश्चिदप्यतितरति । ईदृशं सोमं पवित्रे दशापवित्र आसृज । प्रक्षिप हे अध्वर्यो । तत्रोच्यते । इंद्रायेंद्रस्य पातवे पातुं पुनीहि ॥

॥ अथ चतुर्थी ॥

प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति । क्रत्वा सधस्थमासदत् ॥४॥

प्र । पुनानस्य । चेतसा । सोमः । पवित्रे । अर्षति । क्रत्वा । सधऽस्थं । आ । असदत् ॥४॥

चेतसा स्तुत्या पुनानस्य पूयमानस्यांशीभूतः सोमः पवित्रे दशापवित्रेऽर्षति । गच्छति । अथ पश्चात् क्रत्वा कर्मणा प्रज्ञानेन वा सधस्थं सहस्थानं द्रोणकलश आसदत् । आसीदति ॥

॥ अथ पंचमी ॥

प्र त्वा नमोभिरिंदव इंद्र सोमा असृक्षत । महे भराय कारिणः ॥५॥

प्र । त्वा । नमःऽभिः । इंदवः । इंद्र । सोमाः । असृक्षत । महे । भराय । कारिणः ॥५॥

हे इंद्र त्वा त्वां नमोभिर्नमस्कारोपलक्षितैः स्तोत्रैरथवान्नैः सहेंदवः सोमाः प्रासृक्षत । प्राप्नुवंति । किमर्थं । महे महते भराय संग्रामाय । कीदृशाः । कारिणो बलकरणशीलाः ॥

॥ अथ षष्ठी ॥

पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥६॥

पुनानः । रूपे । अव्यये । विश्वाः । अर्षन् । अभि । श्रियः । शूरः । न । गोषु । तिष्ठति ॥६॥

अव्ययेऽविमये रूपे रूप्यमाणे वस्त्रे पुनानः पूयमानो विश्वाः सर्वाः श्रियः शोभा अभ्यर्षन्नभिगच्छन्गोषु निमित्तासु शूरो न शूर इव स यथा संग्रामे तिष्ठति तद्वदसौ तिष्ठति पात्रे ॥

॥ अथ सप्तमी ॥

दिवो न सानु पिप्युषी धारा सुतस्य वेधसः । वृथा पवित्रे अर्षति ॥७॥

दिवः । न । सानु । पिप्युषी । धारा । सुतस्य । वेधसः । वृथा । पवित्रे । अर्षति ॥७॥

दिवो न द्युलोकादंतरिक्षादिव सानु समुच्छ्रितमुदकं तद्यथाधो निपतति तद्वद्वेधसो विधातुर्बलस्य कर्तुः सुतस्याभिषुतस्य सोमस्य पिप्युष्याप्याययंती धारा वृथानायासेनैव पवित्रे दशापवित्रेऽर्षति । गच्छति ॥

॥ अथाष्टमी ॥

त्वं सोम विपश्चितं तना पुनान आयुषु । अव्यो वारं वि धावसि ॥८॥

त्वं । सोम । विपःऽचितं । तना । पुनानः । आयुषु । अव्यः । वारं । वि । धावसि ॥८॥

हे सोम त्वं विपश्चितं स्तोतारमायुषु मनुष्येषु मध्ये रक्षसि । अथवा तृतीयार्थे द्वितीया । विपश्चिताध्वर्युणा तना वस्त्रेण पुनानः पूयमानः । अथवा विपश्चितमिंद्रं प्रीणयितुं तना पुनानः सन्नव्यो वारमवेर्वालं विधावसि । विविधं गच्छसि ॥

॥ इति षष्ठस्याष्टमे षष्ठो वर्गः ॥

प्र निम्नेनेवेत्यष्टर्चं सप्तदशं सूक्तं । ऋष्याद्याः पूर्ववत् । प्र निम्नेनेवेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र निम्नेनेव सिंधवो घ्नंतो वृत्राणि भूर्णयः । सोमा असृग्रमाशवः ॥१॥

प्र । निम्नेनंऽइव । सिंधवः । घ्नंतः । वृत्राणि । भूर्णयः । सोमाः । असृग्रं । आशवः ॥१॥

निम्नेन प्रवणेन देशेन सिंधवो नद्य इव तथा वृत्राणि शत्रून् घ्नंतो भूर्णयः क्षिप्रगमना आशवो व्याप्ताः सोमाः प्रासृग्रं । प्रगच्छंति द्रोणकलशं प्रति ॥

॥ अथ द्वितीया ॥

अभि सुवानास इंदवो वृष्टयः पृथिवीमिव । इंद्रं सोमासो अक्षरन् ॥२॥

अभि । सुवानासः । इंदवः । वृष्टयः । पृथिवीऽइव । इंद्रं । सोमासः । अक्षरन् ॥२॥

सुवानासः सूयमाना इंदवो द्रवरूपाः सोमासः सोमा इंद्रं प्रीणयितुमभ्यक्षरन् । किमिव । वृष्टयः पृथिवीमिव ॥

॥ अथ तृतीया ॥

अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥३॥

अतिऽऊर्मिः । मत्सरः । मदः । सोमः । पवित्रे । अर्षति । विऽघ्नन् । रक्षांसि । देवऽयुः ॥३॥

अत्यूर्मिः । अतिक्रांता ऊर्मयो यस्मात्सोऽत्यूर्मिः । अतिप्रवृद्ध इत्यर्थः । मत्सरो मादनशीलो मदो मदात्मकः सोमः पवित्रेऽर्षति । गच्छति । किं कुर्वन् । रक्षांसि विघ्नन् घातयन्देवयुर्देवान्कामयमानोऽर्षतीति संबंधः ॥

पवित्रेष्वां द्वितीयाज्यभागस्या कलशेष्विति याज्या। सूचितं च। आ कलशेषु धावति पवित्रे परिषिच्यत इत्येका।आ० ५.१२.॥

॥ सैषा चतुर्थी ॥

आ कलशेषु धावति पवित्रे परि षिच्यते। उक्थैर्यज्ञेषु वर्धते ॥४॥

आ। कलशेषु। धावति। पवित्रे। परि। सिच्यते। उक्थैः। यज्ञेषु। वर्धते ॥४॥

अयं सोमः कलशेष्वाधावति। तदर्थं पवित्रे परिषिच्यतेऽध्वर्युभिः। उक्थैः स्तोत्रैर्यज्ञेषु निमित्तेषु वर्धते। प्रवृद्धो भवति ॥

॥ अथ पंचमी ॥

अति त्री सोम रोचना रोहन्न भ्राजसे दिवं। इष्णन्त्सूर्यं न चोदयः ॥५॥

अति। त्री। सोम। रोचना। रोहन्। न। भ्राजसे। दिवं। इष्णन्। सूर्यं। न। चोदयः ॥५॥

हे सोम त्वं त्री रोचना त्रीणि रोचनानि त्रीँल्लोकानत्यतिक्रम्य रोहन्नुपरिस्थं दिवं द्युलोकं भ्राजसे। प्रकाशयसि। तथेष्णन्गच्छन्सूर्यं न सूर्यं च चोदयः। चोदयसि। प्रेरयसि। नशब्दश्चार्थे ॥

॥ अथ षष्ठी ॥

अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः। दधानाश्चक्षसि प्रियं ॥६॥

अभि। विप्राः। अनूषत। मूर्धन्। यज्ञस्य। कारवः। दधानाः। चक्षसि। प्रियं ॥६॥

अभ्यनूषताभिष्टुवंति विप्रा मेधाविनः स्तोतारः। कुत्र। यज्ञस्य मूर्धन्मूर्धनि। शिरोवदुत्तमेऽभिषवदिवस इत्यर्थः। कीदृशास्ते। कारवः कर्तारः परिचर्याया यागानुष्ठातारो वा। चक्षसि द्रष्टरि सोमे प्रियं दधाना अभ्यनूषतेति समन्वयः ॥

॥ अथ सप्तमी ॥

तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः। मृजंति देवतातये ॥७॥

तं। ऊं इति। त्वा। वाजिनं। नरः। धीभिः। विप्राः। अवस्यवः। मृजंति। देवऽतातये ॥७॥

हे सोम तमु तमेव त्वा त्वां वाजिनमन्नवंतं गमनवंतं वा नरो नेतारो विप्रा मेधाविनोऽध्वर्य्वादयो धीभिः कर्मभिर्मृजंति। शोधयंति। देवतातये यज्ञार्थं। किमिच्छवः। अवस्यवोऽन्नमिच्छवः ॥

॥ अथाष्टमी ॥

मधोर्धारामनु क्षर तीव्रः सधस्थमासदः । चारुर्ऋताय पीतये ॥ ८ ॥

मधोः । धाराम् । अनु । क्षर । तीव्रः । सधऽस्थम् । आ । असदः । चारुः । ऋताय । पीतये ॥ ८ ॥

हे सोम त्वं मधोर्मधुररसस्य धारामनुक्षर प्रवहन् । तीव्रस्तीव्ररसः सन्सधस्थं सहस्थानमभिषवस्थानं पवित्रं वासदः । सीद् । चारुश्चरणशीलः सन्नृताय यज्ञार्थं पीतये देवानां पानाय ॥

॥ इति षष्ठस्याष्टमे सप्तमो वर्गः ॥

परि सुवान इति सप्तर्चमष्टादशं सूक्तं । ऋष्याद्याः पूर्ववत् । परि सुवानः सप्तेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः । मदेषु सर्वधा असि ॥ १ ॥

परि । सुवानः । गिरिऽस्थाः । पवित्रे । सोमः । अक्षारिति । मदेषु । सर्वऽधाः । असि ॥ १ ॥

अयं सोमः पवित्रे पर्यक्षाः । परिक्षरति । सुवानः सूयमानो गिरिष्ठा गिरिस्थायी । ग्रावसु वर्तमान इत्यर्थः । स त्वं मदेषु मादकेषु सोतृषु सर्वधा असि । सर्वस्य धाता दाता वा भवसि ॥

॥ अथ द्वितीया ॥

त्वं विप्रस्त्वं कविर्मधु प्र जातमंधसः । मदेषु सर्वधा असि ॥ २ ॥

त्वं । विप्रः । त्वं । कविः । मधु । प्र । जातं । अंधसः । मदेषु । सर्वऽधाः । असि ॥ २ ॥

हे सोम त्वं विप्रो विविधं प्रीणयिता विप्रसदृशो वा त्वं च कविर्मेधावी । अतस्त्वमंधसोऽन्नाज्जातं मधु मधुररसं प्रयच्छसीति शेषः ॥

॥ अथ तृतीया ॥

तव विश्वे सजोषसो देवासः पीतिमाशत । मदेषु सर्वधा असि ॥ ३ ॥

तव । विश्वे । सऽजोषसः । देवासः । पीतिं । आशत । मदेषु । सर्वऽधाः । असि ॥ ३ ॥

हे सोम तव पीतिं पानं विश्वे देवासो देवाः सजोषसः समानप्रीतयः संत आशत । प्राप्नुवन् ॥

॥ अथ चतुर्थी ॥

आ यो विश्वा॑नि॒ वार्या॒ वसू॑नि॒ हस्त॑योर्द॒धे । मदे॑षु सर्व॒धा अ॑सि ॥४॥

आ । यः । विश्वा॑नि । वार्या॑ । वसू॑नि । हस्त॑योः । द॒धे । मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥४॥

यः सोमो विश्वानि वार्या वरणीयानि वसूनि धनानि स्तोतुर्हस्तयोराद्धे करोति । प्रयच्छतीत्यर्थः । मदेषु सर्वधा असीति । अथवा स शुष्मीत्युत्तरसंबंधः ॥

॥ अथ पंचमी ॥

य इ॒मे रोद॑सी म॒ही सं मा॒तरे॑व॒ दोह॑ते । मदे॑षु सर्व॒धा अ॑सि ॥५॥

यः । इ॒मे इति॑ । रोद॑सी॒ इति॑ । म॒ही इति॑ । सं । मा॒तरा॑ऽइव । दोह॑ते । मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥५॥

यः सोम इमे मही महत्यौ रोदसी द्यावापृथिव्यौ संदोहते । उभयोः सारं परिगृह्णातीत्यर्थः । मातरेव यथा द्वे मातरावेको वत्सो दोहते तद्वत् ॥

॥ अथ षष्ठी ॥

परि॒ यो रोद॑सी उ॒भे स॒द्यो वाजे॑भिर॒र्षति॑ । मदे॑षु सर्व॒धा अ॑सि ॥६॥

परि॑ । यः । रोद॑सी॒ इति॑ । उ॒भे इति॑ । स॒द्यः । वाजे॑भिः । अ॒र्षति॑ । मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥६॥

यः सोम उभे रोदसी द्यावापृथिव्यौ सद्यस्तदानीमेव वाजेभिरन्नैः पर्यर्षति परिगच्छति । सोमाहुत्या द्यावापृथिव्यावन्नवत्यौ करोतीत्यर्थः ॥

॥ अथ सप्तमी ॥

स शु॒ष्मी क॒लशे॒ष्वा पु॑ना॒नो अ॑चिक्रदत् । मदे॑षु सर्व॒धा अ॑सि ॥७॥

सः । शु॒ष्मी । क॒लशे॑षु । आ । पु॒ना॒नः । अ॒चि॒क्र॒द॒त् । मदे॑षु । स॒र्व॒ऽधाः । अ॒सि॒ ॥७॥

उक्तरीत्या महान्स सोमः शुष्मी बलवान्पुनानः पूयमानः सन्नचिक्रदत् । शब्दं करोति । अत्र सर्वत्र यथोचितमुत्तरपादो नेयः ॥

॥ इति षष्ठस्याष्टमेऽष्टमो वर्गः ॥

यत्सोमेति सप्तर्चमेकोनविंशं सूक्तं । ऋष्याद्याः पूर्ववत् । यत्सोमेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

यत्सो॑म चि॒त्रमु॒क्थ्यं॑ दि॒व्यं पार्थि॑वं॒ वसु॑ । तन्नः॑ पुना॒न आ भ॑र ॥१॥

यत् । सो॒म॒ । चि॒त्रं । उ॒क्थ्यं॑ । दि॒व्यं । पार्थि॑वं । वसु॑ । तत् । नः॒ । पु॒ना॒नः । आ । भ॒र॒ ॥१॥

हे सोम यच्चित्रं चायनीयमुक्थ्यं स्तुत्यं दिव्यं दिवि भवं पार्थिवं पृथिवीसंबद्धं च वसु धनमस्ति तन्नोऽस्मभ्यं पुनानः पूयमानः सन्नाभर । आहर ॥

॥ अथ द्वितीया ॥

यु॒वं हि स्थः स्वः॑पती॒ इंद्र॑श्च सो॒म॒ गोप॑ती । ई॒शा॒ना पि॑प्यतं॒ धियः॑ ॥२॥

यु॒वं । हि । स्थः । स्वः॑पती॒ इति॒ स्वः॑ऽपती । इंद्रः॑ । च॒ । सो॒म॒ । गोप॑ती॒ इति॒ गोऽप॑ती । ई॒शा॒ना । पि॒प्य॒त॒म् । धियः॑ ॥२॥

हे सोम त्वमिंद्रश्च युवं हि युवां खलु स्वर्पती सर्वस्य स्वामिनौ स्थः । भवथः । तथा गोपती गवां पालकावीशानेश्वरौ संतौ धियोऽस्मदीयानि कर्माणि पिप्यतं । प्याययतं ॥

॥ अथ तृतीया ॥

वृषा॑ पुना॒न आ॒युषु॑ स्त॒नय॒न्नधि॑ ब॒र्हिषि॑ । हरिः॑ स॒न्योनि॒मास॑दत् ॥३॥

वृषा॑ । पु॒ना॒नः । आ॒युषु॑ । स्त॒नय॑न् । अधि॑ । ब॒र्हिषि॑ । हरिः॑ । सन् । योनि॑म् । आ । अ॒स॒द॒त् ॥३॥

वृषा कामानां वर्षकः सोम आयुषु मनुष्येष्वध्वर्य्वादिषु पुनानः सन् स्तनयञ्शब्दं कुर्वन्नधि बर्हिषि । अधीति सप्तम्यर्थानुवादी । आस्तीर्णे दर्भे हरिर्हरितवर्णः सन्योनिं स्वकीयं स्थानमासदत् । आसीदति ॥

॥ अथ चतुर्थी ॥

अवा॑वशंत धी॒तयो॑ वृष॒भस्या॒धि रेत॑सि । सू॒नोर्व॒त्सस्य॑ मा॒तरः॑ ॥४॥

अवा॑वशंत । धी॒तयः॑ । वृ॒ष॒भस्य॑ । अधि॑ । रेत॑सि । सू॒नोः । व॒त्सस्य॑ । मा॒तरः॑ ॥४॥

धीतयो धीयमानाः सोमाख्येन वत्सेन पीयमाना वसतीवर्यः । क्तिन् व्यत्ययेनांतोदात्तः । अधि रेतसि स्वकीये सारे वृषभस्य वर्षकस्य सोमस्य । सोममित्यर्थः । अवावशंत । पुनः कामयंते । सोममाप्याययितुं कामयंत इत्यर्थः ।

तदेवाह। सूनोः स्वपुत्रस्थानीयस्य वत्सस्य सोमस्य मातरो निर्माच्यः प्रवृद्धिकामा मातृस्थानीया अवावशंतेति समन्वयः ॥

॥ अथ पंचमी ॥

कुविद्वृषण्यंतीभ्यः पुनानो गर्भमादधत्। याः शुक्रं दुहते पयः ॥५॥

कुवित्। वृषण्यंतीभ्यः। पुनानः। गर्भं। आऽदधत्। याः। शुक्रं। दुहते। पयः ॥५॥

वृषण्यंतीभ्यो वृषणं सोममात्मन इच्छंतीभ्यो वसतीवरीभ्यः पुनानः पूयमानो मिश्रयमाणो गर्भं स्वगर्भस्थानीयं रसं कुविद्बहु प्रभूतमादधत्। करोति। या आपः शुक्रं दीप्तं पयो दुहते स्ववत्साय सोमाय ताभ्यो गर्भमादधत् ॥

॥ अथ षष्ठी ॥

उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु। पवमान विदा रयिं ॥६॥

उप। शिक्ष। अपऽतस्थुषः। भियसं। आ। धेहि। शत्रुषु। पवमान। विदाः। रयिं ॥६॥

हे पवमान सोम उप शिक्ष। त्वं समीपे कुरु। कान्। अपतस्थुषः। अपक्रम्य स्थितान्। अस्मदभिमतानित्यर्थः। शत्रुष्वस्मद्विरोधिषु भियसं भयमाधेहि। कुरु। जनय। अस्माकं तेषां शत्रूणां रयिं धनं विदाः। विंदसि ॥

॥ अथ सप्तमी ॥

नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर। दूरे वा सतो अंति वा ॥७॥

नि। शत्रोः। सोम। वृष्ण्यं। नि। शुष्मं। नि। वयः। तिर। दूरे। वा। सतः। अंति। वा ॥७॥

हे अभिषूयमाण सोम त्वं शत्रोर्वृष्ण्यं वर्षकं बलं नितिर। निपूर्वस्तिरतिर्नाशार्थः। नाशय। तथा शत्रोः शुष्मं शोषकं तेजो नितिर। तस्यैव वयोऽन्नं च नितिर। कीदृशस्य शत्रोः। दूरे वा सतोऽस्मत्तो दूरे वर्तमानस्यांति वा सतोऽंतिके वर्तमानस्य वा ॥

॥ इति षष्ठस्याष्टमे नवमो वर्गः ॥

प्र कविरिति सप्तर्चं विंशं सूक्तं। ऋष्याद्याः पूर्ववत्। प्र कविरित्यनुक्रांतं। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र कविर्देववीतयेऽव्यो वारेभिरर्षति । साह्वान्विश्वा अभि स्पृधः ॥१॥

प्र । कविः । देवऽवीतये । अव्यः । वारेभिः । अर्षति । सह्वान् । विश्वाः । अभि । स्पृधः ॥१॥

कविर्मेधावी सोमो देववीतये देवानां पानायाव्योऽवेर्वारेभिर्वालैर्दशापवित्रेण प्रार्षति । प्रकर्षेण गच्छति । साह्वाञ्शत्रूणां सोढा सोमो विश्वाः स्पृधः सर्वान्संग्रामान्हिंसकान्वाभिभवतीति शेषः ॥

॥ अथ द्वितीया ॥

स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति । पवमानः सहस्रिणम् ॥२॥

सः । हि । स्म । जरितृऽभ्यः । आ । वाजम् । गोऽमन्तम् । इन्वति । पवमानः । सहस्रिणम् ॥२॥

स हि ष्म स खलु पवमानः सोमो जरितृभ्यः स्तोतृभ्यो गोमंतं बहुभिर्गोभिर्युक्तं सहस्रिणं सहस्रसंख्याकं वाजमन्नं वा आ अभिमुखमिन्वति । व्याप्नोति । प्रयच्छतीत्यर्थः ॥

॥ अथ तृतीया ॥

परि विश्वानि चेतसा मृशसे पवसे मती । स नः सोम श्रवो विदः ॥३॥

परि । विश्वानि । चेतसा । मृशसे । पवसे । मती । सः । नः । सोम । श्रवः । विदः ॥३॥

हे सोम त्वं चेतसा स्वीयेनास्मदनुकूलेन चित्तेन विश्वानि सर्वाणि धनानि परिमृशसे । प्रयच्छसीत्यर्थः । मती मत्यास्मत्स्तुत्या पवसे । क्षरसि रसं । स त्वं हे सोम नोऽस्मभ्यं श्रवोऽन्नं विदः । देहि ॥

॥ अथ चतुर्थी ॥

अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम् । इषं स्तोतृभ्य आ भर ॥४॥

अभि । अर्ष । बृहत् । यशः । मघवत्ऽभ्यः । ध्रुवम् । रयिम् । इषम् । स्तोतृऽभ्यः । आ । भर ॥४॥

हे सोम बृहद्यशो महतीं कीर्तिमभ्यर्ष । अभिगमय । मघवद्भ्यो हविष्मद्भ्योऽस्मभ्यं ध्रुवं रयिं धनं चाभ्यर्ष । किंचेषमन्नं स्तोतृभ्योऽस्मभ्यमाभर । आहर ॥

॥ अथ पंचमी ॥

त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ। पुनानो वह्ने अद्भुत ॥५॥

त्वं। राजाऽइव। सुऽव्रतः। गिरः। सोम। आ। विवेशिथ। पुनानः। वह्ने। अद्भुत ॥५॥

हे सोम सुव्रतः सुकर्मा पुनानस्त्वं राजेव गिरोऽस्मदीयाः स्तुतीराविवेशिथ। आविशसि। हे वह्ने वोढरद्भुत महन्सोम ॥

॥ अथ षष्ठी ॥

स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति ॥६॥

सः। वह्निः। अप्ऽसु। दुस्तरः। मृज्यमानः। गभस्त्योः। सोमः। चमूषु। सीदति ॥६॥

स सोमो वह्निर्वोढा यज्ञादेरप्स्वंतरिक्षे वर्तमानो दुष्टरो दुःखेनान्यैस्तरणीयो मृज्यमानः शोध्यमानो गभस्त्योर्हस्तयोरेवंभूतः सन्स चमूषु पात्रेषु सीदति ॥

॥ अथ सप्तमी ॥

क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि। दधत्स्तोत्रे सुवीर्यं ॥७॥

क्रीळुः। मखः। न। मंहयुः। पवित्रं। सोम। गच्छसि। दधत्। स्तोत्रे। सुऽवीर्यं ॥७॥

हे सोम क्रीळुः क्रीडनशीलस्त्वं मंहयुः। मंहतिर्दानकर्मा। दानेच्छुर्मखो न दानमिव पवित्रं गच्छसि। किं कुर्वन्। स्तोत्रे स्तुतिकर्त्रे सुवीर्यं शोभनवीर्यं दधत्प्रयच्छन् ॥

॥ इति षष्ठस्याष्टमे दशमो वर्गः ॥

एते धावंतीति सप्तर्चमेकविंशं सूक्तं। ऋष्याद्याः पूर्ववत्। एते धावंतीत्यनुक्रांतं। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

एते धावंतीदवः सोमा इंद्राय घृष्वयः। मत्सरासः स्वर्विदः ॥१॥

एते। धावंति। इंदवः। सोमाः। इंद्राय। घृष्वयः। मत्सरासः। स्वःऽविदः ॥१॥

एते सोमा इंद्राय धावंति। गच्छंति। कीदृशा एते। इंदवः क्लेदयितारो दीप्ता वा घृष्वयो घर्षणशीला मत्सरासो मादयितारः स्वर्विदः स्वर्लोकस्य लंभयितारः ॥

॥ अथ द्वितीया ॥

प्रवृण्वंतो अभियुजः सुष्वये वरिवोविदः । स्वयं स्तोत्रे वयस्कृतः ॥२॥

प्रऽवृण्वंतः । अभिऽयुजः । सुस्वये । वरिवःऽविदः । स्वयं । स्तोत्रे । वयःऽकृतः ॥२॥

प्रवृण्वंतः सुवानं प्रकर्षेण संभजंतस्तथाभियुजोऽभियोजयितारः सुष्वये सुष्वभिषवकर्त्रे वरिवोविदः । वरिव इति धननाम । तस्य लंभयितारः स्वयं स्तोत्रे वयस्कृतोऽन्नस्य कर्तारः । एते धावंतीति संबंधः ॥

॥ अथ तृतीया ॥

वृथा क्रीळंत इंदवः सधस्थमभ्येकमित् । सिंधोरूर्मा व्यक्षरन् ॥३॥

वृथा । क्रीळंतः । इंदवः । सधऽस्थं । अभि । एकं । इत् । सिंधोः । ऊर्मा । वि । अक्षरन् ॥३॥

वृथानायासेन क्रीळंत इंदवः सोमा एकमिदेकमेव सधस्थं सहस्थानं द्रोणकलशं वाभ्यक्षरन्निति शेषः । सिंधोरूर्मा वसतीवरीषु व्यक्षरन् ॥

॥ अथ चतुर्थी ॥

एते विश्वानि वार्या पवमानास आशत । हिता न सप्तयो रथे ॥४॥

एते । विश्वानि । वार्या । पवमानासः । आशत । हिताः । न । सप्तयः । रथे ॥४॥

एते सोमाः पवमानासः पूयमाना विश्वानि वार्या वार्याणि वरणीयानि धनान्याशत । व्याप्नुवन् । रथे हिताः स्थापिता न सप्तयोऽश्वा इव । ते यथा रथमभिमतं देशं प्राप्नुवंति तद्वद्धनमस्माकं प्रायच्छन्नित्यर्थः ॥

॥ अथ पंचमी ॥

आस्मिन्पिशंगमिंदवो दधाता वेनमादिशे । यो अस्मभ्यमरावा ॥५॥

आ । अस्मिन् । पिशंगं । इंदवः । दधात । वेनं । आऽदिशे । यः । अस्मभ्यं । अरावा ॥५॥

हे इंदवः सोमा अस्मिन्यजमाने पिशंगं बहुरूपं मणिमुक्ताहिरण्यादिभेदेन नानारूपं वेनं कामयंतं बहुविधं काममादिशेऽस्मभ्यमादेशनायादधात । आयच्छत । यो यजमानोऽस्मभ्यमरावा - - - - - प्रयच्छति प्राप्तकाम एव खल्वृत्विग्भ्यः प्रयच्छति ॥

॥ अथ षष्ठी ॥

ऋभुर्न रथ्यं नवं दधाता केतमादिशे । शुक्राः पवध्वमर्णसा ॥ ६॥

ऋभुः । न । रथ्यं । नवं । दधात । केतं । आऽदिशे । शुक्राः । पवध्वं । अर्णसा ॥ ६॥

ऋभुर्नोरु भासमानो रथस्वामीव स यथा रथ्यं रथस्य नेतारं नवं स्तुत्यं कुशलं सारथिनमग्र आधत्ते तद्वदस्मदीयेऽस्मिन्नादिशे स्वामिनि केतं प्रज्ञानं दधात । स्थापयत । हे सोमा योऽस्मभ्यं प्रयच्छति तस्मिन्नित्यर्थः । हे सोमा अर्णसोदकेन शुक्रा दीप्ताः संतः पवध्वं । क्षरध्वं ॥

॥ अथ सप्तमी ॥

एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत । सतः प्रासाविषुर्मतिं ॥ ७॥

एते । ऊं इति । त्ये । अवीवशन् । काष्ठां । वाजिनः । अक्रत । सतः । प्र । असाविषुः । मतिं ॥ ७॥

त्ये त एत उ एत एव सोमा अवीवशन् । कामयंते यज्ञं । कांत्वा च वाजिनो बलवंतोऽन्नवंतो वा सोमाः काष्ठामक्रत । निवासस्थानमकुर्वन् । द्रोणकलशादुन्नता ग्रहानित्यर्थः । सतो यजमानस्य स्तोतुर्वा मतिं बुद्धिं स्तुतिं वा प्रासाविषुः । प्रेरयन् ॥

॥ इति षष्ठस्याष्टम एकादशो वर्गः ॥

एते सोमास इति सप्तर्चं द्वाविंशं सूक्तं । ऋष्याद्याः पूर्ववत् । एते सोमास इत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

एते सोमास आशवो रथा इव प्र वाजिनः । सर्गाः सृष्टा अहेषत ॥ १॥

एते । सोमासः । आशवः । रथाःऽइव । प्र । वाजिनः । सर्गाः । सृष्टाः । अहेषत ॥ १॥

एते पूयमानाः सोमासः सोमाः सृष्टा अध्वर्युणाशवो दशापवित्राद्धोगमने शीघ्राः प्राहेषत । प्रहेषंते । शीघ्रगमने दृष्टांतद्वयं । आजौ सृष्टाः शीघ्रा रथा इव तथोक्तलक्षणा वाजिन इव वेजनवंतोऽश्वा इव ॥

॥ अथ द्वितीया ॥

एते वाता इवोरवः पर्जन्यस्येव वृष्टयः । अग्नेरिव भ्रमा वृथा ॥२॥

एते । वाताःऽइव । उरवः । पर्जन्यस्यऽइव । वृष्टयः । अग्नेःऽइव । भ्रमाः । वृथा ॥२॥

एते सोमा उरवो महांतो वाता इव वायव इव वृथानायासेन व्यानशुरित्युत्तरत्र संबंधनीयं। अथवाध्याहारेण निःसरंतीति योज्यं। तथा पर्जन्यस्य वृष्टय इव वर्षा यथा तथैव। किंचाग्नेर्भ्रमा भ्रमणा ज्वालासंचारा इव ॥

॥ अथ तृतीया ॥

एते पूता विपश्चितः सोमासो दध्याशिरः । विपा व्यानशुर्धियः ॥३॥

एते। पूताः। विपःऽचितः। सोमासः। दधिऽआशिरः। विपा। वि। आनशुः। धियः॥३॥

एते सोमासः सोमाः पूताः शुद्धा विपश्चितः प्राज्ञा दध्याशिरो दध्याश्रयणा विपा प्रज्ञानेन धियोऽस्मदीयानि कर्माणि व्यानशुः। व्याप्नुवंति॥

॥ अथ चतुर्थी ॥

एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः । इयक्षंतः पथो रजः ॥४॥

एते । मृष्टाः । अमर्त्याः । ससृऽवांसः । न । शश्रमुः । इयक्षंतः । पथः । रजः ॥४॥

एते सोमा मृष्टा दशापवित्रेण शोधिता अमर्त्या अमरणधर्माणः ससृवांसो हविर्धानात्सरंतः पथो मार्गान् रजो लोकांश्चेयक्षंतो गंतुमिच्छंतो न शश्रमुः । न शाम्यंति ॥

॥ अथ पंचमी ॥

एते पृष्ठानि रोदसोर्विप्रयंतो व्यानशुः । उतेदमुत्तमं रजः ॥५॥

एते। पृष्ठानि। रोदसोः। विऽप्रयंतः। वि। आनशुः। उत। इदं। उत्ऽतमं। रजः॥५॥

एते सोमा रोदसोर्द्यावापृथिव्योः पृष्ठानि विप्रयंतो विविधं गच्छंतो व्यानशुः। व्याप्नुवंति। उतापि चेदमुत्तमं रजो द्युलोकं व्यानशुः। आहुतिद्वारेणेति भावः। रोदसोरित्यत्रांतरिक्षोऽभिप्रेतः॥

॥ अथ षष्ठी ॥

तंतुं तन्वानमुत्तममनु प्रवत आशत । उतेदमुत्तमाय्यं ॥६॥

तंतुं। तन्वानं। उत्ऽतमं। अनु। प्रऽवतः। आशत। उत। इदं। उत्तमाय्यं॥६॥

तंतुं यज्ञं तन्वानमुत्तममुत्कृष्टं सोममन्वाशत प्रवतो नद्यः । उतापि चेदं कर्मानेन सोमेनोत्तमाय्यमुत्तमीकृतं । अथवा तंतुं तन्वानं सोमं प्रवतोऽधःस्थिताः सर्वा अन्वाशत । उतेदमुत्तमाय्यं रजो द्युलोक इत्यर्थः । सोऽप्यन्वश्नुते पृथिव्यां चांतरिक्षे च । उत्तमीकृतमुत्तमाय्यं ॥

॥ अथ सप्तमी ॥

त्वं सोम पणिभ्य आ वसु गव्यानि धारयः । ततं तंतुमचिक्रदः ॥७॥

त्वं । सोम । पणिऽभ्यः । आ । वसु । गव्यानि । धारयः । ततं । तंतुं । अचिक्रदः ॥७॥

हे सोम त्वं पणिभ्योऽसुरेभ्यो लुब्धकेभ्यो वा सकाशाद्गव्यानि गोहितानि वसु वसूनि गोयूथानि वसूनि चेति वाहृत्य धारयः । धारयसि । तथा तंतुं यज्ञं प्रति ततं विस्तृतं यथा भवति तथाचिक्रदः । शब्दमकार्षीः ॥

॥ इति षष्ठस्याष्टमे द्वादशो वर्गः ॥

सोमा असृग्रमिति सप्तर्चं त्रयोविंशं सूक्तं । ऋष्याद्याः पूर्ववत् । सोमा असृग्रमित्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

सोमा असृग्रमाशवो मधोर्मदस्य धारया । अभि विश्वानि काव्या ॥१॥

सोमाः । असृग्रं । आशवः । मधोः । मदस्य । धारया । अभि । विश्वानि । काव्या ॥१॥

आशवः शीघ्राः सोमा असृग्रं । असृग्रन् । सृज्यंते । मधोर्मधुरस्य मदस्य मदकरस्य धारयासृग्रमिति संबंधः । किं प्रति उच्यते । अभि लक्षीकृत्य विश्वानि सर्वाणि काव्या काव्यानि स्तोत्राणि प्रति । स्तोत्रसमय इत्यर्थः ॥

॥ अथ द्वितीया ॥

अनु प्रत्नास आयवः पदं नवीयो अक्रमुः । रुचे जनंत सूर्यं ॥२॥

अनु । प्रत्नासः । आयवः । पदं । नवीयः । अक्रमुः । रुचे । जनंत । सूर्यं ॥२॥

प्रत्नासः पुराणाः केचिदायवः शीघ्रगमना अश्वा नवीयो नवतरं पदमन्वक्रमुः । अनुक्रमंते । रूपकव्याहारेण सोमाः स्तूयंते । रुचे दीप्त्यै सूर्यं जनंत । कुर्वंति । दीप्तं कुर्वंतीत्यर्थः । सोमप्यायनेन हि चंद्रो रोचते ॥

॥ अथ तृतीया ॥

आ पवमान नो भरार्यो अदाशुषो गयं । कृधि प्रजावतीरिषः ॥३॥

आ । पवमान । नः । भर । अर्यः । अदाशुषः । गयं । कृधि । प्रजाऽवतीः । इषः ॥३॥

हे पवमान सोम त्वं नोऽस्मभ्यमर्योऽरेरदाशुषोऽप्रयच्छतो गयं गृहं गृहोपलक्षितं धनमाभर । आहर । तथास्मभ्यं प्रजावतीरिषश्च कृधि । कुरु ॥

॥ अथ चतुर्थी ॥

अभि सोमास आयवः पवंते मद्यं मदं । अभि कोशं मधुश्चुतं ॥४॥

अभि । सोमासः । आयवः । पवंते । मद्यं । मदं । अभि । कोशं । मधुऽश्चुतं ॥४॥

आयवो गंतारः सोमासः सोमा मद्यं मदकरं रसमभिपवंते । क्षरंति । तथा मधुश्चुतं मधुस्राविणं कोशं । रसाधारेण कोशशब्देन तत्रामिश्रितो रसो लक्ष्यते । तमभि पवंत इति शेषः ॥

॥ अथ पंचमी ॥

सोमो अर्षति धर्णसिर्दधान इंद्रियं रसं । सुवीरो अभिशस्तिपाः ॥५॥

सोमः । अर्षति । धर्णसिः । दधानः । इंद्रियं । रसं । सुऽवीरः । अभिशस्तिऽपाः ॥५॥

सोमोऽर्षति । गच्छति । कीदृशः सः । धर्णसिर्धारको जगतां तथेंद्रियमिंद्रियवर्धकं रसं दधानो धारयन्सुवीरः सुवीर्योऽभिशस्तिपा अभिशस्तेः पाता । अभितो हिंसा ततो रक्षक इत्यर्थः । सोमपानं ब्रह्महत्यादिनिंदामनुमार्ष्टीति प्रसिद्धं ॥

॥ अथ षष्ठी ॥

इंद्राय सोम पवसे देवेभ्यः सधमाद्यः । इंदो वाजं सिषाससि ॥६॥

इंद्राय । सोम । पवसे । देवेभ्यः । सधऽमाद्यः । इंदो इति । वाजं । सिसाससि ॥६॥

हे सोम सधमाद्यः । सधमादो यज्ञस्तदर्हस्त्वमिंद्राय देवेभ्यश्चान्येभ्यः पवसे । क्षरसे । हे तादृशेंदो सोम अस्मभ्यं वाजमन्नं सिषाससि । दातुमिच्छसि ॥

॥ अथ सप्तमी ॥

अस्य पीत्वा मदानामिंद्रो वृत्राण्यप्रति । जघान जघनच्च नु ॥७॥

अस्य । पीत्वा । मदानां । इंद्रः । वृत्राणि । अप्रति । जघान । जघनत् । च । नु ॥७॥

मदानां मदकराणां मध्येऽतिशयेन मदकरमस्यामुं सोमं पीत्वा वृत्राणि शत्रूनप्रतिगतः सन्निंद्रो जघान । हतवान् । नु क्षिप्रं जघनच्च । हंतु चेदानीमपि ॥

॥ इति षष्ठस्याष्टमे त्रयोदशो वर्गः ॥

प्र सोमास इति सप्तर्चं चतुर्विंशं सूक्तं । असितो देवलो वर्षिर्गायत्री छंदः सोमो देवता । प्र सोमास इत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र सोमा॑सो अधन्विषुः॒ पव॑मानास॒ इंद॑वः । श्री॒णा॒ना अ॒प्सु मृं॑जत ॥१॥

प्र । सोमा॑सः । अ॒ध॒न्वि॒षुः॒ । पव॑मानासः । इंद॑वः । श्री॒णा॒नाः । अ॒प्ऽसु । मृं॒ज॒त॒ ॥१॥

सोमासः सोमाः पवमानासः पूयमाना इंदवो दीप्ताः प्राधन्विषुः । धन्वतिर्गतिकर्मा । प्रगच्छंति । किंच श्रीणाना गोभिः श्रयमाणा अप्सु वसतीवरीषु च मृंजत । मृज्यंते ॥

॥ अथ द्वितीया ॥

अ॒भि गावो॑ अधन्विषुरापो॒ न प्रव॒ता॑ य॒तीः । पु॒ना॒ना इंद्र॑माशत ॥२॥

अ॒भि । गाव॑ः । अ॒ध॒न्वि॒षुः॒ । आप॑ः । न । प्र॒ऽवता॑ । य॒तीः । पु॒ना॒नाः । इंद्र॑ । आ॒श॒त॒ ॥२॥

गावो गमनशीला इंदवोऽभ्यधन्विषुः । अभिगच्छंति दशापवित्रं । किमिव । प्रवता प्रवणवता देशेन यतीर्गच्छंत्य आपो नाप इव । पश्चात्पुनाना इंद्रं प्रीणयितुमाशत । व्याप्नुवन् । आहुतिप्रणाड्येंद्रमेव वा व्याप्नुवन् ॥

॥ अथ तृतीया ॥

प्र प॑वमान धन्वसि॒ सोमेंद्रा॑य॒ पात॑वे । नृभि॑र्य॒तो वि नी॑यसे ॥३॥

प्र । प॒व॒मा॒न॒ । ध॒न्व॒सि॒ । सोम॑ । इंद्रा॑य । पात॑वे । नृऽभि॑ः । य॒तः । वि । नी॒य॒से॒ ॥३॥

हे पवमान सोम इंद्रायेंद्रस्य पातवे पानाय प्रधन्वसि । प्रगच्छस्याहवनीयं प्रति हविर्धानात् । तदेवाह । नृभिर्नेतृभिर्ऋत्विग्भिर्यतो विनीतो विनीयसे हविर्धानात् । अथवा पवमान प्रधन्वसि पात्रं प्रतींद्रपानाय तदर्थं हविर्धानाद्विनीयसे ॥

॥ अथ चतुर्थी ॥

त्वं सोम नृमादनः पवस्व चर्षणीसहे । सस्निर्यो अनुमाद्यः ॥४॥

त्वं । सोम । नृऽमादनः । पवस्व । चर्षणिऽसहे । सस्निः । यः । अनुऽमाद्यः ॥४॥

हे सोम त्वं नृमादनो नृणां मादयिता त्वं चर्षणीसहे । चर्षणयो मनुष्या द्वेष्टारः । तेषां समभिभवित्र इंद्राय पवस्व । क्षर । यस्त्वं सस्निः शुद्धोऽनुमाद्यः स्तुत्यः स पवस्वेति समन्वयः ॥

॥ अथ पंचमी ॥

इंदो यदद्रिभिः सुतः पवित्रं परिधावसि । अरमिंद्रस्य धाम्ने ॥५॥

इंदो इति । यत् । अद्रिऽभिः । सुतः । पवित्रं । परिऽधावसि । अरं । इंद्रस्य । धाम्ने ॥५॥

हे इंदो त्वं यद्यदाद्रिभिर्ग्रावभिः सुतोऽभिषुतः पवित्रं दशापवित्रं परिधावसि परिगच्छसि तदेंद्रस्य धाम्ने स्थानायाधारकायोदराय वारं पर्याप्तो भवसि ॥

॥ अथ षष्ठी ॥

पवस्व वृत्रहंतमोक्थेभिरनुमाद्यः । शुचिः पावको अद्भुतः ॥६॥

पवस्व । वृत्रहन्ऽतम । उक्थेभिः । अनुऽमाद्यः । शुचिः । पावकः । अद्भुतः ॥६॥

हे वृत्रहंतम शत्रूणामतिशयेन हंतरिंद्र त्वं पवस्व । क्षर । कीदृशस्त्वं । उक्थेभिः शस्त्रैरनुमाद्यः स्तुत्यः शुचिः शुद्धः पावकोऽन्यस्य शोधकोऽद्भुतो महान् । एवं महानुभावः पवस्व ॥

॥ अथ सप्तमी ॥

शुचिः पावक उच्यते सोमः सुतस्य मध्वः । देवावीरघशंसहा ॥७॥

शुचिः । पावकः । उच्यते । सोमः । सुतस्य । मध्वः । देवऽअवीः । अघशंसऽहा ॥७॥

सुतस्याभिषुतस्य मध्वो मदकरस्य वल्ल्यात्मकः सोमो रसरूपः शुचिः स्वयं शुद्धः पावकः शोधकश्चोच्यते । तथा देवावीर्देवानामविता तर्पयिताघशंसहा । अघं पापं शंसंतीत्यघशंसा असुराः । तेषां हंतेति चोच्यते ॥

॥ इति षष्ठस्याष्टमे चतुर्दशो वर्गः ॥

॥ इति नवमे मंडले प्रथमोऽनुवाकः ॥

द्वितीयेऽनुवाके षट्त्रिंशत्सूक्तानि। तत्र पवस्वेति षडृचं प्रथमं सूक्तं दृळ्हच्युतनाम्नोऽगस्त्यपुत्रस्यार्षं गायत्रं पवमानसोमदेवताकं। अनुक्रांतं च। पवस्व षड् दृळ्हच्युत आगस्त्य इति। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः॥१॥

पवस्व। दक्षऽसाधनः। देवेभ्यः। पीतये। हरे। मरुत्ऽभ्यः। वायवे। मदः॥१॥

हे हरे हरितवर्ण पापहर्तर्वा सोम दक्षसाधनः। दक्षो बलं तस्य साधको मदो मदकरश्च त्वं पवस्व। क्षर। देवेभ्य इंद्रादिभ्यः पीतये पानाय। तथा मरुद्भ्यो वायवे च पीतये पवस्व॥

॥ अथ द्वितीया ॥

पवमान धिया हितो३भि योनिं कनिक्रदत्। धर्मणा वायुमा विश॥२॥

पवमान। धिया। हितः। अभि। योनिं। कनिक्रदत्। धर्मणा। वायुं। आ। विश॥२॥

हे पवमान सोम धिया कर्मणास्मद्व्यापारेणांगुल्या वा हितो धृतः सन्कनिक्रदच्छब्दं कुर्वन्योनिं स्थानं ग्रहं वाभिविशेति शेषः। तदेवाह। धर्मणा वायुं वायुसंबंधि पात्रमित्यर्थः। तदाविश। प्रविश॥

॥ अथ तृतीया ॥

सं देवैः शोभते वृषा कविर्योनावधि प्रियः। वृत्रहा देववीतमः॥३॥

सं। देवैः। शोभते। वृषा। कविः। योनौ। अधि। प्रियः। वृत्रऽहा। देवऽवीतमः॥३॥

अयं सोमः संशोभते देवैः सह योनौ स्थाने स्वीयेऽधिष्ठितो वृषा कामानां वर्षकः कविः क्रांतप्रज्ञः प्रियः प्रियभूतः सर्वेषां यद्वा प्रीणयिता वृत्रहा वृत्रस्य हंता देववीतमोऽतिशयेन देवान्कामयमान एवं महानुभावः सोमः संशोभते॥

॥ अथ चतुर्थी ॥

विश्वा रूपाण्याविशन्पुनानो याति हर्यतः। यत्रामृतास आसते॥४॥

विश्वा। रूपाणि। आऽविशन्। पुनानः। याति। हर्यतः। यत्र। अमृतासः। आसते॥४॥

विश्वा सर्वाणि रूपाण्याविशन्पुनानः पूयमानो हर्यतः कमनीयः। हर्य

गतिकांत्योः । ईदृशो याति । गच्छति । यत्रामृतासोऽमृता देवा आसते तिष्ठंति तं देशं याति ॥

॥ अथ पंचमी ॥

अरुषो जनयन्गिरः सोमः पवत आयुषक् । इंद्रं गच्छन्कविक्रतुः ॥५॥

अरुषः । जनयन् । गिरः । सोमः । पवते । आयुषक् । इंद्रं । गच्छन् । कविऽक्रतुः ॥५॥

अरुष आरोचमानः सोमो गिरः शब्दाञ्जनयन्पवते । क्षरति । किं कुर्वन् । आयुषगनुषक्तमिंद्रं गच्छन्व्याप्नुवन् कविक्रतुः क्रांतप्रज्ञः ॥

॥ अथ षष्ठी ॥

आ पवस्व मदिंतम पवित्रं धारया कवे । अर्कस्य योनिमासदं ॥६॥

आ । पवस्व । मदिन्ऽतम । पवित्रं । धारया । कवे । अर्कस्य । योनिं । आऽसदं ॥६॥

हे मदिंतम मादयितृतम कवे क्रांतप्रज्ञ सोम त्वं पवित्रमतिक्रम्य धारयापवस्व । किमर्थं । अर्कस्यार्चनीयस्येंद्रस्य योनिं स्थानमासदं प्राप्तुं ॥

॥ इति षष्ठस्याष्टमे पंचदशो वर्गः ॥

तममृक्षंतेति षड्टचं द्वितीयं सूक्तं दृळ्हच्युतपुत्रस्येध्मवाहनाम्न आर्षं गायत्रं पवमानसोमदेवताकं । अनुक्रांतं च । तममृक्षंतेध्मवाहो दार्ढच्युत इति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

तममृक्षंत वाजिनमुपस्थे अदितेरधि । विप्रासो अण्व्या धिया ॥१॥

तं । अमृक्षंत । वाजिनं । उपऽस्थे । अदितेः । अधि । विप्रासः । अण्व्या । धिया ॥१॥

तं वाजिनमश्वमश्ववदाप्तुं व्याप्तमित्यर्थः । अदितेः पृथिव्या उपस्थ उत्संगे । अधीति सप्तम्यर्थानुवादी । अमृक्षंत । शोधितवंतः । के । विप्रासो मेधाविनोऽध्वर्य्वादयः । केन साधनेन । अण्व्यांगुल्या धिया प्रज्ञया स्तुत्या वामृक्षंत । अथवाण्व्या सूक्ष्मया धियांगुल्येति विशेष्यविशेषणभावः ॥

॥ अथ द्वितीया ॥

तं गावो अभ्यनूषत सहस्रधारमक्षितं । इंदुं धर्तारमा दिवः ॥२॥

तं । गावः । अभि । अनूषत । सहस्रऽधारं । अक्षितं । इंदुं । धर्तारं । आ । दिवः ॥२॥

तं सोमं गावो गंत्र्यः स्तुतयोऽभ्यनूषत । अस्तुवन् । कीदृशं तं । सहस्रधारं बहुधारमक्षितमक्षीणमिंदुं दीप्तं दिवो द्युलोकस्या धर्तारं सर्वतो धारकं । सोमाधारत्वाद्युलोकवासिनां संस्थानस्य ॥

॥ अथ तृतीया ॥

तं वेधां मेधयाह्यन्पवमानमधि द्यवि । धर्णसिं भूरिधायसं ॥३॥

तं । वेधां । मेधया । अह्यन् । पवमानं । अधि । द्यवि । धर्णसिं । भूरिऽधायसं ॥३॥

वेधां विधातारं पवमानं तं मेधया प्रज्ञयाह्यन् । प्रहिण्वंति । किं प्रति । अधि द्यवि द्युलोकं प्रति । पुनः कीदृशं । धर्णसिं सर्वस्य धारकं भूरिधायसं बहूनां कर्तारं ॥

॥ अथ चतुर्थी ॥

तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः । पतिं वाचो अदाभ्यं ॥४॥

तं । अह्यन् । भुरिजोः । धिया । संऽवसानं । विवस्वतः । पतिं । वाचः । अदाभ्यं ॥४॥

तं सोमं विवस्वतः परिचरत ऋत्विजो भूरिजोर्बाह्वोर्धियांगुल्याह्यन् । प्राहिण्वन् । कीदृशं तं । संवसानं वसंतं पात्रे वाचः स्तुतेः पतिं स्वामिनमदाभ्यमदंभनीयं ॥

॥ अथ पंचमी ॥

तं सानावधि जामयो हरिं हिन्वंत्यद्रिभिः । हर्यतं भूरिचक्षसं ॥५॥

तं । सानौ । अधि । जामयः । हरिं । हिन्वंति । अद्रिऽभिः । हर्यतं । भूरिऽचक्षसं ॥५॥

तं सोमं हरिं हरितवर्णं सानावधि समुच्छ्रिते देशे । अधीति सप्तम्यर्थानुवादी । जामयोऽंगुलयो हिन्वंति । प्रेरयंति । अधिषुण्वंत्यद्रिभिर्ग्रावभिः । कीदृशं । हर्यतं कमनीयं भूरिचक्षसं बहुद्रष्टारं ॥

॥ अथ षष्ठी ॥

तं त्वा हिन्वंति वेधसः पवमान गिरावृधं । इंदविंद्राय मत्सरं ॥६॥

तं । त्वा । हिन्वंति । वेधसः । पवमान । गिराऽवृधं । इंदो इति । इंद्राय । मत्सरं ॥६॥

हे पवमान सोम उक्तगुणविशिष्टं त्वा त्वां हिन्वंति । प्रेरयंति । कस्मै । इंद्राय ।

के । वेधसो विधातार ऋत्विजः । कीदृशं त्वां । गिरावृधं स्तुत्या वर्धमानमिंदुं दीप्तं सद्रूपं वा मत्सरं मदकरं ॥

॥ इति षष्ठस्याष्टमे षोडशो वर्गः ॥

एष कविरिति षडृचं तृतीयं सूक्तं नृमेधनाम्न आंगिरसस्यार्षं गायत्रं सौम्यं । एष कविर्नृमेध इत्यनुक्रांतं । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

एष कविरभिष्टुतः पवित्रे अधि तोशते । पुनानो घ्नन्नप स्रिधः ॥१॥

एषः । कविः । अभिऽस्तुतः । पवित्रे । अधि । तोशते । पुनानः । घ्नन् । अप । स्रिधः ॥१॥

एष सोमः कविर्मेधाव्यभिष्टुतोऽभितः स्तुतः पवित्रेऽधि दशापवित्रमतीत्य तोशते । यद्यपि तोशतिर्वधकर्मा तथापि हनने गतिसद्भावाद्‌च गतिमात्रे वर्तते । गच्छतीत्यर्थः । अथवा पवित्रेऽधि कृष्णाजिने तोशते । हन्यते । पीड्यत इत्यर्थः । किं कुर्वन् । पुनानः पूयमानः स्रिधः शत्रूनपघ्नन्नपगमयन् ॥

॥ अथ द्वितीया ॥

एष इंद्राय वायवे स्वर्जित्परि षिच्यते । पवित्रे दक्षसाधनः ॥२॥

एषः । इंद्राय । वायवे । स्वःऽजित् । परि । सिच्यते । पवित्रे । दक्षऽसाधनः ॥२॥

एष सोमः स्वर्जित्स्वर्गस्य सर्वस्य वा जेतेंद्राय वायवे च पवित्रे परिषिच्यते । कीदृश एषः । दक्षसाधनो बलकारी ॥

॥ अथ तृतीया ॥

एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः । सोमो वनेषु विश्ववित् ॥३॥

एषः । नृऽभिः । वि । नीयते । दिवः । मूर्धा । वृषा । सुतः । सोमः । वनेषु । विश्वऽवित् ॥३॥

एष सोमो नृभिः कर्मनेतृभिर्ऋत्विग्भिर्विनीयते । विविधं नीयते । एष कीदृशः । दिवो द्युलोकस्य मूर्धा शिरोवत्प्रधानभूतो वृषाभिमतवर्षकः सुतोऽभिषुतः । कुत्र नीयते । वनेषु वननीयेषु पात्रेषु वनसंभूतद्रुमविकारेषु वा पात्रेषु । विश्ववित्सर्वज्ञ एष इति समन्वयः ॥

॥ अथ चतुर्थी ॥

एष गव्युरचिक्रदत्पवमानो हिरण्ययुः । इंदुः सत्राजिदस्तृतः ॥४॥

एषः । गव्युः । अचिक्रदत् । पवमानः । हिरण्यऽयुः । इंदुः । सत्राऽजित् । अस्तृतः ॥४॥

एष सोमः पवमानः पूयमानोऽचिक्रदत् । शब्दं करोति । कथंभूतः सन् । गव्युरस्माकं गा इच्छन् हिरण्ययुर्धनमिच्छन्निंदुर्दीप्तः सन्सत्राजिन्महतः शत्रोरसुरादेर्जेतास्तृतः स्वयमन्यैरहिंस्यश्च सन् ॥

॥ अथ पंचमी ॥

एष सूर्येण हासते पवमानो अधि द्यवि । पवित्रे मत्सरो मदः ॥५॥

एषः । सूर्येण । हासते । पवमानः । अधि । द्यवि । पवित्रे । मत्सरः । मदः ॥५॥

एष पवमानः पूयमानः सोमः सूर्येण देवेनाधि द्यवि द्युलोकेऽतरिक्षे पवित्रे हासते । परित्यज्यते । मत्सरो मदकरो मदः सोमः । यद्यप्यध्वर्युहस्ताद्दशापवित्रे परित्यज्यते सोमस्तथाप्यंतरिक्षे सूर्येण पवित्रे त्यज्यत इति भावना वीर्यवत्त्वाय । सत्स्वप्यन्यदेवेषु सोमस्रावणे सूर्यस्य कः प्रसंग इति न वाच्यं सूर्यरश्मिभिरेव सोमस्याप्यायनात् ॥

॥ अथ षष्ठी ॥

एष शुष्म्यसिष्यददंतरिक्षे वृषा हरिः । पुनान इंदुरिंद्रमा ॥६॥

एषः । शुष्मी । असिस्यदत् । अंतरिक्षे । वृषा । हरिः । पुनानः । इंदुः । इंद्रं । आ ॥६॥

एष शुष्मी बलवान्सोमोऽतरिक्षे दशापवित्रेऽसिष्यदत् । स्यंदते । कीदृश एषः । वृषा वर्षको हरिर्हरितवर्णः पुनानः पूयमान इंदुर्दीप्तश्चेंद्रमा । इंद्रं चाभिगच्छतीति शेषः । आ इति चार्थे ॥

॥ इति षष्ठस्याष्टमे सप्तदशो वर्गः ॥

एष वाजीति षडृचं चतुर्थं सूक्तं प्रियमेधस्यार्षं गायत्रं सौम्यं । एष वाजी प्रियमेध इत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः । अव्यो वारं वि धावति ॥१॥

एषः । वाजी । हितः । नृऽभिः । विश्वऽवित् । मनसः । पतिः । अव्यः । वारं । वि । धावति ॥१॥

एष सोमो वाजी गमनशीलो हितोऽध्वर्युणा पात्रे निहितो विश्ववित्सर्वज्ञो मनसः स्तोत्रस्य पतिः स्वामी । अथवा सोमस्य मनोभिमानित्वान्मनसः स्वामित्वं चंद्रमा मनो भूत्वा हृदयं प्राविशदिति श्रुतेः । तादृशोऽसावव्यो वारमवेर्वालं दशापवित्रं विधावति । विविधं गच्छति ॥

॥ अथ द्वितीया ॥

एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः । विश्वा धामान्याविशन् ॥२॥

एषः । पवित्रे । अक्षरत् । सोमः । देवेभ्यः । सुतः । विश्वा । धामानि । आऽविशन् ॥२॥

एष सोमो देवेभ्यो देवार्थं सुतोऽभिषुतः सन्पवित्रेऽक्षरत् । स्रवति । विश्वा सर्वाणि धामानि देवशरीराण्याविशन्प्रविशन् प्रवेष्टुमित्यर्थः ॥

॥ अथ तृतीया ॥

एष देवः शुभायतेऽधि योनावमर्त्यः । वृत्रहा देववीतमः ॥३॥

एषः । देवः । शुभायते । अधि । योनौ । अमर्त्यः । वृत्रऽहा । देवऽवीतमः ॥३॥

एष सोमो देवः शुभायते । शोभते । कुत्र । अधि योनौ स्वीये स्थाने । कीदृश एषः । अमर्त्योऽमरणधर्मा वृत्रहा शत्रुहंता देववीतमो विशेषेण देवानां कामयिता ॥

॥ अथ चतुर्थी ॥

एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः । अभि द्रोणानि धावति ॥४॥

एषः । वृषा । कनिक्रदत् । दशऽभिः । जामिऽभिः । यतः । अभि । द्रोणानि । धावति ॥४॥

एष वृषा वर्षिता कामानां कनिक्रदच्छब्दं कुर्वन्दशभिर्जामिभिरंगुलीभिर्यतो धृतो द्रोणानि द्रुममयाणि पात्राण्यभिधावति । अभिगच्छति ॥

॥ अथ पंचमी ॥

एष सूर्यमरोचयत्पवमानो विचर्षणिः । विश्वा धामानि विश्ववित् ॥५॥

एषः । सूर्यं । अरोचयत् । पवमानः । विऽचर्षणिः । विश्वा । धामानि । विश्वऽवित् ॥५॥

एष सोमः सूर्यमरोचयत् । रोचयति स्वरसेन । पवमानः पूयमानो विचर्षणिः सर्वस्य द्रष्टा विश्ववित्सर्ववित् । न केवलं सूर्यं किंतु विश्वा सर्वाणि धामानि तेजःस्थानानि रोचयति ॥

॥ अथ षष्ठी ॥

एष शुष्म्यदा॑भ्यः॒ सोमः॑ पुना॒नो अ॑र्षति । दे॒वा॒वीर॑घशंस॒हा ॥६॥

ए॒षः । शु॒ष्मी । अदा॑भ्यः । सोमः॑ । पु॒ना॒नः । अ॒र्ष॒ति । दे॒व॒ऽअ॒वीः । अ॒घ॒शं॒स॒ऽहा ॥६॥

एष सोमः शुष्मी बलवानदाभ्योऽदंभनीयः पुनानः पूयमानोऽर्षति । गच्छति । देवावीर्देवानामविताघशंसहा । अघाञ्शंसंतीत्यघशंसाः । तेषां हंता ॥

॥ इति षष्ठस्याष्टमेऽष्टादशो वर्गः ॥

प्रास्येति षडृचं पंचमं सूक्तं नृमेधस्यांगिरसस्यार्षं गायत्रं पवमानसोमदेवताकं । अनुक्रम्यते च । प्रास्य नृमेध इति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्रास्य॒ धारा॑ अक्षर॒न्वृष्णः॑ सु॒तस्यौज॑सा । दे॒वाँ अनु॑ प्र॒भूष॑तः ॥१॥

प्र । अ॒स्य॒ । धाराः॑ । अ॒क्ष॒र॒न् । वृष्णः॑ । सु॒तस्य॑ । ओज॑सा । दे॒वान् । अनु॑ । प्र॒ऽभूष॑तः ॥१॥

अस्य सोमस्य वृष्णो वर्षकस्य सुतस्याभिषुतस्य देवाननु प्रभूषतः प्रभवितुमिच्छत ओजसा स्ववीर्येण धाराः प्राक्षरन् । प्रकर्षेण क्षरंति ॥

॥ अथ द्वितीया ॥

सप्तिं॑ मृजंति वे॒धसो॑ गृ॒णंतः॑ का॒रवो॑ गि॒रा । ज्योति॑र्जज्ञा॒नमु॒क्थ्यं॑ ॥२॥

सप्तिं॑ । मृ॒जं॒ति॒ । वे॒धसः॑ । गृ॒णंतः॑ । का॒रवः॑ । गि॒रा । ज्योतिः॑ । ज॒ज्ञा॒नं । उ॒क्थ्यं॑ ॥२॥

सप्तिमश्वस्थानीयं सर्पणस्वभावं वा सोमं मृजंति । शोधयंति । के । गृणंतः स्तुवंतो वेधसो विधातारः कारवः कर्मकर्तारोऽध्वर्य्वादयो गिरा स्तुत्या साधनेन । कीदृशं सप्तिं । ज्योतिर्दीप्यमानं सोमं जज्ञानं जायमानं प्रवृद्धमित्यर्थः । अथवा ज्योतिर्जायमानमयं वै ज्योतिर्यत्सोम इति श्रुतेः । उक्थ्यं स्तुत्यं ॥

॥ अथ तृतीया ॥

सु॒षहा॑ सोम॒ तानि॑ ते पुना॒नाय॑ प्रभूवसो । वर्धा॑ समु॒द्रमु॒क्थ्यं॑ ॥३॥

सु॒ऽसहा॑ । सो॒म॒ । तानि॑ । ते॒ । पु॒ना॒नाय॑ । प्र॒भु॒व॒सो॒ इति॑ प्रभुऽवसो । वर्ध॑ । स॒मु॒द्रं । उ॒क्थ्यं॑ ॥३॥

हे सोम प्रभूवसो प्रभूतधन पुनानाय पूयमानस्य ते तव तानि तेजांसि

सुषहा शोभनाभिभावुकानि । यस्मादेवं तस्मात्समुद्रं समुद्रसदृशं द्रोणकलश-मुक्थ्यं स्तुत्यं तं वर्ध । वर्धय । पूरय रसेन ॥

॥ अथ चतुर्थी ॥

विश्वा वसूनि संजयन्पवस्व सोम धारया । इनु द्वेषांसि सध्र्यक् ॥४॥

विश्वा । वसूनि । संऽजयन् । पवस्व । सोम । धारया । इनु । द्वेषांसि । सध्र्यक् ॥४॥

हे सोम विश्वा सर्वाणि वसून्यस्मदर्थं संजयन्पवस्व । क्षर धारया । द्वेषांसि द्वेष्याणि सर्वाणि सध्र्यक्सहैवेनु । प्रेरय दूरदेशं प्रति ॥

॥ अथ पंचमी ॥

रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित् । निदो यत्र मुमुच्महे ॥५॥

रक्ष । सु । नः । अररुषः । स्वनात् । समस्य । कस्य । चित् । निदः । यत्र । मुमुच्महे ॥५॥

हे सोम नोऽस्मान्सु सुष्ठु रक्ष । पालय । कस्मात् । अररुषोऽदातुः स्वनाच्छब्दान्निंदारूपात् । किमेकस्यादानशीलस्य । न । समस्य सर्वस्य योऽस्ति तस्य सर्वस्य कस्यचित् । कंचनामुंचन्नित्यर्थः । न केवलमदातुः स्वनात् । किं तर्हि । कस्यचित्कस्यापि निदो निंदकाद्रक्ष । यत्र मुमुच्महे यस्मिन्रक्षणे सति वयं मुक्ता भवेम तेन रक्षणेन रक्षयेति ॥

॥ अथ षष्ठी ॥

एंदो पार्थिवं रयिं दिव्यं पवस्व धारया । द्युमंतं शुष्ममा भर ॥६॥

आ । इंदो इति । पार्थिवं । रयिं । दिव्यं । पवस्व । धारया । द्युऽमंतं । शुष्मं । आ । भर ॥६॥

हे इंदो क्लिद्यमान सोम त्वं धारयापवस्व । सर्वतः क्षर । पार्थिवं दिव्यं च रयिं धनं द्युमंतं दीप्तिमंतं शुष्मं बलं चाभर । आहरास्मभ्यं ॥

॥ इति षष्ठस्याष्टम एकोनविंशो वर्गः ॥

प्र धारा इति षड्टचं षष्ठं सूक्तं बिंदुनाम्न आंगिरसस्यार्षं गायत्रं पवमान-सोमदेवताकं । प्र धारा बिंदुरित्यनुक्रमणिका । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन् । पुनानो वाचमिष्यति ॥१॥

प्र । धाराः । अस्य । शुष्मिणः । वृथा । पवित्रे । अक्षरन् । पुनानः । वाचं । इष्यति ॥१॥

शुष्मिणो बलवतोऽस्य सोमस्य धाराः पवित्रे दशापवित्रे वृथाप्रयत्नेनाक्षरन्। स्रवंति। तदानीं पुनानः पूयमानः सोमो वाचं स्तुतिं स्वीयं ध्वनिं वेष्यति। प्रेरयति॥

॥ अथ द्वितीया ॥

इंदुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत्। इयर्ति वग्नुमिंद्रियं ॥२॥

इंदुः। हियानः। सोतृऽभिः। मृज्यमानः। कनिक्रदत्। इयर्ति। वग्नुं। इंद्रियं ॥२॥

अयमिंदुर्दीप्तः सोमो हियानः प्रेर्यमाणो व्याप्रियमाणः। कैः। सोतृभिर्ऋत्विग्भिः। पश्चाद्दशापवित्रे मृज्यमानः शोध्यमानः कनिक्रदच्छब्दं कुर्वन्निंद्रियमिंद्रस्य संबंधिनमिंद्रियमपि ॅकरं वग्नुं शब्दमियर्ति। प्रेरयति ग्रहणसमये॥

॥ अथ तृतीया ॥

आ नः शुष्मं नृषाह्यं वीरवंतं पुरुस्पृहं। पवस्व सोम धारया ॥३॥

आ। नः। शुष्मं। नृऽसह्यं। वीरऽवंतं। पुरुऽस्पृहं। पवस्व। सोम। धारया ॥३॥

हे सोम त्वं धारयापवस्व। किं। शुष्मं बलं। कीदृशं। नृषाह्यं नृणामस्मद्विरोधिनामभिभावुकं वीरवंतं पुत्रोपेतं पुरुस्पृहं बहुभिः स्पृहणीयं शुष्ममापवस्व। एतस्य लाभाय पवस्वेत्यर्थः। रसस्रावे सति होमद्वारा तत्सिद्धे शुष्मं पवस्वेत्युपचर्यते॥

॥ अथ चतुर्थी ॥

प्र सोमो अति धारया पवमानो असिष्यदत्। अभि द्रोणान्यासदं ॥४॥

प्र। सोमः। अति। धारया। पवमानः। असिस्यदत्। अभि। द्रोणानि। आऽसदं ॥४॥

अयं पवमानः सोमो धारयात्यतिक्रम्य दशापवित्रं प्रासिष्यदत्। प्रस्यंदते। किमर्थं। द्रोणानि द्रोणकलशादीन्यासदमासादनाय॥

॥ अथ पंचमी ॥

अप्सु त्वा मधुमत्तमं हरिं हिन्वंत्यद्रिभिः। इंदविंद्राय पीतये ॥५॥

अप्ऽसु। त्वा। मधुमत्ऽतमं। हरिं। हिन्वंति। अद्रिऽभिः। इंदो इति। इंद्राय। पीतये ॥५॥

हे इंदो सोम अप्सु वसतीवरीषूदकेषु मधुमत्तममतिशयेन मधुमंतं हरिं

हरितवर्णं त्वा त्वामद्रिभिरभिषवग्रावभिर्हिन्वंति । प्रेरयंति । किमर्थं । इंद्रायेंद्रस्य पीतये पानाय ॥

॥ अथ षष्ठी ॥

सुनोता मधुमत्तमं सोममिंद्राय वज्रिणे । चारुं शर्धाय मत्सरं ॥६॥

सुनोत । मधुमत्ऽतमं । सोमं । इंद्राय । वज्रिणे । चारुं । शर्धाय । मत्सरं ॥६॥

हे ऋत्विजो यूयं मधुमत्तमं मधुरसोपेतं सोममिंद्राय वज्रिणे वज्रयुक्ताय सुनोत । सुनुत । पुनः कीदृशं । चारुं चरणीयं मत्सरं मदकरं शर्धायास्माकं बलायेंद्रस्य पानाय च सोमं सुनुतेति ब्रूते यजमानः स्वीयान् ॥

॥ इति षष्ठस्याष्टमे विंशो वर्गः ॥

प्र सोमास इति षड्टचं सप्तमं सूक्तं राहूगणस्य गोतमस्यार्षं सौम्यं । प्र सोमासो गोतम इत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र सोमासः स्वाध्य१ः पवमानासो अक्रमुः । रयिं कृण्वंति चेतनं ॥१॥

प्र । सोमासः । सुऽआध्यः । पवमानासः । अक्रमुः । रयिं । कृण्वंति । चेतनं ॥१॥

प्राक्रमुः । प्रगच्छंति कलशं प्रति । के । सोमासः सोमाः । कीदृशाः । स्वाध्यः सुध्यानाः सुकर्माणो वा पवमानासः पूयमानाः । ते च चेतनं प्रज्ञापनं रयिं धनं कृण्वंति । कुर्वंत्यस्माकं ॥

॥ अथ द्वितीया ॥

दिवस्पृथिव्या अधि भवेंदो द्युम्नवर्धनः । भवा वाजानां पतिः ॥२॥

दिवः । पृथिव्याः । अधि । भव । इंदो इति । द्युम्नऽवर्धनः । भव । वाजानां । पतिः ॥२॥

हे इंदो वाजानामन्नानां पतिः स्वामी त्वं दिवो द्युलोकस्य पृथिव्या भूलोकस्य द्युम्नवर्धनो द्योतमानस्य हिरण्यादिलक्षणधनस्य वर्धयिता भव । अस्माकं लोकद्वये यद्द्युम्नमस्ति तस्य वर्धयिता भवास्मभ्यमित्यर्थः ॥

॥ अथ तृतीया ॥

तुभ्यं वाता अभिप्रियस्तुभ्यमर्षंति सिंधवः । सोम वर्धंति ते महः ॥३॥

तुभ्यं । वाताः । अभिऽप्रियः । तुभ्यं । अर्षंति । सिंधवः । सोम । वर्धंति । ते । महः ॥३॥

हे सोम तुभ्यं त्वदर्थं वाता वायवोऽभिप्रियोऽभितर्पयितारो भवंति। तथा सिंधवः स्यंदमाना नद्यस्तुभ्यमर्षंति। गच्छंति। अभिषूयमाणस्य तवाप्यायनायैवं कुर्वंतीत्यर्थः। त उभयेऽमी ते तव महो महत्त्वं वर्धंति। वर्धयंति॥

॥ अथ चतुर्थी ॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं। भवा वाजस्य संगथे॥४॥

आ। प्यायस्व। सं। एतु। ते। विश्वतः। सोम। वृष्ण्यं। भव। वाजस्य। संऽगथे॥४॥

हे सोम त्वं वायुभिरद्भिश्चाप्यायस्व। प्रवृद्धो भव। ते त्वां विश्वतो वृष्ण्यं वर्षयोग्यं बलं समेतु। संगच्छतां। संगथे संग्रामे वाजस्यान्नस्य प्रापको भव॥

॥ अथ पंचमी ॥

तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितं। वर्षिष्ठे अधि सानवि॥५॥

तुभ्यं। गावः। घृतं। पयः। बभ्रो इति। दुदुह्रे। अक्षितं। वर्षिष्ठे। अधि। सानवि॥५॥

हे बभ्रो बभ्रुवर्ण सोम तुभ्यं त्वदर्थं गावो घृतं पयश्चाक्षितमक्षीणं दुदुह्रे। दुहते। वर्षिष्ठे प्रवृद्धेऽधि सानवि समुच्छ्रिते प्रदेशे स्थिताय तुभ्यं॥

॥ अथ षष्ठी ॥

स्वायुधस्य ते सतो भुवनस्य पते वयं। इंदो सखित्वमुश्मसि॥६॥

सुऽआयुधस्य। ते। सतः। भुवनस्य। पते। वयं। इंदो इति। सखिऽत्वं। उश्मसि॥६॥

हे भुवनस्य भूतजातस्य पते स्वामिन्पालक सोम। सोमस्य जगदाप्यायिकत्वं तत्स्वामित्वं। हे इंदो सोम वयमनुष्ठातारः स्वायुधस्य ते तव सतः सखित्वमुश्मसि। कामयामहे॥

॥ इति षष्ठस्याष्टम एकविंशो वर्गः॥

प्र सोमास इति षड्टचमष्टमं सूक्तमात्रेयस्य श्यावाश्वस्यार्षं गायत्रं सौम्यं। अनुक्रम्यते च। प्र सोमासः श्यावाश्व इति। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

प्र सोमासो मदच्युतः श्रवसे नो मघोनः। सुता विदथे अक्रमुः॥१॥

प्र। सोमासः। मदऽच्युतः। श्रवसे। नः। मघोनः। सुताः। विदथे। अक्रमुः॥१॥

सोमासः सोमा मदच्युतो मदस्राविणः सुता अभिषुताः संतो विदथे यज्ञे मघोनो हविष्मतो मम श्रवसेऽन्नाय कीर्तये वा प्राक्रमुः । प्रगच्छंति ॥

॥ अथ द्वितीया ॥

आदीं त्रितस्य योषणो हरिं हिन्वंत्यद्रिभिः । इंदुमिंद्राय पीतये ॥२॥

आत् । ई । त्रितस्य । योषणः । हरिं । हिन्वंति । अद्रिऽभिः । इंदुं । इंद्राय । पीतये ॥२॥

आदपि चेमेनं हरिं हरितवर्णं सोमं त्रितस्यर्षेर्योषणोऽंगुलयोऽद्रिभिर्ग्रावभिर्हिन्वंति । प्रेरयंति । किमर्थं । इंदुं दीप्तं सोममिंद्रायेंद्रस्य पीतये पानाय ॥

॥ अथ तृतीया ॥

आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिं । अत्यो न गोभिरज्यते ॥३॥

आत् । ई । हंसः । यथा । गणं । विश्वस्य । अवीवशत् । मतिं । अत्यः । न । गोभिः । अज्यते ॥३॥

आदपि चेमयं सोमो हंसो यथा गणं जनसंघं स्वगतिविशेषेण स्वनेन वा प्रविशति तद्वद्विश्वस्य सर्वस्य स्तोतृजनस्य मतिं स्तुतिं बुद्धिं वावीवशत् । वशं नयति । स च सोमोऽत्यो नाश्व इव गोभिर्गव्यैरुदकैर्वाज्यते । सिच्यते । स्निग्धीक्रियते ॥

॥ अथ चतुर्थी ॥

उभे सोमावचाकशन्मृगो न तक्तो अर्षसि । सीदन्नृतस्य योनिमा ॥४॥

उभे इति । सोम । अवऽचाकशत् । मृगः । न । तक्तः । अर्षसि । सीदन् । ऋतस्य । योनिं । आ ॥४॥

हे सोम उभे द्यावापृथिव्यावचाकशत् । पश्यतिकर्मेदं । पश्यन्मृगो न मृग इव तक्तो गव्यैः पयआदिभिर्मिश्रितः सन् । दध्नातनक्तीत्यादौ तथा दृष्टत्वात् । अर्षसि । गच्छसि च । किं कुर्वन् । ऋतस्य यज्ञस्य योनिं स्थानमासीदन्नाश्रयन् । यज्ञसाधनाय गच्छसीत्यर्थः ॥

॥ अथ पंचमी ॥

अभि गावो अनूषत योषा जारमिव प्रियं । अगन्नाजिं यथा हितं ॥५॥

अभि । गावः । अनूषत । योषा । जारंऽइव । प्रियं । अगन् । आजिं । यथा । हितं ॥५॥

हे सोम त्वां गावः शब्दा अभ्यनूषत। अभिष्टुवंति। योषा प्रियं जारमिव। सा यथा तं स्तौति तद्वत्। स सोम आजिं गंतव्यं हितं मित्रमिव तं यथान्योऽगन् स्वहिताय गच्छति तद्वत्। अथवा हितं धनप्रापकत्वेन हितकरमाजिं शूर इव। अयमागच्छति पात्रं ॥

॥ अथ षष्ठी ॥

अस्मे धेहि द्युमद्यशो मघवद्भ्यश्च मह्यं च। सनिं मेधामुत श्रवः ॥६॥

अस्मे इति। धेहि। द्युऽमत्। यशः। मघवत्ऽभ्यः। च। मह्यं। च। सनिं। मेधां। उत। श्रवः ॥६॥

हे सोम अस्मे अस्मभ्यं द्युमद्दीप्तिमद्यशोऽन्नं धेहि। देहि। कीदृशेभ्योऽस्मभ्यं। मघवद्भ्यश्च हविर्लक्षणान्नवद्भ्यश्च मह्यं च स्तुतिकर्त्रे च। अथवा मह्यमस्मभ्यमित्यर्थः। अस्मे मघवद्भ्यश्च मह्यं चेति तेषामेवाशंसनाभेदादुभयत्र चशब्दो युक्तः। किंच सनिं धनं मेधां प्रज्ञामुतापि च श्रवः कीर्तिं च धेहि ॥

॥ इति षष्ठस्याष्टमे द्वाविंशो वर्गः ॥

प्र सोमास इति षडृचं नवमं सूक्तं त्रितस्यार्षं गायत्रं पवमानसोमदेवताकं। प्र सोमासस्त्रित इत्यनुक्रांतं। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र सोमासो विपश्चितोऽपां न यंत्यूर्मयः। वनानि महिषा इव ॥१॥

प्र। सोमासः। विपःऽचितः। अपां। न। यंति। ऊर्मयः। वनानि। महिषाःऽइव ॥१॥

विपश्चितो मेधाविनः सोमासः सोमाः प्रयंति। प्रगच्छंति पात्राणि प्रति। किमिव। अपामूर्मयो न यथा संततमुद्रवंति तद्वत्। बाहुल्येऽयं दृष्टांतो दर्शितो गमने दृष्टांतांतरमभिधीयते। वनानि महिषाः प्रवृद्धा मृगा इव। अथवा स्वाश्रयात्प्रपतने प्रथमो दृष्टांतो द्वितीयस्तु दशापवित्राद्धःप्रवेशे ॥

॥ अथ द्वितीया ॥

अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया। वाजं गोमंतमक्षरन् ॥२॥

अभि। द्रोणानि। बभ्रवः। शुक्राः। ऋतस्य। धारया। वाजं। गोऽमंतं। अक्षरन् ॥२॥

अभि क्षरंतीति शेषः। उपसर्गश्रुतेरुचितक्रियाध्याहारः। प्रति द्रोणानि

द्रोणकलशान्। यद्यपि द्रोणकलश एक एव तथापि तत्प्राधान्यादितरेऽपि पात्रा द्रोणा इत्युच्यंते। अथवैकस्मिन्नेव पूजार्थं बहुवचनं। के। बभ्रवो बभ्रुवर्णाः सोमाः शुक्रा दीप्ताः। केन प्रकारेण। ऋतस्यामृतस्य धारया धाराकारेण। किंच वाजमन्नं गोमंतं बहुगोयुक्तमक्षरन्। क्षरंति। अथवैकमेव वाक्यं। उक्तविधाः सोमा द्रोणान्प्रत्यक्षरन्धारया। किं कुर्वंतः। गोमंतं वाजं प्रयच्छंत इत्यर्थः॥

॥ अथ तृतीया ॥

सुता इंद्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षंति विष्णवे॥३॥

सुताः। इंद्राय। वायवे। वरुणाय। मरुत्ऽभ्यः। सोमाः। अर्षंति। विष्णवे॥३॥

सुता अभिषुताः सोमा इंद्रायेंद्रार्थं वायवे च वरुणाय च मरुद्भ्यश्च विष्णवे चैषामर्थमर्षंति। गच्छंति॥

॥ अथ चतुर्थी ॥

तिस्रो वाच उदीरते गावो मिमंति धेनवः। हरिरेति कनिक्रदत्॥४॥

तिस्रः। वाचः। उत्। ईरते। गावः। मिमंति। धेनवः। हरिः। एति। कनिक्रदत्॥४॥

तिस्रो वाचः। ऋगादिभेदेन त्रिविधा स्तुतिः। उदीरते। प्रोद्गमयंत्यृत्विजः। धेनव आशिरेण प्रीणयित्र्यो गावो मिमंति। शब्दयंति दोहार्थं। हरिर्हरितवर्णश्च सोमः कनिक्रदच्छब्दं कुर्वन्नेति। गच्छति कलशं॥

॥ अथ पंचमी ॥

अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः। मर्मृज्यंते दिवः शिशुं॥५॥

अभि। ब्रह्मीः। अनूषत। यह्वीः। ऋतस्य। मातरः। मर्मृज्यंते। दिवः। शिशुं॥५॥

ब्रह्मीर्ब्राह्मणप्रेरिता यह्वीर्महत्यः। यह्वीरिति महन्नाम। ऋतस्य यज्ञस्य मातरो निर्मात्र्यः स्तुतयोऽभ्यनूषत। स्तुवंति। किं। दिवो द्युदेवतायाः शिशुं शिशुस्थानीयं सोमं। तमेव मर्मृज्यंते। मृजंति। तृतीयस्यामितो दिवि सोम आसीदित्यादिश्रुतेर्द्युशिशुत्वं तस्य॥

॥ अथ षष्ठी ॥

रायः समुद्रांश्चतुरोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणः॥६॥

रायः। समुद्रान्। चतुरः। अस्मभ्यं। सोम। विश्वतः। आ। पवस्व। सहस्रिणः॥६॥

रायो धनस्य संबंधिनश्चतुरः समुद्रान्धनपूर्णानित्यर्थः । तादृशान्समुद्रानस्मभ्य-मर्थाय हे सोम विश्वतः सर्वत आपवस्व । तथा सहस्रिणोऽपरिमितान्कामा-नापवस्व । आयच्छ । चतुःसमुद्रस्थधनविशेषप्राप्तेस्तन्मध्यगतभूमिस्वामित्वमंतरे-णासंभवाच्चतुःसमुद्रमुद्रितभूमंडलस्वामित्वमेवाशास्ते यजमानः ॥

॥ इति षष्ठस्याष्टमे त्रयोविंशो वर्गः ॥

प्र सुवान इति षडृचं दशमं सूक्तं । ऋष्याद्याः पूर्ववत् । प्र सुवान इत्यनु-क्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र सुवानो धारया तनेंदुर्हिन्वानो अर्षति । रुजद्दृळ्हा व्योजसा ॥१॥

प्र । सुवानः । धारया । तना । इंदुः । हिन्वानः । अर्षति । रुजत् । दृळ्हा । वि । ओजसा ॥१॥

इंदुः सोमः सुवानः सूयमानो हिन्वानोऽध्वर्युणा प्रेर्यमाणो धारया तना पवित्रं प्रार्षति । गच्छति । अथ प्रत्यक्षेणोच्यते । दृळ्हा दृढान्यपि शत्रुपुराण्यो-जसा बलेन विरुजत् । विरुजति । विश्लथयति ॥

॥ अथ द्वितीया ॥

सुत इंद्राय वायवे वरुणाय मरुद्भ्यः । सोमो अर्षति विष्णवे ॥२॥

सुतः । इंद्राय । वायवे । वरुणाय । मरुत्ऽभ्यः । सोमः । अर्षति । विष्णवे ॥२॥

अयं सुतोऽभिषुतः सोम इंद्राद्यर्थमर्षति । गच्छति ॥

॥ अथ तृतीया ॥

वृषाणं वृषभिर्यतं सुन्वंति सोममद्रिभिः । दुहंति शक्मना पयः ॥३॥

वृषाणं । वृषऽभिः । यतं । सुन्वंति । सोमं । अद्रिऽभिः । दुहंति । शक्मना । पयः ॥३॥

वृषाणं रससेक्तारं यतं नियतं सोमं वृषभी रसस्य वर्षकैरद्रिभिर्ग्रावभिः सुन्वंति । शक्मना कर्मणा दुहंत्यध्वर्य्वादयः पयः सोमरसं । सोमं पयो दुहंतीति द्विकर्मकोऽयं ॥

॥ अथ चतुर्थी ॥

भुवत्त्रितस्य मर्ज्यो भुवदिंद्राय मत्सरः । सं रूपैरज्यते हरिः ॥४॥

भुवत् । त्रितस्य । मर्ज्यः । भुवत् । इंद्राय । मत्सरः । सं । रूपैः । अज्यते । हरिः ॥४॥

चितस्यापां पुत्रस्य सूक्तद्रष्टुर्ऋषेः सोऽयं मत्सरो मदकरः सोमो मर्ज्यो भुवत्। शुद्धो भवति। तस्य यागार्थं शेषपानार्थं च। तथेंद्रायेंद्रपानाय मर्ज्यो भुवत्। रूपै रूपकैश्च क्षीरादिभिर्हरिर्हरितवर्णः सोमः समज्यते ॥

॥ अथ पंचमी ॥

अभीमृतस्य विष्टपं दुहते पृश्निमातरः। चारु प्रियतमं हविः ॥५॥

अभि। ई। ऋतस्य। विष्टपं। दुहते। पृश्निऽमातरः। चारु। प्रियऽतमं। हविः ॥५॥

ईमेनं सोममृतस्य विष्टपं स्थानं। यज्ञाश्रयमित्यर्थः। तादृशं पृश्निमातरो मरुतोऽभिदुहते। किं। प्रियतममिंद्रादीनां हविर्होमसाधनं चारु मनोहरं। मरुत्प्रेरितवृष्ट्या सोमवृद्धेस्तद्दोग्धृत्वं ॥

॥ अथ षष्ठी ॥

समेनमह्रुता इमा गिरो अर्षंति सस्रुतः। धेनूर्वाश्रो अवीवशत् ॥६॥

सं। एनं। अह्रुताः। इमाः। गिरः। अर्षंति। सऽस्रुतः। धेनूः। वाश्रः। अवीवशत् ॥६॥

समर्षंति संगच्छंत एनं सोममह्रुता अकुटिला गिरोऽस्मदीयाः स्तुतयः सस्रुतः सरंत्यः। ताश्च धेनूः प्रीणयित्रीः स्तुतीर्वाश्रः शब्दयन्नवीवशत्। कामयते सोमः ॥

॥ इति षष्ठस्याष्टमे चतुर्विंशो वर्गः ॥

आ न इति षड्चमेकादशं सूक्तमांगिरसस्य प्रभूवसोरार्षं गायत्रं पवमानसोमदेवताकं। अनुक्रांतं च। आ नः पवस्व प्रभूवसुरिति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

आ नः पवस्व धारया पवमान रयिं पृथुं। यया ज्योतिर्विदासि नः ॥१॥

आ। नः। पवस्व। धारया। पवमान। रयिं। पृथुं। यया। ज्योतिः। विदासि। नः ॥१॥

हे पवमान सोम त्वं धारया नोऽस्माकमापवस्व। सर्वतः क्षर। किं। रयिं धनं पृथुं विस्तीर्णं। यया धारया ज्योतिर्द्योतमानं यज्ञं स्वर्गं वा विदासि लंभयसि नोऽस्माकं ॥

॥ अथ द्वितीया ॥

इंदो॑ समु॒द्रमी॑ङ्खय॒ पव॑स्व विश्वमेजय । रा॒यो ध॒र्ता न॒ ओज॑सा ॥२॥

इंदो॒ इति॑ । स॒मु॒द्र॒ऽई॒ङ्ख॒य॒ । पव॑स्व । वि॒श्व॒ऽए॒ज॒य॒ । रा॒यः । ध॒र्ता । नः॒ । ओज॑सा ॥२॥

हे इंदो सोम हे समुद्रमीङ्खय । समुद्रमित्युदकनाम । ईङ्खयतिर्गतिकर्मा । उदकप्रेरक । तथा हे विश्वमेजय विश्वस्य सर्वस्यास्मच्छत्रोः कंपयितः सोम त्वमोजसा त्वदीयेन बलेन नोऽस्मभ्यं रायो धनस्य धर्ता धारकः पवस्व । भवेत्यर्थः । अत्र यद्यप्युदकप्रेरणसर्वशत्रुकंपने संबोधनांतर्गतत्वादुद्देश्यगते तथापि यजमानस्यापेक्षिते इति रायो धर्तृत्ववदाशास्ये अधिगंतव्ये ॥

॥ अथ तृतीया ॥

त्वया॑ वी॒रेण॑ वीरवो॒ऽभि ष्या॑म पृतन्य॒तः । क्षरा॑ णो अ॒भि वार्य॑म् ॥३॥

त्वया॑ । वी॒रेण॑ । वी॒र॒ऽव॒ः । अ॒भि । स्या॒म॒ । पृ॒त॒न्य॒तः । क्षर॑ । नः॒ । अ॒भि । वार्य॑म् ॥३॥

हे वीरवो वीरवन्सोम वीरेण त्वया साधनेन पृतन्यतः संग्राममिच्छतः शत्रून भिष्याम । अभिभवेम । अतो नोऽस्माकं वार्यं वरणीयं धनमभिक्षर । अभिगमयेत्यर्थः । अथवा वरणीयं सोमाख्यं धनं क्षर । पवस्व ॥

॥ अथ चतुर्थी ॥

प्र वाज॒मिंदु॑रिष्यति॒ सिषा॑सन्वाज॒सा ऋषि॑ः । व्र॒ता वि॒दान॒ आयु॑धा ॥४॥

प्र । वाज॑म् । इंदु॑ः । इ॒ष्य॒ति॒ । सिसा॑सन् । वा॒ज॒ऽसाः । ऋषि॑ः । व्र॒ता । वि॒दा॒नः॒ । आयु॑धा ॥४॥

सोमो वाजमन्नमिष्यति । प्रेरयति यजमानेभ्यः । किं कुर्वन् । सिषासन्यजमानान्संभक्तुमिच्छन् । ईदृश इंदुर्वाजसा अन्नस्य दातर्षिः सर्वस्य द्रष्टा व्रता कर्माण्यायुधानि च विदानो जानन् ॥

॥ अथ पंचमी ॥

तं गी॒र्भिर्वा॑चमीङ्ख॒यं पु॑ना॒नं वा॑सयामसि । सोम॒ं जन॑स्य॒ गोप॑तिम् ॥५॥

तम् । गीः॒ऽभिः । वा॒च॒म्ऽई॒ङ्ख॒यम् । पु॒ना॒नम् । वा॒स॒या॒म॒सि॒ । सोम॑म् । जन॑स्य । गोऽप॑तिम् ॥५॥

तं सोमं गीर्भिः स्तुतिवाग्भिः स्तौमीति शेषः । किंच वाचमीङ्खयं वाचः प्रेरयितारं पुनानं पूयमानं. तं सोमं वासयामसि । वासयामः श्रयणद्रव्यैः ।

कीदृशं सोमं । जनस्य गोपतिं गवां पालकं । यद्वैकमेव वाक्यं । उक्तविशेषणविशिष्टं सोमं स्तुतिभिर्वासयाम इति । माधवस्तु वाचमिति पृथक्पदं तिङंतं कृत्वा वाक्यद्वयं चकार ॥

॥ अथ षष्ठी ॥

विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः । पुनानस्य प्रभूवसोः ॥६॥

विश्वः । यस्य । व्रते । जनः । दाधार । धर्मणः । पतेः । पुनानस्य । प्रभुऽवसोः ॥६॥

विश्वः सर्वो जनो मनुष्यो यजमानो यस्य सोमस्य व्रते कर्मणि दाधार धारयति मन इति शेषः । कीदृशस्य । धर्मणः कर्मणः पतेः पालकस्य पुनानस्य पूयमानस्य प्रभूवसोः प्रभूतधनस्य ॥

॥ इति षष्ठस्याष्टमे पंचविंशो वर्गः ॥

असर्जीति षडृचं द्वादशं सूक्तं । ऋष्याद्याः पूर्ववत् । असर्जीत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः । कार्ष्मन्वाजी न्यक्रमीत् ॥१॥

असर्जि । रथ्यः । यथा । पवित्रे । चम्वोः । सुतः । कार्ष्मन् । वाजी । नि । अक्रमीत् ॥१॥

रथ्यो यथा रथसंबंध्यश्व इव स यथा विसृज्यते तद्वच्चम्वोरभिषवणफलकयोः सुतोऽभिषुतः सोमोऽसर्जि । सृष्टोऽभूत्पवित्रे । तथाभूतो वाजी वेजनवान्सोमाख्योऽश्वः कार्ष्मन् । कार्ष्मं युद्धमितरेतरकर्षणात् । अत्र देवानामाकर्षणवति यज्ञाख्ये संग्रामे न्यक्रमीत् । नितरां क्रामयति ॥

॥ अथ द्वितीया ॥

स वह्निः सोम जागृविः पवस्व देववीरति । अभि कोशं मधुश्चुतं ॥२॥

सः । वह्निः । सोम । जागृविः । पवस्व । देवऽवीः । अति । अभि । कोशं । मधुऽश्चुतं ॥२॥

हे सोम स वह्निर्वाहको जागृविर्जागरूको देववीर्देवकामस्त्वं मधुश्चुतं मधुस्राविकोशं दशापवित्रमतिक्रम्याभिपवस्व । द्रोणकलशं प्रति क्षर ॥

॥ अथ तृतीया ॥

स नो ज्योतींषि पूर्व्य पवमान वि रोचय । क्रत्वे दक्षाय नो हिनु ॥३॥

सः । नः । ज्योतींषि । पूर्व्य । पवमान । वि । रोचय । क्रत्वे । दक्षाय । नः । हिनु ॥३॥

हे पूर्व्य पुराण पवमान सोम नोऽस्माकं ज्योतींषि दिव्यानि स्थानानि विरोचय । प्रकाशय । किंच क्रत्वे कर्मणे यागाय दक्षाय बलाय च बलप्रदाय यागाय वा नोऽस्मान्हिनु । प्रेरय ॥

॥ अथ चतुर्थी ॥

शुंभमान ऋतायुभिर्मृज्यमानो गभस्त्योः । पवते वारे अव्यये ॥४॥

शुंभमानः । ऋतयुऽभिः । मृज्यमानः । गभस्त्योः । पवते । वारे । अव्यये ॥४॥

ऋतायुभिर्यज्ञकामैर्ऋत्विग्भिः शुंभमानोऽलंक्रियमाणस्तेषामेव गभस्त्योर्हस्तयोर्मृज्यमानः सोमोऽव्ययेऽविमये वारे वाले दशापवित्रे पवते । पूयते ॥

॥ अथ पंचमी ॥

स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा । पवतामांतरिक्ष्या ॥५॥

सः । विश्वा । दाशुषे । वसु । सोमः । दिव्यानि । पार्थिवा । पवतां । आ । अंतरिक्ष्या ॥५॥

सोऽभिषूयमाणः सोमो दाशुषे हविर्दात्रे विश्वा सर्वाणि वसु वसूनि धनानि पवतां । प्रयच्छतु । विश्वानीत्युक्तस्य विवरणं शिष्टं । दिव्यानि दिवि भवानि पार्थिवा पृथिवीसंबद्धान्यंतरिक्ष्यांतरिक्षे भवानि च पवतां ॥

॥ अथ षष्ठी ॥

आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि । वीरयुः शवसस्पते ॥६॥

आ । दिवः । पृष्ठं । अश्वऽयुः । गव्यऽयुः । सोम । रोहसि । वीरऽयुः । शवसः । पते ॥६॥

हे सोम त्वं स्तोतृणामश्वयुरश्वमिच्छन्गव्ययुर्गा इच्छन्वीरयुः पुत्रानिच्छन्दिवः पृष्ठं द्युलोकमारोहस्याहुतिद्वारा हे शवसस्पतेऽन्नस्य पालक ॥

॥ इति षष्ठस्याष्टमे षड्विंशो वर्गः ॥

स सुत इति षळृचं त्रयोदशं सूक्तं रहूगणस्यार्षं गायत्रं सौम्यं । अनुक्रम्यते च । स सुतो रहूगण इति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

स सुतः पीतये वृषा सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥१॥

सः । सुतः । पीतये । वृषा । सोमः । पवित्रे । अर्षति । विऽघ्नन् । रक्षांसि । देवऽयुः ॥१॥

स सोमः पीतय इंद्रादिपानाय सुतोऽभिषुतो वृषा वर्षणः सन्पवित्रेऽर्षति । गच्छति । किं कुर्वन् । रक्षांसि निघ्नन्देवयुर्देवकामः स इत्यन्वयः ॥

॥ अथ द्वितीया ॥

स पवित्रे विचक्षणो हरिरर्षति धर्णसिः । अभि योनिं कनिक्रदत् ॥२॥

सः । पवित्रे । विऽचक्षणः । हरिः । अर्षति । धर्णसिः । अभि । योनिं । कनिक्रदत् ॥२॥

स सोमो विचक्षणः । पश्यतिकर्मैतत् । सर्वस्य द्रष्टा हरिर्हरितवर्णः सोमो धर्णसिः सर्वस्य धारकः पवित्रेऽर्षति । गच्छति । पश्चात्कनिक्रदच्छब्दं कुर्वन्योनिं स्थानं द्रोणकलशमभिगच्छति ॥

॥ अथ तृतीया ॥

स वाजी रोचना दिवः पवमानो वि धावति । रक्षोहा वारमव्ययं ॥३॥

सः । वाजी । रोचना । दिवः । पवमानः । वि । धावति । रक्षःऽहा । वारं । अव्ययं ॥३॥

स वाजी वेजनवानश्वस्थानीयो दिवः स्वर्गस्य रोचना रोचकः पवमानः पूयमानो विधावति । कीदृशः । रक्षोहा रक्षोहंताव्ययं वारं दशापवित्रमतीत्य च धावति ॥

॥ अथ चतुर्थी ॥

स त्रितस्याधि सानवि पवमानो अरोचयत् । जामिभिः सूर्यं सह ॥४॥

सः । त्रितस्य । अधि । सानवि । पवमानः । अरोचयत् । जामिऽभिः । सूर्यं । सह ॥४॥

स सोमस्त्रितस्य महर्षेरधि सानवि समुच्छ्रिते यज्ञे । अधीति सप्तम्यर्थानुवादी । पवमानः पूयमानो जामिभिः प्रवृद्धैर्बंधुभूतैर्वा स्वतेजोभिः सह सहितः सन्सूर्यमरोचयत् । प्रकाशितवान् ॥

॥ अथ पंचमी ॥

स वृत्रहा वृषा सुतो वरिवोविददाभ्यः । सोमो वाजमिवासरत् ॥५॥

सः । वृत्रऽहा । वृषा । सुतः । वरिवःऽवित् । अदाभ्यः । सोमः । वाजंऽइव । असरत् ॥५॥

स वृत्रहा वृषा वर्षकः सुतोऽभिषुतो वरिवोविद्धनस्य लंभको ऽदाभ्योऽन्यै-रदंभनीयः सोमो वाजमिव संग्राममश्व इवासरत्। गच्छति कलशं ॥

॥ अथ षष्ठी ॥

स देवः कविनेषितो३ऽभि द्रोणानि धावति । इंदुरिंद्राय मंहना ॥६॥

सः । देवः । कविना । इषितः । अभि । द्रोणानि । धावति । इंदुः । इंद्राय । मंहना ॥६॥

स सोमो देव इंदुः क्रियमानः कविना क्रांतप्रज्ञेनाध्वर्युणेषितः प्रेरितः सन्द्रोणानि द्रोणकलशानभिधावति । अभिगच्छति । किमर्थं । इंद्रायेंद्रार्थं । मंहना महान्स इति समन्वयः ॥

॥ इति षष्ठस्याष्टमे सप्तविंशो वर्गः ॥

एष इति षड्चं चतुर्दशं सूक्तं । ऋष्याद्याः पूर्ववत् । एष उ स्य इत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

एष उ स्य वृषा रथोऽव्यो वारेभिरर्षति । गच्छन्वाजं सहस्रिणं ॥१॥

एषः । ऊं इति । स्यः । वृषा । रथः । अव्यः । वारेभिः । अर्षति । गच्छन् । वाजं । सहस्रिणं ॥१॥

स्य स प्रसिद्ध एषोऽभिषुतः सोमो वृषा वर्षिता रथो रंहणस्वभावोऽव्यो वारेभिरवेर्वालैर्दशापवित्रेणार्षति । गच्छति कलशं । वाजमन्नं सहस्रिणं सहस्र-संख्याकं यजमानाय प्रदातुं गच्छन्द्रोणकलशं प्रविशन्नर्षतीत्यर्थः । उ पूरणः ॥

॥ अथ द्वितीया ॥

एतं त्रितस्य योषणो हरिं हिन्वंत्यद्रिभिः । इंदुमिंद्राय पीतये ॥२॥

एतं । त्रितस्य । योषणः । हरिं । हिन्वंति । अद्रिऽभिः । इंदुं । इंद्राय । पीतये ॥२॥

एतमिंदुं क्रियमानं हरिं हरितवर्णं सोमं त्रितस्यर्षेर्योषणोऽंगुलयोऽद्रि-भिर्हिन्वंतीद्रायेंद्रस्य पीतये पानाय ॥

॥ अथ तृतीया ॥

एतं त्यं हरितो दश मर्मृज्यंते अपस्युवः । याभिर्मदाय शुंभते ॥३॥

एतं । त्यं । हरितः । दश । मर्मृज्यंते । अपस्युवः । याभिः । मदाय । शुंभते ॥३॥

एतं त्यं तं सोममध्वर्योर्दश हरितो हरणस्वभावा अंगुलयोऽपस्युवः कर्मेच्छवः सत्यो मर्मृज्यंते। शोधयंति। याभिरिंद्रस्य मदाय शुंभते दीप्यते। शोध्यत इत्यर्थः। तमेतमिति संबंधः ॥

॥ अथ चतुर्थी ॥

एष स्य मानुषीष्वा श्येनो न विक्षु सीदति। गच्छंजारो न योषितं ॥४॥

एषः। स्यः। मानुषीषु। आ। श्येनः। न। विक्षु। सीदति। गच्छन्। जारः। न। योषितं ॥४॥

स्य स एष सोमो मानुषीषु विक्षु प्रजासु यजमानरूपास्वनुग्रहेणासीदति श्येनो न श्येन इव। पुनः क इव। योषितं गच्छन्नभिगच्छञ्जारो न जार इव। स यथा संकेतितस्तस्याः कामपूरणाय गूढो गच्छति तद्वदित्यर्थः ॥

॥ अथ पंचमी ॥

एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः। य इंदुर्वारमाविशत् ॥५॥

एषः। स्यः। मद्यः। रसः। अव। चष्टे। दिवः। शिशुः। यः। इंदुः। वारं। आ। अविशत् ॥५॥

स्य स एष मद्यो मदनिमित्तो रसोऽवचष्टे। सर्वमवपश्यति। दिवः शिशुर्द्युपुत्रः। तत्रोत्पत्तेः पुत्रत्वमस्य। य इंदुर्दीप्तः सोमो वारं दशापवित्रमाविशदाविशति स एष इति ॥

॥ अथ षष्ठी ॥

एष स्य पीतये सुतो हरिरर्षति धर्णसिः। क्रंदन्योनिमभि प्रियं ॥६॥

एषः। स्यः। पीतये। सुतः। हरिः। अर्षति। धर्णसिः। क्रंदन्। योनिं। अभि। प्रियं ॥६॥

एष स्य स सोमः पीतये पानाय सुतोऽभिषुतो हरिर्हरितवर्णो धर्णसिर्धारकः प्रियं स्वप्रियभूतं योनिं स्थानं द्रोणकलशं क्रंदन् शब्दयन्नभ्यर्षति। गच्छति ॥

॥ इति षष्ठस्याष्टमेऽष्टाविंशो वर्गः ॥

आशुरर्षेति षडृचं पंचदशं सूक्तमांगिरसस्य बृहन्मतेरार्षं गायत्रं पवमानसोमदेवताकं। आशुरर्ष बृहन्मतिरित्यनुक्रांतं। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

आशुरर्ष बृहन्मते परि प्रियेण धाम्ना । यत्र देवा इति ब्रवन् ॥१॥

आशुः । अर्ष । बृहत्ऽमते । परि । प्रियेण । धाम्ना । यत्र । देवाः । इति । ब्रवन् ॥१॥

हे बृहन्मते महामते सोम प्रियेण देवानां प्रियतमेन धाम्ना शरीरेण धारयाशुः शीघ्रः सन्पर्यर्ष । परिगच्छ । यत्र देवा इंद्रादयो वर्तंत इति ब्रवन् ब्रुवन्नुच्चारयन् । तां दिशं गच्छामीति ब्रुवन्नित्यर्थः ॥

॥ अथ द्वितीया ॥

परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः । वृष्टिं दिवः परि स्रव ॥२॥

परिऽकृण्वन् । अनिःऽकृतं । जनाय । यातयन् । इषः । वृष्टिं । दिवः । परि । स्रव ॥२॥

अनिष्कृतमसंस्कृतं यजमानं स्थानं वा परिष्कृण्वन्संस्कुर्वञ्जनाय यागकर्त्रे इषोऽन्नानि यातयन्निर्गमयन्दिवोऽंतरिक्षाद्वृष्टिं परिस्रव ॥

॥ अथ तृतीया ॥

सुत एति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ॥३॥

सुतः । एति । पवित्रे । आ । त्विषिं । दधानः । ओजसा । विऽचक्षाणः । विऽरोचयन् ॥३॥

सुतोऽभिषुतः सोमः सन्पवित्रे दशापवित्रे । आ इत्यनर्थकः । ओजसा बलेन शीघ्रमेति । गच्छति । कीदृशः सन् । त्विषिं दीप्तिं दधानो धारयन्विचक्षाणः सर्वं पश्यन्विरोचयन्दीपयंश्च । किं । देवानिति शेषः ॥

॥ अथ चतुर्थी ॥

अयं स यो दिवस्परि रघुयामा पवित्र आ । सिंधोरूर्मा व्यक्षरत् ॥४॥

अयं । सः । यः । दिवः । परि । रघुऽयामा । पवित्रे । आ । सिंधोः । ऊर्मा । वि । अक्षरत् ॥४॥

अयं स सोमः पवित्र आ सिच्यमान इति शेषः । सिंधोर्जलस्राविण्या ऊर्मावूर्मौ संघाते व्यक्षरत् । विविधं क्षरति । स इत्युक्तं क इत्याह । यो दिवस्परि द्युलोकस्योपरि रघुयामा लघुगमनो देवप्राप्तौ सोऽयमिति संबंधः ॥

॥ अथ पंचमी ॥

आविवासन्परावतो अथो अर्वावतः सुतः । इंद्राय सिच्यते मधु ॥५॥

आऽविवासन् । पराऽवतः । अथो इति । अर्वाऽवतः । सुतः । इंद्राय । सिच्यते । मधु ॥५॥

सुतोऽभिषुतः सोमः परावतः । दूरनामैतत् । दूरस्थान् अथो अपि चार्वावतोऽंतिकस्थांश्च देवानाविवासन्नसेन परिचरणायेत्यर्थः । इंद्रायेंद्रार्थं मधु मधुसदृशः सोमः सिच्यते ॥

॥ अथ षष्ठी ॥

समीचीना अनूषत हरिं हिन्वंत्यद्रिभिः । योनावृतस्य सीदत ॥६॥

संऽईचीनाः । अनूषत । हरिं । हिन्वंति । अद्रिऽभिः । योनौ । ऋतस्य । सीदत ॥६॥

समीचीनाः सम्यगंचिताः संगताः स्तोतारोऽनूषत । स्तुवंति । किंच सोमं हरिं हरितवर्णं हिन्वंति । प्रेरयंति । गमयंत्यद्रिभिर्ग्रावभिः । यस्मादेवं तस्मादृतस्य यज्ञस्य योनौ स्थाने सीदत । निषण्णा भवत हे देवाः ॥

॥ इति षष्ठस्याष्टम एकोनत्रिंशो वर्गः ॥

पुनान इति षडृचं षोडशं सूक्तं । ऋष्याद्याः पूर्ववत् । पुनान इत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुंभंति विप्रं धीतिभिः ॥१॥

पुनानः । अक्रमीत् । अभि । विश्वाः । मृधः । विऽचर्षणिः । शुंभंति । विप्रं । धीतिऽभिः ॥१॥

पुनानः पूयमानो विचर्षणिर्द्रष्टा सोमो विश्वाः सर्वान्मृधो हिंसकाञ्शत्रूनभ्यक्रमीत् । अतिक्रांतवान् । तं विप्रं मेधाविनं धीतिभिः कर्मभिरभिषवादिभिः स्तुतिभिर्वा शुंभंति । दीपयंति । अलंकुर्वंति ॥

॥ अथ द्वितीया ॥

आ योनिमरुणो रुहद्गमदिंद्रं वृषा सुतः । ध्रुवे सदसि सीदति ॥२॥

आ । योनिं । अरुणः । रुहत् । गमत् । इंद्रं । वृषा । सुतः । ध्रुवे । सदसि । सीदति ॥२॥

अयमरुणोऽरुणवर्णः सोमो योनिं स्थानं द्रोणकलशमारुहत्। आरोहति। तत इंद्रं गमत्। गच्छति। कुतः सन्। अयं वृषा वर्षकः फलानां सुतोऽभिषुतः सन्गत्वा ध्रुवे सदसि स्थिरे स्थाने द्युलोकाख्ये सीदति। निवसति॥

॥ अथ तृतीया ॥

नू नो रयिं महामिंदोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणं ॥३॥

नु। नः। रयिं। महां। इंदो इति। अस्मभ्यं। सोम। विश्वतः। आ। पवस्व। सहस्रिणं ॥३॥

हे सोमाभिषुतस्त्वं हे इंदो नोऽस्मभ्यं नु क्षिप्रं महां महांतं सहस्रिणमसंख्यातं रयिं धनं विश्वत आपवस्व। सर्वतः परिस्रव॥

॥ अथ चतुर्थी ॥

विश्वा सोम पवमान द्युम्नानींदवा भर। विदाः सहस्रिणीरिषः ॥४॥

विश्वा। सोम। पवमान। द्युम्नानि। इंदो इति। आ। भर। विदाः। सहस्रिणीः। इषः ॥४॥

हे सोम पवमान पूयमानेंदो दीप्त त्वं विश्वा सर्वाणि बहुविधानि द्युम्नानि द्रविणान्याभर। आहर। विदा लंभय च सहस्रिणीः सहस्रसंख्याकानीषोऽन्नानि॥

॥ अथ पंचमी ॥

स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यं। जरितुर्वर्धया गिरः ॥५॥

सः। नः। पुनानः। आ। भर। रयिं। स्तोत्रे। सुऽवीर्यं। जरितुः। वर्धय। गिरः ॥५॥

हे सोम स त्वं नोऽस्मभ्यं स्तोत्रे स्तोतृभ्यः पुनानः पूयमानोऽभिषूयमाण आभर। आहर। किं। रयिं धनं। कीदृशं। सुवीर्यं सुपुत्रं। किंच जरितुः स्तोतुर्गिरः स्तुतीर्वर्धय॥

॥ अथ षष्ठी ॥

पुनान इंदवा भर सोम द्विबर्हसं रयिं। वृषन्निंदो न उक्थ्यं ॥६॥

पुनानः। इंदो इति। आ। भर। सोम। द्विऽबर्हसं। रयिं। वृषन्। इंदो इति। नः। उक्थ्यं ॥६॥

हे इंदो सोम पुनानः पूयमानस्त्वमाभर। आहर। किं। रयिं धनं। कीदृशं

धनं । द्विबर्हसं द्वयोर्द्यावापृथिव्याख्ययोः स्थानयोः परिवृढं । तदेवाह । हे इंदो वृषन्वर्षक नोऽस्मभ्यमुक्थ्यं स्तुत्यं धनमाभर ॥

॥ इति षष्ठस्याष्टमे त्रिंशो वर्गः ॥

प्र ये गाव इति षडृचं सप्तदशं सूक्तं काण्वस्य मेध्यातिथेरार्षं गायत्रं पवमानसोमदेवताकं । तथा चानुक्रांतं । प्र ये गावो मेध्यातिथिरिति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नंतः कृष्णामप त्वचं ॥१॥

प्र । ये । गावः । न । भूर्णयः । त्वेषाः । अयासः । अक्रमुः । घ्नंतः । कृष्णां । अप । त्वचं ॥१॥

येऽभिषुताः सोमा गावो नोदकानीव तानि यथा तूर्णमधः पतंति तद्वत् । एवं वोपमीयंते । यथा गावः स्वगोष्ठं प्रत्याशु गच्छंति तद्वत् । अथवा गावः स्तुतिवाचः । ता यथा स्तुत्यं प्रति क्षिप्रं प्राप्नुवंति तद्वत् । भूर्णयः क्षिप्रास्त्वेषा दीप्ता अयासोऽया गमनशीलाः कृष्णां त्वचं । कृष्णा त्वग्रक्षाः । तमपघ्नंतो निघ्नंतः । त्वचिः संवरणकर्मा । ईदृग्भूताः सोमाः प्राक्रमुस्तान्स्तुतेति शेषः ॥

॥ अथ द्वितीया ॥

सुवितस्य मनामहेऽति सेतुं दुराव्यं । साह्वांसो दस्युमव्रतं ॥२॥

सुवितस्य । मनामहे । अति । सेतुं । दुःऽआव्यं । सह्वांसः । दस्युं । अव्रतं ॥२॥

सुवितस्य । शोभनं प्राप्तः सुवितः । शोभनस्य सोमस्य सेतुं रक्षोविषयं बंधनं दुराव्यं दुष्टमतिं च रक्षसां बंधनं तेषां हननबुद्धिं च सोमकर्तृका मनामहे । स्तुमः । कथं स्तुम इति तदुच्यते । अव्रतमकर्माणं दस्युं शत्रुं साह्वांसोऽभिभवंतः ॥

॥ अथ तृतीया ॥

शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः । चरंति विद्युतो दिवि ॥३॥

शृण्वे । वृष्टेःऽइव । स्वनः । पवमानस्य । शुष्मिणः । चरंति । विऽद्युतः । दिवि ॥३॥

शृण्वे । श्रूयते । किं । सोमस्वनः । किमिव । वृष्टेर्वर्षणस्य स्वन इव । तस्य यथा महान्स्वनः श्रूयते तद्वत्प्रभूतरसापातसमये श्रूयते । कस्य स्वन इति

तत्राह । पवमानस्य पूयमानस्य शुष्मिणो बलवतः । तस्यैव विद्युतो दीप्तयो दिव्यंतरिक्षे चरंति ॥

॥ अथ चतुर्थी ॥

आ पवस्व महीमिषं गोमदिंदो हिरण्यवत् । अश्वावद्वाजवत्सुतः ॥४॥

आ । पवस्व । महीं । इषं । गोऽमत् । इंदो इति । हिरण्यऽवत् । अश्वऽवत् । वाजऽवत् । सुतः ॥४॥

हे इंदो सोम सुतोऽभिषुतस्त्वं महीमिषं महदन्नमापवस्व । कीदृशमन्नं । गोमद्बहुगोभिरुपेतं । एवं हिरण्यवद्धिरण्यैरश्ववदश्वैर्वाजवद्वाजैर्बलैश्चोपेतं ॥

॥ अथ पंचमी ॥

स पवस्व विचर्षण आ मही रोदसी पृण । उषाः सूर्यो न रश्मिभिः ॥५॥

सः । पवस्व । विऽचर्षणे । आ । मही इति । रोदसी इति । पृण । उषाः । सूर्यः । न । रश्मिऽभिः ॥५॥

हे विचर्षणे विद्रष्टः सोम स त्वं पवस्व । क्षर रसं । तथा कृत्वा तेन रसेन मही महत्यौ रोदसी द्यावापृथिव्यावापृण । आपूरय । उषा उषसः । एकदेशवाचिनोषःशब्देन तदुपलक्षितमहरुच्यते तत्प्राधान्यात् । अहानि रश्मिभिः सूर्यो न सूर्य इव ॥

॥ अथ षष्ठी ॥

परि णः शर्मयंत्या धारया सोम विश्वतः । सरा रसेव विष्टपं ॥६॥

परि । नः । शर्मऽयंत्या । धारया । सोम । विश्वतः । सर । रसाऽइव । विष्टपं ॥६॥

हे सोम नोऽस्मभ्यं शर्मयंत्या सुखयंत्या धारया विश्वतः सर्वतः परिसर । परिचर । रसेव रसेनेव विष्टपं भूलोकं । यद्वा रसा नदी स्थानं सा प्रवणरूपमिव ॥

॥ इति षष्ठस्याष्टम एकत्रिंशो वर्गः ॥

जनयन्निति षडृचमष्टादशं सूक्तं । ऋष्याद्याः पूर्ववत् । जनयन्नित्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

जनयन्रोचना दिवो जनयन्नप्सु सूर्यं । वसानो गा अपो हरिः ॥१॥

जनयन् । रोचना । दिवः । जनयन् । अप्ऽसु । सूर्यं । वसानः । गाः । अपः । हरिः ॥१॥

अयं हरिः सोमो दिवो द्युसंबंधीनि रोचना रोचनानि नक्षत्रग्रहमंडलानि जनयन् तथाप्स्वंतरिक्षे सूर्यं च जनयन् तथा गा अधोगंत्रीरपो वसानो भूमिमात्मानं वाच्छादयन्पवत इत्युत्तरत्र संबंधः ॥

॥ अथ द्वितीया ॥

एष प्रत्नेन मन्मना देवो देवेभ्यस्परि । धारया पवते सुतः ॥२॥

एषः । प्रत्नेन । मन्मना । देवः । देवेभ्यः । परि । धारया । पवते । सुतः ॥२॥

एष सोमः प्रत्नेन पुराणेन मन्मना मननीयेन स्तोत्रेण युक्तः सुतोऽभिषुतश्च सन्देवेभ्यः परि परितो धारया स्वीयया पवते ॥

॥ अथ तृतीया ॥

वावृधानाय तूर्वये पवंते वाजसातये । सोमाः सहस्रपाजसः ॥३॥

ववृधानाय । तूर्वये । पवंते । वाजऽसातये । सोमाः । सहस्रऽपाजसः ॥३॥

वावृधानाय वर्धमानाय तूर्वये क्षिप्राय वाजसातये संग्रामायान्नलाभाय वा पवंते पूयंते सोमाः सहस्रपाजसोऽपरिमितबलाः । असंख्यातवेगा इत्यर्थः ॥

॥ अथ चतुर्थी ॥

दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते । क्रंदन्देवाँ अजीजनत् ॥४॥

दुहानः । प्रत्नं । इत् । पयः । पवित्रे । परि । सिच्यते । क्रंदन् । देवान् । अजीजनत् ॥४॥

प्रत्नमित्पुराणमेव पयो रसं दुहानो दधानः सोमः पवित्रे परिषिच्यते । किंच क्रंदञ्शब्दं कुर्वन्देवानजीजनत् । जनयति स्वसमीपे । यत्र सोमोऽभिषूयते तत्र देवा नियतं प्रादुर्भवंति । अतो जनयतीत्युपचर्यते ॥

॥ अथ पंचमी ॥

अभि विश्वा॑नि॒ वार्या॒भि दे॒वाँ ऋ॑ता॒वृधः॑ । सोमः॑ पुना॒नो अ॑र्षति ॥५॥

अभि । विश्वा॑नि । वार्या॑ । अ॒भि । दे॒वान् । ऋ॒त॒ऽवृधः॑ । सोमः॑ । पु॒ना॒नः । अ॒र्ष॒ति ॥५॥

अयं सोमः पुनानः पूयमानो विश्वानि वार्या वरणीयानि धनान्यभ्यर्षति । तथर्तावृधो यज्ञवर्धकान्देवानभ्यर्षति ॥

॥ अथ षष्ठी ॥

गोम॑न्नः सोम वी॒रव॒दश्वा॑व॒द्वाज॑वत्सु॒तः । पव॑स्व बृह॒तीरिषः॑ ॥६॥

गोऽम॑त् । नः॒ । सो॒म॒ । वी॒रऽव॑त् । अश्व॑ऽवत् । वाज॑ऽवत् । सु॒तः । पव॑स्व । बृ॒ह॒तीः । इषः॑ ॥६॥

हे सोम सुतस्त्वं नोऽस्मभ्यं गोमद्गोभिर्युक्तं वीरवद्वहुभिर्वीरैरुपेतमश्वावदश्वैर्युक्तं वाजवद्वाजैर्बलैः संग्रामैर्वोपेतं धनं बृहतीरिषः प्रभूतान्यन्नानि पवस्व । प्रयच्छेत्यर्थः ॥

॥ इति षष्ठस्याष्टमे द्वात्रिंशो वर्गः ॥

यो अत्य इवेति षडृचमेकोनविंशं सूक्तं । ऋषाद्याः पूर्ववत् । यो अत्य इवेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

यो अत्य॑ इव मृ॒ज्यते॒ गोभि॒र्मदा॑य हर्य॒तः । तं गी॒र्भिर्वा॑सयामसि ॥१॥

यः । अत्यः॑ऽइव । मृ॒ज्यते॑ । गोभिः॑ । मदा॑य । ह॒र्य॒तः । तं । गीः॒ऽभिः । वा॒स॒या॒म॒सि॒ ॥१॥

यः सोमोऽत्य इवातनशीलोऽश्व इव गोभिर्वसतीवरीभिरद्भिर्गोविकारैः पयआदिभिर्वा मृज्यते मिश्र्यते । किमर्थं । मदाय देवानां । कीदृशः । यो हर्यतः कांतः । तं सोमं गीर्भिः स्तुतिभिर्वासयामसि । वासयामः ॥

॥ अथ द्वितीया ॥

तं नो॒ विश्वा॑ अव॒स्युवो॒ गिरः॑ शुंभंति पू॒र्वथा॑ । इंदु॒मिंद्रा॑य पी॒तये॑ ॥२॥

तं । नः॒ । विश्वाः॑ । अ॒व॒स्युवः॑ । गिरः॑ । शुं॒भं॒ति॒ । पू॒र्व॒ऽथा॑ । इंदुं॑ । इंद्रा॑य । पी॒तये॑ ॥२॥

तमिंदुं सोमं नोऽस्माकं विश्वाः सर्वा अवस्युवः । अवो रक्षणं तदिच्छंत्यो गिरः स्तुतयः पूर्वथा पूर्वमिव पूर्वं यथा तथैवेदानीमपि शुंभंति । दीपयंति । किमर्थं । इंद्रायेंद्रस्य पीतये पानाय ॥

॥ अथ तृतीया ॥

पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः । विप्रस्य मेध्यातिथेः ॥३॥

पुनानः । याति । हर्यतः । सोमः । गीःऽभिः । परिऽकृतः । विप्रस्य । मेध्यऽअतिथेः ॥३॥

पुनानः पूयमानो हर्यतः कमनीयः सोमो गीर्भिः परिष्कृतः स्तुतिभिरलंकृतो याति कलशं प्रति । किमर्थं । विप्रस्य मेधाविनो मेध्यातिथेर्मम यागार्थं । यद्वा मम गीर्भिरिति संबंधः ॥

॥ अथ चतुर्थी ॥

पवमान विदा रयिमस्मभ्यं सोम सुश्रियं । इंदो सहस्रवर्चसं ॥४॥

पवमान । विदाः । रयिं । अस्मभ्यं । सोम । सुऽश्रियं । इंदो इति । सहस्रऽवर्चसं ॥४॥

हे पवमानेंदो सोमास्मभ्यं सुश्रियं शोभनया श्रिया युक्तं सहस्रवर्चसं बहुदीप्तिं रयिं धनं विदाः । देहीत्यर्थः ॥

॥ अथ पंचमी ॥

इंदुरत्यो न वाजसृत्कनिक्रंति पवित्र आ । यदक्षारति देवयुः ॥५॥

इंदुः । अत्यः । न । वाजऽसृत् । कनिक्रंति । पवित्रे । आ । यत् । अक्षाः । अति । देवऽयुः ॥५॥

अयमिंदुर्वाजसृत्संग्रामसरणोऽत्यो नाश्व इव पवित्र आ पवित्रे कनिक्रंति । शब्दं करोति । यद्यदाक्षाः क्षरति । क्षर संचलन इत्यस्माच्छांदसे लुङि तिपि सिच् । बहुलं छंदसीतीडभावः । इडभावे च रात्सस्येति सलोपः । देवयुर्देवकामः सन् तदा शब्दं करोति ॥

॥ अथ षष्ठी ॥

पवस्व वाजसातये विप्रस्य गृणतो वृधे । सोम रास्व सुवीर्यं ॥६॥

पवस्व । वाजऽसातये । विप्रस्य । गृणतः । वृधे । सोम । रास्व । सुऽवीर्यं ॥६॥

हे सोम पवस्व । क्षर । किमर्थं । वाजसातयेऽन्नलाभाय । तथा गृणतः

स्तुवतो विप्रस्य मम मेध्यातिथेर्वृधे वर्धनाय च। हे सोम सुवीर्यं शोभनवीर्योपेतं पुत्रं च रास्व। देहि ॥

॥ इति षष्ठस्याष्टमे त्रयस्त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टकेऽष्टमोऽध्यायः ॥

॥ समाप्तं च षष्ठाष्टकं ॥

ओं

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ सप्तमाष्टकस्य प्रथमाध्याय आरभ्यते ॥ प्र ण इति षडृचं विंशं सूक्तमांगिरसस्यायास्यस्यार्षं गायत्रं पवमानसोमदेवताकं। तथा चानुक्रांतं। प्र णोऽयास्य इति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र णं इंदो महे तनं ऊर्मिं न बिभ्रंदर्षसि। अभि देवाँ अयास्यः ॥१॥

प्र। नः। इंदो इति। महे। तने। ऊर्मिं। न। बिभ्रंत्। अर्षसि। अभि। देवान्। अयास्यः ॥१॥

हे इंदो सोम त्वं नोऽस्माकं महे महते तने धनाय प्रार्षसि। प्रगच्छसि। न संप्रति। अयास्यश्चायमृषिस्त्वोर्मिं तरंगं बिभ्रद्धारयन्देवानभि गच्छति यष्टुं ॥

॥ अथ द्वितीया ॥

मती जुष्टो धिया हितः सोमो हिन्वे परावतिं। विप्रस्य धारया कविः ॥२॥

मती। जुष्टः। धिया। हितः। सोमः। हिन्वे। पराऽवतिं। विप्रस्य। धारया। कविः ॥२॥

कविः क्रांतकर्मा सोमो विप्रस्य मेधाविनः स्तोतुर्मती मत्या स्तुत्या जुष्टः सेवितो धिया कर्मणा हितो यज्ञे निहितः परावति पवित्राद्दूरदेशे धारया हिन्वे। प्रेर्यते ॥

॥ अथ तृतीया ॥

अयं देवेषु जागृविः सुत एति पवित्र आ। सोमो याति विचर्षणिः ॥३॥

अयं। देवेषु। जागृविः। सुतः। एति। पवित्रे। आ। सोमः। याति। विऽचर्षणिः ॥३॥

जागृविर्जागरणशीलोऽयं सोमो देवेषु देवार्थं सुतोऽभिषुत आ एति । समंताद्गच्छति । अपि च विचर्षणिर्विद्रष्टा सोमः पवित्रे याति । पावनाय गच्छति ॥

॥ अथ चतुर्थी ॥

स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरं । बर्हिष्माँ आ विवासति ॥४॥

सः । नः । पवस्व । वाजऽयुः । चक्राणः । चारुं । अध्वरं । बर्हिष्मान् । आ । विवासति ॥४॥

हे सोम यं त्वां बर्हिष्मानृत्विगाविवासति परिचरति स त्वं नोऽस्मदर्थं वाजयुरन्नमिच्छन्नध्वरं हिंसारहितं यागं चारुं कल्याणं चक्राणः कुर्वन्पवस्व । क्षर ॥

॥ अथ पंचमी ॥

स नो भगाय वायवे विप्रवीरः सदावृधः । सोमो देवेष्वा यमत् ॥५॥

सः । नः । भगाय । वायवे । विप्रऽवीरः । सदाऽवृधः । सोमः । देवेषु । आ । यमत् ॥५॥

स पवमानः सोमो वायवे वायुदेवार्थं भगाय भगदेवार्थं च विप्रवीरो विप्रैर्मेधाविभिः स्तुत्या प्रेरितः सदावृधो नित्यवृद्धो भवन्नोऽस्मभ्यं देवेषु स्थितं धनमायमत् । आ प्रयच्छतु ॥

॥ अथ षष्ठी ॥

स नो अद्य वसुत्तये क्रतुविद्गातुवित्तमः । वाजं जेषि श्रवो बृहत् ॥६॥

सः । नः । अद्य । वसुत्तये । क्रतुऽवित् । गातुवित्ऽतमः । वाजं । जेषि । श्रवः । बृहत् ॥६॥

हे सोम क्रतुवित् क्रतूनां कर्मणां लंभको गातुवित्पुण्यलोकानामतिशयेन मार्गस्य ज्ञाता त्वमद्यास्मिन्नहनि नोऽस्माकं वसुत्तये धनलाभाय बृहन्महच्छ्रवोऽन्नं वाजं बलं च जेषि । जय ॥

॥ इति सप्तमस्य प्रथमे प्रथमो वर्गः ॥

स पवस्वेति षड्टचमेकविंशं सूक्तं । ऋष्याद्याः पूर्ववत् । स पवस्वेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

स पवस्व मदाय कं नृचक्षा देववीतये । इंदविंद्राय पीतये ॥१॥

सः । पवस्व । मदाय । कं । नृऽचक्षाः । देवऽवीतये । इंदो इति । इंद्राय । पीतये ॥१॥

हे इंदो सोम नृचक्षा नृणां नेतॄणां द्रष्टा स त्वं देववीतये यज्ञायेंद्रायेंद्रस्य पीतये पानाय च मदाय मदार्थं च कं सुखं यथा भवति तथा पवस्व । क्षर ॥

॥ अथ द्वितीया ॥

स नो अर्षाभि दूत्यं१ त्वमिंद्राय तोशसे । देवान्त्सखिभ्य आ वरं ॥२॥

सः । नः । अर्ष । अभि । दूत्यं । त्वं । इंद्राय । तोशसे । देवान् । सखिऽभ्यः । आ । वरं ॥२॥

हे सोम त्वं नोऽस्माकं दूत्यं दूतस्य कर्मार्ष । अभिगच्छ । अपि च यस्त्वमिंद्रायेंद्रार्थं तोशसे पीयसे स त्वं सखिभ्यः प्रियेभ्योऽस्मभ्यं वरं श्रेष्ठं धनं देवाना पवस्वेत्यर्थः ॥

॥ अथ तृतीया ॥

उत त्वामरुणं वयं गोभिरंज्मो मदाय कं । वि नो राये दुरो वृधि ॥३॥

उत । त्वां । अरुणं । वयं । गोभिः । अंज्मः । मदाय । कं । वि । नः । राये । दुरः । वृधि ॥३॥

उतापि च हे सोम यमरुणमरुणवर्णं त्वां मदाय मदार्थं वयमांगिरसायास्या गोभिर्गोविकारैः पयोभिरंज्मो वासयामः संस्कुर्मः । कमिति पूरणं । स त्वं नोऽस्माकं राये धनाय दुरो द्वाराणि विवृधि । विवृतानि कुरु ॥

॥ अथ चतुर्थी ॥

अत्यूं पवित्रमक्रमीद्वाजी धुरं न यामनि । इंदुर्देवेषु पत्यते ॥४॥

अति । ऊं इति । पवित्रं । अक्रमीत् । वाजी । धुरं । न । यामनि । इंदुः । देवेषु । पत्यते ॥४॥

इंदुः सोमो वाज्यश्वो यामनि गमने धुरं न रथस्य धुरं यथा तथा पवित्रमत्यक्रमीत् । अतिगच्छति । देवेषु देवानां मध्ये पत्यते । गच्छति च ॥

॥ अथ पंचमी ॥

समी सखायो अस्वरन्वने क्रीळंतमत्यविं । इंदुं नावा अनूषत ॥५॥

सं । ईमिति । सखायः । अस्वरन् । वने । क्रीळंतं । अतिऽअविं । इंदुं । नावाः । अनूषत ॥५॥

अत्यविमतिक्रांतं दशापवित्रं वन उदके क्रीडंतं संक्रीडमानमीमेनमिंदुं सोमं सखायः प्रियस्तोतारः समस्वरन् । संस्तुवंति । नावा वाचोऽप्यनूषत । अस्तुवन् । नौरक्षरमिति वाङ्नामसु पाठात् ॥

॥ अथ षष्ठी ॥

तया पवस्व धारया यया पीतो विचक्षसे । इंदो स्तोत्रे सुवीर्यं ॥६॥

तया । पवस्व । धारया । यया । पीतः । विऽचक्षसे । इंदो इति । स्तोत्रे । सुऽवीर्यं ॥६॥

हे इंदो त्वं यया धारया पीतः सन्विचक्षसे विचक्षणाय स्तोत्रे स्तोत्राणां कर्त्रे पुरुषाय सुवीर्यं शोभनवीर्यं प्रयच्छसीति शेषः । तया धारया पवस्व । क्षर ॥

॥ इति सप्तमस्य प्रथमे द्वितीयो वर्गः ॥

असृग्रन्निति षड़ृचं द्वाविंशं सूक्तं । ऋष्याद्याः पूर्ववत् । असृग्रन्नित्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

असृग्रन्देववीतयेऽत्यासः कृत्व्या इव । क्षरंतः पर्वतावृधः ॥१॥

असृग्रन् । देवऽवीतये । अत्यासः । कृत्व्याःऽइव । क्षरंतः । पर्वतऽवृधः ॥१॥

पर्वतावृधः पर्वतैरभिषवग्रावभिर्वृद्धाः पर्वतेषु वा जाताः क्षरंतः सोमा देववीतये यज्ञायात्यासोऽश्वाः कृत्व्या इव यथा कर्मण्या अश्वास्तद्वदसृग्रन् । सृज्यंते ॥

॥ अथ द्वितीया ॥

परिष्कृतास इंदवो योषेव पित्र्यावती । वायुं सोमा असृक्षत ॥२॥

परिऽकृतासः । इंदवः । योषाऽइव । पित्र्यऽवती । वायुं । सोमाः । असृक्षत ॥२॥

इंदवो यागेषु क्लिद्यमानाः सोमाः परिष्कृतासः परिष्कृता अलंकृताः संतः

पित्र्यावती पितृमती योषेवालंकृता कन्यका यथा वरं प्रति गच्छति तद्वद्वायुं प्रत्यसृक्षत । गच्छंति ॥

॥ अथ तृतीया ॥

एते सोमा॑स॒ इंद॑वः॒ प्रय॑स्वंतश्च॒मू॒ सु॒ताः । इंद्रं॑ वर्धंति॒ कर्म॑भिः ॥३॥

ए॒ते । सोमा॑सः । इंद॑वः । प्रय॑स्वंतः । च॒मू इति॑ । सु॒ताः । इंद्रं॑ । व॒र्ध॒ति॒ । कर्म॑ऽभिः ॥३॥

इंद्वो दीप्ताः प्रयस्वंतोऽन्नवंत एतेऽस्मिन्कर्मणि वर्तमाना अमी सोमासः सोमाश्चमू चम्वोरधिषवणफलकयोः सुता अभिषुताः संतः कर्मभिर्योगैरिंद्रं वर्धंति । प्रवर्धयंति । प्रीणयंतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

आ धा॑वता सुहस्त्यः शु॒क्रा गृ॑भ्णीत म॒न्थिना॑ । गोभिः॑ श्रीणीत म॒त्स॒रं ॥४॥

आ । धा॒व॒त॒ । सु॒ऽह॒स्त्यः॒ । शु॒क्रा । गृ॒भ्णी॒त॒ । म॒न्थिना॑ । गोभिः॑ । श्री॒णी॒त॒ । म॒त्स॒रं ॥४॥

हे सुहस्त्यः शोभनहस्ता ऋत्विज आ धावत । मां संप्रत्यागच्छत । मंथिना सह शुक्रा शुक्रं च गृभ्णीत । गृह्णीत सोमं । मत्सरं सोमं गोभिर्गोविकारैः पयोभिः श्रीणीत । संस्कुरुत च ॥

॥ अथ पंचमी ॥

स प॑वस्व धनंजय प्र॒यं॒ता राध॑सो म॒हः । अ॒स्मभ्यं॑ सोम गातु॒वित् ॥५॥

सः । प॒व॒स्व॒ । ध॒नं॒ऽज॒य॒ । प्र॒ऽयं॒ता । राध॑सः । म॒हः । अ॒स्मभ्यं॑ । सो॒म॒ । गा॒तु॒ऽवि॒त् ॥५॥

हे धनंजय शत्रुसंबंधिनां धनानां जेतः सोम गातुविदभीष्टमार्गस्य लंभकोऽस्मभ्यं महो महतो राधसो धनस्य प्रयंता प्रदाता च यः स त्वं पवस्व । क्षर ॥

॥ अथ षष्ठी ॥

ए॒तं मृ॑जंति॒ मर्ज्यं॒ पव॑मानं॒ दश॒ क्षिपः॑ । इंद्रा॑य म॒त्स॒रं मदं॑ ॥६॥

ए॒तं । मृ॒जं॒ति॒ । मर्ज्यं॑ । पव॑मानं । दश॑ । क्षिपः॑ । इंद्रा॑य । म॒त्स॒रं । मदं॑ ॥६॥

मर्ज्यं मर्जनीयं शोध्यं पवमानं क्षरंतं मत्सरं मदकरमेतमिमं मदं सोमं दशसंख्याकाः क्षिपोऽंगुलयः ॥ क्षिपः क्षिप इत्यंगुलिनामसु पाठात् ॥ इंद्रार्थं मृजंति । पवित्रे शोधयंति ॥

॥ इति सप्तमस्य प्रथमे तृतीयो वर्गः ॥

अया सोम इति पंचर्चं त्रयोविंशं सूक्तं भृगुपुत्रस्य कवेरार्षं गायत्रं पवमानसोमदेवताकं। तथा चानुक्रांतं। अया सोमः पंच कविर्भार्गव इति। उक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

अया सोमः सुकृत्यया महश्चिदभ्यवर्धत। मंदान उद्वृषायते ॥१॥

अया। सोमः। सुऽकृत्यया। महः। चित्। अभि। अवर्धत। मंदानः। उत्। वृषऽयते ॥१॥

सोमोऽयानया सुकृत्यया शोभनयाभिषवादिलक्षणया क्रियया महश्चिन्महतो देवान् प्रत्यभ्यवर्धत। प्रवृद्धोऽभूत्। मंदानो मोदमान उद्वृषायते। वृषवदाचरति। यथा मोदमानो वृषभः शब्दं करोति तथाभिषववेलायामुपरवेषु शब्दं करोतीत्यर्थः॥

॥ अथ द्वितीया ॥

कृतानीदस्य कर्त्वा चेतंते दस्युतर्हणा। ऋणा च धृष्णुश्चयते ॥२॥

कृतानि। इत्। अस्य। कर्त्वा। चेतंते। दस्युऽतर्हणा। ऋणा। च। धृष्णुः। चयते ॥२॥

कृतान्यस्य यस्यैतस्य सोमस्य दस्युतर्हणा दस्यूनामसुराणां कर्त्वा कर्माणि स इद्स्माभिरेव सोऽयं धृष्णुर्धृष्टः सोमो यजमानानामृणा च ऋणान्यपि चयते। कामप्रदानेन चातयति॥

॥ अथ तृतीया ॥

आत्सोम इंद्रियो रसो वज्रः सहस्रसा भुवत्। उक्थं यदस्य जायते ॥३॥

आत्। सोमः। इंद्रियः। रसः। वज्रः। सहस्रऽसाः। भुवत्। उक्थं। यत्। अस्य। जायते ॥३॥

यद्यदास्येंद्रस्योक्थं शस्त्रं जायते प्रादुर्भवति तदादनंतरमेवेंद्रिय इंद्रस्य प्रियकरो रसो बलवान्वज्रो वज्रसदृशः केनाप्यहिंस्यः सोमः सहस्रसा अस्मभ्यमपरिमितस्य धनस्य दाता भवति॥

॥ अथ चतुर्थी ॥

स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति। यदी मर्मृज्यते धियः ॥४॥

स्वयं। कविः। विऽधर्तरि। विप्राय। रत्नं। इच्छति। यदि। मर्मृज्यते। धियः ॥४॥

यदि कविः क्रांतकर्मायं सोमो धियो धीभिः ॥ विभक्तिव्यत्ययः ॥ धीतिभिरंगुलीभिरित्यर्थः । मर्मृज्यते शोध्यते तर्हि स्वयं स्वयमेव विप्राय मेधाविने विधर्तरि कामानां विधातरींद्रे रत्नं रमणीयं धनमिच्छति । इंद्रेण धनं दापयितुमिच्छतीत्यर्थः ॥

॥ अथ पंचमी ॥

सिषासतू रयीणां वाजेष्वर्वतामिव । भरेषु जिग्युषामसि ॥५॥

सिसासतुः । रयीणां । वाजेषु । अर्वतांऽइव । भरेषु । जिग्युषां । असि ॥५॥

हे सोम त्वं भरेषु संग्रामेषु जिग्युषां शत्रुं जयतां रयीणां धनानां सिषासतुः संभक्तुमिच्छुरसि । भवसि । शत्रूञ्जयद्भ्यो धनानि प्रयच्छसीत्यर्थः । तत्र दृष्टांतः । वाजेषु संग्रामेष्वर्वतामिवाश्वानामिव । यथा संग्रामं प्रविशद्भ्योऽश्वेभ्यो घासं प्रयच्छंति तद्वदित्यर्थः ॥

॥ इति सप्तमस्य प्रथमे चतुर्थो वर्गः ॥

तं त्वेति पंचर्चं चतुर्विंशं सूक्तं । ऋष्याद्याः पूर्ववत् । तं त्वेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः । चारुं सुकृत्ययेमहे ॥१॥

तं । त्वा । नृम्णानि । बिभ्रतं । सधऽस्थेषु । महः । दिवः । चारुं । सुऽकृत्यया । ईमहे ॥१॥

महो दिवो महतो द्युलोकस्य सधस्थेषु सहस्थानेषु स्थितं नृम्णानि धनानि बिभ्रतमस्मदर्थं धारयंतं चारुं कल्याणं तं पवमानं त्वा त्वां सुकृत्यया शोभनया क्रिययेमहे । धनानि याचामहे ॥

॥ अथ द्वितीया ॥

संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदं । शतं पुरो रुरुक्षणिं ॥२॥

संवृक्तऽधृष्णुं । उक्थ्यं । महाऽमहिव्रतं । मदं । शतं । पुरः । रुरुक्षणिं ॥२॥

हे सोम संवृक्तधृष्णुं संवृक्ताः संछिन्ना धृष्णवो धर्षणशीलाः शत्रवो येनासौ संवृक्तधृष्णुस्तमुक्थ्यमुक्थार्हं प्रशस्यं महामहिव्रतं महनीयबहुकर्माणं मदं मदकरं शतं बहूनि पुरः शत्रूणां पुराणि रुरुक्षणिं विनाशयंतं त्वां धनानीमह इति संबंधः ॥

॥ अथ तृतीया ॥

अतस्त्वा रयिमभि राजानं सुक्रतो दिवः । सुपर्णो अव्यथिर्भरत् ॥३॥

अतः । त्वा । रयिं । अभि । राजानं । सुऽक्रतो इति । दिवः । सुऽपर्णः । अव्यथिः । भरत् ॥३॥

हे सुक्रतो शोभनकर्मन्पवमान सोम रयिमभि धनं प्रति राजानं त्वा त्वामतो दिवोऽमुष्माद्द्युलोकात्सुक्रतुः सुप्रज्ञोऽव्यथिर्व्यथारहितः सुपर्णः श्येनो भरत् । आहरत् । तथा च निगमांतरं । आदाय श्येनो अभरत्सोमं सहस्रं सवाँ । ऋग्वे० ४. २६.७. । इति ॥

॥ अथ चतुर्थी ॥

विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरं । गोपामृतस्य विर्भरत् ॥४॥

विश्वस्मै । इत् । स्वः । दृशे । साधारणं । रजःऽतुरं । गोपां । ऋतस्य । विः । भरत् ॥४॥

रजस्तुरमुदकस्य प्रेरकमृतस्य यज्ञस्य गोपां गोपायितारं विश्वस्मै सर्वस्मै स्वर्दृशे सर्वदृशे देवाय साधारणमित्समानमेव संतं सोमं विः पक्षी श्येनो भरत् । स्वर्गादाहरत् ॥

॥ अथ पंचमी ॥

अधा हिन्वान इंद्रियं ज्यायो महित्वमानशे । अभिष्टिकृद्विचर्षणिः ॥५॥

अध । हिन्वानः । इंद्रियं । ज्यायः । महिऽत्वं । आनशे । अभिष्टिऽकृत् । विऽचर्षणिः ॥५॥

अधाथ विचर्षणिः कर्मणां विद्रष्टाभिष्टिकृद्यजमानानामभीष्टस्य फलस्य कर्ता सोम इंद्रियं स्वकीयं बलं हिन्वानः प्रेरयन् ज्यायः प्रशस्यतरं महित्वं महत्त्वमानशे । प्राप्नोति ॥

॥ इति सप्तमस्य प्रथमे पंचमो वर्गः ॥

पवस्वेति पंचर्चं पंचविंशं सूक्तं । ऋष्याद्याः पूर्ववत् । पवस्वेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि । अयक्ष्मा बृहतीरिषः ॥१॥

पवस्व । वृष्टिं । आ । सु । नः । अपां । ऊर्मिं । दिवः । परि । अयक्ष्माः । बृहतीः । इषः ॥१॥

हे सोम त्वं दिवो द्युलोकाद्वृष्टिं नोऽस्माकमा पवस्व । समंतात्क्षर । एतदेव

दर्शयति। अपामुदकानामूर्मिं तरंगं दिवः पर्यापवस्व। अपि चायक्ष्मा यक्ष्मरहितान्यनामयानि बृहतीर्महांतीरिषोऽन्नान्यापवस्व ॥

॥ अथ द्वितीया ॥

तया॑ पवस्व॒ धार॑या॒ यया॒ गाव॑ इ॒हागम॑न्। जन्या॑स॒ उप॑ नो गृ॒हं ॥२॥

तया॑। पवस्व। धार॑या। यया॑। गाव॑ः। इ॒ह। आऽगम॑न्। जन्या॑सः। उप॑। नः। गृ॒हं ॥२॥

हे सोम त्वं तया तादृश्या धारया पवस्व। क्षर। कीदृश्येत्यत्राह। यया यादृश्या त्वदीयया धारया जन्यासो जन्याः शत्रुजनपदभवा गाव इहास्मिँल्लोके नोऽस्माकं संबंधि गृहमुपागमन्नुपागच्छंति ॥

॥ अथ तृतीया ॥

घृ॒तं प॑वस्व॒ धार॑या य॒ज्ञेषु॑ दे॒ववी॑तमः। अ॒स्मभ्यं॑ वृ॒ष्टिमा प॑व ॥३॥

घृ॒तं। पवस्व। धार॑या। य॒ज्ञेषु॑। दे॒वऽवी॑तमः। अ॒स्मभ्यं॑। वृ॒ष्टिं। आ। प॒व ॥३॥

हे सोम यज्ञेषु देववीतमोऽत्यंतं देवकामस्त्वमस्मभ्यं भार्गवेभ्यः कविभ्यो घृतमुदकं। वनं घृतमित्युदकनामसु पाठात्। धारया संपातेन पवस्व। क्षर। वृष्टिं वर्षं चापव। पवस्व ॥

॥ अथ चतुर्थी ॥

स न॑ ऊ॒र्जे व्य१॒॑व्ययं॑ प॒वित्रं॑ धाव॒ धार॑या। दे॒वासः॑ शृ॒णव॒न्हि कं॑ ॥४॥

सः। नः। ऊ॒र्जे। वि। अ॒व्ययं॑। प॒वित्रं॑। धा॒व। धार॑या। दे॒वासः॑। शृ॒णव॑न्। हि। कं॒ ॥४॥

हे सोम सुतोऽभिषुतस्त्वं नोऽस्माकमूर्जेऽन्नायाव्ययमविमयं पवित्रं धारया संपातेन विधाव। प्राप्नुहि। देवासो देवा अपि हि कं शृणवन्। गमनवेलायामुत्पन्नं तव शब्दं शृण्वंतु ॥

॥ अथ पंचमी ॥

पव॑मानो असिष्यद॒द्रक्षां॒स्यप॒जंघ॑नत्। प्र॒त्न॒वद्रो॒चय॒न्रुचः॑ ॥५॥

पव॑मानः। अ॒सि॒स्य॒द॒त्। रक्षां॑सि। अ॒प॒ऽजंघ॑नत्। प्र॒त्न॒ऽवत्। रो॒चय॑न्। रुचः॑ ॥५॥

रक्षांसि राक्षसानपजंघनदपघ्नन् रुच आत्मीया दीप्तीः प्रत्नवत्पुराणवद्रोचयन्दीपयन्पवमानः सोमोऽसिष्यदत्। स्यंदते ॥

॥ इति सप्तमस्य प्रथमे षष्ठो वर्गः ॥

उत्त इति पंचर्चं षड्विंशं सूक्तमांगिरसस्योचथ्यस्यार्षं गायत्रं पवमानसोमदेवताकं। तथा चानुक्रांतं। उत्ते शुष्मास उचथ्य इति। उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

उत्ते शुष्मास ईरते सिंधोरूर्मेरिव स्वनः। वाणस्य चोदया पविं ॥१॥

उत्। ते। शुष्मासः। ईरते। सिंधोः। ऊर्मेःऽइव। स्वनः। वाणस्य। चोदय। पविं ॥१॥

हे सोम ते तव शुष्मासः शुष्मा वेगा उदीरते। उद्गच्छंति। तत्र दृष्टांतः। सिंधोः समुद्रस्योर्मेरिव यथा तरंगात्स्वनो ध्वनिरुद्गच्छति तद्वदित्यर्थः। स त्वं वाणस्य विसृष्टस्य वाणस्य नालस्य वा वादित्रविशेषस्य पविं शब्दं। पविः भारतीति वाङ्नामसु पाठात्। चोदय। प्रेरय। वेगेन स्यंदमानस्त्वं विसृष्टवाणशब्दसदृशं शब्दं कुर्वित्यर्थः ॥

॥ अथ द्वितीया ॥

प्रसवे त उदीरते तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि ॥२॥

प्रऽसवे। ते। उत्। ईरते। तिस्रः। वाचः। मखस्युवः। यत्। अव्ये। एषि। सानवि ॥२॥

हे सोम ते तव प्रसवे सति मखस्युवो यज्ञमिच्छवो यजमानस्य तिस्रो वाच ऋग्यजुःसामात्मकानि त्रीणि वाक्यान्युदीरते। उद्गच्छंति। कदेत्यत आह। यद्यदा सानवि व्युच्छ्रितेऽव्येऽविमये पवित्र एषि त्वं गच्छसि ॥

॥ अथ तृतीया ॥

अव्यो वारे परि प्रियं हरिं हिन्वंत्यद्रिभिः। पवमानं मधुश्चुतं ॥३॥

अव्यः। वारे। परि। प्रियं। हरिं। हिन्वंति। अद्रिऽभिः। पवमानं। मधुऽश्चुतं ॥३॥

प्रियं देवानां प्रीतिकरं हरिं हरितवर्णमद्रिभिर्ग्रावभिरभिषुतं मधुश्चुतं मधुनो रसस्य च्यावयितारं पवमानं सोममव्योऽवेर्वारे वाले परिहिन्वंति। ऋत्विजः परिप्रेरयंति ॥

॥ अथ चतुर्थी ॥

आ पवस्व मदिंतम पवित्रं धारया कवे। अर्कस्य योनिमासदं ॥४॥

आ। पवस्व। मदिन्ऽतम। पवित्रं। धारया। कवे। अर्कस्य। योनिं। आऽसदं ॥४॥

हे मदिंतम मादयितृतम कवे क्रांतकर्मन्सोम अर्कस्यार्चनीयस्येंद्रस्य योनिमुदरं

स्थानमासदं प्राप्तुं पवित्रमतीत्य धारया संपातेना पवस्व । आभिमुख्येन क्षर । यद्यप्येषा पूर्वस्मिन्नध्याये व्याकृता तथापि मंदमतीनां विस्मरणशंकया पुनर्व्याख्याता ॥

॥ अथ पंचमी ॥

स प॑वस्व मदिं॒तम॒ गोभि॑रंजा॒नो अ॒क्तुभिः॑ । इंद॒विंद्रा॑य पी॒तये॑ ॥५॥

सः । प॒व॒स्व॒ । म॒दि॒न्ऽत॒म॒ । गोभिः॑ । अं॒जा॒नः । अ॒क्तुऽभिः॑ । इंदो॒ इति॑ । इंद्रा॑य । पी॒तये॑ ॥५॥

हे मदिंतम मादयितृतमेंदो सोम अक्तुभिरंजनसाधनभूतैर्गोभिर्गोविकारैः पयोभिरंजानोऽज्यमानः संस्क्रियमाणः स त्वमिंद्रायेंद्रस्य पीतये पानाय पवस्व । क्षर ॥

॥ इति सप्तमस्य प्रथमे सप्तमो वर्गः ॥

अध्वर्यो इति पंचर्चं सप्तविंशं सूक्तमांगिरसस्योचथ्यस्यार्षं गायत्रं पवमानसोमदेवताकं । तथा चानुक्रम्यते । अध्वर्यो इति । गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

अध्व॑र्यो॒ अद्रि॑भिः सु॒तं सोमं॑ प॒वित्र॒ आ सृ॑ज । पु॒नी॒हींद्रा॑य॒ पात॑वे ॥१॥

अध्व॑र्यो॒ इति॑ । अद्रि॑ऽभिः । सु॒तम् । सोम॑म् । प॒वित्रे॑ । आ । सृ॒ज॒ । पु॒नी॒हि॒ । इंद्रा॑य । पात॑वे ॥१॥

हे अध्वर्यो अद्रिभिर्ग्रावभिः सुतमभिषुतं सोमं पवित्र आसृज । एतदेव दर्शयति । इंद्रायेंद्रस्य पातवे पानाय पुनीहि । पावय ॥

॥ अथ द्वितीया ॥

दि॒वः पी॒यूष॑मुत्त॒मं सोम॒मिंद्रा॑य व॒ज्रिणे॑ । सु॒नोता॒ मधु॑मत्तमं ॥२॥

दि॒वः । पी॒यूष॑म् । उ॒त्ऽत॒मम् । सोम॑म् । इंद्रा॑य । व॒ज्रिणे॑ । सु॒नोत॑ । मधु॑मत्ऽतमम् ॥२॥

हे अध्वर्यवो यूयं मधुमत्तममतिशयेन मधुमंतं दिवो द्युलोकस्य पीयूषममृतमुत्तमं श्रेष्ठं सोमं वज्रिणे वज्रवत इंद्राय सुनोत । अभिषुणुत ॥

॥ अथ तृतीया ॥

तव॒ त्य इं॑दो॒ अंध॑सो दे॒वा मधो॒र्व्य॑श्नते । पव॑मानस्य म॒रुतः॑ ॥३॥

तव॑ । त्ये । इंदो॒ इति॑ । अंध॑सः । दे॒वाः । मधोः॑ । वि । अ॒श्न॒ते॒ । पव॑मानस्य । म॒रुतः॑ ॥३॥

हे इंदो सोम तव संबंधिनं मधोर्मदकरस्य पवमानस्य पूयमानमंधसोऽन्नं । कर्मणि षष्ठी । त्ये त इमे देवा इंद्रादयो मरुतश्च व्यश्नते । व्याप्नुवते । व्याप्नुवंतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

त्वं हि सोम वर्धयन्त्सुतो मदाय भूर्णये । वृषन्त्स्तोतारमूतये ॥४॥

त्वं । हि । सोम । वर्धयन् । सुतः । मदाय । भूर्णये । वृषन् । स्तोतारं । ऊतये ॥४॥

हे सोम सुतोऽभिषुतस्त्वं वर्धयन्देवान्प्रवृद्धान्कुर्वन्वृषन्कामान्वर्षन् भूर्णये क्षिप्राय मदायोतये रक्षणाय च स्तोतारमभिगच्छसीत्यर्थः ॥

॥ अथ पंचमी ॥

अभ्यर्ष विचक्षण पवित्रं धारया सुतः । अभि वाजमुत श्रवः ॥५॥

अभि । अर्ष । विऽचक्षण । पवित्रं । धारया । सुतः । अभि । वाजं । उत । श्रवः ॥५॥

हे विचक्षण सोम सुतोऽभिषुतस्त्वं पवित्रमभि प्रति धारयार्ष । गच्छ । उतापि चास्माकं वाजमन्नं श्रवः कीर्तिं चाभिक्षरेत्यर्थः ॥

॥ इति सप्तमस्य प्रथमेऽष्टमो वर्गः ॥

परि द्युक्ष इति पंचर्चमष्टाविंशं सूक्तं । ऋष्याद्याः पूर्ववत् । परि द्युक्षेत्यनुक्रांतं । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

परि द्युक्षः सनद्रयिर्भरद्वाजं नो अंधसा । सुवानो अर्ष पवित्र आ ॥१॥

परि । द्युक्षः । सनत्ऽरयिः । भरत् । वाजं । नः । अंधसा । सुवानः । अर्ष । पवित्रे । आ ॥१॥

द्युक्षो दीप्तः सनद्रयिर्दीयमानधनः सोमो नोऽस्माकं वाजं बलमंधसान्नेन सह परिभरत् । परिभरतु । प्रयच्छतु । अथ प्रत्यक्षस्तुतिः । हे सोम सुवानोऽभिषूयमाणस्त्वं पवित्र आर्ष । क्षर ॥

॥ अथ द्वितीया ॥

तव प्रत्नेभिरध्वभिरव्यो वारे परि प्रियः । सहस्रधारो यात्तना ॥२॥

तव । प्रत्नेभिः । अध्वऽभिः । अव्यः । वारे । परि । प्रियः । सहस्रऽधारः । यात् । तना ॥२॥

हे सोम तव संबंधी प्रियो देवानां प्रीतिकरः सहस्रधारो बहुधारस्तना विस्तृतसारो रसः प्रत्नेभिः पुराणैरध्वभिर्मार्गैरव्योऽवेर्वारे वाले दशापवित्रे परियात्। परिगच्छति ॥

॥ अथ तृतीया ॥

चरुर्न यस्तमीङ्खयेंदो न दानमीङ्खय। वधैर्वधस्नवीङ्खय ॥३॥

चरुः। न। यः। तं। ईङ्खय। इंदो इति। न। दानं। ईङ्खय। वधैः। वधस्नो इति वधऽस्नो। ईङ्खय ॥३॥

हे सोम चरुर्न चरुरिव यः पूर्णोदनो भवति तमीङ्खय। अस्मान्प्रापय। अपि च हे इंदो न इदानीं दानं देयमीङ्खय। हे वधस्नो प्रहारेण प्रस्रवणशील सोम वधैर्ग्राव्णां प्रहारैरीङ्खय ॥

॥ अथ चतुर्थी ॥

नि शुष्ममिंदवेषां पुरुहूत जनानां। यो अस्माँ आदिदेशति ॥४॥

नि। शुष्मं। इंदो इति। एषां। पुरुऽहूत। जनानां। यः। अस्मान्। आऽदिदेशति ॥४॥

हे पुरुहूत बहुभिराहूतेंदो सोम त्वं यः शुष्मो येषां शत्रुजनानां बलमस्मानादिदेशति बाधार्थमाह्वयति एषां शत्रुजनानां तं शुष्मं बलं नि न्यक्कुर्विति शेषः ॥

॥ अथ पंचमी ॥

शतं न इंद ऊतिभिः सहस्रं वा शुचीनां। पवस्व मंहयद्रयिः ॥५॥

शतं। नः। इंदो इति। ऊतिऽभिः। सहस्रं। वा। शुचीनां। पवस्व। मंहयत्ऽरयिः ॥५॥

हे इंदो सोम मंहयद्रयिः प्रदीयमानधनस्त्वं नोऽस्माकमूतिभिरूतिभ्यः। विभक्तिव्यत्ययः। रक्षार्थं शुचीनां शुद्धानां तवांशभूतानां सोमानां शतं सहस्रं वा पवस्व। क्षर ॥

॥ इति सप्तमस्य प्रथमे नवमो वर्गः ॥

उत्त इति चतुर्ऋचमेकोनत्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं गायत्रं पवमानसोमदेवताकं। तथा चानुक्रांतं। उत्ते चतुष्कमवत्सार इति। उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

उत्ते शुष्मासो अस्थू रक्षो भिंदंतो अद्रिवः । नुदस्व याः परिस्पृधः ॥१॥

उत् । ते । शुष्मासः । अस्थुः । रक्षः । भिंदंतः । अद्रिऽवः । नुदस्व । याः । परिऽस्पृधः ॥१॥

हे अद्रिवो ग्रावववन्सोम ते तव शुष्मासः शुष्मा वेगा रक्षो राक्षसान्भिंदंतो विदारयंत उदस्थुः । उत्तिष्ठंति । याः स्पृधः स्पर्धमानाः शत्रुसेना अस्मान्प्रतिबाधंते तास्त्वं नुदस्व । प्रेरय । बाधस्वेत्यर्थः ॥

॥ अथ द्वितीया ॥

अया निजघ्निरोजसा रथसंगे धने हिते । स्तवा अबिभ्युषा हृदा ॥२॥

अया । निऽजघ्निः । ओजसा । रथऽसंगे । धने । हिते । स्तवै । अबिभ्युषा । हृदा ॥२॥

हे सोम त्वमयानेन कृतेनौजसा बलेन निजघ्निः शत्रून्हंतुं शीलवान् । तं त्वामबिभ्युषाभीतेन हृदा मनसा युक्तोऽहं रथसंगेऽस्माकं रथानां संगे हिते शत्रुषु निहिते धने च निमित्ते स्तवै । स्तौमि ॥

॥ अथ तृतीया ॥

अस्य व्रतानि नाधृषे पवमानस्य दूढ्या । रुज यस्त्वा पृतन्यति ॥३॥

अस्य । व्रतानि । न । आऽधृषे । पवमानस्य । दुःऽध्या । रुज । यः । त्वा । पृतन्यति ॥३॥

हे सोम पवमानस्य क्षरतो यस्यास्य तव व्रतानि कर्माणि दूढ्या दुर्बुद्धिना राक्षसेन नाधृष आधर्षयितुमशक्यानि स त्वं त्वां यो दुर्बुद्धिः शत्रुः पृतन्यति योद्धुमिच्छति तं रुज । बाधस्व ॥

॥ अथ चतुर्थी ॥

तं हिन्वंति मदच्युतं हरिं नदीषु वाजिनं । इंदुमिंद्राय मत्सरं ॥४॥

तं । हिन्वंति । मदऽच्युतं । हरिं । नदीषु । वाजिनं । इंदुं । इंद्राय । मत्सरं ॥४॥

मदच्युतं मदस्य च्यावयितारं हरिं हरितवर्णं वाजिनं बलिनं मत्सरं मदकरं तमिंदुं सोमं नदीषु वसतीवरीष्विंद्रायेंद्रार्थं हिन्वंति । ऋत्विजः प्रेरयंति ॥

॥ इति सप्तमस्य प्रथमे दशमो वर्गः ॥

अस्य प्रत्नामिति चतुर्ऋचं त्रिंशं सूक्तं। ऋष्याद्याः पूर्ववत्। अस्य प्रत्नामित्यनुक्रांतं। उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः। पयः सहस्रसामृषिं ॥१॥

अस्य। प्रत्नां। अनु। द्युतं। शुक्रं। दुदुह्रे। अह्रयः। पयः। सहस्रऽसां। ऋषिं ॥१॥

अस्य सोमस्य प्रत्नां पुराणां द्युतं द्योतमानां तनुमनु शुक्रं दीप्तं सहस्रसामभिलषितस्यापरिमितस्य कर्मफलस्य दातारं पयः पातव्यं रसमह्रयः कवयो दुदुह्रे। दुहंति ॥

॥ अथ द्वितीया ॥

अयं सूर्य इवोपदृगयं सरांसि धावति। सप्त प्रवत आ दिवं ॥२॥

अयं। सूर्यःऽइव। उपऽदृक्। अयं। सरांसि। धावति। सप्त। प्रऽवतः। आ। दिवं ॥२॥

अयं सोमः सूर्य इव यथा सूर्यः सर्वस्य लोकस्योपद्रष्टा तद्वत्कर्मणामुपदृगुपद्रष्टा। अपि चायं सोमः सरांसि। त्रिंशदुक्थपात्राणीति केचिद्वर्णयंति। अपरे तु त्रिंशदहोरात्राणि सरांसीति। तानि धावति। गच्छति। तथा च यास्कः। तत्रैतद्याज्ञिका वेदयंते त्रिंशदुक्थपात्राणि माध्यंदिने सवन एकदेवतानि तान्येतस्मिन्काल एकेन प्रतिधानेन पिबति तान्यत्र सरांस्युच्यंते। त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येति नैरुक्ताः। नि॰ ५.११.। इति ॥ अपि चायं सोमो दिवमधिकृत्य सप्त प्रवतः सप्त नदीरा तिष्ठति ॥

॥ अथ तृतीया ॥

अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः ॥३॥

अयं। विश्वानि। तिष्ठति। पुनानः। भुवना। उपरि। सोमः। देवः। न। सूर्यः ॥३॥

पुनानः पूयमानोऽयं सोमो विश्वानि सर्वाणि भुवना भुवनानि सर्वेषां भुवनानामुपरि तिष्ठति। तत्र दृष्टांतमाह। देवो न सूर्यः। यथा सूर्यो देवः सर्वेषां भुवनानामुपरि तिष्ठति तद्वदयं सोमोऽपीत्यर्थः ॥

॥ अथ चतुर्थी ॥

परि णो देववीतये वाजाँ अर्षसि गोमतः। पुनान इंदविंद्रयुः ॥४॥

परि। नः। देवऽवीतये। वाजान्। अर्षसि। गोऽमतः। पुनानः। इंदो इति। इंद्रऽयुः ॥४॥

51071

हे इंदो सोम इंद्रयुरिंद्रकामः पुनानः पूयमानस्त्वं नोऽस्माकं देववीतये यज्ञाय गोमतो गोयुक्तानि वाजानन्नानि पर्यर्षसि । परितः क्षरेत्यर्थः ॥

॥ इति सप्तमस्य प्रथम एकादशो वर्गः ॥

यवं यवं न इति चतुर्ऋचमेकत्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं गायत्रं पवमानसोमदेवताकं । यवं यवमित्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

यवंयवं नो अंधसा पुष्टंपुष्टं परि स्रव । सोम विश्वा च सौभगा ॥१॥

यवंऽयवं । नः । अंधसा । पुष्टंऽपुष्टं । परि । स्रव । सोम । विश्वा । च । सौभगा ॥१॥

हे सोम त्वं नोऽस्माकं पुष्टंपुष्टं बहुलं यवंयवं पुनःपुनर्युतं रसमंधसान्नात्मना परि स्रव । धारया क्षर । अत्र प्रार्थयितुस्तृष्णयात्यंतं पीडितत्वाद्बाधे च । पा० ८. १.१०.। इति द्विर्भावः । पीडा प्रयोक्तृधर्मो नाभिधेयधर्म इत्युक्तं । अपि च विश्वा विश्वानि सौभगानि धनानि परिस्रव ॥

॥ अथ द्वितीया ॥

इंदो यथा तव स्तवो यथा ते जातमंधसः । नि बर्हिषि प्रिये सदः ॥२॥

इंदो इति । यथा । तव । स्तवः । यथा । ते । जातं । अंधसः । नि । बर्हिषि । प्रिये । सदः ॥२॥

हे इंदो सोमांधसोऽन्नरूपस्य तव संबंधी स्तवः स्तवनं स्तोत्रं तथा ते तव जातं जन्म यथा प्रादुर्भूतमस्ति तथा त्वं प्रिये प्रीणयितरि बर्हिष्यस्मद्यागे निषदः । निषण्णो भव ॥

॥ अथ तृतीया ॥

उत नो गोविदश्ववित्पवस्व सोमांधसा । मक्षूतमेभिरहभिः ॥३॥

उत । नः । गोऽवित् । अश्वऽवित् । पवस्व । सोम । अंधसा । मक्षुऽतमेभिः । अहऽभिः ॥३॥

उतापि च हे सोम नोऽस्माकं गोविद्गोप्रदोऽश्वविदश्वप्रदश्च त्वं मक्षूतमेभिर्मक्षुतमैरतिशयेन शीघ्रैरहभिरहोभिर्हेतुभिरंधसान्नेन पवस्व । धारया क्षर ॥

॥ अथ चतुर्थी ॥

यो जिनाति न जीयते हंति शत्रुमभीत्य । स पवस्व सहस्रजित् ॥४॥

यः । जिनाति । न । जीयते । हंति । शत्रुं । अभिऽइत्य । सः । पवस्व । सहस्रऽजित् ॥४॥

हे सहस्रजित्सहस्रसंख्यानां शत्रूणां जेतः सोम यो भवाञ्जिनाति शत्रून्हंति न जीयते स्वयं शत्रुभिर्न जीयते । न हन्यत इत्यर्थः । शत्रुमभीत्य शत्रुं स्वयमभ्येत्य हंति न च स्वयं शत्रुभिरभिभूयते स त्वं पवस्व । क्षर ॥

॥ इति सप्तमस्य प्रथमे द्वादशो वर्गः ॥

परि सोम इति चतुर्ऋचं द्वाविंशं सूक्तं । ऋष्याद्याः पूर्ववत् । परि सोम इत्यनुक्रांतं । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

परि सोम ऋतं बृहदाशुः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥१॥

परि । सोमः । ऋतं । बृहत् । आशुः । पवित्रे । अर्षति । विऽघ्नन् । रक्षांसि । देवऽयुः ॥१॥

आशुः क्षिप्रकारी देवयुर्देवकामः सोमः पवित्रे स्थित्वा रक्षांसि राक्षसान्विघ्नन्निघ्नन्बृहन्महद्दतमन्नं पर्यर्षति । परिगमयति । अस्मभ्यं प्रयच्छतीत्यर्थः ॥

॥ अथ द्वितीया ॥

यत्सोमो वाजमर्षति शतं धारा अपस्युवः । इंद्रस्य सख्यमाविशन् ॥२॥

यत् । सोमः । वाजं । अर्षति । शतं । धाराः । अपस्युवः । इंद्रस्य । सख्यं । आऽविशन् ॥२॥

यद्यदापस्युवः कर्मकामाः शतं शतसंख्याका धाराः सोमस्य धारा इंद्रस्य सख्यं सखित्वमाविशन्प्राप्नुवंति तदा सोमो वाजमन्नमर्षति । गमयति । अस्मभ्यं प्रयच्छतीत्यर्थः ॥

॥ अथ तृतीया ॥

अभि त्वा योषणो दश जारं न कन्यानूषत । मृज्यसे सोम सातये ॥३॥

अभि । त्वा । योषणः । दश । जारं । न । कन्या । अनूषत । मृज्यसे । सोम । सातये ॥३॥

हे सोम त्वा त्वां या दशसंख्याका योषणोऽगुलयः कन्या पितृमती कन्यका जारं न यथा प्रियमभिशब्दायते तद्वदभ्यनूषताभिशब्दायंते ताभिः सातयेऽस्माकं धनस्य लाभाय मृज्यसे । इंद्रार्थं शोध्यसे ॥

॥ अथ चतुर्थी ॥

त्वमिंद्राय विष्णवे स्वादुरिंदो परि स्रव । नॄंस्तोतॄन्पाह्यंहसः ॥४॥

त्वं । इंद्राय । विष्णवे । स्वादुः । इंदो इति । परि । स्रव । नॄन् । स्तोतॄन् । पाहि । अंहसः ॥४॥

हे इंदो सोम स्वादुः प्रियरसस्त्वमिंद्रार्थं विष्णवे विष्णवर्थं च परिस्रव। परिक्षर। नॄन्कर्मणां नेतॄन्स्तोतॄंस्त्वद्विषयाणां स्तुतीनां कर्तॄनंहसो दुरितात्पाहि। रक्ष च ॥

॥ इति सप्तमस्य प्रथमे त्रयोदशो वर्गः ॥

प्र ते धारा इति चतुर्ऋचं त्रयस्त्रिंशं सूक्तं। ऋष्याद्याः पूर्ववत्। प्र ते धारा इत्यनुक्रांतं। उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र ते धारा असश्चतो दिवो न यंति वृष्टयः। अच्छा वाजं सहस्रिणं ॥१॥

प्र। ते। धाराः। असश्चतः। दिवः। न। यंति। वृष्टयः। अच्छ। वाजं। सहस्रिणं ॥१॥

हे सोम ते तवासश्चतः संगरहिता धाराः सहस्रिणमपरिमितसंख्याकं वाजमन्नमच्छ नोऽस्मदर्थं प्रयंति। प्रगच्छंति। तत्र दृष्टांतः। दिवो न वृष्टयः। यथा द्युलोकाद्वर्षधारा निःसंगाः प्रजानामपरिमितमन्नं प्रयच्छंति तद्वदित्यर्थः ॥

॥ अथ द्वितीया ॥

अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति। हरिस्तुंजान आयुधा ॥२॥

अभि। प्रियाणि। काव्या। विश्वा। चक्षाणः। अर्षति। हरिः। तुंजानः। आयुधा ॥२॥

हरिर्हरितवर्णः सोमो विश्वा विश्वानि प्रियाणि देवानां प्रीतिकराणि काव्या काव्यानि कर्माणि चक्षाणः पश्यन्नायुधा स्वकीयान्यायुधानि तुंजानो राक्षसान्प्रति प्रेरयंश्चाभ्यर्षति। यागं प्रति गच्छति ॥

॥ अथ तृतीया ॥

स मर्मृजान आयुभिरिभो राजेव सुव्रतः। श्येनो न वंसु षीदति ॥३॥

सः। मर्मृजानः। आयुऽभिः। इभः। राजाऽइव। सुऽव्रतः। श्येनः। न। वंसु। सीदति ॥३॥

सुव्रतः सुकर्मा स सोम आयुभिर्मनुष्यैर्ऋत्विग्भिर्मर्मृजानः शोध्यमान इभो गतभयो राजेव यथा राजा श्येनो न यथा च श्येनस्तथा वंसूदकेषु वसतीवरीषु सीदति ॥

॥ अथ चतुर्थी ॥

स नो विश्वा दिवो वसूतो पृथिव्या अधि। पुनान इंदवा भर ॥४॥

सः। नः। विश्वा। दिवः। वसु। उतो इति। पृथिव्याः। अधि। पुनानः। इंदो इति। आ। भर ॥४॥

हे इंदो सोम पुनानः पवमानस्त्वं दिवोऽधि दिवि स्थितान्युतो अपि च पृथिव्या अधि पृथिव्यां स्थितानि। अधीति सप्तम्यर्थानुवादः। विश्वा विश्वानि वसु वसूनि नोऽस्मभ्यमाभर। आहर ॥

॥ इति सप्तमस्य प्रथमे चतुर्दशो वर्गः ॥

तरत्स इति चतुर्ऋचं चतुस्त्रिंशं सूक्तं। ऋष्याद्याः पूर्ववत्। तरत्स इत्यनुक्रांतं। उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

तरत्स मंदी धावति धारा सुतस्यांधसः। तरत्स मंदी धावति ॥१॥

तरत्। सः। मंदी। धावति। धारा। सुतस्य। अंधसः। तरत्। सः। मंदी। धावति ॥१॥

मंदी देवानां हर्षकरः स सोमस्तरत्स्तोतॄन्पाप्मनः सकाशात्तारयन्धावति। पवते। तदेव दर्शयति। सुतस्याभिषुतस्यांधसो देवानामन्नात्मकस्य सोमस्य धारा धावतीति। पुनरपि तदेवाहात्यंतादरार्थं तरत्स मंदी धावतीति। यद्वास्या ऋचो यास्केनोक्तोऽर्थो द्रष्टव्यः। तद्यथा। तरति स पापं सर्वं मंदी यः स्तौति धावति गच्छत्यूर्ध्वां गतिं। धारा सुतस्यांधसो धारयाभिषुतस्य सोमस्य मंत्रपूतस्य वाचा स्तुतस्य। नि॰ १३.६.। इति ॥

॥ अथ द्वितीया ॥

उस्रा वेद वसूनां मर्तस्य देव्यवसः। तरत्स मंदी धावति ॥२॥

उस्रा। वेद। वसूनां। मर्तस्य। देवी। अवसः। तरत्। सः। मंदी। धावति ॥२॥

वसूनां धनानामुस्रोत्सरणशीला प्रदात्री देवी द्योतमाना स्तूयमाना वा यस्य सोमस्य धारा मर्तस्य मनुष्यं यजमानमवसो रक्षितुं वेद जानाति। सिद्धमन्यत् ॥

॥ अथ तृतीया ॥

ध्वस्रयोः पुरुषंत्योरा सहस्राणि दद्महे। तरत्स मंदी धावति ॥३॥

ध्वस्रयोः। पुरुऽसंत्योः। आ। सहस्राणि। दद्महे। तरत्। सः। मंदी। धावति ॥३॥

ध्वस्रयोः पुरुषंत्योः। ध्वस्रः कश्चिद्राजा पुरुषंतिः कश्चित्। तयोरुभयोश्चेतरेतरयोगविवक्षया द्विवचनं द्रष्टव्यं। सहस्राणि धनानां सहस्राण्याद्दमहे। वयं प्रतिगृह्णीमः। तदस्माभिः प्रतिगृहीतं धनमुत्तममस्त्वित्यृषिः सोमं प्रार्थयत इति

सोमस्य स्तुतिः। सिद्धमन्यत्। यथावत्सार एतयोर्धनानि प्रतिजग्राहैवं तरंतपुरुमीळ्हौ प्रतिजगृहतुः। तथा च शाट्यायनकं। अथ ह वै तरंतपुरुमीळ्हौ वैददश्वी ध्वस्रयोः पुरुषंत्योर्बहु प्रतिगृह्य गरगिराविव मेनाते तौ ह स्वांगुल्या सातं प्रतिमृशाते तावकामयेतामसातं नाविवेदं सातं स्यादात्तमिवैव न प्रतिगृहीतमिति भावे तच्चतुर्ऋचमपश्यतां तेन प्रत्यैतां ततो वै तयोरसातं सातमभवदात्तमिवैव न प्रतिगृहीतं स यः प्रतिगृह्य कामयेतेत्यादि ॥

॥ अथ चतुर्थी ॥

आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे। तरत्स मंदी धावति ॥४॥

आ। ययोः। त्रिंशतं। तना। सहस्राणि। च। दद्महे। तरत्। सः। मंदी। धावति ॥४॥

ययोर्ध्वस्रपुरुषंत्योस्त्रिंशतं त्रीणि शतानि सहस्राणि तना वस्त्राण्यादद्महे वयं प्रतिगृह्णीमस्तयोरस्माभिः प्रतिगृहीतं तत्सर्वमप्रतिगृहीतमस्त्विति सोममृषिः प्रार्थयत इति सोमस्यैव स्तुतिः। सिद्धमन्यत् ॥

॥ इति सप्तमस्य प्रथमे पंचदशो वर्गः ॥

पवस्वेति चतुर्ऋचं पंचत्रिंशं सूक्तं। ऋष्याद्याः पूर्ववत्। पवस्वेत्यनुक्रांतं। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

पवस्व गोजिदश्वजिद्विश्वजित्सोम रण्यजित्। प्रजावद्रत्नमा भर ॥१॥

पवस्व। गोऽजित्। अश्वऽजित्। विश्वऽजित्। सोम। रण्यऽजित्। प्रजाऽवत्। रत्नं। आ। भर ॥१॥

हे सोम गोजित् शत्रूणां गवां जेताश्वजिदश्वानामपि जेता विश्वजिद्विश्वस्य जगतो जेता रण्यजिद्रमणीयस्य धनस्यापि जेता त्वं पवस्व। धारया क्षर। अपि चास्मभ्यं प्रजावत्पुत्राद्युपेतं रत्नं रमणीयं धनमाभर। आहर ॥

॥ अथ द्वितीया ॥

पवस्वाद्भ्यो अदाभ्यः पवस्वौषधीभ्यः। पवस्व धिषणाभ्यः ॥२॥

पवस्व। अत्ऽभ्यः। अदाभ्यः। पवस्व। ओषधीभ्यः। पवस्व। धिषणाभ्यः ॥२॥

हे सोम त्वमद्भ्यो वसतीवरीभ्योऽद्भ्योऽंशुभ्यश्च पवस्व। क्षर। अपि चौषधीभ्यः पवस्व। क्षर। किंच धिषणाभ्यो ग्रावभ्यः पवस्व। क्षर॥

॥ अथ तृतीया ॥

त्वं सोम पवमानो विश्वानि दुरिता तर। कविः सीद नि बर्हिषि ॥३॥

त्वं। सोम। पवमानः। विश्वानि। दुःऽइता। तर। कविः। सीद। नि। बर्हिषि ॥३॥

हे सोम पवमानः पूयमानः कविः क्रांतकर्मा त्वं विश्वानि सर्वाणि दुरितानि राक्षसैः कृतान्युपद्रवाणि तर। निराकुरु। अस्मिन्बर्हिषि निषीद च॥

॥ अथ चतुर्थी ॥

पवमान स्वर्विदो जायमानोऽभवो महान्। इंदो विश्वाँ अभीदसि ॥४॥

पवमान। स्वः। विदः। जायमानः। अभवः। महान्। इंदो इति। विश्वान्। अभि। इत्। असि ॥४॥

हे पवमान सोम त्वं स्वः सर्वं विदः। यजमानाय प्रयच्छ। अपि च जायमानः प्रादुर्भवन्नेव महान् पूजनीयोऽभवः। असि। किंच हे इंदो सोम त्वं विश्वानेव सर्वानेव शत्रूनभ्यसि। तेजसाभिभवसि॥

॥ इति सप्तमस्य प्रथमे षोडशो वर्गः ॥

प्र गायत्रेणेति चतुर्ऋचं षष्टिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं। तृतीया पुरउष्णिगाद्यद्वादशका द्व्यष्टका। शिष्टा गायत्र्यः। पवमानः सोमो देवता। तथा चानुक्रांतं। प्र गायत्रेणोपांत्या पुरउष्णिगिति। उक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

प्र गायत्रेण गायत पवमानं विचर्षणिं। इंदुं सहस्रचक्षसं ॥१॥

प्र। गायत्रेण। गायत। पवमानं। विऽचर्षणिं। इंदुं। सहस्रऽचक्षसं ॥१॥

विचर्षणिं विद्रष्टारं सहस्रचक्षसं बहुदर्शनं पवमानं पूयमानमिंदुं सोमं गायत्रेण गायत्रनामधेयेन साम्ना प्र गायत। हे स्तोतारो गानं कुरुत। स्तुतेत्यर्थः॥

॥ अथ द्वितीया ॥

तं त्वा सहस्रचक्षसमथो सहस्रभर्णसं । अति वारमपाविषुः ॥२॥

तं । त्वा । सहस्रऽचक्षसं । अथो इति । सहस्रऽभर्णसं । अति । वारं । अपाविषुः ॥२॥

हे सोम सहस्रचक्षसं बहुदर्शनं अथो अपि च सहस्रभर्णसं बहुभरणं तमभिषुतं त्वा त्वां वारं वालं दशापवित्रमत्यपाविषुः । ऋत्विजः पावयंति ॥

॥ अथ तृतीया ॥

अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति । इंद्रस्य हार्द्याविशन् ॥३॥

अति । वारान् । पवमानः । असिस्यदत् । कलशान् । अभि । धावति । इंद्रस्य । हार्दि । आऽविशन् ॥३॥

पवमानः पूयमानः सोमो वारानवेर्वालानत्यतिक्रम्यासिष्यदत् स्यंदते । अपि चेंद्रस्य हार्दि हृदयमाविशन् कलशान् द्रोणान्यभिधावति । अभिगच्छति ॥

॥ अथ चतुर्थी ॥

इंद्रस्य सोम राधसे शं पवस्व विचर्षणे । प्रजावद्रेत आ भर ॥४॥

इंद्रस्य । सोम । राधसे । शं । पवस्व । विऽचर्षणे । प्रजाऽवत् । रेतः । आ । भर ॥४॥

हे विचर्षणे विद्रष्टस्त्वमिंद्रस्य राधसे राधनाय संसिद्ध्यै शं सुखकरं रसं पवस्व । क्षर । अपि चास्मभ्यं प्रजावत्पुत्राद्युपेतं रेत उदकमन्नं वाभर । आहर । प्रयच्छेत्यर्थः ॥

॥ इति सप्तमस्य प्रथमे सप्तदशो वर्गः ॥

॥ इति नवमे मंडले द्वितीयोऽनुवाकः ॥

तृतीयेऽनुवाके सप्त सूक्तानि । तत्राया वीतीति त्रिंशदृचं प्रथमं सूक्तं । अमहीयुर्नामांगिरस ऋषिः । गायत्री छंदः । पवमानः सोमो देवता । तथा चानुक्रांतं । अया वीती त्रिंशदमहीयुरिति । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

अया वीती परि स्रव यस्त इंदो मदेष्वा । अवाहन्नवतीर्नव ॥१॥

अया । वीती । परि । स्रव । यः । ते । इंदो इति । मदेषु । आ । अवऽअहन् । नवतीः । नव ॥१॥

हे इंदो सोम अयानेन रसेन वीती वीत्या इंद्रस्य भक्षणाय परिस्रव । परिक्षर ।

कीदृशेन रसेनेत्यत आह। ते तव यो रसो मदेषु संग्रामेषु नवतीर्नवेति नवनवतिसंख्याकाश्च शत्रुपुरीरवाहन्। जघान। अमुं सोमरसं पीत्वा मत्तः सन्निंद्र उक्तलक्षणाः शत्रुपुरीर्जघानेति कृत्वा रसो जघानेत्युपचारः॥

॥ अथ द्वितीया ॥

पुरः सद्य इत्थाधिये दिवोदासाय शंबरं। अध त्यं तुर्वशं यदुं ॥२॥

पुरः। सद्यः। इत्थाऽधिये। दिवःऽदासाय। शंबरं। अध। त्यं। तुर्वशं। यदुं ॥२॥

सद्य एकस्मिन्नेवाह्नि पुरः शत्रूणां पुराणि सोमरसोऽवाहन्। इत्थाधिये सत्यकर्मणे दिवोदासाय राज्ञे शंबरं शत्रुपुराणां स्वामिनमधाथ त्यं तं तुर्वशनामकं राजानं दिवोदासशत्रुं यदुं यदुनामकं राजानं च वशमानयच्च। अत्रापि सोमरसं पीत्वा मत्तः सन्निंद्रः सर्वमेतदकार्षीदिति सोमरसे कर्तृत्वमुपचर्यते॥

॥ अथ तृतीया ॥

परि णो अश्वमश्वविद्गोमदिंदो हिरण्यवत्। क्षरा सहस्रिणीरिषः ॥३॥

परि। नः। अश्वं। अश्वऽवित्। गोऽमत्। इंदो इति। हिरण्यऽवत्। क्षर। सहस्रिणीः। इषः ॥३॥

हे इंदो सोमाश्वविदश्वस्य लंभकस्त्वं नोऽस्माकमश्वं गोमद्गोयुक्तं हिरण्यवद्धिरण्योपेतं धनं च परि क्षर। अपि च सहस्रिणीर्बहूनीषोऽन्नानि क्षर॥

॥ अथ चतुर्थी ॥

पवमानस्य ते वयं पवित्रमभ्युंदतः। सखित्वमा वृणीमहे ॥४॥

पवमानस्य। ते। वयं। पवित्रं। अभिऽउंदतः। सखिऽत्वं। आ। वृणीमहे ॥४॥

हे सोम पवित्रमभ्युंदतः पवित्रमभिक्लेदयतः पवमानस्य क्षरतश्च ते तव सखित्वं सख्यं वयममहीयव आंगिरसा आ वृणीमहे। प्रार्थयामहे॥

॥ अथ पंचमी ॥

ये ते पवित्रमूर्मयोऽभिक्षरंति धारया। तेभिर्नः सोम मृळय ॥५॥

ये। ते। पवित्रं। ऊर्मयः। अभिऽक्षरंति। धारया। तेभिः। नः। सोम। मृळय ॥५॥

हे सोम ते तव य ऊर्मयस्तरंगाः पवित्रं धारया क्षरंति तेभिस्तैरूर्मिभिर्नोऽस्मान् मृळय । सुखय ॥

॥ इति सप्तमस्य प्रथमेऽष्टादशो वर्गः ॥

॥ अथ षष्ठी ॥

स नः पुनान आ भर रयिं वीरवतीमिषं । ईशानः सोम विश्वतः ॥ ६॥

सः । नः । पुनानः । आ । भर । रयिं । वीरऽवतीं । इषं । ईशानः । सोम । विश्वतः ॥ ६॥

हे सोम विश्वतः सर्वस्य जगत ईशान ईश्वरः सोऽभिषुतः पुनानः पूयमानस्त्वं नोऽस्मभ्यं रयिं धनं वीरवतीं पुत्राद्युपेतमिषमन्नं चाभर । आहर ॥

॥ अथ सप्तमी ॥

एतमु त्यं दश क्षिपो मृजंति सिंधुमातरं । समादित्येभिरख्यत ॥ ७॥

एतं । ऊं इति । त्यं । दश । क्षिपः । मृजंति । सिंधुऽमातरं । सं । आदित्येभिः । अख्यत ॥ ७॥

सिंधुमातरं यस्य सोमस्य सिंधवो नद्यो मातरो भवंति त्यं तमेतमिमं सोमं दश क्षिपो दशसंख्याका अंगुलयो मृजंति । शोधयंति । अपि च सोऽयं सोम आदित्येभिरादित्यैः समख्यत । संगच्छते ॥

॥ अथाष्टमी ॥

समिंद्रेणोत वायुना सुत एति पवित्र आ । सं सूर्यस्य रश्मिभिः ॥ ८॥

सं । इंद्रेण । उत । वायुना । सुतः । एति । पवित्रे । आ । सं । सूर्यस्य । रश्मिऽभिः ॥ ८॥

सुतोऽभिषुतः सोमः पवित्र इंद्रेण समेति । संगच्छति । उतापि च वायुना समेति । सूर्यस्य रश्मिभिर्मयूखैरपि समेति ॥

॥ अथ नवमी ॥

स नो भगाय वायवे पूष्णे पवस्व मधुमान् । चारुर्मित्रे वरुणे च ॥ ९॥

सः । नः । भगाय । वायवे । पूष्णे । पवस्व । मधुऽमान् । चारुः । मित्रे । वरुणे । च ॥ ९॥

हे सोम मधुमान् मधुररसश्चारुः कल्याणस्वरूपश्च सोऽभिषुतस्त्वं नोऽस्माकं यज्ञे भगाय भगाख्याय देवाय वायवे च पूष्णे च मित्रे मित्राय देवाय वरुणे वरुणाय च पवस्व । क्षर ॥

॥ अथ दशमी ॥

उच्चा ते जातमंधसो दिवि षद्भूम्या ददे । उग्रं शर्म महि श्रवः ॥१०॥

उच्चा । ते । जातं । अंधसः । दिवि । सत् । भूमिः । आ । ददे । उग्रं । शर्म । महि । श्रवः ॥१०॥

हे सोम ते तव संबंधिनोऽधसो रसस्योच्चोपरि जातं । जन्म । अपि च दिवि द्युलोके सद्विद्यमानं स्वतस्तव संबंध्युग्रमुद्गूर्णं शर्म सुखं महि महच्छ्रवोऽन्नं च भूमिराददे ॥ भूम्या दद इति पदत्रयमामनंति । विसर्जनीयलोपः सांहितिकः ॥ भूमिर्भोमा जना माहशाः । भूमिष्ठैरादीयत इत्यर्थः ॥

॥ इति सप्तमस्य प्रथम एकोनविंशो वर्गः ॥

॥ अथैकादशी ॥

एना विश्वान्यर्य आ द्युम्नानि मानुषाणां । सिषासंतो वनामहे ॥११॥

एना । विश्वानि । अर्यः । आ । द्युम्नानि । मानुषाणां । सिसासंतः । वनामहे ॥११॥

एनैनेनानेन सोमेन मानुषाणां मनुष्याणां विश्वा विश्वानि द्युम्नान्यन्नान्यार्योऽभिगच्छंतः सिषासंतः संभक्तुमिच्छंतश्च वयं वनामहे । संभजामहे ॥

॥ अथ द्वादशी ॥

स न इंद्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परि स्रव ॥१२॥

सः । नः । इंद्राय । यज्यवे । वरुणाय । मरुत्ऽभ्यः । वरिवःऽवित् । परि । स्रव ॥१२॥

हे सोम वरिवोविद्धनस्य लंभकः पवमानस्त्वं नोऽस्माकं यज्यवे यष्टव्यायेंद्राय वरुणाय च मरुद्भ्यश्च परि स्रव । धारया क्षर ॥

॥ अथ त्रयोदशी ॥

उपो षु जातमप्तुरं गोभिर्भंगं परिष्कृतं । इंदुं देवा अयासिषुः ॥१३॥

उपो इति । सु । जातं । अप्ऽतुरं । गोभिः । भंगं । परिऽकृतं । इंदुं । देवाः । अयासिषुः ॥१३॥

सुजातं सम्यक्प्रादुर्भूतमप्तुरं वसतीवरीभिः प्रेरितं भंगं शत्रूणां भंजकं गोभिर्गोविकारैः पयोभिः परिष्कृतमलंकृतं संस्कृतमिंदुं सोमं देवा इंद्रादय उपायासिषुः । उपागच्छंति ॥

॥ अथ चतुर्दशी ॥

तमिद्वर्धंतु नो गिरो वत्सं संशिश्वरीरिव । य इंद्रस्य हृदंसनिः ॥१४॥

तं । इत् । वर्धंतु । नः । गिरः । वत्सं । संशिश्वरीःऽइव । यः । इंद्रस्य । हृदंऽसनिः ॥१४॥

यः सोम इंद्रस्य हृदंसनिर्हृदयस्य संभक्ता भवति तमित्तमेव सोमं नोऽस्माकं गिरः स्तुतिरूपा वाचः संवर्धंतु । सम्यग्वर्धयंतु । तत्र दृष्टांतः । वत्सं बालं शिश्वरीरिवा यथा शिश्वर्यो बहुपयस्का मातरो वत्सं वर्धयंति तद्वदित्यर्थः ॥

॥ अथ पंचदशी ॥

अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषं । वर्धा समुद्रमुक्थ्यं ॥१५॥

अर्ष । नः । सोम । शं । गवे । धुक्षस्व । पिप्युषीं । इषं । वर्ध । समुद्रं । उक्थ्यं ॥१५॥

हे सोम त्वं नोऽस्माकं गवे शं सुखमर्ष । क्षर । अपि च पिप्युषीं प्रवृद्धमिषमन्नं धुक्षस्व । पूरय । किंचोक्थ्यं प्रशस्यं समुद्रमुदकं वर्ध । वर्धय ॥

॥ इति सप्तमस्य प्रथमे विंशो वर्गः ॥

॥ अथ षोडशी ॥

पवमानो अजीजनद्दिवश्चित्रं न तन्यतुं । ज्योतिर्वैश्वानरं बृहत् ॥१६॥

पवमानः । अजीजनत् । दिवः । चित्रं । न । तन्यतुं । ज्योतिः । वैश्वानरं । बृहत् ॥१६॥

पवमानः सोमो बृहन्महद्वैश्वानरं वैश्वानराख्यं ज्योतिस्तेजो दिवो द्युलोकस्य चित्रं तन्यतुं नाशनिमिवाजीजनत् । अजनयत् ॥

॥ अथ सप्तदशी ॥

पवमानस्य ते रसो मदो राजन्नदुच्छुनः । वि वारमव्यमर्षति ॥१७॥

पवमानस्य । ते । रसः । मदः । राजन् । अदुच्छुनः । वि । वारं । अव्यं । अर्षति ॥१७॥

हे राजन् दीप्यमान सोम पवमानस्य क्षरतस्ते तवादुच्छुनो रक्षोवर्जितो मदो मदकरो रसोऽव्यमविमयं वारं वालं दशापवित्रमर्षति । अभिगच्छति ॥

॥ अथाष्टादशी ॥

पवमान रसस्तव दक्षो वि राजति द्युमान् । ज्योतिर्विश्वं स्वर्दृशे ॥१८॥

पवमान । रसः । तव । दक्षः । वि । राजति । द्युऽमान् । ज्योतिः । विश्वं । स्वः । दृशे ॥१८॥

हे पवमान सोम तव त्वदीयो दक्षो वृद्धो द्युमान् दीप्तिमान् रसो विराजति। प्रकाशते। न केवलं स्वयमेव प्रकाशते किंतु विश्वं व्याप्तं स्वः सर्वं ज्योतिस्तेजश्च दृशे द्रष्टुं करोतीति शेषः ॥

॥ अथैकोनविंशी ॥

यस्ते मदो वरेण्यस्तेना पवस्वांधसा। देवावीरघशंसहा ॥१९॥

यः। ते। मदः। वरेण्यः। तेन। पवस्व। अंधसा। देवऽअवीः। अघशंसऽहा ॥१९॥

हे सोम ते तव देवावीर्देवकामोऽघशंसहा राक्षसानां हंता वरेण्यः सर्वैर्वरणीयो मदो मदकरो यो रसो विद्यते तेन रसेनांधसादनीयेन पवस्व। क्षर ॥

॥ अथ विंशी ॥

जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे। गोषा उ अश्वसा असि ॥२०॥

जघ्निः। वृत्रं। अमित्रियं। सस्निः। वाजं। दिवेऽदिवे। गोऽसाः। ऊं इति।
अश्वऽसाः। असि ॥२०॥

हे सोम त्वममित्रियममित्रभवं वृत्रं शत्रुं जघ्निर्हंतासि। भवसि। किंच दिवेदिवे प्रतिदिनं वाजं संग्रामं सस्निः संभक्तासि। किंच गोषा गवां दातासि। अश्वसा अश्वानां दाता चासि ॥

॥ इति सप्तमस्य प्रथम एकविंशो वर्गः ॥

॥ अथैकविंशी ॥

संमिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः। सीदञ्छ्येनो न योनिमा ॥२१॥

संऽमिश्लः। अरुषः। भव। सुऽउपस्थाभिः। न। धेनुऽभिः। सीदन्। श्येनः। न।
योनिं। आ ॥२१॥

हे सोम त्वं सूपस्थाभिः शोभनोपस्थानाभिर्धेनुभिर्गोभिः। गोविकारैः पयोभिरित्यर्थः। संमिश्लः संमिश्रितः श्येनो न यथा श्येनः शीघ्रमागत्य स्थानमासीदति तद्वद्योनिं स्वकीयं स्थानमासीदन्। न संप्रत्यर्थे। इदानीमरुष आरोचमानो भव ॥

॥ अथ द्वाविंशी ॥

स पवस्व य आविथेंद्रं वृत्राय हंतवे। वव्रिवांसं महीरपः ॥२२॥

सः। पवस्व। यः। आविथ। इंद्रं। वृत्राय। हंतवे। वव्रिऽवांसं। महीः। अपः ॥२२॥

हे सोम यस्त्वं महीर्महतीरपो महांत्युदकानि वव्रिवांसं निरुंधानं वृत्राय वृत्रं हंतवे हंतुमिंद्रमाविथ अरक्षः स त्वं पवस्व। धारया क्षर। सोमं पीत्वा मत्तः सन्निंद्रो महांत्युदकानि निरुंधानं वृत्रं जघानेत्यर्थः ॥

॥ अथ त्रयोविंशी ॥

सुवीरा॑सो व॒यं धना॒ जये॑म सोम मीढ्वः। पु॒ना॒नो व॑र्ध नो॒ गिर॑ः ॥२३॥

सु॒ऽवीरा॑सः। व॒यं। धना॑। जये॑म। सो॒म॒। मी॒ढ्वः। पु॒ना॒नः। व॒र्ध॒। न॒ः। गिर॑ः ॥२३॥

सुवीरासः सुवीराः कल्याणपुत्रा वयममहीयव आंगिरसा धना शत्रूणां धनानि जयेम। शत्रूञ्जित्वा तदीयानि धनानि स्वीकुर्यामेत्यर्थः। हे मीढ्वः सेक्तः सोम पुनानः पूयमानस्त्वं नोऽस्माकं गिरः स्तुतिरूपा वाचश्च वर्ध। वर्धय ॥

॥ अथ चतुर्विंशी ॥

त्वोता॑सस्तवाव॑सा॒ स्याम॑ व॒न्वंत॑ आ॒मुर॑ः। सोम॑ व्र॒तेषु॑ जागृहि ॥२४॥

त्वाऽऊ॑तासः। तव॑। अव॑सा। स्याम॑। व॒न्वंत॑ः। आ॒ऽमुर॑ः। सोम॑। व्र॒तेषु॑। जा॒गृ॒हि॒ ॥२४॥

हे सोम तव त्वदीयेनावसा रक्षणेन त्वोतासस्त्वया रक्षिताः संतो वन्वंतः शत्रून्भजमाना आमुरस्तेषामभिमारकाः स्याम। भवेम। व्रतेष्वस्माकं कर्मसु जागृहि। प्रबुद्धो भव ॥

॥ अथ पंचविंशी ॥

अ॒प॒घ्नन्प॑वते मृधोऽप॒ सोमो॒ अरा॑व्णः। गच्छ॒न्निंद्र॑स्य नि॒ष्कृतं॑ ॥२५॥

अ॒प॒ऽघ्नन्। प॒व॒ते॒। मृध॑ः। अप॑। सोम॑ः। अरा॑व्णः। गच्छ॑न्। इंद्र॑स्य। निः॒ऽकृतं॑ ॥२५॥

सोमो मृधो हिंसकाञ्छत्रूनपघ्नन् मारयन् अराव्णः शक्तौ सत्यां धनानामदातॄंश्चापघ्नन् इंद्रस्य निष्कृतं स्थानं गच्छन् प्राप्नुवन् पवते। धारया क्षरति ॥

॥ इति सप्तमस्य प्रथमे द्वाविंशो वर्गः ॥

॥ अथ षड्विंशी ॥

म॒हो नो॑ रा॒य आ भ॑र॒ पव॑मान ज॒ही मृध॑ः। रास्वें॑दो वी॒रव॒द्यश॑ः ॥२६॥

म॒हः। न॒ः। रा॒यः। आ। भ॒र॒। पव॑मान। ज॒हि। मृध॑ः। रास्व॑। इंदो॒ इति॑। वी॒रऽव॑त्। यश॑ः ॥२६॥

हे पवमानेंदो सोम नोऽस्माकं महो महांति रायो धनान्याभर। आहर। मृधो हिंसकाञ्छत्रूंश्च जहि। मारय। वीरवत्पुत्राद्युपेतं यशः कीर्तिं च रास्व। अस्मभ्यं देहि॥

॥ अथ सप्तविंशी ॥

न त्वा॑ श॒तं च॒न ह्रुतो॒ राधो॒ दित्सं॑त॒मा मि॑नन् । यत्पु॑ना॒नो म॑ख॒स्यसे॑ ॥२७॥

न । त्वा॒ । श॒तं । च॒न । ह्रुतः॑ । राधः॑ । दित्सं॑तं । आ । मि॒न॒न् । यत् । पु॒ना॒नः । म॒ख॒स्यसे॑ ॥२७॥

हे सोम राधो धनमादित्संतमादातुमिच्छंतं त्वा त्वां शतं चन बहवोऽपि ह्रुतो हिंसकाः शत्रवो न मिनन् । न हिंसंति । कदेत्यत्राह । यद्यदा पुनानः पूयमानस्त्वं मखस्यसेऽस्मभ्यं धनं दातुमिच्छसि ॥

॥ अथाष्टाविंशी ॥

पव॑स्वेंदो॒ वृषा॑ सु॒तः कृ॒धी नो॑ य॒शसो॒ जने॑ । विश्वा॒ अप॒ द्विषो॑ जहि ॥२८॥

पव॑स्व । इं॒दो॒ इति॑ । वृषा॑ । सु॒तः । कृ॒धि । नः॒ । य॒शसः॑ । जने॑ । विश्वाः॑ । अप॑ । द्विषः॑ । ज॒हि॒ ॥२८॥

हे इंदो सोम सुतोऽभिषुतो वृषा सेक्ता त्वं पवस्व । धारया क्षर । जने जनपदेषु नोऽस्मान्यशसो यशस्विनः कृधि । कुरु । विश्वाः सर्वान् द्विषो द्वेष्टॄञ्छत्रूनपजहि । मारय च ॥

॥ अथैकोनत्रिंशी ॥

अ॒स्य ते॑ स॒ख्ये व॒यं तवें॑दो द्यु॒म्न उ॑त्त॒मे । सा॒स॒ह्याम॑ पृत॒न्य॒तः ॥२९॥

अ॒स्य । ते॒ । स॒ख्ये । व॒यं । तव॑ । इं॒दो॒ इति॑ । द्यु॒म्ने । उ॒त्ऽत॒मे । स॒स॒ह्याम॑ । पृ॒त॒न्य॒तः ॥२९॥

हे इंदो सोम अस्यास्मिन्यागे वर्तमानस्य ते तव सख्ये सखित्वे सति वयमहीयव आंगिरसास्तव त्वदीय उत्तमे श्रेष्ठे द्युम्नेऽन्ने तृप्तिं प्राप्ताः ॥ तथा च यास्कः । द्युम्नं द्योततेर्यशो वान्नं वेति ॥ पृतन्यतो युद्धमिच्छतः शत्रून् ससह्याम । अभिभवेम ॥

॥ अथ त्रिंशी ॥

या ते॑ भी॒मान्यायु॑धा ति॒ग्मानि॒ संति॒ धूर्व॑णे । रक्षा॑ समस्य नो नि॒दः ॥३०॥

या । ते॒ । भी॒मानि॑ । आयु॑धा । ति॒ग्मानि॑ । संति॑ । धूर्व॑णे । रक्ष॑ । स॒म॒स्य॒ । नः॒ । नि॒दः ॥३०॥

हे सोम ते तव या यानि भीमानि शत्रूणां भयंकराणि तिग्मानि तीक्ष्णान्यायुधायुधानि धूर्वणे शत्रुवधार्थं संति तैरायुधैः समस्य सर्वस्य शत्रोर्निदो निंदाया नोऽस्मान्रक्ष । पालय ॥

॥ इति सप्तमस्य प्रथमे त्रयोविंशो वर्गः ॥

एते असृग्रमिति त्रिंशदृचं द्वितीयं सूक्तं भार्गवस्य जमदग्नेरार्षं गायत्रं पवमानसोमदेवताकं। तथा चानुक्रांतं। एते असृग्रं जमदग्निरिति। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

एते असृग्रमिंदवस्तिरः पवित्रमाशवः। विश्वान्यभि सौभगा ॥१॥

एते। असृग्रं। इंदवः। तिरः। पवित्रं। आशवः। विश्वानि। अभि। सौभगा ॥१॥

आशवः शीघ्रा एते पवमाना इंदवः सोमा विश्वानि सर्वाणि सौभगा सौभगानि धनान्यभिलक्ष्य पवित्रं तिरोऽसृग्रम्। ऋत्विग्भिः सृज्यंते ॥

॥ अथ द्वितीया ॥

विघ्नंतो दुरिता पुरु सुगा तोकाय वाजिनः। तना कृण्वंतो अर्वते ॥२॥

विऽघ्नंतः। दुःऽइता। पुरु। सुऽगा। तोकाय। वाजिनः। तना। कृण्वंतः। अर्वते ॥२॥

वाजिनो बलवंतः सोमाः पुरु बहूनि दुरिता दुरितानि विघ्नंतो विशेषेण नाशयंतस्तोकायास्माकं पुत्रायार्वतेऽश्वाय च सुगा सुखानि तना धनानि च कृण्वंतः कुर्वंतस्तिरः पवित्रं सृज्यंत इति संबंधः ॥

॥ अथ तृतीया ॥

कृण्वंतो वरिवो गवेऽभ्यर्षंति सुष्टुतिं। इळामस्मभ्यं संयतं ॥३॥

कृण्वंतः। वरिवः। गवे। अभि। अर्षंति। सुऽस्तुतिं। इळां। अस्मभ्यं। संऽयतं ॥३॥

अस्माकं गवेऽस्मभ्यं च संयतं यदस्मान् संयच्छति तद्वरिवो धनमिळामन्नं च कृण्वंतः कुर्वंतः सोमाः सुष्टुतिमस्मदीयां शोभनां स्तुतिमभ्यर्षंति। आभिमुख्येन गच्छंति ॥

॥ अथ चतुर्थी ॥

असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत् ॥४॥

असावि। अंशुः। मदाय। अप्ऽसु। दक्षः। गिरिऽस्थाः। श्येनः। न। योनिं। आ। असदत् ॥४॥

गिरिष्ठाः पर्वते जातोऽंशुः सोमो मदाय मदार्थमसावि। अभिषुतः। अप्सु वसतीवरीषु दक्षः प्रवृद्धश्च भवति। किंच श्येनो न यथा श्येनो वेगेनागत्य स्थानमासीदति तद्वदयं सोमो योनिं स्वकीयं स्थानमासदत्। आसीदति ॥

॥ अथ पंचमी ॥

शुभ्रमंधो देववातमप्सु धूतो नृभिः सुतः । स्वदंति गावः पयोभिः ॥५॥

शुभ्रं। अंधः। देवऽवातं। अप्ऽसु। धूतः। नृऽभिः। सुतः। स्वदंति। गावः। पयःऽभिः॥५॥

यद्देववातं देवैः प्रार्थितं शुभ्रं शोभनमंधोऽन्नं गावः पशवः पयोभिराशिरैः स्वदंति स्वादयंति सोऽयं सोमो नृभिर्नेतृभिर्ऋत्विग्भिः सुतोऽभिषुतः सन्नप्सु वसतीवरीषु धूतः शोधितो भवति ॥

॥ इति सप्तमस्य प्रथमे चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

आदीमश्वं न हेतारोऽशूशुभन्नमृताय । मध्वो रसं सधमादे ॥६॥

आत्। ईं। अश्वं। न। हेतारः। अशूशुभन्। अमृताय। मध्वः। रसं। सधऽमादे ॥६॥

आदनंतरं हेतारः प्रेरका ऋत्विजः सधमादे यज्ञ ईमेनं मध्वो मदकरस्य सोमस्य रसममृतायामरणायाश्वं नाश्वमिवाशूशुभन् । शोभयंति ॥

॥ अथ सप्तमी ॥

यास्ते धारा मधुश्चुतोऽसृग्रमिंद ऊतये । ताभिः पवित्रमासदः ॥७॥

याः। ते। धाराः। मधुऽश्चुतः। असृग्रं। इंदो इति। ऊतये। ताभिः। पवित्रं। आ। असदः॥७॥

हे इंदो सोम ते तव मधुश्चुतो मधुररसस्य श्चोतयित्र्यो या धारा ऊतये रक्षणायासृग्रमसृज्यंत ताभिर्धाराभिस्त्वं पवित्रमासदः । आसीद ॥

॥ अथाष्टमी ॥

सो अर्षेंद्राय पीतये तिरो रोमाण्यव्यया । सीदन्योना वनेष्वा ॥८॥

सः। अर्ष। इंद्राय। पीतये। तिरः। रोमाणि। अव्यया। सीदन्। योना। वनेषु। आ ॥८॥

हे सोम सोऽभिषुतस्त्वमव्ययाव्ययान्यविमयानि रोमाणि वालानि तिरस्तिरस्कुर्वन् वनेषु पात्रेषु योना योनौ स्थान आ सीदन्निंद्रायेंद्रस्य पीतये पानायार्ष । क्षर ॥

॥ अथ नवमी ॥

त्वमिंदो परि स्रव स्वादिष्ठो अंगिरोभ्यः । वरिवोविद्घृतं पयः ॥९॥

त्वं। इंदो इति। परि। स्रव। स्वादिष्ठः। अंगिरःऽभ्यः। वरिवःऽवित्। घृतं। पयः ॥९॥

हे इंदो सोम स्वादिष्ठः स्वादुतमो वरिवोविदस्मदभिलषितस्य धनस्य लंभकश्च त्वमंगिरोभ्योऽंगिरसामर्थाय घृतमाज्यं पयश्च परि स्रव। परिक्षर ॥

॥ अथ दशमी ॥

अयं विचर्षणिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत् ॥१०॥

अयं। विऽचर्षणिः। हितः। पवमानः। सः। चेतति। हिन्वानः। आप्यं। बृहत् ॥१०॥

विचर्षणिर्विद्रष्टा हितः पात्रेषु निहितः पवमानोऽयं सोम आप्यमप्सु भवं बृहन्महदन्नं हिन्वानः प्रेरयन् स चेतति। सर्वैः स ज्ञायते ॥

॥ इति सप्तमस्य प्रथमे पंचविंशो वर्गः ॥

॥ अथैकादशी ॥

एष वृषा वृषव्रतः पवमानो अशस्तिहा। करद्वसूनि दाशुषे ॥११॥

एषः। वृषा। वृषऽव्रतः। पवमानः। अशस्तिऽहा। करत्। वसूनि। दाशुषे ॥११॥

वृषा कामानां सेक्ता वृषव्रतो वृषकर्माशस्तिहा राक्षसानां हंता पवमान एष सोमो दाशुषे हविषां दात्रे यजमानाय वसूनि धनानि करत्। करोति। प्रयच्छतीत्यर्थः ॥

॥ अथ द्वादशी ॥

आ पवस्व सहस्रिणं रयिं गोमंतमश्विनं। पुरुश्चंद्रं पुरुस्पृहं ॥१२॥

आ। पवस्व। सहस्रिणं। रयिं। गोऽमंतं। अश्विनं। पुरुऽचंद्रं। पुरुऽस्पृहं ॥१२॥

हे सोम त्वं सहस्रिणं बहुसंख्याकं गोमंतं गोभिरुपेतमश्विनमश्ववंतं पुरुश्चंद्रं बहूनां हर्षकं पुरुस्पृहं बहुस्पृहणीयं रयिं धनमा पवस्व। परि क्षर ॥

॥ अथ त्रयोदशी ॥

एष स्य परि षिच्यते मर्मृज्यमान आयुभिः। उरुगायः कविक्रतुः ॥१३॥

एषः। स्यः। परि। सिच्यते। मर्मृज्यमानः। आयुऽभिः। उरुऽगायः। कविऽक्रतुः ॥१३॥

उरुगायो बहुस्तुतिः कविक्रतुः क्रांतप्रज्ञः क्रांतकर्मा वा स्यः स एषोऽयं सोम आयुभिर्मनुष्यैर्मर्मृज्यमानः शोध्यमानः परि षिच्यते ॥

॥ अथ चतुर्दशी ॥

सहस्रोतिः शतामघो विमानो रजसः कविः । इंद्राय पवते मदः ॥१४॥

सहस्रऽऊतिः । शतऽमघः । विऽमानः । रजसः । कविः । इंद्राय । पवते । मदः ॥१४॥

सहस्रोतिरपरिमितरक्षणः शतमघो बहुधनो रजसो लोकस्य विमानो निर्माता कविः क्रांतकर्मा मदो मदकरः सोम इंद्रायेंद्रार्थं पवते । धारया क्षरति ॥

॥ अथ पंचदशी ॥

गिरा जात इह स्तुत इंदुरिंद्राय धीयते । विर्योना वसताविव ॥१५॥

गिरा । जातः । इह । स्तुतः । इंदुः । इंद्राय । धीयते । विः । योना । वसतौऽइव ॥१५॥

जातः प्रादुर्भूतो गिरा स्तुत्या स्तुतश्चेंदुः सोम इहास्मिन्यज्ञे योना योनौ स्वस्थान इंद्रायेंद्रार्थं वसताविव विर्यथा स्ववासे पक्षी तथा धीयते । निधीयते ॥

॥ इति सप्तमस्य प्रथमे षड्विंशो वर्गः ॥

॥ अथ षोडशी ॥

पवमानः सुतो नृभिः सोमो वाजमिवासरत् । चमूषु शक्मनासदं ॥१६॥

पवमानः । सुतः । नृऽभिः । सोमः । वाजंऽइव । असरत् । चमूषु । शक्मना । आऽसदं ॥१६॥

नृभिर्नेतृभिर्ऋत्विग्भिः सुतोऽभिषुतः सोमश्च चमूषु चमसेषु शक्मना बलेनासदमुपवेष्टुं वाजमिव युद्धमिव स्थानमसरत् । सरति ॥

॥ अथ सप्तदशी ॥

तं त्रिपृष्ठे त्रिवंधुरे रथे युंजंति यातवे । ऋषीणां सप्त धीतिभिः ॥१७॥

तं । त्रिऽपृष्ठे । त्रिऽवंधुरे । रथे । युंजंति । यातवे । ऋषीणां । सप्त । धीतिऽभिः ॥१७॥

त्रिपृष्ठे त्रिषवणपृष्ठे त्रिवंधुरे त्रिवेदवंधुर ऋषीणां रथे यज्ञरथे तं सोमं सप्त सप्तभिर्धीतिभिश्छंदोभिर्यातवे देवान्प्रति गंतुं युंजंति । ऋत्विजो योजयंति ॥

॥ अथाष्टादशी ॥

तं सोतारो धनस्पृतमाशुं वाजाय यातवे । हरिं हिनोत वाजिनं ॥१८॥

तं । सोतारः । धनऽस्पृतं । आशुं । वाजाय । यातवे । हरिं । हिनोत । वाजिनं ॥१८॥

हे सोतारोऽभिषवकर्तार ऋत्विजो धनस्पृतं धनानां स्प्रष्टारं वाजिनं बलिनमाशुं वेगवंतं तं सोमात्मकं हरिमश्वं वाजाय यज्ञाख्यं संग्रामं यातवे गंतुं हिनोत। प्रेरयत। यथा योद्धारो युद्धं गंतुं बलिनं वेगवंतमश्वं प्रेरयंति तद्वद्यज्ञमभिगंतुं बलवंतं सोमं प्रेरयतेति भावः ॥

॥ अथैकोनविंशी ॥

आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥१९॥

आऽविशन्। कलशं। सुतः। विश्वाः। अर्षन्। अभि। श्रियः। शूरः। न। गोषु। तिष्ठति॥१९॥

सुतोऽभिषुतः सोमः कलशं द्रोणमाविशन् विश्वाः सर्वाः श्रियः संपदोऽभ्यर्षन् अस्मानभिगमयन् गोषु शत्रूणां पशुषु शूरो न यथा शूरो निःशंकस्तिष्ठति तद्वद्यज्ञेषु निःशंकस्तिष्ठति ॥

॥ अथ विंशी ॥

आ तं इंदो मदाय कं पयो दुहंत्यायवः । देवा देवेभ्यो मधु ॥२०॥

आ। ते। इंदो इति। मदाय। कं। पयः। दुहंति। आयवः। देवाः। देवेभ्यः। मधु ॥२०॥

हे इंदो सोम ते तव मधु मधुभूतं पयः पेयं रसं देवाः स्तोतार आयवो मनुष्या मदाय कं मदार्थं देवेभ्य इंद्रादिभ्य आ दुहंति ॥

॥ इति सप्तमस्य प्रथमे सप्तविंशो वर्गः ॥

॥ अथैकविंशी ॥

आ नः सोमं पवित्र आ सृजता मधुमत्तमं । देवेभ्यो देवश्रुत्तमं ॥२१॥

आ। नः। सोमं। पवित्रे। आ। सृजत। मधुमत्ऽतमं। देवेभ्यः। देवश्रुत्ऽतमं ॥२१॥

हे ऋत्विजो नोऽस्माकं देवश्रुत्तममत्यंतं देवैः श्रूयमाणं मधुमत्तममतिशयेन मधुमंतं सोमं देवेभ्य इंद्राद्यर्थं पवित्रे दशापवित्र आ सृजत। साधयत ॥

॥ अथ द्वाविंशी ॥

एते सोमा असृक्षत गृणानाः श्रवसे महे । मदिंतमस्य धारया ॥२२॥

एते। सोमाः। असृक्षत। गृणानाः। श्रवसे। महे। मदिन्ऽतमस्य। धारया ॥२२॥

गृणानाः स्तूयमाना एत इमे सोमा महे महते श्रवसेऽन्नाय मदिंतमस्य मादयितृतमस्य रसस्य धारयासृक्षत। ऋत्विग्भिः सृज्यंते ॥

॥ अथ त्रयोविंशी ॥

अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि । सनद्वाजः परि स्रव ॥२३॥

अभि । गव्यानि । वीतये । नृम्णा । पुनानः । अर्षसि । सनत्ऽवाजः । परि । स्रव ॥२३॥

हे सोम पुनानः पूयमानो यस्त्वं वीतये भक्षणाय गव्यानि गोसंबंधीनि नृम्णानि धनानि क्षीरादीन्यभ्यर्षस्यभिगच्छसि स त्वं सनद्वाजो दीयमानान्नः सन् परि स्रव । परिक्षर ॥

॥ अथ चतुर्विंशी ॥

उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः । गृणानो जमदग्निना ॥२४॥

उत । नः । गोऽमतीः । इषः । विश्वाः । अर्ष । परिऽस्तुभः । गृणानः । जमत्ऽअग्निना ॥२४॥

उतापि च हे सोम जमदग्निनाम्ना ऋषिणा मया गृणानः स्तूयमानस्त्वं नोऽस्माकं गोमतीर्गोभिर्युक्तानि परिष्टुभः परितः स्तोतव्यानि विश्वाः सर्वाणीषोऽन्नान्यर्ष । गच्छ । अस्मभ्यमेवंविधान्यन्नानि देहीत्यर्थः ॥

॥ अथ पंचविंशी ॥

पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः । अभि विश्वानि काव्या ॥२५॥

पवस्व । वाचः । अग्रियः । सोम । चित्राभिः । ऊतिऽभिः । अभि । विश्वानि । काव्या ॥२५॥

हे सोमाग्रियो मुख्यस्त्वं चित्राभिः पूजनीयैरूतिभी रक्षणैः सह वाचोऽस्मदीयाः स्तुतीरभि पवस्व । एतदेव दर्शयति । विश्वानि सर्वाणि काव्या काव्यानि स्तुत्यात्मकानि वाक्यान्यभि पवस्वेति ॥

॥ इति सप्तमस्य प्रथमेऽष्टाविंशो वर्गः ॥

॥ अथ षड्विंशी ॥

त्वं समुद्रिया अपोऽग्रियो वाच ईरयन् । पवस्व विश्वमेजय ॥२६॥

त्वं । समुद्रियाः । अपः । अग्रियः । वाचः । ईरयन् । पवस्व । विश्वम्ऽएजय ॥२६॥

हे विश्वमेजय विश्वकंपक सोमाग्रियो मुख्यस्त्वं वाच ईरयन् प्रेरयन् समुद्रिया आंतरिक्षाण्यप उदकानि पवस्व । धारया क्षर ॥

॥ अथ सप्तविंशी ॥

तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे । तुभ्यमर्षंति सिंधवः ॥२७॥

तुभ्यं । इमा । भुवना । कवे । महिम्ने । सोम । तस्थिरे । तुभ्यं । अर्षंति । सिंधवः ॥२७॥

हे कवे क्रांतकर्मन् सोम तुभ्यं तव महिम्न इमेमानि भुवना भुवनानि तस्थिरे । तिष्ठंति । त्वामेव पुरस्कुर्वंतीत्यर्थः । अपि च सिंधवो नद्यस्तुभ्यमेवार्षंति । गच्छंति । त्वदाज्ञामेवानुपालयंतीत्यर्थः ॥

॥ अथाष्टविंशी ॥

प्र ते दिवो न वृष्टयो धारा यंत्यसश्चतः । अभि शुक्रामुपस्तिरं ॥२८॥

प्र । ते । दिवः । न । वृष्टयः । धाराः । यंति । असश्चतः । अभि । शुक्रां । उपऽस्तिरं ॥२८॥

हे सोम ते तवासश्चतोऽसंगा धारा दिवोऽंतरिक्षाद्वृष्टयो न वर्षाणीव शुक्रां शुक्लवर्णां शुक्लवर्णैरविलोमभिर्निर्मितमुपस्तिरमुपस्तीर्यमाणं पवित्रमभि प्रति प्रयंति ॥

॥ अथैकोनत्रिंशी ॥

इंद्रायेंदुं पुनीतनोग्रं दक्षाय साधनं । ईशानं वीतिराधसं ॥२९॥

इंद्राय । इंदुं । पुनीतन । उग्रं । दक्षाय । साधनं । ईशानं । वीतिऽराधसं ॥२९॥

हे ऋत्विज उग्रमुद्गूर्णं दक्षाय बलस्य साधनं करणमीशानं धनानामीश्वरं वीतिराधसं दत्तधनमिंदुं सोममिंद्रायेंद्रार्थं पुनीतन । पुनीत ॥

॥ अथ त्रिंशी ॥

पवमान ऋतः कविः सोमः पवित्रमासदत् । दधत्स्तोत्रे सुवीर्यं ॥३०॥

पवमानः । ऋतः । कविः । सोमः । पवित्रं । आ । असदत् । दधत् । स्तोत्रे । सुऽवीर्यं ॥३०॥

ऋतः सत्यभूतः कविः क्रांतकर्मा पवमानः सोमोऽस्मदीये स्तोत्रे सुवीर्यं शोभनवीर्यं दधत् प्रयच्छन् पवित्रमासदत् । आसीदति ॥

॥ इति सप्तमस्य प्रथम एकोनत्रिंशो वर्गः ॥

आ पवस्वेति त्रिंशदृचं तृतीयं सूक्तं काश्यपस्य निध्रुवेरार्षं गायत्रं पवमानसोमदेवताकं । तथा चानुक्रांतं । आ पवस्व निध्रुविः काश्यप इति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

आ पवस्व सहस्रिणं रयिं सोम सुवीर्यं । अस्मे श्रवांसि धारय ॥१॥

आ। पवस्व। सहस्रिणं। रयिं। सोम। सुऽवीर्यं। अस्मे इति। श्रवांसि। धारय ॥१॥

हे सोम त्वं सहस्रिणं बहुसंख्याकं सुवीर्यं शोभनवीर्यं रयिं धनमापवस्व। आभिमुख्येन क्षर। अपि चास्मे अस्मासु श्रवांस्यन्नानि धारय। स्थापय ॥

॥ अथ द्वितीया ॥

इषमूर्जं च पिन्वस इंद्राय मत्सरिंतमः। चमूष्वा नि षीदसि ॥२॥

इषं। ऊर्जं। च। पिन्वसे। इंद्राय। मत्सरिन्ऽतमः। चमूषु। आ। नि। सीदसि ॥२॥

हे सोम मत्सरिंतमोऽतिशयेन मदयितृतमस्त्वमिंद्रायेंद्रार्थमिषमन्नमूर्जं रसं च पिन्वसे। क्षरसि। अपि च चमूषु चमसेष्वा नि षीदसि। तिष्ठसि ॥

॥ अथ तृतीया ॥

सुत इंद्राय विष्णवे सोमः कलशे अक्षरत्। मधुमाँ अस्तु वायवे ॥३॥

सुतः। इंद्राय। विष्णवे। सोमः। कलशे। अक्षरत्। मधुऽमान्। अस्तु। वायवे ॥३॥

इंद्रायेंद्रार्थं विष्णवे विष्ण्वर्थं च वायवे वाय्वर्थं च सुतोऽभिषुतो यः सोमः कलशे द्रोणकलशेऽक्षरत् क्षरति सोऽयं सोमो मधुमान् मधुररसवानस्तु। भवतु ॥

॥ अथ चतुर्थी ॥

एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः। सोमा ऋतस्य धारया ॥४॥

एते। असृग्रं। आशवः। अति। ह्वरांसि। बभ्रवः। सोमाः। ऋतस्य। धारया ॥४॥

बभ्रवो बभ्रुवर्णा आशवः शीघ्रा एत इमे सोमा ऋतस्योदकस्य धारयासृग्रम्। सृज्यंते। ह्वरांसि रक्षांस्यभिगच्छंति च ॥

॥ अथ पंचमी ॥

इंद्रं वर्धंतो अप्तुरः कृण्वंतो विश्वमार्यं। अपघ्नंतो अराव्णः ॥५॥

इंद्रं। वर्धंतः। अप्ऽतुरः। कृण्वंतः। विश्वं। आर्यं। अपऽघ्नंतः। अराव्णः ॥५॥

इंद्रं वर्धंतो वर्धयंतोऽप्तुर उदकस्य प्रेरका विश्वं सोममस्मदीयकर्मार्थमार्यं भद्रं कृण्वंतः कुर्वंतोऽराव्णोऽदातॄनपघ्नंतो विनाशयंतः। अभ्यर्षंतीत्युत्तरया संबंधः॥

॥ इति सप्तमस्य प्रथमे त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

सुता अनु स्वमा रजोऽभ्यर्षंति बभ्रवः। इंद्रं गच्छंत इंदवः॥६॥

सुताः। अनु। स्वं। आ। रजः। अभि। अर्षंति। बभ्रवः। इंद्रं। गच्छंतः। इंदवः॥६॥

बभ्रवो बभ्रुवर्णाः सुता अभिषुता इंदवः सोमा इंद्रमा गच्छंत आभिमुख्येन प्राप्नुवंतः स्वं स्वकीयं रजः स्थानमनु प्रत्यभ्यर्षंति। अभिगच्छंति॥

॥ अथ सप्तमी ॥

अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः॥७॥

अया। पवस्व। धारया। यया। सूर्यं। अरोचयः। हिन्वानः। मानुषीः। अपः॥७॥

हे सोम मानुषीर्मनुष्याणां हितान्यप उदकानि हिन्वानः प्रेरयन् त्वं यया धारया सूर्यमरोचयः प्राकाशयस्तयानया धारया पवस्व। क्षर॥

॥ अथाष्टमी ॥

अयुक्त सूर एतशं पवमानो मनावधि। अंतरिक्षेण यातवे॥८॥

अयुक्त। सूरः। एतशं। पवमानः। मनौ। अधि। अंतरिक्षेण। यातवे॥८॥

पवमानः पूयमानः सोमो मनावधि। मनुर्मनुष्यः। तस्मिन्मनुष्य इत्यर्थः। अंतरिक्षेण यातवे गंतुं सूरः प्रेरकस्य सूर्यस्यैतशमश्वं। एतग्वा एतश इत्यश्वनामसु पाठात्। अयुक्त। युंक्ते॥

॥ अथ नवमी ॥

उत त्या हरितो दश सूरो अयुक्त यातवे। इंदुरिंद्र इति ब्रुवन्॥९॥

उत। त्याः। हरितः। दश। सूरः। अयुक्त। यातवे। इंदुः। इंद्रः। इति। ब्रुवन्॥९॥

उतापि चेंदुः सोमः इंद्र इति ब्रुवन् त्यास्ता दश दशसंख्याका हरितो दिशः प्रति यातवे गंतुं सूरः सूर्यस्यैतशमयुक्त। युनक्ति॥

॥ अथ दशमी ॥

परीतो वायवे सुतं गिर इंद्राय मत्सरं । अव्यो वारेषु सिंचत ॥१०॥

परि । इतः । वायवे । सुतं । गिरः । इंद्राय । मत्सरं । अव्यः । वारेषु । सिंचत ॥१०॥

हे गिरः स्तोतारो यूयं वायवे वाय्वर्थमिंद्रायेंद्रार्थं च सुतमभिषुतं मत्सरं मदकरं सोममितोऽभिषवदेशादुद्धृत्याव्योऽवेर्वारेषु वालेषु परि षिंचत ॥

॥ इति सप्तमस्य प्रथम एकविंशो वर्गः ॥

॥ अथैकादशी ॥

पवमान विदा रयिमस्मभ्यं सोम दुष्टरं । यो दूणाशो वनुष्यता ॥११॥

पवमान । विदाः । रयिं । अस्मभ्यं । सोम । दुस्तरं । यः । दुःऽनशः । वनुष्यता ॥११॥

हे पवमान सोम यो रयिर्वनुष्यता हिंसकेन शत्रुणा दूणाशो नाशयितुमशक्यस्तं शत्रुभिर्दुष्टरं रयिं धनमस्मभ्यं विदाः । देहि ॥

॥ अथ द्वादशी ॥

अभ्यर्ष सहस्रिणं रयिं गोमंतमश्विनं । अभि वाजमुत श्रवः ॥१२॥

अभि । अर्ष । सहस्रिणं । रयिं । गोऽमंतं । अश्विनं । अभि । वाजं । उत । श्रवः ॥१२॥

हे सोम त्वं सहस्रिणं बहुसंख्याकं गोमंतं गोभिर्युक्तमश्विनमश्ववंतं रयिं धनमभ्यर्ष । अस्मानभिगमय । उतापि च वाजं बलं श्रवोऽन्नं चास्मानभिगमय ॥

॥ अथ त्रयोदशी ॥

सोमो देवो न सूर्योऽद्रिभिः पवते सुतः । दधानः कलशे रसं ॥१३॥

सोमः । देवः । न । सूर्यः । अद्रिऽभिः । पवते । सुतः । दधानः । कलशे । रसं ॥१३॥

देवो न देव इव सूर्यो रोचमानः सोमोऽद्रिभिर्ग्रावभिः सुतोऽभिषुतः सन् कलशे द्रोणकलशे रसं दधानो धारयन् पवते । धारया क्षरति ॥

॥ अथ चतुर्दशी ॥

एते धामान्यार्या शुक्रा ऋतस्य धारया । वाजं गोमंतमक्षरन् ॥१४॥

एते । धामानि । आर्या । शुक्राः । ऋतस्य । धारया । वाजं । गोऽमंतं । अक्षरन् ॥१४॥

एतेऽभिषुता इमे शुक्रा दीप्ताः सोमा आर्यायाणां श्रेष्ठानां यजमानानां धामानि गृहान्प्रति गोमंतं गोभिर्युक्तं वाजमन्नमृतस्योदकस्य धारयाक्षरन्। क्षरंति ॥

॥ अथ पंचदशी ॥

सुता इंद्राय वज्रिणे सोमासो दध्याशिरः। पवित्रमत्यक्षरन् ॥१५॥

सुताः। इंद्राय। वज्रिणे। सोमासः। दधिऽआशिरः। पवित्रं। अति। अक्षरन् ॥१५॥

वज्रिणे वज्रवत इंद्रायेंद्रार्थं सुता अभिषुता दध्याशिरो दधिसंस्कृताः सोमासः सोमाः पवित्रमत्यतिक्रम्याक्षरन्। धारया क्षरंति ॥

॥ इति सप्तमस्य प्रथमे द्वात्रिंशो वर्गः ॥

॥ अथ षोडशी ॥

प्र सोम मधुमत्तमो राये अर्ष पवित्र आ। मदो यो देववीतमः ॥१६॥

प्र। सोम। मधुमत्ऽतमः। राये। अर्ष। पवित्रे। आ। मदः। यः। देवऽवीतमः ॥१६॥

हे सोम ते तव यो मदो रसो मधुमत्तमोऽत्यंतं मधुमान् देववीतमोऽतिशयेन देवकामश्च तं रसं रायेऽस्माकं धनार्थं पवित्रे प्रार्ष। धारया क्षर ॥

॥ अथ सप्तदशी ॥

तमीं मृजंत्यायवो हरिं नदीषु वाजिनं। इंदुमिंद्राय मत्सरं ॥१७॥

तं। ईमिति। मृजंति। आयवः। हरिं। नदीषु। वाजिनं। इंदुं। इंद्राय। मत्सरं ॥१७॥

हरिं हरितवर्णं वाजिनं बलिनं मत्सरं मदकरं तं पवमानमीमेनमिंदुं सोममायवो मनुष्या ऋत्विजो नदीषु वसतीवरीषु मृजंति। मार्जयंति ॥

॥ अथाष्टादशी ॥

आ पवस्व हिरण्यवदश्वावत्सोम वीरवत्। वाजं गोमंतमा भर ॥१८॥

आ। पवस्व। हिरण्यऽवत्। अश्वऽवत्। सोम। वीरऽवत्। वाजं। गोऽमंतं। आ। भर ॥१८॥

हे सोम त्वं हिरण्यवत् सुवर्णोपेतमश्ववदश्वयुक्तं च वीरवत्पुत्राद्युपेतं च धनमा पवस्व। अस्मान्प्रति क्षर। अपि च गोमंतं पशुभिरुपेतं वाजमन्नमा भर। अस्मभ्यमाहर ॥

॥ अथैकोनविंशी ॥

परि वाजे न वाजयुमव्यो वारेषु सिंचत । इंद्राय मधुमत्तमं ॥१९॥

परि । वाजे । न । वाजऽयुं । अव्यः । वारेषु । सिंचत । इंद्राय । मधुमत्ऽतमं ॥१९॥

वाजयुं युद्धकामं मधुमत्तममतिशयेन मधुमंतं सोममिंद्रायेंद्रार्थमव्योऽवेर्वारेषु वालेषु दशापवित्रे वाजे न युद्ध इव हे ऋत्विजः परि षिंचत ॥

॥ अथ विंशी ॥

कविं मृजंति मर्ज्यं धीभिर्विप्रा अवस्यवः । वृषा कनिक्रदर्षति ॥२०॥

कविं । मृजंति । मर्ज्यं । धीभिः । विप्राः । अवस्यवः । वृषा । कनिक्रत् । अर्षति ॥२०॥

अवस्यवो रक्षणकामा विप्रा मेधाविन ऋत्विजो धीभिरंगुलीभिर्मर्ज्यं मर्जनीयं कविं क्रांतकर्माणं यं सोमं मृजंति मर्जयंति सोऽयं वृषा सेचकः सोमः कनिक्रत् शब्दं कुर्वन् अर्षति । धारया क्षरति ॥

॥ इति सप्तमस्य प्रथमे त्रयस्त्रिंशो वर्गः ॥

॥ अथैकविंशी ॥

वृषणं धीभिरप्तुरं सोममृतस्य धारया । मती विप्राः समस्वरन् ॥२१॥

वृषणं । धीभिः । अप्ऽतुरं । सोमं । ऋतस्य । धारया । मती । विप्राः । सं । अस्वरन् ॥२१॥

विप्रा मेधाविन ऋत्विजो वृषणं कामानां वर्षकमप्तुरमपां प्रेरकं सोमं धीभिरंगुलीभिर्मती मत्या स्तुत्या च ऋतस्योदकस्य धारया समस्वरन् । प्रेरयंति ॥

॥ अथ द्वाविंशी ॥

पवस्व देवायुषगिंद्रं गच्छतु ते मदः । वायुमा रोह धर्मणा ॥२२॥

पवस्व । देव । आयुषक् । इंद्रं । गच्छतु । ते । मदः । वायुं । आ । रोह । धर्मणा ॥२२॥

हे देव द्योतमान सोम पवस्व । धारया क्षर । अपि च ते तव मदो मदकरो रस आयुषगनुषक्तमिंद्रं प्रति गच्छतु । अपि च त्वं वायुं धर्मणा धारकेण रसेना रोह । प्राप्नुहि ॥

॥ अथ त्रयोविंशी ॥

पवमान नि तोशसे रयिं सोम श्रवाय्यं । प्रियः समुद्रमा विश ॥२३॥

पवमान । नि । तोशसे । रयिं । सोम । श्रवाय्यं । प्रियः । समुद्रं । आ । विश ॥२३॥

हे पवमान सोम यस्त्वं अवाच्यं अवणीयं रयिं शत्रूणां धनं नितोशसे नितरां पीडयसि स त्वं प्रियः सन् समुद्रं द्रोणकलशमाविश । प्रविश ॥

॥ अथ चतुर्विंशी ॥

अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः । नुदस्वादेवयुं जनं ॥२४॥

अपऽघ्नन् । पवसे । मृधः । क्रतुऽवित् । सोम । मत्सरः । नुदस्व । अदेवऽयुं । जनं ॥२४॥

हे सोम मत्सरो मदकरो यस्त्वं मृधो हिंसकाञ्छत्रूनपघ्नन् मारयन् क्रतुविदस्मभ्यं प्रज्ञां प्रयच्छन् पवसे क्षरसि स त्वमदेवयुमदेवकामं जनं राक्षसवर्गं नुदस्व । प्रेरय ॥

॥ अथ पंचविंशी ॥

पवमाना असृक्षत सोमाः शुक्रास इंदवः । अभि विश्वानि काव्या ॥२५॥

पवमानाः । असृक्षत । सोमाः । शुक्रासः । इंदवः । अभि । विश्वानि । काव्या ॥२५॥

शुक्रास उज्ज्वला इंदवो दीप्ताः पवमानाः क्षरंतः सोमा विश्वानि काव्या काव्यानि स्तोत्राण्यभ्यसृक्षत । सृज्यंत ऋत्विग्भिः ॥

॥ इति सप्तमस्य प्रथमे चतुस्त्रिंशो वर्गः ॥

॥ अथ षड्विंशी ॥

पवमानास आशवः शुभ्रा असृग्रमिंदवः । घ्नंतो विश्वा अप द्विषः ॥२६॥

पवमानासः । आशवः । शुभ्राः । असृग्रं । इंदवः । घ्नंतः । विश्वाः । अप । द्विषः ॥२६॥

आशवः शीघ्राः शुभ्राः शोभमानाः पवमानासः क्षरंत इंदवो दीप्ताः सोमा विश्वाः सर्वान्द्विषो द्वेष्टृञ्छत्रूनप घ्नंतो मारयंतोऽसृग्रम् । सृज्यंते ॥

॥ अथ सप्तविंशी ॥

पवमाना दिवस्पर्यंतरिक्षादसृक्षत । पृथिव्या अधि सानवि ॥२७॥

पवमानाः । दिवः । परि । अंतरिक्षात् । असृक्षत । पृथिव्याः । अधि । सानवि ॥२७॥

पवमाना सोमा दिवो द्युलोकादंतरिक्षाच्च पृथिव्या भूम्या अधि सानवि समुच्छ्रिते देशे देवयजने पर्यसृक्षत । सृज्यंते ॥

॥ अथाष्टाविंशी ॥

पुनानः सोम धारयेंदो विश्वा अप स्रिधः । जहि रक्षांसि सुक्रतो ॥२८॥

पुनानः । सोम । धारया । इंदो इति । विश्वाः । अप । स्रिधः । जहि । रक्षांसि । सुक्रतो इति सुऽक्रतो ॥२८॥

हे इंदो दीप्त सुक्रतो सुकर्मन् सोम धारया पुनानः पूयमानस्त्वं विश्वाः सर्वान् स्रिधो द्वेष्टॄञ्छत्रून्रक्षांसि राक्षसांश्चाप जहि । मारय ॥

॥ अथैकोनत्रिंशी ॥

अपघ्नन्त्सोम रक्षसोऽभ्यर्ष कनिक्रदत् । द्युमंतं शुष्ममुत्तमं ॥२९॥

अपऽघ्नन् । सोम । रक्षसः । अभि । अर्ष । कनिक्रदत् । द्युऽमंतं । शुष्मं । उत्ऽतमं ॥२९॥

हे सोम त्वं रक्षसो रक्षांस्यपघ्नन् विनाशयन् कनिक्रदच्छब्दं कुर्वन् द्युमंतं दीप्तिमंतमुत्तमं श्रेष्ठं शुष्मं बलमभ्यर्ष । अस्मान्प्रति पवस्व ॥

॥ अथ त्रिंशी ॥

अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा । इंदो विश्वानि वार्या ॥३०॥

अस्मे इति । वसूनि । धारय । सोम । दिव्यानि । पार्थिवा । इंदो इति । विश्वानि । वार्या ॥३०॥

हे इंदो दीप्त सोम दिव्यानि दिवि भवानि पार्थिवा पार्थिवानि पृथिव्यां जातानि च विश्वानि सर्वाणि वार्या वार्याणि वरणीयानि वसून्यस्मे अस्मासु धारय । प्रक्षिप ॥

॥ इति सप्तमस्य प्रथमे पंचत्रिंशो वर्गः ॥

वृषा सोमेति त्रिंशदृचं चतुर्थं सूक्तं मारीचस्य कश्यपस्यार्षं गायत्रं पवमानसौम्यं । तथा चानुक्रांतं । वृषा सोम कश्यप इति । उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥१॥

वृषा । सोम । द्युऽमान् । असि । वृषा । देव । वृषऽव्रतः । वृषा । धर्माणि । दधिषे ॥१॥

हे सोम वृषा वर्षकस्त्वं द्युमान् दीप्तिमानसि । अपि च हे देव द्योतमान

सोम वृषा त्वं वृषव्रतो वर्षणशीलकर्मासि । किंच हे सोम वृषा त्वं धर्माणि देवानां मनुष्याणां च हितानि कर्माणि दधिषे । धारयसि ॥

॥ अथ द्वितीया ॥

वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः । सत्यं वृषन्वृषेदसि ॥२॥

वृष्णः । ते । वृष्ण्यं । शवः । वृषा । वनं । वृषा । मदः । सत्यं । वृषन् । वृषा । इत् । असि ॥२॥

हे वृषन् कामानां वर्षक सोम वृष्णो वर्षितुस्ते तव शवो बलं वृष्ण्यं वर्षणशीलं भवति । वनं तव भजनमपि वृषा वर्षणशीलं । मदस्तव रसोऽपि वृषा वर्षणशीलः । सत्यं सत्यमेव त्वं वृषेत् । वर्षणशील एवासि । भवसि ॥

॥ अथ तृतीया ॥

अश्वो न चक्रदो वृषा सं गा इंदो समर्वतः । वि नो राये दुरो वृधि ॥३॥

अश्वः । न । चक्रदः । वृषा । सं । गाः । इंदो इति । सं । अर्वतः । वि । नः । राये । दुरः । वृधि ॥३॥

हे इंदो सोम वृषा त्वमश्वो नाश्व इव सं चक्रदः । संक्रंदसे । अपि च गाः पशूनर्वतोऽश्वांश्चास्मभ्यं सं । प्रयच्छसीति शेषः । किंच नोऽस्माकं राये धनाय दुरो द्वाराणि वि वृधि । विवृतानि कुरु ॥

॥ अथ चतुर्थी ॥

असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासो वीरयाशवः ॥४॥

असृक्षत । प्र । वाजिनः । गव्या । सोमासः । अश्वऽया । शुक्रासः । वीरऽया । आशवः ॥४॥

वाजिनो बलवंतः शुक्रासः शुक्रा उज्ज्वला आशवो वेगवंतश्च सोमासः सोमा गव्या गवेच्छयाश्वयाश्वेच्छया च वीरया पुत्रेच्छया च प्रासृक्षत । ऋत्विग्भिः सृज्यंते ॥

॥ अथ पंचमी ॥

शुंभमाना ऋतायुभिर्मृज्यमाना गभस्त्योः । पवंते वारे अव्यये ॥५॥

शुंभमानाः । ऋतयुऽभिः । मृज्यमानाः । गभस्त्योः । पवंते । वारे । अव्यये ॥५॥

ऋतायुभिर्यज्ञकामैः शुंभमाना अलंक्रियमाणा गभस्त्योर्गभस्तिभ्यां बाहुभ्यां ।

गभस्ती बाहू इति बाहुनामसु पाठात् । मृज्यमानाः शोध्यमानाः सोमा अव्ययेऽविमये वारे वाले पवित्रे पवंते । क्षरंति ॥

॥ इति सप्तमस्य प्रथमे षट्त्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

ते विश्वा॑ दा॒शुषे॒ वसु॒ सोमा॑ दि॒व्यानि॒ पार्थि॑वा । पवं॑ता॒मांतरि॑क्ष्या ॥ ६ ॥

ते । विश्वा॑ । दा॒शुषे॑ । वसु॑ । सोमा॑ः । दि॒व्यानि॑ । पार्थि॑वा । पवं॑तां । आ । अं॒तरि॑क्ष्या ॥ ६ ॥

ते सोमा दिव्यानि दिवि भवानि पार्थिवा पार्थिवानि पृथिव्यां संभूतानि चांतरिक्ष्यांतरिक्षाण्यंतरिक्षे जातानि च विश्वा विश्वानि वसु वसूनि धनानि दाशुषे हविषां प्रदात्रे यजमानाय पवंतां । क्षरंतु ॥

॥ अथ सप्तमी ॥

पव॑मानस्य विश्ववित्प्र ते॒ सर्गा॑ असृक्षत । सूर्य॑स्येव॒ न र॒श्मयः॑ ॥ ७ ॥

पव॑मानस्य । वि॒श्व॒ऽवि॒त् । प्र । ते॒ । सर्गा॑ः । अ॒सृ॒क्ष॒त॒ । सूर्य॑स्यऽइव । न । र॒श्मयः॑ ॥ ७ ॥

हे विश्वविद्विश्वस्य द्रष्टः सोम पवमानस्य क्षरतस्ते तव सर्गाः प्रसृज्यमाना धाराः सूर्यस्येव रश्मयः सूर्यस्य किरणा इव प्रकाशमानाः । नेति संप्रत्यर्थे । इदानीं प्रासृक्षत । प्रासृज्यंत ॥

॥ अथाष्टमी ॥

के॒तुं कृ॒ण्वन्दि॒वस्परि॒ विश्वा॑ रू॒पाभ्य॑र्षसि । स॒मु॒द्रः सो॑म पिन्वसे ॥ ८ ॥

के॒तुं । कृ॒ण्वन् । दि॒वः । परि॑ । विश्वा॑ । रू॒पा । अ॒भि । अ॒र्ष॒सि॒ । स॒मु॒द्रः । सो॒म॒ । पि॒न्व॒से॒ ॥ ८ ॥

हे सोम समुद्रः । समुद्रवंति यस्माद्रसाः स समुद्रः । स त्वं केतुं प्रज्ञानं कृण्वन् कुर्वन् अस्माकं विश्वा विश्वानि रूपाणि दिवोऽतरिक्षादभ्यर्षसि । अभिपवसे । पिन्वसे । नानाविधानि धनानि चास्मभ्यं प्रयच्छसि ॥

॥ अथ नवमी ॥

हि॒न्वा॒नो वाच॑मिष्यसि॒ पव॑मान॒ विध॑र्मणि । अक्रा॒न्दे॒वो न सूर्यः॑ ॥ ९ ॥

हि॒न्वा॒नः । वाच॑ं । इ॒ष्य॒सि॒ । पव॑मान । वि॒ऽध॑र्मणि । अक्रा॑न् । दे॒वः । न । सूर्यः॑ ॥ ९ ॥

हे पवमान सोम हिन्वानः प्रेर्यमाणस्त्वं वाचं शब्दमिष्यसि । प्रेरयसि ।

कदेत्यत्राह । यदा तव रसः सूर्यो देवो न देव इव विधर्मणि विधारके पवित्रेऽक्रानक्रमीत्तदेत्यर्थः ॥

॥ अथ दशमी ॥

इंदुः पविष्ट चेतनः प्रियः कवीनां मती । सृजदश्वं रथीरिव ॥१०॥

इंदुः । पविष्ट । चेतनः । प्रियः । कवीनां । मती । सृजत् । अश्वं । रथीःऽइव ॥१०॥

चेतनः प्रज्ञापकः प्रियो देवानां प्रीतिकर इंदुः सोमः कवीनां क्रांतकर्मणां स्तोतॄणां मती मत्या स्तुत्या पविष्ट । पवते । अश्वं हयं रथीरिव रथीवोर्मिं सृजत् । सृजति च ॥

॥ इति सप्तमस्य प्रथमे सप्तत्रिंशो वर्गः ॥

॥ अथैकादशी ॥

ऊर्मिर्यस्ते पवित्र आ देवावीः पर्यक्षरत् । सीदन्नृतस्य योनिमा ॥११॥

ऊर्मिः । यः । ते । पवित्रे । आ । देवऽअवीः । परिऽअक्षरत् । सीदन् । ऋतस्य । योनिं । आ ॥११॥

हे सोम ते तव यो देवावीर्देव ऊर्मिस्तरंग ऋतस्य यज्ञस्य योनिं स्थानमा सीदन् पवित्रे पर्यक्षरत् परिक्षरति तमूर्मिं सृजतीति पूर्वत्र संबंधः ॥

॥ अथ द्वादशी ॥

स नो अर्ष पवित्र आ मदो यो देववीतमः । इंदविंद्राय पीतये ॥१२॥

सः । नः । अर्ष । पवित्रे । आ । मदः । यः । देवऽवीतमः । इंदो इति । इंद्राय । पीतये ॥१२॥

हे इंदो यस्त्वं देववीतमोऽतिशयेन देवकामो मदो मदकरश्च भवसि स त्वं नोऽस्माकं पवित्र इंद्रायेंद्रस्य पीतये पानायार्ष । पवस्व ॥

॥ अथ त्रयोदशी ॥

इषे पवस्व धारया मृज्यमानो मनीषिभिः । इंदो रुचाभि गा इहि ॥१३॥

इषे । पवस्व । धारया । मृज्यमानः । मनीषिऽभिः । इंदो इति । रुचा । अभि । गाः । इहि ॥१३॥

हे इंदो सोम मनीषिभिर्ऋत्विग्भिर्मृज्यमानः शोध्यमानस्त्वमिषेऽस्माकमन्नाय धारया पवस्व । क्षर । रुचा रोचमानेनांधसा गाः पशूनभीहि । अभिगच्छ ॥

॥ अथ चतुर्दशी ॥

पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः । हरे सृजान आशिरं ॥१४॥

पुनानः । वरिवः । कृधि । ऊर्जं । जनाय । गिर्वणः । हरे । सृजानः । आऽशिरं ॥१४॥

हे गिर्वणो गीर्भिर्वननीय हरे हरितवर्ण सोम आशिरं क्षीरं प्रति सृजानो विसृज्यमानः पुनानः पूयमानस्त्वं जनाय यजमानार्थं वरिवो धनमूर्जमन्नं च कृधि । कुरु ॥

॥ अथ पंचदशी ॥

पुनानो देववीतय इंद्रस्य याहि निष्कृतं । द्युतानो वाजिभिर्यतः ॥१५॥

पुनानः । देवऽवीतये । इंद्रस्य । याहि । निःऽकृतं । द्युतानः । वाजिऽभिः । यतः ॥१५॥

हे सोम द्युतानो दीप्यमानो वाजिभिर्बलिभिर्यजमानैर्यतः संगृहीतो देववीतये यज्ञार्थं पुनानः पूयमानस्त्वमिंद्रस्य निष्कृतं स्थानं याहि । गच्छ ॥

॥ इति सप्तमस्य प्रथमेऽष्टचिंशो वर्गः ॥

॥ अथ षोडशी ॥

प्र हिन्वानास इंदवोऽच्छा समुद्रमाशवः । धिया जूता असृक्षत ॥१६॥

प्र । हिन्वानासः । इंदवः । अच्छ । समुद्रं । आशवः । धिया । जूताः । असृक्षत ॥१६॥

आशवो वेगवंत इंदवः सोमाः समुद्रमंतरिक्षमच्छ प्रति हिन्वानासो हिन्वानाः प्रेर्यमाणा धियांगुल्या जूताः कृष्टाश्च प्रासृक्षत । सृज्यंते ॥

॥ अथ सप्तदशी ॥

मर्मृजानास आयवो वृथा समुद्रमिंदवः । अग्मन्नृतस्य योनिमा ॥१७॥

मर्मृजानासः । आयवः । वृथा । समुद्रं । इंदवः । अग्मन् । ऋतस्य । योनिं । आ ॥१७॥

मर्मृजानासो मर्मृज्यमाना आयवो गंतार इंदवः सोमा वृथायासं विनैव समुद्रमंतरिक्षं गच्छंति । एतदेव दर्शयति । ऋतस्योदकस्य योनिं स्थानमग्मन् । गच्छंतीति ॥

॥ अथाष्टादशी ॥

परि णो याह्यस्मयुर्विश्वा वसून्योजसा । पाहि नः शर्म वीरवत् ॥१८॥

परि । नः । याहि । अस्मऽयुः । विश्वा । वसूनि । ओजसा । पाहि । नः । शर्म । वीरऽवत् ॥१८॥

हे सोमास्मयुरस्मत्कामस्त्वं नोऽस्माकं विश्वा विश्वानि वसूनि धनान्योजसा बलेन सह परि याहि । रक्षार्थं परिगच्छ । अपि च नोऽस्माकं वीरवत्पुत्रवच्छर्म गृहं पाहि । रक्ष ॥

॥ अथैकोनविंशी ॥

मिमाति वह्निरेतशः पदं युजान ऋक्वभिः । प्र यत्समुद्र आहितः ॥१९॥

मिमाति । वह्निः । एतशः । पदं । युजानः । ऋक्वऽभिः । प्र । यत् । समुद्रे । आऽहितः ॥१९॥

हे सोम यद्यदा यो वह्निर्वहनशील एतशोऽश्वो मिमाति शब्दं करोति ऋक्वभिर्ऋत्विग्भिः स्तोतृभिः पदं यज्ञे युजानो निदधत् स्तोत्रश्रवणार्थमागच्छति तदा स यज्ञवाहकाश्वात्मा त्वं समुद्र उदके वसतीवरीषु प्राहितो भवसि ॥

॥ अथ विंशी ॥

आ यद्योनिं हिरण्ययमाशुर्ऋतस्य सीदति । जहात्यप्रचेतसः ॥२०॥

आ । यत् । योनिं । हिरण्ययं । आशुः । ऋतस्य । सीदति । जहाति । अप्रऽचेतसः ॥२०॥

यद्यदाशुर्वेगवान्सोम ऋतस्य यज्ञस्य हिरण्ययं हिरण्मयं योनिं स्थानं हिरण्यपाणिरभिषुणोतीत्युक्तमासीदति तदानीमप्रचेतसो जहाति । विसृजति । अस्तोतॄणां यज्ञं नाभिगच्छति किंतु स्तोतॄणामेव यज्ञमभिगच्छतीत्यर्थः ॥

॥ इति सप्तमस्य प्रथम एकोनचत्वारिंशो वर्गः ॥

॥ अथैकविंशी ॥

अभि वेना अनूषतेयक्षंति प्रचेतसः । मज्जंत्यविचेतसः ॥२१॥

अभि । वेनाः । अनूषत । इयक्षंति । प्रऽचेतसः । मज्जंति । अविऽचेतसः ॥२१॥

वेनाः कांताः स्तोतारोऽभ्यनूषत । सोममभिष्टुवंति । प्रचेतसः सुमतय इयक्षंति । यष्टुमिच्छंति च । अविचेतसः । विशिष्टमतयो विचेतसः । अविचेतसो विपरीतमतय इत्यर्थः । मज्जंति । निमज्जंति । ये सोमं नाभिष्टुवंति न यजंति च ते नरके पतंतीत्यर्थः ॥

॥ अथ द्वाविंशी ॥

इंद्रायेंदो मरुत्वते पवस्व मधुमत्तमः । ऋतस्य योनिमासदं ॥२२॥

इंद्राय । इंदो इति । मरुत्वते । पवस्व । मधुमत्ऽतमः । ऋतस्य । योनिं । आऽसदं ॥२२॥

हे इंदो सोम मधुमत्तमोऽतिशयेन मधुमान् त्वमृतस्य यज्ञस्य योनिं स्थानमासदमुपवेष्टुं मरुत्वत इंद्रायेंद्रार्थं पवस्व । क्षर ॥

॥ अथ त्रयोविंशी ॥

तं त्वा विप्रा वचोविदः परिष्कृण्वंति वेधसः । सं त्वा मृजंत्यायवः ॥२३॥

तं । त्वा । विप्राः । वचःऽविदः । परि । कृण्वंति । वेधसः । सं । त्वा । मृजंति । आयवः ॥२३॥

हे सोम तं पवमानं त्वा त्वां विप्राः प्राज्ञा वेधसः कर्मणां कर्तारो वचोविदः स्तोतारः परिष्कृण्वंति । अलंकुर्वंति । अपि च त्वा त्वामायवो मनुष्याः सं मृजंति । सम्यक् शोधयंति ॥

॥ अथ चतुर्विंशी ॥

रसं ते मित्रो अर्यमा पिबंति वरुणः कवे । पवमानस्य मरुतः ॥२४॥

रसं । ते । मित्रः । अर्यमा । पिबंति । वरुणः । कवे । पवमानस्य । मरुतः ॥२४॥

हे कवे क्रांतकर्मन् सोम पवमानस्य क्षरतस्ते तव रसं मित्रोऽर्यमा च वरुणश्च मरुतश्चैते सर्वे देवाः पिबंति ॥

॥ अथ पंचविंशी ॥

त्वं सोम विपश्चितं पुनानो वाचमिष्यसि । इंदो सहस्रभर्णसं ॥२५॥

त्वं । सोम । विपःऽचितं । पुनानः । वाचं । इष्यसि । इंदो इति । सहस्रऽभर्णसं ॥२५॥

हे इंदो दीप्त सोम पुनानः पूयमानस्त्वं विपश्चितं प्रज्ञया पवित्रां सहस्रभर्णसं बहुभरणां वाचमिष्यसि । प्रेरयसि ॥

॥ इति सप्तमस्य प्रथमे चत्वारिंशो वर्गः ॥

॥ अथ षड्विंशी ॥

उतो सहस्रभर्णसं वाचं सोम मखस्युवं । पुनान इंदवा भर ॥२६॥

उतो इति । सहस्रऽभर्णसं । वाचं । सोम । मखस्युवं । पुनानः । इंदो इति । आ । भर ॥२६॥

उतो अपि च हे इंदो दीप्त सोम पुनानः पूयमानस्त्वं सहस्रभर्णसं सहस्रभरणां मखस्युवं धनकामां वाचमस्मभ्यमाहर। आभर॥

॥ अथ सप्तविंशी ॥

पुनान इंद्वेषां पुरुहूत जनानां। प्रियः समुद्रमा विश ॥२७॥

पुनानः। इंदो इति। एषां। पुरुऽहूत। जनानां। प्रियः। समुद्रं। आ। विश ॥२७॥

हे पुरुहूत बहुभिराहुतेंदो सोम पुनानः पूयमानस्त्वमेषामस्मिन्यागे स्तोत्रं कुर्वतां जनानां प्रियः सन् समुद्रं द्रोणकलशमाविश। प्रविश॥

॥ अथाष्टाविंशी ॥

दविद्युतत्या रुचा परिष्टोभंत्या कृपा। सोमाः शुक्रा गवाशिरः ॥२८॥

दविद्युतत्या। रुचा। परिऽस्तोभंत्या। कृपा। सोमाः। शुक्राः। गोऽआशिरः ॥२८॥

शुक्रा उज्ज्वला दविद्युतत्या द्योतमानया रुचा दीप्त्या परिष्टोभंत्या परितः शब्दायमानया कृपा धारया च युक्ताः सोमा गवाशिरो भवंति। गव्येन पयसा मिश्रिता भवंतीत्यर्थः॥

॥ अथैकोनत्रिंशी ॥

हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत्। सीदंतो वनुषो यथा ॥२९॥

हिन्वानः। हेतृऽभिः। यतः। आ। वाजं। वाजी। अक्रमीत्। सीदंतः। वनुषः। यथा ॥२९॥

वाजी बलवान् सोमो हेतृभिः प्रेरकैः स्तोतृभिर्हिन्वानः स्तोत्रैः प्रेर्यमाणो यतः संयतः सन् वाजं यागाख्यं युद्धमाक्रमीत्। आक्रामति। तत्र दृष्टांतः। यथा वनुषो हंतारो भटाः सीदंतो युद्धं प्रविशंत आक्रामंति तद्वदित्यर्थः॥

॥ अथ त्रिंशी ॥

ऋधक्सोम स्वस्तये संजग्मानो दिवः कविः। पवस्व सूर्यो दृशे ॥३०॥

ऋधक्। सोम। स्वस्तये। संऽजग्मानः। दिवः। कविः। पवस्व। सूर्यः। दृशे ॥३०॥

हे सोम कविः क्रांतः सूर्यः सुवीर्यस्त्वमृधक् ऋध्नुवन्। तथा च यास्कः।

ऋधगिति पृथग्भावस्यानुप्रवचनं भवत्यथाप्यृध्नोत्यर्थे दृश्यते । नि० ४.२५.। इति । संजग्मानः संगच्छमानः स्वस्तये दृशे दर्शनाय च दिवः पवस्व । क्षर ॥

॥ इति सप्तमस्य प्रथम एकचत्वारिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके प्रथमोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

हिन्वंतीति त्रिंशदृचं पंचमं सूक्तं । वरुणपुत्रस्य भृगोरार्षं भार्गवस्य जमदग्नेर्वा गायत्रं पवमानसोमदेवताकं । तथा चानुक्रम्यते । हिन्वंति भृगुर्वारुणिर्जमदग्निर्वेति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

हिन्वंति सूरमुस्रयः स्वसारो जामयस्पतिं । महामिंदुं महीयुवः ॥१॥

हिन्वंति । सूरं । उस्रयः । स्वसारः । जामयः । पतिं । महां । इंदुं । महीयुवः ॥१॥

अत्र सर्वत्र पवमानः सोमः स्तूयते । तत्रादावृषिः सोमं प्रत्याह । मदीया अंगुलयस्त्वामभिषोतुं प्रेरयंतीति । तदुच्यते । स्वसारः । अंगुलिनामैतत् । सुष्ठु कर्मसु प्रेर्यंत ऋत्विग्भिरिति स्वसारः । जामयः । एकस्मात्पाणेरुत्पन्नत्वात्परस्परं बंधुभूताः । उस्रयः कर्मार्थे निवसंत्यः । सर्वत्र गंत्र्य इत्यर्थः । तादृश्योऽंगुलयो महीयुवस्त्वदभिषवं कामयमानाः सत्यः सूरं सुवीर्यं । सोमे पीते वीर्यं भवतीति शोभनवीर्यकारणं वा सर्वेषां कर्मणि प्रेरकं वा तादृशं पतिं सर्वस्य स्थावरजंगमजातस्य स्वामिनं । यस्माद्देवार्थमिज्यतेऽत एव महां देवेभ्यो दीयमानत्वेन महांतं महनीयं वेंदुं ग्रहेषु स्यंदमानं सोमं हिन्वंति । प्रेरयंति । हि वर्धनगत्योः स्वादिः ॥

॥ अथ द्वितीया ॥

पर्वमान रुचारुचा देवो देवेभ्यस्परि । विश्वा वसून्या विश ॥२॥

पर्वमान । रुचाऽरुचा । देवः । देवेभ्यः । परि । विश्वा । वसूनि । आ । विश ॥२॥

हे पवमान दशापवित्रेण पूयमान । यद्वा पुनान शुद्ध सोम रुचारुचा । रुच दीप्तौ । सर्वेण तेजसा देवो दीप्यमानस्त्वं देवेभ्यः परि देवेभ्यः सकाशाद्विश्वा व्याप्तानि सर्वाणि बहूनि वसूनि धनान्यस्माकमा विश । प्रापय । यद्वा देवेभ्यस्तदर्थं सर्वाणि वसूनि निवासस्थानानि ग्रहादीन्या विश । समंतात्प्रविश ॥

॥ अथ तृतीया ॥

आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः । इषे पवस्व संयतं ॥३॥

आ । पवमान । सुऽस्तुतिं । वृष्टिं । देवेभ्यः । दुवः । इषे । पवस्व । संऽयतं ॥३॥

हे पवमान पूयमान पुनान वा सोम सुष्टुतिं शोभनस्तुतियुक्तां वृष्टिं देवेभ्यो देवानां दुवः । सुपां सुलुगिति चतुर्थ्या लुक् । दुवसे परिचरणाया पवस्व । आगमय । त्वं यथा मदीयया स्तुत्या वृष्टिर्भविष्यति तथा कुर्वित्यर्थः । किंचास्माकमिषेऽन्नार्थं च संयतं सम्यगस्मान् संगच्छंती वृष्टिं कुरु । यद्वा दुवः परिचर्यामभिलक्ष्य क्रियमाणां सुष्टुतिं शोभनस्तुतिरूपां वृष्टिं । बहुस्तुतिमित्यर्थः । एतां देवेभ्यः प्रापय ॥

॥ अथ चतुर्थी ॥

वृषा ह्यसि भानुना द्युमंतं त्वा हवामहे । पवमान स्वाध्यः ॥४॥

वृषा । हि । असि । भानुना । द्युऽमंतं । त्वा । हवामहे । पवमान । सुऽआध्यः ॥४॥

हे पवमान पूयमान सोम स्वाध्यः सुकर्माणो वयं भानुना रश्मिना द्युमंतं द्युतिमंतं त्वा त्वां हवामहे । आह्वयामः । हि यस्मात्त्वं वृषा कामानां वर्षयितासि ॥

॥ अथ पंचमी ॥

आ पवस्व सुवीर्यं मंदमानः स्वायुध । इहो ष्विंदवा गहि ॥५॥

आ । पवस्व । सुऽवीर्यं । मंदमानः । सुऽआयुध । इहो इति । सु । इंदो इति । आ । गहि ॥५॥

हे स्वायुध । यज्ञे स्फ्यकपालादीनि दशायुधानीत्यभिधीयंते । शोभनानि तानि यस्य स तथोक्तः । यद्वा धनुरादीन्यायुधानि यस्य सः । तादृश हे सोम त्वं

मंदमानो मोदमानः सन् । यद्वा तर्पणीतिरयर्थः । देवान् स्वयं मादयन् सुवीर्यं शोभनवीर्योपेतं पुत्रादिकमस्माकमा पवस्व । पवतिर्गत्यर्थः । आ प्रापय । किंच हे इंदो ग्रहेषु चमसेषु च सरणशील सोम । इहो । इह उ पदद्वयं । उ इत्यवधारणे । इहैवास्मदीये यज्ञ एव सुष्ठागहि । आगच्छ ॥

॥ इति सप्तमस्य द्वितीये प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः । द्रुणा सधस्थमश्नुषे ॥ ६ ॥

यत् । अत्ऽभिः । परिऽसिच्यसे । मृज्यमानः । गभस्त्योः । द्रुणा । सधऽस्थं । अश्नुषे ॥ ६ ॥

हे सोम गभस्त्योः । बहुनामैतत् । बभसति दीपयंति निर्मथ्यंत्याभ्यामग्निमिति गभस्ती बाहू । तयोर्मृज्यमानस्ताभ्यां शोध्यमानः सन् अद्भिः । सोमसेचनार्थं चतुर्विधा आपः । ताभिर्वसतीवरीभिरेकधनाभिश्च यद्यदा परिषिच्यसे परितः सिच्यमानो भवसि तदानीं द्रुणा द्रुममयेन पारिप्लवेन पात्रेण गृह्यमाणः सन् सधस्थं । सह तिष्ठंत्यत्रेति सधस्थं स्थानं ग्रहचमसादिकमश्नुषे । प्राप्नोषि ॥

॥ अथ सप्तमी ॥

प्र सोमाय व्यश्ववत्पवमानाय गायत । महे सहस्रचक्षसे ॥ ७ ॥

प्र । सोमाय । व्यश्वऽवत् । पवमानाय । गायत । महे । सहस्रऽचक्षसे ॥ ७ ॥

हे स्तोतारः पवमानाय दशापवित्रेण पूयमानाय पुनानाय वा सोमाय प्र गायत । प्रकर्षेण सामगानं कुरुत । अभिष्टुत वा । कथमिव । व्यश्ववत् । यथा पूर्वं व्यश्वो नाम ऋषिः सोममगासीत् तद्वद्यूयमपि । कीदृशाय । महे महते देवेभ्यः स्वीक्रियमाणत्वेन गुणादिभिर्वा महत्त्वयुक्ताय सहस्रचक्षसे । प्रयोगबाहुल्यापेक्षमेतद्वचनं । सहस्रसंख्याकस्तोत्रयुक्ताय । यद्वा नानाविधैर्देवैरनेकधा द्रष्टव्याय सोमायेति ॥

॥ अथाष्टमी ॥

यस्य वर्णं मधुश्चुतं हरिं हिन्वंत्यद्रिभिः । इंदुमिंद्राय पीतये ॥ ८ ॥

यस्य । वर्णं । मधुऽश्चुतं । हरिं । हिन्वंति । अद्रिऽभिः । इंदुं । इंद्राय । पीतये ॥ ८ ॥

हे अध्वर्य्वादयः वर्णं शत्रूणां वारकं । येनासौ पीयते तेन मत्तेन शत्रवः

संप्रहार्यंत इति शत्रुनिवारणसमर्थं मधुश्चुतं मधुररसस्य च्यावयितारं हरिं हरितवर्णमिंदुं। इंधेरेतद्रूपमपेक्ष्यते। सर्वतो दीप्यमानं। उंद क्लेदन इत्यस्माद्वा। अभिषवानंतरं पात्रेषु क्षरणशीलं। यस्य सोमस्य तव कारणमंशुमद्रिभिर्हिन्वंति प्रेरयंति। अभिषुण्वंतीत्यर्थः। इंद्राय पीतये। इंद्रस्य पानाय। तदर्थमित्यर्थः ॥

॥ अथ नवमी ॥

तस्यं ते वाजिनों वयं विश्वा धनानि जिग्युषः। सखित्वमा वृणीमहे ॥९॥

तस्यं। ते। वाजिनः। वयं। विश्वा। धनानि। जिग्युषः। सखिऽत्वं। आ। वृणीमहे ॥९॥

हे सोम वाजिनः संभृतहविष्का वयं विश्वा विश्वानि सर्वाणि व्याप्तानि वा शत्रुधनानि जिग्युषो जितवतस्तस्य पूर्वोक्तलक्षणस्य प्रसिद्धस्य वा ते तव सखित्वं स्तुत्यस्तोतृलक्षणं सख्यमावृणीमहे। संभजामहे। अस्मभ्यं धनं देहीति संभजनं कुर्म इत्यर्थः ॥ जिग्युषः। जि जये। लिटि क्वसौ वस्वेकाजादिति नियमादिड्भावः। सँल्लिटोर्जेरित्यभ्यासादुत्तरस्य कवर्गादेशः। उसि परतो वसोः संप्रसारणं। क्वसुप्रत्ययस्वरः ॥

॥ अथ दशमी ॥

वृषां पवस्व धारंया मरुत्वंते च मत्सरः। विश्वा दधान ओजसा ॥१०॥

वृषां। पवस्व। धारंया। मरुत्वंते। च। मत्सरः। विश्वा। दधानः। ओजसा ॥१०॥

हे सोम त्वं वृषा स्तोतॄणामभिमतफलस्य वर्षकः सन् धारया त्वदीयया पवस्व। द्रोणकलशमागच्छ। पवतिर्गतिकर्मा। आगतस्त्वं यदास्माभिरिंद्राय दीयसे तदा मरुत्वते सहाया मरुतो यस्य संति तस्मा इंद्राय मत्सरो मदकरश्च भव। कीदृशः। विश्वा विश्वानि सर्वाणि व्याप्तानि वा धनान्योजसात्मीयेन बलेन युक्तः सन् स्तोतृभ्यस्तानि दधानः। प्रयच्छन्। त्वं मादयिता भवेति समन्वयः ॥

॥ इति सप्तमस्य द्वितीये द्वितीयो वर्गः ॥

॥ अथैकादशी ॥

तं त्वां धर्तारमोण्योः३ः पवंमान स्वर्दृशं। हिन्वे वाजेषु वाजिनं ॥११॥

तं। त्वा। धर्तारं। ओण्योः। पवंमान। स्वःऽदृशं। हिन्वे। वाजेषु। वाजिनं ॥११॥

हे पवमान पूयमान पुनान वा हे सोम ओण्योः। द्यावापृथिवीनामैतत्।

तयोर्धर्तारं धारकं। अत एव स्वर्दृशं स्वर्गस्य सूर्यस्य वा द्रष्टारं सर्वैर्देवैर्द्रष्टव्यं वा वाजिनं बलवंतं। पूर्वोक्तगुणप्रसिद्धं त्वा त्वां वाजेषु संग्रामेषु हिन्वे। प्रेरयामि। यद्वा। वाजेष्वन्नेषु विषयेषु हिनोमि। अन्नादिकं प्रयच्छेत्यर्थः॥

॥ अथ द्वादशी ॥

अया चित्तो विपानया हरिः पवस्व धारया। युजं वाजेषु चोदय॥१२॥

अया। चित्तः। विपा। अनया। हरिः। पवस्व। धारया। युजं। वाजेषु। चोदय॥१२॥

हे पवमान अया। अय पय गतौ। कर्मार्थमितस्ततो गच्छंतीभिरनया विपा। विप प्रेरणे। हवींष्यग्नौ प्रेरयंतीति विपोऽंगुलयः। एकवचनं छांदसं। प्रत्येक-विवक्षया वा। एताभिर्मदीयाभिरंगुलीभिश्चित्तो ज्ञातः। निर्गतोऽभिषुतो हरिर्ह-रितवर्णस्त्वं धारया संततया पवस्व। द्रोणकलशं ग्रहांश्चागच्छ त्वं। किंच युजं सखायमिंद्रं वाजेषु संग्रामेषु चोदय। प्रेरय। यदास्माभिरिंद्रार्थं सोमो दीयते तदा तत्पानेन हृष्टः सन् शत्रून् हंतीत्यर्थः॥

॥ अथ त्रयोदशी ॥

आ न इंदो महीमिषं पवस्व विश्वदर्शतः। अस्मभ्यं सोम गातुवित्॥१३॥

आ। नः। इंदो इति। महीं। इषं। पवस्व। विश्वऽदर्शतः। अस्मभ्यं। सोम। गातुऽवित्॥१३॥

हे इंदो क्षरणशील दीपनशील वा हे सोम विश्वदर्शतो विश्वैः सर्वैर्दर्शनीयः। यद्वा विश्वं सर्वं वस्तुजातं दृश्यते ज्ञाप्यतेऽनेनेति। स विश्वस्य प्रकाशक इत्यर्थः। तादृशस्त्वं महीमिषं महत्प्रभूतमन्नं नोऽस्मभ्यमा पवस्व। आगमय। प्रयच्छेत्यर्थः। किंच हे सोमाभिषूयमाण पवमान अस्मभ्यं गातुवित् स्वर्गमार्गस्य लंभयिता ज्ञापयिता भव॥

॥ अथ चतुर्दशी ॥

आ कलशा अनूषतेंदो धाराभिरोजसा। एंद्रस्य पीतये विश॥१४॥

आ। कलशाः। अनूषत। इंदो इति। धाराभिः। ओजसा। आ। इंद्रस्य। पीतये। विश॥१४॥

हे इंदो क्षरणशील सोम ओजसा बलेन युक्तस्य तव धाराभिर्निरंतराभिः सहिताः कलशाः। प्रयोगबाहुल्यापेक्षमेतद्बहुवचनं। द्रोणकलशा अनूषत। स्तोतृभिराभिमुख्येन स्तूयंते। सोमाभिषवकाले हि ऋत्विजः स्तुवंति खलु। ततस्त्वमिंद्रस्य पीतये पानाया विश। ग्रहांश्चमसांश्च प्रविश॥

॥ अथ पंचदशी ॥

यस्य ते मद्यं रसं तीव्रं दुहंत्यद्रिभिः । स पवस्वाभिमातिहा ॥१५॥

यस्य । ते । मद्यं । रसं । तीव्रं । दुहंति । अद्रिऽभिः । सः । पवस्व । अभिमातिऽहा ॥१५॥

हे सोम यस्य ते तव मद्यं मदकरं तीव्रं क्षिप्रं मदकारिणं रसमद्रिभिर्ग्रावभिरध्वर्य्वादयो दुहंति अभिषुण्वंति स तादृशस्त्वमभिमातिहा । अभितो मातिरभिमानं येषां ते शत्रवः । पापरूपाणां शत्रूणां हंता सन् पवस्व । सर्वतो गच्छ । येऽभिषुण्वंति ते पापरहिताः सुकृतिनो भवंतीत्यर्थः ॥

॥ इति सप्तमस्य द्वितीये तृतीयो वर्गः ॥

॥ अथ षोडशी ॥

राजा मेधाभिरीयते पवमानो मनावधि । अंतरिक्षेण यातवे ॥१६॥

राजा । मेधाभिः । ईयते । पवमानः । मनौ । अधि । अंतरिक्षेण । यातवे ॥१६॥

मनौ मनुष्ये यागं कुर्वाणे सति । यद्वा मनावधि । मनुर्मंतव्यो यज्ञः । तस्मिन्पवमानः पूयमानः पुनानो वा राजा । राजशब्देन सोमोऽभिधीयते । सोमं राजानमक्रीणन्नित्यादिषु दृष्टत्वात् । स राजा मेधाभिः स्तुतिभिः सहेयते । गच्छति । किमर्थं । अंतरिक्षेणाकाशमार्गेण द्रोणकलशं प्रति यातवे यातुं । द्रोणाभिगमनकाले हि स्तोतृभिः स्तूयते खलु ॥

॥ अथ सप्तदशी ॥

आ न इंदो शतग्विनं गवां पोषं स्वश्व्यं । वहा भगत्तिमूतये ॥१७॥

आ । नः । इंदो इति । शतऽग्विनं । गवां । पोषं । सुऽअश्व्यं । वह । भगत्तिं । ऊतये ॥१७॥

हे इंदो पात्रेषु क्षरणशील दीपनशील वा हे सोम शतग्विनं शतसहस्रसंख्याभिर्गोभिर्युक्तं गवां पोषं गवादीनां पुष्टिवर्धनं स्वश्व्यं शोभनाश्वसंगसहितं भगत्तिं भगदत्तिं भजनीयधनदानं चोतये रक्षणाय नोऽस्माकमावह । प्रापय । गवादींश्च तेषां च वृद्धिं प्रयच्छेत्यर्थः ॥

॥ अथाष्टादशी ॥

आ नः सोम सहो जुवो रूपं न वर्चसे भर । सुष्वाणो देववीतये ॥१८॥

आ । नः । सोम । सहः । जुवः । रूपं । न । वर्चसे । भर । सुस्वानः । देवऽवीतये ॥१८॥

हे सोम देववीतये देवपानाय देवानां कामाय वा सुष्वाणोऽभिषूयमाणोऽभिषुतो भव त्वं । सहः शत्रुभिभवनसमर्थं बलं जुवः । जु इति गत्यर्थः । शत्रून्प्रति शीघ्रगमनं च । यद्वा सर्वतो गमनशीलं । किंच । नेति चार्थे । वर्चसे । वर्च दीप्तौ । दीप्तै सर्वत्र प्रकाशनाय रूपं च नोऽस्मभ्यमा भर । आहर । प्रयच्छ ॥

॥ अथैकोनविंशी ॥

अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् । सीदञ्छ्येनो न योनिमा ॥१९॥

अर्ष । सोम । द्युमत्ऽतमः । अभि । द्रोणानि । रोरुवत् । सीदन् । श्येनः । न । योनिं । आ ॥१९॥

हे सोमाभिषूयमाण पवमान द्युमत्तमोऽतिशयेन दीप्तिमांस्त्वं द्रोणानि । प्रयोगबाहुल्यापेक्षमेतद्बहुवचनं । द्रोणानभिलक्षीकृत्य रोरुवत् पुनःपुनर्भृशं वा शब्दं कुर्वन् अर्ष । तानागच्छ । दशापवित्रमध्यान्निर्गतः सोमोऽविच्छिन्नधारया द्रोणकलशे पतन् शब्दं करोति खलु । तत्र दृष्टांतः । श्येनो न । यथा सीदन् सर्वतो गच्छन् श्येनः शंसनीयगतिः पक्षी योनिं स्वस्थानं कुलायं प्रति भृशं शब्दायमानः सन् आगच्छति । तद्वत् ॥

॥ अथ विंशी ॥

अप्सा इंद्राय वायवे वरुणाय मरुद्भ्यः । सोमो अर्षति विष्णवे ॥२०॥

अप्साः । इंद्राय । वायवे । वरुणाय । मरुत्ऽभ्यः । सोमः । अर्षति । विष्णवे ॥२०॥

अप्सा वसतीवरीनामधेयानामपां संभक्ता ॥ षण संभक्तौ । जनसनेति विट् । आत्वं विड्वनोरिति ॥ तादृशः सोमोऽर्षति । द्रोणकलशमागच्छति । किमर्थं । इंद्राय । सर्वदेवानां प्रथम एवेंद्रः सोमं पिबति तस्मात्पूर्वमेवाभिहितः । तस्मै वायवे तत्सहायाय च । ऐंद्रवायवे हींद्रस्यानंतरं वायुः सोमं पिबति तस्मात्तदनु वायुरुक्तः । तस्मै च वरुणाय मरुद्भ्यो मितं शब्दं कुर्वद्भ्य एतन्नामकेभ्यो देवेभ्यो विष्णवे सर्वजगद्व्यापिने विष्णवे च । एतेषां पातुं सोमः स्रवतीत्यर्थः ॥

॥ इति सप्तमस्य द्वितीये चतुर्थो वर्गः ॥

॥ अथैकविंशी ॥

इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणं ॥२१॥

इषं । तोकाय । नः । दधत् । अस्मभ्यं । सोम । विश्वतः । आ । पवस्व । सहस्रिणं ॥२१॥

हे सोम त्वं नोऽस्माकं तोकाय पुत्रायेषमन्नं दधद्विदधत्प्रयच्छन् सहस्रिणं सहस्रसंख्याकं धनं विश्वतः सर्वतो दिक्ष्वस्मभ्यं वापवस्व। आ प्रयच्छ। अस्मभ्यं पुत्राय चान्नधनादिकं प्रयच्छेत्यर्थः ॥

॥ अथ द्वाविंशी ॥

ये सोमा॑सः परा॒वति॒ ये अ॑र्वा॒वति॑ सुन्वि॒रे। ये वा॒दः श॑र्य॒णाव॑ति ॥२२॥

ये। सोमा॑सः। प॒रा॒ऽवति॑। ये। अ॒र्वा॒ऽवति॑। सु॒न्वि॒रे। ये। वा॒। अ॒दः। श॒र्य॒णाऽव॑ति॥२२॥

एतदादिभ्यामृग्भ्यामिंद्रार्थं सर्वत्र सोमाभिषवोऽस्तीत्याह। ये सोमासः सोमाः परावति विप्रकृष्टेऽतिदूरे देशे ये वार्वावत्यंतिके देश इंद्रार्थं सुन्विरेऽभिषूयंतेऽभ्यषूयंत ये वा शर्यणावति। कुरुक्षेत्रस्य जघनार्धे शर्यणावत्संज्ञकं मधुररसयुक्तं सोमवत्सरोऽस्ति। अदोऽस्मिन्सरसि सुरसा ये सोमा इंद्रायाभिषूयंते तेऽस्माकमभिमतफलं प्रयच्छंत्विति वक्ष्यमाणेन संबंधः ॥

॥ अथ त्रयोविंशी ॥

य आ॑र्जी॒के॑षु कृ॒त्व॑सु ये मध्ये॑ प॒स्त्या॑नां। ये वा॒ जने॑षु प॒ञ्चसु॑ ॥२३॥

ये। आ॒र्जी॒के॑षु। कृ॒त्व॑ऽसु। ये। मध्ये॑। प॒स्त्या॑नां। ये। वा॒। जने॑षु। प॒ञ्चऽसु॑ ॥२३॥

ये वा सोमा आर्जीकेषु। ऋजीका नाम दूरभवा आर्जीका देशाः। तेषु। तथा कृत्वसु। कृत्वान इति देशाभिधानं। तेषु कर्मवत्सु देशेषु च। किंच पस्त्यानां सरस्वत्यादीनां नदीनां मध्ये समीपे च ये सोमा अभिषूयंते। ऋषयो वै सरस्वत्यां सत्रमासतेत्यादिषु नदीतीरे यज्ञकरणस्य श्रवणात्। किंच। जनेषु पंचसु। निषादपंचमाश्चत्वारो वर्णाः पंच जनाः। तेषु च ये वा सोमा अभिषुतास्ते सोमा अस्माकमभिमतं प्रयच्छंत्वित्युत्तरेण संबंधः ॥

॥ अथ चतुर्विंशी ॥

ते नो॑ वृ॒ष्टिं दि॒वस्परि॒ पव॑न्ता॒मा सु॒वीर्यं॑। सु॒वा॒ना दे॒वास॒ इन्द॑वः ॥२४॥

ते। नः॒। वृ॒ष्टिं। दि॒वः। परि॑। पव॑न्तां। आ। सु॒ऽवीर्यं॑। सु॒वा॒नाः। दे॒वासः॑। इन्द॑वः ॥२४॥

सुवानास्तत्र तत्र चाभिषूयमाणा देवा दीपनशीलाः स्तुत्या वेंदवो ग्रहेषु चमसेषु च क्षरंतस्ते सोमा नोऽस्माकं दिवस्परि। परिशब्दः पंचमीद्योतकः। अंतरिक्षादादित्याद्वा वृष्टिं। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदि-

त्याज्जायते वृष्टिरिति वृष्टिकारणत्वात्। किंच। सुवीर्यं शोभनवीर्योपेतं पुत्रं च धनादिकं वापवंतां। प्रापयंतु। यजमानः सोमेनाभिमतफलानि प्राप्नोति खलु॥

॥ अथ पंचविंशी ॥

पवते हर्यतो हरिर्गृणानो जमदग्निना। हिन्वानो गोरधि त्वचि ॥२५॥

पवते। हर्यतः। हरिः। गृणानः। जमत्ऽअग्निना। हिन्वानः। गोः। अधि। त्वचि॥२५॥

हर्यतो देवान् कामयमानो हरिर्हरितवर्णः किंच गोस्त्वच्यध्यानडुहे चर्मणि हिन्वानः प्रेर्यमाणः स सोमो जमदग्निना मंत्रद्रष्ट्रा ऋषिणा गृणानः स्तूयमानः सन् पवते। दशापवित्रेण पूतो भवति। यद्वा। पात्राण्यभिगच्छति॥

॥ इति सप्तमस्य द्वितीये पंचमो वर्गः॥

॥ अथ षड्विंशी ॥

प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः। श्रीणाना अप्सु मृंजत ॥२६॥

प्र। शुक्रासः। वयःऽजुवः। हिन्वानासः। न। सप्तयः। श्रीणानाः। अप्ऽसु। मृंजत॥२६॥

शुक्रासः शुक्रा दीप्यमाना वयोजुवोऽन्नं प्रेरयंतः। यद्यदपेक्ष्य देवेभ्यः सोमं प्रयच्छंति तत्तदपेक्षितं सोमो ददाति। ते सोमाः श्रीणाना दधिक्षीरादिभिः श्रीयमाणाः संतोऽप्सु वसतीवरीष्वेकधनासु च मृंजत। ऋत्विग्भिः प्रमृज्यंते। शोध्यंते। तत्र दृष्टांतः। हिन्वानासो न सप्तयः। अश्वनामैतत्। यथाश्वा हिन्वानासो हिन्वानाः सादिभिः प्रेर्यमाणाः संतोऽप्सु तैरेव प्रशोधिता भवंति तद्वत्॥

॥ अथ सप्तविंशी ॥

तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये। स पवस्वानया रुचा ॥२७॥

तं। त्वा। सुतेषु। आऽभुवः। हिन्विरे। देवऽतातये। सः। पवस्व। अनया। रुचा॥२७॥

अथ प्रत्यक्षकृतः। हे सोम आभुवः कर्मकरणार्थं समंताद्भवंतीत्याभुव ऋत्विजः। ते सुतेषु। सुतोऽभिषुतः सोमः। तद्वत्सु यज्ञेषु देवतातये॥ सर्वदेवात्तातिलिति स्वार्थिकस्तातिल्॥ इंद्रादिदेवेभ्यस्तं तादृशं प्रसिद्धं त्वा त्वां हिन्विरे। ग्रावभिः प्रेरयंति। अभिषुण्वंतीत्यर्थः। ततः सोऽभिषुतः स त्वमनया रुचा दीप्यमानया धारया द्रोणकलशं प्रति पवस्व। आगच्छ। पवतिर्गतिकर्मा। यद्वा। अनया मदीयया रुचा स्तुत्या सह कलशमागच्छ। कलशाभिगमनकाले हि सोमं स्तुवंति॥

॥ अथाष्टाविंशी ॥

आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे । पांतमा पुरुस्पृहं ॥२८॥

आ । ते । दक्षं । मयःऽभुवं । वह्निं । अद्य । वृणीमहे । पांतं । आ । पुरुऽस्पृहं ॥२८॥

हे सोम यष्टारो वयं ते तव स्वभूतं दक्षं बलमद्यास्मिन्यागदिन आभिमुख्येनावृणीमहे । संभजामहे । कीदृशं । मयोभुवं सुखस्य भावकं वह्निं धनादीनां प्रापकं पांतं शत्रुभ्यो रक्षकं पुरुस्पृहं बहुभिः स्पृहणीयं काम्यमानं बलमिति ॥

॥ अथैकोनत्रिंशी ॥

आ मंद्रमा वरेण्यमा विप्रमा मनीषिणं । पांतमा पुरुस्पृहं ॥२९॥

आ । मंद्रं । आ । वरेण्यं । आ । विप्रं । आ । मनीषिणं । पांतं । आ । पुरुऽस्पृहं ॥२९॥

हे सोम मंद्रं मदकरं स्तुत्यं वा त्वामा वृणीमहे । वरेण्यं सर्वैर्वरणीयं संभजनीयं च । किंच विप्रं मेधाविनं त्वा । तथा मनीषिणं । मनस ईषा मनीषा । तद्वंतं स्तुतिमंतं वा त्वामा वृणीमहे । प्रत्येकं विशेषणापेक्षया आ इत्युपसर्गः कृतः । किंच पांतं सर्वेषां रक्षकं पुरुस्पृहं बहुभिः स्पृहणीयं च त्वां संभजामहे ॥

॥ अथ त्रिंशी ॥

आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा । पांतमा पुरुस्पृहं ॥३०॥

आ । रयिं । आ । सुऽचेतुनं । आ । सुक्रतो इति सुऽक्रतो । तनूषु । आ । पांतं । आ । पुरुऽस्पृहं ॥३०॥

हे सुक्रतो शोभनयज्ञ सोम त्वदीयं रयिं धनं वयमा वृणीमहे । किंच । सुचेतुनं । चिती संज्ञाने । भाव औणादिक ऊनप्रत्ययः । सुज्ञानं च । तनूष्वस्मत्पुत्रेषु च धनं सुज्ञानं च त्वमा विधेहि । यद्वा पुत्रार्थं वयमावृणीमहे । तथा पांतं सर्वस्य रक्षकं पुरुस्पृहं बहुभिर्यष्टृभिः काम्यमानं त्वां संभजामहे ॥

॥ इति सप्तमस्य द्वितीये षष्ठो वर्गः ॥

पवस्वेति त्रिंशदृचं षष्ठं सूक्तं । अत्रानुक्रम्यते । पवस्व शतं वैखानसा अष्टादश्यनुष्टुप् परास्तिस्र आग्नेय्य इति । शतसंख्याका वैखानसाख्याः संहता ऋषयः । त्वं सोम सूर इत्येषानुष्टुप् । शिष्टा गायत्र्यः । अग्न आयूंषीत्याद्यास्तिस्रः पवमानविशिष्टाग्निदेवताकाः । अन्यासां पवमानः सोमो देवता । गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

पवस्व विश्वचर्षणेऽभि विश्वानि काव्या । सखा सखिभ्य ईड्यः ॥१॥

पवस्व । विश्वऽचर्षणे । अभि । विश्वानि । काव्या । सखा । सखिऽभ्यः । ईड्यः ॥१॥

हे विश्वचर्षणे सर्वव्यापित्वेन सर्वस्य द्रष्टः हे सोम सखा स्तुत्यस्तोतृयष्टव्ययष्टृलक्षणेन संबंधेन सखिभूतस्त्वमीड्यः स्तोतव्यः सन् सखिभ्यो हविःप्रदानेनोपकारकत्वान्मित्रभूतेभ्योऽस्मभ्यं विश्वानि सर्वाणि काव्या कवेः कर्माणि काव्यानि । ब्रह्मणादित्वात् ष्यञ् । सर्वाणि स्तोत्राण्यभिलक्षीकृत्य पवस्व । आ गच्छ ॥

॥ अथ द्वितीया ॥

ताभ्यां विश्वस्य राजसि ये पवमान धामनी । प्रतीची सोम तस्थतुः ॥२॥

ताभ्याम् । विश्वस्य । राजसि । ये इति । पवमान । धामनी इति । प्रतीची इति । सोम । तस्थतुः ॥२॥

हे पवमान दशापवित्रेण पूयमान पुनान वा हे सोम ये धामनी पूर्वपक्षापरपक्षयोर्लतारूपस्य सोमस्य तवैकैकपर्णवृद्धिह्रासाभ्यां तव स्वभूतौ पूर्वादिपक्षौ । यद्वा ये धामनी नामनी अंशुसोमात्मके अपि प्रतीची त्वदभिमुखं गच्छंतौ गच्छती वा पक्षौ नामनी तस्थतुरुपजग्मतुस्ताभ्यां त्वं विश्वस्य सर्वस्य लोकस्य राजसि । स्वामी भवसि । पूर्वादिपक्षाभ्यां सर्वलोकस्योपनायकत्वात्तस्य स्वामी भवसि । पृथिव्यामंशुनाम्ना मनुष्याणां सर्वेषामभीप्सितदानेन तस्य लोकस्य द्युलोके देवेभ्यः स्वसुधामयकलादानेन तेषां प्रीणयिता भवसि । देवाः खलु सोमस्यैकैकवृद्धिह्रासाभ्यां कलाः पिबंति ॥

॥ अथ तृतीया ॥

परि धामानि यानि ते त्वं सोमासि विश्वतः । पवमान ऋतुभिः कवे ॥३॥

परि । धामानि । यानि । ते । त्वम् । सोम । असि । विश्वतः । पवमान । ऋतुऽभिः । कवे ॥३॥

हे सोम यस्मात्ते त्वदीयानि धामानि तेजांसि परितो वर्ततेऽत एव हे पवमान पूयमान हे कवे क्रांतकर्मन् हे सोम त्वमृतुभिर्वसंतादिकालविशेषैः सह विश्वतः सर्वतोऽसि । भवसि । अहोरात्रौ यत्र यत्र व्याप्तौ तत्र तत्र वसंतादिकालोपाधिकः सोमस्तिष्ठति । तयोस्तदधीनत्वादित्यर्थः ॥

॥ अथ चतुर्थी ॥

पवस्व जनयन्निषोऽभि विश्वानि वार्या । सखा सखिभ्य ऊतये ॥४॥

पवस्व । जनयन् । इषः । अभि । विश्वानि । वार्या । सखा । सखिऽभ्यः । ऊतये ॥४॥

हे सोम सखा सखिभूतस्त्वं विश्वानि सर्वाणि वार्या वरणीयान्यस्मत्कृतानि स्तोत्राण्यभिलक्षीकृत्य सखिभ्योऽस्मभ्यमूतये रक्षणाय जीवनायेषोऽन्नानि जनयन् प्रयच्छन् पवस्व । आगच्छ । पवतिर्गतिकर्मा ॥

॥ अथ पंचमी ॥

तव शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते । पवित्रं सोम धामभिः ॥५॥

तव । शुक्रासः । अर्चयः । दिवः । पृष्ठे । वि । तन्वते । पवित्रं । सोम । धामऽभिः ॥५॥

हे सोम शुक्रासः सर्वत्र ज्वलनशीला धामभिस्तेजोभिः सहितस्य तव स्वभूता अर्चयोऽर्चनीया रश्मयो दिवो द्योतमानस्यादित्यस्य द्युलोकस्य वा पृष्ठेऽधरभागे । पृथिव्यामित्यर्थः । पवित्रं पवमानसाधनमुदकं वितन्वते । विशेषेण तन्वंति । विस्तारयंति । सर्वत्र कुर्वंतीत्यर्थः ॥

॥ इति सप्तमस्य द्वितीये सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

तवेमे सप्त सिंधवः प्रशिषं सोम सिस्रते । तुभ्यं धावंति धेनवः ॥६॥

तव । इमे । सप्त । सिंधवः । प्रऽशिषं । सोम । सिस्रते । तुभ्यं । धावंति । धेनवः ॥६॥

वृष्टिकर्तृत्वप्रसंगादाह । हे सोम इम इमास्त्वया सृष्टाः सप्त सप्तसंख्याकाः सिंधवः स्यंदमाना गंगाद्या नद्यः । यद्वा सप्त सर्पणशीला नद्यः । तव प्रशिषं प्रशासनमाज्ञामभि सिस्रते । अनुसरंति । त्वदाज्ञामनुसृत्य समुद्रं गच्छंतीत्यर्थः । किंच धेनवो नवप्रसूतिका देवानां हविःप्रदानेन प्रीणयित्र्यो गावस्तुभ्यं त्वदर्थमेवाशिरं क्षीरं प्रयच्छाम इति धावंति । आगच्छंति ॥

॥ अथ सप्तमी ॥

प्र सोम याहि धारया सुत इंद्राय मत्सरः । दधानो अक्षिति श्रवः ॥७॥

प्र । सोम । याहि । धारया । सुतः । इंद्राय । मत्सरः । दधानः । अक्षिति । श्रवः ॥७॥

हे सोम अभिषूयमाण देव मत्सर इंद्रस्य मदकरस्त्वं सुतोऽस्माभिरभिषुतः सन् इंद्रायेंद्रार्थं दशापवित्रान्निर्गतया संततया त्वदीयया धारया द्रोणकलशं प्र याहि। प्रकर्षेण प्राप्नुहि। यद्वा हे सोम सुतोऽभिषुतस्त्वमिंद्राय मत्सरो मादयितृतमः सन् धारयाग्नौ स्वाहाकारेण पाचात्पतंत्या धारया सह त्वमिंद्रमुपयाहि। कीदृशः। अक्षित्यक्षीणं श्रवः। श्रव इत्यन्ननाम। दधानोऽस्मभ्यं प्रयच्छन् प्रयाहीति॥

॥ अथाष्टमी॥

समु त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः। विप्रमाजा विवस्वतः॥८॥

सं। ऊं इति। त्वा। धीभिः। अस्वरन्। हिन्वतीः। सप्त। जामयः। विप्रं। आजा। विवस्वतः॥८॥

हे सोम हिन्वतीः। लिंगव्यत्ययः। हिन्वंतः स्तुतीः प्रेरयंतः सप्त सप्तसंख्याका जामय एकस्मिन्यज्ञे कर्मकरणेन परस्परं बंधुभूता होतृप्रभृतयः सप्त होत्रका विवस्वतो देवानां हविःप्रदानेन परिचरणवतो यजमानस्याजाजौ। अजंति गच्छंत्यृत्विजोऽत्रेत्याजिर्यज्ञः। तस्मिन् विप्रं मेधाविनं पवमानं त्वा त्वामेव धीभिर्धीतिभिः स्तुतिभिः समस्वरन्। अशब्दयन्। अस्तुवन्। यद्वा हिन्वतीर्गच्छंत्यः सप्त जामयो गंगाद्याः सप्त नद्यो धीभिः। वर्णलोपश्छांदसः। धीतिभिरंगुलीभिर्विप्रं त्वां समस्वरन्। प्रेरयंति। वसतीवरीभिरेकधनाभिश्च परिशोधनार्थं प्रेरयंतीति॥

॥ अथ नवमी॥

मृजंति त्वा सम॒ग्रुवोऽव्ये जीरावधि ष्वणि। रेभो यदज्यसे वने॥९॥

मृजंति। त्वा। सं। अग्रुवः। अव्ये। जीरौ। अधि। स्वनि। रेभः। यत्। अज्यसे। वने॥९॥

हे सोम अग्रुवः। अंगुलिनामैतत्। अजंति प्रक्षिपंति हवींष्यग्नाविति। यद्वा। अगेर्गत्यर्थस्य। कर्मकरणार्थमितस्ततो गच्छंतीति। अग्रुवोऽंगुलयोऽस्मदीया जीरौ पापानामभिभावुके क्षिप्रं कृते वा स्वन्यध्यधिकं शब्दायमानेऽव्येऽविवालेन कृते पवित्रे त्वा त्वां तदा सं मृजंति सम्यक् शोधयंति यद्यदा रेभः। रेभृ शब्दे। उदकमध्ये प्रक्षेपेण शब्दायमानस्त्वं वने वननीये वसतीवर्याख्य उदकेऽज्यसे। अक्तः सिक्तो भवसि। तदा मृजंतीत्यन्वयः॥

॥ अथ दशमी ॥

पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत । अर्वंतो न श्रवस्यवः ॥१०॥

पवमानस्य । ते । कवे । वाजिन् । सर्गाः । असृक्षत । अर्वंतः । न । श्रवस्यवः ॥१०॥

मार्जनप्रसंगमाह । हे कवे क्रांतप्रज्ञ हे वाजिन्नन्नवन् सोम पवमानस्य दशापवित्रेण पूयमानस्य ते तव सर्गाः । सृज्यंत इति सर्गा धाराः । कीदृशाः । श्रवस्यवः । छंदसि परेच्छायां क्यच् । यष्टॄणामन्नं कामयमानास्त्वदीया धारा असृक्षत । सृजंति । निर्गच्छंतीत्यर्थः । तत्र दृष्टांतः । अर्वंतो न । यथाश्वा मंदुरातो निर्गच्छंति तद्वत् पवित्रान्निःसरंतीत्यर्थः । प्रयोगापेक्षं चात्र धाराबाहुल्यं ॥

॥ इति सप्तमस्य द्वितीयेऽष्टमो वर्गः ॥

॥ अथैकादशी ॥

अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये । अवावशंत धीतयः ॥११॥

अच्छं । कोशं । मधुऽश्चुतं । असृग्रं । वारे । अव्यये । अवावशंत । धीतयः ॥११॥

धारानिर्गमनप्रसंगादभिधीयते । मधुश्चुतं मधुररसस्य च्यावयितारं क्षारयितारं कोशं द्रोणकलशमच्छाभिलक्ष्याव्ययेऽविमयेऽविस्वभूते वा वारे वाले दशापवित्रेऽसृग्रं । सोमा ऋत्विग्भिः सृज्यंते । सृजेः कर्मणि तिङां तिङो भवंतीति झो रमादेशः । किंच धीतयः । अंगुलिनामैतत् । धयंति पिबंत्याभिरिति । अस्मदीया अंगुलयोऽवावशंत । तान् सोमान् पुनःपुनर्मार्जनार्थं कामयंते ॥

॥ अथ द्वादशी ॥

अच्छा समुद्रमिंदवोऽस्तं गावो न धेनवः । अग्मन्नृतस्य योनिमा ॥१२॥

अच्छं । समुद्रं । इंदवः । अस्तं । गावः । न । धेनवः । अग्मन् । ऋतस्य । योनिं । आ ॥१२॥

इंदवः क्षरंतः सोमाः समुद्रं सोमानामेकत्रैव संगमनस्थानं द्रोणकलशमभिगच्छंति । तत्र दृष्टांतः । धेनवः पयःप्रदानेन जनानां प्रीणयित्र्यो नवप्रसूतिका गावोऽस्तं गृहं यथाभिगच्छंति तद्वत् । किंच ते सोमा ऋतस्य सत्यभूतस्य यज्ञस्य योनिं स्थानमाग्मन् । आभिमुख्येन गच्छंति । गमेर्लुङि सिचो लुक्युपधालोपः ॥

॥ अथ त्रयोदशी ॥

प्र ण इंदो महे रण आपो अर्षंति सिंधवः । यद्गोभिर्वासयिष्यसे ॥१३॥

प्र । नः । इंदो इति । महे । रणे । आपः । अर्षंति । सिंधवः । यत् । गोभिः । वासयिष्यसे ॥१३॥

हे इंदो क्षरन् सोम नोऽस्माकं स्वभूताय रणे रणाय। रणंति स्तुवंति देवानत्रेति रणो यज्ञः। अधिकरणे अप्। ङ्यंः।पा०७.१.१३.। इति न भवति सर्वविधीनां छंदसि विकल्पितत्वात्। महे महते रणाय यज्ञाय तदर्थं सिंधवः स्यंदमाना आपो वसतीवर्याख्याः सोमसेकार्थं तदार्षंति। प्रगच्छंति। तद्यदा त्वं गोभिर्गव्यैर्दधिक्षीरादिभिर्वासयिष्यस आच्छादयसे मिश्रितो भवसि तदापो गच्छंतीति ॥

॥ अथ चतुर्दशी ॥

अस्य॑ ते स॒ख्ये व॒यमिय॑क्षंत॒स्त्वोत॑यः। इंदो॑ सखि॒त्वमु॑श्मसि ॥१४॥

अस्य॑। ते॒। स॒ख्ये। व॒यं। इय॑क्षंतः। त्वाऽऊ॑तयः। इंदो॒ इति॑। स॒खि॒ऽत्वं। उ॒श्म॒सि॒ ॥१४॥

हे इंदो पवमान इयक्षंतो यष्टुमिच्छंतः पूजयितुमिच्छंतो वास्य प्रसिद्धस्य ते तव सख्ये सखिकर्मणि स्थिता वयं त्वोतयस्त्वदायत्तरक्षणाः संतः सखित्वं सखिभावमेवोश्मसि। उश्मः। कामयामहे ॥

॥ अथ पंचदशी ॥

आ प॑वस्व॒ गवि॑ष्टये म॒हे सो॑म नृ॒चक्ष॑से। एंद्र॑स्य ज॒ठरे॑ विश ॥१५॥

आ। प॒व॒स्व॒। गोऽइ॑ष्टये। म॒हे। सो॒म॒। नृ॒ऽचक्ष॑से। आ। इंद्र॑स्य। ज॒ठरे॑। वि॒श॒ ॥१५॥

हे सोम पवमान गविष्टयेऽंगिरसां गवामन्वेष्ट्रे महे महते नृचक्षसे नृणां मनुष्याणां द्रष्ट्रे कर्मनेतृणां फलं पश्यते वा चंद्रायापवस्व। पात्रेषु दशापवित्रेण पूतो भव। इंद्रस्य जठर उदर उदरभूते द्रोणकलशे वाविश। प्रविश ॥

॥ इति सप्तमस्य द्वितीये नवमो वर्गः ॥

॥ अथ षोडशी ॥

म॒हाँ अ॑सि सोम॒ ज्येष्ठ॑ उ॒ग्राणा॑मिंद॒ ओजि॑ष्ठः। युध्वा॒ सञ्छश्व॑ज्जिगेथ ॥१६॥

म॒हान्। अ॒सि॒। सो॒म॒। ज्येष्ठः॑। उ॒ग्राणा॑ं। इंदो॒ इति॑। ओजि॑ष्ठः। यु॒ध्वा॑। सन्।
शश्व॑त्। जि॒गे॒थ॒ ॥१६॥

हे सोम त्वं महानसि। यतस्त्वं देवानां प्रीणयिता खलु। त्वं ज्येष्ठः प्रशस्यतमो भवसि। किंच हे इंदो पवमान त्वमुग्राणामुद्गूर्णबलानामप्योजिष्ठ ओजस्वितमो भवसि। त्वं युध्वा सन् शत्रुभिः सह युद्धं कुर्वन् एव शश्वत् सर्वदा जिगेथ। तान् तेषां धनानि च जितवानसि। जि जये। सँल्लिटोर्जेरित्यभ्यासादुत्तरस्य कवर्गादेशः ॥

॥ अथ सप्तदशी ॥

य उग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः । भूरिदाभ्यश्चिन्मंहीयान् ॥१७॥

यः । उग्रेभ्यः । चित् । ओजीयान् । शूरेभ्यः । चित् । शूरऽतरः । भूरिऽदाभ्यः । चित् । मंहीयान् ॥१७॥

यः सोम उग्रेभ्यश्चित् उद्गूर्णेभ्यो बलवद्भ्योऽप्योजीयान् ओजस्वितमः । किंच । यः शूरेभ्यश्चिद्वीरेभ्योऽपि शूरतरोऽत्यंतसमर्थो भवति । तथा यः सोमो भूरिदाभ्यः । डुदाञ् दाने । आतो मनिन्निति विच् । बहुधनानां दातृभ्योऽपि मंहीयान् दातृतमो भवति । तं त्वां वृणीमह इत्युत्तरेण संबंधः ॥

॥ अथाष्टादशी ॥

त्वं सोम सूर एषस्तोकस्य साता तनूनां । वृणीमहे सख्याय वृणीमहे युज्याय ॥१८॥

त्वं । सोम । सूरः । आ । इषः । तोकस्य । साता । तनूनां । वृणीमहे । सख्याय । वृणीमहे । युज्याय ॥१८॥

हे सोम सूरः सुवीर्यः । यद्वा सर्वस्य यागादिकर्मणि प्रेरकस्त्वमिषोऽन्नान्यस्माकमा धेहि । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । किंच त्वं तोकस्य पुत्रस्य तनूनां । तन्वंति विस्तारयंति कुलमिति तन्वः पौत्राः । तेषां च साता दाता भव । षणु दाने । जनसनेति विट् । जनसनेत्यात्वं । वयं तं त्वां सख्याय सखिभावाय कर्मणे वा वृणीमहे । संभजामहे । तथा युज्याय । युज् सहायः । तस्य भावे कर्मणि वा यत् । संज्ञापूर्वकस्य विधेरनित्यत्वादवृद्धिः । शत्रुवधादिलक्षणसहाय्याय च वयं वृणीमहे ॥

अग्निहोत्रे पूर्वस्यामाहुतौ हुतायामुपस्थितेन यजमानेन प्रतिदिवसं प्रतिसंवत्सरं वानेन तृचेनाग्निरुपस्थेयः । सूत्रितं च । आग्नेयीभिश्चाग्न आयूंषि पवस इति तिसृभिः संवत्सरे संवत्सरे । आ० २.३. । इति ॥ चौलादिकर्मसु चतस्र आज्याहुतयो होतव्यास्तत्रैव तिस्रः । सूत्रितं च । तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयादग्न आयूंषि पवस इति तिसृभिः । आ० गृ० १.४. । इति ॥ आधाने पवमानेष्टावग्नेः पवमानस्याग्न आयूंषीत्येषानुवाक्या । अग्ने पवस्वेत्येषा याज्या । सूत्रितं च । प्रथमायामग्निरग्निः पवमानोऽग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः । आ० २.१. । इति ॥

पुनराधेये द्वितीयाज्यभागस्याग्न आयूंषीत्येषा वैकल्पिकानुवाक्या । सूत्रितं च । नित्यं पूर्वमनुब्राह्मणिनोऽग्न आयूंषि पवस इत्युत्तरं । आ॰ २.८. । इति ॥

॥ सैषा सूक्त एकोनविंशी ॥

अग्न आयूंषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनां ॥१९॥

अग्ने । आयूंषि । पवसे । आ । सुव । ऊर्जं । इषं । च । नः । आरे । बाधस्व । दुच्छुनां ॥१९॥

हे अग्ने पवमानरूप त्वमस्माकमायूंषि जीवनानि पवसे । रक्षसि । नोऽस्माकमूर्जमन्नरसमिषमन्नं चासुव । आभिमुख्येन प्रेरय । किंच दुच्छुनां । रक्षोनामैतत् । रक्षांस्यारेऽस्मत्तो दूर एव बाधस्व । संपीडय ॥

॥ अथ विंशी ॥

अग्निर्ऋषिः पवमानः पांचजन्यः पुरोहितः । तमीमहे महागयं ॥२०॥

अग्निः । ऋषिः । पवमानः । पांचऽजन्यः । पुरःऽहितः । तं । ईमहे । महाऽगयं ॥२०॥

पांचजन्यः । निषादपंचमाश्चत्वारो वर्णाः पंचजनाः । यद्वा गंधर्वाः पितरो देवा असुरा रक्षांसीत्येते पंचजनाः । अथवा देवा मनुष्या गंधर्वाप्सरसः सर्पाः पितर इति ब्राह्मणेऽभिहिताः पंचजनाः । गंभीराञ् ञ्य इत्यत्र बहिर्देवपंचजनेभ्य इति वक्तव्यमिति वचनात् । पा॰ ४.३.५८.३. । भवार्थे ञ्यप्रत्ययः । तेषां तत्तदभीष्टप्रदानेन स्वभूत ऋषिः सर्वद्रष्टा पवमानस्तद्रूपोऽग्निः पुरोहितः कर्मार्थमृत्विग्भिः पुरो निहितः । तं पूर्वोक्तलक्षणं महागयं महद्भिर्देवादिभिरपि गीर्भिर्गातव्यं । महांति प्रभूतानि यज्ञगृहानि वा यस्य स तथोक्तः । तं पवमानगुणविशिष्टमग्निमीमहे । धनादीनि याचामहे ॥

॥ इति सप्तमस्य द्वितीये दशमो वर्गः ॥

॥ अथैकविंशी ॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं । दधद्रयिं मयि पोषं ॥२१॥

अग्ने । पवस्व । सुऽअपाः । अस्मे इति । वर्चः । सुऽवीर्यं । दधत् । रयिं । मयि । पोषं ॥२१॥

हे अग्ने स्वपाः । सोर्मनसीत्युत्तरपदाद्युदात्तत्वं । शोभनकर्मा त्वमस्मे अस्मासु सुवीर्यं शोभनवीर्योपेतं वर्चः । वर्च दीप्तौ । तेजः पवस्व । आगमय । तथा भवान् रयिं धनं पुत्रं वा पोषं । भावे कर्मणि वा घञ् । गवां पुष्टिं । यद्वा

गवादिकं मयि भवान्दधत् । दधातु । करोत्वित्यर्थः । दधातेर्लेट्यडागमः । घोर्लोपो लेटि वेत्याकारलोपः ॥

॥ अथ द्वाविंशी ॥

पवमानो अति स्रिधोऽभ्यर्षति सुष्टुतिं । सूरो न विश्वदर्शतः ॥२२॥

पवमानः। अति। स्रिधः। अभि। अर्षति। सुऽस्तुतिं। सूरः। न। विश्वऽदर्शतः ॥२२॥

पवमानः सोमः स्रिधो हिंसकाञ्शत्रूनतिक्रम्य गच्छति। तथा सुष्टुतिं स्तोतॄणां शोभनां स्तुतिमभ्यर्षति । आभिमुख्येन गच्छति । ऋषी गतौ तौदादिकः । बहुलं छंदसीति शप् । गुणः । किंच सूरो न सूर्य इव विश्वदर्शतः सर्वस्य द्रष्टा सर्वैर्वा दर्शनीयो भवति ॥

॥ अथ त्रयोविंशी ॥

स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः । इंदुरत्यो विचक्षणः ॥२३॥

सः। मर्मृजानः। आयुऽभिः। प्रयस्वान्। प्रयसे। हितः। इंदुः। अत्यः। विऽचक्षणः॥२३॥

आयुभिः कर्मनेतृभिर्मनुष्यैर्मर्मृजानः पुनःपुनर्मृज्यमानः शोध्यमानः स इंदुः स सोमोऽत्यो देवान्संततं गंता भवति। कीदृशः। प्रयस्वान् प्रीणनशीलान्नवान्। यद्वा स्तोतृभ्यो देयत्वेनान्नयुक्तः। अत एव प्रयसे हवीरूपायान्नाय हितो विचक्षणः सर्वस्य प्रदर्शनकारी सर्वस्य विद्रष्टा वा सोमो देवानभिगंता भवति। चक्षिङ् व्यक्तायां वाचि। अनुदात्तेतश्च हलादेरिति युच् ॥

॥ अथ चतुर्विंशी ॥

पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत् । कृष्णा तमांसि जंघनत् ॥२४॥

पवमानः। ऋतं। बृहत्। शुक्रं। ज्योतिः। अजीजनत्। कृष्णा। तमांसि। जंघनत्॥२४॥

पवमान ऋतं सत्यं यथार्थभूतं बृहत्प्रभूतं सर्वदेशेषु व्यापकं शुक्रं दीप्यमानं श्वेतवर्णं ज्योतिस्तेजोऽजीजनत् । द्युलोक उदपादयत् । किं कुर्वन् । कृष्णा कृष्णवर्णानि तमांसि जंघनत् भृशं विनाशयन् । हंतेर्यङ्लुकि शतरि रूपं । अभ्यस्तानामादिरित्याद्युदात्तत्वं ॥

॥ अथ पंचविंशी ॥

पवमानस्य जंघ्नतो हरेश्चंद्रा असृक्षत । जीरा अजिरशोचिषः ॥२५॥

पवमानस्य । जंघ्नतः । हरेः । चंद्राः । असृक्षत । जीराः । अजिरऽशोचिषः ॥२५॥

जंघ्नतः पुनःपुनस्तमांसि विनाशयतो हरेर्हरितवर्णस्याजिरशोचिषः सर्वत्र गमनशीलतेजसः पवमानस्य सोमस्य चंद्राः । चदि आह्लादने । देवानामाह्लादयित्र्यो जीराः क्षिप्रं क्षरणशीला धारा असृक्षत । सृजंति । पवित्रान्निर्गच्छंतीत्यर्थः ॥

॥ इति सप्तमस्य द्वितीय एकादशो वर्गः ॥

॥ अथ षड्विंशी ॥

पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः । हरिश्चंद्रो मरुद्गणः ॥२६॥

पवमानः । रथिऽतमः । शुभ्रेभिः । शुभ्रशःऽतमः । हरिऽचंद्रः । मरुत्ऽगणः ॥२६॥

पवमानो देवो रथीतमोऽतिशयेन रथवान् । ईद्रथिन इतीकारः । तथा शुभ्रेभिः शोभायुक्तेभ्यस्तेजोभ्योऽपि शुभ्रशस्तमोऽत्यंतदीप्यमानश्च । यद्वा निर्मलेभ्योऽपि निर्मलतमयशोयुक्तः । हरिश्चंद्रः । ह्रस्वाच्चंद्रोत्तरपद इति सांहितिकः सुट् । हरितवर्णदीप्तिर्हरितधारावान्वा मरुद्गणः । मरुतो यस्य गणः सहायभूताः स तथोक्तः । तादृशः सर्वाल्लोकान् स्वरश्मिभिः स्वदीप्तिभिर्व्यश्नवत् व्याप्नोत्वित्युत्तरेणान्वयः ॥

॥ अथ सप्तविंशी ॥

पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः । दधत्स्तोत्रे सुवीर्यं ॥२७॥

पवमानः । वि । अश्नवत् । रश्मिऽभिः । वाजऽसातमः । दधत् । स्तोत्रे । सुऽवीर्यं ॥२७॥

पवमानः सोमो रश्मिभिः स्वदीप्तिभिर्व्यश्नवत् सर्वं जगद्व्याप्नोतु । कीदृशः । वाजसातमः । अतिशयेनान्नस्य दाता बलस्य संभक्ता वा । तथा स्तोत्रे पवमानस्तोत्रं कुर्वते मनवे सुवीर्यं सुवीर्योपेतं पुत्रं धनं वा दधत् विदधत् प्रयच्छन् व्याप्नोतु । अश्नोतेर्लेट्यडागमः ॥

॥ अथाष्टाविंशी ॥

प्र सुवान इंदुरक्षाः पवित्रमत्यव्ययं । पुनान इंदुरिंद्रमा ॥२८॥

प्र । सुवानः । इंदुः । अक्षारिति । पवित्रं । अति । अव्ययं । पुनानः । इंदुः । इंद्रं । आ ॥२८॥

सुवानोऽभिषूयमाण इंदुः सोमोऽव्ययमविमयमूर्णास्तुकेन निर्मितं दशापवित्रमतीत्य प्राक्षाः। कलशं प्रतिकर्षेण क्षरति ॥ क्षरतेर्लुङि तिपि सिचि छांदस इडागमाभावः। अतोऽल्लांतस्येति वृद्धिः। रात्सस्येति सिचो लोपः। रेफांतं स्पष्टयितुमितिकारः। बहुलं छंदसि। पा० ७.३.९७.। इतीडभावः। हल्ङ्यादिना तिलोपः। ततस्पुनानः पवित्रेण शुद्ध इंदुः सोम इंद्रमा विशति। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

॥ अथैकोनत्रिंशी ॥

एष सोमो अधि त्वचि गवां क्रीळत्यद्रिभिः। इंद्रं मदाय जोहुवत् ॥२९॥

एषः। सोमः। अधि। त्वचि। गवां। क्रीळति। अद्रिऽभिः। इंद्रं। मदाय। जोहुवत् ॥२९॥

एष अंशुरूपः सोमो गवां त्वच्यानडुहचर्मणि। अधिशब्द उपर्यर्थद्योतकः। चर्मण्युपर्यद्रिभिर्ग्रावभिः सह क्रीडति। अभिषवाय संक्रीडते। एतेन तत्काल इंद्रविषयां स्तुतिं कुर्वंतीत्यवगम्यते ॥

॥ अथ त्रिंशी ॥

यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः। तेन नो मृळ जीवसे ॥३०॥

यस्य। ते। द्युम्नऽवत्। पयः। पवमान। आऽभृतं। दिवः। तेन। नः। मृळ। जीवसे ॥३०॥

हे पवमान पूयमान हे सोम दिवो द्युलोकादाभृतं श्येनरूपया गायत्र्याहृतं द्युम्नवदन्नवद्यशोयुक्तं वा पयः सोमलक्षणमन्नं यस्य ते तव स्वभूतं विद्यते तस्मात्त्वं तेनान्नेन नोऽस्मान् जीवसे चिरजीवनाय मृळ। मृळय। सुखय ॥

॥ इति सप्तमस्य द्वितीये द्वादशो वर्गः ॥

त्वं सोमासीति द्वात्रिंशदृचं सप्तमं सूक्तं। आद्यतृचस्य बार्हस्पत्यो भरद्वाज ऋषिः। द्वितीयस्य मारीचः कश्यपः। तृतीयस्य राहूगणो गोतमः। चतुर्थस्य भौमोऽत्रिः। पंचमस्य गाथिनो विश्वामित्रः। षष्ठस्य भार्गवो जमदग्निः। सप्तमस्य मैत्रावरुणिर्वसिष्ठः। सूक्तशेषस्यांगिरसः पवित्रो वसिष्ठो वोभौ वा समुदितावृषी। पवस्व सोम मंदयन्नित्याद्यास्तिस्रो द्विपदा गायत्र्यः। अविता नो अजाश्व इत्याद्यास्तिस्रः पवमानपूषदेवत्याः पवमानसोमदेवताका वा। यत्ते पवित्रमर्चिषीत्याद्याः पंचर्चः पवमानाग्निदेवत्याः। आसां पंचानां मध्य उभाभ्यां देव सवितरिति तृतीया पवमानसवितृदेवताका वा। चतुर्थी त्रिभिष्ट्वं देव

सवितरित्येषा विकल्पेन पवमानाग्निसवितृदेवताका। पुनंतु मामित्येषा विकल्पेन वैश्वदेवी। यः पावमानीरध्येतीत्यादिके द्वे पवमानमंडलाध्येतृस्तुतिप्रतिपादिके। अतः सैव देवता। शिष्टाः सर्वाः पवमानसोमदेवताकाः। तथा चानुक्रम्यते। त्वं सोमासि द्वात्रिंशद्भरद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इति ह तृचाः सप्त ऋषयः शेषे पवित्रो वसिष्ठो वोभौ वा। पवस्व सोम तिस्रो नित्यद्विपदा गायत्र्योऽविता नस्तिस्रः पौष्णयो वा यत्ते पवित्रं पंचाग्नेय्यः सावित्र्यग्निसावित्री वैश्वदेवी वासामंत्याः। त्रिंशी पुरउष्णिक् सप्तविंश्यनुष्टुबंत्ये च ते पावमान्यध्येतृस्तुती इति। गतः सूक्तविनियोगः॥

॥ तत्र प्रथमा ॥

त्वं सोमासि धारयुर्मंद्र ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः ॥१॥

त्वं। सोम। असि। धारयुः। मंद्रः। ओजिष्ठः। अध्वरे। पवस्व। मंहयत्ऽरयिः ॥१॥

हे सोमाभिषूयमाण पवमान मंद्रो मोदयितृतम ओजिष्ठ ओजस्वितमस्त्वमध्वरे हिंसारहितेऽस्मदीये यज्ञे धारयुरभिषवणधाराकामोऽसि। भवसि। ततस्त्वं मंहयद्रयिः स्तोतृभ्यः प्रदीयमानधनः सन् पवस्व। द्रोणकलशे ग्रहादिषु दशापवित्रेण पूतो भव। यद्वा धारयुस्तद्वदर्थे भाषत इति मत्वर्थीयो युः। स हे सोम त्वं धारावानिव ततः पवस्वेति संबंधः॥

॥ अथ द्वितीया ॥

त्वं सुतो नृमादनो दधन्वान्मत्सरिंतमः। इंद्राय सूरिरंधसा ॥२॥

त्वं। सुतः। नृऽमादनः। दधन्वान्। मत्सरिन्ऽतमः। इंद्राय। सूरिः। अंधसा ॥२॥

हे सोम नृमादनो नृणां कर्मणो नेतृणामृत्विजां मादयिता अत एव दधन्वान् तेभ्यो धनानि धारयन् प्रयच्छन् यद्वा यज्ञस्य धारकः सूरिः प्राज्ञः सुतोऽस्माभिरभिषुतस्त्वमंधसा हवीरूपेणान्नेन सहेंद्राय मत्सरिंतमस्तस्यातिशयेन मदकारी भव। नाद्वस्येति नकारः॥

॥ अथ तृतीया ॥

त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमंतं शुष्ममुत्तमं ॥३॥

त्वं। सुस्वानः। अद्रिऽभिः। अभि। अर्ष। कनिक्रदत्। द्युऽमंतं। शुष्मं। उत्ऽतमं॥३॥

हे पवमान सोम अद्रिभिर्ग्रावभिः सुष्वाणः सुन्वानोऽभिषूयमाणस्त्वं कनिक्रदत् भृशं शब्दं कुर्वन् अभ्यर्ष। कलशं पात्राणि वाभिगच्छ। तथा द्युमंतं दीप्तियुक्तमुत्तमं शुष्मं शत्रूणां शोषकं बलं च प्राप्नुहि। यद्वा। एकवाक्यतया योजनीयः। सूयमानस्त्वं बलमभिगच्छेति॥ क्रदि क्रदि आह्वाने। क्रदेर्यङ्लुकि नलोपोऽभ्यासस्य निगागमश्च दाधर्ति दर्धर्तीति सूत्रेण सर्वं निपात्यते। तस्माच्छतृप्रत्ययः। अभ्यस्तानामादिरिति स्वरः॥

॥ अथ चतुर्थी ॥

इंदुर्हिन्वानो अर्षति तिरो वाराण्यव्यया। हरिर्वाजमचिक्रदत् ॥४॥

इंदुः। हिन्वानः। अर्षति। तिरः। वाराणि। अव्यया। हरिः। वाजं। अचिक्रदत् ॥४॥

हिन्वानो ग्रावभिः प्रेर्यमाणोऽभिषूयमाण इंदुः सोमोऽव्ययाविमयान्यवीनां स्वभूतानि वाराणि वालानि। पवित्राणीत्यर्थः। तानि तिरस्तिरस्कृत्य व्यवधायार्षति। गच्छति। प्रभूतं निर्गच्छतीत्यर्थः। सोऽयं हरिर्हरितवर्णः सोमो वाजमन्नमचिक्रदत्। शब्दयति। त्वया सहेंद्रमहमाह्वयामीत्यर्थः॥

॥ अथ पंचमी ॥

इंदो व्यव्यमर्षसि वि श्रवांसि वि सौभगा। वि वाजान्त्सोम गोमतः ॥५॥

इंदो इति। वि। अव्यं। अर्षसि। वि। श्रवांसि। वि। सौभगा। वि। वाजान्। सोम। गोऽमतः ॥५॥

हे इंदो सोम अव्यमविवाले भवं पवित्रं व्यर्षसि। विविधं धाराभिर्गच्छसि। किंच। श्रवांसि हवीरूपाण्यन्नानि च विगच्छसि। तथा सौभगा। सुभगस्य भावः सौभगं। सुभगशब्द उद्गात्रादिषु पठ्यते। तस्योत्तरपदवृद्धिर्नेष्यते। सौभगानि धनानि विविधं प्राप्नोषि। तथा हे सोम गोमतः पशुमंति वाजान् बलानि च विविधं प्राप्नुहि। तानि सर्वाण्यस्माकं प्रापयेत्यभिप्रायः॥

॥ इति सप्तमस्य द्वितीये त्रयोदशो वर्गः॥

॥ अथ षष्ठी ॥

आ न इंदो शतग्विनं रयिं गोमंतमश्विनं। भरा सोम सहस्रिणं ॥६॥

आ। नः। इंदो इति। शतऽग्विनं। रयिं। गोऽमंतं। अश्विनं। भर। सोम। सहस्रिणं ॥६॥

हे इंदो पात्रेषु क्षरन् हे सोम नोऽस्मभ्यमा भर। संपादय। देहि। किमित्युच्यते। शतग्विनं शतं गावो यस्य स शतगुः। तद्वंतं गोमंतं प्रशस्तपशुमंतमश्विनमश्वयुक्तं सहस्रिणं सहस्रसंख्याकं रयिं धनं पुत्रं वाभर ॥

॥ अथ सप्तमी ॥

पवमानास इंदवस्तिरः पवित्रमाशवः। इंद्रं यामेभिराशत ॥७॥

पवमानासः। इंदवः। तिरः। पवित्रं। आशवः। इंद्रं। यामेभिः। आशत ॥७॥

पवित्रमूर्णास्तुकेन निर्मितं दशापवित्रं तिरस्तिरस्कृत्य व्यवधायकं कृत्वा पवमानासः कलशं प्रति बहुधाराः क्षरंत आशवः क्षिप्रं मदकारिणश्चमसादीन् व्याप्नुवंतो वेंदवः सोमा यामेभिः स्वीयैर्गमनैरिंद्रमाशत। व्याप्नुवंति ॥

॥ अथाष्टमी ॥

ककुहः सोम्यो रस इंदुरिंद्राय पूर्व्यः। आयुः पवत आयवे ॥८॥

ककुहः। सोम्यः। रसः। इंदुः। इंद्राय। पूर्व्यः। आयुः। पवते। आयवे ॥८॥

ककुहः। सोमः सर्वकर्मकारयितृत्वेन सर्वेषां समुच्छ्रितोऽतिशयितो भवति। सोऽयं पूर्व्यः पूर्वैः कृतोऽभिषुतः पूर्वे प्रातःकाले कृतो वायुरिंद्रमभिगंतेदुः पात्रेषु क्षरन् सोम्यः। मये चेति यप्रत्ययः। सोममयो रस आयवे सर्वत्र गंत्र इंद्राय पवते। कलशेषु पवित्रेण पूतो भवति। यद्वा। इंद्रार्थमभिमुखं गच्छति। पवतिर्गतिकर्मा ॥

॥ अथ नवमी ॥

हिन्वंति सूरमुस्रयः पवमानं मधुश्चुतं। अभि गिरा समस्वरन् ॥९॥

हिन्वंति। सूरं। उस्रयः। पवमानं। मधुऽश्चुतं। अभि। गिरा। सं। अस्वरन् ॥९॥

उस्रयः कर्मकरणार्थमितस्ततः संचरंत्योऽंगुलयो मधुश्चुतं मदकरस्य रसस्य च्यावयितारं सूरं सुवीर्यं सर्वस्य यागादिकर्मणि प्रेरकं पवमानं सोमं हिन्वंति। अभिषवार्थं संप्रेरयंति। ततः स्तोतारो गिरा स्तुत्या तमेनमभि समस्वरन् सम्यगभिष्टुवंति ॥

॥ अथ दशमी ॥

अविता नो अजाश्वः पूषा यामनियामनि। आ भक्षत्कन्यासु नः ॥१०॥

अविता। नः। अजऽअश्वः। पूषा। यामनिऽयामनि। आ। भक्षत्। कन्यासु। नः ॥१०॥

अजाश्वः। अजाः पूष्ण इत्युक्तत्वादजा एवाश्वा वाहनानि यस्य स तथोक्तः। स पूषैतन्नामको देवो यामनि यामनि सर्वस्मिन्गमने भौमदिव्यलक्षणे नोऽस्माकमविता पालयिता भवतु। किंच। कन्यासु कमनीयास्वभिमतासु स्त्रीषु नोऽस्मानाभक्षत्। आ भजतां। अस्माकं कन्याः प्रयच्छत्वित्यर्थः। भजः सेवार्थाल्लेटि सिप्यडागमे रूपं। यद्वा अजाश्वोऽजवाहनः पूषा सर्वस्य पोषयिता सोमो यामनि यामनि। यायते प्राप्यते देवैरनेनेति याम यज्ञः। तत्र यज्ञे नोऽस्माकमविता रक्षिता भवतु। तथा कन्यासु स्त्रीष्विष्टास्वस्माना भक्षत्। प्रापयतु॥

॥ इति सप्तमस्य द्वितीये चतुर्दशो वर्गः॥

॥ अथैकादशी॥

अयं सोमः कपर्दिने घृतं न पवते मधु। आ भक्षत्कन्यासु नः॥११॥

अयं। सोमः। कपर्दिने। घृतं। न। पवते। मधु। आ। भक्षत्। कन्यासु। नः॥११॥

कपर्दिने कल्याणमुकुटवते सोमाय पूष्णे वा तदर्थमयं मादयिताभिषुतोऽस्मदीयः सोमः पवते च। गच्छति। तं प्राप्नोति। तत्र दृष्टांतः। घृतं न मधु मादकं हवीरूपं घृतं यथा सोमं पूषणं वा गच्छति तद्वत्। ततः स कन्यास्वस्मानागमयत्॥

॥ अथ द्वादशी॥

अयं त आघृणे सुतो घृतं न पवते शुचि। आ भक्षत्कन्यासु नः॥१२॥

अयं। ते। आघृणे। सुतः। घृतं। न। पवते। शुचि। आ। भक्षत्। कन्यासु। नः॥१२॥

हे आघृणे। घृ क्षरणदीप्त्योः। सर्वतो दीप्यमान पवमान पूषन् वा ते त्वदर्थं सुतोऽभिषुतोऽयं सोमः पवते। त्वदभिमुखमागच्छति। यद्वा त्वदर्थं पात्रेषु पवित्रेण पूतो भवति क्षरति वा। तत्र दृष्टांतः। घृतं न शुचि शुद्धं घृतं यथा त्वां प्राप्नोति तद्वत्। ततस्त्वमभिलषितान्यस्माकं देहीति॥

॥ अथ त्रयोदशी॥

वाचो जंतुः कवीनां पवस्व सोम धारया। देवेषु रत्नधा असि॥१३॥

वाचः। जंतुः। कवीनां। पवस्व। सोम। धारया। देवेषु। रत्नऽधाः। असि॥१३॥

हे सोम कवीनां क्रांतप्रज्ञानां स्तोतॄणां वाचो जंतुः स्तुतेर्जनयिता। यद्वा मेधाविनां मध्ये त्वमेव वाचं जनयसि। अत्यंतं वाग्मी त्वं धारया पवस्व।

द्रोणकलशं ग्रहांश्च प्राप्नुहि । तत इंद्रादिदेवेषु रत्नधा रमणशीलस्य सोमस्य निधातासि । भवसि । अथवा देवेषु स्तोत्रकारिषु कर्म कुर्वाणेषु वास्मासु रत्नस्य कनकादेर्दाता भवसि ॥

ग्रावस्तोत्रे गाणगारिमतेनाभिरूपकरणे कलशेषु सोम आसिच्यमानेऽस्य तृचस्य आ. कलशेष्वित्यादिके द्वितीयातृतीये । सूचितं च । आ कलशेषु धावति श्येनो वर्म वि गाहत इति द्वे । आ॰ ५. १२. । तयोः प्रथमा सूक्ते चतुर्दशी ॥

आ कलशेषु धावति श्येनो वर्म वि गाहते । अभि द्रोणा कनिक्रदत् ॥ १४ ॥

आ । कलशेषु । धावति । श्येनः । वर्म । वि । गाहते । अभि । द्रोणा । कनिक्रदत् ॥ १४ ॥

ऋत्विग्भिरभिषिच्यमानः कश्चित्सोमः कलशेषु सोमाधारेषु द्रोणकलशेष्वाधावति । सर्वतो गच्छति । श्येनः । लुप्तोपममेतत् । यथा श्येनो वर्म वरणीयं कुलायं विगाहते प्रविशति तद्वत् । कनिक्रदत् अत्यंतं शब्दं कुर्वन् द्रोणा द्रोणकलशानभिगच्छति च । यद्वा द्रोणाधवनीयपूतभृत्संज्ञकाभिप्रायं । एकः सिच्यमानः सोमो द्रोणं प्रति शब्दायमानः पश्चात्प्रथमं गच्छति । ततः पात्रद्वयमिति ॥

॥ अथ पंचदशी ॥

परि प्र सोम ते रसोऽसर्जि कलशे सुतः । श्येनो न तक्तो अर्षति ॥ १५ ॥

परि । प्र । सोम । ते । रसः । असर्जि । कलशे । सुतः । श्येनः । न । तक्तः । अर्षति ॥ १५ ॥

हे सोम कलशेषु द्रोणाभिधानेषु सुतोऽभिषुतस्ते तव रसः परि प्रासर्जि । परितो ग्रहेषु चमसेषु च प्रसृष्टो विभक्तो भवति । कथमिव । श्येनो न तक्तः । तक्तिर्गतिकर्मा । गमनशीलः श्येनः पक्षी यथा सर्वत्रार्षति गच्छति तद्वत् । यद्वा । यथा श्येनः सर्वतो गंता तद्वत्तक्तः पात्रेषु गतः सोमोऽर्षति । इंद्रादिदेवानागच्छत् । अर्तेर्लेटि सिपि वा रूपं । पूर्वमृषी गतावित्यस्माल्लटि शपि रूपं ॥

॥ इति सप्तमस्य द्वितीये पंचदशो वर्गः ॥

॥ अथ षोडशी ॥

पवस्व सोम मंदयन्निंद्राय मधुमत्तमः ॥ १६ ॥

पवस्व । सोम । मंदयन् । इंद्राय । मधुमत्ऽतमः ॥ १६ ॥

हे सोम मधुमत्तमोऽतिशयेन मधुररसवांस्त्वं मंदयन् मादयिता भवन् । यद्वा । इंद्राय । क्रियाग्रहणं कर्तव्यमिति संप्रदानं । इंद्रं मोदमानः सन् पवस्व । इंद्रार्थमागच्छ ॥

॥ अथ सप्तदशी ॥

असृग्रन्देववीतये वाजयंतो रथा इव ॥१७॥

असृग्रन् । देवऽवीतये । वाजऽयंतः । रथाःऽइव ॥१७॥

एतेऽभिषुताः सोमा वाजयंतः संतो देववीतये देवयजनायासृग्रन् । विसृज्यंते । ऋत्विग्भिः प्रदीयंते । तत्र दृष्टांतः । रथा इव वाजयंतः शत्रुधनानि बलानि वा स्वामिन इच्छंतो रथा देववीतये देवानां गमनाय यथा विसृज्यंते तद्वत् ॥

॥ अथाष्टादशी ॥

ते सुतासो मदिंतमाः शुक्रा वायुमसृक्षत ॥१८॥

ते । सुतासः । मदिन्ऽतमाः । शुक्राः । वायुं । असृक्षत ॥१८॥

मदिंतमा अतिशयेन मादयितारः शुक्रा दीप्यमानाः सुता अभिषुतास्ते सोमा वायुं शब्दमसृक्षत । असृजन् अकार्षुः । यद्वा वायुमेव सोमपानार्थमसृजन् । सोमेषु सुतेषु सत्सु वायुस्तत्पानार्थमागच्छति ॥

॥ अथैकोनविंशी ॥

ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवीर्यं ॥१९॥

ग्राव्णा । तुन्नः । अभिऽस्तुतः । पवित्रं । सोम । गच्छसि । दधत् । स्तोत्रे । सुऽवीर्यं ॥१९॥

हे सोम त्वं ग्राव्णा तुन्नोऽभिपीडितोऽभिषुतस्त्वं स्तोतृभिरभिष्टुतः सन् पवित्रं गच्छसि । प्राप्नोषि । किं कुर्वन् । स्तोत्रे स्तोत्रकारिणे जनाय सुवीर्यं शोभनवीर्योपेतं धनादिकं दधत् विदधत् प्रयच्छन् ॥

॥ अथ विंशी ॥

एष तुन्नो अभिष्टुतः पवित्रमति गाहते । रक्षोहा वारमव्ययं ॥२०॥

एषः । तुन्नः । अभिऽस्तुतः । पवित्रं । अति । गाहते । रक्षःऽहा । वारं । अव्ययं ॥२०॥

तुन्नः । तुद व्यथने । ग्रावभिरभिव्यथितः सुतोऽत एव सर्वैरभिष्टुत एषोऽस्म-

दीयः सोमो रक्षोहा कर्मविघ्नकरिणां राक्षसानां पापानां वा हंताभवत्। अव्ययमविमयमव्यवयवभूतं वारं वालं तेन कृतं पवित्रं दशापवित्रमति अतिक्रम्य गाहते। द्रोणकलशं प्रविशति ॥

॥ इति सप्तमस्य द्वितीये षोडशो वर्गः ॥

॥ अथैकविंशी ॥

यदंति यच्च दूरके भयं विंदति मामिह। पवमान वि तज्जहि ॥२१॥

यत्। अंति। यत्। च। दूरके। भयं। विंदति। मां। इह। पवमान। वि। तत्। जहि॥२१॥

हे पवमान पूज्यमान पुनान वा सोम यद्भयमंत्यंतिके तथा यच्च भयं दूरकेऽतिदूरे देशेऽथवेहास्मिन् प्रदेशेऽपि भयं मां विंदति लभते प्राप्नोति तद्भयं त्वं वि जहि। विशेषेण नाशय। यद्वा। इहेति यज्ञोऽयं लोको वा। अस्मिन् क्रियमाणे यज्ञेऽस्मिन् लोके वा यद्भयं व्याप्नोति तन्नाशयेत्यर्थः ॥

॥ अथ द्वाविंशी ॥

पवमानः सो अद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु नः ॥२२॥

पवमानः। सः। अद्य। नः। पवित्रेण। विचर्षणिः। यः। पोता। सः। पुनातु। नः ॥२२॥

स तादृशः प्रसिद्धो विचर्षणिः सर्वस्य द्रष्टा पवमानोऽद्येदानीमेव पवित्रेण पापशोधकेन तेजसा नोऽस्मान्पुनातु। पापरहितान् करोतु ॥

पवित्रेष्ट्यां प्रथमाज्यभागस्य याज्या यत्ते पवित्रमित्येषा। सूत्रितं च। यत्ते पवित्रमर्चिष्या कलशेषु धावतीति पवित्र इत्येते। आ० २.१२.। इति ॥

॥ सैषा सूक्ते त्रयोविंशी ॥

यत्ते पवित्रमर्चिष्यग्ने विततमंतरा। ब्रह्म तेन पुनीहि नः ॥२३॥

यत्। ते। पवित्रं। अर्चिषि। अग्ने। विऽततं। अंतः। आ। ब्रह्म। तेन। पुनीहि। नः॥२३॥

हे पवमानगुणविशिष्टाग्ने ते त्वदीयं पवित्रं शोधकं यत्स्वतेजोऽर्चिषि सौरवैद्युतादितेजस्यंतर्मध्य आ विततं आ विस्तृतं विद्यते। यद्वा हे अग्ने ते तव स्वभूतेऽर्चिषि तेजस्यंतर्मध्ये यत्पवित्रं शुद्ध्युत्पादकं सामर्थ्यमस्ति तेन तादृशेन तेजसा ब्रह्म पुत्रादिवर्धनकारि नः शरीरं पुनीहि। पापरहितं पूतं कुरु ॥

॥ अथ चतुर्विंशी ॥

यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि नः । ब्रह्मसवैः पुनीहि नः ॥२४॥

यत् । ते । पवित्रं । अर्चिऽवत् । अग्ने । तेन । पुनीहि । नः । ब्रह्मऽसवैः । पुनीहि । नः ॥२४॥

हे अग्ने पवित्रं शोधकमर्चिवदर्चिर्वत् । छंदसीर इति मतुपो वत्वं । सौरादितेजोयुक्तं ते त्वदीयं यत्तेजो विद्यते तेन स्वीयेनैव तेजसा नोऽस्मान् पुनीहि । पूतान् कुरु । किंच ब्रह्मसवैर्ब्राह्मणकर्तृकसोमाभिषवैः । यद्वा ब्रह्म सोमः । तस्याभिषवैः । नोऽस्मान्पुनीहि ॥

॥ अथ पंचविंशी ॥

उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥२५॥

उभाभ्यां । देव । सवितरिति । पवित्रेण । सवेन । च । मां । पुनीहि । विश्वतः ॥२५॥

हे सवितः सर्वस्य प्रेरक हे देव द्योतमान सोम त्वं पवित्रेण पापशोधकेन त्वदीयेन तेजसा सवेन सोमाभिषवेण च एताभ्यामुभाभ्यां विश्वतः सर्वतो मां पुनीहि । पूतं कुरु ॥

॥ इति सप्तमस्य द्वितीये सप्तदशो वर्गः ॥

॥ अथ षड्विंशी ॥

त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोम धामभिः । अग्ने दक्षैः पुनीहि नः ॥२६॥

त्रिऽभिः । त्वं । देव । सवितः । वर्षिष्ठैः । सोम । धामऽभिः । अग्ने । दक्षैः । पुनीहि । नः ॥२६॥

हे देव स्तुत्य दीप्यमान वा हे सवितः सर्वस्य स्वस्वकर्मणि चोदयितः हे सोम पवमानगुणविशिष्ट हे अग्ने त्वं वर्षिष्ठैर्वृद्धतमैः अत एव दक्षैः सामर्थ्यवद्भिस्त्रिभिर्धामभिः शरीरैरग्निवायुसूर्यात्मकैस्त्रिभिः शरीरैर्नोऽस्मान् पुनीहि । परिशुद्धान् कुरु ॥

॥ अथ सप्तविंशी ॥

पुनंतु मां देवजनाः पुनंतु वसवो धिया । विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ॥२७॥

पुनंतु । मां । देवऽजनाः । पुनंतु । वसवः । धिया । विश्वे । देवाः । पुनीत । मा । जातऽवेदः । पुनीहि । मा ॥२७॥

देवजनाः । देवानां जनो प्रादुर्भावो येषां यज्ञेष्विति देवजना यजमानाः । यद्वा । इंद्रादिदेवगणा मां पुनंतु । परिपूतं कुर्वंतु । तथा वसवो वासका देवा धियात्मीयेन कर्मणा मां पुनंतु । अथवा प्रत्यक्षः । हे विश्वे देवाः सर्वे देवा मा मां पुनीत । पूतं कुरुत । हे जातवेदः । जातानि भूतजातानि वेत्तीति यद्वा जातप्रज्ञ हे अग्ने मा मां पुनीहि ॥

॥ अथाष्टाविंशी ॥

प्र प्यायस्व प्र स्यंदस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः ॥२८॥

प्र । प्यायस्व । प्र । स्यंदस्व । सोम । विश्वेभिः । अंशुऽभिः । देवेभ्यः । उत्ऽतमं । हविः ॥२८॥

हे सोम प्रप्यायस्व । अस्मान्प्रकर्षेण वर्धय । यद्वा देवान् सोमेन वर्धय । किंच विश्वेभिरंशुभिः सर्वैस्त्वदीयैरंशुभिर्देवेभ्यो देवार्थमुत्तमं प्रशस्ततमं हविः सोमरूपं प्रस्यंदस्व । कलशादीन्प्रति प्रस्रव । प्रयच्छेति यावत् ॥

अग्नीषोमप्रणयन उप प्रियमित्येषा । सूचितं च । उप प्रियं पनिप्नतमित्यर्धर्चे आरमेत् । आ० ४.१२. । इति ॥

॥ सैषा सूक्त एकोनत्रिंशी ॥

उप प्रियं पनिप्नतं युवानमाहुतीवृधं । अगन्म बिभ्रतो नमः ॥२९॥

उप । प्रियं । पनिप्नतं । युवानं । आहुतिऽवृधं । अगन्म । बिभ्रतः । नमः ॥२९॥

प्रियं सर्वस्य प्रीणयितारं पनिप्नतमत्यंतं शब्दायमानं युवानं तरुणमाहुतिवृधमाहुतिभिर्वर्धनीयं पवमानं वयं नमो हविर्नमस्कारं वा बिभ्रतो धारयंतः संत उपागन्म । उपगच्छेम । गमेर्लुङि मंत्रे घसेति च्लेर्लुकि सति म्वोश्चेति नकारः । पनिप्नतं । पनेः स्तुत्यर्थस्य यङ्लुकि रूपं । दाधर्ति दर्धर्तीति सूत्र इतिकरणस्य प्रदर्शनार्थत्वादत्राभ्यासस्य निगागम उपधालोपश्च निपात्यते ॥

॥ अथ त्रिंशी ॥

अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम । आखुं चिदेव देव सोम ॥३०॥

अलाय्यस्य । परशुः । ननाश । तं । आ । पवस्व । देव । सोम । आखुं । चित् । एव । देव । सोम ॥३०॥

अलाय्यस्य । अर्तेरौणादिक आय्यप्रत्ययः । कपिलकादित्वाल्लत्वं । अभिगमनशीलस्य शत्रोः परशुश्छेदकः पवमानस्तमेव शत्रुं ननाश । नाशयतु । अस्मानपापान् ततो हे देव दीप्यमान सोम आपवस्व । अस्मदाभिमुख्येन गच्छ । किंच । हे देव द्योतमान स्तुत्य वा हे सोम आशुं चित् । खलु अवधारणे । सर्वस्याहंतारमपि तं शत्रुमेव बाधस्व नास्मानपापानिति ॥

॥ अथैकत्रिंशी ॥

यः पा॑वमा॒नीर॒ध्येत्यृषि॑भिः॒ संभृ॑तं॒ रसं॑ ।
सर्वं॒ स पू॒तम॑श्नाति स्वदि॒तं मा॑त॒रिश्व॑ना ॥३१॥

यः । पा॒व॒मा॒नीः । अ॒धि॒ऽएति॑ । ऋषि॑ऽभिः । संऽभृ॑तं । रसं॑ ।
सर्वं॑ । सः । पू॒तं । अ॒श्ना॒ति॒ । स्व॒दि॒तं । मा॒त॒रिश्व॑ना ॥३१॥

यो जनः पावमानीः पवमानदेवताकाः सर्वा ऋचः तद्रूपमृषिभिः सूक्तद्रष्टृभिर्मधुच्छंदःप्रभृतिभिः संभृतं संपादितं रसं वेदरसभूतं सारं सूक्तसंघमध्येति अधीते स जनः सर्वं भोज्यजातं पूतं परिशुद्धमेवाश्नाति । परिपूतं पापरहितमन्नं भक्षयति । कथमस्य पूतत्वं तत्राह । स्वस्याशनात्प्रागेव मातरिश्वना । मातर्यंतरिक्षे श्वसितीति मातरिश्वा वायुः । स च वायुः पवित्रमेव । पवित्रेण वायुना स्वदितं स्वादूकृतं परिपूतमेवान्नं पश्चात्स नरोऽश्नाति ॥

॥ अथ द्वात्रिंशी ॥

पा॒व॒मा॒नीर्यो अ॒ध्येत्यृषि॑भिः॒ संभृ॑तं॒ रसं॑ ।
तस्मै॒ सर॑स्वती दुहे क्षी॒रं स॒र्पिर्मधू॒द॒कं ॥३२॥

पा॒व॒मा॒नीः । यः । अ॒धि॒ऽएति॑ । ऋषि॑ऽभिः । संऽभृ॑तं । रसं॑ ।
तस्मै॑ । सर॑स्वती । दु॒हे॒ । क्षी॒रं । स॒र्पिः । मधु॑ । उ॒द॒कं ॥३२॥

यो ब्राह्मणः पावमानीः पवमानदेवताका ऋचः तदात्मकमृषिभिर्मधुच्छंदआदिभिः संभृतं रसं वेदसारं सूक्तसंघमध्येति अधीते तस्मै पवमानाध्ययनं कुर्वते जनाय सरस्वती सर्वत्र सरणवती वाग्देवता क्षीरं यज्ञसाधनभूतं पयः सर्पिस्तादृशं घृतं मधु मदकरमुदकं सोमं दुहे । स्वयमेव दोग्धि । एनं नरं यागादिपरं

वेदशास्त्रविदं करोतीत्यर्थः ॥ दुह प्रपूरणे । कर्मकर्तरि न दुहस्नुनमां यक्चिणाविति यकः प्रतिषेधः । लोपस्त आत्मनेपदेष्विति तलोपः ॥

॥ इति सप्तमस्य द्वितीयेऽष्टादशो वर्गः ॥

॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे दाशतय्या नवमे मंडले तृतीयोऽनुवाकः ॥

चतुर्थेऽनुवाकेऽष्टादश सूक्तानि । तत्र प्र देवमिति दशर्चं प्रथमं सूक्तं । भलंदनपुत्रस्य वत्सप्रेरार्षं पवमानसोमदेवताकं । दशमी त्रिष्टुप् शिष्टा जगत्यः । तथा चानुक्रम्यते । प्र देवं दश वत्सप्रिर्भालंदनस्त्रिष्टुबंतं हेति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र देवमच्छा मधुमंत इंदवोऽसिष्यदंत गाव आ न धेनवः ।
बर्हिषदो वचनावंत ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥१॥

प्र । देवं । अच्छ । मधुऽमंतः । इंदवः । असिस्यदंत । गावः । आ । न । धेनवः ।
बर्हिऽसदः । वचनाऽवंतः । ऊधऽभिः । परिऽस्रुतं । उस्रियाः । निःऽनिजं । धिरे ॥१॥

मधुमंतो मादकरससंयुक्ता इंदवः सोमा देवं द्योतमानं सोमात्मकमिंद्रमच्छ प्रति प्रासिष्यदंत । प्रस्यंदंते । ग्रहादिषु प्रक्षरंति ॥ स्यंदतेर्ण्यंतस्य लुङि चङि रूपं । तत्र दृष्टांतः । गाव आ न धेनवः । पयस्विन्यः प्रीणयित्र्यो गावो यथा वत्सं प्रति प्रस्रवंति तद्वत् । किंच बर्हिषदो बर्हिषि सीदंतो वचनावंतो हंभारवादिशब्दवंत उस्रियाः । गोनामैतत् । तादृश्यो गाव ऊधभिः पयोधारकैः स्वैः स्वैरूधभिः परिस्रुतं परितःस्रवणशीलं निर्णिजं शुद्धं पयोभूतं सोमरसं धिरे । दधिरे । इंद्रार्थं धारयंति ॥

॥ अथ द्वितीया ॥

स रोरुवदभि पूर्वा अचिक्रददुपारुहः श्रथयन्स्वादते हरिः ।
तिरः पवित्रं परियन्नुरु ज्रयो नि शर्याणि दधते देव आ वरं ॥२॥

सः । रोरुवत् । अभि । पूर्वाः । अचिक्रदत् । उपऽआरुहः । श्रथयन् । स्वादते । हरिः ।
तिरः । पवित्रं । परिऽयन् । उरु । ज्रयः । नि । शर्याणि । दधते । देवः । आ । वरं ॥२॥

रोरुवत् कलशादिकं प्रत्यत्यंतं शब्दं कुर्वन् स सोमः पूर्वा मुख्याः स्तोतॄणां स्तुतीरभ्यचिक्रदत्। अभिमुखमध्वनयत्। स्तुतयः साधीयस्य इति प्रतिध्वनिमंगीकारमकार्षीदित्यर्थः। किंच हरिर्हरितवर्ण उपारुहः। रोहतेस्ताच्छीलिकः क्विप्। उपारोहणशीला ऊर्ध्वं प्रादुर्भवनशीला ओषधीः श्रथयन् अग्रे विश्लेषयन् स्वादते। स्वादूकरोति। ताः फलिनीः कुर्वन् स्वादुयुक्ता विदधातीत्यर्थः। तथा पवित्रमविवालात्मकं दशापवित्रं तिरस्तिरस्कृत्य पात्राणि प्रत्यात्मनः क्षरणकाले पवित्रं व्यवधायकं कृत्वा परियन् परितो गच्छन् सोम उरु महांतं जयो वेगं करोति। ततः शर्याणि। शॄ हिंसायां। हिंसितव्यानि। यद्वा शरेण हंतव्यानि रक्षांसि नि दधते। निक्षिपति। न्यक्करोति। हिनस्तीति यावत्। पश्चाद्देवो दीप्यमानः सोमो वरं वरणीयं धनं सोमं दातृभ्यो यजमानेभ्य आ दधते। आधारयति। प्रयच्छतीत्यर्थः॥ दधातेर्लेट्यडागमे घोर्लोपो लेटि वेत्याकारलोपः॥

॥ अथ तृतीया ॥

वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता।
मही अपारे रजसी विवेविदभिव्रजन्नक्षितं पाज आ ददे॥३॥

वि। यः। ममे। यम्या। संयती इति संऽयती। मदः। साकंऽवृधा। पयसा।
पिन्वत्। अक्षिता।
मही इति। अपारे इति। रजसी इति। विऽवेविदत्। अभिऽव्रजन्। अक्षितं।
पाजः। आ। ददे॥३॥

यो मदः। माद्यत्यनेनेति मदः सोमरसो यम्या युगलभूते संयती परस्परं संगच्छमाने द्यावापृथिव्यौ विममे। विशेषेण निर्मितवान्। ततः ते साकंवृधा सहैव वर्धनशीले तथाक्षिताक्षीणे सामर्थ्यवत्यौ यथा भविष्यतस्तथा स सोमः पयसा पयोरूपेण स्वीयरसेन पिन्वत्। असिंचत्। अवर्धयदिति यावत्। किंच मही महत्यौ अत एवापारे पर्यंतरहिते रजसी। द्यावापृथिवीनामैतत्। ते द्यावापृथिव्यौ विवेविदत्। विद ज्ञाने। यङ्लुकि शतरि रूपं। अभ्यासस्वरः। इयं पृथिवी इयं द्यौरिति सर्वेषां विविच्य तेजसा प्रज्ञापयन् अभिव्रजन् अभितः सर्वतो गच्छन् सोमोऽक्षितमक्षीणमविनश्वरं पाजो बलमा ददे। स्वीकृतवान्। अत्यंतं बलवानभवदित्यर्थः॥

॥ अथ चतुर्थी ॥

स मातरा विचरन्वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदं ।
अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः ॥४॥

सः । मातरा । विऽचरन् । वाजयन् । अपः । प्र । मेधिरः । स्वधया । पिन्वते । पदं ।
अंशुः । यवेन । पिपिशे । यतः । नृऽभिः । सं । जामिऽभिः । नसते । रक्षते । शिरः ॥४॥

मेधिरः । मेधारथाभ्यामिरन्निरचाविती रन्प्रत्ययो मत्वर्थीयः । मेधावान् प्रज्ञः सोमो मातरा मातरौ जगतो निर्मात्र्यौ द्यावापृथिव्यौ विचरन् अंतरेणात्यंतं चरन् तथापोऽतरिक्षस्थितान्युदकानि वाजयन् प्रेरयन् । वजेर्ण्यंतस्य शतरि रूपं । तादृशः स्वधया सक्तुलक्षणेनान्नेन सह पदं स्वस्थानमुत्तरवेदिरूपं प्र पिन्वते । प्रकर्षेणाप्याययति । ततो नृभिः कर्मनेतृभिर्ऋत्विग्भिर्यतः संयतोऽंशुः सोमो यवेन पिपिशे । पिश अवयवे । अवयववत्त्वेन कृतः । मिश्रित इत्यर्थः । सोमस्तु यवसक्तुभिः श्रीयते खलु । सोऽयं जामिभिरेकस्मात्प्राणेरुत्पन्नाभिरंगुलीभिः संनसते संगच्छते च शिरः शीर्णं भूतजातं च रक्षते च स्वीयरसेन रक्षति । पोषयति । नसतिर्गतिकर्मा । चादिलोपे विभाषेति न निघातः ॥

॥ अथ पंचमी ॥

सं दक्षेण मनसा जायते कविर्ऋतस्य गर्भो निहितो यमा परः ।
यूना ह संता प्रथमं वि जज्ञतुर्गुहा हितं जनिम नेममुद्यतं ॥५॥

सं । दक्षेण । मनसा । जायते । कविः । ऋतस्य । गर्भः । निऽहितः । यमा । परः ।
यूना । ह । संता । प्रथमं । वि । जज्ञतुः । गुहा । हितं । जनिम । नेमं । उत्ऽयतं ॥५॥

प्रसंगात्सोमसूर्ययोराविर्भावमाह । दक्षेण प्रवृद्धेन मनसा सह संजायते । पृथिव्याः सम्यक् जायते । तथा ऋतस्योदकस्येव गर्भो गर्भस्थानीयः । यद्वा सत्यस्य यज्ञस्य मध्ये गर्भः शब्दनीयः स्तुत्यः स एव सोमः परः परस्तादंतरिक्षे यमा यमेन नियमेन देवैर्निहितः स । सूर्याद्धि वृष्टिर्भवति । तस्मात्सोमः सूर्यात्मकतयावस्थित इत्यर्थः । एवं यूना । हेत्यवधारणे । युवानावेव संतौ तौ प्रथमं जननकाले विजज्ञतुः । अयं सोमोऽयं सूर्य इति विशेषेण ज्ञायते । तयोश्चार्धं

जनिम जन्म गुहा गुहायां हितं। निहितं भवति। तयोर्नेममर्धं चोद्यतं प्रकाशितं भवति। दिवा सूर्यः प्रादुर्भवति रात्रौ चंद्रमा इति ॥

॥ इति सप्तमस्य द्वितीय एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

मंद्रस्यं रूपं विविदुर्मनीषिणः श्येनो यदंधो अभरत्परावतः ।
तं मर्जयंत सुवृधं नदीष्वाँ उशंतमंशुं परियंतमृग्मियं ॥६॥
मंद्रस्यं। रूपं। विविदुः। मनीषिणः। श्येनः। यत्। अंधः। अभरत्। पराऽवतः।
तं। मर्जयंत। सुऽवृधं। नदीषु। आ। उशंतं। अंशुं। परिऽयंतं। ऋग्मियं ॥६॥

मनीषिणः प्राज्ञा यष्टारो मंद्रस्य मदकरस्य रसस्य सोमस्य रूपं विविदुः। जानंति। यदंधो यत्सोमलक्षणमन्नं श्येनो गायत्रीरूपो पक्षी परावतो दूराद्युलोकादाभरत् आजहार। हृग्रहोर्भश्छंदसीति भकारः। तं तादृशं सुवृधं सुष्ठु वर्धमानं सुवर्धयितारं वांशुं सोमं नदीषु नदमानासु वसतीवर्याख्यास्वप्स्वामर्जयंत। ऋत्विज आशोधयंति। अलंकुर्वंति वा। कीदृशं। उशंतं देवान् कामयमानं परियंतं परितो गच्छंतमृग्मियमृगर्हं स्तुत्यं सोममामर्जयंतीति ॥

॥ अथ सप्तमी ॥

त्वां मृजंति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितं ।
अव्यो वारेभिरुत देवहूतिभिर्नृभिर्यतो वाजमा दर्षि सातये ॥७॥
त्वां। मृजंति। दश। योषणः। सुतं। सोम। ऋषिऽभिः। मतिऽभिः। धीतिऽभिः। हितं।
अव्यः। वारेभिः। उत। देवहूतिऽभिः। नृऽभिः। यतः। वाजं। आ। दर्षि। सातये ॥७॥

हे सोम योषणो द्वाभ्यां पाणिभ्यां विभज्योत्पन्ना दश दशसंख्याका अंगुलय ऋषिभिर्मधुच्छंदःप्रभृतिभिः सुतमभिषुतं हितं पात्रेषु निहितं त्वां मतिभिः स्तुतिभिर्धीतिभिः कर्मभिश्चाव्यो वारेभिरविवालैः पवित्रैर्मृजंति। शोधयंति। उतापि च देवहूतिभिर्देवाह्वानयुक्तैर्नृभिः कर्मनेतृभिर्ऋत्विग्भिर्यतो ग्रहेषु संयमितः संगृहीतस्त्वं सातये दानाय वाजमन्नमा दर्षि। आविदारयसि। विवृतं करोषि। स्तोतृभ्योऽन्नादिकं प्रयच्छसीति यावत् ॥

॥ अथाष्टमी ॥

परिप्रयंतं वय्यं सुषंसदं सोमं मनीषा अभ्यनूषत स्तुभः ।
यो धारया मधुमाँ ऊर्मिणा दिव इयर्ति वाचं रयिषाळमर्त्यः ॥८॥

परिऽप्रयंतं । वय्यं । सुऽसंसदं । सोमं । मनीषाः । अभि । अनूषत । स्तुभः ।
यः । धारया । मधुऽमान् । ऊर्मिणा । दिवः । इयर्ति । वाचं । रयिषाट् । अमर्त्यः ॥८॥

परिप्रयंतं पात्राणि परितः प्रगच्छंतं वय्यं देवैः काम्यमानं सुसंसदं शोभन-संसदनं सोमं मनीषा मनस ईशित्र्यः स्तुभः स्तुतयोऽभ्यनूषत । अभिष्टुवंति । वय्यं । वी गत्यादिष्वित्यस्माद्यति भय्यप्रवय्ये च छंदसि । पा० ६. १. ८३. । इति निपातितः । अत्रानुपसर्गस्यापि निपातनं भवति । मधुमान् मदकररसवान् यः सोमो धारया स्वीययोर्मिणा वसतीवर्याख्येनोदकेन सह दिव आकाशाद्द्रोणकलश आपतति । रयिषाट् शत्रुधनानामभिभवितामर्त्यो मनुष्यधर्मरहितः स सोमो वाचमियर्ति । प्रेरयति । तदा हि स्तोतारः स्तुवंति ॥

॥ अथ नवमी ॥

अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति ।
अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इंदुर्वरिवो विदत्प्रियं ॥९॥

अयं । दिवः । इयर्ति । विश्वं । आ । रजः । सोमः । पुनानः । कलशेषु । सीदति ।
अत्ऽभिः । गोभिः । मृज्यते । अद्रिऽभिः । सुतः । पुनानः । इंदुः । वरिवः ।
विदत् । प्रियं ॥९॥

अयं सोमो दिवो द्युलोकाद्विश्वं रज उदकमियर्ति । अभिप्रापयति । किंच पुनानो दशापवित्रेण पूयमानः सोमः कलशेषु द्रोणनामसु सीदति । तथाद्रिभिर्ग्रावभिरद्भिर्वसतीवर्याख्याभिर्गोभिर्गोविकारैः क्षीरदध्यादिभिश्च मृज्यते । शोध्यते । अलंक्रियते । ततः पुनानः पूत इंदुः सोमः प्रियं प्रियतरं प्रीणनकारि वा वरिवो वरणीयं धनं विदत् । स्तोतृभ्यो लंभयति । प्रयच्छतीति यावत् ॥

॥ अथ दशमी ॥

एवा नः सोम परिषिच्यमानो वयो दधच्चित्रतमं पवस्व ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरं ॥१०॥

एव । नः । सोम । परिऽसिच्यमानः । वयः । दधत् । चित्रऽतमं । पवस्व ।
अद्वेषे इति । द्यावापृथिवी इति । हुवेम । देवाः । धत्त । रयिं । अस्मे इति । सुऽवीरं ॥१०॥

अयं प्रत्यक्षकृतः । हे सोम दधत्प्रयच्छंस्त्वं परिषिच्यमानः परितोऽद्भिर्गोभिर्वा सिच्यमान एव चित्रतमं चित्रं नानाविधं चायनीयतमं वा वयोऽन्नं नोऽस्मभ्यं पवस्व । प्रापय । प्रयच्छेति यावत् । किंच अद्वेषे द्वेषरहिते द्यावापृथिवी द्यावापृथिव्यौ हुवेम । हविःप्रदानार्थं वयमाह्वयेम । हे देवा यूयं च सुवीरं । वीरः कर्मणि समर्थः पुत्रः । तादृशपुत्रोपेतं रयिं धनमस्मे अस्मासु धत्त । निधत्त ॥

॥ इति सप्तमस्य द्वितीये विंशो वर्गः ॥

इषुर्नेति दशर्चं द्वितीयं सूक्तं । आंगिरसस्य हिरण्यस्तूपस्यार्षं पवमानसोमदेवताकं । नवमीदशम्यौ त्रिष्टुभौ । शिष्टा जगत्यः । तथा चानुक्रांतं । इषुर्न हिरण्यस्तूपोऽंते त्रिष्टुभाविति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

इषुर्न धन्वन्प्रति धीयते मतिर्वत्सो न मातुरुप सर्ज्यूधनि ।
उरुधारेव दुहे अग्र आयत्यस्य व्रतेष्वपि सोम इष्यते ॥१॥

इषुः । न । धन्वन् । प्रति । धीयते । मतिः । वत्सः । न । मातुः । उप । सर्जि । ऊधनि ।
उरुधाराऽइव । दुहे । अग्रे । आऽयती । अस्य । व्रतेषु । अपि । सोमः । इष्यते ॥१॥

अस्मिन्पवमानरूप इंद्रे मतिर्मननीयास्मदीया स्तुतिः प्रति धीयते । अस्माभिर्निधीयते वा । दधाते रूपं । तत्र दृष्टांतः । इषुर्न यथेषुः शरो धन्वन् धनुषि प्रतिधीयते तद्वत् । किंच ऊधनि सर्वस्य पोषयितृत्वेनोधःस्थानीय इंद्रे सोमो मदार्थमस्माभिरुपसर्जि । उपसृज्यते । कथमिव । मातुर्गोरूधनि पयोधारके वत्सो न वत्सो यथा पयःपानार्थं सृज्यते तद्वत् । उरुधारेव बहुविधपयोधारा गौरिवाग्रे वत्सस्य पुरत आयती गच्छंती सती पयो दुहे । दुग्धे । तथा सोऽयमिंद्रो वत्सभूतेभ्यः स्तोतृभ्यः पुरतो गच्छन् बहुविधान्कामान्दुग्धे । किंच । अस्यैतादृशस्य व्रतेष्वपि सोम इष्यते । यष्टृभिः प्रेर्यते खलु ॥

॥ अथ द्वितीया ॥

उपो मतिः पृच्यते सिच्यते मधु मंद्राजनी चोदते अंतरासनि ।
पवमानः संतनिः प्रघ्नतामिव मधुमान्द्रप्सः परि वारमर्षति ॥२॥

उपो इति । मतिः । पृच्यते । सिच्यते । मधु । मंद्रऽअजनी । चोदते । अंतः । आसनि ।
पवमानः । संऽतनिः । प्रघ्नतांऽइव । मधुऽमान् । द्रप्सः । परि । वारं । अर्षति ॥२॥

अस्मिन्पवमानरूप इंद्रे मतिः स्तुतिरूपो पृच्यते । उपपृच्यते । स्तोतृभिः संयोज्यते । पृची संपर्के । तथा मधु मदकरः सोम इंद्रार्थं सिच्यते । अद्भिर्यव-सक्तुभिश्च सिक्तो भवति । ततश्च मंद्राजनी । अज गतिक्षेपणयोरित्यस्य ल्युटि ङीपि रूपं । मदकरस्य रसस्य प्रेरयित्री सोमधारा तस्येंद्रस्यासन्यास्येऽंतर्मध्ये चोदते । यष्टृभिः प्रेर्यते । आस्यशब्दस्य पद्दन्नोमासित्यादिनासन्नित्यादेशः । किंच । संतनिर्ग्रहादिषु सम्यग्विस्तृतो मधुमान् मदकररसवान् पवमानः पूयमानः सोमो द्रप्सो द्रुतगमनशीलो यद्वा क्षिप्रं हननशीलः सन् वारमविवालमयं पवित्रं परितोऽर्षति । आगच्छति । तत्र दृष्टांतः । प्रघ्नतामिव । प्रकर्षेण हंतॄणां योद्धॄणां संतनिः सम्यग्विसृष्टः शरो यथा शीघ्रं प्राप्यमभितो गच्छति तद्वत् ॥

॥ अथ तृतीया ॥

अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेर्ऋतं यते ।
हरिरक्रान्यजतः संयतो मदो नृम्णा शिशानो महिषो न शोभते ॥३॥

अव्ये । वधूऽयुः । पवते । परि । त्वचि । श्रथ्नीते । नप्तीः । अदितेः । ऋतं । यते ।
हरिः । अक्रान् । यजतः । संऽयतः । मदः । नृम्णा । शिशानः । महिषः । न । शोभते ॥३॥

वधूयुः । वधूभूता वसतीवर्य एकधनासहिता आपः । तद्वान् सोमोऽव्येऽवेः स्वभूते त्वचि चर्मणि परि पवते । परितो वर्तते । पूतो भवति । किंच । नप्तीर्नप्त्रीः । नप्तृशब्दश्चतुर्थापत्यवाची । सोमस्य नप्त्रीः । सोमो ह्योषधीनामग्रे रेतो निषिंचति । प्रजापते रेतो देवा देवानां रेतो वर्षं वर्षस्य रेत ओषधय इति श्रुतेः । यद्वा नप्तृशब्दोऽपत्यवाची । तस्यापत्यानि । सोमः सुधामयैः स्वकिरणैरोषधीर्वर्धयति । तस्मादपत्यभूता अदितेः । पृथिवीनामैतत् । अदीनायाः पृथिव्या उत्पन्ना ओष-धीर्ऋतं सत्यरूपं यज्ञं यते गच्छते यजमानाय श्रथ्नीते । अग्रभागे फलिनीः

कर्तुं विशेषयति । किंच । हरिर्हरितवर्णो यजतः सर्वैर्यष्टव्यः अत एव संयतो ग्रहादिषु संगृहीतो मदः । माद्यत्यनेनेति मदः सोमः । तादृशोऽक्रान् । क्रामति । पात्रेष्ववतिष्ठते । यद्वा । शत्रूनतिक्रामति । क्रमेर्लुङि तिपि बहुलं छंदसीतीडागमाभावाद्वृद्धौ कृतायां सिज्लोपे सति हल्ङ्यादिना तिपो लोपे मो नो धातोरिति मत्वे कृते रूपं ॥ अत एव सोम नृम्णा स्वबलानि शिशानस्तीक्ष्णीकुर्वन् अथवा शत्रुबलानि तनूकुर्वन् महिषो न । महन्नामैतत् । महानिव सर्वत्र व्याप्त इव शोभते । स्वतेजसा सर्वत्र दीप्यते । यद्वा नः संप्रत्यर्थे । इदानीमेवंगुणयुक्तो महान् सोमः शोभत इति ॥

॥ अथ चतुर्थी ॥

उक्षा मिमाति प्रति यंति धेनवो देवस्य देवीरुप यंति निष्कृतं ।
अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ॥४॥
उक्षा । मिमाति । प्रति । यंति । धेनवः । देवस्य । देवीः । उप । यंति । निःऽकृतं ।
अति । अक्रमीत् । अर्जुनं । वारं । अव्ययं । अत्कं । न । निक्तं । परि । सोमः । अव्यत ॥४॥

उक्षा रेतसः सेक्ता वृषभः पुरतो मिमाति । शब्दायते । माङ् माने शब्दे च । तं वृषभं धेनवो गावः प्रतियंति । अनुगच्छंति । तथा देवस्य द्योतमानस्य निष्कृतं संस्कृतं स्थानं देवीर्देव्य उपयंति । उपगच्छंति । अनेनार्धेन सोमस्तुतिश्चाभिधीयते । सोमः सन् द्रोणकलशाभिगमनकाले शब्दं करोति । तमनु धेनवः प्रीणयित्र्यः स्तुतयः परियंति । देवस्य स्थानं स्तुतयोऽभिगच्छंति । तथा सोऽयं सोमोऽर्जुनं श्वेतवर्णमव्ययमविमयमविस्वभूतं वारं वालं पवित्रमत्यक्रमीत् । अतिक्रामति । अतिक्रम्य पात्राणि गच्छतीत्यर्थः । किंच । सोम अत्कं न आत्मीयं कवचमिव निक्तमुज्ज्वलं श्रपणद्रव्यं पर्यव्यत । परितः संवृणोति ॥

॥ अथ पंचमी ॥

अमृक्तेन रुशता वाससा हरिरमर्त्यो निर्णिजानः परि व्यत ।
दिवस्पृष्ठं बर्हणा निर्णिजे कृतोपस्तरणं चम्वोर्नभस्मयं ॥५॥
अमृक्तेन । रुशता । वाससा । हरिः । अमर्त्यः । निःऽनिजानः । परि । व्यत ।
दिवः । पृष्ठं । बर्हणा । निःऽनिजे । कृत । उपऽस्तरणं । चम्वोः । नभस्मयं ॥५॥

अमर्त्यो मनुष्यधर्मरहितो हरिर्हरितवर्णः सोमो निर्णिजान उदकेन शोध्यमानः सन् अमृक्तेन। मृजी शोधालंकारयोः। अनिर्णिक्तेनापि रुशता स्वतः शुक्लवर्णेन पयोरूपेण वाससा परिव्यत। परित आच्छादयति। सोमे परिपूते गव्येन पयसा मिश्रीकुर्वंति खलु। तदुच्यते। ततः सोऽयं सोमो दिवो द्युलोकस्य पृष्ठं पृष्ठभागे तिष्ठंतमादित्यं बर्हणा बर्हणाय पापानामुद्यमनकारिणे पापनाशिने निर्निजे निर्निजनाय परिपवनाय कृत। द्युलोकेऽकार्षीत्। स हि स्वदीप्त्या सर्वं निर्णेक्ति। कृत। कृणोतेर्लुङि ह्रस्वादिति सिचो लोपः। तदेवाह। चम्वोः। द्यावापृथिवीनामैतत्। चमंति भक्षयंत्यत्र देवा मनुष्या इति। तयोरुपस्तरणमाच्छादनशीलं नभस्मयमादित्यमयमादित्यस्य स्वभूतं तेजश्च सर्वेषां निर्णेजनायाकार्षीत्॥

॥ इति सप्तमस्य द्वितीय एकविंशो वर्गः ॥

॥ अथ षष्ठी ॥

सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते।
तंतुं ततं परि सर्गास आशवो नेंद्रादृते पवते धाम किं चन ॥६॥
सूर्यस्यऽइव। रश्मयः। द्रवयित्नवः। मत्सरासः। प्रऽसुपः। साकं। ईरते।
तंतुं। ततं। परि। सर्गासः। आशवः। न। इंद्रात्। ऋते। पवते। धाम। किं। चन ॥६॥

सूर्यस्य रश्मयः सर्वस्य प्रेरकस्य सुवीर्यस्य वादित्यस्य रश्मयः सर्वतो व्यापकाः किरणा इव द्रावयित्नवः सर्वत्र द्रवणशीला मत्सरासो मदकराः प्रसुपः शत्रूणां प्रस्वापका हंतार आशवो ग्रहेषु चमसेषु च व्याप्ताः सर्गासः सृज्यमानाः सोमास्ततं विस्तृतं तंतुं तंतुभिः कृतं वस्त्रं साकं सह युगपत् परीरते। परितो गच्छंति। ते सोमा इंद्रादृत इंद्रं वर्जयित्वान्यत्किं चन धाम देवशरीरं लक्षीकृत्य न पवते। न गच्छंति। एकवचनं छांदसं। न गच्छंति। किं त्विंद्रस्यैव धाम प्रति गच्छंति। इंद्रस्य धाम्नो यष्टव्यत्वं च अयाळिंद्रस्य प्रिया धामानि। वाज० सं० २१.४७.। इति मंत्रवर्णादवगम्यते॥

॥ अथ सप्तमी ॥

सिंधोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत।
शं नो निवेशे द्विपदे चतुष्पदेऽस्मे वाजाः सोम तिष्ठंतु कृष्टयः ॥७॥

सिंधोःऽइव। प्रवणे। निम्ने। आशवः। वृषऽच्युताः। मदासः। गातुं। आशत।
शं। नः। निऽवेशे। द्विऽपदे। चतुःऽपदे। अस्मे इति। वाजाः। सोम। तिष्ठंतु। कृष्टयः॥७॥

वृषच्युताः। वृष हिंसासंक्लेशनदानेष्वपि। वृषभिः सोमस्य दातृभिर्ऋत्विग्भिश्च्युताः परिस्तुता मदासो मदकारिणः सोमाः स्तुतिभिः प्राप्नव्य इंद्रे गातुं गमनमाशत। प्राप्नुवंति। तत्र दृष्टांतः। सिंधोरिव प्रवणे। प्रगच्छंत्युदकानि यत्रेति तत्प्रवणं। तस्मिन्निम्ने स्थले सिंधोर्नद्या आशवो व्याप्ता आपो यथा गच्छंति तद्वत्। अथ प्रत्यक्षः। हे सोम नोऽस्माकं निवेशे स्वगृहं प्रति प्रवेशने निर्गमने वा द्विपदे पुत्रादिकाय चतुष्पदे गवादिकाय पशवे शं सुखं कुरु। किंच हे सोम अस्मे अस्मासु वाजा अन्नानि कृष्टयः पुत्रादिकाः प्रजाश्च तिष्ठंतु। अन्नादिकं देहीत्यर्थः॥

॥ अथाष्टमी ॥

आ नः पवस्व वसुमद्धिरण्यवदश्वावद्गोमद्यवमत्सुवीर्यं।
यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः॥८॥

आ। नः। पवस्व। वसुऽमत्। हिरण्यऽवत्। अश्वऽवत्। गोऽमत्। यवऽमत्। सुऽवीर्यं।
यूयं। हि। सोम। पितरः। मम। स्थन। दिवः। मूर्धानः। प्रऽस्थिताः। वयःऽकृतः॥८॥

हे सोम त्वं वसुमद्वसुयुक्तं हिरण्यवत् कनकादिसहितमश्ववद्गोमत् गवाश्वसहितं यवमत्। यवो नाम धान्यविशेषः। धान्यविशिष्टं सुवीर्यं शोभनवीर्योपेतं धनं नोऽस्मभ्यमापवस्व। आप्रापय। प्रयच्छेति यावत्। किंच। हे सोम यतस्त्वं मम पितॄणामंगिरसामपि पितासि ततो यूयमेव मम पितरः स्थन। भवथ। पितृबहुत्वमत्र सोमस्याभिधीयते। कीदृशाः। दिवो द्युलोकस्य मूर्धानो मूर्धवदुच्छ्रिताः। कर्मभिः स्वर्गादिकमलभंतेत्यर्थः। प्रस्थिताः सर्वदा कर्मकरणार्थं स्थिताः। वयस्कृतो हवीरूपस्यान्नस्य कर्तारः। तादृशा मम पितरस्त्वं भवसि॥

॥ अथ नवमी ॥

एते सोमाः पवमानास इंद्रं रथा इव प्र ययुः सातिमच्छ।
सुताः पवित्रमति यंत्यव्यं हित्वी वव्रिं हरितो वृष्टिमच्छ॥९॥

एते। सोमाः। पर्वमानासः। इंद्रं। रथाःऽइव। प्र। ययुः। सातिं। अच्छ।
सुताः। पवित्रं। अति। यंति। अव्यं। हित्वी। वव्रिं। हरितः। वृष्टिं। अच्छ ॥९॥

पवमानासः पवित्रेण पूयमाना एतेऽस्मदीयाः सोमाः सातिं। षण संभक्तौ। कर्मणि क्तिन्। सर्वैः संभजनीयमिंद्रमच्छ प्रययुः। प्रकर्षेण गच्छंति। तत्र दृष्टांतः। रथा इव इंद्रस्य रथा यथा सातिं। षो अंतकर्मणि। ऊतियूतीत्यादिना निपातितः। सीयते म्रियतेऽस्मिन्निति सातिः संग्रामः। तमच्छ तं प्रति प्रगच्छंति तद्वत्। किंच सुता ग्रावभिरभिषुताः सोमा अव्यमविवालभवं पवित्रमतियंति। अतीत्य गच्छंति। तेऽमी हरितो हरितवर्णा अश्वाः। यद्वा हरितस्त आदित्यवाहनरूपा अश्वा भूत्वा वव्रिं। वृणोति शरीरमिति वव्रिर्जरा। आदृगमहनेति किप्रत्ययः। सर्वांगव्यापिनीं जरां हित्वी हित्वा तरुणाः संतो वृष्टिमच्छ वृष्टिं गमयितुं गच्छंति। हित्वी। जहातेश्च क्त्वि। पा० ७.४.४३। इति ह्यादेशः। स्नात्व्यादयश्चेति छंदसि निपातितं ॥

॥ अथ दशमी ॥

इंद्विंद्राय बृहते पवस्व सुमृळीको अनवद्यो रिशादाः।
भरा चंद्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः ॥१०॥
इंदो इति। इंद्राय। बृहते। पवस्व। सुऽमृळीकः। अनवद्यः। रिशादाः।
भर। चंद्राणि। गृणते। वसूनि। देवैः। द्यावापृथिवी इति। प्र। अवतं। नः ॥१०॥

हे इंदो सोम त्वं बृहते महत इंद्राय तदर्थं पवस्व। पात्रेषु क्षर। इंद्रं प्रत्यागच्छ वा। कीदृशः। सुमृळीकः। इंद्रस्य सुष्ठु सुखयिता। अत एवानवद्यो गर्हारहितो रिशादा रिशतां बाधकानामसिता। एतादृशस्त्वमिंद्राय पवस्व। किंच। गृणते स्तुवते मह्यं चंद्राण्याह्लादकानि वसूनि धनानि भर। प्रयच्छ। किंच हे द्यावापृथिवी युवां च पवमाने सत्यौ देवैः सुभगैर्धनैः सह नोऽस्मान् प्रावतं। प्ररक्षतं ॥

॥ इति सप्तमस्य द्वितीये द्वाविंशो वर्गः ॥

चिरस्मा इति दशर्चं तृतीयं सूक्तं वैश्वामित्रस्य रेणोरार्षं दशमी त्रिष्टुप् शिष्टा जगत्यः। पवमानः सोमो देवता। चिरस्मै रेणुरित्यनुक्रांतं। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि ।
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥१॥

त्रिः । अस्मै । सप्त । धेनवः । दुदुह्रे । सत्यां । आऽशिरं । पूर्व्ये । विऽओमनि ।
चत्वारि । अन्या । भुवनानि । निःऽनिजे । चारूणि । चक्रे । यत् । ऋतैः । अवर्धत ॥१॥

अस्मै पवमानाय पूर्व्ये पूर्वैः कृते व्योमनि । विविधमोमावनं गमनं देवानामत्रेति व्योम यज्ञः । तस्मिन्स्थिताय । यद्वा प्रत्ने व्योमन्यंतरिक्षे वर्तमानाय त्रिः सप्तैकविंशतिसंख्याका धेनवः प्रीणयित्र्यो गावः सत्यां यथार्थभूतामाशिरमाश्रयणसाधनं क्षीरादि दुदुह्रे । दुहंति । यद्वा त्रिः सप्त द्वादश मासाः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंश इत्येतैः सर्वैः सह गोषु पय उत्पाद्यते तद्गावो दुहंत इति । किंच अयं सोमोऽन्यान्यानि चत्वारि भुवनान्युदकानि वसतीवरीस्तिस्रश्चैकधना इति तानि चतुःसंख्याकानि चारूणि कल्याणान्युदकानि निर्णिजे निर्णजनाय परिशोधनाय परिपोषणाय वा चक्रे । कदा करोति । यद्यदायमृतैर्यज्ञैरवर्धत वर्धितवान् तदा करोति ॥

॥ अथ द्वितीया ॥

स भिक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे ।
तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः ॥२॥

सः । भिक्षमाणः । अमृतस्य । चारुणः । उभे इति । द्यावा । काव्येन । वि । शश्रथे ।
तेजिष्ठाः । अपः । मंहना । परि । व्यत । यदि । देवस्य । श्रवसा । सदः । विदुः ॥२॥

स पवमानश्चारुणः कल्याणस्यामृतस्योदकस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञा । चतुर्थ्यर्थे बहुलमिति षष्ठी । चारूदकं भिक्षमाणो यष्टृभिर्याच्यमानः सन् उभे । द्यावादेशस्य द्वंद्वे विहितत्वादत्रोत्तरपदाभावे द्वंद्वः प्रतीयते । उभे द्यावापृथिव्यौ काव्येन कविकर्मणा विशश्रथे । विवृते करोति । यज्ञनिमित्तेनोदकेन संपूरयतीत्यर्थः । किंच । तेजिष्ठातिशयेन दीप्तान्यप उदकानि मंहना महत्त्वेन परिव्यत । वरणार्थं परित आच्छादयति । यदि यदृत्विजो देवस्य द्योतमानस्य सोमस्य सदः स्थानं श्रवसा हविषा युक्ताः

संतो विदुर्योगार्थं जानंति लभंति तदा परित आवृणोतीति। विद् ज्ञाने। सिज-भ्यस्तेति झेर्जुसादेशः ॥

॥ अथ तृतीया ॥

ते अस्य संतु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु ।
येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत ॥३॥

ते। अस्य। संतु। केतवः। अमृत्यवः। अदाभ्यासः। जनुषी इति। उभे इति। अनु।
येभिः। नृम्णा। च। देव्या। च। पुनते। आत्। इत्। राजानं। मननाः। अगृभ्णत ॥३॥

अस्यैतादृशस्य सोमस्य केतवः प्रज्ञापकाः सर्वैश्रायनीया अमृत्यवो मरणधर्म-रहिता अत एवादाभ्यासः। दभेश्चेति वक्तव्यमिति ण्यत्। परैरहिंस्यास्ते तादृशा अस्य रश्मय उभे जनुषी जन्मनी स्थावरजंगमात्मके द्वे अनु लक्षीकृत्य संतु। रक्षंतु। ओषधीनामयं सोमो रेतो निषिंचति यज्ञे मनुष्याणां च धाराः स्रवंति खलु। सोऽयं येभिर्यैः केतुभिर्नृम्णा नृम्णानि बलानि देव्या देवार्हाणि चान्नानि पुनते प्रेरयति। आदिदभिषवानंतरमेव राजानं सोमं मनना मननीयाः स्तुतयोऽगृभ्णत। परिगृह्णंति। प्राप्नुवंतीत्यर्थः। हृग्रहोरिति भकारः ॥

॥ अथ चतुर्थी ॥

स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा ।
व्रतानि पानो अमृतस्य चारुण उभे नृचक्षा अनु पश्यते विशौ ॥४॥

सः। मृज्यमानः। दशऽभिः। सुकर्मऽभिः। प्र। मध्यमासु। मातृषु। प्रऽमे। सचा।
व्रतानि। पानः। अमृतस्य। चारुणः। उभे इति। नृऽचक्षाः। अनु। पश्यते। विशौ ॥४॥

स पवमानः सुकर्मभिः शोभनकर्मयुक्ताभिर्दशभिर्दशसंख्याकाभिरंगुलीभिर्मृ-ज्यमानः स सचाग्नौ प्रास्ताहुतिरित्यादिक्रमेणापां सहायः प्रमे लोकान् प्रमातुं मध्यमास्वंतरिक्षस्थितास्ववतिष्ठते ॥ प्रमे। प्रपूर्वान्मातेः क्विपि ङयि आत इति योगविभागादाकारलोपः ॥ किंच नृचक्षा नृणां द्रष्टा पवमानश्चारुणः कल्याणस्यामृतस्योदकस्य वृष्ट्यर्थं व्रतानि यागादिकर्माणि पानो रक्षन् उभे विशौ मनुष्यान् देवांश्चांतरिक्षेण गच्छन् अनुपश्यते। अनुपश्यति। मनुष्यान-भिमतदानेन देवान् हविःप्रदानेनेति ॥

॥ अथ पंचमी ॥

स मर्मृजान इंद्रियाय धायस ओभे अंता रोदसी हर्षते हितः ।
वृषा शुष्मेण बाधते वि दुर्मतीरादेदिशानः शर्यहेव शुरुधः ॥५॥

सः । मर्मृजानः । इंद्रियाय । धायसे । आ । उभे इति । अंतरिति । रोदसी इति । हर्षते । हितः ।
वृषा । शुष्मेण । बाधते । वि । दुःऽमतीः । आऽदेदिशानः । शर्यहाऽइव । शुरुधः ॥५॥

मर्मृजानः पवित्रेण मृज्यमानः स पवमानो धायसे जगतो धारकायेंद्रियायेंद्रस्य पर्याप्ताय बलाय तदर्थमुभे रोदसी । कालाध्वनोरिति द्वितीया । उभयोर्द्यावापृथिव्योरंतर्हितो मध्ये वर्तमानः सन् आ हर्षते । सर्वतो गच्छति । इंद्रस्य हि सोमेन बलं भवति । वृषा कामानामुदकानां वा वर्षकः सोऽयं शुष्मेण शोषकेण बलेन दुर्मतीर्दुष्टबुद्धीनसुरान् विबाधते । विशेषेण पीडयति । किं कुर्वन् । शुरुधः शुचा रुंधति परानिति । पृषोदरादिः । दुःखकारिणोऽसुराना-देदिशानः पुनः पुनराह्वयन् हंति । तत्र दृष्टांतः । शर्यहेव हननसाधनैरिषुभिर्हंता वीरः प्रतिभटान् यथा हिनस्ति तद्वत् ॥

॥ इति सप्तमस्य द्वितीये त्रयोविंशो वर्गः ॥

॥ अथ षष्ठी ॥

स मातरा न ददृशान उस्रियो नानददेति मरुतामिव स्वनः ।
जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ॥६॥

सः । मातरा । न । ददृशानः । उस्रियः । नानदत् । एति । मरुताम्ऽइव । स्वनः ।
जानन् । ऋतं । प्रथमं । यत् । स्वःऽनरं । प्रऽशस्तये । कं । अवृणीत । सुऽक्रतुः ॥६॥

स पवमानो मातरा मातरौ द्यावापृथिव्यौ ददृशानः पुनःपुनः पश्यन् ततो नानदत् भृशं शब्दं कुर्वन् एति । सर्वत्र गच्छति । तत्र दृष्टांतः । उस्रियो न । उस्रियेति गोनाम । तस्य स्वरूपतो वत्सो यथा मातरं गां पश्यन् शब्दं करोति तद्वत् । किंच । मरुतामिव यथा मरुतां गणः स्वनः । पचाद्यजंतः । स्वनं कुर्वन् सर्वतो गच्छति तद्वत् । यदुदकं स्वर्णरं । स्वरिति सर्वपर्यायः । सर्वमनुष्यहितं भवति । सर्वे हि मनुष्या उदके संगच्छंते । तत्कार्यत्वात् तादृशं प्रथमं मुख्यमृ-

तमुदकं जानन् विद्वान् सुक्रतुः शोभनकर्मा सुप्रज्ञो वा स पवमानः प्रशस्तये प्रशंसनायात्मस्तोत्रकरणाय कं मनुष्यमवृणीत । समभजत । नान्यमस्मद्व्यतिरिक्तमित्यर्थः ॥

॥ अथ सप्तमी ॥

रुवति भीमो वृषभस्तविष्यया शृंगे शिशानो हरिणी विचक्षणः ।
आ योनिं सोमः सुकृतं नि षीदति गव्ययी त्वग्भवति निर्णिगव्ययी ॥७॥

रुवति । भीमः । वृषभः । तविष्यया । शृंगे इति । शिशानः । हरिणी इति । विऽचक्षणः ।
आ । योनिं । सोमः । सुऽकृतं । नि । सीदति । गव्ययी । त्वक् । भवति । निःऽनिक् । अव्ययी ॥७॥

भीमः शत्रूणां भयंकरो वृषभः कामानामुदकानां वावर्षणो विचक्षणः सर्वस्य विदर्शनशीलः स पवमानस्तविष्यया । तु इति वृद्ध्यर्थः । अस्माद्च इः । उ० ४.१३८. । इतीप्रत्ययः । तस्मादिच्छायामर्थे क्यच् । सर्वप्रातिपदिकेभ्यः । पा० ७.१.५१. । इति सुगागमः । आत्मनो बलेच्छया । हरिणी हरितवर्णे द्वे शृंगे शिशानस्तीक्ष्णीकुर्वन् द्रोणकलशं प्रति द्वाभ्यां धाराभ्यां स्थाल्या ग्रहणं गृह्णाति । तदुच्यते । ते धारारूपशृंगे तीक्ष्णीकुर्वन् रुवति । शब्दायते । रु शब्दे । बहुलं छंदसीति शः । ततः स सोमः सुकृतं सुष्ठु कृतं योनिं स्वस्थानं द्रोणकलशमा निषीदति । समंतात्तिष्ठति । तस्य सोमस्य निर्णिक् निर्नेक्त्री परिशोधयित्री गव्ययी गोमयी त्वग्भवति । आनडुहे हि चर्मणि सोमाभिषवः । एवमव्ययी अविमयी त्वक् निर्नेक्त्री भवति । तद्धि दशापवित्रापेक्ष्यमभिहितं ॥

॥ अथाष्टमी ॥

शुचिः पुनानस्तन्वमरेपसमव्ये हरिर्न्यधाविष्ट सानवि ।
जुष्टो मित्राय वरुणाय वायवे त्रिधातु मधु क्रियते सुकर्मभिः ॥८॥

शुचिः । पुनानः । तन्वं । अरेपसं । अव्ये । हरिः । नि । अधाविष्ट । सानवि ।
जुष्टः । मित्राय । वरुणाय । वायवे । त्रिऽधातु । मधु । क्रियते । सुकर्मऽभिः ॥८॥

अरेपसं पापरहितं । यद्वा रिपि गतौ । गतिरहितं । पात्रे स्थितमित्यर्थः । तादृशं तन्वमात्मीयं शरीरं पुनानः शोधयन् अत एव शुचिः पूतो दीप्यमानो वा

हरिर्हरितवर्णः सोमः सानवि सानुनि समुच्छ्रितेऽव्येऽविवालकृते दशापवित्रे न्यधाविष्ट । ऋत्विग्भिर्निधीयते । धूञ् कंपने । स्यसिच्सीयुट्तासिष्विति कर्मणि लुङि चिण्वदिट् । णित्वाद्वृद्धिः । ततो मित्राय वरुणाय वायव एतेभ्यो जुष्टः पर्याप्तस्त्रिधातु त्रिसंधानो वसतीवरीभिर्दध्ना पयसा संस्पृष्टः सोमस्त्रिधातु तादृशं मधु मदकरः सोमः सुकर्मभिः शोभनकर्मयुक्तैर्ऋत्विग्भिः क्रियते । मित्रादिदेवार्थं प्रदीयते ॥

॥ अथ नवमी ॥

पवस्व सोम देववीतये वृषेंद्रस्य हार्दि सोमधानमा विश ।

पुरा नो बाधाद्दुरितातिं पारय क्षेत्रविद्धि दिश आहा विपृच्छते ॥९॥

पवस्व । सोम । देवऽवीतये । वृषा । इंद्रस्य । हार्दि । सोमऽधानं । आ । विश ।

पुरा । नः । बाधात् । दुःऽइता । अति । पारय । क्षेत्रऽवित् । हि । दिशः । आह ।

विऽपृच्छते ॥९॥

हे सोम वृषा कामानामुदकानां वा सेचकस्त्वं देववीतये देवानां पानाय पवस्व । कलशादिषु क्षर । अथ हे सोम त्वमिंद्रस्य हार्दि हृदयंगमं प्रियं सोमधानं । सोमो निधीयतेऽस्मिन्निति सोमधानं पात्रं । तदाविश । प्रविश । किंच नोऽस्माकं बाधाद्बाधनात्पीडनात्पुरा पूर्वमेव दुरितानि दुर्गमनानि रक्षांस्यति पारय । अतीत्य पारं गमय । अपि च क्षेत्रवित् मार्गज्ञः पुरुषो विपृच्छते विविधं पंथानं पृच्छते जनाय दिशो मार्गानाह हि । ब्रूते खलु । उक्त्वा तं यथा रक्षति तथा यज्ञमार्गवेत्ता त्वमस्मभ्यं यज्ञपथ उक्त्वास्मान्पालयेति ॥

॥ अथ दशमी ॥

हितो न सप्तिरभि वाजमर्षेंद्रस्येंदो जठरमा पवस्व ।

नावा न सिंधुमति पर्षि विद्वाञ्छूरो न युध्यन्नव नो निदः स्पः ॥१०॥

हितः । न । सप्तिः । अभि । वाजं । अर्ष । इंद्रस्य । इंदो इति । जठरं । आ । पवस्व ।

नावा । न । सिंधुं । अति । पर्षि । विद्वान् । शूरः । न । युध्यन् । अव । नः । निदः ।

स्परिति स्पः ॥१०॥

हे सोम ऋत्विग्भिः प्रेर्यमाणः सन् वाजं सोमनिधानं द्रोणकलशमभ्यर्ष ।

अभिगच्छ। तत्र दृष्टांतः। हितो न सप्तिः। अश्वो हितः प्रेर्यमाणः सन् वाजं संग्राममभिलक्ष्य यथा याति तद्वत्। ततो हे इंदो इंद्रस्य जठरं जठरभूतं द्रोणकलशं वा पवस्व। आभिमुख्येन प्रविश। किंच विद्वान् सर्वं जानंस्त्वमस्मानति पर्षि। दुरितान्यतीत्य पारय। तत्र दृष्टांतः। नावा न। यथा नाविकाः सिंधुं नदीं नावा मनुष्यान् पारयंति तद्वत्। किंच। हे सोम त्वं शूरो न शूरो वीर इव युध्यन् शत्रून् संप्रहरन् निदो निंदकाच्छत्रोर्नोऽस्मानवस्यः। अवपारय। बाधान्विनाश्य पालय। यद्वा। नोऽस्माकं निदो निंदकान् शत्रूनवस्यः। अवाङ्मुखं जहि। स्पृ हिंसायां। बहुलं छंदसीति श्नाप्रत्ययस्य लुक्। तिपि गुणे हल्ङ्यादिना तिपो लोपः॥

॥ इति सप्तमस्य द्वितीये चतुर्विंशो वर्गः॥

आ दक्षिणेति नवर्चं चतुर्थं सूक्तं वैश्वामित्रस्यर्षभस्यार्षं पवमानसोमदेवताकं नवमी त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रांतं। आ दक्षिणा नव ऋषभस्तौ वैश्वामित्राविति। तावित्यनेन प्रकृतो रेणुर्ऋषभश्चोभे परामृश्येते। श्रूयते हि। अथ ह विश्वामित्रः पुत्रानामंत्रयामास मधुच्छंदाः शृणोतन ऋषभो रेणुरष्टकः। ऐ० ब्रा० ७.१७.। इति। गतः सूक्तविनियोगः॥

॥ तत्र प्रथमा॥

आ दक्षिणा सृज्यते शुष्म्या३सदं वेति द्रुहो रक्षसः पाति जागृविः।
हरिरोपशं कृणुते नभस्पय उपस्तिरे चम्वो३र्ब्रह्म निर्णिजे ॥१॥

आ। दक्षिणा। सृज्यते। शुष्मी। आऽसदं। वेति। द्रुहः। रक्षसः। पाति। जागृविः।
हरिः। ओपशं। कृणुते। नभः। पयः। उपऽस्तिरे। चम्वोः। ब्रह्म। निःऽनिजे॥१॥

सोमस्य स्वभूते यज्ञे ऋत्विग्भ्यो दक्षिणासृज्यते। अस्माभिः प्रदीयते। शुष्मी बलवान् सोम आसदमास्थानं द्रोणाख्यं वेति। प्रविशति। किंच जागृविर्जागरणशीलः सोमो द्रुहो द्रोहकारिणो रक्षसो राक्षसात्पाति। स्तोतॄन् रक्षति। अपि च। हरिर्हरितवर्णः सोम ओपशं। आ समंतादुपशेत इत्योपशः। सर्वस्य धारकं नभो नभस आदित्यस्य स्वभूतमुदकं कृणुते। सर्वत्र करोति। अग्नौ प्रास्ताहुतिरित्यादिक्रमेण करोतीत्यर्थः। यद्वा नभोऽतरिक्षं पयः पयसो धारकं करोतीति। किंच। अयं सोमश्चम्वोः। द्यावापृथिवीनामैतत्। चमंति भक्षयंति

मनुष्यदेवा अचेति। तयोरुपस्तिर उपस्तरणायाच्छादनाय ब्रह्म बृहदुद्यतं तमांसि विनाशयंतं यद्वा परिवृढं सूर्यं द्युलोके करोति। तथा तमेव सूर्यं निर्निजे पदार्थानां निर्नेजनाय परिशोधनाय च करोति। आदित्यो हि द्यावापृथिव्यौ स्वतेजसोपस्तृणाति। स हि स्वभासा सर्वं निर्नेक्ति च ॥

॥ अथ द्वितीया ॥

प्र कृष्टिहेव शूष एति रोरुवदसुर्यं१ वर्णं नि रिणीते अस्य तं।
जहाति वव्रिं पितुरेति निष्कृतमुपप्रुतं कृणुते निर्णिजं तना ॥२॥

प्र। कृष्टिहाऽइव। शूषः। एति। रोरुवत्। असुर्यं। वर्णं। नि। रिणीते। अस्य। तं।
जहाति। वव्रिं। पितुः। एति। निःऽकृतं। उपऽप्रुतं। कृणुते। निःऽनिजं। तना ॥२॥

शूषः शत्रूणां शोषको बलवान् सोमो रोरुवत् अत्यंतं शब्दं कुर्वन् कृष्टिहेव मनुष्याणां हंता योद्धेव प्रैति। प्रगच्छति। किंच। असुर्यमसुराणां बाधकस्यात्मनो वर्णं हरितमावारकं बलं वा निरिणीते। निर्गमयति। ततः स सोमो वव्रिं। वृणोति शरीरमिति वव्रिर्जरा। जहाति। त्यजति। कथमिति चेत् तदुच्यते। पितुरन्नं सोमो निष्कृतं संस्कृतं द्रोणकलशं दिवं वेदानीमेति। गच्छति। किंच सोमस्तनाविवालेन तते विस्तृते दशापवित्रे निर्निजं। निर्निगिति रूपनाम। आत्मीयं रूपमुपप्रुतमुपगमनशीलं कृणुते। करोति। तस्माज्जरां त्यजतीत्यर्थः ॥

॥ अथ तृतीया ॥

अद्रिभिः सुतः पवते गभस्त्योर्वृषायते नभसा वेपते मती।
स मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि ॥३॥

अद्रिऽभिः। सुतः। पवते। गभस्त्योः। वृषऽयते। नभसा। वेपते। मती।
सः। मोदते। नसते। साधते। गिरा। नेनिक्ते। अपऽसु। यजते। परीमणि ॥३॥

अद्रिभिर्ग्रावभिर्गभस्त्योर्बाह्वोर्बाहुभ्यां च सुतोऽभिषुतः स सोमः पवते। पात्राणि प्रति गच्छति। यः सोमो वृषायते वृषवदाचरति। किंच यो मती स्तुत्याभिष्टुतः सन् नभसांतरिक्षेण वेपते सर्वत्र गच्छति स सोमो मोदते। हृष्टो भवति। तथा नसते। ग्रहादिषु संश्लिष्टो भवति। किंच। गिरा स्तुत्या स्तुतः सन् साधते। स्तोतॄणां धनान्नादिकं साधयति। अपि च अप्सु वसतीवर्याख्यासु

नेनिक्ते। शुद्धो भवति। तथा परीमणि देवे रक्ष्यमाणे यज्ञे देवानां हविःप्रदानेन पोषके वा यज्ञे यजते। पूजितो भवति॥

॥ अथ चतुर्थी ॥

परि द्युक्षं सहसः पर्वतावृधं मध्वः सिंचंति हर्म्यस्य सक्षणिं।
आ यस्मिन्गावः सुहुताद ऊधनि मूर्धञ्छ्रीणंत्यग्रियं वरीमभिः॥४॥

परि। द्युक्षं। सहसः। पर्वतऽवृधं। मध्वः। सिंचंति। हर्म्यस्य। सक्षणिं।
आ। यस्मिन्। गावः। सुहुतऽअदः। ऊधनि। मूर्धन्। श्रीणंति। अग्रियं। वरीमऽभिः॥४॥

सहसः सहस्विनो मध्वो मदकराः सोमा द्युक्षं दीप्यमाने द्युलोके क्षियंतं निवसंतं पर्वतावृधं मेघानां पर्वतानां वा वर्धयितारं हर्म्यस्य शत्रुपुरस्य सक्षणिमभिभवितारमिंद्रं परिषिंचंति। तथा सुहुतादः सुहुतानां हविषां भक्षयितारो गावो मूर्धन् मूर्धनि समुच्छ्रित ऊधनि पयोधारके स्थाने स्थितमग्रियं मुख्यं पयो वरीमभिरुरुत्वैर्महत्त्वैर्यस्मिन्पवमानगुणविशिष्ट इंद्र आ श्रीणंति। आमिश्रयंति। दध्ना पयसा च सोमं श्रीणंति खलु तदुच्यते॥

॥ अथ पंचमी ॥

समी रथं न भुरिजोरहेषत दश स्वसारो अदितेरुपस्थ आ।
जिगादुप जयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन्॥५॥

सं। ईमिति। रथं। न। भुरिजोः। अहेषत। दश। स्वसारः। अदितेः। उपऽस्थे। आ।
जिगात्। उप। जयति। गोः। अपीच्यं। पदं। यत्। अस्य। मतुथाः। अजीजनन्॥५॥

भुरिजोः। बाहुनामैतत्। बिभ्रति पदार्थानाभ्यामिति। तयोर्बाह्वोर्दश दशसंख्याकाः स्वसारः सर्वत्र सरणशीला अंगुलयोऽदितेर्भूमेरुपस्थे समीपे देवयजनदेश ईमेनं सोममाभिमुख्येन समहेषत। संप्रेरयंति। हि वर्धनगत्योः। लुङि रूपं। कथमिव। रथं न रथं यथांगुलयः प्रेरयंति तद्वत्। स सोमो जिगात् पात्राणि गच्छति। किंच गोर्धेनोरपीच्यमंतर्हितं पय उपजयति। तदानीमुपगच्छति। यद्यदा मतुथा मननीयगाथावंतः स्तोतारोऽस्य सोमस्य पदं स्थानमजीजनन् जनयंति तदानीमित्यर्थः॥

॥ इति सप्तमस्य द्वितीये पंचविंशो वर्गः॥

अभिष्टवे श्येनो न योनिमित्येषा। सूचितं च। संप्रेषितः श्येनो न योनिं सदनं धिया कृतं। आ० ४.७.। इति॥ अग्नीषोमप्रणयनेऽप्येषा। सूचितं च। अंतश्च प्रागा अदितिर्भवासि श्येनो न योनिं सदनं धिया कृतं। आ० ४.१०.। इति॥

॥ सैषा षष्ठी॥

श्येनो न योनिं सदनं धिया कृतं हिरण्ययमासदं देव एषति।
एरिणंति बर्हिषि प्रियं गिराश्वो न देवाँ अप्येति यज्ञियः॥६॥

श्येनः। न। योनिं। सदनं। धिया। कृतं। हिरण्ययं। आऽसदं। देवः। आ। ईषति।
आ। ईमिति। रिणंति। बर्हिषि। प्रियं। गिरा। अश्वः। न। देवान्। अपि। एति। यज्ञियः॥६॥

देवो द्योतमानः पवमानो धिया स्वकर्मणा कृतं संपादितं हिरण्ययं हिरण्मयमासदमासंद्यभिधानमेषति। अभिमुखं गच्छति। ईषतेर्गत्यर्थस्य व्यत्ययेन परस्मैपदं। तत्र दृष्टांतः। श्येनो न योनिं कुलायं यथा श्येनः पक्षी प्रविशति तद्वत्। तत ईमेनं प्रियं प्रीणयितारं सोमं गिरा स्तुत्या बर्हिषि यज्ञ आ इ रिणंति। स्तोतारोऽभिमुखं प्रेरयंति। स्तुवंतीत्यर्थः। अनंतरं यज्ञियो यज्ञार्हो यष्टव्योऽयं सोमोऽश्वो नाश्व इव त्वरया देवानप्येति। अभिगच्छति॥

॥ अथ सप्तमी॥

परा व्यक्तो अरुषो दिवः कविर्वृषा त्रिपृष्ठो अनविष्ट गा अभि।
सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति॥७॥

परा। विऽअंक्तः। अरुषः। दिवः। कविः। वृषा। त्रिऽपृष्ठः। अनविष्ट। गाः। अभि।
सहस्रऽनीतिः। यतिः। पराऽयतिः। रेभः। न। पूर्वीः। उषसः। वि। राजति॥७॥

अरुष आरोचमानः कविः क्रांतप्रज्ञः सोमो व्यक्तो विस्पष्टधारायुक्तः। यद्वा वसतीवरीभिर्विशेषेण सिक्तः सन् दिवोऽतरिक्षात् परा पराङ्मुखमागच्छति। पवित्राद्द्रोणकलशं परागच्छतीत्यर्थः। वृषा वृषभस्त्रिपृष्ठः। त्रीणि सवनानि पृष्ठान्यस्येति त्रिपृष्ठः सोमस्य सर्वेषु विद्यमानत्वात्तस्मात्त्रिपृष्ठः सोमो गाः स्तोतृभिः क्रियमाणाः स्तुतीरभिलक्ष्यानविष्ट। शब्दायते। नु शब्दे। किंच सहस्रणीतिः सहस्रनयनः। प्रयोगबाहुल्यापेक्षं ग्रहेषु चमसेषु च सहस्रविधनयनत्वं। अत एव यतिः पात्रादीनि प्रत्यागंता परायतिः कलशान् प्रति परागंता भवति।

सोऽयं पूर्वीर्बह्वीरुषसः । कालाध्वनोरिति द्वितीया । बहुषूषःकालेषु रेभो न । रेभृ शब्दे । शब्दायमानः स्तोतेव वि राजति । विशेषेण दीप्यते । तेषु सोमस्याभिषूयमाणत्वात् स्तोता खलु देवानां स्तुतिकरणेन राजति ॥

॥ अथाष्टमी ॥

त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत्समृता सेधति स्रिधः ।
अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ॥८॥

त्वेषं । रूपं । कृणुते । वर्णः । अस्य । सः । यत्र । अशयत् । संऽऋता । सेधति । स्रिधः ।
अप्साः । याति । स्वधया । दैव्यं । जनं । सं । सुऽस्तुती । नसते । सं । गोऽअग्रया ॥८॥

अस्य । अन्वादेशेऽशादेशः । अस्य सोमस्य स्वभूतो वर्णः शत्रूणां निवारको रश्मिस्त्वेषं दीप्यमानं रूपं कृणुते । करोति । स रश्मिर्यत्र समृता । ऋतेः क्तिनि रूपं । सम्यक् प्राप्यते योद्धृभिरत्रेति संग्रामः । अस्मिन् समृतौ युद्धेऽशयत् । शेते तिष्ठति । शीङो लङि बहुलं छंदसीति शपो लुगभावः । तत्र युद्धे स रश्मिः स्रिधः शोषकाञ्छत्रून् सेधति । निषेधति । हिनस्तीति यावत् । वाक्यभेदादनिघातः । किंच । अप्साः । सनोतेर्विट्वात्वे कृते रूपं । अपामुदकानां दाता । यद्वा वसतीवर्याख्यानामपां संभक्ता । सोऽयं स्वधया हवीरूपेणान्नेन सह दैव्यं देवानां संबंधिनं जनं प्रति याति । गच्छति । अपि च सोऽयं सुष्टुती सुस्तुत्या सं । संगच्छते । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । किंच स सोमो गोअग्रया गवादिमुख्यया यया वाचा स्तोतारः पशून् याचंते तया वाचा सं नसते । संगतो भवति । नसतिर्गत्यर्थः । भिन्नवाक्यत्वादनिघातः ॥

॥ अथ नवमी ॥

उक्षेव यूथा परियन्नरावीदधि त्विषीरधित सूर्यस्य ।
दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ॥९॥

उक्षाऽइव । यूथा । परिऽयन् । अरावीत् । अधि । त्विषीः । अधित । सूर्यस्य ।
दिव्यः । सुऽपर्णः । अव । चक्षत । क्षां । सोमः । परि । क्रतुना । पश्यते । जाः ॥९॥

उक्षेव वृषभ इव यूथा गोयूथानि प्रत्यागच्छन् शब्दं करोति तद्वदयं सोमः स्तुतीः परियन्परिगच्छन् अरावीत् शब्दायते । ततः सूर्यस्य सर्वस्य प्रेरकस्या-

दित्यस्य त्विषीर्दीप्तीरध्यधित । अधिदधाति । सूर्यात्मना द्युलोकेऽवतिष्ठत इत्यर्थः । दधातेर्लुङि स्थाघ्वोरिच्चेतीत्वकित्वे । किंच दिव्यो दिवि भवः सुपर्णः सुपतनः श्येनरूपया गायत्र्याहृतत्वाच्छोभनगमनः सोमः क्षां । पृथिवीनामैतत् क्षियंति निवसंत्यत्रेति । क्षां पृथिवीमवचक्षत । अवपश्यति । चष्टेर्लङि बहुलं छंदसीति शपो लुगभावः । ततः सोमो जा जाताः प्रजाः क्रतुना प्रज्ञानेन परिपश्यते । परितः पश्यति । व्यत्ययेनात्मनेपदं ॥

॥ इति सप्तमस्य द्वितीये षड्विंशो वर्गः ॥

हरिं मृजंतीति नवर्चं पंचमं सूक्तमांगिरसस्य हरिमंतस्यार्षं पवमानसोमदेवताकं । जागतमूर्ध्वं प्रागुशनस इति परिभाषया जागतं । तथा चानुक्रांतं । हरिं मृजंति हरिमंत इति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

हरिं मृजंत्यरुषो न युज्यते सं धेनुभिः कलशे सोमो अज्यते ।
उद्वाचमीरयति हिन्वते मती पुरुष्टुतस्य कति चित्परिप्रियः ॥१॥

हरिं । मृजंति । अरुषः । न । युज्यते । सं । धेनुऽभिः । कलशे । सोमः । अज्यते ।
उत् । वाचं । ईरयति । हिन्वते । मती । पुरुऽस्तुतस्य । कति । चित् । परिऽप्रियः ॥१॥

हरिं हरितवर्णं सोममृत्विजो मृजंति । मार्जयंति । मृजेरजादौ संक्रमे विभाषावृद्धिरिष्यते । पा० १.१.३.१. । इति तत्र वृद्धेरभावः । सोऽयमरुषः । अर्तेरुषच्प्रत्ययः । गमनशीलोऽश्व इव युज्यते । इंद्रादिभिः संयुज्यते । किंच कलशे । कलशो द्रोणाभिधानः । स्थितः सोमो धेनुभिर्गोविकारैर्दध्यादिभिः समज्यते । समक्तः सिक्तो भवति । अपि च सोमो यदा वाचं शब्दमुदीरयति । उद्गमयति । शब्दं करोतीत्यर्थः । तदा स्तोतारश्च मती । सुपां सुलुगिति द्वितीयायाः पूर्वसवर्णदीर्घः । स्तुतिं हिन्वते । प्रेरयंति ॥ हि गतौ वृद्धौ चेति स्वादिः । आत्मनेपदी ॥ ततः स्तोत्राभिष्टुतः स पुरुष्टुतस्य बहुस्तोत्रयुक्तस्य स्तोतुः परिप्रियः । प्रीङ् तर्पणे । क्विप् । शसीयङादेशः । कृदुत्तरपदप्रकृतिस्वरत्वं । परितः प्रीणयितॄणि कति चित् कियंति धनानि प्रयच्छति ॥

॥ अथ द्वितीया ॥

साकं वदंति बहवो मनीषिण इंद्रस्य सोमं जठरे यदादुहुः ।
यदी मृजंति सुगभस्तयो नरः सनीळाभिर्दशभिः काम्यं मधु ॥२॥

साकं। वदंति। बहवः। मनीषिणः। इंद्रस्य। सोमं। जठरे। यत्। आऽदुहुः।
यदि। मृजंति। सुऽगभस्तयः। नरः। सऽनीळाभिः। दशऽभिः। काम्यं। मधु ॥२॥

मनीषिणो मनस ईशितारः प्राज्ञा बहवः स्तोतारः साकं सहैव युगपन्मंत्रान्वदंति तदा स्तुवंति यदेंद्रस्य जठरे द्रोणकलशे सोममादुहुः। ऋत्विजो दुदुहुः। तदाभिष्टुवंतीति। दुहेर्लिट्युसि रूपं। द्विर्वचनस्य छंदसि विकल्पितत्वादत्र द्विर्वचनाभावः। किंच। यदि यदा सुगभस्तयः शोभनबाहुका नरः कर्मनेतारो मनुष्याः काम्यं काम्यमानं मधु मदकरं सोमं सनीळाभिर्दशसंख्याकाभिर्मृजंति सोममभिषुण्वंति तदा वदंतीत्यन्वयः ॥

॥ अथ तृतीया ॥

अरममाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवं।
अन्वस्मै जोषमभरद्विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः ॥३॥

अरममाणः। अति। एति। गाः। अभि। सूर्यस्य। प्रियं। दुहितुः। तिरः। रवं।
अनु। अस्मै। जोषं। अभरत्। विनंऽगृसः। सं। द्वयीभिः। स्वसृऽभिः। क्षेति। जामिऽभिः ॥३॥

स सोमोऽरममाणोऽनुपरतः सन् पुनःपुनर्देवानां प्रीणनाय ग्रहादीनि प्रविशन्नित्यर्थः। गा गोविकारानाश्रयणानभिलक्ष्यात्येति। अतिक्रम्य गच्छति। ततः शब्दायमानः सोमः सूर्यस्यादित्यस्य दुहितुरुषसः प्रियं रवं शब्दं तिरः। तिरस्करोति। तस्मिन्काले सोमाभिषवध्वनिर्महान्भवतीत्यर्थः। विनंगृसः। विनं कमनीयं स्तोत्रं गृह्णातीति विनंगृसः स्तोता। जोषं। जुषेर्घञि रूपं। पर्याप्तं स्तोत्रं तस्मै सोमायान्वभरत्। अनुभरति। करोतीति यावत्। सोऽयं सोमो द्वयीभिर्द्वाभ्यां पाणिभ्यामुत्पन्नाभिर्जामिभिः परस्परं बंधुभिः स्वसृभिः कर्मकरणार्थमितस्ततो गच्छंतीभिरंगुलीभिः संक्षेति। संगच्छते। क्षि निवासगत्योः। छांदसो विकरणस्य लुक् ॥

॥ अथ चतुर्थी ॥

नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इंदुर्ऋत्वियः।
पुरंधिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इंद्र ते ॥४॥

नृऽधूतः। अद्रिऽसुतः। बर्हिषि। प्रियः। पतिः। गवां। प्रऽदिवः। इंदुः। ऋत्वियः।
पुरंधिऽवान्। मनुषः। यज्ञऽसाधनः। शुचिः। धिया। पवते। सोमः। इंद्र। ते ॥४॥

हे इंद्र पवमानगुणविशिष्टेंद्र ते त्वदर्थं बर्हिषि यज्ञेऽयं सोमो धिया स्वेन कर्मणा धारया वा पवते। पात्रेषु स्यंदते। कीदृशः। नृधूतः कर्मनेतृभिर्मनुष्यैः शोधितः। अद्रिषुतो ग्रावभिरभिषुतः प्रियो देवानां प्रीणयिता गवां पतिः स्वामी। इंद्रो गा अलभत तस्माद्गवां स्वामी। प्रदिवः। पुराणनामैतत्। पुराण इंदुः पात्रेषु क्षरन् ऋत्विय ऋतौ जातः। ऋतोरण्। उ० १.७२.। छंदसि घसिति घस्। सित्त्वेन पदसंज्ञायां भसंज्ञानिमित्त ओर्गुणो न भवति। पुरंधिवान्। पुरंधिर्बहुधीरिति यास्कः। बहुकर्मवान् मनुषो मनुषस्य यज्ञसाधनः शुचिर्दीप्यमानः। यद्वा दशापवित्रेण शुद्धः। एवंगुणः सोम इंद्रार्थं पवत इति संबंधः॥

॥ अथ पंचमी ॥

नृबाहुभ्यां चोदितो धारया सुतोऽनुष्वधं पवते सोम इंद्र ते।
आप्राः क्रतून्समजैरध्वरे मतीर्वेर्न द्रुषच्चम्वो३रासदद्धरिः॥५॥

नृबाहुऽभ्यां। चोदितः। धारया। सुतः। अनुऽस्वधं। पवते। सोमः। इंद्र। ते।
आ। अप्राः। क्रतून्। सं। अजैः। अध्वरे। मतीः। वेः। न। द्रुऽसत्। चम्वोः। आ।
असदत्। हरिः॥५॥

हे इंद्र पवमानगुणविशिष्ट नृबाहुभ्यां कर्मनेतॄणामृत्विजां बाहुभ्यां चोदितः प्रेरितो धारया सुतोऽभिषुतः। यथा धारा भवति तथाभिषुत इत्यर्थः। तादृशः सोमस्ते तवानुष्वधं बलमनु बलार्थं। यद्वा स्वधेत्यन्ननाम। अन्नार्थं पवते। आगच्छति। ततः स त्वं सोमपानेन क्रतून् कर्माण्याप्राः। आपूरयसि। किंच। अध्वरे यज्ञे मतीरभिमानान् शत्रून् समजैः। सम्यक् जितवानसि॥ जि जये। लुङि सिपि सिचो बहुलं छंदसीतीडभावः। सिचि वृद्धिरिति वृद्धिः॥ सोऽयं हरिर्हरितवर्णः सोमश्चम्वोरधिषवणफलकयोरासदत्। आसीदति। तत्र दृष्टांतः। वेर्न। वी गत्यादिषु। अन्येभ्योऽपि दृश्यत इति विच्। सार्वधातुकार्धधातुकयोरिति गुणः। यथा वेः पक्षी द्रुषत् द्रुमे सीदतीति तद्वत्। द्रुषत्। पूर्वपदादिति षत्वं॥

॥ इति सप्तमस्य द्वितीये सप्तविंशो वर्गः॥

॥ अथ षष्ठी ॥

अंशुं दुहंति स्तनयंतमक्षितं कविं कवयोऽपसो मनीषिणः।
समी गावो मतयो यंति संयत ऋतस्य योना सदने पुनर्भुवः॥६॥

अंशुं । दुहंति । स्तनयंतं । अक्षितं । कविं । कवयः । अपसः । मनीषिणः ।
सं । ईम् । इति । गावः । मतयः । यंति । संऽयतः । ऋतस्य । योना । सदने । पुनःऽभुवः ॥ ६ ॥

कवयः क्रांतप्रज्ञा अपसः कर्मवंतो मनीषिणः । मनस ईशा मनीषा बुद्धिः । तद्वंत ऋत्विजः स्तनयंतं शब्दायमानमक्षितमक्षीणं कविं क्रांतदर्शिनमंशुं सोमं दुहंति । अभिषुण्वंति । ततः पुनर्भुवः पुनर्भवनशीला गावः पशवो मतयो मननीयाः स्तुतयश्च संयतः परस्परं संगताः सत्य ऋतस्य सत्यभूतस्य यज्ञस्य योना योनौ योनिस्थानीय उत्पत्तिभूते सदन उत्तरवेद्याख्य ईमेनं सोमं सं यंति । सं गच्छंति ॥

॥ अथ सप्तमी ॥

नाभा पृथिव्या धरुणो महो दिवो३ऽपामूर्मौ सिंधुष्वंतरुक्षितः ।
इंद्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः ॥ ७ ॥

नाभा । पृथिव्याः । धरुणः । महः । दिवः । अपां । ऊर्मौ । सिंधुषु । अंतः । उक्षितः ।
इंद्रस्य । वज्रः । वृषभः । विभुऽवसुः । सोमः । हृदे । पवते । चारु । मत्सरः ॥ ७ ॥

महो महतो दिवो द्युलोकस्य धरुणो धारकोऽयं सोमः पृथिव्या विस्तीर्णाया भूमेर्नाभा नाभौ नाभिस्थानीय उच्छ्रितप्रदेशे । यदुत्तरवेदी नाभिरित्याम्नानात् उत्तरवेदिस्थान ऋत्विग्भिर्निहितः सिंधुषु स्यंदमानासु नदीष्वपामुदकानामूर्मौ संघेऽतर्मध्य उक्षितः सिक्तः । अंतरिक्षस्थानमध्ये वर्तमान इत्यर्थः । तादृश इंद्रस्य वज्रो वज्रस्थानीयो वृषभः कामानां वर्षिता अत एव विभूवसुर्व्याप्तधनः सोमश्चारु कल्याणं यथा भवति तथेंद्रस्य मत्सरो मादयिता सन् हृदे मनसे सुखाय पवते । आगच्छति ॥

॥ अथाष्टमी ॥

स तू पवस्व परि पार्थिवं रजः स्तोत्रे शिक्षन्नाधून्वते च सुक्रतो ।
मा नो निर्भाग्वसुनः सादनस्पृशो रयिं पिशंगं बहुलं वसीमहि ॥ ८ ॥

सः । तु । पवस्व । परि । पार्थिवं । रजः । स्तोत्रे । शिक्षन् । आऽधून्वते । च । सुक्रतो इति सुऽक्रतो ।
मा । नः । निः । भाक् । वसुनः । सदनऽस्पृशः । रयिं । पिशंगं । बहुलं । वसीमहि ॥ ८ ॥

हे सुक्रतो शोभनकर्मन् सुप्रज्ञ वा सोम तादृशस्त्वं पार्थिवं रजो लोकं लक्षीकृत्य तु क्षिप्रं परिपवस्व। परितः सर्वतः क्षर। किं कुर्वन्। आधून्वते ऽदाभ्यग्रहात् त्रिभिरंशुभिराधावनं कुर्वते। तथा भगवतापस्तंबेन सूचितं। तैरेनं चतुराधुनोति पंचकृत्वः सप्तकृत्वो वेति। तस्मै धनादिकं शिक्षन् प्रयच्छन् परिपवस्वेति समन्वयः। ततस्त्वं नोऽस्मान्वसुनो धनान्मा निर्भाक्। मा निर्भाक्षीः। कीदृशात्। सदनस्पृशः। येन भूतेन वसुना सदनानि गृहान् पुत्रादीन् स्पृशंति तादृशाद्गृहादिकस्य प्रदातुर्धनान्मा वियुजः ॥ भाक्। भज सेवायां। लुङि सिपि सिचि बहुलं छंदसीतीडागमाभावः। एकाच इतीट्प्रतिषेधः। हलंतलक्षणा वृद्धिः। पा० ७.२.३। सिपो लोपः ॥ यस्मादेवं तस्माद्वयं पिशंगं नानारूपं कनकादिना अत एव बहुलं प्रभूतं रयिं धनं वसीमहि। आच्छादयेम। बहुधनवंतो भवेमेत्यर्थः ॥ वस आच्छादने। आदादिकः। लिङि रूपं ॥

॥ अथ नवमी ॥

आ तू न॑ इंदो शतदा॒त्वश्व्यं॑ सहस्र॑दातु पशु॒मद्धिर॑ण्यवत्।
उप॑ मास्व बृह॒ती रे॒वती॒रिषो॑ऽधि स्तो॒त्रस्य॑ पवमान नो गहि ॥९॥

आ। तु। नः॒। इंदो॒ इति॑। श॒तऽदा॑तु। अश्व्यं॑। स॒हस्र॑ऽदातु। प॒शुऽमत्। हिर॑ण्यऽवत्।
उप॑। मा॒स्व॒। बृ॒ह॒तीः। रे॒वतीः॑। इषः॑। अधि॑। स्तो॒त्रस्य॑। प॒व॒मा॒न॒। नः॒। ग॒हि॒ ॥९॥

हे इंदो पवमान नोऽस्मभ्यं तु क्षिप्रं धनमायच्छ। कीदृशं। शतदातु। दातु दानं। बहुदानं। अश्व्यं। अश्वसहितं। सहस्रदातु सहस्रदानोपेतं पशुमत् पश्वादियुक्तं हिरण्यवत् हिरण्ययुक्तं च धनं देहि। तथा हे सोम बृहतीः प्रभूतानि रेवतीर्धनवंति। यद्वा पयसो दातारः पशवः। तद्वंतीषोऽन्नानि चास्मभ्यमुप मास्व। उपनिर्मिमीष्व। कुर्विति यावत्। किंच हे पवमान नोऽस्माकमेवंभूतस्य स्तोत्रस्य श्रवणायाधिगहि। आगच्छ। क्रियार्थोपपदस्येति चतुर्थी। चतुर्थ्यर्थे बहुलं छंदसीति षष्ठी ॥

॥ इति सप्तमस्य द्वितीयेऽष्टाविंशो वर्गः ॥

स्रक्व इति नवर्चं षष्ठं सूक्तमांगिरसस्य पवित्रस्यार्षं जागतं पवमानसोमदेवताकं। तथा चानुक्रम्यते। स्रक्वे पवित्र इति ॥ प्रवर्ग्येऽभिष्टव एतत्सूक्तं। सूचितं च। स्रक्वे द्रप्सस्यायं वेनश्चोदयत्पृश्निगर्भाः। आ० ४.६। इति ॥

॥ तत्र प्रथमा ॥

स्रक्के द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरंत नाभयः ।
त्रीन्त्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन् ॥ १ ॥

स्रक्के । द्रप्सस्य । धमतः । सं । अस्वरन् । ऋतस्य । योना । सं । अरंत । नाभयः ।
त्रीन् । सः । मूर्ध्नः । असुरः । चक्रे । आऽरभे । सत्यस्य । नावः । सुऽकृतं । अपीपरन् ॥ १ ॥

स्रक्के यज्ञस्य हनुस्थानीये । स्रक्क ओष्ठप्रांतो हनुरुच्यते । अधिषवणफलके धमतोऽभिषूयमाणस्य द्रप्सस्य सोमस्यांशवः समस्वरन् । संगच्छंते । तदास्य-शब्दयन्वा । ऋतस्य सत्यभूतस्य यज्ञस्य योना योना उत्पत्तिस्थाने नाभयः सोमरसाः समरंत । संगच्छंते ॥ अर्तेः समो गमीत्यादिनात्मनेपदं । सर्तिशास्त्यर्तिभ्यश्चेति च्लेरङ् । अथासुरो बलवान् सर्वेषां प्रीणनात् प्राणदाता वा स सोमो मूर्ध्नः समुच्छ्रितान् त्रींल्लोकानारभ आरंभणाय मनुष्यदेवादीनां संचरणाय करोति । किंच । सत्यस्य सत्यभूतस्य सोमस्य नावो नौका इव स्थिताश्चतस्रः स्थाल्यः । आदित्याग्रयणोक्थ्यध्रुवस्थाल्य इति । ताः स्थाल्यः सुकृतं सुष्ठु कर्माणि कुर्वंतं यजमानमपीपरन् । अभिमतदानेन पूजयंति वा ॥ पारयतेर्लुङि चङि सन्वल्लघुनीत्वाभ्यासेत्वदीर्घाः ॥

॥ अथ द्वितीया ॥

सम्यक् सम्यंचो महिषा अहेषत सिंधोरूर्मावधि वेना अवीविपन् ।
मधोर्धाराभिर्जनयंतो अर्कमित्प्रियामिंद्रस्य तन्वमवीवृधन् ॥ २ ॥

सम्यक् । सम्यंचः । महिषाः । अहेषत । सिंधोः । ऊर्मौ । अधि । वेनाः । अवीविपन् ।
मधोः । धाराभिः । जनयंतः । अर्कं । इत् । प्रियां । इंद्रस्य । तन्वं । अवीवृधन् ॥ २ ॥

महिषाः पूज्या महांतो वर्त्विजः सम्यंचः परस्परं संगताः संतः सम्यगहेषत । सोमं सम्यक् प्रेरयंति । अभिषुण्वंतीति यावत् । हि गतौ वृद्धौ च । लुङि सिचि रूपं । ततो वेनाः । वेनतेः कांतिकर्मण इति यास्कः । स्वर्गादिफलं कामयमाना ऋत्विजः सिंधोः स्यंदमानस्योदकस्योर्मावधि संघे वसतीवर्यादिषु जलेषु सोम-मवीविपन् । कंपयंति । तत्र प्रेरयंतीत्यर्थः । वपतेर्ण्यंतस्य लुङि चङि णौ चङ्युपधाया ह्रस्व इति ह्रस्वः । किंचार्कमर्चनीयं स्तोत्रं जनयंतः कुर्वंतस्ते प्रियां

प्रियतमामिंद्रस्य तन्वं धाम च मधोर्मदकरस्य सोमस्य धाराभिरवीवृधन् । वर्धितवंतः । वर्धतेर्लुङि चङि रूपं ॥

॥ अथ तृतीया ॥

पवित्रवंतः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतं ।
महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभं ॥३॥

पवित्रऽवंतः । परि । वाचं । आसते । पिता । एषां । प्रत्नः । अभि । रक्षति । व्रतं ।
महः । समुद्रं । वरुणः । तिरः । दधे । धीराः । इत् । शेकुः । धरुणेषु । आऽरभं ॥३॥

पवित्रवंतः पवित्रेण शोधकेन सामर्थ्येन युक्ताः सोमस्य रश्मयो वाचं सोमस्थितां माध्यमिकां वाचं पर्यासते । पर्युपविशंति । सोमोऽतरिक्षे तिष्ठति खलु सोमो वै राजा गंधर्वेष्वासीदित्याम्नानात् । ततः प्रत्नः पुराण एषां रश्मीनां पितायं सोमश्च व्रतं प्रकाशनात्मकं कर्माभिरक्षति । अवितं करोति । किंच । वरुणः सर्वस्य स्वतेजसाच्छादकः सोऽयं सोमो महो महत् समुद्रं । अंतरिक्षनामैतत् । महदंतरिक्षं तै रश्मिभिस्तिरो दधे । अंतर्हितमकरोत् । सर्वं व्याप्नोदिति यावत् । तमिमं सोमं धीराः । इदवधारणे । कर्मणि कुशलाः प्राज्ञा एवर्त्विजो धरुणेषु सर्वस्य धारकेषु वसतीवर्याख्येषूदकेष्वारभमारब्धुं शेकुः । शक्नुवंति च । रभेस्तुमर्थे शकि णमुल्कमुलौ । पा० ३.४.१२. । इति कमुल् । लित्स्वरेण मध्योदात्तः ॥

॥ अथ चतुर्थी ॥

सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः ।
अस्य स्पशो न नि मिषंति भूर्णयः पदेपदे पाशिनः संति सेतवः ॥४॥

सहस्रऽधारे । अव । ते । सं । अस्वरन् । दिवः । नाके । मधुऽजिह्वाः । असश्चतः ।
अस्य । स्पशः । न । नि । मिषंति । भूर्णयः । पदेऽपदे । पाशिनः । संति । सेतवः ॥४॥

सहस्रधारेऽव । उदकधारा यस्माद्भवंति तत्तथोक्तमंतरिक्षं । तस्मिन्वर्तमानास्ते सोमरश्मयोऽवावस्तात् स्थितां पृथिवीं वृष्ट्या संयोजयंतीत्यर्थः । किंच दिवो द्युलोकस्य नाके समुच्छ्रिते देशे वर्तमाना मधुजिह्वा मध्वग्राः । सोमतेजसाग्रेभ्यो हि मधूत्पन्नं भवति । अतो मधुजिह्वाः । असश्चतः संगतवर्जिताः पृथक् पृथक् दिव्यवस्थिता अस्य सोमस्य स्वभूताः स्पशः सारभूता रश्मयो भूर्णयः क्षिप्रगा-

मिनः संतो न निमिषंति। निमेषं न कुर्वंति। किंतु पापिनः सुकृतिनश्च ज्ञातुं सर्वदा जाग्रतीत्यर्थः। अथवा राजानो दुष्टान्निवारयितुं सर्वदा जागरणं कुर्वंति तद्वत्। एवं ते रश्मयः पदे पदे स्थाने स्थाने सेतवः संबद्धाः संतः पाशिनः पापकृतां बाधकाः संति। भवंति ॥

॥ अथ पंचमी ॥

पितुर्मातुरध्या ये समस्वरन्नृचा शोचंतः संदहंतो अव्रतान्।
इंद्रद्विष्टामप धमंति मायया त्वचमसिक्नीं भूमनो दिवस्परि ॥५॥

पितुः। मातुः। अधि। आ। ये। संऽअस्वरन्। ऋचा। शोचंतः। संऽदहंतः। अव्रतान्।
इंद्रऽद्विष्टां। अप। धमंति। मायया। त्वचं। असिक्नीं। भूमनः। दिवः। परि ॥५॥

पितुर्मातुर्द्यावापृथिव्योः। द्यौर्मे पिता जनिता नाभिरत्र बंधुर्मे माता पृथिवी महीयमित्यादिषु द्यावापृथिव्योर्मातापितृत्वाम्नानात्। द्यावापृथिवीभ्यां ये सोमरश्मयोऽध्यासमस्वरन् अधिकं प्रादुर्भूता अभवन्। ते ऋचर्त्विग्भिः क्रियमाणया स्तुत्या शोचंतो दीप्यमाना अव्रतान् कर्मरहितान्यजमानान् संदहंतः सम्यक् विनाशयंतस्ते रश्मय इंद्रद्विष्टां। इंद्राय द्वेषकारिणीं। क्ते चेति पूर्वपदप्रकृतिस्वरः। इंद्रेण द्विष्टां वा। असिक्नीं। रात्रिनामैतत्। रात्रिवत्कृष्णरूपां त्वचं। राक्षसमित्यर्थः। मायया कर्मणा प्रज्ञया वा भूमनो विस्तृताद्भूलोकाद्दिवस्परि द्युलोकाच्चापधमंति। अपगतं कुर्वंति। अपघ्नंतीत्यर्थः ॥

॥ इति सप्तमस्य द्वितीय एकोनत्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

प्रत्नान्मानादध्या ये समस्वरञ्छ्लोकयंत्रासो रभसस्य मंतवः।
अपानक्षासो बधिरा अहासत ऋतस्य पंथां न तरंति दुष्कृतः ॥६॥

प्रत्नात्। मानात्। अधि। आ। ये। संऽअस्वरन्। श्लोकऽयंत्रासः। रभसस्य। मंतवः।
अप। अनक्षासः। बधिराः। अहासत। ऋतस्य। पंथां। न। तरंति। दुःऽकृतः ॥६॥

श्लोकयंत्रासः। श्लोकाः स्तुतयः। स्तुतिनियमना रभसस्य मंतवो वेगमतिमन्यमाना एतादृशा ये सोमरश्मयः प्रत्नात्पुराणान्मानादंतरिक्षादध्यासमस्वरन् सह प्रादुर्भूता अभवन् तान् रश्मीननक्षासश्चक्षुर्वर्जिताः साधु पदार्थानामद्रष्टारो

नरा बधिरा देवतास्तुतिश्रवणवर्जिताः पापकृतो नरश्चापहासत । तान्परित्यजंति । दर्शिनः श्रवणवंतो मेधाविनस्तु न परिजहति किंतु स्तुवंति । तदेवाह । ऋतस्य सत्यस्य पंथां मार्गभूतमेषां गणं दुःकृतः पापकृतो नरा न तरंति । नोत्तारयंति । सुकृतस्तु तरंतीत्यभिप्रायः ॥

॥ अथ सप्तमी ॥

सहस्रंधारे वितते पवित्र आ वाचं पुनंति कवयो मनीषिणः ।
रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वंचः सुदृशो नृचक्षसः ॥७॥

सहस्रऽधारे । विऽतते । पवित्रे । आ । वाचं । पुनंति । कवयः । मनीषिणः ।
रुद्रासः । एषां । इषिरासः । अद्रुहः । स्पशः । सुऽअंचः । सुऽदृशः । नृऽचक्षसः ॥७॥

कवयः क्रांतकर्माणोऽत एव मनीषिणः प्राज्ञा ऋत्विजः सहस्रधार अनेकधारोपेते वितते कर्मणि विस्तृते पवित्रे शुद्धुत्पादके सोमे वर्तमानां वाचं माध्यमिकां । सोमः खलु विश्वावसुप्रभृतिगंधर्वाश्चांतरिक्षेऽतिष्ठन् सोमो वै राजा गंधर्वेष्वासीदिति श्रवणात् तत्र वर्तमानं सोमं देवा गोपया वाचा क्रीतवंतः । तदा सोमे वाक्तिष्ठतीति शक्यते वक्तुं । तस्मात्सोमे स्थितां माध्यमिकां वाचमा पुनंति । संस्कुर्वंति । स्तुवंतीति यावत् । य उक्तगुणा मरुतां मातरं माध्यमिकां वाचं स्तुवंति तेषां रुद्रासो रुद्रपुत्रा मध्यमवाचः पुत्रा मरुतः स्पशो वाचा वशिनो भवंति । कीदृशाः । इषिरा गमनशीला अद्रुहः स्तोतॄणामद्रोग्धारः । यद्वा द्रुहेः कर्मणि क्विप् औणादिकः । परैरहिंस्याः स्वंचः शोभनांचनाः । अत एव सुदृशः सुदर्शना नृचक्षसो नृणां कर्मनेतॄणां द्रष्टारः ॥

॥ अथाष्टमी ॥

ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्यं१तरा दधे ।
विद्वान्स विश्वा भुवनाभि पश्यत्यवाजुष्टान्विध्यति कर्ते अव्रतान् ॥८॥

ऋतस्य । गोपाः । न । दभाय । सुऽक्रतुः । त्री । सः । पवित्रा । हृदि । अंतः । आ । दधे ।
विद्वान् । सः । विश्वा । भुवना । अभि । पश्यति । अव । अजुष्टान् । विध्यति । कर्ते । अव्रतान् ॥८॥

ऋतस्य सत्यभूतस्य यज्ञस्य गोपा गोपायिता अत एव सुक्रतुः शोभनकर्मा

सोमो न दभाय दंभाय स्तंभनाय न भवति। परैर्दंभयितुं न शक्यत इत्यर्थः। किंच स सोमः त्री। शेश्छंदसि बहुलमिति लुक्। त्रीणि पवित्राग्निवायुसूर्यात्मकानि त्रीणि पवित्राणि हृद्यंतर्हृदयस्यांतरादधे। आदधाति। स्वस्मिन् संगमयतीत्यर्थः। अपि च विद्वान् सर्वं जानानः स सोमो विश्वा भुवना सर्वाणि भुवनान्यभिपश्यति। ततः कर्ते। करोतेरौणादिकस्तप्रत्ययः। कर्मण्यनुष्ठानप्रियान् अत एवाव्रतानयजमानानवविध्यति। अवाङ्मुखान् कृत्वा ताडयति। हिनस्तीति यावत्॥

॥ अथ नवमी ॥

ऋतस्य तंतुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया।
धीराश्चित्तत्समिनक्षंत आशतात्रा कर्तमव पदात्यप्रभुः॥९॥

ऋतस्य। तंतुः। विऽततः। पवित्रे। आ। जिह्वायाः। अग्रे। वरुणस्य। मायया।
धीराः। चित्। तत्। संऽइनक्षंतः। आशत। अत्र। कर्तं। अव। पदाति। अप्रऽभुः॥९॥

ऋतस्य सत्यभूतस्य यज्ञस्य तंतुस्तनिता पवित्रेऽविवालमये दशापवित्रे विततो विस्तृतः। यद्वा पवित्रेऽतरिक्षे विस्तृतः सोमो वरुणस्य जिह्वाया अग्रे मायया कर्मणा आ। आस्थितः। वरुणजिह्वाग्र आपस्तिष्ठंति। तासु सोमो वसतीति वसतीवर्याद्युदकेषु स्थित इत्यर्थः। ततो धीराश्चित् कर्मणि प्राज्ञा एव तद्वरुणजिह्वाग्रस्थानं समिनक्षंतः। इनक्षतिर्गतिकर्मा। संव्याप्नुवंतः संत आशत। स्तुतिभिर्हविर्भिर्वा प्राप्नुवन्। यः पुनः कर्तं। कालाध्वनोरिति द्वितीया। कर्मण्यप्रभुः समर्थो न भवति सोऽयमत्रास्मिन्नेव लोकेऽवपदाति। अवस्तान्नरके पतति। नोपरि गच्छति। पद गतौ। लेट्याडागमः। तस्मात्सर्वैरग्निष्टोमादिकर्म कर्तव्यमित्येषोऽर्थोऽभिहितो भवति॥

॥ इति सप्तमस्य द्वितीये त्रिंशो वर्गः॥

शिशुर्नेति नवर्चं सप्तमं सूक्तं दैर्घतमसस्य कक्षीवत आर्षं पवमानसोमदेवताकं। अष्टमी त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रम्यते। शिशुर्न कक्षीवांस्त्रिष्टुबष्टमीति। गतः सूक्तविनियोगः॥

॥ तत्र प्रथमा ॥

शिशुर्न जातोऽव चक्रदद्वने स्व१र्यद्वाज्यरुषः सिषासति।
दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्म सप्रथः॥१॥

शिश्रुः। न। जातः। अव। चक्रदत्। वने। स्वः। यत्। वाजी। अरुषः। सिसासति।
दिवः। रेतसा। सचते। पयःऽवृधा। तं। ईमहे। सुऽमती। शर्म। सऽप्रथः ॥१॥

स पवमानः सोमो वने वननीये वसतीवर्याख्य उदके जात उत्पन्नः शिश्रुर्न शिशुरिवावचक्रदत् अवाङ्मुखं क्रंदति। तदोदकमध्ये पतन् शब्दं करोति खलु। यद्यदा वाजी बलवानन्नवान्वारुष आरोचमानः। यद्वा वाज्यश्व इवारुषः। अर्तेरुषच्। गमनशीलः सोमः स्वः स्वर्गलोकं सिषासति संभक्तुमिच्छति। सनोतेः सनीडभाव आत्वं। सनोतेरिति सांहितिकं षत्वं। सोऽयं पयोवृधा गवामोषधीनां च क्षीरस्य वर्धकेन रेतसोदकेन सह दिवो द्युलोकात्सचते। पार्थिवं लोकं समवैति। तं तादृशं प्रसिद्धं सोमं सप्रथः सर्वतः पृथुतरं धनादिना युक्तं शर्म गृहं तद्वयं सुमती। सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घः। सुमत्या शोभनया स्तुत्येमहे। याचामहे। ईमह इति याच्ञाकर्म। ईङ् गतौ। दैवादिकः। छांदसः श्यनो लुक् ॥

॥ अथ द्वितीया ॥

दिवो यः स्कंभो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः।
सेमे मही रोदसी यक्षदावृता समीचीने दाधार समिषः कविः ॥२॥

दिवः। यः। स्कंभः। धरुणः। सुऽआततः। आऽपूर्णः। अंशुः। परिऽएति। विश्वतः।
सः। इमे इति। मही इति। रोदसी इति। यक्षत्। आऽवृता। समीचीने इति
संऽईचीने। दाधार। सं। इषः। कविः ॥२॥

दिवो द्युलोकस्य स्कंभो विष्कंभयिता संरोद्धा धरुणः सर्वस्य धारकः। यद्वा। पृथिव्या धारकः। विष्टंभो दिवो धरुणः पृथिव्याः। ऋग्वे० ९. ८९. ६.। इत्याम्नानात्। तादृशः स्वाततः सुष्ठु सर्वत्र विततो विस्तृतः अत एवापूर्णः पात्रेषु संपूर्णो योऽंशुः सोमात्मको विश्वतः सर्वतः पर्येति परिगच्छति। तिङि चोदात्तवतीति गतेर्निघातः। स सोम इमे रोदसी द्यावापृथिव्यावावृतासंभजनीयेन कर्मणा यक्षत्। यजतु। स्वबलेन संयोजयत्वित्यर्थः। ततः सोऽयं समीचीने परस्परं संगते द्यावापृथिव्यौ दाधार। धारयां चकार। तुजादीनामित्यभ्यासस्य दीर्घः। अनंतरं कविः क्रांतकर्मेषोऽन्नानि स्तोतृभ्यः संप्रयच्छतु। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

॥ अथ तृतीया ॥

महि प्सरः सुकृतं सोम्यं मधूर्वी गव्यूतिरदितेर्ऋतं यते ।
ईशे यो वृष्टेरित उस्रियो वृषापां नेता य इतऊतिर्ऋग्मियः ॥३॥

महि । प्सरः । सुऽकृतं । सोम्यं । मधु । उर्वी । गव्यूतिः । अदितेः । ऋतं । यते ।
ईशे । यः । वृष्टेः । इतः । उस्रियः । वृषा । अपां । नेता । यः । इतःऽऊतिः । ऋग्मियः ॥३॥

ऋतं सत्यभूतं यज्ञं यते गच्छते तस्मा इंद्राय सुकृतं सुष्ठु संस्कृतं सोम्यं सोममयं महि महत् प्रभूतं मधु मधुररसं प्सरो भक्षणं पानीयं भवति । प्सा भक्षणे । किंच । तस्माद्यज्ञं प्रत्यागच्छतामिंद्रादीनामदितेः पृथिव्या गव्यूतिर्मार्गश्चोर्वी विस्तीर्णा भवति । इंद्रः शतसहस्रसंख्याकहरिभिः सह गंतुं मार्गे विस्तीर्णोऽभवदित्यर्थः । य इंद्र इत इमं लोकं प्रत्यापतंत्या वृष्टेरीश ईश्वरो भवति । तथोस्रियः । उस्रेति गोनाम । गोभ्यो हितः । अपामुदकानां वृषा वर्षको यज्ञस्य नेता नायक इतऊतिः । इममस्मदीयं यज्ञं प्रत्यूतिर्गमनं यस्य स तथोक्तः । इतो गच्छन् य इंद्र ऋग्मिय ऋगर्हः स्तोतव्यो भवति । तस्मा अयं सोमः पातव्यो भवतीति ॥

प्रवर्ग्येऽभिष्टव आत्मन्वन्नभ इत्येषा । सूचितं च । तदु प्रयक्षतममस्य कर्मात्मन्वन्नभो दुह्यते घृतं पयः । आ॰ ४.७. । इति ॥

॥ सैषा सूक्ते चतुर्थी ॥

आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते ।
समीचीनाः सुदानवः प्रीणंति तं नरो हितमव मेहंति पेरवः ॥४॥

आत्मन्ऽवत् । नभः । दुह्यते । घृतं । पयः । ऋतस्य । नाभिः । अमृतं । वि । जायते ।
संऽईचीनाः । सुऽदानवः । प्रीणंति । तं । नरः । हितं । अव । मेहंति । पेरवः ॥४॥

आत्मन्वत् । अनो नुडिति नुडागमः । आत्मवत्सारवद्भूतं पयश्च नभो नभस आदित्यरूपात्सोमो दुह्यते । किंच । ऋतस्य यज्ञस्य नाभिः । णह बंधने । स्वमोर्नपुंसकादिति सोर्लुक् न भवति सर्वविधीनां छंदसि विकल्पितत्वात् । नाभि यज्ञस्य बंधकममृतमुदकं च वि जायते । तस्मादेव प्रादुर्भवति । ततः सुदानवः शोभनस्तुतिहविर्दानवंतो यजमानाः समीचीनाः परस्परं संगताः

संतस्तमिमं सोमं प्रीणयंति। स्तुतिभिस्तर्पयंति। अथ नरो नेतारः पेरवः। पा रक्षणे। मापोरित्वे रुन्निति रुन्प्रत्ययः। सर्वस्य रक्षकाः सोमरश्मयो हितं निहितमवावस्ताद्वर्तमानं पार्थिवमुदकं मेहंति। वर्षंति। मिह सेचने। भौवादिकः। यद्वा। हितमुदकं पृथिवीं प्रति मेहंति ॥

॥ अथ पंचमी ॥

अरावीदंशुः सचमान ऊर्मिणा देवाव्यं१मनुषे पिन्वति त्वचं।
दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे ॥५॥

अरावीत्। अंशुः। सचमानः। ऊर्मिणा। देवऽअव्यं। मनुषे। पिन्वति। त्वचं।
दधाति। गर्भं। अदितेः। उपऽस्थे। आ। येन। तोकं। च। तनयं। च। धामहे ॥५॥

ऊर्मिणा वसतीवर्यादीनामुदकानां संघेन सचमानोऽंशुः सोमोऽरावीत् शब्दं करोति। किंच। स सोमो देवाव्यं। अव रक्षणे। अवितृस्तृतंत्रिभ्य ईरितीप्रत्ययः। देवानां पालयित्रीं त्वचमात्मनः शरीरं मनुषे मनुष्याय यजमानाय पिन्वति। सिंचति। पात्रेषु क्षरतीति यावत्। अपि च। अदितेरदीनायाः पृथिव्या उपस्थे समीप ओषधीषु तं गर्भमादधाति। सुधामयैः किरणैर्विदधाति। येन गर्भेण वयं तोकं दुःखनाशकं पुत्रं च तनयं। तनोति कुलमिति तनयः पौत्रः। तं च धामहे। दध्महे। धारयामः। दधातेर्लेटि बहुलं छंदसीति शपो लुक् ॥

॥ इति सप्तमस्य द्वितीय एकत्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

सहस्रधारेऽव ता असश्चतस्तृतीये संतु रजसि प्रजावतीः।
चतस्रो नाभो निहिता अवो दिवो हविर्भरंत्यमृतं घृतश्चुतः ॥६॥

सहस्रऽधारे। अव। ताः। असश्चतः। तृतीये। संतु। रजसि। प्रजाऽवतीः।
चतस्रः। नाभः। निऽहिताः। अवः। दिवः। हविः। भरंति। अमृतं। घृतऽश्चुतः ॥६॥

सहस्रधारे बहूदकधारे तृतीये रजसि लोके स्वर्गे वर्तमाना असश्चतः परस्परमसक्ताः प्रजावतीरुत्पादितप्रजावत्यः सोमस्य स्वभूतास्ता अव संतु। अवस्तात्पृथिव्यां पतंतु। कास्ता इत्याह। चतस्रो नाभो नभसो बाधिकाः सोमस्य संबंधिन्यश्चतस्रो दीप्तयः कलाः। दिवो द्युलोकादवोऽवस्तान्निहिताः सोमेन

स्थापितास्ता घृतश्चुतो घृतस्योदकस्य च्यावयित्र्यः सत्यो हविः सोमादिलक्षणं भरंति देवानां प्रयच्छंति । तथामृतं गोष्वोषधीषु च पयोरूपं सुधारूपं च भरंति । प्रक्षिपंति ॥

॥ अथ सप्तमी ॥

श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वाँ असुरो वेद भूमनः ।
धिया शमी सचते सेमभि प्रवद्दिवस्कबंधमव दर्षदुद्रिणं ॥७॥

श्वेतं । रूपं । कृणुते । यत् । सिषासति । सोमः । मीढ्वान् । असुरः । वेद । भूमनः ।
धिया । शमी । सचते । सः । ईं । अभि । प्रऽवत् । दिवः । कबंधं । अव । दर्षत् । उद्रिणं ॥७॥

श्वेतं दीप्यमानं शुक्लं रूपं कृणुते तदा करोति यद्यदा सिषासति स्वर्गं संभक्तुमिच्छति । सोमे पात्राण्यागते सति तत्तेजसानुरंजितानां तेषां श्वेतं रूपं भवति । ततो मीढ्वान् । मिह सेचने । अस्मात् क्वसौ दाश्वान् साह्वान् मीढ्वांश्चेति निपातनादभिमतरूपसिद्धिः । कामानां सेक्तासुरः प्राज्ञो बलवान् वा सोमो भूमनो बहुधनानि वेद । स्तोतृभ्यो दातुं जानाति । प्रयच्छतीति यावत् । स ईं । सोऽचि लोपे चेदिति सुलोपः । सोऽयं धिया प्रज्ञानेन प्रवत् प्रकृष्टानि शमी । द्वितीयायाः पूर्वसवर्णदीर्घः । कर्माण्यभि सचते । अभितः समवैति । किंच । दिवोऽतरिक्षादुद्रिणमुदकवंतं कबंधं मेघं । कबंधशब्देन मेघोऽभिधीयते । तात्स्थ्यात्ताच्छब्द्यमिति । मेघमवदर्षत् । अवदारयति । विवृतद्वारं करोति । मेघं विदार्यांतरिक्षाद्वृष्टिं करोतीत्यर्थः ॥

॥ अथाष्टमी ॥

अध श्वेतं कलशं गोभिरक्तं कार्ष्मन्ना वाज्यक्रमीत्ससवान् ।
आ हिन्विरे मनसा देवयंतः कक्षीवते शतहिमाय गोनां ॥८॥

अध । श्वेतं । कलशं । गोभिः । अक्तं । कार्ष्मन् । आ । वाजी । अक्रमीत् । ससऽवान् ।
आ । हिन्विरे । मनसा । देवऽयंतः । कक्षीवते । शतऽहिमाय । गोनां ॥८॥

अधाथानंतरं श्वेतं संप्रति सोमसंसर्गाच्छ्वेतवर्णं गोभिरुदकैरक्तं संपृक्तं द्रोणकलशं ससवान् संभजन् सोम आक्रमीत् । आक्रमते । कार्ष्मन् । कार्ष्मशब्दः काष्ठावचनः । आजिं धावंतो योद्धारो यां गंतुमिच्छंति तस्यां काष्ठायां वाजी

कश्चिदश्वो युद्धं भजमान आक्रमीत्। आक्रमते। सोमः काष्ठायां द्रोणकलशे पततीत्यर्थः। ततस्तस्मै सोमाय देवयंतो देवानिच्छंत ऋत्विजो मनसाहिन्विरे। स्तुतीराभिमुख्येन प्रेरयंति। तत्र शतहिमाय बहुगमनाय कक्षीवते स्तोत्रकारिण एतन्नामकायर्षये सोमो गोनां गाः पशून् प्रेरयति। गोः पादांत इति नुडागमः। क्रियाग्रहणं कर्तव्यं। पा० १.४.३२.१.। इति संप्रदानसंज्ञा। चतुर्थ्यर्थे षष्ठी ॥

॥ अथ नवमी ॥

अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं वि पवमान धावति।
स मृज्यमानः कविभिर्मदिंतम स्वदस्वेंद्राय पवमान पीतये ॥९॥
अत्ऽभिः। सोम। पपृचानस्य। ते। रसः। अव्यः। वारं। वि। पवमान। धावति।
सः। मृज्यमानः। कविऽभिः। मदिन्ऽतम। स्वदस्व। इंद्राय। पवमान। पीतये ॥९॥

हे पवमान पवित्रेण पूयमान हे सोम अद्भिर्वसतीवर्यादिभिरुदकैः पपृचानस्य संपृच्यमानस्य ते तव रसोऽव्योऽवेर्वारं वालं दशापवित्रं वि धावति। विविधं प्राप्नोति। ततः हे मदिंतम मादयितृतम हे पवमान सोम त्वं कविभिः क्रांतकर्मभिर्ऋत्विग्भिर्मृज्यमानः पूयमानः सन् इंद्राय पीतय इंद्रस्य पानार्थं स्वदस्व। प्रियरसो भव ॥

॥ इति सप्तमस्य द्वितीये द्वात्रिंशो वर्गः ॥

अभि प्रियाणीति पंचर्चमष्टमं सूक्तं। भार्गवस्य कवेरार्षं जागतं पवमानसोमदेवताकं। तथानुक्रम्यते। अभि प्रियाणि पंच कविरिति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

अभि प्रियाणि पवते चनोहितो नामानि यह्वोऽअधि येषु वर्धते।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वंचमरुहद्विचक्षणः ॥१॥
अभि। प्रियाणि। पवते। चनःऽहितः। नामानि। यह्वः। अधि। येषु। वर्धते।
आ। सूर्यस्य। बृहतः। बृहन्। अधि। रथं। विष्वंचं। अरुहत्। विऽचक्षणः ॥१॥

चनोहितः। चन इत्यन्ननाम। चायतेरसुनि चन इत्यौणादिकसूत्रेण निपातितः। चनसेऽन्नाय हितः। यद्वा। हितान्नः सोमः प्रियाणि जगतः प्रीणयितॄणि नामानि नमनशीलानि तान्युदकान्यभि पवते। अभितः करोति। येष्वंतरिक्ष-

स्थितेषूदकेषु यह्वो महानयं सोमोऽधि वर्धते। अधिकं प्रवृद्धो भवति। अपां मध्ये सोमो वसति। ततो बृहन्महान् सोमो बृहतो महतः परिवृढस्य सूर्यस्य विष्वंचं विष्वग्गमनमध्युपरि रथं विचक्षणः सर्वस्य विद्रष्टा सन् आरुहत् आरोहति। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठत इति ॥

॥ अथ द्वितीया ॥

ऋतस्यं जिह्वा पंवते मधुं प्रियं वक्ता पतिंर्धियो अस्या अदांभ्यः।
दधांति पुत्रः पित्रोरंपीच्यं१नामं तृतीयमधिं रोचने दिवः ॥२॥

ऋतस्यं। जिह्वा। पवते। मधुं। प्रियं। वक्ता। पतिंः। धियः। अस्याः। अदांभ्यः।
दधांति। पुत्रः। पित्रोः। अपीच्यं। नामं। तृतीयं। अधिं। रोचने। दिवः ॥२॥

ऋतस्य सत्यभूतस्य यज्ञस्य जिह्वा मुख्यत्वेन जिह्वास्थानीयः सोमः प्रियं प्रियकरं मधु मदकरं रसं पवते। क्षरति। कीदृशः। वक्ता शब्दकृत्। यद्वा स्तोतृभिः क्रियमाणाः स्तुतयः साधीयस्य इति प्रतिश्रवणस्य कर्ता। अस्या धिय एतस्य कर्मणः पतिः पालयितादाभ्यो रक्षोभिर्हिंसितुमशक्यः। पुत्रो यजमानः पित्रोर्मातापित्रोरपीच्यमंतर्हितं यन्नाम। तौ न जानीतो नामकरणवेलायां। तस्मात्तयोरपरिज्ञायमानं तत्तृतीयं नाम दिवो द्युलोकस्य रोचने दीप्यमाने सोमेऽभिषूयमाणे सत्यधि दधाति। अत्यंतं धारयति। नक्षत्रव्यावहारिकनाम्नी प्रभाष्य सोमयाजीति तृतीयमस्य नामेति भगवता बौधायनेनोक्तं ॥

॥ अथ तृतीया ॥

अवं द्युतानः कलशाँ अचिक्रदन्नृभिर्येमानः कोश आ हिंरण्ययें।
अभीमृतस्यं दोहनां अनूषताधिं त्रिपृष्ठ उषसो वि रांजति ॥३॥

अवं। द्युतानः। कलशान्। अचिक्रदत्। नृऽभिंः। येमानः। कोशें। आ। हिरण्ययें।
अभि। ईं। ऋतस्यं। दोहनाः। अनूषत। अधिं। त्रिऽपृष्ठः। उषसः। वि। राजति ॥३॥

द्युतानः। द्युत दीप्तौ। दीप्यमानो नृभिः कर्मनेतृभिर्ऋत्विग्भिर्हिरण्यये हिरण्मये कोशेऽधिषवणचर्मणि। तस्य हिरण्मयत्वं हिरण्यपाणिरभिषुणोतीति हिरण्यसंबंधात्। तादृशे कोशे येमानः। छांदसे कर्मणि लिटि कानचि रूपं। नियम्यमानः सोमः। तत ऋतस्य सत्यभूतस्य यज्ञस्य दोहना दोग्धार ऋत्विज ईमेनं

सोममभ्यनूषत। अभिष्टुवंति। ग्रावाणो वत्सा ऋत्विजो दुहंतीति तैत्तिरीयब्राह्मण एषां दोग्धृत्वमभिहितं। सोमः कलशान् द्रोणाभिधानान्प्रत्यवाचिक्रदत्। अवक्रंदति शब्दायते। ततस्त्रिपृष्ठः। त्रीणि सवनान्येव पृष्ठानि यस्य स तथोक्तः त्रिषु सवनेषु सोमस्य विद्यमानत्वात्। त्रिचक्रादित्वादुत्तरपदांतोदात्तत्वं। तादृशः सोम उषसोऽधि यागाहनि वि राजति। अधिशीङ्स्थासामिति द्वितीया। तेष्वहःसु विशेषेण दीप्यते। यद्वा राजतिरंतर्णीतण्यर्थः। अहानि प्रकाशयति ॥

॥ अथ चतुर्थी ॥

अद्रिभिः सुतो मतिभिश्चनोहितः प्ररोचयन्रोदसी मातरा शुचिः।
रोमाण्यव्या समया वि धावति मधोर्धारा पिन्वमाना दिवेदिवे ॥४॥

अद्रिऽभिः। सुतः। मतिऽभिः। चनःऽहितः। प्रऽरोचयन्। रोदसी इति। मातरा। शुचिः।
रोमाणि। अव्या। समया। वि। धावति। मधोः। धारा। पिन्वमाना। दिवेऽदिवे ॥४॥

मतिभिः। मन ज्ञाने। मंत्रे वृषेषपचमनेति क्तिन्नुदात्तः। स्तुतिभिरद्रिभिर्ग्रावभिश्च सुतोऽभिषुतश्चनोहितश्चनसेऽन्नाय हितो हितान्नो वा मातरा मातरौ जगतो निर्मात्र्यौ रोदसी द्यावापृथिव्यौ प्ररोचयन् स्वतेजसा प्रकाशयन् अत एव शुचिर्दीप्यमानः। एवंविधः सोमोऽव्यान्यविभवानि रोमाणि तैः कृतानि पवित्राणि समयाभितः समीपे वि धावति। विशेषेण क्षरति। किंच पिन्वमानाद्भिः सिच्यमाना मधोर्मदकरस्य सोमस्य धारा दिवेदिवेऽन्वहं दीर्घसत्रेषु पवित्राण्युभयतः पवते ॥

॥ अथ पंचमी ॥

परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरं।
ये ते मदा आहनसो विहायसस्तेभिरिंद्रं चोदय दातवे मघं ॥५॥

परि। सोम। प्र। धन्व। स्वस्तये। नृऽभिः। पुनानः। अभि। वासय। आऽशिरं।
ये। ते। मदाः। आऽहनसः। विऽहायसः। तेभिः। इंद्रं। चोदय। दातवे। मघं ॥५॥

हे सोम स्वस्तयेऽविनाशाय परि प्र धन्व। पात्राणि परितः प्रगच्छ। धविर्गत्यर्थः। किंच नृभिः कर्मनेतृभिर्ऋत्विग्भिः पुनानः पूयमानस्त्वमाशिरमा-

अयणं क्षीरादिकमभि वासय । आच्छादय । संयोजयेति यावत् । आहनस आहननवंतो वचनवंत इति यास्कः । शत्रूणामाभिमुख्येन हंतारोऽभिहन्यमाना अभिषूयमाणाः स्तुतिमंतः शब्दवंतो वा विहायसः । महन्नामैतत् । महांतस्ते त्वदीया ये मदा मदहेतवो रसाः संति तेभिस्तैः सोमैरस्माभिर्दीयमानैर्मघं मंहनीयं धनमस्मभ्यं दातवे दातुमिंद्रं चोदय । प्रेरय ॥

॥ इति सप्तमस्य द्वितीये त्रयस्त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके द्वितीयोऽध्यायः संपूर्णः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
व्याख्यायाव्याहतप्रज्ञः सप्तमस्य द्वितीयकं ।
अध्यायं सायणामात्यस्तृतीयं व्याकरोत्यथ ॥

तत्र धर्तेति पंचर्चं नवमं सूक्तं भार्गवस्य कवेरार्षं जागतं पवमानसोमदेवताकं । धर्तेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुते नदीष्वा ॥१॥
धर्ता । दिवः । पवते । कृत्व्यः । रसः । दक्षः । देवानां । अनुऽमाद्यः । नृऽभिः ।
हरिः । सृजानः । अत्यः । न । सत्वऽभिः । वृथा । पाजांसि । कृणुते । नदीषु । आ ॥१॥

धर्ता सर्वस्य धारकः सोमो दिवोऽतरिक्षादंतरिक्षस्थिताद्दशापवित्रात्पवते । पूयते । कीदृशः सोमः । कृत्व्यः कर्तव्यः । शोध्य इत्यर्थः । रसो रसात्मको देवानां

दक्षो बलप्रदः । यद्वा दक्षः प्रवर्धनीयो देवानामर्थाय । तथा नृभिर्नेतृभिर्ऋत्विग्भिरनुमाद्योऽनुमदनीयः स्तुत्यो वा हरिर्हरितवर्णः सत्वभिः प्राणिभिः सादिभिः सृजानः सृज्यमानोऽत्यो नाश्व इव । स यथा शिक्षितो वृथानायासेन गच्छति तद्वद्वृथाप्रयत्नेन पाजांसि बलानि स्वीयान्वेगान्कृणुते कुरुते नदीषु वसतीवरीषु । ताभिरित्यर्थः । आसिक्त इति शेषः । अयमभिषवसमयाभिप्रायः ॥

॥ अथ द्वितीया ॥

शूरो न धत्त आयुधा गभस्त्योः स्व१ःसिषासन्रथिरो गविष्टिषु ।
इंद्रस्य शुष्ममीरयन्नपस्युभिरिंदुर्हिन्वानो अज्यते मनीषिभिः ॥२॥

शूरः । न । धत्ते । आयुधा । गभस्त्योः । स्व१रिति स्वः । सिसासन् । रथिरः । गोऽइष्टिषु ।
इंद्रस्य । शुष्मं । ईरयन् । अपस्युऽभिः । इंदुः । हिन्वानः । अज्यते । मनीषिऽभिः ॥२॥

अयं सोमो गभस्त्योर्हस्तयोरायुधायुधानि शूरो न शूर इव धत्ते । धारयति । स्वः स्वर्गसुखसाधनं यज्ञं वा सिषासन् संभक्तुमिच्छन् रथिरो रथवान् । रथादिरच्प्रत्ययः । गविष्टिषु यजमानस्य गवामेषणेषु सत्सु यजमानार्थं गोसंभजनाय रथवानित्यर्थः । इंद्रस्य शुष्मं बलमीरयन् प्रेरयन्निंदुः सोमो देवोऽपस्युभिः कर्मेच्छुभिर्मनीषिभिर्मेधाविभिर्ऋत्विग्भिर्हिन्वानः प्रेर्यमाणोऽज्यते गोभिः ॥

॥ अथ तृतीया ॥

इंद्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश ।
प्र णः पिन्व विद्युदभ्रेव रोदसी धिया न वाजाँ उप मासि शश्वतः ॥३॥

इंद्रस्य । सोम । पवमानः । ऊर्मिणा । तविष्यमाणः । जठरेषु । आ । विश ।
प्र । नः । पिन्व । विऽद्युत् । अभ्राऽइव । रोदसी इति । धिया । न । वाजान् । उप ।
मासि । शश्वतः ॥३॥

हे सोम पवमानः पूयमानस्त्वं तविष्यमाणो वर्धयिष्यमाणः सन् इंद्रस्य जठरेषूर्मिणा प्रभूतया धारयाविश । जठरप्रदेशस्य बाहुल्याद्बहुवचनं । नोऽस्मदर्थं विद्युदभ्रेवाभ्राणीव । सा यथा दोग्ध्यभ्राणि तद्वत्प्र पिन्व धुक्ष्व रोदसी द्यावापृथिव्यौ । किंच धिया कर्मणा नेदानीं । नेति संप्रत्यर्थे । शश्वतः । बहुनामैतत् । बहून्वाजानन्नान्युप समीपे मासि । निर्मासि ॥

॥ अथ चतुर्थी ॥

विश्वस्य राजा पवते स्वर्दृश ऋतस्य धीतिमृषिषाळवीवशत् ।
यः सूर्यस्यासिरेण मृज्यते पिता मतीनामसमष्टकाव्यः ॥४॥

विश्वस्य । राजा । पवते । स्वःऽदृशः । ऋतस्य । धीतिं । ऋषिषाट् । अवीवशत् ।
यः । सूर्यस्य । असिरेण । मृज्यते । पिता । मतीनां । असमष्टऽकाव्यः ॥४॥

विश्वस्य जगतो राजा स्वामी सोमः स्वर्दृशः स्वर्गद्रष्टुः सर्वद्रष्टुर्वर्तस्य सत्यभूतस्येंद्रस्य । मनुष्यवाच्यनृतशब्दप्रतियोगिकस्यर्तशब्दस्य देवार्थः । तत्रार्थौचित्येनेंद्रः परिगृह्यते । तस्य धीतिं मतिं कर्म वर्षिषाट् । ऋषीणामतींद्रियद्रष्टॄणामभिभविता महत्त्वेन स्वयमप्यृषिश्रेष्ठत्वादिति भावः । तथा च मंत्रांतरं । ब्रह्मा देवानां पदवीः कवीनामृषिरिति । ईदृशः सोमोऽवीवशत् । अकामयतेंद्रस्य कर्म । यः सोमः सूर्यस्य देवस्यासिरेण क्षेपकेण रश्मिना मृज्यते । असमष्टकाव्योऽन्यैः कविभिरव्याप्तकर्मा सोमो मतीनामस्मदीयानां स्तुतीनां पिता पालकः स्वामी भवतीति शेषः । यद्वा । यो मतीनां पितासमष्टकाव्यश्च सन् मृज्यते स पवत इति संबंधः ॥

॥ अथ पंचमी ॥

वृषेव यूथा परि कोशमर्षस्यपामुपस्थे वृषभः कनिक्रदत् ।
स इंद्राय पवसे मत्सरिंतमो यथा जेषाम समिथे त्वोतयः ॥५॥

वृषाऽइव । यूथा । परि । कोशं । अर्षसि । अपां । उपऽस्थे । वृषभः । कनिक्रदत् ।
सः । इंद्राय । पवसे । मत्सरिन्ऽतमः । यथा । जेषाम । संऽइथे । त्वाऽऊतयः ॥५॥

हे सोम त्वं वृषेव यूथा यूथानि वृषभ इव । स यथा तानि प्रविशति तद्वत् कोशं कोशवद्रसधारकं कलशं पर्यर्षसि । परिगच्छसि । कुत्रस्थः सन् । अपामुपस्थेऽतरिक्षे । कीदृशः सन् । वृषभो वर्षिता कनिक्रदत् शब्दं कुर्वन् । स त्वं हे सोम इंद्रायेंद्रार्थं पवसे । पूयसे । मत्सरिंतमो मादयितृतमस्त्वं । यथा वयं जेषाम जयेम समिथे संग्रामे त्वोतयस्त्वया रक्षिताः संतः ॥

॥ इति सप्तमस्य तृतीये प्रथमो वर्गः ॥

एष प्र कोश इति पंचर्चं दशमं सूक्तं । ऋष्याद्याः पूर्ववत् । एष इत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

एष प्र कोशे मधुमाँ अचिक्रददिंद्रस्य वज्रो वपुषो वपुष्टरः ।
अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षंति पयसेव धेनवः ॥१॥

एषः । प्र । कोशे । मधुऽमान् । अचिक्रदत् । इंद्रस्य । वज्रः । वपुषः । वपुःऽतरः ।
अभि । ईं । ऋतस्य । सुऽदुघाः । घृतऽश्चुतः । वाश्राः । अर्षंति । पयसाऽइव । धेनवः ॥१॥

एषोऽयं सोमो मधुमान् मधुररसः कोशे द्रोणकलशे प्राचिक्रदत् । प्रकर्षेण शब्दायते । कीदृश एषः । इंद्रस्य वज्रो वज्रस्थानीयः । बलकरत्वेन वज्रवत् प्रहरणसाधनत्वाद्वज्रत्वोपचारः । एष एव हि सोमो वज्र इंद्रस्य साधने । तथा वपुषो बीजानां वप्तुरन्यस्माद्वपुष्टरोऽतिशयेन वप्ता । बीजावापस्य सोमकर्तृकत्वात् सोमो वै रेतोधा इति श्रुतेः । ईमस्यर्तस्य सत्यफलस्य सोमस्य धारा इति शेषः । ता अभ्यर्षंति । अभिगच्छंति । कीदृश्यस्ताः । सुदुघाः सुष्ठु दोग्ध्र्यः फलानां घृतश्चुत उदकस्य रसस्य वा क्षारयित्र्यो वाश्राः शब्दयंत्यः । किमिव पयसा युक्ता वाश्रा धेनव इवेति ॥

॥ अथ द्वितीया ॥

स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः ।
स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा ॥२॥

सः । पूर्व्यः । पवते । यं । दिवः । परि । श्येनः । मथायत् । इषितः । तिरः । रजः ।
सः । मध्वः । आ । युवते । वेविजानः । इत् । कृशानोः । अस्तुः । मनसा । अह । बिभ्युषा ॥२॥

स सोमः पूर्व्यः प्रत्नः पवते । पूयते । अभिषूयत इत्यर्थः । यं सोमं दिवो द्युलोकाच्छ्येन इषितः स्वमाचा प्रेषितः सन् परि मथायत् पर्यमथ्नात् । तिरस्तीर्णं तिरस्कुर्वन् किं । रजः । तृतीयं लोकं । स एव सोमो मध्वो मधुररसं सोममा युवते । यौति पृथक्करोति द्युलोकात् । स्वयं वेविजान इत् चलन्नधो गच्छन् कृशानोः सोमपालस्यास्तुः शरक्षेप्तुः सकाशाद्बिभ्युषा भीतेन मनसाह । मध्व आ युवत इति संबंधः । कृशानोः सोमपालत्वं ब्राह्मणे स्पष्टमुक्तं । कृशानुः सोमपालः सव्यस्य पदः । ऐ० ब्रा० ३.२६. ॥

॥ अथ तृतीया ॥

ते नः पूर्वास उपरास इंदवो महे वाजाय धन्वंतु गोमते ।
ईक्षेण्यासो अह्यो३न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः ॥३॥

ते । नः । पूर्वासः । उपरासः । इंदवः । महे । वाजाय । धन्वंतु । गोऽमते ।
ईक्षेण्यासः । अह्यः । न । चारवः । ब्रह्मऽब्रह्म । ये । जुजुषुः । हविःऽहविः ॥३॥

ते वक्ष्यमाणाः पूर्वासः पूर्वे उपरासः । उपरता अवेत्युपराः । तादृशा इंदवः सोमा महे महते गोमते नो मह्यं वाजायान्नायान्नलाभार्थं धन्वंतु । गच्छंतु । प्राप्नुवंतु । कीदृशा इंदवः । ईक्षेण्यासः । ईक्षणीयाः संदर्शनीया अह्यो न । अह्यः स्त्रिय आहननात् । ता इव सुवेषाः स्त्रिय इव चारवो रमणीयाः । त इत्युक्तं क इत्याह । य इंदवो ब्रह्मब्रह्म सर्वमपि स्तावकमंत्रजातं हविर्हविः सर्वमपि हविर्जातं च जुजुषुः सेवंते ॥

॥ अथ चतुर्थी ॥

अयं नो विद्वान्वनवद्वनुष्यत इंदुः सत्राचा मनसा पुरुष्टुतः ।
इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजं ॥४॥

अयं । नः । विद्वान् । वनवत् । वनुष्यतः । इंदुः । सत्राचा । मनसा । पुरुऽस्तुतः ।
इनस्य । यः । सदने । गर्भं । आऽदधे । गवां । उरुब्जं । अभि । अर्षति । व्रजं ॥४॥

अयमिंदुः सोमो नोऽस्मान्वनुष्यतो हंतुमिच्छतः शत्रून् विद्वान् जानन् हंतुं वनवत् । हंतु तान् । केन साधनेन । सत्राचा सहांचता मनसा । कीदृशः । पुरुष्टुतः । बहुभिः स्तुतः । यः सोम इनस्येश्वरस्याग्नेः सदने स्थाने भूमौ वेद्यां वा वर्तमानो गर्भमादधे । धारयत्यौषधीषु । यश्च गवामस्मदीयानां शत्रुभिरपहृतानामुरुब्जं प्रभूतानामपां पयसां जनकं व्रजमभ्यर्षति गच्छति । स वनवदिति ॥

॥ अथ पंचमी ॥

चक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते ।
असावि मित्रो वृजनेषु यज्ञियोऽत्यो न यूथे वृषयुः कनिक्रदत् ॥५॥

चक्रिः । दिवः । पवते । कृत्व्यः । रसः । महान् । अदब्धः । वरुणः । हुरुक् । यते ।
असावि । मित्रः । वृजनेषु । यज्ञियः । अत्यः । न । यूथे । वृषऽयुः । कनिक्रदत् ॥५॥

चक्रिः सर्वस्य कर्ता कृत्व्यः कर्मण्यो रसो रसात्मको महान् गुणैरधिकोऽदब्धोऽहिंस्यो ह्रुरुक् कुटिलं यते गच्छते। इतस्ततः परिचरत इत्यर्थः। तदर्थं दिवः सकाशात्पवते। पूयते। अंतरिक्षस्याद्दशापवित्रादित्यर्थः। किंचासौ सोमोऽसावि। सूयते। कदा। वृजिनेष्वरिष्टेषु सत्सु। तत्परिहारार्थं। कीदृशः सः। मित्रः सर्वेषां मित्रभूतो यज्ञियो यष्टव्योऽत्यो नाश्व इव यूथे वडवायूथे। स यथा वृषयुः सन् शब्दं करोति तद्वदसौ वृषभो रसस्य वर्षिता कनिक्रदच्छब्दं कुर्वन्नसावीति ॥

॥ इति सप्तमस्य तृतीये द्वितीयो वर्गः ॥

प्र राजा वाचमिति पंचर्चमेकादशं सूक्तं। ऋष्याद्याः पूर्ववत्। प्र राजेत्यनुक्रांतं। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र राजा वाचं जनयन्नसिष्यददपो वसानो अभि गा इयक्षति।
गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतं ॥१॥

प्र। राजा। वाचं। जनयन्। असिस्यदत्। अपः। वसानः। अभि। गाः। इयक्षति।
गृभ्णाति। रिप्रं। अविः। अस्य। तान्वा। शुद्धः। देवानां। उप। याति। निःऽकृतं ॥१॥

राजा राजमानोऽयं सोमोऽभिषूयमाणः सन् वाचं शब्दं जनयन् उत्पादयन् असिष्यदत्। प्रस्यंदते। तथापो वसतीवरीर्वसान आच्छादयन् गाः स्तुतीरभीयक्षति। अभिगच्छति। इयक्षतिर्गतिकर्मसु पठितः। अस्य सोमस्य रिप्रमनुपादेयत्वेन पापरूपमभिषुतवल्लीशकलादिरूपमविरविरोमनिर्मितं दशापवित्रं तान्वा स्वीयेन वस्त्रेण गृभ्णाति। गृह्णाति शोधनसमये। पश्चाच्छुद्धो देवानां निष्कृतं संस्कृतं स्थानमुपयाति। उपगच्छति ॥

॥ अथ द्वितीया ॥

इंद्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने।
पूर्वीर्हि ते स्रुतयः संति यातवे सहस्रमश्वा हरयश्चमूषदः ॥२॥

इंद्राय। सोम। परि। सिच्यसे। नृऽभिः। नृऽचक्षाः। ऊर्मिः। कविः। अज्यसे। वने।
पूर्वीः। हि। ते। स्रुतयः। संति। यातवे। सहस्रं। अश्वाः। हरयः। चमूऽसदः ॥२॥

हे सोम त्वमिंद्रायेंद्रार्थं नृभिर्नेतृभिर्ऋत्विग्भिः परि षिच्यसे । अभिषूयसे । तथा हे सोम नृचक्षा नृणां यष्टॄणामनुग्रहेण द्रष्टोर्मिः प्रेर्यमाणः प्रवृद्धो वा कविर्मेधावी च त्वं वन उदकेऽज्यसे । प्रेर्यसे । पूर्वीर्बह्व्यो हि ते स्रुतयो मार्गाश्छिद्राणि संति यातवे यातुं । अल्पस्य सोमस्यापरिमितस्रुतिगमनासंभवात्तस्य बाहुल्यमाह । चमूषदोऽभिषवणफलकयोः सीदतः सहस्रमपरिमिता अश्वा व्याप्ता हरयो हरितवर्णा अंशवः संति । अथवेंद्राय परिषिच्यस इत्युक्त्वादिंद्रप्राप्तौ मार्गसाधनयोः सद्भाव उत्तरार्धेन प्रतिपादितः । ते पुरातन्यः सरण्यः संतींद्रं प्रति यातुं । तथा सहस्रसंख्याका हरितवर्णा अश्वाश्च संति चमूषदस्तवेति ॥

॥ अथ तृतीया ॥

समुद्रियां अप्सरसो मनीषिणमासीना अंतरभि सोममक्षरन् ।
ता ईं हिन्वंति हर्म्यस्य सक्षणिं याचंते सुम्नं पवमानमक्षितं ॥३॥

समुद्रियाः । अप्सरसः । मनीषिणं । आसीनाः । अंतः । अभि । सोमं । अक्षरन् ।
ताः । ईं । हिन्वंति । हर्म्यस्य । सक्षणिं । याचंते । सुम्नं । पवमानं । अक्षितं ॥३॥

समुद्रियाः समुद्रसाधनत्वात्समुद्रमंतरिक्षं । तत्संबंधिन्योऽप्सरसः काश्चनांतर्यज्ञमध्य आसीनाः पात्रेषु वर्तमाना वसतीवर्यो मनीषिणं मेधाविनं सोममभ्यक्षरन् । अभिषूयमाणं सोममभिक्षरंति । ता ईं एना एवेमेनं हर्म्यस्य हर्म्यवत्सुखकरस्य यागगृहस्य सक्षणिं सेचनशीलं हिन्वंति । वर्धयंति । पोषयंति । त एते स्तोतारो वा पवमानं सोममक्षितमक्षीणं सुम्नं सुखं याचंते । प्रार्थयंते । तत्रायं भावः । काश्चनाप्सरसः सोमं राजानं मनीषिणं कामयमाना देवानपि परित्यज्य स्वर्गादागत्य राज्ञः समीपे स्थित्वा तस्य रसानाददते । स्वरसेन वर्धयंति तं सुखं च याचंत इति ॥

॥ अथ चतुर्थी ॥

गोजिन्नः सोमो रथजिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित् ।
यं देवासश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवं ॥४॥

गोऽजित् । नः । सोमः । रथऽजित् । हिरण्यऽजित् । स्वःऽजित् । अप्ऽजित् । पवते । सहस्रऽजित् ।
यं । देवासः । चक्रिरे । पीतये । मदं । स्वादिष्ठं । द्रप्सं । अरुणं । मयःऽभुवं ॥४॥

नोऽस्माकं गोजिद्गवां जेता तथा रथजिद्रथस्य जेता हिरण्यजिद्धिरण्यस्य जेता तथा स्वर्जित् स्वर्गस्य सुखस्य जेताब्जिदपां जेता सहस्रजित्सहस्रसंख्याकस्य धनस्य जेता सोमः पवते। पूयते। यं देवासो देवाश्चक्रिरे कृतवंतः। किमर्थं। पीतये। पानाय। कीदृशं सोमं। मदं मदकरं स्वादिष्ठं स्वादुतमं द्रप्सं रसात्मकमरुणमरुणवर्णं मयोभुवं सुखस्य भावयितारं॥

॥ अथ पंचमी ॥

एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन्द्रविणान्यर्षसि।
जहि शत्रुमंतिके दूरके च य ऊर्वीं गव्यूतिमभयं च नस्कृधि ॥५॥

एतानि। सोम। पवमानः। अस्मऽयुः। सत्यानि। कृण्वन्। द्रविणानि। अर्षसि।
जहि। शत्रुं। अंतिके। दूरके। च। यः। ऊर्वीं। गव्यूतिं। अभयं। च। नः। कृधि ॥५॥

हे सोम एतानि पूर्वमंत्रोक्तानि गवादीनि द्रविणानि सत्यानि कृण्वन् कुर्वन् पवमानः पूयमानोऽर्षसि। पवसे। जहि च शत्रुं योऽस्मच्छत्रुरंतिके समीपे दूरकेऽत्यंतं दूरे देशे च वर्तते तं जहि। तथोर्वीं गव्यूतिं विस्तीर्णं मार्गमभयं च नोऽस्माकं कृधि। कुरु॥

॥ इति सप्तमस्य तृतीये तृतीयो वर्गः ॥

अचोदस इति पंचर्चं द्वादशं सूक्तं। ऋष्याद्याः पूर्ववत्। अचोदस इत्यनुक्रांतं। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

अचोदसो नो धन्वंत्विंदवः प्र सुवानासो बृहद्दिवेषु हरयः।
वि च नशन्न इषो अरातयोऽर्यो नशंत सनिषंत नो धियः ॥१॥

अचोदसः। नः। धन्वंतु। इंदवः। प्र। सुवानासः। बृहत्ऽदिवेषु। हरयः।
वि। च। नशन्। नः। इषः। अरातयः। अर्यः। नशंत। सनिषंत। नः। धियः ॥१॥

अचोदसोऽचोदना अनन्यप्रेरिता इंदवः सोमा नोऽस्माकं प्र धन्वंतु। प्र गच्छंतु। धन्वतिर्गतिकर्मा। कुत्र। बृहद्दिवेषु प्रभूतदीप्तिषु यागेषु निमित्तेषु। अथवा बृहद्दिवकुलजेषु मध्ये। न इति संबंधः। कीदृशा इंदवः। सुवानासः सूयमाना हरयो हरितवर्णाः। किंच नोऽस्मभ्यं ये चेषोऽन्नस्यारातयोऽदातारः संति ते

च विनशन्। विनश्यंतु। तथार्योऽर्योऽपि नशंत। विनश्यंतु। सनिषंत संभजंतु च नो धियोऽस्मदीयानि कर्माणि देवा अस्मत्प्रियभूता वा ॥

॥ अथ द्वितीया ॥

प्र णो॑ धन्वं॒त्विंद॑वो मद॒च्युतो॒ धना॑ वा॒ येभि॒रर्वं॑तो जुनी॒मसि॑ ।
ति॒रो मर्त॑स्य॒ कस्य॑ चि॒त्परि॑ह्वृतिं॒ व॒यं धना॑नि वि॒श्वधा॑ भरेमहि ॥२॥

प्र। नः। ध॒न्वं॒तु॒। इंद॑वः। म॒द॒ऽच्यु॑तः। धना॑। वा॒। येभिः॑। अर्वं॑तः। जु॒नी॒मसि॑।
ति॒रः। मर्त॑स्य। कस्य॑। चि॒त्। परि॑ऽह्वृतिं। व॒यं। धना॑नि। वि॒श्वधा॑। भ॒रे॒म॒हि॒ ॥२॥

प्र णो धन्वंतु प्रधन्वंतु प्रगच्छंतु नोऽस्माकमिंदवः सोमा मदच्युतो मदस्राविणः। वा अथवा। किंचेत्यर्थः। धना धनान्यपि प्रधन्वंतु। येभिर्यैः सोमैरर्वंतो बलवतः शत्रोः समीपं जुनीमसि। जुनीमः प्राप्नुमः। कस्य चित् कस्यापि मर्तस्य मनुष्यस्य प्रबलस्य परिह्वृतिं परितो बाधां तिरस्तिरस्कुर्वंतो वयं धनानि गवादिरूपाणि विश्वधा सर्वदा भरेमहि। बिभृयाम ॥

॥ अथ तृतीया ॥

उ॒त स्वस्या॒ अरा॑त्या अ॒रिर्हि ष उ॒तान्यस्या॒ अरा॑त्या॒ वृको॒ हि॒ षः ।
धन्व॒न्न तृष्णा॒ सम॑रीत॒ ताँ अ॒भि सोम॑ ज॒हि प॑वमान दुरा॒ध्यः॑ ॥३॥

उ॒त। स्वस्याः॑। अरा॑त्याः। अ॒रिः। हि। सः। उ॒त। अ॒न्यस्याः॑। अरा॑त्याः। वृकः॑। हि। सः।
धन्व॑न्। न। तृष्णा॑। सं। अ॒री॒त॒। तान्। अ॒भि। सोम॑। ज॒हि। प॒व॒मा॒न॒। दुः॒ऽआ॒ध्यः॑ ॥३॥

उतापि च स सोमः स्वस्या अरात्याः स्वीयस्य शत्रोररिरभिगंता हननाय। उतापि च स सोमोऽन्यस्या अस्मदीयाया अरात्या अस्मच्छत्रोर्वृको हि हिंसकः खलु। अरातिशब्दः स्त्रीलिंगोऽप्यस्ति। अथ प्रत्यक्षकृतः। धन्वन्न तृष्णा। धन्व निरुदको देशः। तस्मिन्स्थितस्य तृष्णेव। सा यथा तं समरीत प्राप्नोति तद्वत् तानुभयविधाञ्शत्रूञ्जहि ॥

॥ अथ चतुर्थी ॥

दि॒वि ते॒ नाभा॑ पर॒मो य आ॑द॒दे पृ॑थि॒व्यास्ते॑ रुरुहुः॒ सान॑वि॒ क्षिपः॑ ।
अद्र॑यस्त्वा बप्सति॒ गोरधि॑ त्व॒च्य१प्सु त्वा॒ हस्तै॑र्दुदुहुर्मनी॒षिणः॑ ॥४॥

दिवि। ते। नाभा। परमः। यः। आऽदृदे। पृथिव्याः। ते। रुरुहुः। सानवि। क्षिपः।
अद्रयः। त्वा। बप्सति। गोः। अधि। त्वचि। अप्ऽसु। त्वा। हस्तैः। दुदुहुः। मनीषिणः॥४॥

हे सोम ते तव स परम उत्तमोऽंशो दिवि दिवो नाभा नाभौ द्युलोकस्य नाभिस्थानीये देशेऽथवा नाभौ वृष्ट्यादेर्बंधके दिवि द्युलोके वर्तते य आदद आदत्ते हविर्देवताख्यः सन्। ते तव द्युलोकस्थांशस्यावयवाः पृथिव्याः सानवि समुच्छ्रिते देशे पर्वतादिप्रदेशे क्षिपः क्षिप्ताः संतो रुरुहुः। रोहंति। त्वा त्वां सोमांशभूतमद्रयो ग्रावाणो बप्सति। भक्षयंति। बप्सतिरत्तिकर्मा। कुत्र। गोरधि त्वचि। अधीति सप्तम्यर्थानुवादी। आनडुहेऽधिषवणचर्मणीत्यर्थः। यद्यपी-दानींतनाः कृष्णाजिनेऽभिषुण्वंति न गोचर्मणि तथापि तस्मिन्सोमो मीयते क्रयार्थं। तथा च सति यस्मिन् मिमीते तस्याधिषवणचर्मेति सूत्रान्मानसाध-नस्यैव गोचर्मणोऽधिषवणचर्मत्वाभिधानादविरोधः। त्वा त्वां तथाप्सु वसती-वरीषु दुदुहुः। दुहंति। अद्भिराप्लाव्य दुहंतीत्यर्थः। यद्वाप्सूदकेषु रसेषु निमित्तेषु दुदुहुः। कैः साधनैः। हस्तैः। हस्तो हंतेरिति निरुक्तं। के। मनीषिणो मेधा-विनोऽध्वर्य्वादयः॥

॥ अथ पंचमी ॥

एवा त इंदो सुभ्वं सुपेशसं रसं तुंजंति प्रथमा अभिश्रियः।
निदंनिदं पवमान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः॥५॥
एव। ते। इंदो इति। सुऽभ्वं। सुऽपेशसं। रसं। तुंजंति। प्रथमाः। अभिऽश्रियः।
निदंऽनिदं। पवमान। नि। तारिषः। आविः। ते। शुष्मः। भवतु। प्रियः। मदः॥५॥

पूर्वत्राद्रयस्त्वां बप्सतीत्युक्तं। तदेवोच्यते। हे इंदो सोम एवैवमिदानीं क्रिय-माणप्रकारेण ते तव सुभ्वं शोभनभवनं सुपेशसं। पेश इति रूपनाम। सुरूपं रसं प्रथमाः प्रथममेव। यद्वा। प्रथम इति मुख्यनाम। प्रथमा मुख्या ग्रावा-णोऽध्वर्यवो वाभिश्रियोऽभिश्रयंतः संतस्तुंजंति। प्रेरयंति। हे पवमान निदं-निदमस्मन्निंदकं सर्वमपि शत्रुं नि तारिषः। विनाशय। ते तव शुष्मो बलकरः प्रियः प्रियभूतो मदो मदकरो रस आविर्भवतु॥

॥ इति सप्तमस्य तृतीये चतुर्थो वर्गः॥

सोमस्य धारेति पंचर्चं त्रयोदशं सूक्तं भारद्वाजस्य वसुनाम्न आर्षं जागतं पवमानसोमदेवताकं । तथा चानुक्रांतं । सोमस्य वसुर्भारद्वाज इति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

सोम॑स्य॒ धारा॑ पवते नृ॒चक्ष॑स ऋ॒तेन॑ दे॒वान्ह॑वते दि॒वस्परि॑ ।
बृह॒स्पते॑ र॒वथे॑ना॒ वि दि॑द्युते समु॒द्रासो॒ न सव॑नानि विव्यचुः ॥१॥

सोम॑स्य । धारा॑ । प॒व॒ते॒ । नृ॒ऽचक्ष॑सः । ऋ॒तेन॑ । दे॒वान् । ह॒व॒ते॒ । दि॒वः । परि॑ ।
बृह॒स्पतेः॑ । र॒वथे॑न । वि । दि॒द्यु॒ते॒ । स॒मु॒द्रासः॑ । न । सव॑नानि । वि॒व्य॒चुः॒ ॥१॥

सोमस्याभिषूयमाणस्य धारा पवते । श्चोतते । कीदृशस्य सोमस्य । नृचक्षसः । नृणां यजमानानां द्रष्टुः । स च ऋतेन यज्ञेन देवान्सोमभाज इंद्रादीन्हवते । कुत्र । दिवस्परि । द्युलोकस्योपरि वर्तमानान् । बृहस्पतेर्मंत्रपालकस्य स्तोतू रवथेन शब्देन स्तोत्रेण वि दिद्युते । विद्योतते । समुद्रासो न समुद्रा इव पृथिवीं सवनानि यज्ञसंबंधीनि विव्यचुः । व्याप्नुवंति ॥

॥ अथ द्वितीया ॥

यं त्वा॑ वाजिन्न॒घ्न्या अ॒भ्यनू॑ष॒तायो॑हतं॒ योनि॒मा रो॑हसि द्यु॒मान् ।
म॒घोना॒मायुः॑ प्रति॒रन्महि॒ श्रव॒ इंद्रा॑य सोम पवसे॒ वृषा॒ मदः॑ ॥२॥

यं । त्वा॒ । वा॒जि॒न् । अ॒घ्न्याः । अ॒भि । अनू॑षत । अयः॑ऽहतं । योनि॑ं । आ । रो॒ह॒सि॒ । द्यु॒ऽमान् ।
म॒घोना॑ं । आयुः॑ । प्र॒ऽति॒रन् । महि॑ । श्रवः॑ । इंद्रा॑य । सोम॑ । प॒व॒से॒ । वृषा॑ । मदः॑ ॥२॥

हे वाजिन् अन्नवन् सोम यं त्वा त्वामघ्न्या अहननीया गावोऽभ्यनूषत अभिष्टुवंति । आशिरार्थं स्थिताः शब्दायंत इत्यर्थः । स त्वमयोहतं । अय इति हिरण्यनाम । तेन तद्वान्पाणिर्लक्ष्यते । हिरण्मयेन पाणिना हतं संस्कृतं योनिं स्थानमारोहसि । द्युमान् दीप्तः सन् । अभि योनिमयोहतं । ऋग्वे० ९.१.२. । इति ह्युक्तं । किंच हे सोम मघोनां हविष्मतां यजमानानामायुरायुष्यं महि महच्छ्रवोऽन्नं यशो वा प्रतिरन् वर्धयन्निंद्रायेंद्रार्थं पवसे । पूयसे । वृषा वर्षको मदो मदकरश्च त्वं ॥

॥ अथ तृतीया ॥

एंद्रस्य कुक्षा पवते मदिंतम ऊर्जं वसानः श्रवसे सुमंगलः ।
प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन्हरिरत्यः स्यंदते वृषा ॥३॥
आ । इंद्रस्य । कुक्षा । पवते । मदिन्ऽतमः । ऊर्जं । वसानः । श्रवसे । सुऽमंगलः ।
प्रत्यङ् । सः । विश्वा । भुवना । अभि । पप्रथे । क्रीळन् । हरिः । अत्यः । स्यंदते । वृषा ॥३॥

अयं सोम इंद्रस्य कुक्षा कुक्षावा पवते । आसिच्यते । किमर्थं । श्रवसे । तस्यान्नाय यष्टुर्वान्नसिद्ध्यर्थं । सोमो विशेष्यते । मदिंतमो मादयितृतम ऊर्जं वसानो बलकरं रसमाच्छादयन् । अपो वसान इति ह्युक्तं । सुमंगलः शोभनमंगलप्रदः । स सोमः प्रत्यङ् विश्वा भुवना सर्वाणि भूतजातान्यभि पप्रथे । अभि प्रथयति । दिव्युदितः सन् क्रीळन् वेद्यां स क्रीडमानो हरिर्हरितवर्णोऽत्योऽतनकुशलो वृषा वर्षकः स्यंदते रसरूपेण ॥

॥ अथ चतुर्थी ॥

तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः ।
नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित् ॥४॥
तं । त्वा । देवेभ्यः । मधुमत्ऽतमं । नरः । सहस्रऽधारं । दुहते । दश । क्षिपः ।
नृऽभिः । सोम । प्रऽच्युतः । ग्रावऽभिः । सुतः । विश्वान् । देवान् । आ । पवस्व । सहस्रऽजित् ॥४॥

हे सोम तं तादृशं त्वा त्वां देवेभ्य इंद्राद्यर्थं मधुमत्तममतिशयेन मधुमंतं सहस्रधारं बहुधारायुक्तं दुहते । दुहंति । के । नरो नेतार ऋत्विजो दश क्षिपः । तेषां दशसंख्याका अंगुलयश्च । हे सोम नृभिर्मनुष्यैः प्रच्युतो ग्रावभिः सुतोऽभिषुतस्त्वं सहस्रजित् सहस्रसंख्याकधनस्य जेता सन् विश्वान्देवाना पवस्व ॥

॥ अथ पंचमी ॥

तं त्वा हस्तिनो मधुमंतमद्रिभिर्दुहंत्यप्सु वृषभं दश क्षिपः ।
इंद्रं सोम मादयन्दैव्यं जनं सिंधोरिवोर्मिः पवमानो अर्षसि ॥५॥

तं । त्वा । हस्तिनः । मधुऽमंतं । अद्रिऽभिः । दुहंति । अप्ऽसु । वृषभं । दश । क्षिपः ।
इंद्रं । सोम । मादयन् । दैव्यं । जनं । सिंधोःऽइव । ऊर्मिः । पवमानः । अर्षसि ॥५॥

तं तादृशं मधुमंतं मधुररसं वृषभं कामानां वर्षकं त्वा त्वां हस्तिनः सुहस्तस्य दश क्षिपोऽंगुलयोऽद्रिभिर्ग्रावभिरप्सु दुहंति । तादृश हे सोम इंद्रमन्यं दैव्यं जनं देवसंबंधिनं संघं मादयन् सिंधोरूर्मिरिव पवमानः पूयमानः सन् अर्षसि । गच्छसि ॥

॥ इति सप्तमस्य तृतीये पंचमो वर्गः ॥

प्र सोमस्येति पंचर्चं चतुर्दशं सूक्तं । ऋषिदेवते पूर्ववत् । अंत्या त्रिष्टुप् शिष्टा जगत्यः । प्र सोमस्येत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र सोमस्य पवमानस्योर्मय इंद्रस्य यंति जठरं सुपेशसः ।
दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमंदिषुः सुताः ॥१॥
प्र । सोमस्य । पवमानस्य । ऊर्मयः । इंद्रस्य । यंति । जठरं । सुऽपेशसः ।
दध्ना । यत् । ईं । उत्ऽनीताः । यशसा । गवां । दानाय । शूरं । उत्ऽअमंदिषुः । सुताः ॥१॥

पवमानस्य पूयमानस्योर्मयो रसप्रवाहा इंद्रस्य जठरं प्र यंति । प्रगच्छंति । सुपेशसः सुरूपा ऊर्मय इति संबंधः । यद्यदेमेते सुता अभिषुताः सोमा गवां यशसा बलभूतेन दध्ना सहोन्नीताः संतो दानाय यजमानविषयाभिमतदानाय शूरं विक्रांतमिंद्रमुदमंदिषुः । उन्मादयंति । तदा जठरं यंति ॥

॥ अथ द्वितीया ॥

अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळ्हा रघुवर्तनिर्वृषा ।
अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ॥२॥
अच्छ । हि । सोमः । कलशान् । असिस्यदत् । अत्यः । न । वोळ्हा । रघुऽवर्तनिः । वृषा ।
अथ । देवानां । उभयस्य । जन्मनः । विद्वान् । अश्नोति । अमुतः । इतः । च । यत् ॥२॥

असौ सोमः कलशानच्छाभिमुखमसिष्यदत् स्यंदते । क इव । अत्यो न वोळ्हा रथस्य वाहकोऽश्व इव यथा स्वगंतव्यमभिगच्छति तद्वत् । यद्वायमुत्तरत्र दृष्टांतः ।

वोळ्हाश्व इव रघुवर्तनिर्लघुगमनो वृषा वर्षकश्च । अथापि च देवानां सोमसजुषामुभयस्योभयविधं जन्मनो जातं विद्वान् जानन् असिष्यदत्कलशान् । किं तदुभयं जन्मेति उच्यते । यद्देवजातममुतो द्युलोकादितश्चास्माद्भूलोकाच्चाश्नोति व्याप्नोति यज्ञं । तस्योभयस्य जातं विद्वानिति संबंधः ॥

॥ अथ तृतीया ॥

आ नः सोम पवमानः किरा वस्विंदो भव मघवा राधसो महः ।
शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ॥३॥
आ । नः । सोम । पवमानः । किर । वसु । इंदो इति । भव । मघऽवा । राधसः । महः ।
शिक्ष । वयःऽधः । वसवे । सु । चेतुना । मा । नः । गयं । आरे । अस्मत् । परा । सिचः ॥३॥

आ किर सर्वतो वि क्षिप नोऽस्मभ्यं हे सोम पवमानः पूयमानस्त्वं । किं । वसु वासकं धनं गवादिरूपं । किंच । इंदो दीप्त हे सोम मघवा धनवांस्त्वं महो महतो राधसो धनस्य भव दातेति शेषः । तथा हे वयोधोऽन्नस्य धातः सोम वसवे वासकाय परिचरते मह्यं चेतुना प्रकृष्टेन प्रज्ञानेन सु सुखं कल्याणं शिक्ष । देहि । नोऽस्मभ्यं प्रदेयं गयं धनमस्मदारेऽस्मत्तो दूरं मा परा सिचः । मा प्रेरय ॥

॥ अथ चतुर्थी ॥

आ नः पूषा पवमानः सुरातयो मित्रो गच्छंतु वरुणः सजोषसः ।
बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥४॥
आ । नः । पूषा । पवमानः । सुऽरातयः । मित्रः । गच्छंतु । वरुणः । सऽजोषसः ।
बृहस्पतिः । मरुतः । वायुः । अश्विना । त्वष्टा । सविता । सुऽयमा । सरस्वती ॥४॥

सुरातयः सुदानाः सजोषसः संगताः पूषादयो देवा आ गच्छंतु । नोऽस्मान् अस्माकं यज्ञं वा । तथा सुयमा । यम्यते नियम्यत इति यमो विग्रहः । सुविग्रहा सरस्वती चागच्छतु ॥

॥ अथ पंचमी ॥

उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।
भगो नृशंस उर्व१ंतरिक्षं विश्वे देवाः पवमानं जुषंत ॥५॥

उभे इति । द्यावापृथिवी इति । विश्वमिन्वे इति विश्वंऽइन्वे । अर्यमा । देवः । अदितिः । विऽधाता ।

भगः । नृऽशंसः । उरु । अंतरिक्षं । विश्वे । देवाः । पवमानं । जुषंत ॥५॥

विश्वमिन्वे । इन्वतिर्व्याप्तिकर्मा । सर्वव्यापिन्यावुभे द्यावापृथिवी द्यावापृथिव्यौ अर्यमादयस्त्रयश्च भगश्च नृशंसो नृभिः शंसनीय उर्वंतरिक्षं च विश्वे देवाश्च पवमानं पूयमानं सोमं जुषंत । सेवंते ॥

॥ इति सप्तमस्य तृतीये षष्ठो वर्गः ॥

असावीति पंचर्चं पंचदशं सूक्तं । ऋष्याद्याः पूर्ववत् । अस्यानुक्रमणिका । असावीति त्रिष्टुबंते इति । अनेन द्विवचनेन प्रकृतयोः प्र सोमस्येत्यादिकयोर्द्वयोरपि त्रिष्टुबंतता प्रतिपादिता । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवंतमासदं ॥१॥

असावि । सोमः । अरुषः । वृषा । हरिः । राजाऽइव । दस्मः । अभि । गाः । अचिक्रदत् ।
पुनानः । वारं । परि । एति । अव्ययं । श्येनः । न । योनिं । घृतऽवंतं । आऽसदं ॥१॥

सोमोऽसावि । अभिषुतोऽभूत् । कीदृशः सोमः । अरुष आरोचमानो वृषा वर्षको हरिर्हरितवर्णः । स च राजेव दस्मो दर्शनीयः सन् गा उदकान्यभिलक्ष्याचिक्रदत् शब्दं करोति स्वरसनिर्मोकसमये । पश्चात्पुनानः पूयमानोऽव्ययमविमयं वारं वालं दशापवित्रं पर्येति । ततः श्येनो न श्येन इव योनिं स्वकीयं स्थानं घृतवंतमुदकवंतमासदमासदनाय पवत इति शेषः ॥

॥ अथ द्वितीया ॥

कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन्दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजं ॥२॥

कविः । वेधस्या । परि । एषि । माहिनं । अत्यः । न । मृष्टः । अभि । वाजं । अर्षसि ।
अपऽसेधन् । दुःऽइता । सोम । मृळय । घृतं । वसानः । परि । यासि । निःऽनिजं ॥२॥

हे सोम कविः क्रांतदर्शी सन् वेधस्या यागविधानेच्छया माहिनं मंहनीयं पवित्रं पर्येषि। परिगच्छसि। पश्चान्मृष्टः प्रक्षालितोऽत्यो नाश्व इव वाजं संग्राममभ्यर्षसि। हे सोम दुरिताऽस्माकं दुरितान्यपसेधन् परिहरन् मृळय। सुखय। घृतमुदकं वसान आच्छादयन् परियासि। अभिगच्छसि। किं। निर्णिजं। निर्णिजकं पवित्रं॥

॥ अथ तृतीया ॥

पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे।
स्वसार आपो अभि गा उतासरन्त्सं ग्रावभिर्नसते वीते अध्वरे ॥३॥

पर्जन्यः। पिता। महिषस्य। पर्णिनः। नाभा। पृथिव्याः। गिरिषु। क्षयं। दधे।
स्वसारः। आपः। अभि। गाः। उत। असरन्। सं। ग्रावऽभिः। नसते। वीते। अध्वरे॥३॥

यस्य महिषस्य महतः पर्णिनः पर्णवतः पतनवतो वा सोमस्य पर्जन्यः पिता जनकः स सोमः पृथिव्या नाभा नाभौ नाभिस्थानीये हविर्धाने गिरिषु गिरिसंबंधिग्रावसु क्षयं निवासं दधे। धारयत्यभिषवसमये। उतापि च स्वसारोऽङ्गुलय आपो वसतीवर्यो गा आशिरार्थाः स्तुतयो वाभ्यसरन्। अभिसरंति। सं नसते संगच्छते च ग्रावभिः साकं। कुत्र। वीते कांतेऽध्वरे यज्ञे॥

॥ अथ चतुर्थी ॥

जायेव पत्यावधि शेव मंहसे पज्राया गर्भ शृणुहि ब्रवीमि ते।
अंतर्वाणीषु प्र चरा सु जीवसेऽनिंद्यो वृजने सोम जागृहि ॥४॥

जायाऽइव। पत्यौ। अधि। शेवं। मंहसे। पज्रायाः। गर्भ। शृणुहि। ब्रवीमि। ते।
अंतः। वाणीषु। प्र। चर। सु। जीवसे। अनिंद्यः। वृजने। सोम। जागृहि॥४॥

जायेव पत्यौ जाया यथा स्वभार्या भर्तरि सुखं प्रयच्छति तद्वच्छेवं। द्वितीयाया अम्भावाभावश्छांदसः। सुखं मंहसे। प्रयच्छसि यजमाने। हे पज्राया गर्भ सोम शृणुहि शृणु स्तुतीर्यास्ते तुभ्यं ब्रवीमि। पजिर्गतिकर्मा। पज्रा पृथिवीत्याहुः। अपि वा माध्यमिका वाक् पज्रा। भूमावोषधिरूपेण जातत्वाद्गर्भत्वं। माध्यमिकाया वाचोऽपि वृष्टिसाधनत्वात्तत्पुत्रत्वं। स त्वं वाणीषु वाक्षु स्तुतिष्वंतर्मध्ये सु सुष्ठु प्र चर जीवसेऽस्माकं जीवनाय। हे सोम अनिंद्यः स्तुत्यस्त्वं वृजनेऽस्माकं शत्रुबले जागृहि। प्रबुद्धो भव॥

॥ अथ पंचमी ॥

यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिंदो ।
एवा पवस्व सुविताय नव्यसे तव व्रतमन्वापः सचंते ॥५॥

यथा । पूर्वेभ्यः । शतऽसाः । अमृध्रः । सहस्रऽसाः । परिऽअयाः । वाजं । इंदो इति ।
एव । पवस्व । सुविताय । नव्यसे । तव । व्रतं । अनु । आपः । सचंते ॥५॥

हे इंदो सोम यथा पूर्वेभ्यो महर्षिभ्यः स्तोतृभ्यः शतसाः शतसंख्याकस्य धनस्य दाता तथा सहस्रसाश्च सन् पर्ययाः परिगच्छेः एवैवमिदानीमपि नव्यसे नवतराय सुवितायाभ्युदयाय पवस्व । क्षर । तव व्रतं कर्मान्वापो वसतीवर्यः सचंते । अतः पवस्व ॥

॥ इति सप्तमस्य तृतीये सप्तमो वर्गः ॥

पवित्रं त इति पंचर्चं षोडशं सूक्तमांगिरसस्य पवित्रस्यार्षं जागतं पवमानसोमदेवताकं । तथा चानुक्रांतं । पवित्र इति । अभिष्टव आद्ये त्र्यृचौ वक्तव्ये । सूचितं च । पवित्रं ते विततं ब्रह्मणस्पत इति द्वे वि यत्पवित्रं धिषणा अतन्वत । आ॰ ४.६. । इति ॥

॥ तत्र प्रथमा ॥

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहंतस्तत्समाशत ॥१॥

पवित्रं । ते । विऽततं । ब्रह्मणः । पते । प्रऽभुः । गात्राणि । परि । एषि । विश्वतः ।
अतप्तऽतनूः । न । तत् । आमः । अश्नुते । शृतासः । इत् । वहंतः । तत् । सं । आशत ॥१॥

हे ब्रह्मणस्पते मंत्रस्य स्वामिन् सोम ते पवित्रं शोधकमंगं विततं । सर्वत्र विस्तृतं । स प्रभुः प्रभविता त्वं गात्राणि पातुरंगानि पर्येषि । परिगच्छसि । विश्वतः सर्वतः । तव तत्पवित्रमतप्ततनूः पयोव्रतादिनासंतप्तगात्र आमोऽपरिपक्वो नाश्नुते । न व्याप्नोति । शृतास इत् शृता एव परिपक्वा एव वहंतो यागं निर्वहंतस्तत्पवित्रं समाशत । व्याप्नुवंति ॥

॥ अथ द्वितीया ॥

तपोष्पवित्रं विततं दिवस्पदे शोचंतो अस्य तंतवो व्यस्थिरन् ।
अवंत्यस्य पवीतारमाशवो दिवस्पृष्ठमधि तिष्ठंति चेतसा ॥२॥

तपोः । पवित्रं । विऽततं । दिवः । पदे । शोचंतः । अस्य । तंतवः । वि । अस्थिरन् ।
अवंति । अस्य । पवितारं । आशवः । दिवः । पृष्ठं । अधि । तिष्ठंति । चेतसा ॥२॥

तपोः शत्रूणां तापकस्य सोमस्य पवित्रं शोधकमंगं तेजो वा दिवस्पदे द्युलोकस्योच्छ्रिते स्थाने विततं । विस्तृतं । तृतीयस्यामितो दिवि सोम आसीदिति ब्राह्मणं । अस्य तंतवोऽशवः शोचंतो दीप्यमाना व्यस्थिरन् । विविधं तिष्ठंति । पृथिव्यां हविर्धाने वा । अस्य सोमस्याशवः शीघ्रगामिनो रसा अवंति । रक्षंति । कं । पवितारं पावयितारं । यजमानमवंति रक्षंति होमद्वारा पश्चाद्धुता दिवो द्युलोकस्य पृष्ठं पृष्ठभागमुन्नतदेशं चेतसा बुद्ध्या देवगमनेच्छावत्याधितिष्ठंति । आश्रयंते ॥

अभिष्टवेऽरूरुचदित्येषावपनीया । सूत्रितं च । ईळे द्यावापृथिवी इति प्रागुत्तमाया अरूरुचदुषसः पृश्निरग्रिय इत्यावपेत ।आ० ४.६.। इति ॥

॥ सैषा सूक्ते तृतीया ॥

अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥३॥

अरूरुचत् । उषसः । पृश्निः । अग्रियः । उक्षा । बिभर्ति । भुवनानि । वाजऽयुः ।
मायाऽविनः । ममिरे । अस्य । मायया । नृऽचक्षसः । पितरः । गर्भं । आ । दधुः ॥३॥

उषसः संबंधी पृश्निरादित्यः । पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति निरुक्तं । अग्रियो मुख्यः सोऽयं सोमोऽरूरुचत् । रोचयति । स उक्षा जलस्य सेक्ता बिभर्ति पुष्णात्युदकेन भुवनानि भूतजातानि वाजयुस्तेषामन्नमिच्छन् । मायाविनो । माया प्रज्ञा । प्रज्ञावंतोऽस्य सोमस्य मायया प्रज्ञया ममिरे । निर्माति । सोमस्यैकैकांशपानेन जातबला अग्न्यादयः स्वस्वव्यापारेण जगत्सृजंतीत्यर्थः । तथास्य मायया नृचक्षसो नृणां द्रष्टारः पालका देवा अंगिरसः पितरो वा गर्भमादधुः । धारयंति । ओषधीषु वा च सूर्यात्मा सोमः सूयते सूर्य-

रश्म्यनुगमाधीनवर्धनाच्चंद्रस्य। अयमुषसः पृश्निः सविताऽरुचत्। रोचयति सर्वं रोचते वा। शिष्टं समानं। तत्संबंधिनो नृचक्षसो नृणां द्रष्टारः पितरो जगद्रक्षका रश्मयो गर्भमादधुर्वृष्ट्यर्थं ॥

अभिष्टवे खरमवेक्षमाणो गंधर्व इत्थेत्येतां पठेत्। सूचितं च। गंधर्व इत्था पदमस्य रक्षतीति खरमवेक्ष्य। आ० ४.७.। इति ॥

॥ सैषा चतुर्थी ॥

गंधर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः।
गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ॥४॥
गंधर्वः। इत्था। पदं। अस्य। रक्षति। पाति। देवानां। जनिमानि। अद्भुतः।
गृभ्णाति। रिपुं। निऽधया। निधाऽपतिः। सुकृत्ऽतमाः। मधुनः। भक्षं। आशत ॥४॥

गंधर्व उदकानां स्तुतीनां वा धारक आदित्योऽस्य सोमस्य पदं स्थानं द्युसंबंधीत्था सत्यं रक्षति। सोऽयं सोमो देवानां जनिमानि जन्मानि। देवानित्यर्थः। पाति। रक्षति। अद्भुतो महान्। किंचायं रिपुमस्मद्वैरिणं निधया। निधा पाश्या। पाशसमूहेन गृभ्णाति। गृह्णाति। निधापतिः पशुसमूहस्वामी। तस्यास्य मधुनो मधुररसस्य भक्षं सुकृत्तमा अतिशयेन सुकृतकर्तार एवाशत। प्राप्नुवंति ॥

अंतिमे प्रवर्ग्ये परिधानीयायाः पूर्वं हविर्हविष्म इत्येषावपनीया। सूचितं च। उत्तमे प्रागुत्तमाया हविर्हविष्मो महि सद्म दैव्यमित्यावपेत। आ० ४.७.। इति ॥

॥ सैषा पंचमी ॥

हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरं।
राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ॥५॥
हविः। हविष्मः। महि। सद्म। दैव्यं। नभः। वसानः। परि। यासि। अध्वरं।
राजा। पवित्रऽरथः। वाजं। आ। अरुहः। सहस्रऽभृष्टिः। जयसि। श्रवः। बृहत् ॥५॥

हे हविष्मः। हविरित्युदकनाम। उदकवन् सोम हविर्भूतं नभः। उदकनामैतत्। उदकरसमित्यर्थः। वसान आच्छादयन् महि महद्दैव्यं सद्म यागगृहं परियासि। परिगच्छस्यध्वरं निवोढुं। किंच। हे सोम राजा पवित्ररथश्च वाजं

संग्राममारुहः । आरोहसि । यद्वा । तत्र तत्र संग्रामवाचकेन शब्देन यज्ञव्यवहारदर्शनाद्व वाजो यज्ञाख्यसंग्रामः । तमारुहः । यथा कश्चिद्राजा रथमारुह्य स्वस्थानं प्रविशति तद्वदिति भावः । किंच । सहस्रभृष्टिर्बहुभ्रंशः । अपरिमितगमन इत्यर्थः । अथवा भृष्टिरायुधं । असंख्यातायुधः सन् बृहच्छ्रवो महदन्नं जयस्यस्माकं ॥

॥ इति सप्तमस्य तृतीयेऽष्टमो वर्गः ॥

पवस्व देवमादन इति पंचर्चं सप्तदशं सूक्तं वाचः पुत्रस्य प्रजापतेरार्षं जागतं पवमानसोमदेवताकं । तथा चानुक्रांतं । पवस्व वाच्यः प्रजापतिरिति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

पवस्व देवमादनो विचर्षणिरप्सा इंद्राय वरुणाय वायवे ।
कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि दैव्यं जनं ॥१॥
पवस्व । देवऽमादनः । विऽचर्षणिः । अप्साः । इंद्राय । वरुणाय । वायवे ।
कृधि । नः । अद्य । वरिवः । स्वस्तिऽमत् । उरुऽक्षितौ । गृणीहि । दैव्यं । जनं ॥१॥

हे सोम देवमादनो देवानां मादयिता विचर्षणिर्विद्रष्टाप्सा अपां दाता त्वं पवस्व । क्षर । कस्मै । इंद्राय वरुणाय वायवे च । नोऽस्माकं वरिवो धनं स्वस्तिमत् । स्वस्तीत्यविनाशनाम । तद्वद्धनं कृधि । कुरु । उरुक्षितौ विस्तीर्णायां भूमौ यज्ञसंबंधिन्यां दैव्यं जनं देवसंबंधिनं संघं । जनशब्दः संघवाची । तं गृणीहि । गृणातिः शब्दकर्मा । शब्दय । यथा त्वदीयाभिषवशब्दं श्रुत्वा देवा आगच्छंति तथा गृणीहीत्यर्थः । अथवा दैव्यं जनमित्यृषिः स्वात्मानमाह । देवसंबंधिनं जनं मां गृणीहि । साधु संभक्तेति शब्दय ॥

॥ अथ द्वितीया ॥

आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति ।
कृण्वन्त्संचृतं विचृतमभिष्टय इंदुः सिषक्त्युषसं न सूर्यः ॥२॥
आ । यः । तस्थौ । भुवनानि । अमर्त्यः । विश्वानि । सोमः । परि । तानि । अर्षति ।
कृण्वन् । संऽचृतं । विऽचृतं । अभिष्टये । इंदुः । सिसक्ति । उषसं । न । सूर्यः ॥२॥

योऽमर्त्यो देवः सोमो भुवनानि लोकानातस्थौ आस्थितवान् तानि विश्वानि

सर्वाणि भुवनानि पर्येषति परितो गच्छति। परितो रक्षतीत्यर्थः। सोऽयमिंदुर्यज्ञं यजमानं वा संचृतं देवैः फलैर्वा संबद्धं कृण्वन् कुर्वन् विचृतमसुरादिभिर्दुःखैर्वा विमुक्तं कृण्वन् अभितो यागाय सिषक्ति। सेवते यज्ञं। उषसं न सूर्यः। सूर्य उषसमिव यथाभिष्टयेऽभितो गमनाय प्राणिनां संचृतं प्रकाशैः संयुक्तं विचृतं तमोभिर्विमुक्तं च लोकं कुर्वन्नुषसं सेवते तद्वत् ॥

॥ अथ तृतीया ॥

आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः ।
आ विद्युता पवते धारया सुत इंद्रं सोमो मादयन्दैव्यं जनं ॥३॥

आ। यः। गोभिः। सृज्यते। ओषधीषु। आ। देवानां। सुम्ने। इषयन्। उपऽवसुः।
आ। विऽद्युता। पवते। धारया। सुतः। इंद्रं। सोमः। मादयन्। दैव्यं। जनं ॥३॥

यः सोमो गोभी रश्मिभिरा सृज्यत ओषधीषु। यं सोमं स्थापयंतीत्यर्थः। किमर्थं। देवानां सुम्ने सुखे निमित्ते सति। कीदृशोऽयं। इषयन् देवान्प्राप्तुमिच्छन्। इष गतौ। धनमिच्छन्वा। तथोपावसुः शत्रुभ्यः सकाशात्प्राप्तधनः। स सोमो विद्युता विद्योतमानया धारया आ पवते सुतः सन्। किं कुर्वन्। दैव्यं देवस्वामिनमिंद्रं मादयन् ॥

॥ अथ चतुर्थी ॥

एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधं ।
इंदुः समुद्रमुदियर्ति वायुभिरेंद्रस्य हार्दि कलशेषु सीदति ॥४॥

एषः। स्यः। सोमः। पवते। सहस्रऽजित्। हिन्वानः। वाचं। इषिरां। उषःऽबुधं।
इंदुः। समुद्रं। उत्। इयर्ति। वायुऽभिः। आ। इंद्रस्य। हार्दि। कलशेषु। सीदति ॥४॥

एष स्य स सोमः पवते। पूयते। कीदृश एषः। सहस्रजित्। सहस्रस्य जेता। किं कुर्वन्। वाचमृत्विजां स्तुतिरूपां वाचं हिन्वानः प्रेरयन्। कीदृशीं वाचं। इषिरां गमनशीलां स्तुत्यं प्रति गंत्रीमुषर्बुधमुषसि प्रबुद्धां। सोऽयमिंदुः सोमः समुद्रं समुद्रियं रसमुदियर्त्युद्गमयति वायुभिर्गंतृभिरध्वर्य्वादिभिः। वायुरेव वा प्रेर्यमाणः सन्। तथेंद्रस्य हार्दि। हार्दं प्रियं। तद्धार्दींद्रस्य प्रियवद्यथा भवति तथा कलशेषु द्रोणकलशप्रभृतिष्वासीदति ॥

॥ अथ पंचमी ॥

अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणंति मतिभिः स्वर्विदं ।
धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ॥५॥

अभि । त्यं । गावः । पयसा । पयःऽवृधं । सोमं । श्रीणंति । मतिऽभिः । स्वःऽविदं ।
धनंऽजयः । पवते । कृत्व्यः । रसः । विप्रः । कविः । काव्येन । स्वःऽचनाः ॥५॥

त्यं तं पयोवृधं पयसो वर्धकं सोमं गावः पयसा स्वकीयेन क्षीरेण श्रीणंति । श्रयणं कुर्वंति । यो मतिभिः स्तुतिभिः सर्वं प्रयच्छति तं स्वर्विदं सोमं श्रीणंति । स धनंजयः शत्रुधनानां जेता सोमः काव्येन कर्मणा पवते । पूयते । कीदृशः सः । कृत्व्यः कर्मण्यो रसो रसरूपो विप्रो मेधावी कविः क्रांतप्रज्ञः स्वर्चन्नाः सर्वान्नः । चन इत्यन्ननाम ॥

॥ इति सप्तमस्य तृतीये नवमो वर्गः ॥

इंद्रायेति द्वादशर्चमष्टादशं सूक्तं भृगुगोत्रस्य वेनस्यार्षं पवमानसोमदेवताकं । एकादशीद्वादश्यौ त्रिष्टुभौ । शिष्टा जगत्यः । तथा चानुक्रांतं । इंद्राय द्वादश वेनो भार्गवो द्वित्रिष्टुबंतमिति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

इंद्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वंत इह संत्विंदवः ॥१॥

इंद्राय । सोम । सुऽसुतः । परि । स्रव । अप । अमीवा । भवतु । रक्षसा । सह ।
मा । ते । रसस्य । मत्सत । द्वयाविनः । द्रविणस्वंतः । इह । संतु । इंदवः ॥१॥

हे सोम त्वं सुषुतः सुष्ठ्वभिषुतः सन् इंद्रार्थं परि स्रव । परितः स्रव । गच्छ । रसं मुंच । अमीवा रोगो रक्षसा सहाप भवतु । अपगतो वियुक्तो भवतु । ते तव रसस्य स्वांशं रसं पीत्वा मा मत्सत । मा माद्यंतु । के । द्वयाविनः । द्वयं सत्यानृतं । तेन युक्ताः । पापिन इत्यर्थः । किंच । इंदवस्ते रसा इहास्मिन्यज्ञे द्रविणस्वंतो धनवंतः संतु । भवंतु ॥

॥ अथ द्वितीया ॥

अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।
जहि शत्रूँरभ्या भंदनायतः पिबेंद्र सोममव नो मृधो जहि ॥२॥

अस्मान् । सऽमर्ये । पवमान । चोदय । दक्षः । देवानां । असि । हि । प्रियः । मदः ।
जहि । शत्रून् । अभि । आ । भंदनाऽयतः । पिब । इंद्र । सोमं । अव । नः । मृधः । जहि ॥२॥

हे पवमान सोम अस्मान्समर्ये संग्रामे चोदय । प्रेरय । दक्षो ह्यसि । समर्थः खलु भवसि देवानां मध्ये । यद्वा । देवानां प्रीणनाय दक्षोऽसि । यद्वा दक्षस्त्वं देवानां प्रियः प्रियकरो मदो मादयितासि हि । जहि च शत्रूनस्माकं । अभ्यागच्छ चास्मान्प्रति भंदनायतः । भंदनाः स्तुतयः । भंदतेः स्तुतिकर्मणः । ता इच्छतः । पिब चेंद्र सोमं अव जहि च नोऽस्माकं मृधः संग्रामात् ॥

॥ अथ तृतीया ॥

अदब्ध इंदो पवसे मदिंतम आत्मेंद्रस्य भवसि धासिरुत्तमः ।
अभि स्वरंति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥३॥

अदब्धः । इंदो इति । पवसे । मदिन्ऽतमः । आत्मा । इंद्रस्य । भवसि । धासिः । उत्ऽतमः ।
अभि । स्वरंति । बहवः । मनीषिणः । राजानं । अस्य । भुवनस्य । निंसते ॥३॥

हे इंदो क्लिद्यमान सोम अदब्धोऽहिंसितो मदिंतमो मादयितृतमस्त्वं पवसे । पूयसे । आत्मा स्वयमेवोत्तमस्त्वमिंद्रस्य धासिरन्नं भवसि । अस्य भुवनस्य राजानं सोमं बहवो मनीषिणः स्तोतारोऽभिस्वरंति । अभिष्टुवंति । निंसते । गच्छंति च ॥

॥ अथ चतुर्थी ॥

सहस्रणीथः शतधारो अद्भुत इंद्रायेंदुः पवते काम्यं मधु ।
जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥४॥

सहस्रऽनीथः । शतऽधारः । अद्भुतः । इंद्राय । इंदुः । पवते । काम्यं । मधु ।
जयन् । क्षेत्रं । अभि । अर्ष । जयन् । अपः । उरुं । नः । गातुं । कृणु । सोम । मीढ्वः ॥४॥

सहस्रनीथो बहुप्रकारनयनः शतधारोऽपरिमितधारोपेतोऽद्भुत आश्चर्यकरो

महानिंदुरिंद्राय काम्यं मधु पवते। किंच क्षेत्रमस्मभ्यमपश्च जयन् अभ्यर्ष। अभिगच्छ पवित्रं। हे सोम मीढ्वः सेक्तर्गातुं मार्गं नोऽस्माकमुरुं विस्तीर्णं कृणु। कुरु ॥

॥ अथ पंचमी ॥

कनिंक्रदत्कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि।

मर्मृज्यमानो अत्यो न सानसिरिंद्रस्य सोम जठरे समक्षरः ॥५॥

कनिंक्रदत्। कलशे। गोभिः। अज्यसे। वि। अव्ययं। समया। वारं। अर्षसि।

मर्मृज्यमानः। अत्यः। न। सानसिः। इंद्रस्य। सोम। जठरे। सं। अक्षरः ॥५॥

हे सोम कनिक्रदत् शब्दं कुर्वन् कलशे वर्तमानो गोभिः पयोभिरज्यसे। सिक्तो भवसि। अव्ययमविमयं वारं वालं दशापवित्रं समया तत्समीपे व्यर्षसि। विविधं गच्छसि। मर्मृज्यमानः शोध्यमानोऽत्यो नाश्व इव सानसिः संभजनशीलस्त्वं हे सोम इंद्रस्य जठरे समक्षरः। सम्यक् क्षरसि ॥

॥ अथ षष्ठी ॥

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिंद्राय सुहवीतुनाम्ने।

स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँऽअदाभ्यः ॥६॥

स्वादुः। पवस्व। दिव्याय। जन्मने। स्वादुः। इंद्राय। सुहवीतुऽनाम्ने।

स्वादुः। मित्राय। वरुणाय। वायवे। बृहस्पतये। मधुऽमान्। अदाभ्यः ॥६॥

हे सोम स्वादुस्त्वं दिव्याय जन्मने देवगणाय पवस्व। तथा सुहवीतुनाम्ने शोभनाह्वाननामधेयायेंद्राय स्वादुस्त्वं पवस्व। मित्राय वरुणाय वायवे बृहस्पतये च पवस्व मधुमान् मधुररसोऽदाभ्योऽन्यैरहिंस्यस्त्वं ॥

॥ इति सप्तमस्य तृतीये दशमो वर्गः ॥

॥ अथ सप्तमी ॥

अत्यं मृजंति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते।

पवमाना अभ्यर्षंति सुष्टुतिमेंद्रं विशंति मदिरास इंदवः ॥७॥

अत्यं। मृजंति। कलशे। दश। क्षिपः। प्र। विप्राणां। मतयः। वाचः। ईरते।

पवमानाः। अभि। अर्षंति। सुऽस्तुतिं। आ। इंद्रं। विशंति। मदिरासः। इंदवः ॥७॥

अत्यमतनवंतमश्वस्थानीयं वा सोमं कलशे दश क्षिपो दशांगुलयोऽध्वर्यु-संबंधिन्यो मृजंति । शोधयंति । तथा विप्राणां मध्ये मतयः स्तोतारो वाचः स्तुतीरीरते । प्रेरयंति । पवमानाः सोमा अभ्यर्षंत्यभिगच्छंति सुष्टुतिं शोभन-स्तुतिं । इंद्रं मदिरासो मदकरा इंदवः सोमा आविशंति । प्रविशंति ॥

॥ अथाष्टमी ॥

पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः ।

माकिर्नो अस्य परिषूतिरीशतेंदो जयेम त्वया धनंधनं ॥८॥

पवमानः । अभि । अर्ष । सुऽवीर्यं । उर्वीं । गव्यूतिं । महि । शर्म । सऽप्रथः ।

माकिः । नः । अस्य । परिऽसूतिः । ईशत । इंदो इति । जयेम । त्वया । धनंऽधनं ॥८॥

हे सोम पवमानः पूयमानस्त्वं सुवीर्यमुर्वीं महतीं गव्यूतिं गोमार्गं च महि महत् सप्रथः सर्वतः पृथु शर्म गृहं सुखं वाभ्यर्ष । अभिगमय । नोऽस्माकमस्य कर्मणः परिषूतिर्हिंसायाः परिप्रेरको द्वेषी माकिरीशत । मेश्वरो भवतु । हे इंदो सोम त्वया साधनेन धनं धनं सर्वमपि धनं जयेम ॥

॥ अथ नवमी ॥

अधि द्यामस्थाद्वृषभो विचक्षणोऽरूरुचद्वि दिवो रोचना कविः ।

राजा पवित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ॥९॥

अधि । द्यां । अस्थात् । वृषभः । विऽचक्षणः । अरूरुचत् । वि । दिवः । रोचना । कविः ।

राजा । पवित्रं । अति । एति । रोरुवत् । दिवः । पीयूषं । दुहते । नृऽचक्षसः ॥९॥

अध्यस्थाद्द्यां द्युलोकं वृषभो वर्षिता विचक्षणो विद्रष्टायं सोमः । तथा कृत्वा दिवो द्युलोकसंबंधीनि रोचना रोचमानानि नक्षत्रादीनि व्यरूरुचत् विविधं रोचयति । कविः क्रांतप्रज्ञः सन् राजा सोमः पवित्रं दशापवित्रमत्येति । अतिक्रम्य गच्छति रोरुवत् शब्दं कुर्वन् । दिवो द्युलोकस्य पीयूषं सारं रसं नृचक्षसो नृणां द्रष्टारः सोमा दुहते । स्रवंति । स्वकीयं रसमांतरिक्ष्यमुदकं वा दुहंतीत्यर्थः ॥

॥ अथ दशमी ॥

दिवो नाके मधुजिह्वा असश्चतो वेना दुहंत्युक्षणं गिरिष्ठां ।

अप्सु द्रप्सं वावृधानं समुद्र आ सिंधोरूर्मा मधुमंतं पवित्र आ ॥१०॥

दिवः । नाके॑ । मधु॑ऽजिह्वाः । अस॒श्चतः॑ । वे॒नाः । दु॒हं॒ति॒ । उ॒क्षणं॑ । गि॒रि॒ऽस्थां ।
अ॒प्ऽसु । द्र॒प्सं । व॒वृ॒धा॒नं । स॒मु॒द्रे । आ । सिंधोः॑ । ऊ॒र्मौ । मधु॑ऽमंतं । प॒वित्रे॑ । आ ॥१०॥

दिवो द्योतमानस्य यज्ञस्य संबंधिनि नाके दुःखरहिते हविर्धानाख्ये स्थाने मधुजिह्वा मधुरवाचोऽसश्चतोऽसंसक्ताः । पृथक् पृथगित्यर्थः । यद्वा चिरमकृत्वा शीघ्रमभिषुण्वंतो वेना एतन्नामका महर्षयो दुहंति । अभिषुण्वंति । यद्वा द्युलोक एव वेनाः कांता देवा दुहंति तं सोममुक्षणं सेक्तारं गिरिष्ठां गिरावुन्नते देशे वर्तमानमप्सूदकेषु वसतीवरीष्वंतर्ववृधानं वर्धमानं द्रप्सं रसरूपं समुद्रे समुद्रवत्प्रवृद्धे द्रोणकलशे सिंधोरुदकस्योर्मावूर्मौ पूर आ सिंचंतीति शेषः । तदर्थं मधुमंतं माधुर्योपेतं रसं पवित्रे दशापवित्र आ सिंचंतीति शेषः ॥

॥ अथैकादशी ॥

नाके॑ सुप॒र्णमु॑पपप्ति॒वांसं॒ गिरो॑ वे॒नाना॑मकृपंत पू॒र्वीः ।
शिशुं॑ रिहंति म॒तयः॒ पनि॑प्नतं हिर॒ण्ययं॑ शकु॒नं क्षाम॑णि॒ स्थां ॥११॥

नाके॑ । सु॒ऽप॒र्णं । उ॒प॒प॒प्ति॒ऽवांसं॑ । गिरः॑ । वे॒नानां॑ । अ॒कृ॒पं॒त॒ । पू॒र्वीः ।
शिशुं॑ । रि॒हं॒ति॒ । म॒तयः॑ । पनि॑प्नतं । हि॒र॒ण्ययं॑ । श॒कु॒नं । क्षाम॑णि । स्थां ॥११॥

नाके द्युलोके वर्तमानं पश्चादुत्पतंतं पतयंतं सोमं वेनानामस्माकं संबंधिन्यः पूर्वीर्बह्व्यो गिरः स्तुतय उपाकृपंत । उपकल्पंते । अभिष्टुवंतीत्यर्थः । तं शिशुं शिशुवत्संस्कर्तव्यं सोमं मतयः स्तुतयो रिहंति । लिहंति । संस्पृशंति । प्राप्नुवंतीत्यर्थः । कीदृशं शिशुं । पनिप्नतं शब्दायंतं । पनतेर्यङ्लुगंताच्छतर्यभ्यासस्य निगागम उपधालोपश्च । हिरण्ययं हिरण्मयं शकुनं पक्षिणं क्षामणि क्षमायां स्थां हविर्धाने स्थां वर्तमानं ॥

॥ अथ द्वादशी ॥

ऊ॒र्ध्वो गं॑ध॒र्वो अधि॒ नाके॑ अस्था॒द्विश्वा॑ रू॒पा प्र॑ति॒चक्षा॑णो अस्य ।
भा॒नुः शु॒क्रेण॑ शो॒चिषा॒ व्य॑द्यौ॒त्प्रारू॑रुच॒द्रोद॑सी मा॒तरा॒ शुचिः॑ ॥१२॥

ऊ॒र्ध्वः । गं॒ध॒र्वः । अधि॑ । नाके॑ । अ॒स्था॒त् । विश्वा॑ । रू॒पा । प्र॒ति॒ऽचक्षा॑णः । अ॒स्य ।
भा॒नुः । शु॒क्रेण॑ । शो॒चिषा॑ । वि । अ॒द्यौ॒त् । प्र । अ॒रू॒रु॒च॒त् । रोद॑सी॒ इति॑ । मा॒तरा॑ ।
शुचिः॑ ॥१२॥

ऊर्ध्व उन्नतो गंधर्वो रश्मीनां धारकः सोमो नाक आदित्येऽध्यस्थात् अधितिष्ठति । किं कुर्वन् । अस्यादित्यस्य विश्वा विश्वानि रूपाणि प्रतिचक्षाणः प्रतिपश्यन् । भानुरादित्यः सोमाधिष्ठितः सन् शुक्रेण दीप्तेन शोचिषा तेजसा व्यद्यौत् विद्योतते । न केवलं स्वयमेव अपि तु मातरा निर्मात्र्यौ रोदसी द्यावापृथिव्यौ प्रारूरुचत् । प्ररोचयति । शुचिर्दीप्तः सूर्यः ॥

॥ इति सप्तमस्य तृतीय एकादशो वर्गः ॥

॥ इत्थं दाशतयीमध्ये नवमे मंडले स्फुटं । अनुवाकश्चतुर्थोऽयं संगमेन प्रदर्शितः ॥

अथ पंचमे चानुवाक एकादश सूक्तानि । तत्र प्र त इत्यष्टाचत्वारिंशदृचं प्रथमं सूक्तं । प्रथमदशर्चस्याकृष्टा इति माषा इति च द्विनामान ऋषिगणा द्रष्टारः । द्वितीयस्य दशर्चस्य सिकता इति नीवावरी इति द्विनामान ऋषिगणाः । तृतीयस्य दशर्चस्य पृश्नय इतिऽजा इति च नामद्वयोपेता ऋषिगणाः । अदृष्टार्थमेषां द्विनामत्वमवगंतव्यं । चतुर्थस्य दशर्चस्याकृष्टा माषा इत्यादिद्विनामानस्त्रयो गणा द्रष्टारः । एवं चत्वारिंशदृचाः । अथ पंचानां भौमोऽत्रिर्ऋषिः । ततस्तिसृणां गृत्समदः । जगती छंदः । पवमानः सोमो देवता । तथा चानुक्रांतं । प्र तेऽष्टाचत्वारिंशदृषिगणा दशर्चा आकृष्टा माषाः प्रथमे सिकता निवावरी द्वितीये पृश्नयोऽजास्तृतीये त्रयश्चतुर्थेऽत्रिः पंचांत्यास्तिस्रो गृत्समद इति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र त॑ आ॒शवः॑ पवमान धी॒जवो॑ मदा॑ अर्षंति रघु॒जा इ॑व॒ त्मना॑ ।
दि॒व्याः सु॑प॒र्णा मधु॑मंत॒ इंद॑वो म॒दिंत॑मासः॒ परि॒ कोश॑मासते ॥ १ ॥

प्र । ते॒ । आ॒शवः॑ । प॒व॒मा॒न॒ । धी॒ऽज॑वः । मदाः॑ । अ॒र्ष॒न्ति॒ । र॒घु॒जाःऽइ॑व । त्मना॑ ।
दि॒व्याः । सु॒ऽप॒र्णाः । मधु॑ऽमंतः । इंद॑वः । म॒दिन्ऽत॑मासः । परि॑ । कोश॑म् । आ॒स॒ते॒ ॥ १ ॥

हे पवमान पूयमान सोम ते तवाशवो व्याप्ता धीजवो मनोवेगा मदा मदकरा रसा अर्षंति । गच्छंति । त्मनात्मनैव । अनायासेनेत्यर्थः । क इव । रघुजा इव । रघुः शीघ्रगा वडवा । तत्र जाता रघुजाः । त इव निर्गतास्ते दिव्या दिविभवाः । अंतरिक्षे दशापवित्रे धार्यमाणा इत्यर्थः । सुपर्णाः सुपतना मधुमंतो माधुर्योपेता मदिंतमासोऽतिशयेन मादयितृतमा इंदवो दीप्ता रसाः कोशं द्रोणकलशं पर्यासते । पर्युपविशंति ॥

॥ अथ द्वितीया ॥

प्र ते मदा॑सो मदि॒रास॑ आ॒शवोऽसृ॑क्षत॒ रथ्या॑सो॒ यथा॒ पृथ॑क् ।
धे॒नुर्न व॒त्सं पय॑सा॒भि व॒ज्रिण॒मिंद्र॒मिंद॑वो॒ मधु॑मंत ऊ॒र्मय॑ः ॥२॥

प्र । ते॒ । मदा॑सः । म॒दि॒रास॑ः । आ॒शव॑ः । असृ॑क्षत । रथ्या॑सः । यथा॑ । पृथ॑क् ।
धे॒नुः । न । व॒त्सं । पय॑सा । अ॒भि । व॒ज्रिण॑ं । इंद्र॑ं । इंद॑वः । मधु॑ऽमंतः । ऊ॒र्मय॑ः ॥२॥

प्रासृक्षत प्रसृज्यंते ते तव मदिरासो मदकरा आशवो व्याप्ता मदासो मदा रसाः । क इव । रथ्यासो रथ्या अश्वाः । ते यथा तथा पृथक् प्रसृज्यंते । ते मधुमंतो माधुर्योपेता ऊर्मयः प्रवृद्धरसा इंदवः सोमा धेनुः पयसा वत्समिव स्वरसेन वज्रिणमिंद्रमभिगच्छंति ॥

॥ अथ तृतीया ॥

अत्यो॒ न हि॑यानो अ॒भि वाज॑मर्ष स्व॒र्वित्कोश॑ं दि॒वो अद्रि॑मातरं ।
वृषा॑ प॒वित्रे॒ अधि॒ सानो॒ अव्य॒ये सोम॑ः पुना॒न इ॑ंद्रि॒याय॒ धाय॑से ॥३॥

अत्य॑ः । न । हि॒या॒नः । अ॒भि । वाज॑ं । अ॒र्ष॒ । स्व॒ःऽवित् । कोश॑ं । दि॒वः । अद्रि॑ऽमातरं ।
वृषा॑ । प॒वित्रे॑ । अधि॑ । सानौ॑ । अ॒व्यये॑ । सोम॑ः । पु॒ना॒नः । इं॒द्रि॒याय॑ । धाय॑से ॥३॥

अत्यो न अश्व इव हियानः प्रेर्यमाणो वाजं संग्राममभ्यर्ष । अभिगच्छ । तथा स्वर्वित् सर्ववित् कोशं द्रोणकलशं दिवो द्युलोकादद्रिमातरं । अद्रिर्मेघः । तेन तज्जन्यमुदकं लक्ष्यते । तस्य निर्मातारमभ्यर्ष । अथ प्रत्यक्षकृतः । वृषा वर्षकः सोमोऽव्ययेऽविमयेऽधि सानौ । अधीति सप्तम्यर्थानुवादी । समुच्छ्रिते तस्मिन् पुनानः पूयमानो भवति । किमर्थं । धायसे धारकायेंद्रियाय । तदर्थं ॥

॥ अथ चतुर्थी ॥

प्र त॒ आश्वि॑नीः पवमान धी॒जुवो॑ दि॒व्या अ॑सृग्र॒न्पय॑सा॒ धरी॑मणि ।
प्रांतर्ऋष॑यः॒ स्थावि॑रीरसृक्षत॒ ये त्वा॑ मृ॒जंत्यृ॑षिषाण वे॒धस॑ः ॥४॥

प्र । ते॒ । आश्वि॑नीः । प॒व॒मा॒न॒ । धी॒ऽजुव॑ः । दि॒व्याः । अ॒सृ॒ग्र॒न् । पय॑सा । धरी॑मणि ।
प्र । अ॒ंतः । ऋष॑यः । स्थावि॑रीः । अ॒सृ॒क्ष॒त । ये । त्वा॒ । मृ॒जंति॑ । ऋ॒षि॒ऽसा॒न॒ । वे॒धस॑ः ॥४॥

हे पवमान सोम ते तवाश्विनीर्व्याप्ताः । अशू व्याप्तावित्यस्माद्दौणादिको

विनिः। ततोऽण्। व्यत्ययेनाद्युदात्तः। धीजुवो मनोवेगा। दिव्या दिविभवा दिवः पतंत्यो धाराः पयसा युक्ता धरीमणि धारके द्रोणकलशे प्रासृग्रन् गच्छंति। ये वेधसो विधातार ऋषयो हे सोम ऋषिषाण ऋषिभिः संभक्त त्वा त्वां मृजंति अभिषुण्वंति ते ऋषयः स्याविरीः स्थविरा धारा अंतर्मध्ये पात्रस्यांतः प्रासृक्षत। प्रसृजंति ॥

॥ अथ पंचमी ॥

विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यंति केतवः।
व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥५॥
विश्वा। धामानि। विश्वऽचक्षः। ऋभ्वसः। प्रऽभोः। ते। सतः। परि। यंति। केतवः।
विऽआनशिः। पवसे। सोम। धर्मऽभिः। पतिः। विश्वस्य। भुवनस्य। राजसि ॥५॥

हे विश्वचक्षः सर्वस्य द्रष्टः सोम प्रभोः परिवृढस्य सतस्ते तव ऋभ्वसः। ऋभ्वा इति महन्नाम। महांतो केतवो रश्मयो विश्वा सर्वाणि धामानि तेजःस्थानानि देवशरीराणि परियंति। परिगच्छंति। प्रकाशयंतीत्यर्थः। हे सोम व्यानशिर्व्यापनशीलश्च त्वं धर्मभिर्धारकै रसनिस्यंदैः पवसे। पूयसे। विश्वस्य भुवनस्य च पतिः स्वामी त्वं राजसि। ईश्वरो भवसि ॥

॥ इति सप्तमस्य तृतीये द्वादशो वर्गः ॥

॥ अथ षष्ठी ॥

उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यंति केतवः।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ॥६॥
उभयतः। पवमानस्य। रश्मयः। ध्रुवस्य। सतः। परि। यंति। केतवः।
यदि। पवित्रे। अधि। मृज्यते। हरिः। सत्ता। नि। योना। कलशेषु। सीदति ॥६॥

पवमानस्य पूयमानस्य ध्रुवस्य स्वयमविचलितस्य सतो विद्यमानस्य सोमस्य केतवः प्रज्ञापका रश्मय उभयत इतश्चामुतश्च परि यंति। परिगच्छंति। अभिषवसमय एवं भवति। यदि यदा पवित्रे दशापवित्रे हरिर्हरितवर्णोऽयमधि मृज्यते तदानीं सत्ता सदनशीलोऽयं योनौ स्वीये स्थाने कलशेषु द्रोणकलशादिषु निषीदति ॥

॥ अथ सप्तमी ॥

यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतं ।
सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥७॥
यज्ञस्य । केतुः । पवते । सुऽअध्वरः । सोमः । देवानां । उप । याति । निःऽकृतं ।
सहस्रऽधारः । परि । कोशं । अर्षति । वृषा । पवित्रं । अति । एति । रोरुवत् ॥७॥

यज्ञस्य केतुः प्रज्ञापकः स्वध्वरः शोभनयागः सोमः पवते । पूयते । अभिषूयते । तादृशः सोमो देवानां निष्कृतं संस्कृतं स्थानमुप याति । उपगच्छति । तदर्थं सहस्रधारः कोशं द्रोणकलशं पर्यर्षति । ततो तदर्थं वृषा सेक्ता यं रोरुवत् शब्दयन् पवित्रमतिक्रम्य गच्छत्यधोदेशं ॥

॥ अथाष्टमी ॥

राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं सचते सिंधुषु श्रितः ।
अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः ॥८॥
राजा । समुद्रं । नद्यः । वि । गाहते । अपां । ऊर्मिं । सचते । सिंधुषु । श्रितः ।
अधि । अस्थात् । सानु । पवमानः । अव्ययं । नाभा । पृथिव्याः । धरुणः । महः । दिवः ॥८॥

अयं सोमो राजा समुद्रमंतरिक्षं नद्यस्तत्या अपश्च वि गाहते । विगाह्य चापामूर्मिं सचते । उदकपूरं सवति सिंधुषूदकेषु ग्रहेषु वा श्रितः सन् । हूयमानः सन् रश्मिद्वारा सूर्यं प्राप्यांतरिक्षे मेघेषु वर्तत इत्यर्थः । अस्यैव वृष्टिसाधनत्वात् । यद्वा लुप्तोपममेतत् । समुद्रं नद्य इव सिंधुषु वसतीवरीषु श्रित आश्रितः सन् समुद्रमभिषुतसोमरसाधारपात्रं विगाहतेऽभिषवात्पूर्वं । पश्चात्पवमानः पूयमानोऽव्ययं सानु समुच्छ्रितं दशापवित्रमध्यस्थात् । अधितिष्ठति । कुत्र देशे । नाभा पृथिव्याः । नाभिस्थानीये यज्ञे । तत्संबंधिनि हविर्धान इत्यर्थः । यज्ञमाहुर्भुवनस्य नाभिमिति श्रुतेः । कीदृशः । महो दिवो द्युलोकस्य धरुणो धर्ता ॥

॥ अथ नवमी ॥

दिवो न सानु स्तनयन्नचिक्रदद्द्यौश्च यस्य पृथिवी च धर्मभिः ।
इंद्रस्य सख्यं पवते विवेविदत्सोमः पुनानः कलशेषु सीदति ॥९॥

दिवः। न। सानुं। स्तनयंन्। अचिक्रदत्। द्यौः। च। यस्यं। पृथिवी। च। धर्मंऽभिः।
इंद्रस्य। सख्यं। पवते। विऽवेविंदत्। सोमंः। पुनानः। कलशेषु। सीदति ॥९॥

दिवो न सानु स्तनयन् द्युलोकस्य समुच्छ्रितं स्थानं शब्दयन्निवाचिक्रदत् क्रंदते। यस्य सोमस्य धर्मभिर्धारणैर्द्यौश्च पृथिवी च धृते स्यातां। वृष्टिप्रदानद्वारौषध्याद्युत्पादनेन देवानां हविर्भावेन चोभयधारकत्वं प्रसिद्धं। तादृशः सोमो महानुभावः सोमः पुनानः पूयमान इंद्रस्य सख्यं विवेविदत्पवते। पूयते पवित्रे। स पुनानः सोमः कलशेषु सीदति। निवसति ॥

॥ अथ दशमी ॥

ज्योतिर्यज्ञस्यं पवते मधुं प्रियं पिता देवानां जनिता विभूवंसुः।
दधांति रत्नं स्वधयोरपीच्यं मदिंतमो मत्सर इंद्रियो रसंः ॥१०॥
ज्योतिंः। यज्ञस्यं। पवते। मधुं। प्रियं। पिता। देवानां। जनिता। विभुऽवंसुः।
दधांति। रत्नं। स्वधयोंः। अपीच्यं। मदिन्ऽतंमः। मत्सरः। इंद्रियः। रसंः ॥१०॥

यज्ञस्य ज्योतिः प्रकाशकः सोमः प्रियं देवानां मधु मधुरं रसं पवते। क्षरति। यद्वा। ज्योतिर्यज्ञस्येत्येतदपि मधुविशेषणं। तथा सत्युक्तलक्षणं मधु पवते पूयत इत्यर्थः। सोमरसो विशेष्यते। पिता रक्षिता देवानां जनितोत्पादयिता सर्वस्य विभूवसुः प्रभूतधनः। ईदृशः स स्वधयोर्द्यावापृथिव्योः। स्वधे पुरंधी इति द्यावापृथिवीनामसु पठितः। तयोरपीच्यमंतर्हितं रत्नं रमणीयं धनं दधाति। स्थापयति स्तोतृषु। पुनः स एव विशेष्यते। मदिंतमो मादयितृतमो मत्सरः सोम इंद्रिय इंद्रेण जुष्ट इंद्रस्य वर्धको वा रसो रसरूपः ॥

॥ इति सप्तमस्य तृतीये त्रयोदशो वर्गः ॥

॥ अथैकादशी ॥

अभिक्रंदन्कलशं वाज्यर्षति पतिंर्दिवः शतधांरो विचक्षणः।
हरिंर्मित्रस्य सदंनेषु सीदति मर्मृजानोऽविंभिः सिंधुंभिर्वृषां ॥११॥
अभिऽक्रंदंन्। कलशं। वाजी। अर्षति। पतिंः। दिवः। शतऽधांरः। विऽचक्षणः।
हरिंः। मित्रस्यं। सदंनेषु। सीदति। मर्मृजानः। अविंऽभिः। सिंधुंऽभिः। वृषां ॥११॥

वाजी वेजनवान् गमनवानश्वसदृशो वा सोमोऽभिक्रंदञ्शब्दं कुर्वन् कलशमभ्यर्षति । गच्छति । कीदृशो वाजी । दिवः पतिर्द्युलोकस्य स्वामी शतधारः शतसंख्याकधारो विचक्षणो विद्रष्टा हरिर्हरितवर्णो रसात्मकः सोमो मित्रस्य देवानां मित्रभूतस्य यज्ञस्य वा सदनेषु स्थानेषु सीदति पात्रेषु धृतः सन् । कीदृशो हरिः । सिंधुभिः स्यंदनसाधनैरविभिर्दशापवित्रच्छिद्रैर्मर्मृजानः शोध्यमानो वृषा वर्षकः ॥

॥ अथ द्वादशी ॥

अग्रे सिंधूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छति ।
अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ॥१२॥
अग्रे । सिंधूनां । पवमानः । अर्षति । अग्रे । वाचः । अग्रियः । गोषु । गच्छति ।
अग्रे । वाजस्य । भजते । महाऽधनं । सुऽआयुधः । सोतृऽभिः । पूयते । वृषा ॥१२॥

यः सोमः पवमानः सिंधूनां स्यंदमानानामुदकानामग्रेऽर्षति गच्छति । तथाग्रियोऽग्रार्हः श्रेष्ठोऽग्रे वाचो माध्यमिकाया अग्रेऽर्षति । तथा गोषु रश्मिषु गच्छति । तथा वाजस्यान्नस्य बलस्य वा लाभाय महाधनं संग्रामं भजते स स्वायुधो वृषा वर्षकः सोमः सोतृभिरभिषवकर्तृभिः पूयते ॥

॥ अथ त्रयोदशी ॥

अयं मतवाञ्छकुनो यथा हितोऽव्ये ससार पवमान ऊर्मिणा ।
तव क्रत्वा रोदसी अंतरा कवे शुचिर्धिया पवते सोम इंद्र ते ॥१३॥
अयं । मतऽवान् । शकुनः । यथा । हितः । अव्ये । ससार । पवमानः । ऊर्मिणा ।
तव । क्रत्वा । रोदसी इति । अंतरा । कवे । शुचिः । धिया । पवते । सोमः । इंद्र । ते ॥१३॥

अयं सोमो मतवान् । मतं संमतं प्रियं स्तोत्रं । तद्वान् पवमानः पूयमानः सूयमानः शोध्यमानश्च सन् हितः प्रेरितः शकुनः पक्षी यथा शीघ्रं गच्छति तथाव्ये पवित्र ऊर्मिणा रसेन ससार । गच्छति । हे कवे क्रांतप्रज्ञ । अनूचान वा । ये वा अनूचानास्ते कवय इति श्रुतेः । तादृश यजमान यद्वोक्तलक्षणेंद्र ते तव क्रत्वा कर्मणा धिया प्रज्ञया च । यद्वा विशेषणविशेष्यभावः । धिया धारकेण क्रत्वा कर्मणा रोदसी अंतरा रोदस्योर्द्यावापृथिव्योरंतरा शुचिः सोमः पवते । पूयते ॥

॥ अथ चतुर्दशी ॥

द्रापिं वसा॑नो यज॒तो दि॑वि॒स्पृश॑मंतरिक्ष॒प्रा भुव॑ने॒ष्वर्पि॑तः ।
स्व॑र्जज्ञा॒नो नभ॑सा॒भ्य॑क्रमीत्प्र॒त्नम॑स्य पि॒तर॒मा वि॑वासति ॥१४॥

द्रा॒पिं । वसा॑नः । य॒ज॒तः । दि॒वि॒ऽस्पृश॑ं । अं॒त॒रि॒क्ष॒ऽप्राः । भुव॑नेषु । अर्पि॑तः ।
स्वः॑ । ज॒ज्ञा॒नः । नभ॑सा । अ॒भि । अ॒क्र॒मी॒त् । प्र॒त्नं । अ॒स्य॒ । पि॒तर॑ं । आ । वि॒वा॒स॒ति ॥१४॥

दिविस्पृशं देवस्प्रष्टारं द्रापिं कवचं तेजोरूपं वसान आच्छादयन् यजतो यष्टव्योऽंतरिक्षप्रा अंतरिक्षस्य पूरक उदकेन तादृशः सोमो भुवनेषूदकेष्वर्पितः स्वः सर्वं स्वेन पाययितव्यं देवसंघं स्वर्गं वा जज्ञानो जनयन् । अथवा स्वरुदकं । तज्जनयन् नभसोदकेनाभ्यक्रमीत् । अभिक्रामति । अस्योदकस्य पितरं पालकं प्रत्नं पुराणमिंद्रमा विवासति । परिचरति ॥

॥ अथ पंचदशी ॥

सो अ॑स्य वि॒शे महि॑ श॒र्म॑ यच्छति॒ यो अ॑स्य॒ धाम॑ प्रथ॒मं व्या॑न॒शे ।
प॒दं यद॑स्य पर॒मे व्यो॑म॒न्यतो॒ विश्वा॑ अ॒भि सं या॑ति सं॒यत॑ः ॥१५॥

सः । अ॒स्य॒ । वि॒शे । महि॑ । शर्म॑ । य॒च्छ॒ति॒ । यः । अ॒स्य॒ । धाम॑ । प्र॒थ॒मं । वि॒ऽआ॒न॒शे ।
प॒दं । यत् । अ॒स्य॒ । प॒र॒मे । वि॒ऽओ॒म॒नि । अतः॑ । विश्वाः॑ । अ॒भि । सं । या॒ति॒ । सं॒ऽयत॑ः ॥१५॥

स सोमोऽस्येंद्रस्य विशे प्रवेशनाय महि महच्छर्म सुखं यच्छति । यः सोमोऽस्येंद्रस्य धाम तेजोयुक्तं शरीरं प्रथममितरदेवप्राप्तेः पूर्वं व्यानशे प्राप्तवान् । यद्यस्यास्य सोमस्य परमे महत्युत्कृष्टे व्योमनि विशेषेण रक्षके द्युलोके वेद्यां वा पदं भवति । अतो यस्मात्सोमात्तृप्त इंद्रः सोमः स्वयं वा विश्वाः संयतः सर्वान् संग्रामानभियाति सम्यगभिगच्छति स सोमो महि शर्म यच्छतीति संबंधः ॥

॥ इति सप्तमस्य तृतीये चतुर्दशो वर्गः ॥

॥ अथ षोडशी ॥

प्रो अ॑यासी॒दिंदु॒रिंद्र॑स्य निष्कृ॒तं सखा॒ सख्यु॒र्न प्र मि॑नाति सं॒गिर॑ं ।
मर्य॑ इव युव॒तिभि॒ः सम॑र्षति॒ सोम॑ः क॒लशे॑ श॒तया॑म्ना प॒था ॥१६॥

प्रो इति॑ । अ॒या॒सी॒त् । इंदुः॑ । इंद्र॑स्य । निः॒ऽकृ॒तं । सखा॑ । सख्युः॑ । न । प्र । मि॒ना॒ति॒ । सं॒ऽगिर॑ं ।
मर्यः॑ऽइव । यु॒व॒ति॒ऽभिः॑ । सं । अ॒र्ष॒ति॒ । सोमः॑ । क॒लशे॑ । श॒त॒ऽया॑म्ना । प॒था ॥१६॥

इंदुः सोम इंद्रस्य निष्कृतं स्थानमुदरं प्री अयासीत्। प्रैव गच्छति। गत्वा च सखा सखिभूतः सोमः सख्युरिंद्रस्य संगिरं सम्यग्गिरणाधारभूतमुदरं न प्र मिनाति। न हिनस्ति। किंच मर्य इव युवतिभिर्मर्त्यो यथा युवतिभिः सह संगतो भवति तद्वदयमपि सोमो युवतिभिर्मिश्रणशीलाभिर्वसतीवरीभिरद्भिः सह समर्षति। संगच्छतेऽभिषवकाले। पश्चात्सोमः शतयाम्नानेकयानसाधनच्छिद्रोपेतेन पथा मार्गेण दशापवित्रसंबंधिनि कलशे द्रोणकलशे गच्छतीति शेषः। यद्वैकमेव वाक्यं। यथा मर्यो युवतिभिः सह संगच्छत एवं कलशे शतयाम्ना पथा संगच्छतेऽद्भिः॥

॥ अथ सप्तदशी ॥

प्र वो धियो मंद्रयुवो विपन्युवः पनस्युवः संवसनेष्वक्रमुः।
सोमं मनीषा अभ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः॥१७॥

प्र। वः। धियः। मंद्रऽयुवः। विपन्युवः। पनस्युवः। संऽवसनेषु। अक्रमुः।
सोमं। मनीषाः। अभि। अनूषत। स्तुभः। अभि। धेनवः। पयसा। ईं। अशिश्रयुः॥१७॥

हे सोम वो युष्माकं धियो ध्यातारो मंद्रयुवो मदकरं शब्दं कामयमानाः पनस्युवः स्तुतिं कामयमाना विपन्युवः। स्तोतॄणामेतत्। स्तोतारः संवसनेषु संवासयोग्येषु यागगृहेषु प्राक्रमुः। प्रक्रमंते। तदेवाह। सोमं मनीषा मनस ईश्वराः स्तुभः स्तोतारोऽभ्यनूषत। अभिष्टुवंति। धेनवोऽपि पयसा स्वीयेनेमेनं सोममभिशिश्रयुः। अभिश्रीणंति॥

॥ अथाष्टादशी ॥

आ नः सोम संयतं पिप्युषीमिषमिंदो पवस्व पवमानो अस्रिधं।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यं॥१८॥

आ। नः। सोम। संऽयतं। पिप्युषीं। इषं। इंदो इति। पवस्व। पवमानः। अस्रिधं।
या। नः। दोहते। त्रिः। अहन्। असश्चुषी। क्षुऽमत्। वाजऽवत्। मधुऽमत्। सुऽवीर्यं॥१८॥

हे इंदो दीप्त सोम पवमानस्त्वं नोऽस्माकं संयतं संगृहीतं पिप्युषीं प्रवृद्धमिषमन्नमस्रिधमक्षीणं पवस्व। प्रयच्छेत्यर्थः। या यादृशी नोऽस्माकमहन् अहन्यहस्त्रिस्त्रिषु सवनेष्वसश्चुषप्रतिबंधा दोहते क्षरति। किं। क्षुमत् शब्दोपेतं सर्वत्र

श्रूयमाणं वाजवन्मधुमन्माधुर्योपेतं सुवीर्यं शोभनसामर्थ्यं पुत्रं दोहते । तामिषं पवस्वेति समन्वयः ॥

॥ अथैकोनविंशी ॥

वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः ।
क्राणा सिंधूनां कलशाँ अवीवशदिंद्रस्य हार्द्याविशन्मनीषिभिः ॥१९॥

वृषा । मतीनां । पवते । विऽचक्षणः । सोमः । अह्नः । प्रऽतरीता । उषसः । दिवः ।
क्राणा । सिंधूनां । कलशान् । अवीवशत् । इंद्रस्य । हार्दि । आऽविशन् । मनीषिऽभिः ॥१९॥

अयं सोमः पवते । अभिषूयते । कीदृशः सोमः । मतीनां । मतयः स्तोतारः । तेषां वृषा वर्षकः कामानां विचक्षणो विद्रष्टा । अह्न उषसो दिवो द्युलोकस्यादित्यस्य वा प्रतरीता प्रवर्धयिता । किंच । सिंधूनां स्यंदमानानामुदकानां क्राणा कर्ता ॥ करोतेः शानचि बहुलं छंदसीति विकरणस्य लुक् । सुः । सुपां सुलुगित्याकारः ॥ कलशानवीवशत् कामयते प्रवेष्टुं । किं कुर्वन् । इंद्रस्य हार्दि हृदयमाविशन् प्रविशन् मनीषिभिः स्तुत इति शेषः । यद्वा व्यवहितमपि मनीषिभिरित्येतत्पवत इत्यनेन संबध्यते ॥

॥ अथ विंशी ॥

मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत् ।
त्रितस्य नाम जनयन्मधु क्षरदिंद्रस्य वायोः सख्याय कर्तवे ॥२०॥

मनीषिऽभिः । पवते । पूर्व्यः । कविः । नृऽभिः । यतः । परि । कोशान् । अचिक्रदत् ।
त्रितस्य । नाम । जनयन् । मधु । क्षरत् । इंद्रस्य । वायोः । सख्याय । कर्तवे ॥२०॥

अयं सोमो मनीषिभिर्मेधाविभिरध्वर्य्वादिभिः पवते । पूयते । यद्वायं मनीषिभिर्मनीषिणीभिर्धाराभिः पवते । क्षरति । कीदृशोऽयं । पूर्व्यः पुराणः कविर्मेधावी नृभिर्नेतृभिरध्वर्य्वादिभिर्यतो नियमितः सन् कोशान् कलशान्प्राप्तुं पर्यचिक्रदत् । परिक्रंदते । शब्दं करोति । त्रितस्य त्रिषु स्थानेषु विस्तृतस्येंद्रस्य संबंधि नाम नामकमुदकं जनयन् उत्पादयन् मधु मधुरं रसं क्षरत् । क्षरति । किमर्थं । इंद्रस्य वायोश्च सख्याय कर्तवे सख्यं कर्तुं ॥

॥ इति सप्तमस्य तृतीये पंचदशो वर्गः ॥

॥ अथैकविंशी ॥

अयं पुनान उषसो वि रोचयदयं सिंधुभ्यो अभवदु लोककृत्।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥२१॥
अयं। पुनानः। उषसः। वि। रोचयत्। अयं। सिंधुऽभ्यः। अभवत्। ऊं इति। लोकऽकृत्।
अयं। त्रिः। सप्त। दुदुहानः। आऽशिरं। सोमः। हृदे। पवते। चारु। मत्सरः ॥२१॥

अयं सोमः पुनानः पूयमान उषसो वि रोचयत्। विविधं रोचयति। अयं सिंधुभ्यः स्यंदमानाभ्योऽद्भ्यो वसतीवरीभ्योऽभवत्। समृद्धो भवति। उ इति पूरणः। कीदृशोऽयं। लोककृत् लोकानां कर्ता। वर्षकत्वाद्रेतोधारकत्वाच्चास्य लोककृत्त्वं। अयं सोमस्त्रिः सप्तैकविंशतिं गा ऋत्विग्मुखेनाशिरं दुदुहानो दुहानः। दोहस्य प्रयोजकत्वात्कर्तृपचारः। मत्सरो मदकरश्चारु रमणीयं पवते। क्षरति। किमर्थं। हृदे हृदयाय हृदयगमनाय ॥

॥ अथ द्वाविंशी ॥

पवस्व सोम दिव्येषु धामसु सृजान इंदो कलशे पवित्र आ।
सीदन्निंद्रस्य जठरे कनिक्रदन्नृभिर्यतः सूर्यमारोहयो दिवि ॥२२॥
पवस्व। सोम। दिव्येषु। धामऽसु। सृजानः। इंदो इति। कलशे। पवित्रे। आ।
सीदन्। इंद्रस्य। जठरे। कनिक्रदत्। नृऽभिः। यतः। सूर्यं। आ। अरोहयः। दिवि ॥२२॥

हे सोम दिव्येषु धामसु स्थानेषु। देवानां संबंधिषूदरेष्वित्यर्थः। तेषु पवस्व। क्षर। कीदृशः सन्। हे इंदो दीप्त सोम कलशे पवित्र आ दशापवित्रे च। आ इति चार्थे। सृजानः सृज्यमानः। अत्राग्निहोत्रं जुहोति यवागूं पचतीतिवदार्थिकः क्रमोऽवगंतव्यः। किंचेंद्रस्य जठरे सीदन् जठरं गच्छन् कनिक्रदत् शब्दं कुर्वन् नृभिर्नेतृभिर्ऋत्विग्भिर्यतः परिगृहीतः। हुत इत्यर्थः। तथाभूतः सन् दिवि सूर्यमारोहयः। प्रादुर्भूतमकरोः ॥

॥ अथ त्रयोविंशी ॥

अद्रिभिः सुतः पवसे पवित्र आँ इंदविंद्रस्य जठरेष्वाविशन्।
त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमंगिरोभ्योऽवृणोरप ॥२३॥

अद्रिऽभिः। सुतः। पवसे। पवित्रे। आ। इंदो इति। इंद्रस्य। जठरेषु। आऽविशन्।
त्वं। नृऽचक्षाः। अभवः। विऽचक्षण। सोम। गोत्रं। अंगिरःऽभ्यः। अवृणोः। अप॥२३॥

हे इंदो सोम अद्रिभिर्ग्रावभिः सुतोऽभिषुतस्त्वं पवसे। क्षरसि। पूयसे वा पवित्र आ दशापवित्रे। आ इति पूरणः। यद्वा। अभिषुतो भवसि पवसे चेति चार्थे आकारः। किं कुर्वन्। इंद्रस्य जठरेषु जठरप्रदेशेष्वाविशन्। जठरप्रवेशायेत्यर्थः। किंच। हे विचक्षण विद्वः सोम त्वं नृचक्षा अभवः। नृणां मनुष्याणामनुग्रहेण द्रष्टा भवसि। किंच। हे सोम त्वमंगिरोभ्यो गोत्रं मेघमुदकं क्षारयितुं पणिभिरपहृतानां गवामावरकं पर्वतं वापावृणोः॥

॥ अथ चतुर्विंशी ॥

त्वां सोम पवमानं स्वाध्योऽनु विप्रासो अमदन्नवस्यवः।
त्वां सुपर्ण आभरद्दिवस्परींदो विश्वाभिर्मतिभिः परिष्कृतं॥२४॥
त्वां। सोम। पवमानं। सुऽआध्यः। अनु। विप्रासः। अमदन्। अवस्यवः।
त्वां। सुऽपर्णः। आ। अभरत्। दिवः। परि। इंदो इति। विश्वाभिः। मतिऽभिः।
परिऽकृतं॥२४॥

हे सोम पवमानं त्वां स्वाध्यः सुमतयः सुकर्माणो वा विप्रासो विप्रा मेधाविनः स्तोतारोऽवस्यवो रक्षाकामा अन्वमदन्। अनुष्टुवंति। हे इंदो त्वां सुपर्णः श्येन आभरत्। आहरत्। दिवस्परि द्युलोकस्योपरि। द्युलोकादित्यर्थः। कीदृशं त्वां। विश्वाभिर्मतिभिः सर्वाभिः स्तुतिभिः परिष्कृतमलंकृतं॥

॥ अथ पंचविंशी ॥

अव्ये पुनानं परि वार ऊर्मिणा हरिं नवंते अभि सप्त धेनवः।
अपामुपस्थे अध्यायवः कविमृतस्य योना महिषा अहेषत॥२५॥
अव्ये। पुनानं। परि। वारे। ऊर्मिणा। हरिं। नवंते। अभि। सप्त। धेनवः।
अपां। उपऽस्थे। अधि। आयवः। कविं। ऋतस्य। योना। महिषाः। अहेषत॥२५॥

अव्येऽविमये वारे वाले दशापवित्र ऊर्मिणा रसेन परि परितः पुनानं पवमानं हरिं हरितवर्णं सोममभि नवंतेऽभिगच्छंति सप्त धेनवः प्रीणयित्र्यः

सप्त गायत्र्याद्याः सप्त गंगाद्या नद्यो वा। नवते क्षोदत इति गतिकर्मस्वयं पठितः। किंच। कविं त्वामपामुपस्थेऽंतरिक्षस्योत्संग ऋतस्य योनौ। उदकनामैतत्। ऋतं योनिर्ऋतस्य योनिरिति तन्नामसु पाठात्। उदके महिषा महांत आयवो मनुष्या अध्यहेषत। अधिकं प्रेरयंति ॥

॥ इति सप्तमस्य तृतीये षोडशो वर्गः ॥

॥ अथ षड्विंशी ॥

इंदुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्सुपथानि यज्यवे।
गाः कृण्वानो निर्णिजं हर्यतः कविरत्यो न क्रीळन्परि वारमर्षति ॥२६॥

इंदुः। पुनानः। अति। गाहते। मृधः। विश्वानि। कृण्वन्। सुऽपथानि। यज्यवे।
गाः। कृण्वानः। निःऽनिजं। हर्यतः। कविः। अत्यः। न। क्रीळन्। परि। वारं।
अर्षति ॥२६॥

अयमिंदुर्दीप्तः सोमः पुनानः पूयमानोऽति गाहतेऽतिक्रम्य गच्छति मृधः शत्रून्। किं कुर्वन्। विश्वानि गंतव्यानि सुवर्त्मानि वैदिकानि लौकिकानि च सुपथानि कृण्वन् कुर्वन्। कस्मै। यज्यवे यागकर्त्रे। यजमानाय शत्रून्परिहरन् मार्गान्सुपथान्कुर्वन् कलशं प्रविशतीत्यर्थः। किंच। निर्णिजमात्मीयं रूपं गाः कृण्वानः। रसमयान्कुर्वाण इत्यर्थः। हर्यतः कांतः। हर्य गतिकांत्योः। औणादिकोऽतच्। कविः क्रांतप्रज्ञः। एवंभूतः सोमोऽत्यो नाश्व इव क्रीळन् वारं दशापवित्रं पर्यर्षति। परिगच्छति ॥

॥ अथ सप्तविंशी ॥

असश्चतः शतधारा अभिश्रियो हरिं नवंतेऽव ता उदन्युवः।
क्षिपो मृजंति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ॥२७॥

असश्चतः। शतऽधाराः। अभिऽश्रियः। हरिं। नवंते। अव। ताः। उदन्युवः।
क्षिपः। मृजंति। परि। गोभिः। आऽवृतं। तृतीये। पृष्ठे। अधि। रोचने। दिवः ॥२७॥

असश्चतः परस्परमसंगताः शतधारा अभिश्रियोऽभितः सोमं श्रयंत्यस्ताः प्रसिद्धाः सूर्यस्य रश्मयो हरिमव नवंते। गच्छंति। उदन्युव उदकेच्छावत्यः सत्यः। यद्वा धाराशब्देनात्र सोमधारा अभिप्रेताः। असश्चतोऽसंबद्धा अभि-

श्रियोऽभितो गाः श्रयंत्यो गोभिः श्रितास्ताः प्रसिद्धा उदन्युव इंद्रसंबंधिवृष्टिकामा हरिमिंद्रमव नवंते । संगच्छंते । क्षिपोऽंगुलयोऽपि गोभिर्दीप्तिपक्षे गोभी रश्मिभिरावृतं सोमधारापक्षे गोभिः पर्यावृतं व्याप्तं सोमं मृजंति । अवशोधयंति । दिव आदित्याद्रोचने रोचमाने । यमादित्यो रोचयति तस्मिन् तृतीये क्षित्यपेक्षायां तृतीयभूते द्युलोकेऽधि वसंतं सोमं मृजंति ॥

॥ अथाष्टाविंशी ॥

तवेमाः प्रजा दिव्यस्य रेतसस्त्वं विश्वस्य भुवनस्य राजसि ।

अथेदं विश्वं पवमान ते वशे त्वमिंदो प्रथमो धामधा असि ॥२८॥

तव । इमाः । प्रऽजाः । दिव्यस्य । रेतसः । त्वं । विश्वस्य । भुवनस्य । राजसि ।

अथ । इदं । विश्वं । पवमान । ते । वशे । त्वं । इंदो इति । प्रथमः । धामऽधाः । असि ॥२८॥

तव दिव्यस्य रेतसः सकाशादिमाः प्रजा उत्पद्यमानाः प्राणिन उत्पन्नाः । सोमो वै रेतोधा इति श्रुतेः । त्वं विश्वस्य भुवनस्य राजसि । ईश्वरो भवसि । अथापि चेदं विश्वं हे पवमान ते वशे त्वदधीनं वर्तते । हे इंदो प्रथमो मुख्यस्त्वं धामधा धाम्नो धर्तासि । भवसि ॥

॥ अथैकोनत्रिंशी ॥

त्वं समुद्रो असि विश्ववित्कवे तवेमाः पंच प्रदिशो विधर्मणि ।

त्वं द्यां च पृथिवीं चाति जभ्रिषे तव ज्योतींषि पवमान सूर्यः ॥२९॥

त्वं । समुद्रः । असि । विश्वऽवित् । कवे । तव । इमाः । पंच । प्रऽदिशः । विऽधर्मणि ।

त्वं । द्यां । च । पृथिवीं । च । अति । जभ्रिषे । तव । ज्योतींषि । पवमान । सूर्यः ॥२९॥

हे कवे क्रांतप्रज्ञ त्वं यस्मात्समुद्रो वर्षसाधनोऽपामतो विश्वविदसि । यद्वा समुद्रो द्रवात्मकोऽसि विश्वविद्वासि । किंच तव विधर्मणि विधारणे पंच प्रदिशः प्रकृष्टा दिशो भवंतीति शेषः । त्वं द्यां च दिवं च पृथिवीं चाति जभ्रिषे । बिभर्षि । हे पवमान सूर्यो देवस्तव ज्योतींष्याप्याययति ॥

॥ अथ त्रिंशी ॥

त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे ।

त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ॥३०॥

त्वं । पवित्रे । रजसः । विऽधर्मणि । देवेभ्यः । सोम । पवमान । पूयसे ।
त्वां । उशिजः । प्रथमाः । अगृभ्णत । तुभ्य । इमा । विश्वा । भुवनानि । येमिरे ॥३०॥

हे सोम पवमान त्वं रजसो लोकस्य रसस्य वा विधर्मणि विधारके दशापवित्रे देवेभ्यो देवार्थं पूयसे । त्वामुशिजः कामयमाना ऋत्विजः प्रथमाः प्रतमा मुख्या अगृभ्णत । गृह्णंति । तुभ्य तुभ्यमिमेमानि विश्वा सर्वाणि भुवनानि भूतजातानि येमिरे । यच्छंत्यात्मानं ॥

॥ इति सप्तमस्य तृतीये सप्तदशो वर्गः ॥

॥ अथैकत्रिंशी ॥

प्र रेभ एत्यति वारमव्ययं वृषा वनेष्वव चक्रदद्धरिः ।
सं धीतयो वावशाना अनूषत शिशुं रिहंति मतयः पनिप्नतं ॥३१॥
प्र । रेभः । एति । अति । वारं । अव्ययं । वृषा । वनेषु । अव । चक्रदत् । हरिः ।
सं । धीतयः । वावशानाः । अनूषत । शिशुं । रिहंति । मतयः । पनिप्नतं ॥३१॥

रेभः शब्दयिता । रेभृ शब्दे । सोमो वारमव्ययमविमयं वालं प्रात्येति । प्रकर्षेणातिगच्छति । वृषा सेक्ता सोमो वनेषूदकेष्वव चक्रददवक्रंदन् हरिर्हरितवर्णः सोमः । समनूषत । संस्तुवंति । के । धीतयो ध्यातारो वावशाना यागं सोमं वा कामयमानाः । शिशुं शिशुवत्संस्कर्तव्यं सोमं मतयः स्तुतयो रिहंति । लिहंति । स्पृशंति । स्वविषयीकुर्वंतीत्यर्थः । कीदृशं । पनिप्नतं । शब्दयंतं ॥

॥ अथ द्वात्रिंशी ॥

स सूर्यस्य रश्मिभिः परि व्यत तंतुं तन्वानस्त्रिवृतं यथा विदे ।
नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतं ॥३२॥
सः । सूर्यस्य । रश्मिऽभिः । परि । व्यत । तंतुं । तन्वानः । त्रिऽवृतं । यथा । विदे ।
नयन् । ऋतस्य । प्रऽशिषः । नवीयसीः । पतिः । जनीनां । उप । याति । निःऽकृतं ॥३२॥

स सोमः सूर्यस्य रश्मिभिः परि व्यत । परिवेष्टयत्यात्मानं । किं कुर्वन् । त्रिवृतं सवनैर्देवैर्वा त्रिवृतं तंतुं यज्ञं तन्वानो विस्तारयन् यथा विदे जानाति ।

येन प्रकारेण संपूर्णमवगच्छति तथा तन्वानः। ऋतस्य सत्यभूतस्य यजमानस्य नवीयसीर्नवतराः प्रशिषः प्रशंसना अभिमतानि नयन् प्रापयन्। तस्मा एव जनीनां पतिः पालकः स्वामी निष्कृतं संस्कृतं पात्रमुप याति। गच्छति॥

॥ अथ त्रयस्त्रिंशी ॥

राजा सिंधूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत्।
सहस्रधारः परि षिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः॥३३॥

राजा। सिंधूनां। पवते। पतिः। दिवः। ऋतस्य। याति। पथिऽभिः। कनिक्रदत्।
सहस्रऽधारः। परि। सिच्यते। हरिः। पुनानः। वाचं। जनयन्। उपऽवसुः॥३३॥

सिंधूनां नदीनामुदकानां राजेश्वरो दिवः पतिर्द्युलोकस्य स्वामी ऋतस्य यज्ञस्य पथिभिर्मार्गैः कनिक्रदच्छब्दं कुर्वन्याति। सहस्रधारो बहुधारायुक्तः सोमो नृभिर्नेतृभिर्ऋत्विग्भिः परि षिच्यते पात्रेषु। पुनानः पूयमानो वाचं शब्दं जनयन् उत्पादयन् उपावसुरुपागच्छद्धनः। परिषिच्यत इति समन्वयः॥

॥ अथ चतुस्त्रिंशी ॥

पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया।
गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि॥३४॥

पवमान। महि। अर्णः। वि। धावसि। सूरः। न। चित्रः। अव्ययानि। पव्यया।
गभस्तिऽपूतः। नृऽभिः। अद्रिऽभिः। सुतः। महे। वाजाय। धन्याय। धन्वसि॥३४॥

हे पवमान सोम मह्यर्णो बहूदकं। अर्ण इत्युदकनाम। रसं वा वि धावसि। गमयसि। धावु गतिशुद्ध्योः। किंच सूरो न चित्रः सूर्य इव चित्रश्चायनीयः पूज्यः सन् अव्ययान्यविमयानि पव्यया पात्राणि गच्छसि। किंच। गभस्तिपूतो बाहुभिरभिशोधितो नृभिर्ऋत्विग्भिर्ग्रावभिश्च सुतोऽभिषुतो महे महते वाजाय संग्रामाय धन्याय धनेभ्यो हिताय धन्वसि। गच्छसि। धन्वतिर्गतिकर्मा॥

॥ अथ पंचत्रिंशी ॥

इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि।
इंद्राय मद्वा मद्यो मदः सुतो दिवो विष्टंभ उपमो विचक्षणः॥३५॥

इषं। ऊर्जं। पवमान। अभि। अर्षसि। श्येनः। न। वंसु। कलशेषु। सीदसि।
इंद्राय। मद्वा। मद्यः। मदः। सुतः। दिवः। विष्टंभः। उपऽमः। विऽचक्षणः ॥३५॥

हे पवमान पूयमान सोम इषमन्नमूर्जं बलं चाभ्यर्षसि। श्येनो न श्येन इव वंसु वननीयेषु कुलायेषु कलशेषु सीदसि। निषण्णो भवसि। अथ परोक्षकृतः। इंद्राय मद्वा मदकरो मद्यो मदहेतुर्मदो रसः सुतोऽभिषुतः। कीदृशः। दिवो द्युलोकस्योपम उपमीयमानो विष्टंभो विशेषेण स्तंभयिता। स्थूणा यथा गृहं तथा। विचक्षणो विद्रष्टा। स्थूणेव जनानुपमित्। ऋग्वे॰ १.५९.१.। इत्युक्तं ॥

॥ इति सप्तमस्य तृतीयेऽष्टादशो वर्गः ॥

॥ अथ षट्त्रिंशी ॥

सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितं।
अपां गंधर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥३६॥
सप्त। स्वसारः। अभि। मातरः। शिशुं। नवं। जज्ञानं। जेन्यं। विपःऽचितं।
अपां। गंधर्वं। दिव्यं। नृऽचक्षसं। सोमं। विश्वस्य। भुवनस्य। राजसे ॥३६॥

सप्त सर्पणस्वभावाः सप्तसंख्याका वा मातरो मातृस्थानीया गंगायमुनाद्याः शिशुं शिशुस्थानीयमभि। गच्छंतीति शेषः। स्वकीयैः पयोभिराच्छादयंतीति शेषः। कीदृशं शिशुं। नवं जज्ञानं जायमानं जेन्यं जयशीलं विपश्चितं विद्वांसं। अपां जनकं तेषां मध्ये वर्तमानं वा गंधर्वमुदकस्य धातारं दिव्यं दिविभवं नृचक्षसं नृणां द्रष्टारं सोमं। अभिगच्छंति किमर्थं। विश्वस्य भुवनस्य विराजसे विराजनार्थं ॥

॥ अथ सप्तत्रिंशी ॥

ईशान इमा भुवनानि वीयसे युजान इंदो हरितः सुपर्ण्यः।
तास्ते क्षरंतु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठंतु कृष्टयः ॥३७॥
ईशानः। इमा। भुवनानि। वि। ईयसे। युजानः। इंदो इति। हरितः। सुऽपर्ण्यः।
ताः। ते। क्षरंतु। मधुऽमत्। घृतं। पयः। तव। व्रते। सोम। तिष्ठंतु। कृष्टयः ॥३७॥

हे इंदो सोम ईशानः सर्वस्य स्वामी त्वमिमेमानि भुवनानि भूतजातानि वीयसे। गच्छसि। वी गत्यादिषु। किं कुर्वन्। हरितो हरितवर्णाः सुपर्ण्यः

सुपतनाश्वाश्वा रथे युजानो योजयन्। ताः सुपर्ण्यस्ते तव संबंधिन्यो मधुमद्मा-धुर्योपेतं घृतं दीप्तं पय उदकं क्षरंतु। हे सोम तव व्रते कर्मणि तिष्ठंतु कृष्टयो मनुष्याः सर्वे ॥

॥ अथाष्टात्रिंशी ॥

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥३८॥
त्वं। नृऽचक्षाः। असि। सोम। विश्वतः। पवमान। वृषभ। ता। वि। धावसि।
सः। नः। पवस्व। वसुऽमत्। हिरण्यऽवत्। वयं। स्याम। भुवनेषु। जीवसे ॥३८॥

हे सोम त्वं विश्वतः सर्वतः सर्वेषु भुवनेषु नृचक्षा नृणां द्रष्टासि। भवसि। हे पवमान वृषभापां वर्षक ता अपो विधावसि। विविधं गच्छसि। स त्वं नोऽस्माकं पवस्व। क्षर। किं। वसुमद्बहुभिर्वसुभिर्वासकैर्गवादिद्रव्यैर्युक्तं तथा हिरण्यवद्बहुभिर्हिरण्यैर्युक्तं धनं। वयं च वसुभिर्हिरण्यैर्युक्ता भुवनेषु लोकेषु जीवसे जीवितुं प्रभवः स्याम। भवेम ॥

॥ अथैकोनचत्वारिंशी ॥

गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इंदो भुवनेष्वर्पितः।
त्वं सुवीरो असि सोम विश्ववित्तं त्वा विप्रा उप गिरेम आसते ॥३९॥
गोऽवित्। पवस्व। वसुऽवित्। हिरण्यऽवित्। रेतःऽधाः। इंदो इति। भुवनेषु। अर्पितः।
त्वं। सुऽवीरः। असि। सोम। विश्वऽवित्। तं। त्वा। विप्राः। उप। गिरा। इमे। आसते ॥३९॥

हे सोम त्वं पवस्व। क्षर। कीदृशः। गोवित् गवां लंभकः। वसुवित् धनस्य लंभकः। हिरण्यवित् हिरण्यस्य लंभकः। रेतोधाः। रेत उदकं। तस्य धातौष-धीनां। यद्वा। रेतः प्रजननसामर्थ्यं तस्य धारयिता भुवनेषूदकेष्वर्पितः। हे इंदो सोम त्वं सुवीरः सुवीर्योऽसि। भवसि। विश्ववित् सर्वस्य वेत्ता। तं त्वा त्वामिमे विप्रा गिरा स्तुत्योपासते ॥

॥ अथ चत्वारिंशी ॥

उन्मध्व ऊर्मिर्वनना अतिष्ठिपदपो वसानो महिषो वि गाहते।
राजा पवित्ररथो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहत् ॥४०॥

उत्। मध्वः। ऊर्मिः। वननाः। अतिस्थिपत्। अपः। वसानः। महिषः। वि। गाहते।
राजा। पवित्रऽरथः। वाजं। आ। अरुहत्। सहस्रऽभृष्टिः। जयति। श्रवः। बृहत्॥४०॥

मध्वो मधुरस्योर्मी रसो वनना वननीया वाच उदतिष्ठिपत्। उत्थापयति। सोमाभिषवकाले स्तुतिवाचः प्रवृत्तेः। अपो वसान आच्छादयन् महिषो महान् वि गाहते। प्रविशति कलशं। राजा सोमः पवित्ररथो दशापवित्रमेव रथो यस्य स तथोक्तः। तादृशः सोमो वाजं संग्राममारुहत् आरोहति। सहस्रभृष्टिर्बहुभ्रंशोऽपरिमितगमनो बृहच्छ्रवो महदन्नं जयति। अस्मदर्थं॥

॥ इति सप्तमस्य तृतीय एकोनविंशो वर्गः ॥

॥ अथैकचत्वारिंशी ॥

स भंदना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि।
ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इंदविंद्रमस्मभ्यं याचतात्॥४१॥

सः। भंदनाः। उत्। इयर्ति। प्रजाऽवतीः। विश्वऽआयुः। विश्वाः। सुऽभराः। अहःऽदिवि।
ब्रह्म। प्रजाऽवत्। रयिं। अश्वऽपस्त्यं। पीतः। इंदो इति। इंद्रं। अस्मभ्यं। याचतात्॥४१॥

स सोमो विश्वायुः सर्वस्य गंता सोमः प्रजावतीः प्रजारूपफलदात्रीः सुभराः सुष्ठु ह्रियमाणा विश्वाः सर्वा भंदनाः स्तुतीरुदियर्ति। उत्कृष्टं प्रेरयति। कस्मिन्काले। उच्यते। अहर्दिवि। अहोरात्रयोश्च। अथ प्रत्यक्षकृतः। ब्रह्म परिवृढं कर्म प्रजावत् प्रजाभिर्युक्तं। प्रजाफलकमित्यर्थः। यद्वा। अन्नं तच्च प्रजावत् प्रजाद्युपेतं। तथा रयिं धनं। कीदृशं। अश्वपस्त्यं। व्याप्तगृहं। तदुभयं हे इंदो दीप्त सोम पीत इंद्रेण पीतस्त्वं तमेवेंद्रमस्मभ्यं याचतात्। याचस्व॥

॥ अथ द्विचत्वारिंशी ॥

सो अग्रे अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः।
द्वा जना यातयन्नंतरीयते नरा च शंसं दैव्यं च धर्तरि॥४२॥

सः। अग्रे। अह्नां। हरिः। हर्यतः। मदः। प्र। चेतसा। चेतयते। अनु। द्युऽभिः।
द्वा। जना। यातयन्। अंतः। ईयते। नराशंसं। च। दैव्यं। च। धर्तरि॥४२॥

स सोमोऽग्रे सर्वेषां संमुखं चेतसा प्राणिनां चेतनेन सहाह्नां द्युभिर्दीप्तिभिरनु

प्र चेतयते । अनुप्रज्ञायते । यद्वा । अह्नामग्रेऽग्रभागे । प्रातरित्यर्थः । स्तोतॄणां चेतसा प्रज्ञानेन द्युभिर्दीप्ताभिः स्तुतिभिश्चानु प्र चेतयते । कीदृशः सः । हरिर्हरितवर्णो हर्यतः कांतो मदो मदकरः । किंच । द्वा जना द्वौ जनौ स्तोतारं यष्टारं च यातयन् प्रापयन् स्वविहितेन कर्मणा । लौकिकवैदिकौ द्वौ जनौ द्रष्टव्यौ । एवं कुर्वन्नंतर्द्यावापृथिव्योर्मध्य ईयते । गच्छति । ईङ् गतौ । किं कुर्वन् । नराशंसं नरैः शंसनीयं । मानुषमित्यर्थः । दैव्यं च दिविभवमुभयविधं धनं धर्तरि धारके यजमाने प्रेरयन्निति शेषः ॥

॥ अथ त्रिचत्वारिंशी ॥

अंजते व्यंजते समंजते क्रतुं रिहंति मधुनाभ्यंजते ।

सिंधोरुच्छ्वासे पतयंतमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ॥४३॥

अंजते । वि । अंजते । सं । अंजते । क्रतुं । रिहंति । मधुना । अभि । अंजते ।

सिंधोः । उत्ऽश्वासे । पतयंतं । उक्षणं । हिरण्यऽपावाः । पशुं । आसु । गृभ्णते ॥४३॥

सोममृत्विजोऽंजते गोभिः । तथा व्यंजते । विविधमंजंति । समंजते । सम्यगंजंति । स्तुत्यर्थत्वादपुनरुक्तिः । तथा क्रतुं बलकर्तारं रिहंति । लिहंति । आस्वादयंति देवाः । तथा पुनर्मधुना गव्येनाभ्यंजते । तमेव सोमं सिंधोरुदकस्य रसस्याधारभूत उच्छ्वास उच्छ्रिते देशे पतयंतं गच्छंतं । पत्लृ गतावित्यस्मात्स्वार्थे णिचि वृद्ध्यभावश्छांदसः । उक्षणं सेक्तारं हिरण्यपावा हिरण्येन पुनंतः पशुं द्रष्टारं । पशुः पश्यतेरिति निरुक्तं । आसु वसतीवरीषु गृभ्णते । गृह्णंति ॥

॥ अथ चतुश्चत्वारिंशी ॥

विपश्चिते पवमानाय गायत मही न धारात्यंधो अर्षति ।

अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीळन्नसरद्वृषा हरिः ॥४४॥

विपःऽचिते । पवमानाय । गायत । मही । न । धारा । अति । अंधः । अर्षति ।

अहिः । न । जूर्णां । अति । सर्पति । त्वचं । अत्यः । न । क्रीळन् । असरत् । वृषा । हरिः ॥४४॥

हे ऋत्विजः विपश्चिते मेधाविने पवमानाय पूयमानाय गायत । स्तुतिं कुरुत । स च विपश्चित्सोमो मही न धारा महती वर्षधारेवांधोऽन्नं रसात्मकमत्यर्षति । अहिर्न अहिरिव जूर्णां जीर्णां त्वचमति सर्पति । अतिमुंचति ।

अभिषवादिकर्मणा त्वचं मुंचतीत्यर्थः। तद्वदतिसर्पति धारा दशापवित्रात्। अत्यो न अश्व इव क्रीळन् असरत्। सरति। गच्छति द्रोणकलशं। वृषा वर्षकः कामानां हरिर्हरितवर्णो रसः॥

॥ अथ पंचचत्वारिंशी ॥

अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः॥४५॥

अग्रेऽगः। राजा। अप्यः। तविष्यते। विऽमानः। अह्नां। भुवनेषु। अर्पितः।
हरिः। घृतऽस्नुः। सुऽदृशीकः। अर्णवः। ज्योतिःऽरथः। पवते। राये। ओक्यः॥४५॥

अग्रेगोऽग्रे गंता राजा राजमानोऽप्योऽप्सु संस्कृतः सोमस्तविष्यते। स्तूयते। योऽह्नां दिनानां विमानो निर्माता चंद्रकलाह्रासवृद्ध्यधीनत्वादहर्व्यवहारस्य। भुवनेषूदकेषु वसतीवरीसंबंधिष्वर्पितः स्थापितः स राजा तविष्यते। किंच। हरिर्हरितवर्णो घृतस्नुः प्रसृतोदकः सुदृशीकः शोभनदर्शनोऽर्णव उदकवान्। अर्ण इत्युदकनाम। ज्योतीरथो ज्योतिर्मयरथो राये धनस्य प्रापयिता। ओक्यः। ओक इति निवासनाम। तस्य हितः॥

॥ इति सप्तमस्य तृतीये विंशो वर्गः॥

॥ अथ षट्चत्वारिंशी ॥

असर्जि स्कंभो दिव उद्यतो मदः परि त्रिधातुर्भुवनान्यर्षति।
अंशुं रिहंति मतयः पनिप्नतं गिरा यदि निर्णिजमृग्मिणो ययुः॥४६॥

असर्जि। स्कंभः। दिवः। उत्ऽयतः। मदः। परि। त्रिऽधातुः। भुवनानि। अर्षति।
अंशुं। रिहंति। मतयः। पनिप्नतं। गिरा। यदि। निःऽनिजं। ऋग्मिणः। ययुः॥४६॥

दिवो द्युलोकस्य स्कंभः स्कंभयिता धारक उद्यतः सोमोऽसर्जि। सृज्यते। अभिषूयत इत्यर्थः। किंच त्रिधातुः। द्रोणकलशाधावनीयपूतभृदाख्यास्त्रयो धातवो यस्य स तथोक्तः। तादृशो भुवनान्युदकान्यर्षति। गच्छति। अंशुं सोमं पनिप्नतं शब्दायमानं मतयः पूजका रिहंति। लिहंति। आस्वादयंति। कदा। यदि निर्णिजं निर्णिक्तं। यद्वा निर्णिगिति रूपनाम। रूपवंतमित्यर्थः। तमृग्मिणः स्तोतारो गिरा स्तुत्या ययुर्गच्छंति तदा॥

॥ अथ सप्तचत्वारिंशी ॥

प्र ते धारा अत्यण्वानि मेष्यः पुनानस्य संयतो यंति रंहयः ।
यद्गोभिरिंदो चम्वोः समज्यस आ सुवानः सोम कलशेषु सीदसि ॥४७॥

प्र । ते । धाराः । अति । अण्वानि । मेष्यः । पुनानस्य । संऽयतः । यंति । रंहयः ।
यत् । गोभिः । इंदो इति । चम्वोः । संऽअज्यसे । आ । सुवानः । सोम । कलशेषु । सीदसि ॥४७॥

पुनानस्य पूयमानस्य संयतः संगृह्यमाणा रंहयो रंहणस्वभावा धारा मेष्योऽण्वान्यणूनि लोमान्यति यंति । अतिक्रम्य गच्छंति । हे इंदो सोम यद्यदा गोभिरुदकैश्चम्वोरधिषवणफलकयोरुपरि समज्यसे तदानीं हे सोम सुवानः सूयमानस्त्वं कलशेष्वासीदसि ॥

॥ अथाष्टाचत्वारिंशी ॥

पवस्व सोम क्रतुविन्न उक्थ्योऽव्यो वारे परि धाव मधु प्रियं ।
जहि विश्वान्रक्षस इंदो अत्रिणो बृहद्वदेम विदथे सुवीराः ॥४८॥

पवस्व । सोम । क्रतुऽवित् । नः । उक्थ्यः । अव्यः । वारे । परि । धाव । मधु । प्रियं ।
जहि । विश्वान् । रक्षसः । इंदो इति । अत्रिणः । बृहत् । वदेम । विदथे । सुऽवीराः ॥४८॥

हे सोम नोऽस्माकं क्रतुवित् कर्मज्ञः । स्तुतिज्ञ इत्यर्थः । उक्थ्यः स्तुत्यः । यतः स्तुत्योऽतः क्रतुविदित्यभिप्रायः । ईदृशस्त्वं नोऽस्माकं यागाय पवस्व । स्रव रसं । अव्यो वारे दशापवित्रे प्रियं मधु परि धाव । परि क्षर । हे इंदो दीप्त सोम अत्रिणो भक्षकान्विश्वान्रक्षसो जहि । सुवीराः सुपुत्रा वयं विदथे यज्ञे बृहन्महद्वचनं वदेम । उच्चारयेम । याचेमेत्यर्थः । यद्वा । प्रभूतं स्तोत्रं वदेम ॥

॥ इति सप्तमस्य तृतीय एकविंशो वर्गः ॥

प्र तु द्रवेति नवर्चं द्वितीयं सूक्तं काव्यस्योशनस आर्षं । अनादेशपरिभाषया त्रैष्टुभं पवमानसोमदेवताकं । तथा चानुक्रांतं । प्र तु नवोशना इति । जागतमूर्ध्वं प्रागुशनस इति वचनाज्जगत्यधिकारो निवृत्तः । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयंतोऽच्छा बर्ही रशनाभिर्नयंति ॥१॥

प्र । तु । द्रव । परि । कोशं । नि । सीद । नृऽभिः । पुनानः । अभि । वाजं । अर्ष ।
अश्वं । न । त्वा । वाजिनं । मर्जयंतः । अच्छ । बर्हिः । रशनाभिः । नयंति ॥१॥

हे सोम तु क्षिप्रं प्र द्रव । प्रगच्छ । गत्वा च कोशं द्रोणकलशं परि नि षीद । निषण्णो भव । नृभिर्नेतृभिः पुनानः पूयमानो वाजमन्नं यजमानार्थमुद्दिश्याभ्यर्ष । अभिगच्छ । वाजिनं बलवंतमश्वं नाश्वमिव तं यथा मार्जयंति तद्वद्वाजिनं त्वां मार्जयंतः शोधयंतो बर्हिर्यज्ञमच्छ प्रति रशनाभी रशनावदायताभिरंगुलीभिर्नयंत्यध्वर्युप्रमुखाः ॥

॥ अथ द्वितीया ॥

स्वायुधः पवते देव इंदुरशस्तिहा वृजनं रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टंभो दिवो धरुणः पृथिव्याः ॥२॥
सुऽआयुधः । पवते । देवः । इंदुः । अशस्तिऽहा । वृजनं । रक्षमाणः ।
पिता । देवानां । जनिता । सुऽदक्षः । विष्टंभः । दिवः । धरुणः । पृथिव्याः ॥२॥

स्वायुधः शोभनायुध इंदुः सोमो देवः पवते । स च देवोऽशस्तिहा रक्षोहा वृजनमुपद्रवं रक्षमाणः पिता पालको देवानां तथा जनितोत्पादकः सुदक्षः सुबलो दिवो विष्टंभो विशेषेण स्तंभयिता पृथिव्याश्च धरुणो धारकः । एवं महानुभावः पवते ॥

॥ अथ तृतीया ॥

ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।
स चिद्विवेद निहितं यदासामपीच्यं१गुह्यं नाम गोनां ॥३॥
ऋषिः । विप्रः । पुरःऽएता । जनानां । ऋभुः । धीरः । उशना । काव्येन ।
सः । चित् । विवेद । निऽहितं । यत् । आसां । अपीच्यं । गुह्यं । नाम । गोनां ॥३॥

ऋषिरतींद्रियद्रष्टा विप्रो मेधावी पुरएता पुरतो गंता जनानां मनुष्याणामृभुरुरु भासमानो धीरो धीमान् उशना एतन्नामर्षिर्यः स चित् स एव काव्येन कवित्वेन स्तोत्रेण विवेद । लभते । किं । यदासां गोनां गवामपीच्यं । अंतर्हितनामैतत् । अंतर्हितं गुह्यं गोपनीयं नाम नामकमुदकं पयोलक्षणं ॥

॥ अथ चतुर्थी ॥

एष स्य ते मधुमाँ इंद्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।
सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥४॥

एषः । स्यः । ते । मधुऽमान् । इंद्र । सोमः । वृषा । वृष्णे । परि । पवित्रे । अक्षारिति ।
सहस्रऽसाः । शतऽसाः । भूरिऽदावा । शश्वत्ऽतमं । बर्हिः । आ । वाजी । अस्थात् ॥४॥

हे इंद्र वृष्णे वर्षकाय ते तुभ्यमेष स्यः स सोमो मधुमान् माधुर्योपेतो वृषा वर्षकः पवित्रे पर्यक्षाः । परि क्षरति । क्षरतेर्लुङि रूपं । स एव सहस्रसाः सहस्रसंख्याकधनस्य दाता शतसाः शतसंख्याकस्य दाता भूरिदावा ततोऽपि भूरेर्दाता वाजी बलवान् शश्वत्तमं नित्यं बर्हिर्यज्ञमास्थात् । आतिष्ठति ॥

॥ अथ पंचमी ॥

एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।
पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः ॥५॥

एते । सोमाः । अभि । गव्या । सहस्रा । महे । वाजाय । अमृताय । श्रवांसि ।
पवित्रेभिः । पवमानाः । असृग्रन् । श्रवस्यवः । न । पृतनाजः । अत्याः ॥५॥

एते सोमा गव्या गव्यानि सहस्रा सहस्राणि श्रवांस्यन्नान्याशिरलक्षणानि लक्षीकृत्य पवित्रेभिः पवित्रच्छिद्रैः पवमानाः पूयमाना महे महते वाजायान्नायामृतायामृतत्वायाभ्यसृग्रन् सृज्यंते । किमिच्छवः । श्रवस्यवोऽन्नेच्छवः पृतनाजः सेनाजेतारोऽत्या नाश्वा इव ॥

॥ इति सप्तमस्य तृतीये द्वाविंशो वर्गः ॥

॥ अथ षष्ठी ॥

परि हि ष्मा पुरुहूतो जनानां विश्वासरद्भोजना पूयमानः ।
अथा भर श्येनभृत प्रयांसि रयिं तुंजानो अभि वाजमर्ष ॥६॥

परि । हि । स्म । पुरुऽहूतः । जनानां । विश्वा । असरत् । भोजना । पूयमानः ।
अथ । आ । भर । श्येनऽभृत । प्रयांसि । रयिं । तुंजानः । अभि । वाजं । अर्ष ॥६॥

अयं पर्यसरत् परिसरति जनानामर्थाय विश्वा सर्वाणि भोजना भोजनान्यन्नानि धनानि वा । कीदृशः । पुरुहूतः । बहुभिराहूतः पूयमानः शोध्यमानः । अथ प्रत्यक्षकृतः । अथेदानीं हे श्येनभृत श्येनेनाहृत सोम त्वं प्रयांस्यन्नान्या भर । आहर । रयिं धनं तुंजानो ददानो वाजमन्नं रसमभ्यर्ष । अभिगच्छ ॥

॥ अथ सप्तमी ॥

एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा ।
तिग्मे शिशानो महिषो न शृंगे गा गव्यन्नभि शूरो न सत्वा ॥ ७॥

एषः । सुवानः । परि । सोमः । पवित्रे । सर्गः । न । सृष्टः । अदधावत् । अर्वा ।
तिग्मे इति । शिशानः । महिषः । न । शृंगे इति । गाः । गव्यन् । अभि । शूरः । न ।
सत्वा ॥ ७॥

एष सुवानः सूयमानोऽर्वारणकुशलः सोमः सर्गो न सृष्टो विसृष्टोऽश्व इव पवित्रे पर्यदधावत् । परिधावति । किंच तिग्मे तीक्ष्णे शृंगे शिशानस्तीक्ष्णीकुर्वन् महिषो न महान् महिषाख्यो मृग इव । तथान्यदृष्टांतः । गा गव्यन् प्रभूता गा इच्छन् शूरो न शूर इव । एतौ महिषशूरौ यथा प्रतिबुद्धौ शीघ्रं धावतस्तद्वत् सत्वा सदनशीलोऽयं गच्छतीति शेषः ॥

॥ अथाष्टमी ॥

एषा ययौ परमादंतरद्रेः कूचित्सतीरूर्वे गा विवेद ।
दिवो न विद्युत्स्तनयंत्यभ्रैः सोमस्य ते पवत इंद्र धारा ॥ ८॥

एषा । आ । ययौ । परमात् । अंतः । अद्रेः । कूऽचित् । सतीः । ऊर्वे । गाः । विवेद ।
दिवः । न । विऽद्युत् । स्तनयंती । अभ्रैः । सोमस्य । ते । पवते । इंद्र । धारा ॥ ८॥

एषा सोमधारा परमादुच्छ्रितात्स्थानाद्ययौ जगाम पात्रं तया प्राप्तव्यं देशं वा । किंच । अद्रेः पणीनां निवासस्थानस्य पर्वतस्यांतः कूचित् क्वचित् कुत्रचिद्गूढ ऊर्वे देशे सतीर्वर्तमानाः पणिभिरपहृता गा विवेद । लब्धवती । यत्र पणयो गा अपहृत्य स्थापितवंतः स देश ऊर्वः । ऊर्वं गव्यं महि गृणानः । ऋग्वे० ६.१७.१. । इति हि मंत्रांतरं । दिवो न विद्युत् दिवः सकाशाद्विद्युदिव स्तनयंती शब्दयंती । विद्युद्विशेष्यते । अभ्रैः प्रेरितेति शेषः । सा यथा शब्दं

करोति तद्वच्छब्दं कुर्वती। सोमस्य संबंधिनी सेयं धारा हे इंद्र ते त्वदर्थं त्वत्पानाय पवते। पूयते। क्षरति वा॥

॥ अथ नवमी ॥

उत स्म॑ रा॒शिं परि॑ यासि॒ गोना॒मिंद्रे॑ण सोम स॒रथं॑ पुना॒नः।

पू॒र्वीरिषो॑ बृह॒तीर्जीर॑दानो॒ शिक्षा॑ शचीव॒स्तव॒ ता उ॑प॒ष्टुत्॥९॥

उ॒त। स्म॒। रा॒शिं। परि॑। या॒सि॒। गोना॑म्। इंद्रे॑ण। सो॒म॒। स॒ऽरथ॑म्। पु॒ना॒नः।

पू॒र्वीः। इषः॑। बृ॒ह॒तीः। जीर॑दानो॒ इति॒ जीर॑ऽदानो। शिक्ष॑। श॒ची॒ऽवः॒। तव॑।

ताः। उ॒प॒ऽस्तु॒त्॥९॥

उत स्म अपि च खलु हे सोम पुनानः पूयमानो गोनां गवां राशिं समूहं पणिभिरपहृतं परियासि। परिगच्छसि। कथंभूतः सन्। उच्यते। इंद्रेण सह सरथमेकमेव रथमास्थाय। हे जीरदानो क्षिप्रदान सोम उपस्तुत् उपस्तूयमानस्त्वं पूर्वीर्बह्वीर्बृहतीर्महतीरिष उक्तलक्षणान्यन्नानि शिक्ष। देहि। हे शचीवोऽन्नवन् ता इषस्तव स्वभूता इति शेषः॥

॥ इति सप्तमस्य तृतीये त्रयोविंशो वर्गः॥

अयं सोम इत्यष्टर्चं तृतीयं सूक्तं। ऋष्याद्याः पूर्ववत्। अयं सोमोऽष्टावित्यनुक्रांतं। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

अ॒यं सोम॑ इंद्र॒ तुभ्यं॑ सुन्वे॒ तुभ्यं॑ पवते॒ त्वम॑स्य पाहि।

त्वं ह॒ यं च॑कृ॒षे त्वं व॑वृ॒ष इंदुं॒ मदा॑य॒ युज्या॑य॒ सोम॑म्॥१॥

अ॒यम्। सोमः॑। इं॒द्र॒। तुभ्य॑म्। सु॒न्वे॒। तुभ्य॑म्। प॒व॒ते॒। त्वम्। अ॒स्य॒। पा॒हि॒।

त्वम्। ह॒। यम्। च॒कृ॒षे। त्वम्। व॒वृ॒षे। इंदु॑म्। मदा॑य। युज्या॑य। सोम॑म्॥१॥

हे इंद्र अयं सोमस्तुभ्यं त्वदर्थं सुन्वे। सूयते॥ सुनोतेः कर्मार्थे लटि लोपस्त आत्मनेपदेष्विति तलोपः॥ तुभ्यं त्वदर्थमेव पवते। पूयते। त्वं चास्यामुं पाहि। पिब। त्वं ह यमिंदुं सोमं चकृषे करोषि। त्वं च यं ववृषे वृतवानसि। किमर्थं। मदाय युज्याय सहायाय। सोम इंद्राय बलकरत्वात्सहाय इति प्रसिद्धं। यमेवं करोषि त्वं तं पाहीति समन्वयः॥

॥ अथ द्वितीया ॥

स ईं रथो न भुरिषाळयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवंत ॥२॥

सः । ईं । रथः । न । भुरिषाट् । अयोजि । महः । पुरूणि । सातये । वसूनि ।
आत् । ईं । विश्वा । नहुष्याणि । जाता । स्वःऽसाता । वने । ऊर्ध्वा । नवंत ॥२॥

स ईं सोऽयं सोमो भुरिषाट् भूरिभारस्य सोढा रथो न रथ इव भुरिषाट् प्रभूतस्य भारस्य सोढायोजि । युज्यते । कीदृशः सः । महो महान् । किमर्थमयोजि । पुरूणि बहूनि वसूनि धनानि सातयेऽस्मभ्यं दातुं । आदीं योगानंतरं विश्वा विश्वानि सर्वाणि नहुष्याणि । नहुषो मनुष्याः । तेषां संबंधीनि जाता जातान्यस्मद्विरोधादूर्ध्वोन्मुखानि वने वननीये स्वर्षाता स्वर्षातौ । संग्रामनामैतत् । स्वर्गलाभयुक्ते संग्रामे नवंत । गच्छंतु । नवतिर्गतिकर्मा । यद्वा सोमं संग्रामे युद्धार्थिनः संगच्छंति ॥

॥ अथ तृतीया ॥

वायुर्न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शंभविष्ठः ।
विश्ववारो द्रविणोदा इव त्मन्पूषेव धीजवनोऽसि सोम ॥३॥

वायुः । न । यः । नियुत्वान् । इष्टऽयामा । नासत्याऽइव । हवे । आ । शंऽभविष्ठः ।
विश्वऽवारः । द्रविणोदाःऽइव । त्मन् । पूषाऽइव । धीऽजवनः । असि । सोम ॥३॥

यः सोमो नियुत्वान् । नियुतो वायोरश्वाः । तद्वान् वायुर्न वायुरिवेष्टयामेष्टगमनः । नासत्येवाश्विनाविव हवमाह्वानमाकर्ण्य आ सर्वतः शंभविष्ठः सुखस्य भावयितृतमः । द्रविणोदा इव धनदातेव त्मन् आत्मनि विश्ववारो विश्वैर्वरणीयो भवति तद्वद्विश्ववारोऽसि । पूषेव पोषकः सवितेव धीजवनो मनोवेगोऽसि । यद्वा । कर्मणां प्रवर्तयितासि हे सोम ॥

॥ अथ चतुर्थी ॥

इंद्रो न यो महा कर्माणि चक्रिर्हंता वृत्राणामसि सोम पूर्भित् ।
पैद्वो न हि त्वमहिनाम्नां हंता विश्वस्यासि सोम दस्योः ॥४॥

इंद्रः । न । यः । महा । कर्माणि । चक्रिः । हंता । वृत्राणां । असि । सोम । पूःऽभित् ।
पैद्वः । न । हि । त्वं । अहिंऽनाम्नां । हंता । विश्वस्य । असि । सोम । दस्योः ॥ ४ ॥

इंद्रो न इंद्र इव यस्त्वं महा महांति कर्माणि चक्रिस्ताच्छील्येन करोषि स त्वं हे सोम वृत्राणां शत्रूणां हंतासि । भवसि । तथा पूर्भित् पुरां भेत्तासि । किंच । पैद्वो नाश्व इव खल्वहिनाम्नां हंता भवसि । आगत्य हंतीत्यहिः । तन्नामकानामित्यर्थः । न केवलं तेषामेव अपि तु विश्वस्यापि सर्वस्यापि दस्योरुपक्षपयितुः शत्रोर्हंतासि ॥

॥ अथ पंचमी ॥

अग्निर्न यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु ।
जनो न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिं ॥ ५ ॥
अग्निः । न । यः । वने । आ । सृज्यमानः । वृथा । पाजांसि । कृणुते । नदीषु ।
जनः । न । युध्वा । महतः । उपब्दिः । इयर्ति । सोमः । पवमानः । ऊर्मिं ॥ ५ ॥

अग्निर्न अग्निरिव यः सोमो वनेऽरण्य आ सृज्यमानः । वनसंबंध्यग्निर्यथा बलानि कुरुते एवं यः सोमो वृथानायासेन नदीष्वंतरिक्षाणि पाजांसि कृणुते कुरुते । किंच युध्वा युद्धस्य कर्ता जनो न शूरो मनुष्य इव महतः शत्रोरुपब्दिः । वाङ्नामैतत् । शब्दयिता सन् पवमानः पूयमानः सोम ऊर्मिं प्रवृद्धं रसमियर्ति । प्रेरयति ॥

॥ अथ षष्ठी ॥

एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः ।
वृथा समुद्रं सिंधवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ॥ ६ ॥
एते । सोमाः । अति । वाराणि । अव्या । दिव्याः । न । कोशासः । अभ्रऽवर्षाः ।
वृथा । समुद्रं । सिंधवः । न । नीचीः । सुतासः । अभि । कलशान् । असृग्रन् ॥ ६ ॥

एते पूयमानाः सोमा अव्याविमयानि वाराणि वालान्यति गच्छंतीति शेषः । तत्र दृष्टांतः । दिव्या न कोशासः । दिवि भवाः कोशा आप इव । ता विशेष्यंते । अभ्रवर्षा अभ्रैर्वृष्यमाणाः । किंच वृथानायासेन समुद्रं सिंधवो न नद्य इव नीचीर्नीचीनाग्राः सुतासोऽभिषुताः सोमाः कलशानभ्यसृग्रन् । अभिगच्छंति ॥

॥ अथ सप्तमी ॥

शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ॥७॥

शुष्मी । शर्धः । न । मारुतं । पवस्व । अनभिऽशस्ता । दिव्या । यथा । विट् ।
आपः । न । मक्षु । सुऽमतिः । भव । नः । सहस्रऽअप्साः । पृतनाषाट् । न । यज्ञः ॥७॥

हे सोम शुष्मी । शुष्मं बलं शोषणात् । बलवांस्त्वं मारुतं शर्धो न मरुतां बलमिव पवस्व । तत्र दृष्टांतमेव स्पष्टयति । यथा दिव्या विट् प्रजानभिशस्ता । अभिशासो निंदा । अनिंदिता पवते । मरुतो वै देवानां विश इति हि ब्राह्मणं । किंच । आपो नोदकानीव मक्षु क्षिप्रं पवमानस्त्वं सुमतिर्भव नोऽस्माकं । किंच सहस्राप्साः । अप्स इति रूपनाम । बहुरूपस्त्वं पृतनाषाट् पृतनानामभिभवितेंद्र इव यज्ञो यष्टव्यो भवसीति ॥

॥ अथाष्टमी ॥

राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥८॥

राज्ञः । नु । ते । वरुणस्य । व्रतानि । बृहत् । गभीरं । तव । सोम । धाम ।
शुचिः । त्वं । असि । प्रियः । न । मित्रः । दक्षाय्यः । अर्यमाऽइव । असि । सोम ॥८॥

हे सोम वरुणस्य वारकस्य ते तव व्रतानि कर्माणि नु क्षिप्रं करोमीति शेषः । हे सोम तव धाम तेजःस्थानं बृहन्महद्गभीरं च । प्रियो मित्र इव त्वं शुचिर्दीप्तः शुद्धो वासि । अर्यमेव अर्यमा देव इव त्वं दक्षाय्योऽसि ॥

॥ इति सप्तमस्य तृतीये चतुर्विंशो वर्गः ॥

प्रो स्य वह्निरिति सप्तर्चं चतुर्थं सूक्तं । ऋष्याद्याः पूर्ववत् । प्रो स्य सप्तेत्यनुक्रांतं । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्रो स्य वह्निः पथ्याभिरस्यान् दिवो न वृष्टिः पवमानो अक्षाः ।
सहस्रधारो असदन्न्य१स्मे मातुरुपस्थे वन आ च सोमः ॥१॥

प्रो इति । स्यः । वह्निः । पथ्याभिः । अस्यान् । दिवः । न । वृष्टिः । पवमानः । अक्षारिति ।
सहस्रऽधारः । असदत् । नि । अस्मे इति । मातुः । उपऽस्थे । वने । आ । च । सोमः ॥ १ ॥

प्र ऊ इति निपातद्वयसमुदाय एको निपातितः । प्रो अस्यान् प्रस्यंदते स्यः स वह्निर्वोढा पथ्याभिर्यज्ञमार्गैः । दिवो न वृष्टिर्दिवः सकाशाद्वृष्टिरिव पवमानः सन् अक्षाः । व्याप्नोषि । सोऽयं सोमः सहस्रधारो बहुधारः सन् अस्मे अस्मासु न्यसदत् । निषीदति ॥

॥ अथ द्वितीया ॥

राजा सिंधूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठां ।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जां ॥ २ ॥

राजा । सिंधूनां । अवसिष्ट । वासः । ऋतस्य । नावं । आ । अरुहत् । रजिष्ठां ।
अप्ऽसु । द्रप्सः । ववृधे । श्येनऽजूतः । दुहे । ईं । पिता । दुहे । ईं । पितुः । जां ॥ २ ॥

अयं राजा सोमः सिंधूनामुदकानां क्षीरादिस्यंदिनीनां गवां वा वासो वसनस्थानीयं क्षीराख्यं श्रयणद्रव्यमवसिष्ट । आच्छादयति । तथा कृत्वा रजिष्ठामृजुतरामृतस्य यज्ञस्य नावमारुहत् । आरोहति । स द्रप्सः सोमरसः श्येनजूतः श्येनेनापहृतो रसोऽप्सु वसतीवरीषु ववृधे । वर्धते । ईं तमिमं पितुः पालकात्पितृस्थानीयाद्द्युलोकाज्जां जातमपत्यं सोममीमयं पिता पालको लोको दुहे । दोग्धि रसं । तथाध्वर्युरपि दुहे । दोग्धि । अथवोक्तलक्षणमेतं सोमं पिता पालकः स्वामी यजमानो दोग्धि फलं तथा दुहेऽध्वर्युरपि रसं दुहे । यद्वा दुह ईमिति पुनरुक्तिरादरार्थं ॥

॥ अथ तृतीया ॥

सिंहं नसंत मध्वो अयासं हरिमरुषं दिवो अस्य पतिं ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ॥ ३ ॥

सिंहं । नसंत । मध्वः । अयासं । हरिं । अरुषं । दिवः । अस्य । पतिं ।
शूरः । युत्ऽसु । प्रथमः । पृच्छते । गाः । अस्य । चक्षसा । परि । पाति । उक्षा ॥ ३ ॥

सिंहं शत्रूणां हिंसकं सिंहसदृशं मध्व उदकस्यायासं प्रेरकं हरिं हरितवर्णमस्य दिवो द्युलोकस्य पतिं पालकं सोमं नसंत । व्याप्नुवंति यजमानाः । युत्सु संग्रामेषु शूरः प्रथमो देवानां मध्ये मुख्यः सोमो गाः पणिभिरपहृताः पृच्छते मार्गज्ञान् ।

पणीन् हत्वा गा लब्धुं गोमार्गं पृच्छतीत्यर्थः। किंच। अस्य चक्षसा सामर्थ्येनोक्षा सेक्ता देवेंद्रः परि पाति विश्वं ॥

॥ अथ चतुर्थी ॥

मधुपृष्ठं घोरमयासमश्वं रथे युंजंत्युरुचक्र ऋष्वं।

स्वसार ईं जामयो मर्जयंति सनाभयो वाजिनमूर्जयंति ॥४॥

मधुऽपृष्ठं। घोरं। अयासं। अश्वं। रथे। युंजंति। उरुऽचक्रे। ऋष्वं।

स्वसारः। ईं। जामयः। मर्जयंति। सऽनाभयः। वाजिनं। ऊर्जयंति ॥४॥

मधुपृष्ठं मधुरपृष्ठभागं घोरं भयानकमयासं गंतारमृष्वं दर्शनीयमुक्तलक्षणाश्वस्थानीयं व्याप्तं सोममुरुचक्रे प्रभूतचक्रे रथे यथाश्वं रथे युंजंति रथिकास्तद्वत् प्रभूतचरणे रथे रंहणस्य साधने यज्ञाख्ये रथे युंजंति। योजयंत्यध्वर्य्वादयः। किंच। ईमेनं सोमं स्वसारः स्वयंसारिण्यः परस्परं स्वसृभूता वा जामयो बंधुभूता अंगुलयः। एकहस्तनिष्पन्नत्वात् स्वसृत्वं जामित्वं च। एवंभूता मार्जयंति। शोधयंति। तदेवाह। सनाभयः समानबंधना वाजिनं बलवंतं सोममूर्जयंति। बलिनं कुर्वंति ॥

॥ अथ पंचमी ॥

चतस्र ईं घृतदुहः सचंते समाने अंतर्धरुणे निषत्ताः।

ता ईमर्षंति नमसा पुनानास्ता ईं विश्वतः परि षंति पूर्वीः ॥५॥

चतस्रः। ईं। घृतऽदुहः। सचंते। समाने। अंतः। धरुणे। निऽसत्ताः।

ताः। ईं। अर्षंति। नमसा। पुनानाः। ताः। ईं। विश्वतः। परि। संति। पूर्वीः ॥५॥

चतस्रो घृतदुहो घृतदोग्ध्र्यो गाव ईमेनं सोमं सचंते। सेवंते। कीदृश्यस्ताः। समान एकस्मिन्धरुणे सर्वेषां धारकेऽंतरिक्षे निषत्ता निषण्णाः। ता घृतदुह ईमेनमर्षंति प्राप्नुवंति नमसान्नेन पुनानाः पूयमानाः सत्यः। ताः पूर्वीर्बह्व्यः प्रभूता गावो विश्वतः सर्वतः परि षंति। परिभवंति ॥

॥ अथ षष्ठी ॥

विष्टंभो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य।

असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इंद्रियाय ॥६॥

विष्टंभः । दिवः । धरुणः । पृथिव्याः । विश्वाः । उत । क्षितयः । हस्ते । अस्य ।
असत् । ते । उत्सः । गृणते । नियुत्वान् । मध्वः । अंशुः । पवते । इंद्रियाय ॥ ६ ॥

अयं सोमो दिवो द्युलोकस्य विष्टंभभूतः । यथा गृहस्य स्तंभस्तद्वत् । तथा पृथिव्या धरुणो धारकः । उतापि च विश्वाः सर्वाः क्षितयः प्रजा अस्य सोमस्य हस्ते भवंति । उत्सः । उत्सरंत्यस्मात्कामा इत्युत्सः सोमः । स गृणते स्तुवते ते तुभ्यं नियुत्वानश्ववानसत् । भवतु । स सोमो मध्वो मधु । कर्मणि षष्ठी । मधुररसोऽंशुः सोमः । अंशुः शमष्टमात्रो भवतीति यास्कः । नि० २.५. । इंद्रियाय पवते । पूयते । अभिषूयते ॥

॥ अथ सप्तमी ॥

वन्वन्नवातो अभि देववीतिमिंद्राय सोम वृत्रहा पवस्व ।
शग्धि महः पुरुश्चंद्रस्य रायः सुवीर्यस्य पतयः स्याम ॥ ७ ॥

वन्वन् । अवातः । अभि । देवऽवीतिं । इंद्राय । सोम । वृत्रऽहा । पवस्व ।
शग्धि । महः । पुरुऽचंद्रस्य । रायः । सुऽवीर्यस्य । पतयः । स्याम ॥ ७ ॥

॥ इति सप्तमस्य तृतीये पंचविंशो वर्गः ॥

प्र हिन्वान इति षडृचं पंचमं सूक्तं मैत्रावरुणेर्वसिष्ठस्यार्षं त्रिष्टुभं पवमानसोमदेवताकं । तथा चानुक्रांतं । प्र हिन्वानः षड्वसिष्ठ इति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्नयासीत् ।
इंद्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥ १ ॥

प्र । हिन्वानः । जनिता । रोदस्योः । रथः । न । वाजं । सनिषन् । अयासीत् ।
इंद्रं । गच्छन् । आयुधा । संऽशिशानः । विश्वा । वसु । हस्तयोः । आऽदधानः ॥ १ ॥

हिन्वानः प्रेर्यमाणोऽध्वर्य्वादिभिर्जनितोत्पादयिता रोदस्योर्द्यावापृथिव्योः । तयोर्जनयितृत्वं वृष्टिप्रदानहविःप्रापणाभ्यां । तादृक् सोमो वाजमन्नं सनिषन् दास्यन् प्रायासीत् प्रयच्छति । इंद्रं गच्छन् प्राप्नुवन् आयुधायुधानि संशिशानः सम्यक् तीक्ष्णीकुर्वन् इंद्रसाहाय्यगमनार्थं तीक्ष्णायुधः सन् विश्वा सर्वाणि वसु वसूनि हस्तयोरादधानोऽस्मभ्यं दानाय एवं कुर्वन् प्रायासीत् ॥

॥ अथ द्वितीया ॥

अभि त्रिपृष्ठं वृषणं वयोधामांगूषाणामवावशंत वाणीः ।
वना वसानो वरुणो न सिंधून्वि रत्नधा दयते वार्याणि ॥ २ ॥
अभि । त्रिऽपृष्ठं । वृषणं । वयःऽधां । आंगूषाणां । अवावशंत । वाणीः ।
वना । वसानः । वरुणः । न । सिंधून् । वि । रत्नऽधाः । दयते । वार्याणि ॥ २ ॥

त्रिपृष्ठं त्रीणि पृष्ठानि स्तोत्राणि द्रोणकलशादिस्थानानि वा सवनानि वा यस्य स तथोक्तः । तं वृषणं वर्षकं वयोधामन्नस्य दातारं सोममांगूषाणामाघोषवतां स्तोतॄणां वाणीर्वाचोऽभ्यवावशंत । शब्दयंते । वना वनान्युदकानि वसान आच्छादयन् वरुणो न वरुण इव सिंधूनाच्छादयति तद्वत् । रत्नधा रत्नानां दाता सोमो वार्याणि धनानि दयते । प्रयच्छति स्तोतृभ्यः ॥

॥ अथ तृतीया ॥

शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळ्हः साह्वान्पृतनासु शत्रून् ॥ ३ ॥
शूरऽग्रामः । सर्वऽवीरः । सहावान् । जेता । पवस्व । सनिता । धनानि ।
तिग्मऽआयुधः । क्षिप्रऽधन्वा । समत्ऽसु । अषाळ्हः । सह्वान् । पृतनासु । शत्रून् ॥ ३ ॥

हे सोम पवस्व त्वं । कीदृशस्त्वं । शूरग्रामः । शूराणां ग्रामः संघो यस्य सः । सर्ववीरः सर्वे वीरा यस्य स तथोक्तः । सहावान् सहनवान् जेता जयशीलः सनिता संभक्ता धनानि । तिग्मायुधः तीक्ष्णप्रहरणसाधनः । क्षिप्रधन्वा क्षिप्रसहनशीलधन्वा समत्सु संग्रामेष्वषाळ्होऽसोढः साह्वान् अभिभवन् । कुत्र । पृतनासु शत्रुसेनासु । कान् । शत्रून् ॥

॥ अथ चतुर्थी ॥

उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरंधी ।
अपः सिषासन्नुषसः स्व१र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥ ४ ॥
उरुऽगव्यूतिः । अभयानि । कृण्वन् । समीचीने इति सम्ऽईचीने । आ । पवस्व । पुरंधी इति पुरंऽधी ।
अपः । सिसासन् । उषसः । स्वः । गाः । सं । चिक्रदः । महः । अस्मभ्यं । वाजान् ॥ ४ ॥

हे सोम उरुगव्यूतिर्विस्तीर्णमार्गस्त्वमभयानि स्तोतृभ्यः कृण्वन् कुर्वन् पुरंधी। इदं द्यावापृथिव्योर्नाम। ते समीचीने संगते कुर्वन् आ पवस्व। आ क्षर। अप उषसः स्वरादित्यं गा रश्मींश्च सिषासन् पुष्ट्यर्थं संभक्तुमिच्छन् सं चिक्रदः। संक्रंदसे। महो महतो महांति वाजानन्नान्यस्मभ्यं दातुमिति शेषः ॥

॥ अथ पंचमी ॥

मत्सि सोम वरुणं मत्सि मित्रं मत्सींद्रमिंदो पवमान विष्णुं।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिंद्रमिंदो मदाय ॥५॥
मत्सि। सोम। वरुणं। मत्सि। मित्रं। मत्सि। इंद्रं। इंदो इति। पवमान। विष्णुं।
मत्सि। शर्धः। मारुतं। मत्सि। देवान्। मत्सि। महां। इंद्रं। इंदो इति। मदाय ॥५॥

हे पवमान पूयमानेंदो सोम त्वं वरुणादीन् मत्सि तर्पय तेषां मदाय। इंद्रस्य प्राधान्याद्विरभिधानं ॥

॥ अथ षष्ठी ॥

एवा राजेव क्रतुमाँ अमेन विश्वा घनिघ्नद्दुरिता पवस्व।
इंदो सूक्ताय वचसे वयो धा यूयं पात स्वस्तिभिः सदा नः ॥६॥
एव। राजाऽइव। क्रतुऽमान्। अमेन। विश्वा। घनिघ्नत्। दुःऽइता। पवस्व।
इंदो इति। सुऽउक्ताय। वचसे। वयः। धाः। यूयं। पात। स्वस्तिऽभिः। सदा। नः ॥६॥

अनया स्तुतिमुपसंहरन् फलमाशास्ते। हे सोम एवैवं स्तुत इति शेषः। क्रतुमांस्त्वं राजेवामेन बलेन विश्वा सर्वाणि दुरिता दुरितानि घनिघ्नद्विनाशयन् पवस्व। हे इंदो दीप्त सोम सूक्ताय शोभनमुदिताय वचसेऽस्माकं स्तोत्राय तद्वचो विमृश्यार्थवदवगत्य वयो धाः। अन्नं धेहि। अन्नलाभस्य स्तुतिनिमित्तकत्वात्तस्य स्तुतिवचसः प्राधान्येनोक्तिः। शिष्टं सिद्धं ॥

॥ इति सप्तमस्य तृतीये षड्विंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके तृतीयोऽध्यायः समाप्तः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
तृतीयं श्रुतितत्त्वज्ञः सप्तमस्याष्टकस्य सः।
व्याख्याय सायणामात्यश्चतुर्थं व्याचिकीर्षति ॥

तत्रासर्जीति षडृचमष्टमं सूक्तं मारीचस्य कश्यपस्यार्षं त्रैष्टुभं पवमानसोमदेवताकं। असर्जि कश्यप इत्यनुक्रांतं। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी।
दश स्वसारो अधि सानो अव्येऽजंति वह्निं सदनान्यच्छ ॥१॥

असर्जि। वक्वा। रथ्ये। यथा। आजौ। धिया। मनोता। प्रथमः। मनीषी।
दश। स्वसारः। अधि। सानौ। अव्ये। अजंति। वह्निं। सदनानि। अच्छ ॥१॥

वक्वा शब्दायमानः। वच परिभाषणे। वनिप्। एतादृशः पवमानः सोम आजौ। अजंति कर्मार्थमृत्विज इत्याजिर्यज्ञः। तस्मिन्धिया कर्मणा स्तोत्रेण वा साकमसर्जि। सृज्यते पात्रेष्विति। तत्र दृष्टांतः। रथ्ये यथा रथार्हे आजौ। संग्रामनामैतत् अजंति प्रक्षिपंत्यायुधान्यत्रेति। तस्मिन्नश्वो यथा धियांगुल्या सृज्यते तद्वत्। कीदृशः। मनोता। यस्मिन्देवानां मनांस्योतानि प्रोतानि सः। तथा च ब्राह्मणं तस्मिन् हि तेषां मनांस्योतानीति। प्रथमः। सर्वेषां देवानां मुख्यः। मनीषी। मनस ईषा मनीषा स्तुतिः। तद्वान्। दश स्वसारो दशसंख्याका अंगुलयः सदनानि यज्ञगृहाण्यच्छाभिमुखीकृत्य वह्निं वोढारं सोमं सानौ समुच्छ्रिते। अधिः सप्तम्यर्थानुवादकः। अव्येऽविभवेऽविवालेन कृते पवित्रेऽजंति। प्रेरयंति। अज गतिक्षेपणयोः ॥

॥ अथ द्वितीया ॥

वीती जनस्य दिव्यस्य कव्यैरधि सुवानो नहुष्येभिरिंदुः।
प्र यो नृभिरमृतो मर्त्येभिर्मर्मृजानोऽविभिर्गोभिरद्भिः ॥२॥

वीती। जनस्य। दिव्यस्य। कव्यैः। अधि। सुवानः। नहुष्येभिः। इंदुः।
प्र। यः। नृऽभिः। अमृतः। मर्त्येभिः। मर्मृजानः। अविऽभिः। गोऽभिः। अत्ऽभिः ॥२॥

कव्यैः साधुभिः स्तोतृभिर्नहुष्येभिर्मनुष्यैः सुवानोऽभिषूयमाण इंदुः सोमो दिव्यस्य दिवि भवस्य जनस्य देवगणस्य वीती । सुपां सुलुगिति चतुर्थ्याः पूर्वसवर्णदीर्घः । सोमभक्षणार्थं यज्ञमधिगच्छति । किंचामृतो मरणधर्मरहितो यः सोमो नृभिः कर्मनेतृभिर्मर्त्येभिर्मर्त्यैरविभिरविमयैः पवित्रैस्तथा गोभिरानडुहैरधिषवणचर्मभिः । यद्वा गोविकारैः क्षीरादिभिरद्भिर्वसतीवर्यादिभिरुदकैश्च मर्मृजानो भृशं शोध्यमानः सन् यज्ञं प्रति गच्छति । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

॥ अथ तृतीया ॥

वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो गोः ।

सहस्रमृक्वा पथिभिर्वचोविदध्वस्मभिः सूरो अण्वं वि याति ॥३॥

वृषा । वृष्णे । रोरुवत् । अंशुः । अस्मै । पवमानः । रुशत् । ईर्ते । पयः । गोः ।

सहस्रं । ऋक्वा । पथिऽभिः । वचःऽवित् । अध्वस्मऽभिः । सूरः । अण्वं । वि । याति ॥३॥

वृषा कामानां वर्षको वृषेवाचरन्वा रोरुवद्भृशं शब्दायमानोऽंशुः सोमः पवमानः पूयमानः सन् अस्मै वृष्णे वर्षकायेंद्राय तदर्थं रुशत् । रोचतेरिदं रूपं । आरोचमानं श्वेतं गोः पय आश्रयणद्रव्यमीर्ते । गच्छति । ईर गतौ । आदादिकः । किंच ऋक्वा । छंदसीवनिपावितिमत्वर्थीयो वनिप् । स्तोत्रवान् अत एव वचोवित् स्तुतीनां ज्ञाता सूरः सुवीर्यः सर्वेषामग्निष्टोमादिकर्मणि प्रेरकः सोमोऽध्वस्मभिर्ध्वंसनवर्जितैर्हिंसारहितैः सहस्रं पथिभिर्बहुभिर्मार्गैरण्वं सूक्ष्मच्छिद्रं पवित्रं वि याति । अतीत्य द्रोणकलशं गच्छति ॥

॥ अथ चतुर्थी ॥

रुजा दळ्हा चिद्रक्षसः सदांसि पुनान इंद ऊर्णुहि वि वाजान् ।

वृश्चोपरिष्टात्तुजता वधेन ये अंति दूरादुपनायमेषां ॥४॥

रुज । दळ्हा । चित् । रक्षसः । सदांसि । पुनानः । इंदो इति । ऊर्णुहि । वि । वाजान् ।

वृश्च । उपरिष्टात् । तुजता । वधेन । ये । अंति । दूरात् । उपऽनायं । एषां ॥४॥

हे सोम दळ्हा चिद्दृढान्यपि परैरगंतव्यत्वेन रक्षसो राक्षसस्य सदांसि स्थानानि पुराणि रुज । विनाशय । रुजो भंगे । तौदादिकः । किंच हे इंदो पवमानः पुनानः पवित्रादिभिः पूयमानस्त्वं वाजान् तस्यान्नानि तस्य बलानि वोर्णुहि । आच्छादय ।

आहरेत्यर्थः ॥ तथा ये राक्षसा उपरिष्टादूर्ध्वदेशादागच्छंति ये वांत्यंतिके समीप आगच्छंति। ये च दूराद्दूरदेशाद्वागच्छंति तेषां राक्षसानामुपनायमुपनेतारं स्वामिनं तुजता। तुजतिर्हिंसाकर्मा। हिंसकेन वधेन हननसाधनेनायुधेन त्वं वृश्च। छिंधि। ओव्रश्चू छेदने। तौदादिकः ॥

॥ अथ पंचमी ॥

स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः।

ये दुःषहासो वनुषा बृहंतस्तांस्ते अश्याम पुरुकृत्पुरुक्षो ॥५॥

सः। प्रत्नऽवत्। नव्यसे। विश्वऽवार। सुऽउक्ताय। पथः। कृणुहि। प्राचः।

ये। दुःऽसहासः। वनुषा। बृहंतः। तान्। ते। अश्याम। पुरुऽकृत्। पुरुक्षो इति पुरुऽक्षो ॥५॥

हे विश्ववार विश्वैः सर्वैर्वरणीय हे सोम स तादृशस्त्वं प्रत्नवत् पुराण इव स्थितस्त्वं नव्यसे नवीयसे नवतराय। नवशब्दादीयसुनीकारलोपश्छांदसः। तस्मै सूक्ताय शोभनस्तुतिकाय मह्यं पथो मार्गान् प्राचः प्राचीनान् कृणुहि। कुरु। सर्वत्र गमनं प्रयच्छेत्यर्थः ॥ कृवि हिंसाकरणयोः। धिन्विकृण्व्योरच्चेत्युप्रत्ययः ॥ हे पुरुकृत् बहुकर्मन् हे पुरुक्षो। टुक्षु शब्दे। मितद्र्वादित्वाड्डुप्रत्ययः। बहुविधं शब्दायमान हे सोम दुःसहासो रक्षोभिः सोढुमशक्या अत एव वनुषा। वनतिर्हिंसार्थः। हिंसया युक्ता बृहंतो महांतो ये त्वदीया अंशाः संति तान् ते तव स्वभूतानंशान्वयं यज्ञेऽश्याम। प्राप्नुयाम ॥

॥ अथ षष्ठी ॥

एवा पुनानो अपः स्व१र्गा अस्मभ्यं तोका तनयानि भूरि।

शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि ॥६॥

एव। पुनानः। अपः। स्वः। गाः। अस्मभ्यं। तोका। तनयानि। भूरि।

शं। नः। क्षेत्रं। उरु। ज्योतींषि। सोम। ज्योक्। नः। सूर्यं। दृशये। रिरीहि ॥६॥

हे सोम एवैवं पुनानः पूयमानः पवित्रादिभिरस्मभ्यं रिरीहि। प्रापय। प्रयच्छ। किं तत्। अपः। अप इत्यंतरिक्षनाम। आप्नोति सर्वमपि। अंतरिक्षं स्वः स्वर्गं द्युलोकं गाः। सर्वैर्गम्यतेऽत्रेति गावः पृथिव्यः। ताः पृथिवीश्च भूरि। सुपां सुलुगिति द्वितीयाया लुक्। बहून् तोकान् तनयानि। तन्वंति कुलमिति

तनयाः पौत्राः। तांश्च तथा नोऽस्मभ्यं क्षेत्रं शं सुखकरं कुरु। हे सोम ज्योतींषि नक्षत्राण्युरूरूण्यंतरिक्षे विस्तीर्णानि कुरु। तथा नोऽस्मभ्यं सूर्यमादित्यं ज्योक्। चिरनामैतत्। चिरकालं दृशये द्रष्टुं कुरु ॥

॥ इति सप्तमस्य चतुर्थे प्रथमो वर्गः ॥

परि सुवान इति षडृचं सप्तमं सूक्तं मारीचस्य कश्यपस्यार्षं त्रैष्टुभं पवमानसोमदेवताकं। परि सुवान इत्यनुक्रांतं। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

परि सुवानो हरिरंशुः पवित्रे रथो न सर्जि सनये हियानः ।
आपच्छ्लोकमिंद्रियं पूयमानः प्रति देवाँ अजुषत प्रयोभिः ॥१॥
परि। सुवानः। हरिः। अंशुः। पवित्रे। रथः। न। सर्जि। सनये। हियानः।
आपत्। श्लोकं। इंद्रियं। पूयमानः। प्रति। देवान्। अजुषत। प्रयःऽभिः ॥१॥

सुवानोऽभिषूयमाणो हियान ऋत्विग्भिः प्रेर्यमाणो हरिर्हरितवर्णोऽंशुः सोमः पवित्रेऽविवालेन कृते दशापवित्रे परि सर्जि। परिसृज्यते। किमर्थं। सनये धनलाभाय देवानां संभजनाय वा। तत्र दृष्टांतः। रथो न रथो यथा युद्धे शत्रुवधार्थं शत्रुधनहरणार्थं वा सृज्यते तद्वत्। किंच। पूयमानः पवित्रेण सोऽयं सोम इंद्रियं इंद्रलिंगमिंद्रस्य पर्याप्तं वा श्लोकं स्तोत्रमापत्। आप्नोति। आप्लृ व्याप्तौ। लेट्यडागमः। तथा स सोमः प्रयोभिः प्रीणयितृभिर्हवीरूपैरन्नैर्देवान्प्रत्यजुषत। प्रतिसेवते। जुषी प्रीतिसेवनयोः ॥

॥ अथ द्वितीया ॥

अच्छा नृचक्षा असरत्पवित्रे नाम दधानः कविरस्य योनौ ।
सीदन्होतेव सदने चमूषूपेमग्मन्नृषयः सप्त विप्राः ॥२॥
अच्छ। नृऽचक्षाः। असरत्। पवित्रे। नाम। दधानः। कविः। अस्य। योनौ।
सीदन्। होताऽइव। सदने। चमूषु। उप। ईं। अग्मन्। ऋषयः। सप्त। विप्राः ॥२॥

नृचक्षा नृणां द्रष्टा कविः क्रांतप्रज्ञः सोमो नाम वसतीवर्याख्यमुदकं दधानो धारयन् अस्यैतादृशस्यात्मनो योनौ स्थाने पवित्रेऽच्छासरत्। अभितः सरति।

ततः सदने । सीदंत्यत्रेति सदनो यज्ञः । तस्मिन् होतेव होता यथा देवान् स्तोतुमुपविशति तद्वद्देवानागंतुमुपविशन् सोमश्चमूषु । चमंति चम्वो ग्रहादयः । तेष्वभिसरति । अनंतरं सप्तसंख्याका विप्रा मेधाविनः । भरद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इत्येत ऋषयः । ईमेनं सोममुपाग्मन् । स्तोत्रैरुपगच्छंति ॥

॥ अथ तृतीया ॥

प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सद एति नित्यं ।

भुवद्विश्वेषु काव्येषु रंतानु जनान्यतते पंच धीरः ॥३॥

प्र । सुऽमेधाः । गातुऽवित् । विश्वऽदेवः । सोमः । पुनानः । सदः । एति । नित्यं ।

भुवत् । विश्वेषु । काव्येषु । रंता । अनु । जनान् । यतते । पंच । धीरः ॥३॥

सुमेधाः । नित्यमसिच् प्रजामेधयोरित्यसिच्समासांतः । शोभनप्रज्ञो गातुविन्मार्गस्य वेत्ता । यद्वा गातवः स्तोतारः । तेषां धनस्य लंभयिता विश्वदेवः सर्वदेवोपगतः । यद्वा । देवो देवनं दीप्तिः । व्यापकदीप्तियुक्तः । एतादृशः सोमः पुनानः पूयमानः सन् नित्यमविनश्वरं सदः स्थानं द्रोणकलशं प्रैति । प्रगच्छति । ततो विश्वेषु सर्वेषु काव्येषु कविकर्मसु स्तोत्रेषु रंता भुवत् । रमणशीलो भवति । रमेस्ताच्छीलिकस्तृन् । तथा धीरः प्राज्ञः सोऽयं पंच जनान् निषादपंचमांश्चतुरो वर्णाननुयतते । अनुगंतुं प्रयत्नं करोति । अनुगच्छति यावत् ॥

॥ अथ चतुर्थी ॥

तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः ।

दश स्वधाभिरधि सानो अव्ये मृजंति त्वा नद्यः सप्त यह्वीः ॥४॥

तव । त्ये । सोम । पवमान । निण्ये । विश्वे । देवाः । त्रयः । एकादशासः ।

दश । स्वधाभिः । अधि । सानौ । अव्ये । मृजंति । त्वा । नद्यः । सप्त । यह्वीः ॥४॥

हे पवमान पूयमान हे सोम तव स्वभूताः त्ये ते प्रसिद्धास्त्रय एकादशासः । पूरणार्थे डट्प्रत्ययः । त्रयस्त्रिंशत्संख्याका विश्वे सर्वे देवा निण्ये । अंतर्हितनामैतत् । अंतर्हिते स्थाने द्युलोके वर्तंते । तादृशं त्वां दशसंख्याका अंगुलयोऽधि सानावधिकं समुच्छ्रितेऽव्येऽविमये पवित्रे स्वधाभिरुदकैर्मृजंति । शोधयंति । किंच ।

यह्वीः। वा छंदसीति पूर्वसवर्णदीर्घः। यह्व्यो महत्यः सप्तसंख्याका गंगाद्या नद्यस्त्वा त्वां मृजंति। वसतीवर्यात्मकैरेकधनात्मकैश्च स्वीयैरुदकैस्त्वां मार्जयंतीत्यर्थः ॥

॥ अथ पंचमी ॥

तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसंत।

ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकं ॥५॥

तत्। नु। सत्यं। पवमानस्य। अस्तु। यत्र। विश्वे। कारवः। संऽनसंत।

ज्योतिः। यत्। अह्ने। अकृणोत्। ऊं इति। लोकं। प्र। आवत्। मनुं। दस्यवे। करिति कः। अभीकं ॥५॥

सत्यं सत्यभूतं तत्प्रसिद्धस्य पवमानस्य सोमस्य स्थानं नु क्षिप्रमस्माकमस्तु। यत्र यस्मिन् स्थाने विश्वे सर्वे कारवः स्तोतारः संनसंत स्तोतुं संगच्छंते तत् स्थानमस्तु। अस्य सोमस्य यज्ज्योतिरह्ने दिवसाय लोकमालोकं प्रकाशमकृणोत् करोति। उ इत्यवधारणे। तज्ज्योतिर्मनुमेतन्नामानं राजर्षिं प्रावत् प्रकर्षेणारक्षत्। तथा सोमः स्वीयं तेजो दस्यवे सर्वस्योपक्षपयित्रेऽसुरायाभीकमभिगमनशीलं कः। अकार्षीत्। करोतेर्लुङि मंत्रे घसेति च्लेर्लुक् ॥

॥ अथ षष्ठी ॥

परि सद्मेव पशुमांति होता राजा न सत्यः समितीरियानः।

सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो वनेषु ॥६॥

परि। सद्मऽइव। पशुऽमंति। होता। राजा। न। सत्यः। संऽइतीः। इयानः।

सोमः। पुनानः। कलशान्। अयासीत्। सीदन्। मृगः। न। महिषः। वनेषु ॥६॥

होता देवानामाह्वातर्त्विक् पशुमंति पशुमतः सद्मेव यज्ञगृहान्यथोपगच्छति। किंच। राजा न यथा राजा सत्यः सत्यकर्मा सन् समितीः। संग्रामनामैतत्। सम्यक् प्राप्यते योद्धृभिरत्रेति। तान्संग्रामानियानो गच्छन् भवति तथा पुनानः सोमो वनेषु वननीयेषु वसतीवर्याख्येषूदकेषु सीदन् मृगो न महिषो महिषाख्यो मृग इवोदकेषु तिष्ठन् कलशान् द्रोणाभिधानानयासीत् परियाति। यद्वा। महिषो महान्पूज्यो वा सोमः कलशान्परिगच्छतीति ॥

॥ इति सप्तमस्य चतुर्थे द्वितीयो वर्गः ॥

साकमुक्ष इति पंचर्चमष्टमं सूक्तं। गौतमस्य नोधस आर्षं। पूर्ववच्छंदोदेवते। तथा चानुक्रम्यते। साकमुक्षः पंच नोधा इति। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

साकमुक्षो मर्जयंत स्वसारो दश धीरस्य धीतयो धनुत्रीः।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥१॥

साकंऽउक्षः। मर्जयंत। स्वसारः। दश। धीरस्य। धीतयः। धनुत्रीः।
हरिः। परि। अद्रवत्। जाः। सूर्यस्य। द्रोणं। ननक्षे। अत्यः। न। वाजी ॥१॥

साकमुक्षः सह युगपत्सिंचंत्यः। उक्ष सेचने। क्विपि रूपं। तादृश्यः स्वसारः कर्मकरणार्थमितस्ततः सुष्ठु गच्छंत्योऽंगुलयो मर्जयंत। सोमं शोधयंति। मृजू शौचालंकारयोः। तथा दश दशसंख्याका धीतयः। अंगुलिनामैतत्। अंगुलयो धीरस्य समर्थस्य प्राज्ञस्य वा देवैर्ध्यातव्यस्य काम्यमानस्य वा सोमस्य धनुत्रीः प्रेरयित्र्यो भवंति। ततो हरिर्हरितवर्णः सोमः सूर्यस्य जाः प्रादुर्भूता जाया दिशस्ताः पर्यद्रवत्। परितो गच्छति। सूर्यतेजसा ह्याविर्भवंतीति दिशां तस्य जात्वं। अत्योऽतनशीलो वाजी नाश्व इव स्थितः सोमो द्रोणं कलशं ननक्षे। व्याप्नोति। नक्षतिर्व्याप्तिकर्मा॥

॥ अथ द्वितीया ॥

सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः।
मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः ॥२॥

सं। मातृऽभिः। न। शिशुः। वावशानः। वृषा। दधन्वे। पुरुऽवारः। अत्ऽभिः।
मर्यः। न। योषां। अभि। निःऽकृतं। यन्। सं। गच्छते। कलशे। उस्रियाभिः ॥२॥

वावशानो देवान्कामयमानो वृषा कामानां वर्षकोऽत एव पुरुवारो बहुभिर्वरणीयः सोमोऽद्भिर्मातृभूताभिर्वसतीवरीभिः सं दधन्वे। संधार्यते। तत्र दृष्टांतः। मातृभिर्न शिशुः। कामयमानः पुत्रो यथा मातृभिः पयःप्रदानेन संधार्यते॥ धविर्गत्यर्थः। कर्मणि लिटि रूपं॥ मर्यो न मनुष्यो यथा योषां युवतिमभिगच्छति तद्वन्निष्कृतं संस्कृतं स्वस्थानमभियन् अभिगच्छन् कलशे द्रोणाभिधान उस्रियाभिरद्भिर्गोविकारैः क्षीरादिभिर्वा संगच्छते॥ गमेरकर्मकात् समो गम्यृछीत्यात्मनेपदं॥

॥ अथ तृतीया ॥

उत प्र पिप्य ऊधरघ्न्याया इंदुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्वभि श्रीणंति वसुभिर्न निक्तैः ॥३॥

उत । प्र । पिप्ये । ऊधः । अघ्न्यायाः । इंदुः । धाराभिः । सचते । सुऽमेधाः ।
मूर्धानं । गावः । पयसा । चमूषु । अभि । श्रीणंति । वसुऽभिः । न । निक्तैः ॥३॥

उतापि चाघ्न्यायाः । अघ्न्येति गोनाम । अहंतव्याया गोरूधः पयःस्थानं सोमः प्र पिप्ये । ओषध्यादिषु सोमः प्रविश्य प्रकर्षेणाप्याययति । प्यायतेर्लिटि लिड्यङोश्चेति पीभावः । सुमेधाः शोभनप्रज्ञः सोऽयमिंदुः सोमो धाराभिः सचते । समवैति । संगच्छते । ततो गावश्चमूषु । चमंति भक्षयंत्यत्र सोममिति चम्वो ग्रहादयः । तेषु स्थितं मूर्धानं समुच्छ्रितमिमं सोमं पयसा स्वेनाभिश्रीणंति । अभित आच्छादयंति । तत्र दृष्टांतः । निक्तैः प्रक्षालितैर्वसुभिर्न वस्त्रैर्यथाच्छादयंति तद्वत् ॥

॥ अथ चतुर्थी ॥

स नो देवेभिः पवमान रदेंदो रयिमश्विनं वावशानः ।
रथिरायतामुशती पुरंधिरस्मद्र्य१गा दावने वसूनां ॥४॥

सः । नः । देवेभिः । पवमान । रद । इंदो इति । रयिं । अश्विनं । वावशानः ।
रथिरऽयतां । उशती । पुरंऽधिः । अस्मद्र्यक् । आ । दावने । वसूनां ॥४॥

हे पवमान पूयमान सोम स तादृशस्त्वं नोऽस्मभ्यं देवेभिर्देवैः सह रद । प्रयच्छ । किं तत् उच्यते । हे इंदो पात्रेषु क्षरन् सोम वावशानः कामयमानः सन् अश्विनमश्ववंतं रयिं धनं प्रयच्छेति । किंच रथिरायतां । रथो येषामस्तीति रथिराः । मेधारथाभ्यामितीरच्प्रत्ययः । तद्वदाचरतस्तानिच्छतो वा पुरुषानुशती कामयमाना पुरंधिस्त्वदीया बहुविधा धीर्वसूनां धनानां दावने दानायास्मद्र्यक् अस्मदभिमुख्यागच्छतु । यद्वा रथिरायतामिति धनानां विशेषणं । बलवतां धनानामिति ॥ अस्मद्र्यक् । विष्वग्देवयोश्च टेरद्र्यंचतावप्रत्यय इत्यद्र्यादेशः । अद्रिसध्र्योरंतोदात्तत्वनिपातनादुदात्तस्वरितयोर्यण इति स्वरितः ॥

॥ अथ पंचमी ॥

नू नो रयिमुप मास्व नृवंतं पुनानो वाताप्यं विश्वश्चंद्रं ।
प्र वंदितुरिंदो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात् ॥५॥

नु । नः । रयिं । उप । मास्व । नृऽवंतं । पुनानः । वाताप्यं । विश्वऽचंद्रं ।
प्र । वंदितुः । इंदो इति । तारि । आयुः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥५॥

हे सोम पुनानः पूयमानस्त्वं नोऽस्मभ्यं नू क्षिप्रं नृवंतं मनुष्यैर्युक्तं । छांदसं मतुपो वत्वं । तादृशं रयिं धनमुप मास्व । उपनिर्मिमीष्व । उपकुर्वित्यर्थः । किंच विश्वचंद्रं सर्वेषामाह्लादकं वाताप्यं । उदकनामैतत् । उदकं च कुरु । तथा हे इंदो सोम वंदितुस्तव स्तोतुरायुर्जीवनं प्र तारि । त्वया वर्धितमस्तु । सोऽयं सोमो धियावसुर्बुद्ध्या कर्मणा वा प्राप्तधनः प्रातः काले वा सवने वा मक्षु शीघ्रमस्मदीयं यज्ञं प्रति जगम्यात् । आगच्छेत् । गमेर्लिङि बहुलं छंदसीति शपः श्लुः ॥

॥ इति सप्तमस्य चतुर्थे तृतीयो वर्गः ॥

अधि यदिति पंचर्चं नवमं सूक्तं । आंगिरसस्य कण्वस्यार्षं । तथानुक्रम्यते । अधि यत्कण्व इति । पूर्ववच्छंदोदेवते । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

अधि यदस्मिन्वाजिनीव शुभः स्पर्धंते धियः सूर्ये न विशः ।
अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ॥१॥

अधि । यत् । अस्मिन् । वाजिनिऽइव । शुभः । स्पर्धंते । धियः । सूर्ये । न । विशः ।
अपः । वृणानः । पवते । कविऽयन् । व्रजं । न । पशुऽवर्धनाय । मन्म ॥१॥

यद्यदास्मिन्सोमे वाजिनीव शुभोऽश्वे यथा वस्त्रप्रभृत्यलंकारा भवंति । यदा वास्मिन्सोमे सूर्ये न यथा सूर्ये विशो रश्मय उदिता भवंति । तदा धियोऽंगुलयोऽधि स्पर्धंते । अहं पुरस्ताच्छोधयाम्यहं पुरः शोधयामीत्यहमहमिकयोपतिष्ठंति । ततोऽयं सोमोऽपो वसतीवरीर्वृणान आच्छादयन् पवते । पात्रेषु क्षरति । कलशानधिगच्छति । कीदृशः । कवीयन् कविरिवाचरन् । यद्वा । कवयः स्तोतारः । तानिच्छन् । तत्र दृष्टांतः ॥ व्रजं न मन्म मननीयं गवां गोष्ठं

पशुवर्धनाय पशूनां वर्धनाय गोपालः परिगच्छति । तथा देवानां प्रीणनाय पात्राणि प्रति पवत इति ॥

॥ अथ द्वितीया ॥

द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्रथंत ।
धियः पिन्वानाः स्वसरे न गाव ऋतायंतीरभि वावश्र इंदुं ॥२॥

द्विता । विऽऊर्ण्वन् । अमृतस्य । धाम । स्वःऽविदे । भुवनानि । प्रथंत ।
धियः । पिन्वानाः । स्वसरे । न । गावः । ऋतऽयंतीः । अभि । वावश्रे । इंदुं ॥२॥

अमृतस्योदकस्य धाम धारकं स्थानमंतरिक्षं सोमो द्विता द्विधा व्यूर्ण्वन् उभयतः स्वतेजसाच्छादयन् मध्येन गच्छति । ततः स्वर्विदे सर्वज्ञाय तस्मै सोमाय भुवनानि प्रथंत । विस्तीर्णानि भवंति । तस्य रश्मीनां संचरणार्थं प्रथंत इत्यर्थः । अथ पिन्वानाः प्रीणयित्र्यो धियः स्तुतिलक्षणवाच ऋतायंतीर्यज्ञमिच्छंत्यः सत्यस्तमिममिंदुं सोममभिलक्ष्य स्वसरे यागाहनि वावश्रे । शब्दायंते । यद्वा । सोमं कामयंते । तत्र दृष्टांतः । गावो न । यथा पिन्वमानाः पयः क्षरंत्यो गावः स्वसरे । सुष्ठ्वस्यंते प्रेर्यंते गावोऽत्रेति स्वसरो गोष्ठं । तस्मिन्नच्छाभिलक्ष्य शब्दं कुर्वंति । तद्वत् ॥

॥ अथ तृतीया ॥

परि यत्कविः काव्या भरते शूरो न रथो भुवनानि विश्वा ।
देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः ॥३॥

परि । यत् । कविः । काव्या । भरते । शूरः । न । रथः । भुवनानि । विश्वा ।
देवेषु । यशः । मर्ताय । भूषन् । दक्षाय । रायः । पुरुऽभूषु । नव्यः ॥३॥

कविः क्रांतप्रज्ञः सोमः काव्या काव्यानि कवेः कर्माणि स्तोत्राणि यद्यदा परि भरते परितो बिभर्ति । परिगच्छतीति यावत् । कथमिव । शूरो न । यथा शूरः शत्रूणां बाधको रथस्तदीयो विश्वा भुवनानि संग्रामिकानि भूतानि परियाति तद्वत् । तदानीं देवेषु स्थितं यशो व्यापकं धनं मर्ताय मनुष्याय स्तोत्रे भूषन् । भवतेरंतर्भावितण्यर्थात्सनि रूपं । भावयितुमिच्छन् सोमो राय आत्मना दत्तस्य धनस्य दक्षाय वृद्ध्यर्थं पुरुभूषु बहुषु यज्ञभवनेषु नव्यः स्तोतव्यो भवति । णु स्तुतौ । अचो यत् ॥

॥ अथ चतुर्थी ॥

श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति ।
श्रियं वसाना अमृतत्वमायन्भवंति सत्या समिथा मितद्रौ ॥४॥
श्रिये । जातः । श्रिये । आ । निः । इयाय । श्रियं । वयः । जरितृऽभ्यः । दधाति ।
श्रियं । वसानाः । अमृतऽत्वं । आयन् । भवंति । सत्या । संऽइथा । मितऽद्रौ ॥४॥

स सोमः श्रिये जातः संपदर्थं प्रादुर्भूतो भवति । तदेवाह । श्रिये श्र्यर्थमेवा निरियाय । अंशुभ्य आभिमुख्येन निर्गच्छति । निर्गतश्च स सोमो जरितृभ्यः स्तोतृभ्यः श्रियं वयोऽन्नं जीवनं वा दधाति । विदधाति । प्रयच्छति । तेन दत्तां श्रियं वसाना आच्छादयंतः स्तोतारोऽमृतत्वं देवत्वममरणं वायन् । प्राप्नुवन् । तस्मिन्मितद्रौ मितगमने सोमे समिथा ॥ युद्धनामैतत् । सम्यक् प्राप्यतेऽत्रेति । समीणः । उ० २.११. । इत्येतैः सम्पूर्वस्य थक्प्रत्ययः ॥ तानि युद्धानि सत्या सत्यानि यथार्थानि भवंति न तु वितथानि । तेन सोमेन पराजितानि भवंतीत्यर्थः ॥

॥ अथ पंचमी ॥

इषमूर्जमभ्य१र्षाश्वं गामुरु ज्योतिः कृणुहि मत्सि देवान् ।
विश्वानि हि सुषहा तानि तुभ्यं पवमान बाधसे सोम शत्रून् ॥५॥
इषं । ऊर्जं । अभि । अर्ष । अश्वं । गां । उरु । ज्योतिः । कृणुहि । मत्सि । देवान् ।
विश्वानि । हि । सुऽसहा । तानि । तुभ्यं । पवमान । बाधसे । सोम । शत्रून् ॥५॥

हे सोम इषमन्नमूर्जमन्नरसं चास्मभ्यमभ्यर्ष । अभिगमय । किंच । अश्वं वाहनं गां पयःप्रदानेन यज्ञस्य साधनभूतां गां च । तथोरु महज्ज्योतिः सूर्याख्यं कृणुहि । जगदालोकनार्थं कुरु । किंच । देवानिंद्रादीन् मत्सि । सोमेन तर्पय ॥ मदेर्लेटि बहुलं छंदसीति विकरणस्य लुक् । वाक्यभेदादनिघातः ॥ अपि च । हे सोम तुभ्यं विश्वानि सर्वाणि रक्षांसि सुषहा सुसहान्यनायासेनैवाभिभवितुं शक्यानि भवंति । हिरवधारणे । अत एव हे पवमान पूयमान हे सोम सर्वाञ्शत्रून्बाधसे । जहि ॥

॥ इति सप्तमस्य चतुर्थे चतुर्थो वर्गः ॥

कनिक्रंतीति पंचर्चं दशमं सूक्तं कण्वपुत्रस्य प्रस्कण्वस्यार्षं । तथानुक्रम्यते । कनिक्रंति प्रस्कण्व इति । पूर्ववच्छंदोदेवते । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

कनिक्रंति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः ॥१॥
कनिक्रंति । हरिः । आ । सृज्यमानः । सीदन् । वनस्य । जठरे । पुनानः ।
नृऽभिः । यतः । कृणुते । निःऽनिजं । गाः । अतः । मतीः । जनयत । स्वधाभिः ॥१॥

सृज्यमान आ समंताद्विसृज्यमानोऽभिषूयमाणो हरिर्हरितवर्णः सोमः कनिक्रंति । पुनः पुनः शब्दायते ॥ क्रंदतेर्यङ्लुकि तिपीडभावे दाधर्तिदर्धर्तीत्यादिना निपातनादभ्यासस्य निगागमः । अभ्यस्तस्वरः ॥ तथा पुनानः पूयमानो वनस्य वननीयस्य द्रोणकलशस्य जठरे सीदन्नुपविशन् शब्दायते । किंच । नृभिः कर्मनेतृभिर्ऋत्विग्भिर्यतः संयतः सोमो गा गोविकारान् क्षीरादीन्याच्छादयन् निर्णिजमात्मनो रूपं कृणुते । ग्रहादिषु करोति । अतोऽस्मै सोमाय मतीर्मननीयाः स्तुतीः स्वधाभिर्हविर्भिः सह जनयत । स्तोतारोऽजनयन् ॥ ऋस्यांतादेशभावश्छांदसः ॥ यद्वा । हे स्तोतारोऽस्मै सोमाय स्तुतीर्जनयत । उत्पादयत । कुरुतेति यावत् ॥

॥ अथ द्वितीया ॥

हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावं ।
देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे ॥२॥
हरिः । सृजानः । पथ्यां । ऋतस्य । इयर्ति । वाचं । अरिताऽइव । नावं ।
देवः । देवानां । गुह्यानि । नाम । आविः । कृणोति । बर्हिषि । प्रऽवाचे ॥२॥

सृजानः सृज्यमानो हरिर्हरितवर्णः सोम ऋतस्य सत्यभूतस्य पथ्यां पथि भवां वाचं दैवीमियर्ति । प्रेरयति । तत्र दृष्टांतः । अरितेव जनान्तीरं प्रापयन् नाविको नावं यथा प्रेरयति तद्वत् ॥ ऋ गतौ जौहोत्यादिकः । अर्तिपिपर्त्योरित्यभ्यासस्येत्वं ॥ ततो देवो दीप्यमानः सोमो देवानामिंद्रादीनां गुह्यान्यंतर्हितानि नाम नामानि शरीराणि प्रवाचे प्रकर्षेण वाचयित्रे स्तोत्रे बर्हिषि यज्ञ आविष्कृणोति । स्तोतुमाविःकरोति ॥

॥ अथ तृतीया ॥

अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यंतीरुप च यंति सं चा च विशंत्युशतीरुशंतं ॥३॥

अपांऽइव। इत्। ऊर्मयः। तर्तुराणाः। प्र। मनीषाः। ईरते। सोमं। अच्छ।
नमस्यंतीः। उप। च। यंति। सं। च। आ। च। विशंति। उशतीः। उशंतं ॥३॥

अपामिव यथोदकानामूर्मयस्त्वरंते। इदिति पूरणः। तद्वत्तर्तुराणाः कर्मणि देवान्स्तोतुं त्वरमाणाः॥ तुर त्वरणे जौहोत्यादिकः। यङ्लुगंतस्य शानचि रूपं। अभ्यासस्यावर्णश्च रेफादेशश्छांदसः। अभ्यस्तस्वरः॥ तादृशा ऋत्विजो मनीषा मनस ईशित्रीः स्तुतीः सोममच्छ सोमं प्रति प्रेरते। प्रेरयंति। नमस्यंतीर्नमस्यंत्यः सोमं पूजयंत्यः सत्यस्तमुप यंति चोपगच्छंति तमेव सं यंति च। चवायोगे प्रथमेति न निघातः। तत उशतीः कामयमानाः स्तुतय उशंतं कामयमानं सोममाविशंति च॥

॥ अथ चतुर्थी ॥

तं मर्मृजानं महिषं न सानावंशुं दुहंत्युक्षणं गिरिष्ठां।
तं वावशानं मतयः सचंते त्रितो बिभर्ति वरुणं समुद्रे ॥४॥

तं। मर्मृजानं। महिषं। न। सानौ। अंशुं। दुहंति। उक्षणं। गिरिऽस्थां।
तं। वावशानं। मतयः। सचंते। त्रितः। बिभर्ति। वरुणं। समुद्रे ॥४॥

मर्मृजानं यष्टृभिः परिचर्यमाणं महिषं न महिषाख्यं मृगमिव सानौ समुच्छ्रिते देशे वर्तमानमुक्षणं कामानां सेक्तारं गिरिष्ठामभिषवार्थं ग्रावसु निष्ठितं तं तादृशं प्रसिद्धमंशुं सोमं दुहंति। ऋत्विजो दुहते। ग्रावाणो वत्सा ऋत्विजो दुहंतीति तैत्तिरीयब्राह्मणं। तं तादृशं वावशानं कामयमानं सोमं मतयो मंतव्याः स्तुतयः सचंते। समवयंति। सेवंत इति यावत्। ततस्त्रितस्त्रिषु स्थानेषु वर्तमान इंद्रो वरुणं शत्रूणां निवारकमेनं सोमं समुद्रेऽतरिक्षे बिभर्ति। शत्रुवधार्थं धारयति। यद्वा। त्रिस्त्रिषु स्थानेषु द्रोणाधवनीयपूतभृदाख्येषु कलशेषु ततो विततः सोमः शत्रूणां निवारकमिंद्रं द्युलोके बिभर्ति। पोषयति॥

॥ अथ पंचमी ॥

इष्यन्वाचमुपवक्तेव होतुः पुनान इंदो वि ष्या मनीषां।
इंद्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥५॥

इष्यन्। वाचं। उपवक्ताऽइव। होतुः। पुनानः। इंदो इति। वि। स्य। मनीषां।
इंद्रः। च। यत्। क्षयथः। सौभगाय। सुऽवीर्यस्य। पतयः। स्याम ॥५॥

हे इंदो सोम वाचं स्तुतिमिष्यन् प्रेरयन् होतुरुपवक्तेव यथाध्वर्युः प्रतिगरं कुर्वन् प्रोत्साहयति तद्वत्स्तोतॄणां शंसनाय प्रोत्साहं कुर्वन् पुनानः पूयमानस्त्वं मनीषां बुद्धिं वि ष्य। विमुंच। किंतु बुद्धिं धनप्रदानाभिमुखीं कुरु। किंच। यद्यदेंद्रश्च त्वं सह यज्ञे क्षयथो निवसथस्तदा स्तोतारो वयं सौभगाय सौभाग्याय स्याम। किंच। सुवीर्यस्य शोभनवीर्योपेतस्य धनस्य पतयः स्वामिनः स्याम। भवेम ॥

॥ इति सप्तमस्य चतुर्थे पंचमो वर्गः ॥

प्र सेनानीरिति चतुर्विंशत्यृचमेकादशं सूक्तं दिवोदासपुत्रस्य प्रतर्दनाख्यस्य राजर्षेरिदं त्रैष्टुभं पवमानसोमदेवताकं। तथा चानुक्रम्यते। प्र सेनानीश्चतुर्विंशतिर्दैवोदासिः प्रतर्दन इति। गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना।
भद्रान्कृण्वन्निंद्रहवान्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥१॥
प्र। सेनाऽनीः। शूरः। अग्रे। रथानां। गव्यन्। एति। हर्षते। अस्य। सेना।
भद्रान्। कृण्वन्। इंद्रऽहवान्। सखिऽभ्यः। आ। सोमः। वस्त्रा। रभसानि। दत्ते ॥१॥

सेनानीः सेनानामग्र उपनेता शूरः शत्रूणां बाधकः सोमो गव्यन् शत्रूणां गा इच्छन्। यद्वा यजमानानां पश्वादिकमिच्छन् रथानामग्रे रथानां पुरतः प्रैति। प्रकर्षेण संग्रामं गच्छति। अस्य सोमस्य सेना च हर्षते। हृष्यति। वाक्यभेदादनिघातः। किंच। सखिभ्यः समानख्यानेभ्यो यजमानेभ्य इंद्रहवान् तैः कृतानींद्रस्याह्वानानि भद्रान्कल्याणानि यथार्थानि कृण्वन् कुर्वन्। आहूतो हींद्रः सोमं पीत्वा कामान्प्रयच्छतीति रभसानींद्रस्य वेगेनागमने निमित्तानि वस्त्राण्याच्छादकानि पयःप्रभृतीन्याश्रयणान्यादत्ते। आगृह्णाति ॥

॥ अथ द्वितीया ॥

समस्य हरिं हरयो मृजंत्यश्वहयैरनिशितं नमोभिः।
आ तिष्ठति रथमिंद्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥२॥
सं। अस्य। हरिं। हरयः। मृजंति। अश्वऽहयैः। अनिऽशितं। नमःऽभिः।
आ। तिष्ठति। रथं। इंद्रस्य। सखा। विद्वान्। एन। सुऽमतिं। याति। अच्छ ॥२॥

हरयः। हरंत्यभिषुण्वंति सोममित्यृत्विजोऽगुलयो वा हरिं हरितवर्णमस्य सोमस्य कारणमंशुं सं मृजंति। सम्यगभिषुण्वंति। ततः सोमो नमोभिर्नामयितृभिरश्वहयैर्व्याप्तैरप्यनिशितमसंस्कृतमयुक्तमननुगतं रथं रमणसाधनमात्मीयं दशापवित्रमातिष्ठति। आसीदति। अनंतरमिंद्रस्य सखा सखिभूतो विद्वान् प्राज्ञः सोम एनैतेन रथेन पवित्रेण सुमतिं शोभनस्तुतिकं स्तोतारमच्छ याति। अभिगच्छति। तस्मिन्काले तेन क्रियमाणां स्तुतिमभिगच्छतीत्यर्थः॥

॥ अथ तृतीया ॥

स नो देव देवताते पवस्व महे सोम प्सरस इंद्रपानः।
कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः॥३॥
सः। नः। देव। देवऽताते। पवस्व। महे। सोम। प्सरसे। इंद्रऽपानः।
कृण्वन्। अपः। वर्षयन्। द्यां। उत। इमां। उरोः। आ। नः। वरिवस्य। पुनानः॥३॥

हे देव द्योतमान हे सोम स तादृश इंद्रपान इंद्रेण पातव्यस्त्वं नोऽस्माकं स्वभूते देवताते देवैस्तते वितते यज्ञे महे महते प्सरसे भक्षणायेंद्रस्य पानाय पवस्व। ग्रहादिषु क्षर। किंच अप उदकानि कृण्वन् कुर्वन् उतापि च द्यामिमां द्यावापृथिव्यौ वर्षयन्। भूमिं पर्जन्यरूपेण तर्पयति द्युलोकमग्निरूपेणेति। भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नय इति श्रवणात्। उरोर्विस्तीर्णादंतरिक्षादागच्छंस्त्वं पुनानः पूयमानः सन् नोऽस्मान्वरिवस्य। धनादिप्रदानेन परिचरेति॥

॥ अथ चतुर्थी ॥

अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते।
तदुशंति विश्व इमे सखायस्तदहं वश्मि पवमान सोम॥४॥
अजीतये। अहतये। पवस्व। स्वस्तये। सर्वऽतातये। बृहते।
तत्। उशंति। विश्वे। इमे। सखायः। तत्। अहं। वश्मि। पवमान। सोम॥४॥

हे सोम अजीतये यथा वयं शत्रुभिरजिता भवेम तथा तेषामजयाय। अहतये यथा तैरहताः स्याम तस्मै च। अत एव स्वस्तयेऽविनाशाय। किंच बृहते सर्वतातये सर्वैरिंद्रादिभिर्देवैः स्तूयमानाय यज्ञायैतदर्थं पवस्व। अस्मदभिमुखमागच्छ। पविर्गतिकर्मा। विश्वे सर्वे इमे मदीयाः सखायः स्तोतार-

स्तत्त्वदीयं रक्षणमुशंति । कामयंते । हे पवमान सोम तद्रक्षणमहमपि वश्मि । कामये ॥

॥ अथ पंचमी ॥

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेंद्रस्य जनितोत विष्णोः ॥५॥

सोमः । पवते । जनिता । मतीनां । जनिता । दिवः । जनिता । पृथिव्याः ।
जनिता । अग्नेः । जनिता । सूर्यस्य । जनिता । इंद्रस्य । जनिता । उत । विष्णोः ॥५॥

सोमोऽभिषूयमाणः पवते । पात्रेषु क्षरति । कीदृशः । मतीनां बुद्धीनां यद्वा मननीयानां स्तुतीनां जनिता जनयिता । जनिता मंत्र इति निपातनाण्णिलोपः । किंच दिवो द्युलोकस्य जनिता प्रादुर्भावयिता । तथा पृथिव्या जनयिता । अग्नेर्जनयिता प्रकाशयिता । सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य जनिता । इंद्रस्य जनिता पानेन मदस्य जनयिता । उतापि च विष्णोर्व्यापकस्य जनिता जनयिता । एतत्सर्वं सोमेऽभिषूयमाणे भवतीति । सोमो हि देवानाप्याययतीति ॥

॥ इति सप्तमस्य चतुर्थे षष्ठो वर्गः ॥

देवसुवां हविःषु सोमस्य वनस्पतेर्ब्रह्मा देवानामिति याज्या । सूत्र्यते च । त्वं च सोम नो वशो ब्रह्मा देवानां पदवीः कवीनां । आ॰ ४.११. । इति ॥

॥ सैषा सूक्ते षष्ठी ॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥६॥

ब्रह्मा । देवानां । पदऽवीः । कवीनां । ऋषिः । विप्राणां । महिषः । मृगाणां ।
श्येनः । गृध्राणां । स्वऽधितिः । वनानां । सोमः । पवित्रं । अति । एति । रेभन् ॥६॥

सोम एवंरूपो भवति । देवानां स्तोत्रकारिणामृत्विजां ब्रह्मा ब्रह्माख्यर्त्विक्स्थानीयो भवति । यद्वा । देवानां द्योतमानानामिंद्रादीनां ब्रह्मा राजा भवति । तथा कवीनां क्रांतप्रज्ञानां पदवीः । स्खलंति पदानि साधुत्वेन यो योजयति स पदवीः । वी गत्यादिष्वित्येतस्मात्क्विपि रूपं । तथा विप्राणां मेधाविनां

मध्य ऋषिर्भवति । यः परोक्षं पश्यति स ऋषिर्ऋषिर्दर्शनादिति । मृगाणां महिषो भवति । महिषाख्यो बलवान् राजा भवति । तथा गृध्राणां पक्षिविशेषाणां श्येनः शंसनीयः पक्षिराजो भवति । वनानां । वनतिर्हिंसाकर्मा । हिंसकानां छेदकानां मध्ये स्वधितिरेतन्नामकश्छेदकोऽसि । एवंप्रभावः सोमो रेभन् शब्दायमानः सन् पवित्रमूर्णास्तुकेन कृतमत्येति । अतिगच्छति ॥

॥ अथ सप्तमी ॥

प्रावीविपद्वाच ऊर्मिं न सिंधुर्गिरः सोमः पवमानो मनीषाः ।

अंतः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥७॥

प्र । अवीविपत् । वाचः । ऊर्मिं । न । सिंधुः । गिरः । सोमः । पवमानः । मनीषाः ।

अंतरिति । पश्यन् । वृजना । इमा । अवराणि । आ । तिष्ठति । वृषभः । गोषु । जानन् ॥७॥

पवमानः सोमो मनीषा मनस ईशिता हृदयंगमा गिरः स्तुतीः प्रावीविपत् । प्रकर्षेण वपयति । प्रेरयति । कथमिव । सिंधुः स्यंदमाना नदीव वाचः शब्दस्योर्मिं न संघं यथा प्रेरयति । तद्वत् । किंच वृषभः कामानामुदकानां वा वर्षकः सोमोऽतरंतर्हितं वस्तुजातं पश्यन् अवराणि दुर्बलैर्वारयितुमशक्यानीमा वृजनेमानि बलान्या तिष्ठति । आसीदति । किं कुर्वन् । गोषु जानन् गवां जानानः सन् परबलानि प्रविशति ॥

॥ अथाष्टमी ॥

स मत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष ।

इंद्रायेंदो पवमानो मनीष्यं१शोरूर्मिमीरय गा इषण्यन् ॥८॥

सः । मत्सरः । पृत्ऽसु । वन्वन् । अवातः । सहस्रऽरेताः । अभि । वाजं । अर्ष ।

इंद्राय । इंदो इति । पवमानः । मनीषी । अंशोः । ऊर्मिं । ईरय । गाः । इषण्यन् ॥८॥

मत्सरो मदकरः पृत्सु संग्रामेषु वन्वन् शत्रून् हिंसन् अत एव अवातोऽन्यैर्गंतुमशक्यः सहस्ररेताः सहस्रोदकधारोपेतः स सोमो वाजं शत्रूणां बलमभ्यर्ष । अभिगच्छ । हे इंदो सोम पवमानः पूयमानो मनीषी प्राज्ञस्त्वं गा इषण्यन् शब्दान्प्रेरयन् । यद्वा । यजमानानां यज्ञसाधनभूता गाः प्रेरयन् इंद्रायेंद्रार्थमंशोरभिषूयमाणस्य सोमस्योर्मिं संघमीरय । प्रेरय ॥

॥ अथ नवमी ॥

परि प्रियः कलशे देववात इंद्राय सोमो रण्यो मदाय ।
सहस्रधारः शतवाज इंदुर्वाजी न सप्तिः समना जिगाति ॥९॥
परि । प्रियः । कलशे । देवऽवातः । इंद्राय । सोमः । रण्यः । मदाय ।
सहस्रऽधारः । शतऽवाजः । इंदुः । वाजी । न । सप्तिः । समना । जिगाति ॥९॥

प्रियः प्रीणयितात एव देववातो देवैरभिगतो रण्यो रमणीयः सोम इंद्रायेंद्रस्य मदाय मदार्थं कलशे द्रोणाभिधाने परि जिगाति । परिगच्छति । कीदृशः । सहस्रधारो बहुविधधारोपेतः शतवाजो बहुबल इंदुः पात्रेषु क्षरन् । तत्र दृष्टांतः । वाजी न । यथा वाजी बलवान् सप्तिरश्वः समना । संग्रामनामैतत् । सम ष्टम अवैक्लव्ये । समंति धृष्टा भवंति योद्धारोऽत्रेति । तस्मिन्संग्रामे यथाश्वो जिगाति गच्छति तद्वत् ॥

॥ अथ दशमी ॥

स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ ।
अभिशस्तिपा भुवनस्य राजा विदद्गातुं ब्रह्मणे पूयमानः ॥१०॥
सः । पूर्व्यः । वसुऽवित् । जायमानः । मृजानः । अप्ऽसु । दुदुहानः । अद्रौ ।
अभिशस्तिऽपाः । भुवनस्य । राजा । विदत् । गातुं । ब्रह्मणे । पूयमानः ॥१०॥

पूर्व्यः पुराणो यद्वा पूर्वैः कृतोऽभिषुतो वसुविद्धनानां लंभको जायमानोऽप्सु वसतीवर्याख्येषूदकेषु मृजानो मृज्यमानोऽद्रावभिषवग्रावणि दुदुहानो दुह्यमानोऽभिशस्तिपाः । अभितः शस्तिर्हिंसा येषां तेऽभिशस्तयः शत्रवः । तेभ्यः परिरक्षको भुवनस्य भूतजातस्य राजा स्वामी एवंविधः स तादृशः सोमो ब्रह्मणे कर्मार्थं पूयमानः सन् गातुं मार्गं समीचीनं विदत् । यजमानेभ्यः प्रयच्छति ॥

॥ इति सप्तमस्य चतुर्थे सप्तमो वर्गः ॥

महापितृयज्ञे पितरः सोमवंत इत्यस्य द्वितीयानुवाक्या त्वया हि नः पितर इत्येषा । सूचितं च । पितरोऽग्निष्वात्ता यम उदीरतामवर उत्परासस्त्वया हि नः पितरः सोम पूर्वे । आ० २.१९. । इति ॥

॥ सैषा सूक्त एकादशी ॥

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥११॥

त्वया । हि । नः । पितरः । सोम । पूर्वे । कर्माणि । चक्रुः । पवमान । धीराः ।
वन्वन् । अवातः । परिऽधीन् । अप । ऊर्णु । वीरेभिः । अश्वैः । मघऽवा । भव । नः ॥११॥

हे पवमान पूयमान सोम धीराः कर्मणि कुशलाः प्राज्ञा नोऽस्माकं पितरः पूर्वे पुरातना अंगिरसस्त्वया । हिरवधारणे । त्वया सहायेनैव कर्माण्यग्निष्टोमादीनि चक्रुः । कृतवंतः । किंच वन्वन् स्तोतॄन्संभजन् । यद्वा वनतिर्हिंसार्थः । शत्रून्हिंसन् अवातस्तैरभिगतस्त्वं परिधीन् । परिधीयत एभिः सर्वमिति परिधयो राक्षसाः । तानपोर्णु । अपोर्णुहि । अपच्छादय । जहीति यावत् । ऊर्णोतेर्लोटि छांदसो हेर्लुक् । एतादृशस्त्वं नोऽस्माकं पुत्रादियुक्तं धनं प्रयच्छेत्यर्थः ॥

॥ अथ द्वादशी ॥

यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् ।
एवा पवस्व द्रविणं दधान इंद्रे सं तिष्ठ जनयायुधानि ॥१२॥

यथा । अपवथाः । मनवे । वयःऽधाः । अमित्रऽहा । वरिवःऽवित् । हविष्मान् ।
एव । पवस्व । द्रविणं । दधानः । इंद्रे । सं । तिष्ठ । जनय । आयुधानि ॥१२॥

हे सोम यथा पुरा त्वं मनवे राज्ञे वयोधा अन्नस्य धाता तथामित्रहा शत्रूणां हंता वरिवोविद्धनस्य लंभयिता हविष्मान् पुरोडाशादियुक्तः सन् अपवथास्तस्मै धनादिकं प्रदातुं यथागच्छ एवमस्मभ्यमपि द्रविणं धनं दधानः प्रयच्छन् पवस्व । अस्मदभिमुखमागच्छ । किंच । अस्माभिर्दीयमानस्त्वमिंद्रे सं तिष्ठ । सम्यक् तिष्ठ । अपि च । आयुधानि त्वदीयानि जनय । तस्मै प्रकाशय ॥ वाक्यभेदादनिघातः ॥

॥ अथ त्रयोदशी ॥

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवांति सीद मदिंतमो मत्सर इंद्रपानः ॥१३॥

पवस्व । सोम । मधुऽमान् । ऋतऽवा । अपः । वसानः । अधि । सानौ । अव्ये ।
अव । द्रोणानि । घृतऽवंति । सीद । मदिन्ऽतमः । मत्सरः । इंद्रऽपानः ॥१३॥

हे सोम मधुमान् मदकररसोपेत ऋतावा यज्ञवान् । छंदसीवनिपावितिवनिप् मत्वर्थीयः । तादृशस्त्वमपो वसतीवरीरेकधनाश्च वसान आच्छादयन् अध्यधिकं सानौ समुच्छ्रितेऽव्येऽविभवे पवित्रे पवस्व । क्षर । ततो मदिंतमोऽतिशयेन मदकर इंद्रपान इंद्रेण पातव्यो मत्सरो मादयिता सोमो घृतवंत्युदकवंतो द्रोणानि द्रोणकलशानव सीद । अवतिष्ठस्व ॥

॥ अथ चतुर्दशी ॥

वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ ।
सं सिंधुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ॥१४॥
वृष्टिं । दिवः । शतऽधारः । पवस्व । सहस्रऽसाः । वाजऽयुः । देवऽवीतौ ।
सं । सिंधुऽभिः । कलशे । वावशानः । सं । उस्रियाभिः । प्रऽतिरन् । नः । आयुः ॥१४॥

हे सोम शतधारो बहुधारोपेतस्त्वं दिवोऽतरिक्षादादित्याद्वा वृष्टिं पवस्व । कुरु । यद्वा । शतधारो बहुधात्मीयधारोपेतस्त्वं दिवो द्योतमानात्पवित्राद्वृष्टिमविच्छिन्नधारां पवस्व । पात्रेषु कुरु । कीदृशः । देववीतौ । देवानां वीतिर्हविर्भक्षणं यस्मिन् स देववीतिर्यज्ञः । तस्मिन्सहस्रसा यजमानानां सहस्रस्य धनस्य दाता वाजयुस्तेषामन्नं कामयमानस्त्वं सिंधुभिः स्यंदमानाभिर्वसतीवरीभिः कलशे द्रोणाभिधाने संगच्छस्व । तथा त्वं नोऽस्माकमायुर्जीवनं प्रतिरन् वर्धयन् उस्रियाभिर्गोविकारैः क्षीरादिभिश्च कलशे संगच्छस्व ॥

॥ अथ पंचदशी ॥

एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः ।
पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळ्हा ॥१५॥
एषः । स्यः । सोमः । मतिऽभिः । पुनानः । अत्यः । न । वाजी । तरति । इत् । अरातीः ।
पयः । न । दुग्धं । अदितेः । इषिरं । उरुऽइव । गातुः । सुऽयमः । न । वोळ्हा ॥१५॥

एष एतादृशः स्य स सोमो मतिभिर्मननसाधनैः स्तोत्रैः पुनानः पूयमानो भवति । यः सोमोऽत्यो नातनशीलो वाज्यश्व इव संग्रामेऽरातीररातीञ्शत्रून्तरति । इदवधारणे । तरत्येव हिनस्त्येव । यद्वृत्तयोगादनिघातः । किंच । अदितेः । गोनामैतत् । अदीनाया गोरिषिरमन्वेषणीयं दुग्धं पयो न क्षीरं यथा पूतं भवति

एवं सोमः परिशुद्धः। अपि च उर्विव। सुपां सुलुगिति सोर्लुक्। उर्वी विस्तीर्णा गातुर्मार्ग इव सर्वैः समाश्रयणीयस्तथा वोळ्हा वोढाश्वः सुयमः सुष्ठु नियंतुं शक्यो यथा भवति तद्वदयं सोमः स्तोतृभिर्नियंतव्यो भवति ॥

॥ इति सप्तमस्य चतुर्थेऽष्टमो वर्गः ॥

॥ अथ षोडशी ॥

स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम।
अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम ॥१६॥

सुऽआयुधः। सोतृऽभिः। पूयमानः। अभि। अर्ष। गुह्यं। चारु। नाम।
अभि। वाजं। सप्तिःऽइव। श्रवस्या। अभि। वायुं। अभि। गाः। देव। सोम ॥१६॥

स्वायुधः शोभनायुधोपेतः। यद्वा। यज्ञे स्फ्यकपालादीनि दशायुधानि संति। तद्वान्। सोतृभिरभिषुण्वद्भिः पूयमानस्त्वं गुह्यं गुहायां निहितं चारु कमनीयं नाम त्वदीयं रसात्मकं शरीरं स्तुतिभिः सहाभ्यर्ष। कलशादीन्यभिगमय। किंच। सप्तिरिवाश्व इव वर्तमानस्त्वं श्रवस्या। सुपां सुलुगिति सप्तम्या आजादेशः। अस्मदीयायामन्नेच्छायां वाजमन्नमस्मभ्यमभिगमय। अपि च। हे देव स्तोतव्य हे सोम वायुं प्राणं जीवनमभिगमय। गाः पशूंश्चास्मभ्यमभिगमय ॥

॥ अथ सप्तदशी ॥

शिशुं जज्ञानं हर्यतं मृजंति शुंभंति वह्निं मरुतो गणेन।
कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥१७॥

शिशुं। जज्ञानं। हर्यतं। मृजंति। शुंभंति। वह्निं। मरुतः। गणेन।
कविः। गीःऽभिः। काव्येन। कविः। सन्। सोमः। पवित्रं। अति। एति। रेभन् ॥१७॥

शिशुमिदानीमुत्पन्नत्वाच्छिशुवत्तिष्ठंतं। यद्वा। पापानि तनूकुर्वंतं विनाशयंतं जज्ञानं प्रादुर्भूतमत एव हर्यतं। हर्य गतिकांत्योः। भृमृदृशीत्यादिनातच्। सर्वैः काम्यमानं सोमं मृजंति। मरुतः शोधयंति। किंच। वह्निं वोढारं सोमं गणेनात्मीयेन सप्तसंख्याकेन गणेन शुंभंति। अलंकुर्वंति। ततः कविः क्रांतप्रज्ञः सोमः काव्येन कविकर्मणैव कविः शब्दोपेतः सन् रेभन् शब्दायमानो गीर्भिः स्तुतिभिः सह पवित्रमत्येति। अतीत्य गच्छति ॥

॥ अथाष्टादशी ॥

ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनां ।
तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥१८॥

ऋषिऽमनाः । यः । ऋषिऽकृत् । स्वःऽसाः । सहस्रऽनीथः । पदऽवीः । कवीनां ।
तृतीयं । धाम । महिषः । सिसासन् । सोमः । विऽराजं । अनु । राजति । स्तुप् ॥१८॥

ऋषिमनाः सर्वदर्शनशीलमनस्कः अत एवर्षिकृत् सर्वस्य दर्शनकर्ता । प्रकाशनस्य कर्ता स्वर्षाः सर्वस्य सूर्यस्य वा संभक्ता सहस्रणीथः । नीथा स्तुतिः । बहुविधस्तुतिकः । कवीनां क्रांतप्रज्ञानां मध्ये पदवीः स्खलतां पदानां साधुत्वेन संयोजयिता यः सोमो विद्यते स महिषो महान् पूज्यो वा सोमस्तृतीयं धाम द्युलोकं सिषासन् संभक्तुमिच्छन् स्तुप् स्तूयमानः सन् विराजं विशेषेण राजंतं दीप्यमानमिंद्रमनु राजति । प्रकाशयति ॥

॥ अथैकोनविंशी ॥

चमूषच्छ्येनः शकुनो विभृत्वा गोविंदुर्द्रप्स आयुधानि बिभ्रत् ।
अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥१९॥

चमूऽसत् । श्येनः । शकुनः । विऽभृत्वा । गोऽविंदुः । द्रप्सः । आयुधानि । बिभ्रत् ।
अपां । ऊर्मिं । सचमानः । समुद्रं । तुरीयं । धाम । महिषः । विवक्ति ॥१९॥

चमूषत् । चमंति भक्षयंत्यत्रेति चम्वश्चमसाः । तेषु सीदन् । यद्वा । चम्वावधिषवणफलके । तयोर्वर्तमानः श्येनः शंसनीयः शकुनः शक्तः सामर्थ्यकारी विभृत्वा । हरतेरातो मनिन्क्वनिबित्यादिना क्वनिप् । पात्रेषु विहरणशीलः । गोविंदुर्यजमानानां गवां लंभकः । विंदुरिच्छुः । पा० ३.२.१६९. । इत्युप्रत्ययांतत्वेन निपातितः । द्रप्सो द्रवणशील आयुधानि स्फ्यकपालादीनि बिभ्रत् धारयन् अपामुदकानामूर्मिं प्रेरकं समुद्रं । अंतरिक्षनामैतत् । अंतरिक्षलोकं सचमानः सेवमानो महिषो महान् य एवंविधः सोमः स सोमस्तुरीयं चतुर्थं धाम चांद्रमसं स्थानं विवक्ति । सेवते । सूर्यलोकस्योपरि चंद्रमसो लोको विद्यत इति यमः पृथिव्या अधिपतिः स मावत्वित्यादिभिश्चंद्रमा नक्षत्राणामधिपतिः स मावत्वित्यंतैर्मंत्रैर्ज्ञायते ॥

॥ अथ विंशी ॥

मर्यो न शुभ्रस्तन्वं मृजानोऽत्यो न सृत्वा सनये धनानां।
वृषेव यूथा परि कोशमर्षन्कनिक्रदच्चम्वो३रा विवेश ॥२०॥

मर्यः। न। शुभ्रः। तन्वं। मृजानः। अत्यः। न। सृत्वा। सनये। धनानां।
वृषाऽइव। यूथा। परि। कोशं। अर्षन्। कनिक्रदत्। चम्वोः। आ। विवेश ॥२०॥

शुभ्रो दीप्यमानोऽलंकृतो मर्यो न मनुष्य इव तन्वमात्मीयं शरीरं मृजानो वसतीवरीभिः शोधयन्। किंच धनानां सनये संभजनाय लाभायात्यो नातनशीलोऽश्व इव सृत्वा सरणशीलः। अपि च। वृषेव वृषा यथा यूथानि प्रतिगच्छन् शब्दं करोति तद्वत् कोशमधिषवणचर्मणा कृतं पात्रं पर्यर्षन् प्रतिगच्छन् सोमः कनिक्रदत् पुनः पुनः शब्दं कुर्वन् चम्वोरधिषवणफलकयोरा विवेश। आविशति। कनिक्रदत्। क्रदेर्यङ्लुकि दाधर्तिदर्धर्तीत्यादिना निपातनादभ्यासस्य निगागमः। तस्य शतर्यभ्यस्तानामादिरित्याद्युदात्तत्वं॥

॥ इति सप्तमस्य चतुर्थे नवमो वर्गः ॥

॥ अथैकविंशी ॥

पवस्वेंदो पवमानो महोभिः कनिक्रदत्परि वाराण्यर्ष।
क्रीळंच्चम्वो३रा विश पूयमान इंद्रं ते रसो मदिरो ममत्तु ॥२१॥

पवस्व। इंदो इति। पवमानः। महःऽभिः। कनिक्रदत्। परि। वाराणि। अर्ष।
क्रीळन्। चम्वोः। आ। विश। पूयमानः। इंद्रं। ते। रसः। मदिरः। ममत्तु ॥२१॥

हे इंदो सोम महोभिः पूजकैर्ऋत्विग्भिः पवमानः पूयमानस्त्वं पवस्व। क्षर। ततः कनिक्रदत् भृशं शब्दं कुर्वन् वाराण्यवेर्वालानि पवित्राणि पर्यर्ष। परिगच्छ। किंच पूयमानस्त्वं चम्वोरधिषवणफलकयोः क्रीळन् संक्रीडमानः सन् आ विश। पात्राणि प्रविश। अनंतरं मदिरो मदकरस्ते त्वदीयो रस इंद्रं ममत्तु। मोदयतु। माद्यतेर्बहुलं छंदसीति श्लुः॥

॥ अथ द्वाविंशी ॥

प्रास्य धारा बृहतीरसृग्रन्नक्तो गोभिः कलशाँ आ विवेश।
साम कृण्वन्त्सामन्यो विपश्चित्क्रंदन्नेत्यभि सख्युर्न जामिं ॥२२॥

प्र। अस्य। धाराः। बृहतीः। असृग्रन्। अक्तः। गोभिः। कलशान्। आ। विवेश।
साम। कृण्वन्। सामन्यः। विपःऽचित्। क्रंदन्। एति। अभि। सख्युः। न। जामिं ॥२२॥

अस्य सोमस्य बृहतीर्बृहत्यो महत्यो धाराः प्रासृग्रन् । प्रसृज्यंते ॥ सृजेः कर्मार्थे लङि व्यत्ययेन झेरन्नादेशः । बहुलं छंदसीति रुडागमः ॥ ततः सोऽयं सोमो गोभिर्गोविकारैः क्षीरादिभिरक्तः सन् कलशान्द्रोणाभिधानाना विवेश । आविशति । साम सामानि कृण्वन् कुर्वन् सोमः सामन्यः सामगानकुशलः । सुष्ठु शब्दायमान इत्यर्थः । विपश्चित् सर्वं जानानः सोमः क्रंदन् देवानाह्वयन् अभ्येति। ग्रहादीनि त्वरयाभिगच्छति। तत्र दृष्टांतः। सख्युर्न जामिं। सख्युर्जामिं जायां यथेतरो लंपटो वेगेनाभिगच्छति तद्वत् ॥

॥ अथ त्रयोविंशी ॥

अपघ्नन्नेषि पवमान शत्रून्प्रियां न जारो अभिगीत इंदुः ।
सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ॥२३॥

अपऽघ्नन्। एषि। पवमान। शत्रून्। प्रियां। न। जारः। अभिऽगीतः। इंदुः।
सीदन्। वनेषु। शकुनः। न। पत्वा। सोमः। पुनानः। कलशेषु। सत्ता ॥२३॥

हे पवमान पूयमान सोम अभिगीतः स्तोतृभिरभिष्टुत इंदुः पात्रेषु क्षरन् त्वं शत्रूनपघ्नन् अपहिंसन् एषि। आगच्छसि। कथमिव। जारः प्रियां न। प्रियतमामसतीं स्त्रीमन्यान्बाधमानः सन्यथाभिगच्छति तद्वत् । पत्वा पतनशीलः शकुनो न। यथा शकुनो वनेषु वृक्षेषु सीदन्भवति तद्वत् पतनशीलः पुनानः पूयमानः सोमः कलशेषु सत्ता सदनशीलो निषण्णो भवति । सदेस्ताच्छीलिकस्तृन्। एकाच इतीट्प्रतिषेधः ॥

॥ अथ चतुर्विंशी ॥

आ ते रुचः पवमानस्य सोम योषेव यंति सुदुघाः सुधाराः ।
हरिरानीतः पुरुवारो अप्स्वचिक्रदत्कलशे देवयूनां ॥२४॥

आ। ते। रुचः। पवमानस्य। सोम। योषाऽइव। यंति। सुऽदुघाः। सुऽधाराः।
हरिः। आऽनीतः। पुरुऽवारः। अप्ऽसु। अचिक्रदत्। कलशे। देवऽयूनां ॥२४॥

हे सोम पवमानस्य पूयमानस्य ते तव स्वभूता योषेव स्त्री यथा पुत्राणां पयो दोग्धि तद्वद्यजमानानां धनादिकस्य सुष्ठु दोग्ध्र्यः सुधाराः शोभनधारोपेता रुचो दीप्तय आ यंति । पात्रादीन्यागच्छंति । किंच । हरिर्हरितवर्ण आनीत ऋत्विग्भिः पुरुवारो बहुधा वरणीयः सोमोऽप्सु वसतीवरीषु देवयूनां देवानिच्छतां यजमानानां स्वभूते कलशे द्रोणाख्ये चाचिक्रदत् पुनः पुनः क्रंदते । शब्दायते ॥

॥ इति सप्तमस्य चतुर्थे दशमो वर्गः ॥

॥ इति नवमे मंडले पंचमोऽनुवाकः ॥

षष्ठेऽनुवाके सप्त सूक्तानि । तत्रास्य प्रेषेत्यष्टापंचाशदृचं प्रथमं सूक्तं त्रैष्टुभं पवमानसोमदेवताकं । तत्राद्यस्य तृचस्य मैत्रावरुणी वसिष्ठ ऋषिः । द्वितीयस्येंद्रप्रमतिर्नाम । तृतीयस्य वृषगणः । चतुर्थस्य मन्युः । पंचमस्योपमन्युः । षष्ठस्य व्याघ्रपात् । सप्तमस्य शक्तिः । अष्टमस्य कर्णश्रुत् । नवमस्य मृळीकः । दशमस्य वसुक्रः । एते सर्वे वसिष्ठगोत्राः । एवं त्रिंशदृचो गताः । अथ चतुर्दशानामृचां शक्तिपुत्रः पराशर ऋषिः । शिष्टानामांगिरसः कुत्सः । तथानुक्रम्यते । अस्य प्रेषाष्टापंचाशदाद्यं तृचं वसिष्ठोऽपश्यदुत्तरान्नव पृथग्वसिष्ठा इंद्रप्रमतिर्वृषगणो मन्युरुपमन्युर्व्याघ्रपाच्छक्तिः कर्णश्रुन्मृळीको वसुक्र इति चतुर्दश पराशरोऽंत्याः कुत्स इति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसं ।
सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमांति होता ॥१॥
अस्य । प्रेषा । हेमना । पूयमानः । देवः । देवेभिः । सं । अपृक्त । रसं ।
सुतः । पवित्रं । परि । एति । रेभन् । मिताऽइव । सद्म । पशुऽमंति । होता ॥१॥

अस्य सोमस्य प्रेषा ॥ प्रेषतिर्गत्यर्थः । क्विपि रूपं । सावेकाच इति विभक्तेरुदात्तत्वं ॥ प्रेषा प्रेरकेण हेमना हिरण्येन पूयमानः । हिरण्यपाणिरभिषुणोतीति हिरण्यसंबंधः । तादृशो देवो दीप्यमानांशू रसमात्मीयं देवेभिर्देवैः सह समपृक्त । संपर्चयति । संयोजयति । पृची संपर्के । ततः सुतोऽभिषुतः सोमो रेभन् शब्दायमानः सन् पवित्रमूर्णास्तुकेन निर्मितं पर्येति । परिगच्छति । कथमिव ।

होता देवानामाह्वातर्त्विक् मितेव निर्मितान् पशुमंति बहुपशून् सद्म सदनानि यज्ञगृहान्यथा पर्येति तद्वत् ॥

॥ अथ द्वितीया ॥

भद्रा वस्त्रा समन्या३ वसानो महान्कविर्निवचनानि शंसन् ।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥२॥

भद्रा । वस्त्रा । समन्या । वसानः । महान् । कविः । निऽवचनानि । शंसन् ।
आ । वच्यस्व । चम्वोः । पूयमानः । विऽचक्षणः । जागृविः । देवऽवीतौ ॥२॥

भद्रा भद्राणि कल्याणानि समन्या । समनमिति संग्रामनाम । तत्र साधुरिति यत् । संग्रामयोग्यानि वस्त्रा वस्त्राण्याच्छादकानि तेजांसि वसान आच्छादयन् महान्कविः क्रांतदर्शी अत एव निवचनानि नितरां वक्तव्यान्यृत्विक्कृतानि स्तोत्राणि शंसन् विचक्षणो विशेषेण द्रष्टा जागृविर्जागरणशीलः सोमस्त्वं देववीतौ । देवानां वीतिर्भक्षणं यस्मिन् स देववीतिर्यज्ञः । तस्मिन् चम्वोरधिषवणफलकयोरावच्यस्व । पात्राण्या विश । वचिर्गत्यर्थः । व्यत्ययेन श्यन् । पूयमानः सन् ॥

॥ अथ तृतीया ॥

समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥३॥

सं । ऊं इति । प्रियः । मृज्यते । सानौ । अव्ये । यशःऽतरः । यशसां । क्षैतः । अस्मे इति ।
अभि । स्वर । धन्व । पूयमानः । यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥३॥

यशसां यशस्विनां मध्ये यशस्तरोऽतिशयेन यशस्वी क्षैतः क्षितौ भवः प्रियः प्रीणयिता सोमः सानौ समुच्छ्रितेऽव्येऽविमये पवित्रेऽस्मे अस्मदर्थं संमृज्यते । ऋत्विग्भिः परिपूयते । उ अवधारणे । पूयमानस्त्वं धन्वांतरिक्षेऽभि स्वर । अभितः शब्दय । यूयं । पूजायां बहुवचनं । हे सोम त्वं नोऽस्मान् स्वस्तिभिः कल्याणतमैः पालनैः सदा सर्वदा पात । रक्षत । पालयत ॥

॥ अथ चतुर्थी ॥

प्र गायताभ्यर्चाम देवान्सोमं हिनोत महते धनाय ।
स्वादुः पवाते अति वारमव्यमा सीदाति कलशं देवयुर्नः ॥४॥

प्र । गायत । अभि । अर्चाम । देवान् । सोमं । हिनोत । महते । धनाय ।
स्वादुः । पवाते । अति । वारं । अव्यं । आ । सीदाति । कलशं । देवऽयुः । नः ॥४॥

हे स्तोतारः प्र गायत । सोमं प्रकर्षेणाभिष्टुत । तथा देवानभ्यर्चाम । अभ्यर्चत । पुरुषव्यत्ययः । यद्वा । वयं देवानभिष्टुमः यूयं सोमं स्तुतेति । किंच महते महत्प्रभूतं धनाय धनं प्राप्तुं सोमं हिनोत । अभिषवार्थं प्रेरयत ॥ क्रियार्थोपपदस्य च कर्मणि स्थानिन इति धनशब्दस्य चतुर्थी ॥ ततः स्वादुः स्वादुकरः सोमोऽव्यमविभवं वारं वालं पवित्रमति पवाते । अतीत्य पवते । किंच देवयुर्देवान्कामयमानो नोऽस्मदीयः सोमः कलशं पात्रमासीदाति । आसीदति । प्रविशति । उभयत्र लेट्याडागमः ॥

॥ अथ पंचमी ॥

इंदुर्देवानामुप सख्यमायन्त्सहस्रधारः पवते मदाय ।
नृभिः स्तवानो अनु धाम पूर्वमगन्निंद्रं महते सौभगाय ॥५॥

इंदुः । देवानां । उप । सख्यं । आऽयन् । सहस्रऽधारः । पवते । मदाय ।
नृऽभिः । स्तवानः । अनु । धाम । पूर्वं । अगन् । इंद्रं । महते । सौभगाय ॥५॥

देवानामिंद्रादीनां सख्यं सखिभावमुपायन् उपगच्छन् सहस्रधारो बहुविधधार इंदुः सोमो मदाय देवानां मदार्थं पवते । कलशादिषु क्षरति । नृभिः कर्मनेतृभिः स्तवानः स्तूयमानः सोमः पूर्वं पुरातनं धाम द्युलोकमनुगच्छति । तदेवाह । महते प्रभूताय सौभगाय सौभाग्यायेंद्रमगन् । गच्छति । सोम इंद्रेण पीते सति यजमानानां महत्सौभाग्यं भवति खलु । अगन् । गमेर्लुङि मंत्रे घसेति च्लेर्लुक् । मो नो धातोरिति नत्वं ॥

॥ इति सप्तमस्य चतुर्थ एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

स्तोत्रे राये हरिरर्षा पुनान इंद्रं मदो गच्छतु ते भराय ।
देवैर्याहि सरथं राधो अच्छा यूयं पात स्वस्तिभिः सदा नः ॥६॥

स्तोत्रे । राये । हरिः । अर्ष । पुनानः । इंद्रं । मदः । गच्छतु । ते । भराय ।
देवैः । याहि । सऽरथं । राधः । अच्छ । यूयं । पात । स्वस्तिभिः । सदा । नः ॥६॥

हे सोम हरिर्हरितवर्णः पुनानः पूयमानस्त्वं स्तोत्रेऽस्माभिः क्रियमाणे सति राये धनार्थमर्ष । आगच्छ । ततस्ते त्वदीयो मदो मदकरो रसो भराय । भृ भर्त्सने । भर्त्सयंति शत्रूनत्र योद्धार इति भरः संग्रामः । तदर्थमिंद्रं गच्छतु । किंच सरथं देवैः समानं रथमास्थाय राधोऽच्छास्माकं धनार्थं याहि । आगच्छ । यूयं नोऽस्मान् स्वस्तिभिः सदा पात । त्वं रक्ष ॥

॥ अथ सप्तमी ॥

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबंधुः पावकः पदा वराहो अभ्येति रेभन् ॥ ७ ॥

प्र । काव्यं । उशनाऽइव । ब्रुवाणः । देवः । देवानां । जनिम । विवक्ति ।
महिऽव्रतः । शुचिऽबंधुः । पावकः । पदा । वराहः । अभि । एति । रेभन् ॥ ७ ॥

उशनेव एतन्नामक ऋषिरिव काव्यं कविकर्म स्तोत्रं ब्रुवाण उच्चारयन् देवः स्तोतायमृषिर्वृषगणो नाम देवानामिंद्रादीनां जनिम जन्मानि प्र विवक्ति । प्रकर्षेण ब्रवीति । वच परिभाषणे । व्यत्ययेन विकरणस्य श्लुः । बहुलं छंदसीत्यभ्यासस्येत्वं । महिव्रतः प्रभूतकर्मा शुचिबंधुः । बध्नंति शत्रूनिति बंधूनि तेजांसि बलानि वा । दीप्ततेजस्कः पावकः पापानां शोधको वराहः । वरं च तदहश्च वराहः । राजाहःसखिभ्यष्टजिति टच्समासांतः । तस्मिन्नहन्यभिषूयमाणत्वेन तद्वान् । अर्शआदित्वान्मत्वर्थीयोऽच् । तादृशः सोमो रेभन् शब्दं कुर्वन्पदा पदानि स्थानानि पात्राण्यभ्येति । अभिगच्छति । यद्वा । यथा कश्चन वराहः पदा पादेन भूमिं विक्रममाणः शब्दं करोति तद्वत् ॥

॥ अथाष्टमी ॥

प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः ।
आंगूष्यं१ पवमानं सखायो दुर्मर्षं साकं प्र वदंति वाणं ॥ ८ ॥

प्र । हंसासः । तृपलं । मन्युं । अच्छ । अमात् । अस्तं । वृषऽगणाः । अयासुः ।
आंगूष्यं । पवमानं । सखायः । दुःऽमर्षं । साकं । प्र । वदंति । वाणं ॥ ८ ॥

हंसासः शत्रुभिर्हन्यमाना हंसा इव चरंतो वा वृषगणा एतन्नामका ऋषयोऽमाच्छत्रूणां बलात्त्रासिताः संतस्तृपलं । तृपलशब्दः क्षिप्रवाची । तदुक्तं

यास्केन । तृपलप्रभर्मा क्षिप्रप्रहारीति । क्षिप्रप्रहारिणं मन्युं शत्रूनभिमन्यमानं सोममच्छाभिलक्ष्यास्तं यज्ञगृहं प्रायासुः । प्रायासिषुः । प्रगच्छंति । ततः सखायः स्तुत्यस्तोतृत्वलक्षणेन संबंधेन सखिभूताः स्तोतार आंगूषं सर्वैरभिगंतव्यं । यद्वा । घोषशब्दस्य पृषोदरादित्वादागूष इत्यादेशः । आङ अनुनासिकश्छांदसः । स्तोत्राहं दुर्मर्षं शत्रुभिर्दुर्धरं दुःसहं एवंविधं सोमं पवमानमुद्दिश्य वाणं वाद्यविशेषं साकं सहैव प्र वदंति । प्रवादयंति । तदुपलक्षितं गानं कुर्वंतीत्यर्थः ॥

॥ अथ नवमी ॥

स रंहत उरुगायस्य जूतिं वृथा क्रीळंतं मिमते न गावः ।
परीणसं कृणुते तिग्मशृंगो दिवा हरिर्ददृशे नक्तमृज्रः ॥९॥

सः । रंहते । उरुऽगायस्य । जूतिं । वृथा । क्रीळंतं । मिमते । न । गावः ।
परीणसं । कृणुते । तिग्मऽशृंगः । दिवा । हरिः । ददृशे । नक्तं । ऋज्रः ॥९॥

स सोमो रंहते । अतिशीघ्रं गच्छतीत्यर्थः । उरुगायस्य बहुभिः स्तुत्यस्यात्मनो जूतिं गतिमनुसरन् । तं वृथानायासेन क्रीळंतं विहरंतं गच्छंतं सोमं गावोऽन्ये गंतारो न मिमते । न परिच्छिंदंति । तमनुगंतुं न शक्नुवंतीत्यर्थः । किंच तिग्मशृंगः । शृणंति हिंसंति तमांसीति शृंगाणि तेजांसि । तीक्ष्णतेजस्कः परीणसं । बहुनामैतत् । बहुविधं तेजः कृणुते । करोति । अंतरिक्षे वर्तमानो यः सोमो दिवाहनि हरिर्हरितवर्णो ददृशे दृश्यते । न प्रकाशत इत्यर्थः । नक्तं रात्रौ त्वृज्र ऋजुगामी विस्पष्टः प्रकाशयुक्तो दृश्यते । दृशेः कर्मणि लिटि रूपं ॥

॥ अथ दशमी ॥

इंदुर्वाजी पवते गोन्योघा इंद्रे सोमः सह इन्वन्मदाय ।
हंति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन्वृजनस्य राजा ॥१०॥

इंदुः । वाजी । पवते । गोऽन्योघाः । इंद्रे । सोमः । सहः । इन्वन् । मदाय ।
हंति । रक्षः । बाधते । परि । अरातीः । वरिवः । कृण्वन् । वृजनस्य । राजा ॥१०॥

इंदुः क्षरणशीलो वाजी बलवान् गोन्योघा गमनशीलनीचीनाग्ररससंघात इंद्रे सहो बलकररसमिन्वन् प्रेरयन् सोमो मदाय तस्य मदार्थं पवते । क्षरति । किंच रक्षो रक्षःकुलं हंति । हिनस्ति । किंचारातीररातीञ्शत्रून्परि बाधते । परितः

संहरति। कीदृशः। वरिवो वरणीयं धनं कृण्वन् स्तोतॄणां कुर्वन् वृजनस्य बलस्य राजेशिता सोम इति ॥

॥ इति सप्तमस्य चतुर्थे द्वादशो वर्गः ॥

॥ अथैकादशी ॥

अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः।
इंदुरिंद्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥११॥
अध। धारया। मध्वा। पृचानः। तिरः। रोम। पवते। अद्रिऽदुग्धः।
इंदुः। इंद्रस्य। सख्यं। जुषाणः। देवः। देवस्य। मत्सरः। मदाय ॥११॥

अधाथानंतरमद्रिदुग्धो ग्रावभिर्दुग्धोऽभिषुतः सोमो मध्वा मदकारिण्या धारया पृचानो देवान् संपर्चयन् संयोजयन् रोमाविरोमभिः कृतं पवित्रं तिरस्तिरस्कृत्य व्यवधायकं कृत्वा पवते। कलशेषु क्षरति। किंचेंद्रस्य सख्यं सखिभावं कर्म वा जुषाणः सेवमानो देवो द्योतमानो मत्सरो मदकर इंदुः सोमो देवस्येंद्रस्य मदाय मदार्थं पवते। क्षरति ॥

॥ अथ द्वादशी ॥

अभि प्रियाणि पवते पुनानो देवो देवान्स्वेन रसेन पृंचन्।
इंदुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥१२॥
अभि। प्रियाणि। पवते। पुनानः। देवः। देवान्। स्वेन। रसेन। पृंचन्।
इंदुः। धर्माणि। ऋतुऽथा। वसानः। दश। क्षिपः। अव्यत। सानौ। अव्ये ॥१२॥

प्रियाणि प्रीतिकारकाणि धर्माणि तेजांस्यृतुथा काले वसान आच्छादयन् इंदुः सोमः पुनानः पूयमानः सन् अभि पवते। कलशानभिलक्ष्य क्षरति। कीदृशः। देवः संक्रीडनशीलः स्वेनात्मीयेन रसेन देवानिंद्रादीन्पृंचन् संपर्चयन् संयोजयन्। तमिमं दश दशसंख्याकाः क्षिपः। अंगुलिनामैतत्। कर्मार्थं प्रेर्यंत इति। तत्संख्याका अंगुलयः सानौ समुच्छ्रितेऽव्येऽविभवे पवित्रेऽव्यत। गमयंति। यद्वा तत्र पवित्रे पूयमानं सोममव्यत। गच्छंति। वी गत्यादिषु। लङि व्यत्ययेनात्मनेपदं ॥

॥ अथ त्रयोदशी ॥

वृषा शोणो अभिकनिक्रदद्गा नदयन्नेति पृथिवीमुत द्यां ।
इंद्रस्येव वग्नुरा शृण्व आजौ प्रचेतयन्नर्षति वाचमेमां ॥१३॥
वृषा । शोणः । अभिऽकनिक्रदत् । गाः । नदयन् । एति । पृथिवीं । उत । द्यां ।
इंद्रस्यऽइव । वग्नुः । आ । शृण्वे । आजौ । प्रऽचेतयन् । अर्षति । वाचं । आ । इमां ॥१३॥

शोणः शोणवर्णो वृषा कश्चिद्वृषभो गाः पशूनभिकनिक्रदत् । अभिलक्ष्य शब्दं करोति । एवं गाः स्तुतीर्विश्रयणार्थं पयसो दोग्ध्रीर्धेनूर्वाभिकनिक्रदत् अभिशब्दायमानः । तदेवाह । नदयन् शब्दमुत्पादयन् सोमः पृथिवीमुतापि च द्यां एतौ लोकावेति । गच्छति । किंच । वग्नुः । वाग्नामैतत् । तस्य वाक् शब्द आजौ संग्राम इंद्रस्येव इंद्रस्य शब्द इव शृण्वे । सर्वैः श्रूयते । ततः प्रचेतयन् आत्मानं सर्वेषां प्रज्ञापयन् इमां वाचमर्षति । समंताद्गमयति । उच्चैः शब्दायत इत्यर्थः ॥

॥ अथ चतुर्दशी ॥

रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमंतमंशुं ।
पवमानः संतनिमेषि कृण्वन्निंद्राय सोम परिषिच्यमानः ॥१४॥
रसाय्यः । पयसा । पिन्वमानः । ईरयन् । एषि । मधुऽमंतं । अंशुं ।
पवमानः । संऽतनिं । एषि । कृण्वन् । इंद्राय । सोम । परिऽसिच्यमानः ॥१४॥

हे सोम रसाय्यः । रसेरौणादिक आय्यप्रत्ययः । आस्वाद्यः पयसा पिन्वमानः क्षरन् त्वमीरयन् शब्दं प्रेरयन् मधुमंतं माधुर्योपेतमंशुं रसभावमेषि । प्राप्नोषि । अंशुः शमष्टमात्रो भवतीति यास्कः । नि॰ २.५. । अनेन सोमरसोऽभिधीयते । किंच । हे सोम परिषिच्यमानोऽद्भिः परिषिक्तस्त्वं पवमानः पवित्रे पूयमानः सन् संतनिं । तनु विस्तारे । इप्रत्ययः । संततां धारां कृण्वन् कुर्वन्निंद्रायेंद्रार्थमेषि । गच्छसि ॥

॥ अथ पंचदशी ॥

एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नैः ।
परि वर्णं भरमाणो रुशंतं गव्युर्नो अर्ष परि सोम सिक्तः ॥१५॥

एव । पवस्व । मदिरः । मदाय । उदऽग्राभस्यं । नमयंन् । वधऽस्नैः ।
परिं । वर्णं । भरमाणः । रुशंतं । गव्युः । नः । अर्ष । परिं । सोम । सिक्तः ॥ १५ ॥

हे सोम मदिरो मदकरस्त्वमुदग्राभस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञा । पा० १.४.३२.१. । चतुर्थ्यर्थे बहुलं । पा० २.३.६२. । इति षष्ठी । उदग्राभमुदकग्राहिणं मेघं वधस्नैर्हननसाधनैरायुधैर्नमयन् वृष्ट्यर्थं प्रह्वीकुर्वन् मदाय मदार्थमेव पवस्व । एवं पात्रेषु क्षर । किंच रुशंतमारोचमानं श्वेतं वर्णं परि भरमाणः परितो बिभ्रत् सिक्तः पवित्रे सिच्यमानस्त्वं गव्युर्नोऽस्माकं गा इच्छन् पर्यर्ष । परिगच्छ ॥

॥ इति सप्तमस्य चतुर्थे त्रयोदशो वर्गः ॥

॥ अथ षोडशी ॥

जुष्ट्वी नं इंदो सुपथा सुगान्युरौ पंवस्व वरिवांसि कृण्वन् ।
घनेव विष्वंग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ॥ १६ ॥

जुष्ट्वी । नः । इंदो इतिं । सुऽपथा । सुऽगानि । उरौ । पवस्व । वरिवांसि । कृण्वन् ।
घनाऽइंव । विष्वंक् । दुःऽइतानि । विऽघ्नन् । अधि । ष्णुना । धन्व । सानौ । अव्ये ॥ १६ ॥

हे इंदो दीप्त पवमान जुष्ट्वी । स्नात्व्यादयश्चेति निपातितः । स्तुतिभिः प्रीतो भूत्वा नोऽस्माकं सुपथानि वैदिकमार्गान् तथा वरिवांसि वरणीयानि धनानि सुगा सुगमनानि सुप्राप्तव्यानि कृण्वन् कुर्वन् उरौ विस्तीर्णे द्रोणकलशे पवस्व । क्षर । किंच घनेव घनीभूतेन लोहमयेनायुधेनेव विष्वक् सर्वतो दुरितानि दुःप्राप्तव्यानि रक्षांसि विघ्नन् हिंसन् सानौ समुच्छ्रितेऽव्येऽविभवे ष्णुना स्रवता धारासंघेनाधि धन्व । अधि गच्छ । धविर्गत्यर्थः ॥

॥ अथ सप्तदशी ॥

वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुं ।
स्तुकेव वीता धन्वा विचिन्वन्बंधूँरिमाँ अवराँ इंदो वायून् ॥ १७ ॥

वृष्टिं । नः । अर्ष । दिव्यां । जिगत्नुं । इळाऽवतीं । शंऽगयीं । जीरऽदानुं ।
स्तुकाऽइव । वीता । धन्व । विऽचिन्वन् । बंधून् । इमान् । अवरान् । इंदो इतिं ।
वायून् ॥ १७ ॥

हे सोम नोऽस्माकं वृष्टिमर्ष । गमय । कीदृशीं । दिव्यां दिविभवां जिगत्नुं गमनशीलामिळावतीमन्नवतीं शंगयीं सुखस्य निवासभूतां जीरदानुं क्षिप्रदानोपेतां । किंच । हे इंदो त्वं स्तुकेव वीता कांतानि । स्तुकशब्दोऽपत्यवचनः । अपत्यानि यथा विचिनोषि तद्वद्बंधून् स्तुत्यस्तोतृत्वेन बंधुभूतानवरानवरदेशे स्थितान्पार्थिवान्वायून् त्वामभिगच्छत इमानस्मान्विचिन्वन् धनादिप्रदानार्थं गवेषमाणः सन् धन्व । गच्छ ॥

॥ अथाष्टादशी ॥

ग्रंथिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम ।

अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान् ॥ १८ ॥

ग्रंथिं । न । वि । स्य । ग्रथितं । पुनानः । ऋजुं । च । गातुं । वृजिनं । च । सोम ।

अत्यः । न । क्रदः । हरिः । आ । सृजानः । मर्यः । देव । धन्व । पस्त्यऽवान् ॥ १८ ॥

पुनानः पूयमानस्त्वं ग्रथितं पापैर्बद्धं मां विष्य । मुंच । पापेभ्यो विश्लेषय । कथमिव । ग्रंथिं न । यथा कश्चिद्ग्रंथिं विश्लेषयति । षोऽतकर्मणीत्यस्य लोटि रूपं । किंच । हे सोम त्वमृजुमवक्रं गातुं मार्गं च वृजिनं बलं च मह्यं देहि । हरिर्हरितवर्णस्त्वमा सृजानः पात्रेष्वासृज्यमानः सन् अत्यो नाततनशीलोऽश्व इव क्रदः । क्रंदसि । शब्दायसे । किंच । हे देव मर्यो मनुष्यहितो मारको हिंसको वा शत्रूणां पस्त्यवान् । पस्त्यं गृहं । तद्वांस्त्वं धन्व । मामभिगच्छ कलशान्वा ॥

॥ अथैकोनविंशी ॥

जुष्टो मदाय देवतात इंदो परि ष्णुना धन्व सानो अव्ये ।

सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये ॥ १९ ॥

जुष्टः । मदाय । देवऽताते । इंदो इति । परि । स्नुना । धन्व । सानौ । अव्ये ।

सहस्रऽधारः । सुरभिः । अदब्धः । परि । स्रव । वाजऽसातौ । नृऽसह्ये ॥ १९ ॥

हे इंदो मदाय जुष्टः पर्याप्तस्त्वं देवताते देवैस्तते यज्ञे सानौ समुच्छ्रितेऽव्येऽविभवे पवित्रे स्नुना अयणशीलेन धारासंघेन सह परि धन्व । परिगच्छ । सहस्रधारः बहुधारोपेतः सुरभिः सुगंधिस्त्वमदब्धो न कैश्चिद्धिंसितः सन् वाजसातावन्नलाभाय निमित्ते नृसह्ये नृभिः सोढव्ये युद्धे परि स्रव । परितो गच्छ ॥

॥ अथ विंशी ॥

अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ ।
एते शुक्रासो धन्वंति सोमा देवासस्ताँ उप याता पिबध्यै ॥२०॥
अरश्मानः । ये । अरथाः । अयुक्ताः । अत्यासः । न । ससृजानासः । आजौ ।
एते । शुक्रासः । धन्वंति । सोमाः । देवासः । तान् । उप । यात । पिबध्यै ॥२०॥

अरश्मानो रश्मिवर्जिता रज्जुरहिता इति यावत् । अरथा रथवर्जिता अयुक्ताः कुत्रापि न नियुक्ताः । अबद्धा इत्यर्थः । एतादृशा य आजौ युद्धे ससृजानासः सृज्यमाना अत्यासो नाश्वा यथा त्वरया लक्ष्यं गच्छंति तद्वदाजौ । अजंति कर्मकरणार्थमृत्विजोऽत्रेत्याजिर्यज्ञः । तस्मिन्सृज्यमानाः शुक्रा दीप्यमाना एते सोमा धन्वंति । क्षिप्रं कलशानभिगच्छंति । अथ प्रत्यक्षः । हे देवासो देवाः तानागच्छतः सोमान्पिबध्यै पानायोपयात । उपगच्छत ॥

॥ इति सप्तमस्य चतुर्थे चतुर्दशो वर्गः ॥

॥ अथैकविंशी ॥

एवा न इंदो अभि देववीतिं परि स्रव नभो अर्णश्चमूषु ।
सोमो अस्मभ्यं काम्यं बृहंतं रयिं ददातु वीरवंतमुग्रं ॥२१॥
एव । नः । इंदो इति । अभि । देवऽवीतिं । परि । स्रव । नभः । अर्णः । चमूषु ।
सोमः । अस्मभ्यं । काम्यं । बृहंतं । रयिं । ददातु । वीरऽवंतं । उग्रं ॥२१॥

हे इंदो सोम नोऽस्मदीयमेव देववीतिं । देवानां वीतिर्भक्षणं गमनं वा यस्मिन् स देववीतिर्यज्ञः । तमभिलक्ष्य नभो नभसो द्युलोकादर्णं उदकं । अनेन पवित्रान्निर्गतः सोमरसोऽभिधीयते । तं रसं चमूषु चमसेषु परि स्रव । परितः क्षर । ततः सोमः काम्यं काम्यमानं बृहंतं प्रवृद्धं वीरवंतं पुत्रयुक्तमुग्रमुद्गूर्णबलं रयिं धनमस्मभ्यं ददातु । प्रयच्छतु ॥

॥ अथ द्वाविंशी ॥

तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य वा धर्मणि क्षोरनीके ।
आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इंदुं ॥२२॥

तक्षत्। यदि। मनसः। वेनतः। वाक्। ज्येष्ठस्य। वा। धर्मणि। क्षोः। अनीके।
आत्। ईं। आयन्। वरं। आ। वावशानाः। जुष्टं। पतिं। कलशे। गावः। इंदुं ॥२२॥

वेनतः। वेनी वेनतेः कांतिकर्मण इति यास्कः। कामयमानस्य मनसः। मन्यतेः स्तुतिकर्मणः। स्तोतुर्वाक् स्तुतिलक्षणा यद्येनं तक्षत् संस्करोति। वाशब्द उपमार्थे। यथा धर्मणि। निमित्तात्कर्मसंयोग इति सप्तमी। धारकं योगक्षेमविषयं कर्मोद्दिश्य क्षोः शब्दायमानस्यानीके मुखे तत्र स्थितस्य जानपदिकस्य वाक्। ज्येष्ठस्य। द्वितीयार्थे षष्ठी। प्रशस्यतमं राजानं यथा स्तौति तथा स्तोतुर्वाक् सोमं स्तौतीत्यर्थः। आदनंतरमेव वरं वरणीयं जुष्टं देवानां मदाय पर्याप्तं पतिं सर्वस्य पालकं कलशे स्थितमिंदुमीमेनं सोमं वावशानाः कामयमाना गाव आयन्। पयसा स्वीयेन मिश्रयितुमागच्छंति ॥

॥ अथ त्रयोविंशी ॥

प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सुमेधाः।
धर्मा भुवद्वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम ॥२३॥

प्र। दानुऽदः। दिव्यः। दानुऽपिन्वः। ऋतं। ऋताय। पवते। सुऽमेधाः।
धर्मा। भुवत्। वृजन्यस्य। राजा। प्र। रश्मिऽभिः। दशऽभिः। भारि। भूम ॥२३॥

दिव्यो दिवि भवो दानुदो दातृभ्यो धनादीनां दाता। तदेवाह। दानुपिन्वः। पिवि सेचने। कर्मण्यणित्यण्। दातृभ्यः कामानां क्षरयिता सुमेधाः शोभनप्रज्ञः सोम ऋताय सत्यभूतायेंद्रायर्तं सत्यभूतमात्मीयं रसं पवते। प्रकर्षेण क्षरति। राजा दीप्यमानः सोमो वृजन्यस्य साधुबलस्य धर्मा धारयिता भुवत्। भवति। किंच दशभिरेतत्संख्याकाभी रश्मिभिः कर्मकरणार्थमश्नुवानाभिरंगुलिभिर्भूम प्रभूतं प्र भारि। प्रधार्यते। चिणि रूपं ॥

॥ अथ चतुर्विंशी ॥

पवित्रेभिः पवमानो नृचक्षा राजा देवानामुत मर्त्यानां।
द्विता भुवद्रयिपती रयीणामृतं भरत्सुभृतं चार्विंदुः ॥२४॥

पवित्रेभिः। पवमानः। नृऽचक्षाः। राजा। देवानां। उत। मर्त्यानां।
द्विता। भुवत्। रयिऽपतिः। रयीणां। ऋतं। भरत्। सुऽभृतं। चारु। इंदुः ॥२४॥

पवित्रेभिः पवित्रैः पवमानः पूयमानो नृचक्षा नृणां फलाफलयोर्द्रष्टा। तथा देवानामिंद्रादीनामुतापि च मर्त्यानां मनुष्याणामेवमुभयेषां जनानां राजा रयिपतिर्धनस्य पतिः। न त्वल्पस्य पतिः किंतु रयीणां बहूनां धनानां स्वामी। वृत्त्यवृत्तिभ्यां स्वामित्वं बाहुल्यं च विवक्ष्यते। ईदृशः सोमो द्विता द्विधा देवेष्वपि च मनुष्येषु भुवत्। भवति। सोऽयमिंदुः सोमः सुभृतं संभृतं चारु कल्याणमृतमुदकं भरत्। बिभर्ति॥

॥ अथ पंचविंशी ॥

अर्वाँ इव श्रवसे सातिमच्छेंद्रस्य वायोरभि वीतिमर्ष।

स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवित्पुनानः ॥२५॥

अर्वान्ऽइव। श्रवसे। सातिं। अच्छ। इंद्रस्य। वायोः। अभि। वीतिं। अर्ष।

सः। नः। सहस्रा। बृहतीः। इषः। दाः। भव। सोम। द्रविणःऽवित्। पुनानः॥२५॥

हे सोम अन्नार्थं युद्धेऽर्वानिवाश्वो यथा गच्छति तद्वत्त्वं श्रवसेऽस्माकमन्नार्थं तथा सातिमच्छ धनलाभं प्रतींद्रस्य वायोश्च वीतिं पानमभ्यर्ष। अभिगच्छ। ऐंद्रवायवग्रहे हींद्रवायू सह सोमं पिबत इत्यत्र सहोपादानं। स त्वं सहस्राः सहस्राणि बहुविधानि बृहतीर्बृंहितानि प्रवृद्धानीषोऽन्नानि नोऽस्मभ्यं दाः। प्रयच्छ। हे सोम पुनानः पूयमानस्त्वं नोऽस्मभ्यं द्रविणोविद्धनस्य लंभयिता भव। द्रविणशब्दात्सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः। पा० ७.१.५१.३। इति सुगागमः॥

॥ इति सप्तमस्य चतुर्थे पंचदशो वर्गः ॥

॥ अथ षड्विंशी ॥

देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वंतु सोमाः।

आयज्यवः सुमतिं विश्ववारा होतारो न दिवियजो मंद्रतमाः ॥२६॥

देवऽअव्यः। नः। परिऽसिच्यमानाः। क्षयं। सुऽवीरं। धन्वंतु। सोमाः।

आऽयज्यवः। सुऽमतिं। विश्वऽवाराः। होतारः। न। दिविऽयजः। मंद्रऽतमाः॥२६॥

देवाव्यः। अवतेस्तर्पणार्थस्य अवितृस्तृतंत्रिभ्य ईरितीप्रत्ययः। उदात्तस्वरितयोर्यण इति जसः स्वरितत्वं। देवानां तर्पयितारः परिषिच्यमानाः परितः

पात्रेषु सिच्यमानाः सोमा नोऽस्माकं सुवीरं शोभनपुत्रं क्षयं गृहं धन्वंतु । प्रेरयंतु । कीदृशाः । होतारो न होतारो यथा देवानिंद्रादीन्स्तुवंत्येवं दिवियजो दिवि द्युलोके स्थितानिंद्रादीन्देवान्यजंतः । दिव्शब्दे तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् । मंद्रतमा अत्यंतं मदकराः ॥

॥ अथ सप्तविंशी ॥

एवा दे॑व दे॒वता॑ते पवस्व म॒हे सो॑म॒ प्सर॑से दे॒वपा॑नः ।
म॒हश्चि॒द्धि ष्मसि॑ हि॒ताः स॑म॒र्ये कृ॒धि सु॑ष्ठा॒ने रोद॑सी पुना॒नः ॥२७॥

एव । दे॒व॒ । दे॒व॒ऽता॑ते । प॒व॒स्व॒ । म॒हे । सो॒म॒ । प्सर॑से । दे॒व॒ऽपानः॑ ।
म॒हः । चि॒त् । हि । स्मसि॑ । हि॒ताः । स॒ऽम॒र्ये । कृ॒धि । सु॒स्था॒ने इति॑ सु॒ऽस्था॒ने । रोद॑सी॒ इति॑ । पु॒ना॒नः ॥२७॥

हे देव द्योतमान स्तोतव्य वा हे सोम देवपानो देवैः पातव्यस्त्वं देवताते देवैस्तते वितते यज्ञे महे महते प्सरसे भक्षणाय देवानां पानायैवैवं पवस्व । क्षर । ततो वयं हितास्त्वया प्रेरिताः संतः समर्ये मरणधर्मसहिते संग्रामे महश्चित् महतो बलाधिकानपि शत्रून् स्मसि हि । अभिभवेम खलु । किंच । पुनानः पूयमानस्त्वं रोदसी द्यावापृथिव्यौ सुस्थाने अस्माकं शोभनावासस्थाने सत्यौ कृधि । कुरु ॥

॥ अथाष्टाविंशी ॥

अश्वो॒ न क्र॑दो॒ वृष॑भिर्युजा॒नः सिं॒हो न भी॒मो मन॑सो॒ जवी॑यान् ।
अ॒र्वा॒ची॒नैः प॒थिभि॒र्ये रजि॑ष्ठा॒ आ प॑वस्व सौमन॒सं न॑ इंदो ॥२८॥

अश्वः॑ । न । क्र॒दः॒ । वृष॑ऽभिः । यु॒जा॒नः । सिं॒हः । न । भी॒मः । मन॑सः । जवी॑यान् ।
अ॒र्वा॒ची॒नैः॑ । प॒थिऽभिः॑ । ये । रजि॑ष्ठाः । आ । प॒व॒स्व॒ । सौ॒म॒न॒सम् । नः॒ । इं॒दो॒ इति॑ ॥२८॥

हे सोम वृषभिर्ऋत्विग्भिः सोममभिषुण्वद्भिर्युजानो योज्यमानस्त्वमश्वो नाश्व इव क्रदः । क्रंदसि । शब्दायसे । कीदृशः । सिंहो न सिंह इव भीमः शत्रूणां भयंकरः । तथा मनसोऽपि जवीयान् वेगवत्तरः । अर्वाचीनैरभिमुखैः पथिभिर्मार्गैर्ये मार्गा रजिष्ठा अत्यंतमृजवो भवंति । विभाषर्जोश्छंदसीत्यृकारस्य रादेशः । हे इंदो दीप्यमान सोम तैर्मार्गैर्नोऽस्माकं सौमनसं सौमनस्यमा पवस्व । आप्रापय ॥

॥ अथैकोनत्रिंशी ॥

शतं धारा॑ देवजा॑ता असृग्रन्त्सहस्र॑मेनाः कवयो॑ मृजंति ।
इंदो॑ सनित्रं॑ दिव आ प॑वस्व पुरएतासि॑ महतो धनस्य ॥२९॥
शतं । धारा॑ः । देवऽजा॑ताः । असृग्रन् । सहस्रं॑ । एनाः । कवयः॑ । मृजंति ।
इंदो॒ इति॑ । सनित्रं॑ । दिवः । आ । पवस्व । पुरःऽएता । असि । महतः । धनस्य ॥२९॥

हे सोम देवजाता देवार्थं प्रादुर्भूताः शतं शतसंख्याकास्त्वदीया धारा असृग्रन् । सृज्यंते । ततः कवयः क्रांतदर्शिन ऋत्विजः सहस्रं बहुविधा एनास्त्वदीया धारा मृजंति । अलंकुर्वंति । यद्वा । सहस्रमनेकधा मृजंति । शोधयंति । हे इंदो सनित्रं भजनसाधनं धनं दिवो द्युलोकादस्माकं पुत्रादीनां चा पवस्व । आप्रापय । कुतोऽस्य धनमिति चेत् तत्राह । महतः प्रभूतस्य धनस्य पुरएता पुरतो गंतासि । भवसि । तस्माद्देहीति ॥

॥ अथ त्रिंशी ॥

दिवो न सर्गा॑ अससृग्रमह्नां॑ राजा न मित्रं प्र मि॑नाति धीरः॑ ।
पितुर्न पुत्रः क्रतुभिर्यतान आ प॑वस्व विशे अस्या अजी॑तिं ॥३०॥
दिवः । न । सर्गाः॑ । अससृग्रं । अह्नां॑ । राजा॑ । न । मित्रं । प्र । मिनाति । धीरः॑ ।
पितुः । न । पुत्रः । क्रतुऽभिः । यतानः । आ । पवस्व । विशे । अस्यै । अजी॑तिं ॥३०॥

दिवो न यथा दिवो द्योतमानस्यादित्यस्याह्नां संबंधिनः सर्गा रश्मयोऽससृग्रं विसृज्यंते तद्वत्सोमस्य सर्गाः सृज्यंत इति सर्गा धारा विसृज्यंते ॥ सृजेर्व्यत्ययेन कर्मार्थे लङि बहुलं छंदसीति शस्य श्लुः । रुडागमादेशश्छांदसः ॥ धीरः प्राज्ञो राजायं सोमो मित्रं सखायं न प्र मिनाति । न हिनस्ति । क्रतुभिः कर्मभिर्यतानो यतमानः पुत्रः पितुर्न पितुर्यथापराभवं करोति तद्वत् कर्मभिर्यतमानस्त्वमस्यै विशे प्रजाया अजीतिमपराभवमा पवस्व । आप्रापय । यथा न पराजिता भवंति तथा कुर्वित्यर्थः ॥

॥ इति सप्तमस्य चतुर्थे षोडशो वर्गः ॥

॥ अथैकत्रिंशी ॥

प्र ते धारा मधुमतीरसृग्रन्वारान्यत्पूतो अत्येष्यव्यान् ।
पवमान पवसे धाम गोनां जज्ञानः सूर्यमपिन्वो अर्कैः ॥३१॥

प्र । ते । धाराः । मधुऽमतीः । असृग्रन् । वारान् । यत् । पूतः । अतिऽएषि । अव्यान् ।
पवमान । पवसे । धाम । गोनां । जज्ञानः । सूर्यं । अपिन्वः । अर्कैः ॥३१॥

ते तव स्वभूता मधुमतीर्मधुमत्यो धाराः प्रासृग्रन् तदा प्रसृज्यंते यद्यदा पूतो वसतीवरीभिस्त्वमव्यानविभवान्वारान्वालान्पविचाण्यत्येषि । अतीत्य गच्छसि । किंच । हे पवमान धाम धारकं गोनां गवां पयो लक्ष्यीकृत्य पवसे । ततो जज्ञानो जायमानस्त्वमर्कैरर्चनीयैः स्वतेजोभिः सूर्यमादित्यमपिन्वः । पूरयसि ॥

॥ अथ द्वात्रिंशी ॥

कनिक्रददनु पंथामृतस्य शुक्रो वि भास्यमृतस्य धाम ।
स इंद्राय पवसे मत्सरवान्हिन्वानो वाचं मतिभिः कवीनां ॥३२॥

कनिक्रदत् । अनु । पंथां । ऋतस्य । शुक्रः । वि । भासि । अमृतस्य । धाम ।
सः । इंद्राय । पवसे । मत्सरऽवान् । हिन्वानः । वाचं । मतिऽभिः । कवीनां ॥३२॥

अभिषूयमाणः स सोम ऋतस्य सत्यभूतस्य यज्ञस्य पंथानं मार्गमभि कनिक्रदत् । पुनः पुनः शब्दायते । अथ प्रत्यक्षः । अमृतस्यामरणधर्मस्य धाम स्थानभूतः । मरणरहित इत्यर्थः । तादृशः शुक्रः शुक्लवर्णस्त्वं वि भासि । विशेषेण राजसि । मत्सरवान् मदकररसयुक्तः स त्वमिंद्रायेंद्रार्थं पवसे । क्षरसि । कीदृशः । कवीनां स्तोतॄणां मतिभिः सह वाचं शब्दं हिन्वानः प्रेरयन् ॥

॥ अथ त्रयस्त्रिंशी ॥

दिव्यः सुपर्णोऽव चक्षि सोम पिन्वन्धाराः कर्मणा देववीतौ ।
एंदो विश कलशं सोमधानं क्रंदन्निहि सूर्यस्योप रश्मिं ॥३३॥

दिव्यः । सुऽपर्णः । अव । चक्षि । सोम । पिन्वन् । धाराः । कर्मणा । देवऽवीतौ ।
आ । इंदो इति । विश । कलशं । सोमऽधानं । क्रंदन् । इहि । सूर्यस्य । उप । रश्मिं ॥३३॥

हे सोम दिव्यो दिविभवः सुपर्णः सुपतनस्त्वमव चक्षि । अवस्तात्पश्य ।

चष्टेर्लेटि सिपि व्यत्ययेन परस्मैपदं। किं कुर्वन्। देववीतौ देवानां हविर्भक्षण-स्थाने यज्ञे कर्मणा धाराः पिन्वन् क्षरन्। किंच। हे इंदो सोमधानं कलशमा विश क्रंदन् शब्दायमानस्त्वं सूर्यस्य प्रेरकस्यादित्यस्य रश्मिं कांतिमुपेहि। उपगच्छ ॥

॥ अथ चतुस्त्रिंशी ॥

तिस्रो वाचं ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषां।
गावो यंति गोपतिं पृच्छमानाः सोमं यंति मतयो वावशानाः ॥३४॥

तिस्रः। वाचंः। ईरयति। प्र। वह्निः। ऋतस्यं। धीतिं। ब्रह्मणः। मनीषां।
गावंः। यंति। गोऽपतिं। पृच्छमानाः। सोमं। यंति। मतयंः। वावशानाः ॥३४॥

वह्निर्वोढा यजमानस्तिस्रो वाच ऋग्यजुःसामात्मिकाः स्तुतीः प्रेरयति। तथर्तस्य यज्ञस्य धीतिं धारयित्रीं ब्रह्मणः परिवृढस्य सोमस्य मनीषां मनस ईशित्रीं कल्याणीं वाचं च प्रेरयति। किंच। गोपतिं वृषभं यथा गावोऽभिगच्छंति तद्वद्गवां स्वामिनं सोमं गावः पृच्छमानाः पृच्छंत्यः सत्यो यंति। स्वपयसा मिश्रयितुमभिगच्छंति। तथा वावशानाः कामयमाना मतयः स्तोतारः सोमं यंति। स्तोतुमभिगच्छंति ॥

॥ अथ पंचत्रिंशी ॥

सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः।
सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवंते ॥३५॥

सोमं। गावंः। धेनवंः। वावशानाः। सोमं। विप्राः। मतिऽभिः। पृच्छमानाः।
सोमंः। सुतः। पूयते। अज्यमानः। सोमे। अर्काः। त्रिऽस्तुभंः। सं। नवंते ॥३५॥

धेनवः प्रीणयित्र्यो गावः सोमं वावशानाः कामयमाना भवंति। विप्रा मेधाविनः स्तोतारो मतिभिः पृच्छमानाः पृच्छंतो भवंति। अज्यमानो गोभिः सिच्यमानः सुतोऽभिषुतः सोम ऋत्विग्भिः परिपूयते। तथा त्रिष्टुभस्त्रिष्टुब्रूपा अर्का अस्माभिः क्रियमाणा एते मंत्राः सोमे सं नवंते। संगच्छंते ॥

॥ इति सप्तमस्य चतुर्थे सप्तदशो वर्गः ॥

॥ अथ षट्त्रिंशी ॥

एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
इंद्रमा विश बृहता रवेण वर्धया वाचं जनया पुरंधिं ॥३६॥

एव । नः । सोम । परिऽसिच्यमानः । आ । पवस्व । पूयमानः । स्वस्ति ।
इंद्रं । आ । विश । बृहता । रवेण । वर्धय । वाचं । जनय । पुरंऽधिं ॥३६॥

हे सोम परिषिच्यमानः परितः पात्रेषु सिच्यमानः पूयमानस्त्वं नोऽस्माकमेव स्वस्त्यविनाशमा पवस्व । आप्रापय । किंच । बृहता महता रवेण शब्देन सहेंद्रमा विश । प्रविश । तथा वाचं स्तुतिलक्षणां वर्धय । किंच पुरंधिं बहुधि प्रज्ञानं जनय । अस्मभ्यमुत्पादय । वाक्यभेदादनिघातः ॥

॥ अथ सप्तत्रिंशी ॥

आ जागृविर्विप्र ऋता मतीनां सोमः पुनानो असदच्चमूषु ।
सपंति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥३७॥

आ । जागृविः । विप्रः । ऋता । मतीनां । सोमः । पुनानः । असदत् । चमूषु ।
सपंति । यं । मिथुनासः । निऽकामाः । अध्वर्यवः । रथिरासः । सुऽहस्ताः ॥३७॥

जागृविर्जागरणशील ऋता । सुपां सुलुगिति षष्ठ्या आकारः । ऋतानां सत्यानां मतीनां स्तुतीनां विप्रो ज्ञाता स सोमः पुनानः पूयमानः सन् चमूषु चमसेष्वासदत् । आसीदति । मिथुनासः परस्परं संगता निकामा नितरां कामयमाना रथिरासो यज्ञस्य नेतारः सुहस्ताः कल्याणपाणयोऽध्वर्यवः पवित्रे यं सोमं सपंति । स्पृशंति ॥ षप समवाये । सपतिः स्पृशतिकर्मेति नैरुक्ताः ॥

॥ अथाष्टात्रिंशी ॥

स पुनान उप सूरे न धातोभे अप्रा रोदसी वि ष आवः ।
प्रिया चिद्यस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसत् ॥३८॥

सः । पुनानः । उप । सूरे । न । धाता । आ । उभे इति । अप्राः । रोदसी इति । वि ।
सः । आवरित्यावः ।
प्रिया । चित् । यस्य । प्रियसासः । ऊती । सः । तु । धनं । कारिणे । न । प्र । यंसत् ॥३८॥

पुनानः पूयमानः स सोम इंद्रं उपगच्छति। तत्र दृष्टांतः। सूरे न। यथा सूर्ये धाता संवत्सर उपगच्छति। संवत्सरो वै धाता संवत्सरेणैवास्मै प्रजाः प्रजनयतीत्याम्नानात्। किंचोभे रोदसी द्यावापृथिव्यावाप्राः। स्वमहिम्नापूरयति। तथा स सोमो व्यावः। स्वतेजसा तमांसि विवृणोति। वृणोतेर्मंत्रे घसेति च्लेर्लुक्। छंदस्यपि दृश्यत इत्याडागमः। पूर्वपदादिति स इत्यस्य सांहितिकं षत्वं। प्रिया। षष्ठ्या आकारः। प्रियस्य यस्य सोमस्य यद्वा प्रियाणि प्रयच्छतो यस्य सोमस्य प्रियतमासोऽत्यंतं प्रियतमा धारा ऊती ऊत्यै रक्षणाय भवंति। स तु क्षिप्रमस्मभ्यं धनं प्रयंसत्। प्रयच्छतु। यच्छतेर्लेटि सिप्यडागमः। तत्र दृष्टांतः। कारिणे न भृतकाय भृतिं यथा प्रयच्छंति तद्वत्॥

॥ अथैकोनचत्वारिंशी ॥

स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत्।
येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ॥३९॥

सः। वर्धिता। वर्धनः। पूयमानः। सोमः। मीढ्वान्। अभि। नः। ज्योतिषा। आवीत्।
येन। नः। पूर्वे। पितरः। पदऽज्ञाः। स्वःऽविदः। अभि। गाः। अद्रिं। उष्णन् ॥३९॥

वर्धिता देवानां स्वकलाप्रदानेन वर्धयिता वर्धनः स्वयं वर्धमानः पवित्रेण पूयमानो मीढ्वान् कामानां सेक्ता स सोमो नोऽस्माकं ज्योतिषा स्वतेजसाभ्यावीत्। अभिरक्षतु। येन सोमेन पदज्ञाः पणिभिरपहृतानां गवां पदानि जानंतः स्वर्विदः सर्वज्ञाः सूर्यं जानंतो वा नोऽस्माकं पूर्वे चिरंतनाः पितरोऽंगिरसो गाः पशूनभिलक्ष्याद्रिमुष्णन्। शिलोच्चयमुष्णन्। सोमतेजसांधकारावृतं शिलोच्चयं गत्वा पशूनाहरन्नित्यर्थः। उषिरिह मुष्णातिसमानकर्मा। यद्वा। मुष्णातेर्लङि वर्णलोपः॥

॥ अथ चत्वारिंशी ॥

अक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इंदुः ॥४०॥

अक्रान्। समुद्रः। प्रथमे। विऽधर्मन्। जनयन्। प्रऽजाः। भुवनस्य। राजा।
वृषा। पवित्रे। अधि। सानौ। अव्ये। बृहत्। सोमः। ववृधे। सुवानः। इंदुः ॥४०॥

समुद्रो यस्मादापः संद्रवंति स समुद्रोऽपां वर्षको राजा सोमः प्रथमे विस्तृते भुवनस्योदकस्य विधर्मन् विधारकेऽतरिक्षे प्रजा जनयन् उत्पादयन् अक्रान्। सर्वमतिक्रामति ॥ क्रमतेर्लुङि तिपीडभावे वृद्धौ च कृतायां सिच्लोपे मकारस्य मो नो धातोरिति नकाररूपं ॥ वृषा कामानां वर्षिता सुवानोऽभिषूयमाण इंदुर्दीप्तः स सोमोऽध्यधिकं सानौ समुच्छ्रितेऽव्येऽविभवे पवित्रे बृहत्प्रभूतं ववृधे। वर्धते ॥

॥ इति सप्तमस्य चतुर्थेऽष्टादशो वर्गः ॥

॥ अथैकचत्वारिंशी ॥

महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्।
अदधादिंद्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिंदुः ॥४१॥

महत्। तत्। सोमः। महिषः। चकार। अपां। यत्। गर्भः। अवृणीत। देवान्।
अदधात्। इंद्रे। पवमानः। ओजः। अजनयत्। सूर्ये। ज्योतिः। इंदुः ॥४१॥

महिषो महान्पूज्यो वा सोमो महत्प्रभूतं तत्कर्म चकार। अकरोत्। किं तत्। अपां गर्भ उदकानां गर्भभूतो जनयितृत्वाज्जन्यत्वाच्च स सोमो देवानवृणीत समभजतेति यत्तत्कृतवानिति। किंच पवमानः पूयमानः सोम ओजः सोमपानेन जन्यं बलमिंद्रेऽदधात्। व्यदधात्। तथेंदुः सोमः सूर्ये ज्योतिस्तेजोऽजनयत् ॥

॥ अथ द्विचत्वारिंशी ॥

मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम ॥४२॥

मत्सि। वायुं। इष्टये। राधसे। च। मत्सि। मित्रावरुणा। पूयमानः।
मत्सि। शर्धः। मारुतं। मत्सि। देवान्। मत्सि। द्यावापृथिवी इति। देव। सोम ॥४२॥

हे सोम त्वं वायुं मत्सि। मादय। किमर्थं। इष्टये। अस्माकमेषणायान्नाय राधसे धनाय च। तथा पूयमानः पवित्रेण त्वं मित्रावरुणा मित्रावरुणौ च मत्सि। तर्पयसि। किंच। मारुतं मरुतां स्वभूतं शर्धो बलं च मत्सि। तथा देवानिंद्रादीन्मत्सि। हर्षयसि। हे देव स्तोतव्य हे सोम द्यावापृथिव्यौ च मत्सि। मादय। एतान्हर्षयुक्तान्कृत्वास्मभ्यं धनं प्रयच्छेत्यर्थः ॥

॥ अथ त्रिचत्वारिंशी ॥

ऋजुः पवस्व वृजिनस्य हंतापामीवां बाधमानो मृधश्च ।
अभिश्रीणन्पयः पयसाभि गोनामिंद्रस्य त्वं तव वयं सखायः ॥४३॥

ऋजुः । पवस्व । वृजिनस्य । हंता । अप । अमीवां । बाधमानः । मृधः । च ।
अभिऽश्रीणन् । पयः । पयसा । अभि । गोनां । इंद्रस्य । त्वं । तव । वयं । सखायः ॥४३॥

हे सोम ऋजुर्ऋजुगमनः सन् पवस्व । क्षर । किंकुर्वन् । वृजिनस्योपद्रवस्य हंता । अमीवां रोगरूपं राक्षसमपबाधमानः । तथास्मदीयान्मृधो हिंसकाञ्शत्रूंश्च बाधमानः सन् पवस्व । ततः पय आत्मीयं रसं गोनां गवां पयसा क्षीरेणाभिश्रीणन् अभिसंयोजयन् पात्राण्यभि । गच्छसि । अपि च त्वमिंद्रस्य सखासि हे सोम तव वयं सखायः स्तुत्यस्तोतृत्वयष्टृयष्टव्यत्वलक्षणेन सखिभूताः स्मः ॥

॥ अथ चतुश्चत्वारिंशी ॥

मध्वः सूदं पवस्व वस्व उत्सं वीरं च न आ पवस्वा भगं च ।
स्वदस्वेंद्राय पवमान इंदो रयिं च न आ पवस्वा समुद्रात् ॥४४॥

मध्वः । सूदं । पवस्व । वस्वः । उत्सं । वीरं । च । नः । आ । पवस्व । भगं । च ।
स्वदस्व । इंद्राय । पवमानः । इंदो इति । रयिं । च । नः । आ । पवस्व । समुद्रात् ॥४४॥

हे सोम मध्वो माधुर्यस्य सूदं क्षारयितारं घनीभूतं वा वस्वो वसुनो धनस्योत्समुत्स्यंदकं रसं पवस्व । किंच । नोऽस्मभ्यं वीरं पुत्रमा पवस्व । आप्रापय । तथा भगं भजनीयं धनं च देहि । हे इंदो पवमानः पूयमानः सन् इंद्राय स्वदस्व । रुचितो भव । ततस्त्वं नोऽस्मभ्यं समुद्रादंतरिक्षाद्रयिं धनं पुत्रं वा । राति ददाति क्षीरमिति रयिर्गौर्वा । तां वा पवस्व । देहि ॥

॥ अथ पंचचत्वारिंशी ॥

सोमः सुतो धारयात्यो न हित्वा सिंधुर्न निम्नमभि वाज्यक्षाः ।
आ योनिं वन्यमसदत्पुनानः समिंदुर्गोभिरसरत्समद्भिः ॥४५॥

सोमः । सुतः । धारया । अत्यः । न । हित्वा । सिंधुः । न । निम्नं । अभि । वाजी । अक्षारिति ।
आ । योनिं । वन्यं । असदत् । पुनानः । सं । इंदुः । गोभिः । असरत् । सं । अत्ऽभिः ॥४५॥

सुतोऽभिषुतः सोमो धारया स्वीययात्यो नातनशीलोऽश्व इव हित्वा गत्वा। हिनोतेः क्तनिपि रूपं । किंच । वाजी बलवान् सोमः सिंधुर्न यथा सिंधुः स्यंदमाना नदी निम्नं प्रदेशमभिगच्छति तद्वन्निम्नमधरभाविनं कलशमभ्यक्षाः। अभिक्षरति । ततः पुनानः पूयमानः सोमो वन्यं वृक्षभवं योनिं योनिस्थानं कलशमासदत् । आसीदति । सोऽयमिंदुः सोमो गोभिर्गोविकारैः क्षीरादिभिः श्रयणैः समसरत् । संसरति । तथाद्भिर्वसतीवरीभिश्च संगच्छते ॥

॥ इति सप्तमस्य चतुर्थ एकोनविंशो वर्गः ॥

॥ अथ षट्चत्वारिंशी ॥

एष स्य ते पवत इंद्र सोमश्चमूषु धीर उशते तवस्वान्।
स्वर्चक्षा रथिरः सत्यशुष्मः कामो न यो देवयतामसर्जि ॥४६॥

एषः । स्यः । ते । पवते । इंद्र । सोमः । चमूषु । धीरः । उशते । तवस्वान् ।
स्वःऽचक्षाः । रथिरः । सत्यऽशुष्मः । कामः । न । यः । देवऽयतां । असर्जि ॥४६॥

हे इंद्र उशते कामयमानाय ते तुभ्यं त्वदर्थं धीरः प्राज्ञस्तवस्वान्वेगवान् स्यः स एष सोमश्चमूषु चमसेषु पवते । क्षरति । स्वर्चक्षाः सर्वदर्शनो रथिरो रथवान् सत्यशुष्मो यथार्थबलो यः सोमो देवयतां देवानिच्छतां यजमानानां कामो न कामद इवासर्जि । असृज्यत । अदीयतेत्यर्थः ॥

॥ अथ सप्तचत्वारिंशी ॥

एष प्रत्नेन वयसा पुनानस्तिरो वर्पांसि दुहितुर्दधानः ।
वसानः शर्म त्रिवरूथमप्सु होतेव याति समनेषु रेभन् ॥४७॥

एषः । प्रत्नेन । वयसा । पुनानः । तिरः । वर्पांसि । दुहितुः । दधानः ।
वसानः । शर्म । त्रिऽवरूथं । अप्ऽसु । होताऽइव । याति । समनेषु । रेभन् ॥४७॥

प्रत्नेन पूर्वकालीनेन वयसान्नेन पुनानः पूयमानः । अन्नात्मिकया धारया क्षरन्नित्यर्थः । तादृशो दुहितुः सर्वस्य दोग्ध्र्याः पृथिव्याः वर्पांसि । वर्प इति रूपनाम वृणोति शरीरमिति । रूपाणि तिरो दधानः स्वतेजसा तिरस्कुर्वन् आच्छादयन् तथा त्रिवरूथं त्रिभूमिकोपेतं । यद्वा त्रयः शीतातपवर्षाः । तेषां निवारकं शर्म यज्ञगृहं वसान आच्छादयन् अप्सु वसतीवरीषु स्थित एष सोमो

होतेव यथा होता स्तुतिध्वनिं कुर्वन्यज्ञेषु याति तद्वद्रेभन् शब्दायमानः सन् समनेषु। समंति कर्माणि धृष्टाः प्रगल्भा यंत्यत्रेति समना यज्ञाः। तेषु याति। गच्छति॥

॥ अथाष्टाचत्वारिंशी ॥

नू नस्त्वं रथिरो देव सोम परि स्रव चम्वोः पूयमानः।
अप्सु स्वादिष्ठो मधुमाँ ऋतावा देवो न यः सविता सत्यमन्मा ॥४८॥

नु। नः। त्वं। रथिरः। देव। सोम। परि। स्रव। चम्वोः। पूयमानः।
अप्ऽसु। स्वादिष्ठः। मधुऽमान्। ऋतऽवा। देवः। न। यः। सविता। सत्यऽमन्मा॥४८॥

हे देव काम्यमान हे सोम रथिरो रथवांस्त्वं नोऽस्माकं स्वभूते यज्ञे चम्वोरधिषवणफलकयोः पूयमानः सन् अप्सु वसतीवरीषु नु क्षिप्रं परि स्रव। परितः क्षर। स्वादिष्ठः स्वादुतमोऽत एव मधुमान्माधुर्ययुक्त ऋतवान् यज्ञवान्सविता सर्वस्य प्रेरको यस्त्वं देवो न देव इव सत्यमन्मा सत्यस्तुतिको भवसि स त्वं परिस्रवेति॥

॥ अथैकोनपंचाशी ॥

अभि वायुं वीत्यर्षा गृणानो३ऽभि मित्रावरुणा पूयमानः।
अभी नरं धीजवनं रथेष्ठामभींद्रं वृषणं वज्रबाहुं ॥४९॥

अभि। वायुं। वीती। अर्ष। गृणानः। अभि। मित्रावरुणा। पूयमानः।
अभि। नरं। धीऽजवनं। रथेऽस्थां। अभि। इंद्रं। वृषणं। वज्रऽबाहुं ॥४९॥

हे सोम गृणानः स्तूयमानस्त्वं वीती। सुपां सुलुगिति चतुर्थ्याः पूर्वसवर्णदीर्घः। वीत्यै पानाय वायुमभ्यर्ष। अभिगच्छ। तथा पवित्रेण पूयमानस्त्वं मित्रावरुणा मित्रावरुणौ च पानायाभिगच्छ। किंच नरं सर्वस्य नेतारं धीजवनं बुद्ध्या समं वेगं कुर्वाणं रथेष्ठां रथेस्थां रथे तिष्ठंतं। अनेनाश्विनावभिधीयेते। एकवचनं प्रत्येकविवक्षया समुदायविवक्षया वा। एतादृशावश्विनौ चाभिगच्छ। तथा वृषणं कामानां वर्षकं वज्रबाहुं वज्रयुक्तबाहुमिंद्रं च त्वं पानायाभिगच्छ॥

॥ अथ पंचाशी ॥

अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः।
अभि चंद्रा भर्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥५०॥

अभि । वस्त्रा । सुऽवसनानि । अर्ष । अभि । धेनूः । सुऽदुघाः । पूयमानः ।
अभि । चंद्रा । भर्तवे । नः । हिरण्या । अभि । अश्वान् । रथिनः । देव । सोम ॥५०॥

हे सोम त्वमस्माकं सुवसनानि सुपरिधानानि वस्त्रा वस्त्राण्यभ्यर्ष । अभिगमय । यद्वा । सुवसनानि शोभनवस्त्रसहितानि वस्त्राच्छादकानि धनान्यभिगमय । किंच । पूयमानः पवित्रेण त्वं सुदुघाः सुष्ठु पयसो दोग्ध्रीर्धेनूर्नवप्रसूतिका गा अभिप्रापय । अपि च । चंद्रा चंद्राण्याह्लादकानि हिरण्या हिरण्यानि भर्तवे भरणाय पोषणाय नोऽस्माकमभिगमय । तथा हे देव स्तोतव्य हे सोम रथिनो रथवतोऽश्वानस्माकमभिप्रापय ॥

॥ इति सप्तमस्य चतुर्थे विंशो वर्गः ॥

॥ अथैकपंचाशी ॥

अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।
अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ॥५१॥
अभि । नः । अर्ष । दिव्या । वसूनि । अभि । विश्वा । पार्थिवा । पूयमानः ।
अभि । येन । द्रविणं । अश्नवाम । अभि । आर्षेयं । जमदग्निऽवत् । नः ॥५१॥

हे सोम पवित्रेण पूयमानस्त्वं दिव्या दिव्यानि दिवि भवानि वसूनि धनानि नोऽस्माकमभ्यर्ष । अभिगमय । तथा पार्थिवा पार्थिवानि पृथिव्यां भवानि विश्वा सर्वाणि धनान्यभिगमय । तथा येन त्वदीयेन सामर्थ्येन द्रविणं धनं वयमभ्यश्नवामाभिव्याप्नुयाम तत्सामर्थ्यमभिगमय । किंच आर्षेयमार्षाणामृषिपुत्राणां योग्यं धनं जमदग्निवज्जमदग्नेर्यथा त्वं प्रापय एवं नोऽस्माकमप्यभ्यर्ष । यद्वा । आर्षेयमार्षाणां योग्यं मंत्रं जमदग्नेः स्वभूतं मंत्रं यथा स्वादुतममकार्षीरेवमस्माकं तादृशं मंत्रं स्वादुतमं कुर्विति कुत्सो नामर्षिः प्रार्थयते ॥

॥ अथ द्विपंचाशी ॥

अया पवा पवस्वैना वसूनि मांश्चत्व इंदो सरसि प्र धन्व ।
ब्रध्नश्चिदत्र वातो न जूतः पुरुमेधश्चित्तकवे नरं दात् ॥५२॥
अया । पवा । पवस्व । एना । वसूनि । मांश्चत्वे । इंदो इति । सरसि । प्र । धन्व ।
ब्रध्नः । चित् । अत्र । वातः । न । जूतः । पुरुऽमेधः । चित् । तकवे । नरं । दात् ॥५२॥

हे सोम अयानया पवा पवमानया धारया सहस्रैनानि वसूनि धनानि पवस्व। क्षर॥ पवा। पूङ् पवने। अन्येभ्योऽपि दृश्यंत इति विच्प्रत्ययः। आर्धधातुकलक्षणो गुणः। सावेकाच इति तृतीयाया उदात्तत्वं॥ तथा हे इंदो त्वं मांश्चत्वे मन्यमानानां चातके सरस्युदके वसतीवर्याख्ये प्र धन्व। प्रगच्छ। ततोऽचास्मिन्सोमे पूयमाने सति ब्रध्नश्चित् सर्वेषां प्रज्ञापको मूलभूतो वादित्योऽपि वातो न वात इव जूतो वेगितः सन्। किंच पुरुमेधश्चिद्बहुविधयज्ञ इंद्रश्चिदिंद्रोऽपि तकवे॥ तकतिर्गतिकर्मसु पठितः। अस्मादौणादिक उन्प्रत्ययः॥ सोममभिगच्छते स्तुतिभिर्मह्यं नरं कर्मनेतारं पुत्रं दात्। प्रयच्छतु। हे सोम त्वया तर्पितौ संताविंद्रादित्यौ मह्यं पुत्रं प्रयच्छतामित्यर्थः॥

॥ अथ त्रिपंचाशी॥

उत नं एना पंवया पंवस्वाधि श्रुते श्रवाय्यंस्य तीर्थे।

षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय॥५३॥

उत। नः। एना। पवया। पवस्व। अधि। श्रुते। श्रवाय्यस्य। तीर्थे।

षष्टिं। सहस्रा। नैगुतः। वसूनि। वृक्षं। न। पक्वं। धूनवत्। रणाय॥५३॥

हे सोम उतापि च श्रवाय्यस्य सर्वैः श्रवणीयस्य सोमस्य तव श्रुते प्रसिद्धे। यद्वा। षष्ठ्यर्थे चतुर्थी। श्रुतस्य शब्दस्य तीर्थे स्थाने नोऽस्माकं स्वभूते यज्ञ एनानया पवया पूयमानया धारयाध्यधिकं पवस्व। क्षर। नैगुतः। नीचीनं गवंते शब्दायंत इति निगुतः शत्रवः। तेषां हंतृत्वेन संबंधी सोऽयं सोमः षष्टिं सहस्रा षष्टिसंख्याकानि सहस्राणि वसूनि धनानि रणाय शत्रूणां जयार्थं धूनवत्। अस्माकमकंपयत्। प्रायच्छदिति यावत्। कथमिव। वृक्षं न पक्वं। पक्वफलं वृक्षं यथा कंपयति फलार्थी तद्वत्॥

॥ अथ चतुःपंचाशी॥

महीमे अस्य वृषनाम शूषे मांश्चत्वे वा पृशने वा वधंत्रे।

अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः॥५४॥

महि। इमे इति। अस्य। वृषनाम। शूषे इति। मांश्चत्वे। वा। पृशने। वा। वधंत्रे इति।

अस्वापयत्। निऽगुतः। स्नेहयत्। च। अप। अमित्रान्। अप। अचितः। अच। इतः॥५४॥

महि महती प्रभूते वृषनाम । सुपां सुलुगिति सुपो लुक् । वृषनामनी वर्षणनमने । शराणां वर्षणं शत्रूणां नमनं । इमे एते द्वे कर्मणी अस्य सोमस्य शूषे सुखकरे भवतः । ये च कर्मणी मांश्चत्वे । अश्वनामैतत् । मक्षु चरतीति । अश्वैः क्रियमाणे युद्धे । तत्साध्यत्वाद्युद्धमिह गृह्यते । वापि वा स्पृशने स्पर्शनसाध्ये बाहुयुद्धे वधत्रे शत्रूणां हिंसनशीले भवतः । सोऽयं निगुतो नीचैः शब्दायमानाञ्शत्रूनस्वापयत् । ताभ्यामसूषुपत् । अवधीदित्यर्थः । किंच स्नेहयत् प्राद्रवयत्संग्रामाच्छत्रून् । अथ प्रत्यक्षकृतः । हे सोम स त्वममित्राञ्शत्रूनपाच । अपगमय । तथाचितोऽग्निचयनमकुर्वतो नास्तिकांश्चेतोऽस्मत्सकाशादपाच । अपगमय । अचतिर्गतिकर्मा ॥

॥ अथ पंचपंचाशत्तमी ॥

त्वं त्री प॒वित्रा॒ वित॑तान्ये॒ष्यन्वेकं॑ धावसि पू॒यमा॑नः ।
असि॒ भगो॒ असि॑ दा॒त्रस्य॑ दा॒तासि॑ म॒घवा॑ म॒घव॑द्भ्य इंदो ॥५५॥

त्वं । त्री । प॒वित्रा॑ । वि॒ऽत॑तानि । ए॒षि॒ । अनु॑ । एकं॑ । धा॒व॒सि॒ । पू॒यमा॑नः ।
असि॑ । भगः॑ । असि॑ । दा॒त्रस्य॑ । दा॒ता । असि॑ । म॒घऽवा॑ । म॒घव॑त्ऽभ्यः । इं॒दो॒ इति॑ ॥५५॥

हे सोम विततानि विस्तृतानि त्री त्रीणि पवित्राण्यग्निवायुसूर्यात्मकानि पवित्राणि समेषि । सम्यक् प्राप्नोषि । किंच । पूयमानस्त्वमेकमविवालकृतं पवित्रमनु धावसि । अनुगच्छसि । किंच । त्वं भगो भजनीयोऽसि । तथा दात्रस्य देयस्य धनस्य दातासि । कथमस्य धनदत्वमिति चेत्तदुच्यते । हे इंदो सोम मघवद्भ्योऽन्येभ्योऽपि त्वं मघवासि । अतिशयेन धनवान्भवसि ॥

॥ इति सप्तमस्य चतुर्थ एकविंशो वर्गः ॥

॥ अथ षट्पंचाशत्तमी ॥

ए॒ष वि॒श्ववि॑त्पवते मनी॒षी सोमो॒ विश्व॑स्य॒ भुव॑नस्य॒ राजा॑ ।
द्र॒प्साँ ई॒रय॑न्वि॒दथे॑ष्विंदु॒र्वि वार॒मव्यं॑ स॒मयाति॑ याति ॥५६॥

ए॒षः । वि॒श्व॒ऽवित् । प॒व॒ते॒ । म॒नी॒षी । सोमः॑ । विश्व॑स्य । भुव॑नस्य । राजा॑ ।
द्र॒प्सान् । ई॒रय॑न् । वि॒दथे॑षु । इंदुः॑ । वि । वारं॑ । अव्यं॑ । स॒मया॑ । अति॑ । या॒ति॒ ॥५६॥

विश्ववित् सर्वस्य वेत्तात एव मनीषी मेधावी विश्वस्य भुवनस्य सर्वस्य

लोकस्य राजा स्वाम्येष सोमः पवते । क्षरति । एतदेव विवृणोति । विदथेषु । विदंति जानंत्यत्र देवानिति यद्वा विंदंति लभंत इति विदथा यज्ञाः । तेषु द्रप्सान् रसकणानीरयन् प्रेरयन् इंदुः सोमोऽव्यमविभवं वारं वालं पवित्रं समयोभयतो व्यति याति । व्यतीत्य गच्छति ॥

॥ अथ सप्तपंचाशत्तमी ॥

इंदुं रिहंति महिषा अदब्धाः पदे रेभंति कवयो न गृध्राः ।

हिन्वंति धीरा दशभिः क्षिपाभिः समंजते रूपमपां रसेन ॥५७॥

इंदुं । रिहंति । महिषाः । अदब्धाः । पदे । रेभंति । कवयः । न । गृध्राः ।

हिन्वंति । धीराः । दशऽभिः । क्षिपाभिः । सं । अंजते । रूपं । अपां । रसेन ॥५७॥

महिषा महांतः पूज्या वा अत एवादब्धाः कैश्चिदप्यहिंसिता देवा इंदुं सोमं रिहंति । लिहंति । आस्वादयंति । किंच । देवाः स्तोममुशंतः संतः पदे तस्यास्य सोमस्य धारास्थाने रेभंति । शब्दायंते । तत्र दृष्टांतः । कवयो न गृध्राः । धनमभिकांक्षमाणाः कवयः स्तोतारो यथा स्तुवंतः शब्दायंते तद्वत् । धीराः कर्मणि कुशला ऋत्विजो दशभिरेतत्संख्याकाभिः क्षिपाभिरंगुलीभिस्तमिमं सोमं हिन्वंति । अभिषवार्थं प्रेरयंति । अपि च । रूपं सोमस्य रूपमंशुमपां वसतीवर्याख्यानां रसेन समंजते । सम्यक् सेवयंति ॥

॥ अथाष्टापंचाशत्तमी ॥

त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।

तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥५८॥

त्वया । वयं । पवमानेन । सोम । भरे । कृतं । वि । चिनुयाम । शश्वत् ।

तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥५८॥

हे सोम पवमानेन पवित्रेण पूयमानेन त्वया सहायेन भरे । संग्रामनाम । संग्रामे शश्वद्बहु कृतं कर्तव्यं वयं वि चिनुयाम । विशेषेण कुर्याम । यस्मात्तव साहाय्येन कर्माणि कुर्मस्तत्तस्मान्नोऽस्मान् मित्रो वरुणोऽदितिरेतन्नामकाः सिंधुरेतदभिधाना च पृथिवी उतापि च द्यौरेते मित्रादयो नोऽस्मान्मामहंतां । पूजयंतु धनादिदानेन ॥

॥ इति सप्तमस्य चतुर्थे द्वाविंशो वर्गः ॥

अभि न इति द्वादशर्चं द्वितीयं सूक्तं। वृषागिरो राज्ञः पुत्रोऽंबरीषो भरद्वाजपुत्र ऋजिश्वोभौ सहितावस्यर्षी। इदमुत्तराणि च त्रीण्यानुष्टुभानि। अत्र त्वेकादशी बृहती। पवमानः सोमो देवता। तथा चानुक्रम्यते। अभि नो द्वादशांबरीष ऋजिश्वा चानुष्टुभं ह बृहत्युपांत्येति। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

अभि नो वाजसातमं रयिमर्ष पुरुस्पृहं।
इंदो सहस्रभर्णसं तुविद्युम्नं विभ्वासहं ॥१॥
अभि। नः। वाजऽसातमं। रयिं। अर्ष। पुरुऽस्पृहं।
इंदो इति। सहस्रऽभर्णसं। तुविऽद्युम्नं। विभ्वऽसहं ॥१॥

हे इंदो दीप्त वाजसातममत्यंतं बलप्रदमन्नप्रदं वा रयिं धनं पुत्रं वा नोऽस्माकमभ्यर्ष। अभिगमय। कीदृशं। पुरुस्पृहं बहुभिः स्पृहणीयं सहस्रभर्णसं बहुविधभरणं। अनेकपोषणयुक्तमित्यर्थः। तुविद्युम्नं। द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः। बह्वन्नं बहुयशोयुक्तं वा। विभ्वसहं। विभ्व इति महन्नाम। महतोऽभिभवितारं॥

॥ अथ द्वितीया ॥

परि ष्य सुवानो अव्ययं रथे न वर्माव्यत।
इंदुरभि द्रुणा हितो हियानो धाराभिरक्षाः ॥२॥
परि। स्यः। सुवानः। अव्ययं। रथे। न। वर्म। अव्यत।
इंदुः। अभि। द्रुणा। हितः। हियानः। धाराभिः। अक्षारिति ॥२॥

सुवानः सूयमानः स्यः स सोमोऽव्ययमविमयं पवित्रं परि पवते। तत्र दृष्टांतः। रथे न यथा रथे स्थितः पुरुषो वर्म कवचमव्यत। परिव्ययति। व्ययतेर्लुङि वर्णलोपश्छांदसः। अभि हितोऽभितः प्रेरितः। यद्वा स्तोतृभिरभिष्टुतः स इंदुः सोमो द्रुणा द्रुममयेन द्रोणकलशेन हियानः। हि गतौ वृद्धौ च। तेन पूयमानः सन् धाराभिरक्षाः। क्षरति। क्षरतेर्लुङि रूपं॥

॥ अथ तृतीया ॥

परि ष्य सुवानो अक्षा इंदुरव्ये मदच्युतः ।
धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः ॥३॥
परि । स्यः । सुवानः । अक्षारिति । इंदुः । अव्ये । मदऽच्युतः ।
धारा । यः । ऊर्ध्वः । अध्वरे । भ्राजा । न । एति । गव्यऽयुः ॥३॥

सुवानः सूयमानः स्यः स इंदुः सोमो मदच्युतो मदार्थं देवैः प्रेरितः सन् अव्येऽविभवे पवित्रे पर्यक्षाः । परितः क्षरति । अध्वर ऊर्ध्वः समुच्छ्रितः सर्वेषां मुख्यो यः सोमो गव्ययुर्गोकामः । यद्वा । क्षीरादिकं कामयमानः सन् धारा धारया सहैति गच्छति । भ्राजा न भ्राजमानया दीप्त्या यथांतरिक्षे गच्छति तद्वत् ॥

॥ अथ चतुर्थी ॥

स हि त्वं देव शश्वते वसु मर्ताय दाशुषे ।
इंदो सहस्रिणं रयिं शतात्मानं विवाससि ॥४॥
सः । हि । त्वं । देव । शश्वते । वसु । मर्ताय । दाशुषे ।
इंदो इति । सहस्रिणं । रयिं । शतऽआत्मानं । विवाससि ॥४॥

हे देव सोम स त्वं शश्वते पुत्रादिमत्त्वेन बहवे मर्त्याय मनुष्याय दाशुषे हविर्दत्तवते यजमानाय वसु धनं मह्यं च विवाससि । प्रेरयसि । एकवाक्यतापक्षे हि तिङंतस्य हियोगादिनिघातः स्यात् ॥

॥ अथ पंचमी ॥

वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः ।
नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो ॥५॥
वयं । ते । अस्य । वृत्रऽहन् । वसो इति । वस्वः । पुरुऽस्पृहः ।
नि । नेदिष्ठऽतमाः । इषः । स्याम । सुम्नस्य । अध्रिगो इत्यध्रिऽगो ॥५॥

हे वृत्रहन् शत्रूणां हंतः सोम अस्यैतादृशस्य ते तव स्वभूता वयं स्मः । ततो हे वसो वासयितः पुरुस्पृहो बहुभिः स्पृहणीयस्य वस्वो वसुनो धनस्य त्वया

दीयमानस्य वयं नि नितरां नेदिष्ठतमा अत्यंतमंतिकतमाः स्याम। तथैषोऽन्नस्य। किंच हे अध्रिगो अधृतगमन सोम सुम्नस्य सुखस्य वयमंतिकतमाः स्याम। भवेम ॥

॥ अथ षष्ठी ॥

द्विर्यं पंच स्वयंशसं स्वसारो अद्रिंसंहतं।
प्रियमिंद्रस्य काम्यं प्रस्नापयंत्यूर्मिणं ॥६॥
द्विः। यं। पंच। स्वऽयंशसं। स्वसारः। अद्रिऽसंहतं।
प्रियं। इंद्रस्य। काम्यं। प्रऽस्नापयंति। ऊर्मिणं ॥६॥

द्विः पंच दशसंख्याकाः स्वसारः कर्मकरणार्थमितस्ततो गच्छंत्योऽगुलयः स्वयशसं संभूतयशस्कमद्रिसंहतं ग्रावभिरभिषुतमिंद्रस्य प्रियं काम्यं सर्वैः काम्यमानमूर्मिणं धारभिस्तद्वंतं यं सोमं प्रस्नापयंति वसतीवरीभिः प्रकर्षेण सेचयंति यजमानास्तं पुनंतीत्युत्तरत्र संबंधः ॥

॥ इति सप्तमस्य चतुर्थे त्रयोविंशो वर्गः ॥

॥ अथ सप्तमी ॥

परि त्यं हर्यतं हरिं बभ्रुं पुनंति वारेण।
यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥७॥
परि। त्यं। हर्यतं। हरिं। बभ्रुं। पुनंति। वारेण।
यः। देवान्। विश्वान्। इत्। परि। मदेन। सह। गच्छति ॥७॥

हर्यतं सर्वैः स्पृहणीयं हरिं हरितवर्णं बभ्रुं बभ्रुवर्णं च त्यं तं सोमं वारेण वालेन पवित्रेण परि पुनंति। परिशोधयंति। यः सोमो विश्वान् सर्वानिंद्रादीन्देवानित् देवानेव मादकेन रसेन सह परिगच्छति ॥

॥ अथाष्टमी ॥

अस्य वो ह्यवसा पांतो दक्षसाधनं।
यः सूरिषु श्रवो बृहद्दधे स्वर्ण हर्यतः ॥८॥
अस्य। वः। हि। अवसा। पांतः। दक्षऽसाधनं।
यः। सूरिषु। श्रवः। बृहत्। दधे। स्वः। न। हर्यतः ॥८॥

वः। छांदसो वसादेशः। हिरवधारणे। वो यूयमस्य सोमस्यावसा रक्षणेन दक्षसाधनं बलस्य साधनं रसं पांतः पिबंतो भवथ। स्वर्णादित्य इव हर्यंतः सर्वैः काम्यमानो योऽयं सोमः सूरिषु स्तोत्राणि प्रेरयत्सु स्तोतृषु बृहन्महत्प्रभूतं श्रवोऽन्नं दधे। विदधे। स्थापयतीति यावत्॥

॥ अथ नवमी ॥

स वां यज्ञेषु मानवी इंदुर्जनिष्ट रोदसी।
देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि॥९॥
सः। वां। यज्ञेषु। मानवी इति। इंदुः। जनिष्ट। रोदसी इति।
देवः। देवी इति। गिरिऽस्थाः। अस्रेधन्। तं। तुविऽस्वनि॥९॥

हे मानवी मानव्यौ मनोः स्वभूते हे देवी द्योतमाने हे रोदसी द्यावापृथिव्यौ वां युवयोर्यज्ञेषु स इंदुः सोमो जनिष्ट। अजनि। अंतरिक्षे देवः स्वतेजसा सर्वं प्रकाशयन् पृथिव्यां गिरिष्ठा ग्रावसु तिष्ठन्। तं जातं सोमं तुविष्वणि बहुस्वन उपरे यज्ञे वास्रेधन्। ऋत्विजो ग्रावभिरघ्नन्। अभ्यषुण्वन्निति यावत्॥

॥ अथ दशमी ॥

इंद्राय सोम पातवे वृत्रघ्ने परि षिच्यसे।
नरे च दक्षिणावते देवाय सदनासदे॥१०॥
इंद्राय। सोम। पातवे। वृत्रऽघ्ने। परि। सिच्यसे।
नरे। च। दक्षिणाऽवते। देवाय। सदनऽसदे॥१०॥

हे सोम वृत्रघ्ने वृत्रस्य हंत्र इंद्राय। षष्ठ्यर्थे चतुर्थी। इंद्रस्य पातवे पानार्थं परि षिच्यसे। परितः पात्रेषु सिच्यसे। वसतीवरीभिर्वा। किंच दक्षिणावते ऋत्विग्भ्यो दक्षिणादानेन तद्वते देवाय देवार्थं हवींषि दातुं सदनसदे यज्ञगृहे सीदते नरे मनुष्याय यजमानाय तस्मै फलप्रदानार्थं परिषिच्यसे॥

॥ अथैकादशी ॥

ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन्।
अपप्रोथंतः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः॥११॥

ते । प्रत्नासः । विऽउष्टिषु । सोमाः । पवित्रे । अक्षरन् ।

अपऽप्रोथंतः । सनुतः । हुरःऽचितः । प्रातरिति । तान् । अप्रऽचेतसः ॥११॥

व्युष्टिषूषसां व्युच्छनेषु प्रकाशनेषु प्रत्नासः प्रत्नास्ते सोमाः पवित्रेऽक्षरन् क्षरंति ये सोमाः सनुतरंतर्हितान् अप्रचेतसः प्रज्ञानरहितान् हुरश्चितः । स्तेननामैतत् । कौटिल्येन चिन्वंतीति । तान्मायाविनः स्तेनान्प्रातः प्रातःकाल एवापप्रोथंतः । अपप्रोथनं चापप्रेरणं । अपप्रेरयंतः शब्देन निराकुर्वंतो भवंति । ते क्षरंतीति समन्वयः ॥

॥ अथ द्वादशी ॥

तं सखायः पुरोरुचं यूयं वयं च सूरयः ।

अश्याम वाजगंध्यं सनेम वाजपस्त्यं ॥१२॥

तं । सखायः । पुरःऽरुचं । यूयं । वयं । च । सूरयः ।

अश्याम । वाजऽगंध्यं । सनेम । वाजऽपस्त्यं ॥१२॥

हे सखायः स्तोतारः सूरयः प्राज्ञा यूयं वयं च यजमानाः पुरोरुचं पुरतो रोचमानं वाजगंध्यं बलकरसाधुगंधोपेतं सोममश्याम । अश्नवाम । पिबेम । किंच । वाजपस्त्यमन्नयुक्तगृहसहितं यद्वा बलकरं सोमं सनेम । संभजेमहि । सोमेन बलान्नगृहादीनि भवंतीत्यर्थः ॥

॥ इति सप्तमस्य चतुर्थे चतुर्विंशो वर्गः ॥

आ हर्यतायेत्यष्टर्चं तृतीयं सूक्तं । कश्यपगोत्रौ रेभसूनू एतत्संज्ञौ द्वावृषी । आद्या बृहती सप्तानुष्टुभः । पवमानसोमो देवता । तथा चानुक्रांतं । आ हर्यतायाष्टौ रेभसूनू काश्यपौ बृहत्याद्येति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

आ हर्यताय धृष्णवे धनुस्तन्वंति पौंस्यं ।

शुक्रां वयंत्यसुराय निर्णिजं विपामग्रे महीयुवः ॥१॥

आ । हर्यताय । धृष्णवे । धनुः । तन्वंति । पौंस्यं ।

शुक्रां । वयंति । असुराय । निःऽनिजं । विपां । अग्रे । महीयुवः ॥१॥

हर्यताय सर्वैः स्पृहणीयाय धृष्णवे शत्रूणां धर्षणशीलाय सोमाय पौंस्यं पुंस्त्वस्याभिव्यंजकं धनुरा तन्वंति। धनुषि ज्यां कुर्वंतीति। सोमस्य धाराविसर्गार्थं वितायमानं पवित्रमभिधीयते। तदेव विवृणोति। महीयुवः पूजाकामा ऋत्विजो विपां मेधाविनां देवानामग्रे पुरस्ताच्छुक्रां शुक्लवर्णां निर्णिजं यया सोमो निर्णिज्यते तामसुराय बलवते वयंति। वितन्वंति। दशापवित्रं विस्तारयंतीत्यर्थः॥ वयतिर्गतिकर्मा॥

॥ अथ द्वितीया ॥

अध॑ क्ष॒पा परि॑ष्कृतो॒ वाजाँ॑ अ॒भि प्र गा॑हते।
यदी॑ वि॒वस्व॑तो॒ धियो॒ हरिं॑ हि॒न्वंति॒ यात॑वे॥२॥
अध॑। क्ष॒पा। परि॑ऽकृतः। वाजा॑न्। अ॒भि। प्र। गा॒ह॒ते॒।
यदि॑। वि॒वस्व॑तः। धियः॑। हरिं॑। हि॒न्वंति॑। यात॑वे॥२॥

क्षपा। सुपां सुलुगिति पंचम्या आकारः। क्षपाया रात्रेरधानंतरं प्रातःकाले परिष्कृतः। भूषणार्थे संपर्युपेभ्य इति करोतेः सुडागमः। अद्भिरलंकृतः। यद्वा। क्षपयित्र्यां सेनायामलंकृतः सोमो वाजानन्नानि बलानि वाभि लक्ष्य प्र गाहते। प्रगच्छति। विवस्वतः परिचरणवतो यजमानस्य धियः कर्मसाधनभूता अंगुलयो हरिं हरितवर्णमेतमंशुं यातवे पात्राण्यभिगमनाय यदि हिन्वंति प्रेरयंति तर्हि सवनानि गच्छतीति॥

॥ अथ तृतीया ॥

तम॑स्य मर्जयामसि॒ मदो॒ य इं॑द्र॒पात॑मः।
यं गाव॑ आ॒सभि॑र्द॒धुः पु॒रा नू॒नं च॑ सू॒रयः॑॥३॥
तं। अ॒स्य॒। म॒र्ज॒या॒म॒सि॒। मदः॑। यः। इं॒द्र॒ऽपात॑मः।
यं। गावः॑। आ॒सऽभिः॑। द॒धुः। पु॒रा। नू॒नं। च॒। सू॒रयः॑॥३॥

अस्य सोमस्य तं रसं मर्जयामसि मर्जयामः शोधयामोऽलंकुर्मो वा यो मदो मदकरो रस इंद्रपातम इंद्रेणात्यंतं पातव्यो भवति। किंच गावो गंतारः सूरयः स्तोतारः पुरा च नूनमिदानीं च यं सोमरसमासभिरास्यैर्दधुर्धारयंति। पिबंतीति यावत्। यद्वा। गावो धेनवो यं सोमं तृणादिष्ववस्थितमासभिरास्यैर्दधुर्धारयंति। तृणरूपेण भक्षयंति॥

॥ अथ चतुर्थी ॥

तं गाथया पुराण्या पुनानमभ्यनूषत ।
उतो कृपंत धीतयो देवानां नाम बिभ्रतीः ॥४॥
तं । गाथया । पुराण्या । पुनानं । अभि । अनूषत ।
उतो इति । कृपंत । धीतयः । देवानां । नाम । बिभ्रतीः ॥४॥

पुनानं पूयमानं तं सोमं पुराण्या पुरा कृतया गाथया स्तुत्याभ्यनूषत । स्तोतारोऽभिष्टुवंति । नू स्तवने । लुङि रूपं । उतो अपि च नाम कर्मार्थं नमनं बिभ्रतीर्बिभ्राणा धीतयोऽंगुलयो देवानां सोमरूपहविःप्रदानाय कृपंत । कल्पयंति । समर्था भवंति । कृपू सामर्थ्ये ॥

॥ अथ पंचमी ॥

तमुक्षमाणमव्यये वारे पुनंति धर्णसिं ।
दूतं न पूर्वचित्तय आ शासते मनीषिणः ॥५॥
तं । उक्षमाणं । अव्यये । वारे । पुनंति । धर्णसिं ।
दूतं । न । पूर्वऽचित्तये । आ । शासते । मनीषिणः ॥५॥

उक्षमाणमद्भिः सिच्यमानं धर्णसिं सर्वस्य धारकं सोममव्ययेऽविमये वारे वाले पवित्रे पुनंति । शोधयंति । ततः मनीषिणो मेधाविनो यजमानास्तमिमं सोमं दूतं न दूतमिव पूर्वचित्तये देवानां पूर्वमेव प्रज्ञापनाया शासते । प्रार्थयंते ॥

॥ इति सप्तमस्य चतुर्थे पंचविंशो वर्गः ॥

॥ अथ षष्ठी ॥

स पुनानो मदिंतमः सोमश्चमूषु सीदति ।
पशौ न रेत आदधत्पतिर्वचस्यते धियः ॥६॥
सः । पुनानः । मदिन्ऽतमः । सोमः । चमूषु । सीदति ।
पशौ । न । रेतः । आऽदधत् । पतिः । वचस्यते । धियः ॥६॥

मदिंतमोऽत्यंतं मादयिता स सोमः पुनानः पूयमानः सन् चमूषु चमसेषु सीदति । ततः पशौ न यथा पशौ कश्चिद्वृषभो रेत आदधत् आदधाति तद्वत्सम-

सादिषु रेतः स्वीयं रसमादधदादधानो धियः कर्मणः पतिः पालयितायं सोमो वचस्यते। अभिष्टूयते ॥

॥ अथ सप्तमी ॥

स मृज्यते सुकर्मभिर्देवो देवेभ्यः सुतः।
विदे यदासु संददिर्महीरपो वि गाहते ॥७॥

सः। मृज्यते। सुकर्मऽभिः। देवः। देवेभ्यः। सुतः।
विदे। यत्। आसु। संऽददिः। महीः। अपः। वि। गाहते ॥७॥

देवेभ्यो देवार्थं सुतोऽभिषुतो देवो द्योतमानः स्तोतव्यो वा स सोमः सुकर्मभिर्ऋत्विग्भिर्मृज्यते। परिपूयते। यद्यदायं सोम आसु प्रजासु संददिः सम्यग्धनदानशील इति विदे ज्ञायते तदानीं महीर्महतीरपो वसतीवरीर्वि गाहते। विशेषेणाभिगच्छति। यदा सोममभिषुण्वंति तदा तेभ्यो धनं प्रयच्छतीत्यर्थः ॥

॥ अथाष्टमी ॥

सुत इंदो पवित्र आ नृभिर्यतो वि नीयसे।
इंद्राय मत्सरिंतमश्चमूष्वा नि षीदसि ॥८॥

सुतः। इंदो इति। पवित्रे। आ। नृऽभिः। यतः। वि। नीयसे।
इंद्राय। मत्सरिन्ऽतमः। चमूषु। आ। नि। सीदसि ॥८॥

हे इंदो सुतोऽभिषुतो यत आयतः सर्वतो विस्तृतस्त्वं नृभिः कर्मनेतृभिर्ऋत्विग्भिः पवित्रे वि नीयसे। विशेषेण नीयमानो भवसि। ततो मत्सरिंतमोऽतिशयेन मादयिता त्वमिंद्रायेंद्रार्थं चमूषु चमसेष्वा नि षीदसि ॥

॥ इति सप्तमस्य चतुर्थे षड्विंशो वर्गः ॥

अभी नवंत इति नवर्चं चतुर्थं सूक्तं। पूर्ववदृषिदेवते। सर्वा अनुष्टुभः। तथा चानुक्रम्यते। अभी नवंते नवेति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

अभी नवंते अद्रुहः प्रियमिंद्रस्य काम्यं।
वत्सं न पूर्व आयुनि जातं रिहंति मातरः ॥१॥

अभि। नवंते। अदुहः। प्रियं। इंद्रस्य। काम्यं।

वत्सं। न। पूर्वे। आयुनि। जातं। रिहंति। मातरः ॥१॥

यथा मातरो गावः पूर्वे प्रथम आयुनि वयसि जातं वत्सं रिहंति लिहंति तथादुहोऽद्रोहा वसतीवर्याख्या आप इंद्रस्य प्रियं काम्यं सर्वैः काम्यमानं सोममभि नवंते। अभिगच्छंति ॥

॥ अथ द्वितीया ॥

पुनान इंदवा भर सोम द्विबर्हसं रयिं।

त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे ॥२॥

पुनानः। इंदो इति। आ। भर। सोम। द्विऽबर्हसं। रयिं।

त्वं। वसूनि। पुष्यसि। विश्वानि। दाशुषः। गृहे ॥२॥

हे इंदो दीप्यमान हे सोम पुनानः पूयमानस्त्वं द्विबर्हसं द्वयोः स्थानयोः परिवृंहणशीलं रयिं धनमस्मभ्यमा भर। आहर। देहि। त्वं हि दाशुषो हविर्दत्तवतो यजमानस्य गृहे स्थित्वा विश्वानि सर्वाणि वसूनि धनानि पुष्यसि। पोषयसि ॥

॥ अथ तृतीया ॥

त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः।

त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥३॥

त्वं। धियं। मनःऽयुजं। सृज। वृष्टिं। न। तन्यतुः।

त्वं। वसूनि। पार्थिवा। दिव्या। च। सोम। पुष्यसि ॥३॥

हे सोम त्वं मनोयुजं मनसा युज्यमानां मनोवेगां धियं ध्यातव्यां धारां सृज। पात्रेषु विसृज। तत्र दृष्टांतः। वृष्टिं न तन्यतुः। तनु विस्तारे। ऋतन्यंजीत्यादिना यतुच्प्रत्ययः। तनोति विस्तारयतीति तन्यतुर्मेघः। यथा मेघो वृष्टिं सृजति तद्वत्। ततो हे सोम त्वं पार्थिवा पृथिव्यां भवानि वसूनि धनानि तथा दिव्यानि दिवि भवानि धनानि च पुष्यसि। अस्मभ्यं पोषयसि। प्रयच्छसीत्यर्थः ॥

॥ अथ चतुर्थी ॥

परि ते जिग्युषो यथा धारा सुतस्य धावति ।
रंहमाणा व्य१व्ययं वारं वाजीव सानसिः ॥४॥
परि । ते । जिग्युषः । यथा । धारा । सुतस्य । धावति ।
रंहमाणा । वि । अव्ययं । वारं । वाजीऽइव । सानसिः ॥४॥

सुतस्य ते त्वदीया सानसिः संभजनशीला यद्वा स्तोतृभिः संभजनीया रंहमाणा वेगं कुर्वाणा धाराव्ययमविमयं वारं वालं पवित्रं वि परि धावति । विशेषेण परितो गच्छति । तत्र दृष्टांतः । जिग्युषः शत्रूणां जेतुर्वीरस्य वाजीव । अश्वो यथा युद्धं परितो धावति तद्वत् । जयतेः क्वसौ सन्लिँटोर्जेरिति कुत्वं । यथेति पूरकः ॥

॥ अथ पंचमी ॥

क्रत्वे दक्षाय नः कवे पवस्व सोम धारया ।
इंद्राय पातवे सुतो मित्राय वरुणाय च ॥५॥
क्रत्वे । दक्षाय । नः । कवे । पवस्व । सोम । धारया ।
इंद्राय । पातवे । सुतः । मित्राय । वरुणाय । च ॥५॥

हे कवे क्रांतदर्शन हे सोम नोऽस्मभ्यं क्रत्वे प्रज्ञानाय दक्षाय बलाय च त्वं धारया पवस्व । क्षर । कीदृशः । इंद्राय पातवे पानार्थं तथा मित्राय वरुणाय च सुतोऽभिषुतः खलु ॥

॥ इति सप्तमस्य चतुर्थे सप्तविंशो वर्गः ॥

॥ अथ षष्ठी ॥

पवस्व वाजसातमः पवित्रे धारया सुतः ।
इंद्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥६॥
पवस्व । वाजऽसातमः । पवित्रे । धारया । सुतः ।
इंद्राय । सोम । विष्णवे । देवेभ्यः । मधुमत्ऽतमः ॥६॥

हे सोम वाजसातमोऽतिशयेनान्नस्य दाता सुतोऽभिषुतस्त्वं पवित्रे धारया

सह पवस्व । क्षर । ततो हे सोम त्वमिंद्राय विष्णवे चान्येभ्यो मित्रादिभ्यो देवेभ्यश्च मधुमत्तमोऽतिशयेन माधुर्योपेतो भव ॥

॥ अथ सप्तमी ॥

त्वां रिहंति मातरो हरिं पवित्रे अद्रुहः ।

वत्सं जातं न धेनवः पवमान विधर्मणि ॥७॥

त्वां । रिहंति । मातरः । हरिं । पवित्रे । अद्रुहः ।

वत्सं । जातं । न । धेनवः । पवमान । विऽधर्मणि ॥७॥

हे पवमान सोम विधर्मणि विविधं हविषां धारके यज्ञेऽद्रुहो द्रोहवर्जिता मातरो मातृभूता वसतीवर्यो हरिं हरितवर्णं त्वां पवित्रे स्थितं रिहंति । लिहंति । आस्वादयंति । कथमिव । यथा धेनवो जातं वत्सं लिहंति तथा ॥

॥ अथाष्टमी ॥

पवमान महि श्रवश्चित्रेभिर्यासि रश्मिभिः ।

शर्धन्तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ॥८॥

पवमान । महि । श्रवः । चित्रेभिः । यासि । रश्मिऽभिः ।

शर्धन् । तमांसि । जिघ्नसे । विश्वानि । दाशुषः । गृहे ॥८॥

हे पवमान महि महच्छ्रवः श्रवणीयमंतरिक्षं चित्रेभिश्चित्रैर्नानाविधैश्चायनीयैर्वा रश्मिभिः परि यासि । परिगच्छसि । तथा शर्धन् वेगं कुर्वंस्त्वं दाशुषो हविर्दत्तवतो यजमानस्य गृहे स्थित्वा विश्वानि सर्वाणि तमांसि तमोरूपाणि रक्षांसि जिघ्नसे । हंसि । एवं द्यावापृथिव्योर्वर्तस इत्यर्थः ॥

॥ अथ नवमी ॥

त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।

प्रति द्रापिममुंचथाः पवमान महित्वना ॥९॥

त्वं । द्यां । च । महिऽव्रत । पृथिवीं । च । अति । जभ्रिषे ।

प्रति । द्रापिं । अमुंचथाः । पवमान । महिऽत्वना ॥९॥

हे महिव्रत महाकर्मन् बहुविधकर्मन् सोम त्वं द्यां द्युलोकं च पृथिवीं चाभि

जभिषे । अत्यंतं बिभर्षि । डुभृञ् धारणपोषणयोः । तस्य छांदसे लिटि सर्वविधीनां छंदसि विकल्पितत्वाद्वेडागमः । अंतरिक्षे सोमात्मनेति पृथिव्यां लतारूपेणेत्येवं लोकद्वयवर्तित्वं । हे पवमान क्षरन् सोम त्वं महित्वना महत्त्वेन युक्तः सन् द्रापिं कवचं प्रत्यमुंचथाः । प्रतिमुंचसि । संवृणोषि ॥

॥ इति सप्तमस्य चतुर्थेऽष्टाविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके चतुर्थोऽध्यायः समाप्तः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
विज्ञातवेदगांभीर्यैस्तुर्यं व्याख्याय सप्तमे ।
सायणार्यैस्ततोऽध्यायं पंचमं व्याचिकीर्षति ॥

तत्र पुरोजिती व इति षोडशर्चमनुवाकापेक्षया पंचमं सूक्तं । आद्यस्य तृचस्य श्यावाश्वपुत्रोऽंधीगुर्नामर्षिः । द्वितीयस्य नहुषस्य राज्ञः पुत्रो ययातिर्नाम । तृतीयस्य मनोः पुत्रो नहुषो नाम राजर्षिः । चतुर्थस्य संवरणाख्यस्य राज्ञः पुत्रो मनुः । एवं द्वादश गताः । शिष्टस्य चतुर्ऋचस्य वाचः पुत्रो वैश्वामित्रो वा प्रजापतिर्ऋषिः । द्वितीयातृतीये गायत्र्यौ शिष्टाश्चतुर्दशानुष्टुभः । तथा चानुक्रम्यते । पुरोजिती षोळश श्यावाश्विरंधीगुर्ययातिर्नाहुषो नहुषो मानवो मनुः सांवरण इति तृचाः शेषे प्रजापतिः । उपाद्ये गायत्र्याविति । गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

पुरोजिती वो अंधसः सुताय मादयित्नवे ।
अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यं ॥१॥

पुरःऽजिती। वः। अंधसः। सुताय। मादयित्नवे।
अप। श्वानं। श्नथिष्टन। सखायः। दीर्घऽजिह्व्यं ॥१॥

हे सखायः सखिभूताः समानख्याना वा हे स्तोतारो वो यूयं पुरोजिती। षष्ठ्याः पूर्वसवर्णदीर्घः। पुरःस्थितजयस्यांधसोऽदनीयस्य सोमस्य स्वभूताय सुतायाभिषुताय मादयित्नवेऽत्यंतं मदकाराय रसाय दीर्घजिह्व्यं। दीर्घा जिह्वा यस्य सः। दीर्घजिह्वी च छंदसि। पा० ४.१.५९.। इति ङीषंतत्वेन निपातितः। तादृशं श्वानमप श्नथिष्टन। अपश्नथयत। अपबाधध्वं। यथा श्वा राक्षसा वा सुतं सोमं न लिहंति तथा कुरुतेत्यर्थः॥

पवित्रेष्ट्यां द्वितीयस्याज्यभागस्य यो धारयेत्येषानुवाक्या। सूत्रितं च। पावकवंतावाज्यभागावग्नी रक्षांसि सेधति यो धारया पावकया। आ० २.१२.। इति॥

॥ सैषा सूक्ते द्वितीया॥

यो धारया पावकया परिप्रस्यंदते सुतः।
इंदुरश्वो न कृत्व्यः ॥२॥
यः। धारया। पावकया। परिऽप्रस्यंदते। सुतः।
इंदुः। अश्वः। न। कृत्व्यः ॥२॥

सुतोऽभिषुतः कृत्व्यः। कृत्वीति कर्मनाम। कर्मणि साधुर्य इंदुः सोमः पावकया पापानां शोधकया धारया परिप्रस्यंदते परितः प्रक्षरति। कथमिव। अश्वो न। अश्वो यथा वेगेन प्रगच्छति तद्वत्॥

॥ अथ तृतीया॥

तं दुरोषमभी नरः सोमं विश्वाच्या धिया।
यज्ञं हिन्वंत्यद्रिभिः ॥३॥
तं। दुरोषं। अभि। नरः। सोमं। विश्वाच्या। धिया।
यज्ञं। हिन्वंति। अद्रिऽभिः ॥३॥

नरः कर्मनेतार ऋत्विजो दुरोषं। रोषतेर्हिंसार्थस्य रेफलोपे दीर्घाभाव ओषतेर्दाहार्थस्य वा खलि रूपमिति संदेहादनवग्रहः। तं दुर्दहं दुर्वधं वा यज्ञं यष्टव्यं

तं सोमं विश्वाच्या सर्वान्कामानंचित्र्या धिया बुद्ध्यादिभिर्ग्रावभिरभि हिन्वंति । अभिप्रेरयंति । अभिषुखंतीति यावत् ॥

पृष्ठ्यस्य षष्ठेऽहनि ब्राह्मणाच्छंसिशस्त्रे सुतास इति तिस्रः । सूचितं च । दधिक्राव्णोऽकारिषमित्यनुष्टुप् सुतासो मधुमत्तमा इति च तिस्रः । आ० ८.३. । इति ॥

॥ तत्र प्रथमा सूक्ते चतुर्थी ॥

सुतासो मधुमत्तमाः सोमा इंद्राय मंदिनः ।
पवित्रवंतो अक्षरन्देवान्गच्छंतु वो मदाः ॥४॥

सुतासः । मधुमत्ऽतमाः । सोमाः । इंद्राय । मंदिनः ।
पवित्रऽवंतः । अक्षरन् । देवान् । गच्छंतु । वः । मदाः ॥४॥

मधुमत्तमा अतिशयेन माधुर्योपेता अत एव मंदिनो मदकराः सुता अभिषुताः सोमाः पवित्रवंतः पवित्रे वर्तमानाः संत इंद्रायेंद्रार्थमक्षरन् । पात्रेषु क्षरंति । अथ प्रत्यक्षकृतः । वोऽयुष्माकं मदा मदहेतवो रसा देवानिंद्रादीनागच्छंतु ॥

॥ अथ पंचमी ॥

इंदुरिंद्राय पवत इति देवासो अब्रुवन् ।
वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ॥५॥

इंदुः । इंद्राय । पवते । इति । देवासः । अब्रुवन् ।
वाचः । पतिः । मखस्यते । विश्वस्य । ईशानः । ओजसा ॥५॥

इंदुः सोम इंद्रायेंद्रार्थं पवते कलशे क्षरतीति देवासः स्तुतिकारिणः स्तोतारोऽब्रुवन् वदंति । यदा स्तोतार एवं वदंति तदानीं वाचः स्तुतेः पतिः पालयिता यद्वा शब्दस्य स्वाम्यत्यंतं शब्दायमान इत्यर्थः । तादृशः सोमो मखस्यते । स्तुतिभिः पूजामिच्छति । लालसायां सुगागमः । कीदृशः । ओजसा बलेन विश्वस्य सर्वस्येशानः प्रभुः ॥

॥ इति सप्तमस्य पंचमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

सहस्रधारः पवते समुद्रो वाचमीखयः ।
सोमः पती रयीणां सखेंद्रस्य दिवेदिवे ॥६॥

सहस्रंऽधारः । पवते । समुद्रः । वाचंऽईंखयः ।

सोमः । पतिः । रयीणां । सखा । इंद्रस्य । दिवेऽदिवे ॥ ६ ॥

सहस्रधारो बहुविधधारोपेतः सोमः पवते । क्षरति । कीदृशः । समुद्रः । यस्मात्समुद्द्रवंति रसाः । सरःस्थानीयः । वाचमीखयः । ईखतेर्ण्यंतस्य सुप्युपपदे खच्प्रत्ययः । स्तुतीनां प्रेरयिता रयीणां धनानां पतिः प्रभुः । यद्वा । रयीणां हविषो दातॄणां यजमानानां पतिः पालयिता । दिवेदिवे प्रत्यहमिंद्रस्य सखा मित्रभूतः सोमः पवते ॥

॥ अथ सप्तमी ॥

अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।

पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ ७ ॥

अयं । पूषा । रयिः । भगः । सोमः । पुनानः । अर्षति ।

पतिः । विश्वस्य । भूमनः । वि । अख्यत् । रोदसी इति । उभे इति ॥ ७ ॥

पूषा पोषकः सर्वेषां भगो भजनीयो रयिर्धनहेतुरयं सोमः पुनानः पवित्रेण पूयमानः सन् अर्षति । कलशमभिगच्छति । तथा विश्वस्य सर्वस्य भूमनो भूतजातस्य पतिः पालयिता सोम उभे रोदसी द्यावापृथिव्यौ व्यख्यत् । स्वतेजसा प्रकाशयति । अनेन लोकद्वयवर्तित्वं सूचितं ॥

॥ अथाष्टमी ॥

समु प्रिया अनूषत गावो मदाय घृष्वयः ।

सोमासः कृण्वते पथः पवमानास इंदवः ॥ ८ ॥

सं । ऊं इति । प्रियाः । अनूषत । गावः । मदाय । घृष्वयः ।

सोमासः । कृण्वते । पथः । पवमानासः । इंदवः ॥ ८ ॥

प्रियाः प्रियतमा घृष्वयोऽत्यंतं दीप्ताः । यद्वा । अहं प्रथमतः स्तौमि अहं पुरस्तात्स्तौमीति परस्परं स्पर्धमाना गावः स्तुतिलक्षणा वाचः सोमस्य मदार्थं समनूषत । संस्तुवंति । उ प्रसिद्धौ । यद्वा । गावो धेनवः सोमस्य मदाय शब्दायंते । ततः पवमानासः पूयमाना इंदवो दीप्ताः सोमाः पथो मार्गान्कृण्वते । क्षरणार्थं कुर्वंति ॥

॥ अथ नवमी ॥

य ओजिष्ठस्तमा भर पवमान श्रवाय्यं ।
यः पंच चर्षणीरभि रयिं येन वनामहे ॥९॥

यः । ओजिष्ठः । तं । आ । भर । पवमान । श्रवाय्यं ।
यः । पंच । चर्षणीः । अभि । रयिं । येन । वनामहे ॥९॥

हे पवमान पूयमान सोम ओजिष्ठ ओजस्वितमो यस्त्वदीयो रसोऽस्ति तं श्रवाय्यं श्रवणीयं रसमा भर । अस्मभ्यमाहर । किंच यो रसः पंच चर्षणीः पंच जनान् निषादपंचमाश्चतुरो वर्णानभि तिष्ठति । अपि च । येन रसेन वयं रयिं धनं च वनामहे । संभजामहे । यद्वा । येन त्वां रयिं याचामहे तमाभर ॥

॥ अथ दशमी ॥

सोमाः पवंत इंदवोऽस्मभ्यं गातुवित्तमाः ।
मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥१०॥

सोमाः । पवंते । इंदवः । अस्मभ्यं । गातुवित्ऽतमाः ।
मित्राः । सुवानाः । अरेपसः । सुऽआध्यः । स्वःऽविदः ॥१०॥

गातुवित्तमा अतिशयेन मार्गस्य लंभका इंदवो दीप्ताः सोमाः पवंतेऽस्मभ्यमस्मदर्थं क्षरंत्यागच्छंति वा । कीदृशाः । मित्रा देवानां सखिभूताः सुवाना अभिषूयमाणा अरेपसः पापरहिता अत एव स्वाध्यः शोभनध्यानाः स्वर्विदः सर्वज्ञाः सर्वप्रापका वा ॥

॥ इति सप्तमस्य पंचमे द्वितीयो वर्गः ॥

॥ अथैकादशी ॥

सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि ।
इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥११॥

सुऽस्वानासः । वि । अद्रिऽभिः । चितानाः । गोः । अधि । त्वचि ।
इषं । अस्मभ्यं । अभितः । सं । अस्वरन् । वसुऽविदः ॥११॥

गोरनडुहोऽधि त्वच्यधिषवणचर्मणि चिताना ज्ञायमाना अद्रिभिर्ग्रावभिर्वि-

विधं मुष्वाणासः सूयमाना वसुविदो वसुनो लंभका एते सोमा अस्मभ्यमिष-मन्नमभितः समस्वरन्। सम्यक् शब्दयंति। प्रयच्छंतीति यावत्॥

॥ अथ द्वादशी ॥

एते पूता विपश्चितः सोमासो दध्याशिरः।
सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥१२॥
एते। पूताः। विपःऽचितः। सोमासः। दधिऽआशिरः।
सूर्यासः। न। दर्शतासः। जिगत्नवः। ध्रुवाः। घृते॥१२॥

पूताः पवित्रेण परिपूता विपश्चितो मेधाविनो दध्याशिरो दध्यामिश्रणा घृते वसतीवर्याख्य उदके जिगत्नवो गमनशीला ध्रुवास्तत्र स्थैर्येण वर्तमाना एते सोमासः सोमाः सूर्यासो न सूर्या इव दर्शतासः पात्रेषु सर्वैर्दर्शनीया भवंति॥

॥ अथ त्रयोदशी ॥

प्र सुन्वानस्यांधसो मर्तो न वृत तद्वचः।
अप श्वानमराधसं हता मखं न भृगवः ॥१३॥
प्र। सुन्वानस्य। अंधसः। मर्तः। न। वृत। तत्। वचः।
अप। श्वानं। अराधसं। हत। मखं। न। भृगवः॥१३॥

सुन्वानस्याभिषूयमाणस्यांधसोऽदनीयस्य सोमस्य तत् प्रसिद्धं वचो वचनं घोषं मर्तो मारकः कर्मविघ्नकारी श्वा न प्र वृत। न भजतां। न शृणोत्विति यावत्। तथा हे स्तोतारोऽराधसं राधककर्मरहितं तं श्वानमप हता। तत्र दृष्टांतः। मखं न। यथा पुरापराद्धं मखमेतन्नामानं भृगवोऽपहतवंतस्तथा-पहतेत्यर्थः॥

॥ अथ चतुर्दशी ॥

आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः।
सरज्जारो न योषणां वरो न योनिमासदं ॥१४॥
आ। जामिः। अत्के। अव्यत। भुजे। न। पुत्रः। ओण्योः।
सरत्। जारः। न। योषणां। वरः। न। योनिं। आऽसदं॥१४॥

जामिर्बंधुभूतो देवानां सोमोऽत्क आच्छादके पवित्र आव्यत। आवृणोति। संबद्धो भवति। तत्र दृष्टांतः। भुजे न। यथौण्यो रक्षकयोर्मातापित्रोर्भुजे पुत्र आवृणोति तद्वत्। ततः सोऽयं सोमो योनिं स्वस्थानभूतं कलशमासदमासत्तुं सरत् सरति। तत्र दृष्टांतद्वयं। जारो न। यथा जारो योषणामसतीं स्त्रियं प्राप्तुं सरति। यथा वा वरः कन्यां प्राप्तुं गच्छति तद्वत्॥

॥ अथ पंचदशी ॥

स वी॒रो द॑क्ष॒साध॑नो॒ वि य॒स्त॒स्तंभ॒ रोद॑सी।
हरिः॑ प॒वित्रे॑ अव्यत वे॒धा न योनि॑मा॒सदं॑ ॥१५॥

सः। वी॒रः। द॒क्ष॒ऽसाध॑नः। वि। यः। त॒स्तंभ॑। रोद॑सी॒ इति॑।
हरिः॑। प॒वित्रे॑। अ॒व्य॒त॒। वे॒धाः। न। योनि॑म्। आ॒ऽसदं॑ ॥१५॥

दक्षसाधनो बलसाधनः स सोमो वीरः समर्थो भवति। यः सोमो रोदसी द्यावापृथिव्यौ वि तस्तंभ स्वतेजसा व्यस्तभ्नात्। आच्छादयतीत्यर्थः। किंच। हरिर्हरितवर्णः सोमो वेधा न विधाता यजमानो यथा स्वगृहमासीदति तद्व-द्योनिं स्वस्थानं कलशमासदमासत्तुं पवित्रेऽव्यत। आवृणोति। संबद्धो भवति॥

॥ अथ षोडशी ॥

अव्यो॒ वारे॑भिः पवते॒ सोमो॒ गव्ये॒ अधि॑ त्वचि।
कनि॑क्रद॒द्वृषा॒ हरि॒रिंद्र॑स्या॒भ्ये॑ति निष्कृ॒तं ॥१६॥

अव्यः॑। वारे॑भिः। प॒व॒ते॒। सोमः॑। गव्ये॑। अधि॑। त्वचि।
कनि॑क्रदत्। वृषा॑। हरिः॑। इंद्र॑स्य। अ॒भि। ए॒ति॒। निः॒ऽकृ॒तं ॥१६॥

अयं सोमोऽव्योऽवेर्वारेभिर्वालैः पवित्रैः। तेभ्यः पवते। कलशं प्रति क्षरति। किंच। गव्य आनडुहेऽधि त्वचि चर्मणि कनिक्रदत् शब्दायमानो वृषा कामानां वर्षको हरिर्हरितवर्णः सोम इंद्रस्य स्वभूतं निष्कृतं संस्कृतं स्थानमभ्येति। अभिगच्छति॥

॥ इति सप्तमस्य पंचमे तृतीयो वर्गः ॥

क्राणा शिशुरित्यष्टर्चं षष्ठं सूक्तं। आप्तस्य त्रितस्यार्षं। इदमुत्तराणि चत्वारि सूक्तान्यौष्णिहानि। पवमानः सोमो देवता। तथा चानुक्रम्यते। क्राणाष्टौ त्रित औष्णिहं वा इति। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

क्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिं ।
विश्वा परि प्रिया भुवदध द्विता ॥१॥
क्राणा । शिशुः । महीनां । हिन्वन् । ऋतस्य । दीधितिं ।
विश्वा । परि । प्रिया । भुवत् । अध । द्विता ॥१॥

क्राणा । करोतेः शानचि बहुलं छंदसीति विकरणस्य लुक् । सुपां सुलुगिति सुप आकारादेशः । यज्ञं कुर्वाणो महीनां महतीनां मंहनीयानां वापां शिशुः पुत्रस्थानीयः सोम ऋतस्य यज्ञस्य दीधितिं प्रकाशकं धारकं वा स्वीयं रसं हिन्वन् प्रेरयन्विश्वा सर्वाणि प्रिया प्रियाणि हवींषि परि भुवत् । परिभवति । व्याप्नोति । अधापि च द्विता द्विधा भवति । दिवि च पृथिव्यां च वर्तत इत्यर्थः ॥

॥ अथ द्वितीया ॥

उप त्रितस्य पाष्योऽरभक्त यद्गुहा पदं ।
यज्ञस्य सप्त धामभिरध प्रियं ॥२॥
उप । त्रितस्य । पाष्योः । अभक्त । यत् । गुहा । पदं ।
यज्ञस्य । सप्त । धामऽभिः । अध । प्रियं ॥२॥

त्रितस्य मम यज्ञे गुहा गुहायां हविर्धाने वर्तमानयोः पाष्योः पाषाणवद्दृढयोरधिषवणफलकयोः पदं स्थानं सोमो यद्यदोपाभक्त समभजताधानंतरं यज्ञस्य धामभिर्धारकैः सप्त सप्तभिश्छंदोभिर्गायत्र्यादिभिः प्रियं प्रीणयितारं सोममभिषुवंत्यृत्विजः । अपि वा सप्त सर्पणशीलैर्वसतीवर्यादिभिरुदकैः सोममभिषुण्वंति ॥

॥ अथ तृतीया ॥

त्रीणि त्रितस्य धारया पृष्ठेष्वेरया रयिं ।
मिमीते अस्य योजना वि सुक्रतुः ॥३॥
त्रीणि । त्रितस्य । धारया । पृष्ठेषु । आ । ईरय । रयिं ।
मिमीते । अस्य । योजना । वि । सुऽक्रतुः ॥३॥

हे सोम त्रितस्य मम यज्ञस्य स्वभूतानि त्रीणि सवनानि धारयात्मीयया विधारय । किंच । पृष्ठेषु सामसु रयिं दातारमिंद्रमेरय । आगमय । सुक्रतुः सुप्रज्ञः स्तोतास्येंद्रस्य योजना योजनानि योजनकारीणि स्तोत्राणि वि मिमीते । करोति । यस्मादेवं तस्मादिंद्रं सामसु प्रेरयेत्यर्थः ॥

॥ अथ चतुर्थी ॥

जज्ञानं सप्त मातरो वेधामशासत श्रिये ।

अयं ध्रुवो रयीणां चिकेत यत् ॥४॥

जज्ञानं । सप्त । मातरः । वेधां । अशासत । श्रिये ।

अयं । ध्रुवः । रयीणां । चिकेत । यत् ॥४॥

जज्ञानं प्रादुर्भूतं वेधां कर्मणो विधातारं सोमं सप्त सप्तसंख्याका मातरो गंगाद्या नद्यः सप्त छंदांसि वा श्रिये यजमानानामैश्वर्यार्थमाशासत । अनुशासंति । अनुशासनं कुर्वंति । शास्तेर्लङि व्यत्ययेनात्मनेपदं । यद्यस्माद्ध्रुवोऽयं सोमो रयीणां धनानि चिकेत जानाति तस्मादस्यानुशासने कृते यजमानानां धनादिसमृद्धिर्भवति ॥

॥ अथ पंचमी ॥

अस्य व्रते सजोषसो विश्वे देवासो अद्रुहः ।

स्पार्हा भवंति रंतयो जुषंत यत् ॥५॥

अस्य । व्रते । सऽजोषसः । विश्वे । देवासः । अद्रुहः ।

स्पार्हाः । भवंति । रंतयः । जुषंत । यत् ॥५॥

अद्रुहो द्रोहवर्जिता विश्वे सर्वे देवासो देवा अस्य सोमस्य व्रते कर्मणि सजोषसः संगताः संतः स्पार्हाः स्पृहणीया भवंति । रंतयो रमणशीला देवाः सुतमेनं सोमं यद्यदि जुषंत सेवंते तर्हि स्पृहणीया भवंति ॥

॥ इति सप्तमस्य पंचमे चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

यमी गर्भमृतावृधो दृशे चारुमजीजनन् ।

कविं मंहिष्ठमध्वरे पुरुस्पृहं ॥६॥

यं। ईम् इति। गर्भं। ऋतऽवृधः। दृशे। चारुं। अजीजनन्।
कविं। मंहिष्ठं। अध्वरे। पुरुऽस्पृहं ॥ ६ ॥

ऋतावृधो यज्ञस्य वर्धयित्र्यो वसतीवर्याख्या आपो गर्भे गर्भस्थानीयमीमेनं यं सोममध्वरे यज्ञे दृशे दर्शनायाजीजनन् उदपादयन्। कीदृशं। चारुं सर्वेषां कल्याणरूपं कविं क्रांतप्रज्ञं मंहिष्ठं पूज्यतमं दातृतमं वा। अत एव पुरुस्पृहं बहुभिः स्पृहणीयं सोमं देवाः सेवंत इति पूर्वेण समन्वयः ॥

॥ अथ सप्तमी ॥

समीचीने अभि त्मना यह्वी ऋतस्य मातरा।
तन्वाना यज्ञमानुषग्यदंजते ॥ ७ ॥

समीचीने इति संऽईचीने। अभि। त्मना। यह्वी इति। ऋतस्य। मातरा।
तन्वाना। यज्ञं। आनुषक्। यत्। अंजते ॥ ७ ॥

स सोमः समीचीने परस्परं संगते यह्वी महत्यावृतस्य यज्ञस्य मातरा निर्मात्र्यौ द्यावापृथिव्यौ त्मनात्मना स्वयमेव तदाभिगच्छति यद्यदा यज्ञं तन्वाना अध्वर्यव आनुषक् अनुषक्तं वसतीवरीभिरंजते। सोमं मिश्रयंति। तदा स्वयमभिगच्छति ॥

॥ अथाष्टमी ॥

क्रत्वा शुक्रेभिरक्षभिर्ऋणोरप व्रजं दिवः।
हिन्वन्नृतस्य दीधितिं प्राध्वरे ॥ ८ ॥

क्रत्वा। शुक्रेभिः। अक्षऽभिः। ऋणोः। अप। व्रजं। दिवः।
हिन्वन्। ऋतस्य। दीधितिं। प्र। अध्वरे ॥ ८ ॥

हे सोम त्वं क्रत्वा कर्मणा ज्ञानेन वा शुक्रेभिः शुक्रैर्दीप्यमानैरक्षभिरक्षैरिंद्रियैरिवाशुवानैः स्वतेजोभिर्व्रजमंधकारसमूहं दिवोऽतरिक्षादपर्णोः। अपगमय विनाशय। ऋणु गतौ। तानादिकः। किं कुर्वन्। अध्वरे हिंसारहिते यज्ञे ऋतस्य यज्ञस्य दीधितिं धारकं स्वीयं रसं प्र हिन्वन् प्रेरयन्। अनेन लोकद्वयवर्तित्वमभिहितं ॥

॥ इति सप्तमस्य पंचमे पंचमो वर्गः ॥

प्र पुनानायेति षडृचं सप्तमं सूक्तमाप्त्यस्य द्वितस्यार्षं । पूर्ववच्छंदोदेवते । तथा चानुक्रम्यते । प्र पुनानाय षड् द्वित आप्त्य इति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र पुनानाय वेधसे सोमाय वच उद्यतं ।

भृतिं न भरा मतिभिर्जुजोषते ॥१॥

प्र । पुनानाय । वेधसे । सोमाय । वचः । उत्ऽयतं ।

भृतिं । न । भर । मतिऽभिः । जुजोषते ॥१॥

द्वितो नामर्षिः स्वात्मानं प्रत्याह । पुनानाय पवित्रेण पूयमानाय वेधसे कर्मणो विधात्रे मतिभिर्जुजोषते प्रीयमाणाय यद्वा मतिभिः स्तोतृभिः सह जुजोषते प्रीणयित्रे सोमायोद्यतमुद्युक्तं वचः प्र भर । प्रकर्षेण संपादय । अभिष्टुहीत्यर्थः । तत्र दृष्टांतः । भृतिं न । यथा भृतका भृतिं संपादयंति तद्वत् ॥

॥ अथ द्वितीया ॥

परि वाराण्यव्यया गोभिरंजानो अर्षति ।

त्री षधस्था पुनानः कृणुते हरिः ॥२॥

परि । वाराणि । अव्यया । गोभिः । अंजानः । अर्षति ।

त्री । सधऽस्था । पुनानः । कृणुते । हरिः ॥२॥

गोभिर्गोविकारैः क्षीरादिभिरंजानोऽज्यमानः सोमोऽव्ययाविमयानि वाराणि वालानि पवित्राणि पर्यर्षति । परिगच्छति । अपि च । हरिर्हरितवर्णः सोमः पुनानः पूयमानः सन् त्री त्रीणि सधस्था । सह तिष्ठंत्यत्रेति सधस्थं स्थानं । द्रोणकलशाधवनीयपूतभृदात्मकानि त्रीणि स्थानानि कृणुते । करोति ॥

॥ अथ तृतीया ॥

परि कोशं मधुश्चुतमव्यये वारे अर्षति ।

अभि वाणीर्ऋषीणां सप्त नूषत ॥३॥

परि । कोशं । मधुऽश्चुतं । अव्यये । वारे । अर्षति ।

अभि । वाणीः । ऋषीणां । सप्त । नूषत ॥३॥

स सोमोऽव्ययेऽविमये वारे वाले पवित्रे मधुश्चुतं मधुररसस्य च्यावयितारं द्रोणकलशं प्रत्यात्मीयं रसं पर्यर्षति । गमयति । तमिमं सोममृषीणां सप्त वाणीश्छंदांस्यभि नूषत । अभिष्टुवंति । नू स्तवने कुटादिः ॥

॥ अथ चतुर्थी ॥

परि णेता मतीनां विश्वदेवो अदाभ्यः ।
सोमः पुनानश्चम्वोर्विशद्धरिः ॥४॥

परि । नेता । मतीनां । विश्वऽदेवः । अदाभ्यः ।
सोमः । पुनानः । चम्वोः । विशत् । हरिः ॥४॥

हरिर्हरितवर्णः स सोमः पुनानः पूयमानः सन् चम्वोरधिषवणफलकयोः परि विशत् । परिविशति । कीदृशः । मतीनां स्तुतीनां नेता । यद्वा मतीनां स्तोतॄणां स्वकर्मण्युपनेता विश्वदेवः सर्वदेवः । सोमेऽभिषूयमाणे सतींद्रादयः सर्वे देवाः सोमं प्रत्यागच्छंति खलु । तस्मात्सर्वदेवोपेतः । अत एवादाभ्योऽहिंसितः कैश्चिदपि ॥

॥ अथ पंचमी ॥

परि देवीरनु स्वधा इंद्रेण याहि सरथं ।
पुनानो वाघद्वाघद्भिरमर्त्यः ॥५॥

परि । देवीः । अनु । स्वधाः । इंद्रेण । याहि । सऽरथं ।
पुनानः । वाघत् । वाघत्ऽभिः । अमर्त्यः ॥५॥

हे सोम त्वमिंद्रेण सरथं समानं रथमारुह्य देवीर्देवानां संबंधीनि स्वधा बलान्यनु देवसेनाः परि याहि । परिगच्छ । कीदृशः । पुनानः पूयमानो वाघद्भिः । वाघत इत्यृत्विङ्नाम । हविषां प्रेरकैर्ऋत्विग्भिर्वाघदूह्यमानोऽमर्त्यो मनुष्यधर्मरहितः । यद्वा । वाघद्भिर्ऋत्विग्भिः पुनानः पूयमानो वाघत् स्तोतॄणां यष्टॄणां धनादीनि प्रापयन् परिगच्छ ॥

॥ अथ षष्ठी ॥

परि सप्तिर्न वाजयुर्देवो देवेभ्यः सुतः ।
व्यानशिः पवमानो वि धावति ॥६॥

परि । सप्तिः । न । वाजऽयुः । देवः । देवेभ्यः । सुतः ।
विऽआनशिः । पवमानः । वि । धावति ॥ ६ ॥

सप्तिर्नाश्व इव वाजयुर्युद्धमिच्छन्देवो दीप्यमानो देवेभ्यो देवार्थं सुतोऽभिषुतो व्यानशिः पात्रेषु व्यापी पवमानः पवित्रेण पूयमान एतादृशः सोमः परि धावति। परितः पात्राण्यभिगच्छति। व्यानशिः। अशू व्याप्तौ। आदृगमहनेत्यत्रोत्सर्गश्छंदसि सदादिभ्यो दर्शनादिति किप्रत्ययः। अश्नोतेश्चेति नुडागमः ॥

॥ इति सप्तमस्य पंचमे षष्ठो वर्गः ॥

॥ इति नवमे मंडले षष्ठोऽनुवाकः ॥

सप्तमेऽनुवाक एकादश सूक्तानि। तत्र सखाय इति षड्चं प्रथमं सूक्तं। काण्वौ पर्वतनारदावृषी। अथवा कश्यपस्य पुत्र्यौ शिखंडिन्याख्ये द्वे अप्सरसावस्य सूक्तस्य द्रष्ट्र्यौ। पूर्ववच्छंदोदेवते। तथा चानुक्रम्यते। सखायः पर्वतनारदौ काश्यपौ द्वे शिखंडिन्यौ वाप्सरसाविति ॥ गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

सखाय आ नि षीदत पुनानाय प्र गायत ।
शिशुं न यज्ञैः परि भूषत श्रिये ॥ १ ॥
सखायः । आ । नि । सीदत । पुनानाय । प्र । गायत ।
शिशुं । न । यज्ञैः । परि । भूषत । श्रिये ॥ १ ॥

हे सखायः सखिभूताः स्तोतार ऋत्विज आ नि षीदत। स्तोतुमुपविशत। अथ पुनानाय पूयमानाय सोमाय प्र गायत। प्रकर्षेण गायत। तमभिष्टुत। ततोऽभिषुतं सोमं यज्ञैर्यजनीयैर्हविर्भिर्मिश्रणैश्च श्रिये शोभनार्थं परि भूषत। परितोऽलंकुरुत। तत्र दृष्टांतः। शिशुं न। यथा शिशुं बालं पुत्रं पितर आभरणैरलंकुर्वंति तद्वत् ॥

प्रवर्ग्येऽभिष्टवे समी वत्समित्येका। सूचितं च। समी वत्सं न मातृभिः सं वत्स इव मातृभिः। आ० ४.७.। इति ॥

॥ सैषा द्वितीया ॥

समीं वत्सं न मातृभिः सृजता गयसाधनं ।
देवाव्यं१मदमभि द्विशवसं ॥ २ ॥
सं । ईमिति । वत्सं । न । मातृऽभिः । सृजत । गयऽसाधनं ।
देवऽअव्यं । मदं । अभि । द्विऽशवसं ॥ २ ॥

हे ऋत्विजो गयसाधनं गृहस्य साधनमीमेनं सोमं मातृभिर्मातृभूताभिर्वसतीवरीभिः सं सृजत । संमिश्रयत । कथमिव । वत्सं न । यथा वत्सं मातृभिर्गोभिः संयोजयंति तद्वत् । कीदृशं । देवाव्यं । देवानां रक्षकं मदं मदनहेतुं द्विशवसं द्विगुणवेगमतिशयितबलं वा । यद्वा द्वयोर्लोकयोस्तत्र स्थिता देवमनुष्या इत्यर्थः । तेषां हविर्धनप्रदानेन वर्धयितारं । तं सोममभिसंसृजत ॥

॥ अथ तृतीया ॥

पुनाता दक्षसाधनं यथा शर्धाय वीतये ।
यथा मित्राय वरुणाय शंतमः ॥ ३ ॥
पुनात । दक्षऽसाधनं । यथा । शर्धाय । वीतये ।
यथा । मित्राय । वरुणाय । शंऽतमः ॥ ३ ॥

दक्षसाधनं बलस्य साधनं धनादिवृद्धेर्वा साधकं सोमं पुनात । पवित्रेण पुनीत । पूञ् पवने । क्र्यादिः । तस्माल्लोटि तप्तनप्तनथनाश्चेति तस्य तबादेशः । पित्त्वादीत्वाभावः । असौ सोमः शर्धाय वेगार्थं वीतये देवानां पानार्थं यथा भवति । यथा वा मित्राय वरुणाय च शंतमोऽतिशयेन सुखं करोति तथा पुनीतेत्यर्थः ॥

॥ अथ चतुर्थी ॥

अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत ।
गोभिष्टे वर्णमभि वासयामसि ॥ ४ ॥
अस्मभ्यं । त्वा । वसुऽविदं । अभि । वाणीः । अनूषत ।
गोभिः । ते । वर्णं । अभि । वासयामसि ॥ ४ ॥

हे सोम वसुविदं धनस्य दातारं त्वा त्वामस्मभ्यं धनादिप्रदानार्थं वाणीरस्मदीया वाचोऽभ्यनूषत । अभिष्टुवंति । नू स्तवने । वयं ते तव वर्णमावरकं रसं गोभिर्गोविकारैः क्षीरादिभिरभि वासयामसि । अभिवासयामः । अभित आच्छादयामः ॥

॥ अथ पंचमी ॥

स नो मदानां पत इंदो देवप्सरा असि ।
सखेव सख्ये गातुवित्तमो भव ॥५॥
सः । नः । मदानां । पते । इंदो इति । देवऽप्सराः । असि ।
सखाऽइव । सख्ये । गातुवित्ऽतमः । भव ॥५॥

नोऽस्मदादीनां मदानां मदकानां पते स्वामिन् हे इंदो सोम स त्वं देवप्सरा असि । प्सर इति रूपनाम । दीप्तरूपो भवसि । स त्वं सखेव यथा सखा सुहृत् सख्ये मित्राय सत्यं मार्गं ज्ञापयति तद्वदस्माकमपि गातुवित्तमोऽत्यंतं मार्गस्य लंभको भव । ज्ञापको भव ॥

॥ अथ षष्ठी ॥

सनेमि कृध्य१स्मदा रक्षसं कं चिदत्रिणं ।
अपादेवं द्वयुमंहो युयोधि नः ॥६॥
सनेमि । कृधि । अस्मत् । आ । रक्षसं । कं । चित् । अत्रिणं ।
अप । अदेवं । द्वयुं । अंहः । युयोधि । नः ॥६॥

हे सोम अस्मदस्मासु सनेमि । पुराणनामैतत् । पुराणं सख्यं कृधि । कुरु । आ अपि चात्रिणमदनशीलं कंचिद्राक्षसमप युध्यस्व । कीदृशं । अदेवं । अदेवनशीलं द्वयुं द्वयवंतं सत्यानृतयुक्तं बाह्याभ्यंतरमायायुक्तं वा । किंच । नोऽस्माकमंहः पापं चाप युयोधि । संप्रहर । युध्यतेर्बहुलं छंदसीति शपः श्लुः । वा छंदसीति हेर्ङित्त्वाभावाद्गुणः । धलोपश्छांदसः । यौतेर्वा श्लौ पूर्ववद्रूपं ॥

॥ इति सप्तमस्य पंचमे सप्तमो वर्गः ॥

तं व इति षडृचं द्वितीयं सूक्तं । पर्वतनारदयोरार्षं । अन्यत्पूर्ववत् । तं व इत्यनुक्रांतं । गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

तं वः सखायो मदाय पुनानमभि गायत ।
शिशुं न यज्ञैः स्वदयंत गूर्तिभिः ॥१॥
तं । वः । सखायः । मदाय । पुनानं । अभि । गायत ।
शिशुं । न । यज्ञैः । स्वदयंत । गूर्तिऽभिः ॥१॥

हे सखाय ऋत्विजो वो यूयं मदाय देवानां मदार्थं पुनानं पूयमानं तं सोममभि गायत । अभिष्टुत । तमिमं सोमं शिशुं न शिशुमिवालंकारैः क्षीरादिभिश्च यथा स्वादूकुर्वंति तद्वद्यज्ञैर्हविर्भिर्मिश्रणैर्गूर्तिभिः स्तुतिभिश्च स्वदयंत । स्वादूकुर्वंति ॥

प्रवर्ग्येऽभिष्टवे सं वत्स इव मातृभिरित्येषा । सूत्रं च समी वत्सं इत्यनया सहोक्तं ॥

॥ सैषा सूक्ते द्वितीया ॥

सं वत्स इव मातृभिरिंदुर्हिन्वानो अज्यते ।
देवावीर्मदो मतिभिः परिष्कृतः ॥२॥
सं । वत्सःऽइव । मातृऽभिः । इंदुः । हिन्वानः । अज्यते ।
देवऽअवीः । मदः । मतिऽभिः । परिऽकृतः ॥२॥

हिन्वानः प्रेर्यमाण इंदुः सोमो वसतीवरीभिः समज्यते । सम्यक् सिक्तो भवति । तत्र दृष्टांतः । वत्स इव । वत्सो यथा मातृभिर्गोभिः समक्तो भवति तद्वत् । कीदृशः । देवावीर्देवानां रक्षको मदो मदकरो मतिभिः स्तुतिभिः परिष्कृतोऽलंकृतः । भूषणार्थे संपर्युपेभ्य इति सुडागमः । परिनिविभ्य इति सुटः षत्वं ॥

॥ अथ तृतीया ॥

अयं दक्षाय साधनोऽयं शर्धाय वीतये ।
अयं देवेभ्यो मधुमत्तमः सुतः ॥३॥
अयं । दक्षाय । साधनः । अयं । शर्धाय । वीतये ।
अयं । देवेभ्यः । मधुमत्ऽतमः । सुतः ॥३॥

अयं सोमो दक्षाय बलाय वर्धनाय वा साधनः साधयिता भवति । तथायं

सोमः शर्धाय वेगार्थं वीतये देवानां भक्षणार्थं च भवति । सुतोऽभिषुतोऽयं सोमो देवेभ्य इंद्रादिभ्यो मधुमत्तमोऽतिशयेन माधुर्ययुक्तो भवति । अत्यंतं मदकरो भवतीति वा ॥

॥ अथ चतुर्थी ॥

गोमन्न इंदो अश्ववत्सुतः सुदक्ष धन्व ।

शुचिं ते वर्णमधि गोषु दीधरं ॥४॥

गोऽमत् । नः । इंदो इति । अश्वऽवत् । सुतः । सुऽदक्ष । धन्व ।

शुचिं । ते । वर्णं । अधि । गोषु । दीधरं ॥४॥

हे सुदक्ष सुबल हे इंदो सोम सुतोऽभिषुतस्त्वं नोऽस्माकं गोमद्यज्ञसाधनगोयुक्तमश्ववदश्वयुक्तं धनं धन्व । गमय । धविर्गत्यर्थः । भ्वादिः । ततोऽहं शुचिं पूतं दीप्यमानं वा ते तव वर्णं रसं गोषु गव्येषु क्षीरादिष्वधि दीधरं । अधिधारयामि । मिश्रयामि ॥

॥ अथ पंचमी ॥

स नो हरीणां पत इंदो देवप्सरस्तमः ।

सखेव सख्ये नर्यो रुचे भव ॥५॥

सः । नः । हरीणां । पते । इंदो इति । देवप्सरःऽतमः ।

सखाऽइव । सख्ये । नर्यः । रुचे । भव ॥५॥

हे हरीणां पते नोऽस्मदीयानां हरितवर्णानां पशूनां स्वामिन् हे इंदो सोम देवप्सरस्तमोऽतिशयेन दीप्तरूपोपेतः स त्वं नर्यः कर्मनेतृभ्य ऋत्विग्भ्यो हितः स त्वं नोऽस्माकं रुचे भव । दीप्तिकरो भव । किमिव । सखेव । यथा सखा सख्ये मित्राय दीप्तिकरो भवति तद्वत् ॥

॥ अथ षष्ठी ॥

सनेमि त्वमस्मदाँ अदेवं कं चिदत्रिणं ।

साह्वाँ इंदो परि बाधो अप द्वयुं ॥६॥

सनेमि । त्वं । अस्मत् । आ । अदेवं । कं । चित् । अत्रिणं ।

सह्वान् । इंदो इति । परि । बाधः । अप । द्वयुं ॥६॥

हे सोम त्वं सनेमि पुराणं सख्यमस्मदस्मासु कुरु। आ अपि चादेवमदेवनशीलं कं चिदप्यत्रिणमदनशीलं राक्षसमस्मदस्मत्तोऽपगमय। किंच। हे इंदो साह्वान् शत्रूनभिभवन् बाधो बाधमानान्परि जहि। तथा द्वयुं द्वयवंतं सत्यानृतयुक्तं बाह्याभ्यंतरमायाद्वयोपेतं वा राक्षसमस्मत्तोऽपगमय॥

॥ इति सप्तमस्य पंचमेऽष्टमो वर्गः ॥

इंद्रमच्छेति चतुर्दशर्चं तृतीयं सूक्तमौष्णिहं पवमानसोमदेवताकं। प्रथमस्य तृचस्य चक्षुराख्यपुत्रोऽग्निर्ऋषिः। द्वितीयस्य मनुपुत्रश्चक्षुर्नामा। अप्सुनाम्नः पुत्रो मनुस्तृतीयस्य। एवं नवर्चो गताः। शिष्टानामपि पंचानां चाक्षुषोऽग्निः। तथा चानुक्रम्यते। इंद्रमच्छ षळूनाग्निश्चाक्षुषश्चक्षुर्मानवो मनुराप्सव इति तृचाः पंचाग्निरिति। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

इंद्रमच्छ सुता इमे वृषणं यंतु हरयः।
श्रुष्टी जातास इंदवः स्वर्विदः ॥१॥
इंद्रं। अच्छ। सुताः। इमे। वृषणं। यंतु। हरयः।
श्रुष्टी। जातासः। इंदवः। स्वःऽविदः ॥१॥

श्रुष्टी। श्रुष्टीति क्षिप्रनाम। क्षिप्रं जातासो जाता इंदवः पात्रेषु क्षरंतः स्वर्विदः सर्वज्ञा हरयो हरितवर्णाः सुता अभिषुता इमे सोमा वृषणं कामानां सेक्तारमिंद्रमच्छ यंतु। अभिगच्छंतु॥

॥ अथ द्वितीया ॥

अयं भराय सानसिरिंद्राय पवते सुतः।
सोमो जैत्रस्य चेतति यथा विदे ॥२॥
अयं। भराय। सानसिः। इंद्राय। पवते। सुतः।
सोमः। जैत्रस्य। चेतति। यथा। विदे ॥२॥

भराय संग्रामाय तदर्थं सानसिर्भजनीयः सुतोऽभिषुतोऽयं सोम इंद्रायेंद्रार्थं पवते। ग्रहादिषु क्षरति। ततः सोमो जैत्रस्य। क्रियाग्रहणं कर्तव्यमिति कर्मणः

संप्रदानसंज्ञा चतुर्थ्यर्थे बहुलमिति षष्ठी । जयशीलमिंद्रं चेतति । जानाति । यथेंद्रो विदे लोके ज्ञायते तथा जानाति ॥

॥ अथ तृतीया ॥

अस्येदिंद्रो मदेष्वा ग्राभं गृभ्णीत सानसिं ।
वज्रं च वृषणं भरत्समप्सुजित् ॥३॥

अस्य । इत् । इंद्रः । मदेषु । आ । ग्राभं । गृभ्णीत । सानसिं ।
वज्रं । च । वृषणं । भरत् । सं । अप्सुऽजित् ॥३॥

आ अनंतरमिंद्रोऽस्येदस्य सोमस्यैव मदेषु संजातेषु सानसिं सर्वैः संभजनीयं ग्राभं ग्राह्यं ग्रहीतव्यं धनं गृभ्णीत । गृह्णाति । हृग्रहोर्भ इति भत्वं । किंच । अप्सुजिदुदकार्थं वृत्रस्य जेता । यद्वा । आप इत्यंतरिक्षनाम । अंतरिक्षेऽहिनामकस्य जेतेंद्रो वृषणं वर्षितारं वज्रं च सं भरत् । सं बिभर्तु । बिभर्तेर्लेट्यडागमः ॥

॥ अथ चतुर्थी ॥

प्र धन्वा सोम जागृविरिंद्रायेंदो परि स्रव ।
द्युमंतं शुष्ममा भरा स्वर्विदं ॥४॥

प्र । धन्व । सोम । जागृविः । इंद्राय । इंदो इति । परि । स्रव ।
द्युऽमंतं । शुष्मं । आ । भर । स्वःऽविदं ॥४॥

हे सोम जागृविर्जागरणशीलस्त्वं प्र धन्व । प्रक्षर । हे इंदो सोम इंद्राय परि स्रव । परितः पात्रेषु क्षर । किंच द्युमंतं दीप्तियुक्तं स्वर्विदं सर्वस्य लंभकं शुष्मं शत्रूणां शोषकं बलमा भर । आहर ॥

॥ अथ पंचमी ॥

इंद्राय वृषणं मदं पवस्व विश्वदर्शतः ।
सहस्रयामा पथिकृद्विचक्षणः ॥५॥

इंद्राय । वृषणं । मदं । पवस्व । विश्वऽदर्शतः ।
सहस्रऽयामा । पथिऽकृत् । विऽचक्षणः ॥५॥

हे सोम त्वं वृषणं वर्षितारं मदं मदहेतुं रसमिंद्रायेंद्रार्थं पवस्व । क्षर ।

कीदृशः । विश्वदर्शतः सर्वैर्दर्शनीयः सहस्रयामा बहुमार्गः पथिकृद्यजमानानां सन्मार्गकरणशीलो विचक्षणः सर्वस्य विद्रष्टा ॥

॥ इति सप्तमस्य पंचमे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः ।
सहस्रं याहि पथिभिः कनिक्रदत् ॥ ६ ॥
अस्मभ्यं । गातुवित्ऽतमः । देवेभ्यः । मधुमत्ऽतमः ।
सहस्रं । याहि । पथिऽभिः । कनिक्रदत् ॥ ६ ॥

हे सोम अस्मभ्यं गातुवित्तमोऽत्यंतं मार्गस्य लंभकस्तथा देवेभ्यश्च मधुमत्तमोऽत्यंतं स्वादुकारी त्वं कनिक्रदत् शब्दं कुर्वन् सहस्रं पथिभिर्बहुभिर्मार्गैर्याहि । कलशमागच्छ ॥

॥ अथ सप्तमी ॥

पवस्व देववीतय इंदो धाराभिरोजसा ।
आ कलशं मधुमान्त्सोम नः सदः ॥ ७ ॥
पवस्व । देवऽवीतये । इंदो इति । धाराभिः । ओजसा ।
आ । कलशं । मधुऽमान् । सोम । नः । सदः ॥ ७ ॥

हे इंदो सोम देववीतये देवानां भक्षणायौजसा बलेन धाराभिरात्मीयाभिः पवस्व । क्षर । हे सोम मधुमान् मदकररसवांस्त्वं नोऽस्मदीयं कलशं द्रोणाभिधानमा सदः ॥ सदेर्लुङि रूपं ॥ आसीद ॥

॥ अथाष्टमी ॥

तव द्रप्सा उदप्रुत इंद्रं मदाय वावृधुः ।
त्वां देवासो अमृताय कं पपुः ॥ ८ ॥
तव । द्रप्साः । उदऽप्रुतः । इंद्रं । मदाय । ववृधुः ।
त्वां । देवासः । अमृताय । कं । पपुः ॥ ८ ॥

उदप्रुतो वसतीवर्याख्यमुदकं प्रति गच्छंतः । यद्वोदकस्य निर्गमयितारस्तव

स्वभूता द्रप्सा द्रुतगामिनो रसा मदाय मदार्थमिंद्रं वावृधुः । वर्धयंति । ततो देवासो देवा इंद्रादयः कं सुखकरं त्वाममृतायामरणार्थं पपुः । पिबंति ॥

॥ अथ नवमी ॥

आ नः सुतास इंदवः पुनाना धावता रयिं ।
वृष्टिद्यावो रीत्यापः स्वर्विदः ॥९॥
आ । नः । सुतासः । इंदवः । पुनानाः । धावत । रयिं ।
वृष्टिऽद्यावः । रीतिऽआपः । स्वःऽविदः ॥९॥

हे सुतासोऽभिषूयमाणा हे इंदवो दीप्ताः पात्रेषु क्षरंतो वा हे रीत्यापः । यैः पृथिवीं प्रति स्रवणशीला आपः कृतास्तादृशा हे सोमाः पुनानाः पूयमाना यूयं नोऽस्मभ्यं रयिमा धावत । आगमयत । कीदृशाः । वृष्टिद्यावः । वृष्टिमभि द्यौर्यैः क्रियते वृष्ट्यभिमुखद्युलोकवंतः स्वर्विदः सर्वस्य लंभकाः ॥

॥ अथ दशमी ॥

सोमः पुनान ऊर्मिणाव्यो वारं वि धावति ।
अग्रे वाचः पवमानः कनिक्रदत् ॥१०॥
सोमः । पुनानः । ऊर्मिणा । अव्यः । वारं । वि । धावति ।
अग्रे । वाचः । पवमानः । कनिक्रदत् ॥१०॥

पुनानः पूयमानः सोम ऊर्मिणा स्वीयया धारयाव्योऽवेर्वारं वालं पवित्रं वि धावति । विविधं गच्छति । कीदृशः सोमः । पवमानः पूतो वाचः स्तोत्रस्याग्रे कनिक्रदत् पुनः पुनः शब्दं कुर्वन् विधावति ॥

॥ इति सप्तमस्य पंचमे दशमो वर्गः ॥

॥ अथैकादशी ॥

धीभिर्हिन्वंति वाजिनं वने क्रीळंतमत्यविं ।
अभि त्रिपृष्ठं मतयः समस्वरन् ॥११॥
धीभिः । हिन्वंति । वाजिनं । वने । क्रीळंतं । अतिऽअविं ।
अभि । त्रिऽपृष्ठं । मतयः । सं । अस्वरन् ॥११॥

वाजिनं बलवंतं वने वननीये वसतीवर्याख्य उदके क्रीळंतं संक्रीडमानमत्यविं। अविशब्देन तद्रोमकृतं पवित्रमभिधीयते। अतिक्रांतपवित्रं सोममृत्विजो धीभिः स्तुतिभिर्हिन्वंति। वर्धयंति। यद्वा धीतिभिः। तिवर्णलोपश्छांदसः। धीतिभिरंगुलीभिर्हिन्वंति। प्रेरयंति। हि गतौ वृद्धौ च स्वादिः। किंच। त्रिपृष्ठं त्रीणि पवित्राणि द्रोणकलशाधवनीयपूतभृदाख्यानि पात्राणि स्पृशतीति त्रीणि सवनानि वा स्पृशतीति स तथोक्तः। तं सोमं मतयः स्तुतयोऽभि समस्वरन्। अभितः संस्तुवंति ॥

॥ अथ द्वादशी ॥

असर्जि कलशाँ अभि मीळ्हे सप्तिर्न वाजयुः ।
पुनानो वाचं जनयन्नसिष्यदत् ॥१२॥
असर्जि। कलशान्। अभि। मीळ्हे। सप्तिः। न। वाजऽयुः।
पुनानः। वाचं। जनयन्। असिस्यदत् ॥१२॥

वाजयुर्यजमानानामन्नमिच्छन् स सोमः कलशानभि लक्ष्य कलशेष्वसर्जि। सृज्यते। तत्र दृष्टांतः। सप्तिर्न। यथाश्वो मीळ्हे। संग्रामनामैतत्। संग्रामे सृज्यते तद्वत्। ततः पुनानः पूयमानः सोमो वाचं शब्दं जनयन् उत्पादयन् पात्रेष्वसिष्यदत्। स्यंदते ॥

॥ अथ त्रयोदशी ॥

पवते हर्यतो हरिरति ह्वरांसि रंह्या ।
अभ्यर्षन्स्तोतृभ्यो वीरवद्यशः ॥१३॥
पवते। हर्यतः। हरिः। अति। ह्वरांसि। रंह्या।
अभिऽअर्षन्। स्तोतृऽभ्यः। वीरऽवत्। यशः ॥१३॥

हर्यतः स्पृहणीयो हरिर्हरितवर्णः सोमो रंह्या। तृतीयाया आकारः। साधुवेगेन ह्वरांसि कुटिलान्यनृजूनि पवित्राण्यति पवते। अतीत्य गच्छति। किं कुर्वन्। स्तोतृभ्यो वीरवत् पुत्रयुक्तं यशोऽभ्यर्षन् अभिगमयन् पवते ॥

॥ अथ चतुर्दशी ॥

अया पवस्व देवयुर्मधोर्धारा असृक्षत ।
रेभन्पवित्रं पर्येषि विश्वतः ॥१४॥

अया । पवस्व । देवऽयुः । मधोः । धाराः । असृक्षत ।
रेभन् । पवित्रं । परि । एषि । विश्वतः ॥१४॥

हे सोम देवयुर्देवान्कामयमानस्त्वमयानया धारया पवस्व। क्षर। ततो मधोर्मदकरस्य तव धारा आत्मीया असृक्षत । सृज्यंते । अनंतरं रेभन् शब्दायमानः पवित्रं विश्वतः पर्येषि । सर्वतः परिगच्छसि ॥

॥ इति सप्तमस्य पंचम एकादशो वर्गः ॥

परीत इति षड्विंशत्यृचं चतुर्थं सूक्तं । त्वं सोमासि । ऋग्वे० ९.६७.। इत्यत्रोक्ता भरद्वाजकश्यपाद्याः सप्तर्षयः । आद्या बृहती द्वितीया सतोबृहती । अयमेकः प्रगाथः । परि सुवान इत्येषा तृतीयैकविंशत्यक्षरा भुरिग्विराड् द्विपदा । नृभिर्येमान इति षोडशी विंशत्यक्षरा द्विपदा विराट् । चतुर्थ्यादिद्वौ प्रगाथौ । दशम्यादित्रयः सप्तदश्यादिपंच प्रगाथाः । पवमानः सोमो देवता । तथा चानुक्रम्यते । परीतः षड्विंशतिः सप्तर्षयः प्रागाथं तृतीयाषोळश्यौ द्विपदे अष्टम्याद्ये बृहत्याविति ॥ गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

परीतो षिंचता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्वं१तरा सुषाव सोममद्रिभिः ॥१॥
परि । इतः । सिंचत । सुतं । सोमः । यः । उत्ऽतमं । हविः ।
दधन्वान् । यः । नर्यः । अप्सु । अंतः । आ । सुसाव । सोमं । अद्रिऽभिः ॥१॥

हे ऋत्विजः सुतमभिषुतं सोममित अस्मात्कर्मण ऊर्ध्वमथवास्मात्प्रदेशादूर्ध्वं परि षिंचत वसतीवरीभिः॥ इतो षिंचतेत्यत्र संहितायां छंदसीति रोरुत्वं। आदेशप्रत्यययोरिति षत्वं॥ यः सोमो देवानामुत्तमं प्रशस्यं हविर्भवति। आ अपि च नर्यो मनुष्यहितो यश्च सोमोऽप्सु वसतीवरीष्वंतरिक्षे वांतर्दधन्वान्गच्छन्भवति तं सोममद्रिभिर्ग्रावभिरध्वर्युः सुषाव । अभिषुतं चकार । तं परि षिंचतेति समन्वयः ॥

॥ अथ द्वितीया ॥

नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिंतरः ।
सुते चित्वाप्सु मदामो अंधसा श्रीणंतो गोभिरुत्तरं ॥२॥

नूनं। पुनानः। अविंऽभिः। परि। स्रव। अदब्धः। सुरभिंऽतरः।

सुते। चित्। त्वा। अप्ऽसु। मदामः। अंधसा। श्रीणंतः। गोभिः। उत्ऽतरं ॥२॥

हे सोम अदब्धः कैश्चिदप्यहिंसितः सुरभिंतरोऽत्यंतं सुगंधिस्त्वं नूनमिदानीं पुनानः पूयमानः सन्नविभिरविवालकृतैः पवित्रैस्तेभ्यः परि स्रव। परितः क्षर। सुते चिदभिषुते सत्यंधसा सक्तुलक्षणेनान्नेन गोभिर्गोविकारैः क्षीरैः क्षीरादिभिः श्रीणंतो मिश्रयंतो वयमुत्तरमुन्नततरमप्सु वसतीवरीषु संस्थितं त्वां मदामः। मंदामहे। स्तुमः॥

॥ अथ तृतीया ॥

परि सुवानश्चक्षसे देवमादनः क्रतुरिंदुर्विचक्षणः ॥३॥

परि। सुवानः। चक्षसे। देवऽमादनः। क्रतुः। इंदुः। विऽचक्षणः ॥३॥

सुवानोऽभिषूयमाणः सोमश्चक्षसे सर्वेषां दर्शनाय परि स्रवति। कीदृशः। देवमादनो देवानां तर्पयिता क्रतुः कर्तेंदुः पात्रेषु क्षरणशीलो दीप्तो वा विचक्षणः सर्वस्य विद्रष्टा॥

॥ अथ चतुर्थी ॥

पुनानः सोम धारयापो वसानो अर्षसि।

आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः ॥४॥

पुनानः। सोम। धारया। अपः। वसानः। अर्षसि।

आ। रत्नऽधाः। योनिं। ऋतस्य। सीदसि। उत्सः। देव। हिरण्ययः ॥४॥

हे सोम पुनानः पूयमानस्त्वमप उदकानि वसतीवर्याख्यानि वसान आच्छादयन् धारयार्षसि। पवित्रं गच्छसि। ततो रत्नधा रत्नानां दाता त्वमृतस्य सत्यभूतस्य यज्ञस्य योनिं स्थानमासीदसि। हे देव द्योतमान सोम उत्सः प्रस्यंदनशीलस्त्वं हिरण्ययो हिरण्मयो हिरण्यस्योत्पत्तिस्थानं खलु। यद्वा। देवानां हितरमणीयो भवसि॥

॥ अथ पंचमी ॥

दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत्।

आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः ॥५॥

दुहानः। ऊधः। दिव्यं। मधु। प्रियं। प्रत्नं। सधऽस्थं। आ। असदत्।
आऽपृच्छ्यं। धरुणं। वाजी। अर्षति। नृऽभिः। धूतः। विऽचक्षणः॥५॥

मधु मदकरं प्रियं प्रीणनकारि दिव्यं दिवि भवमूधः सोमवल्लीलक्षणं दुहानः सोमः प्रत्नं पुरातनं सधस्थं। सह तिष्ठंत्यत्रेति सधस्थं स्थानमंतरिक्षमासदत्। आसीदति। सदेर्लुङि रूपं। तत आपृच्छ्यं कर्मण्याप्रष्टव्यं धरुणं कर्मणो धारयितारं यजमानं वाज्यन्नवान्सोमोऽर्षति। तस्मा अन्नं दातुमभिगच्छति। कीदृशः। नृभिः कर्मनेतृभिर्ऋत्विग्भिर्धूतोऽदाभ्यग्रहे परिशोधितः। तैरेनं चतुराधूनोति पंचकृत्वः सप्तकृत्वो वेत्यापस्तंबेन सूचितं। विचक्षणः सर्वस्य विद्रष्टा॥

॥ इति सप्तमस्य पंचमे द्वादशो वर्गः॥

॥ अथ षष्ठी॥

पुनानः सोम जागृविरव्यो वारे परि प्रियः।
त्वं विप्रो अभवोऽङ्गिरस्तमो मध्वा यज्ञं मिमिक्ष नः॥६॥
पुनानः। सोम। जागृविः। अव्यः। वारे। परि। प्रियः।
त्वं। विप्रः। अभवः। अंगिरःऽतमः। मध्वा। यज्ञं। मिमिक्ष। नः॥६॥

हे सोम जागृविर्जागरणशीलः प्रियः प्रीणयिता त्वं पुनानः पूयमानः सन्नव्योऽवेर्वारे वाले पवित्रे परि क्षरसि। किंच। विप्रो मेधावी त्वमंगिरस्तमोऽङ्गिरसां वरिष्ठः पितॄणां नेताभवः। भवसि। स त्वं नोऽस्मदीयं यज्ञं मध्वा मधुनात्मीयेन रसेन मिमिक्ष। सिंच। मिहेः सेचनार्थस्य सनि रूपं॥

॥ अथ सप्तमी॥

सोमो मीढ्वान्पवते गातुवित्तम ऋषिर्विप्रो विचक्षणः।
त्वं कविरभवो देववीतम आ सूर्यं रोहयो दिवि॥७॥
सोमः। मीढ्वान्। पवते। गातुवित्ऽतमः। ऋषिः। विप्रः। विऽचक्षणः।
त्वं। कविः। अभवः। देवऽवीतमः। आ। सूर्यं। रोहयः। दिवि॥७॥

मीढ्वान् कामानां सेक्ता सोमः पवते। क्षरति। कीदृशः। गातुवित्तमोऽत्यंतं मार्गस्य लंभक ऋषिः सर्वस्य प्रदर्शको विप्रो मेधावी विचक्षणो विद्रष्टा। किंच।

कविः क्रांतप्रज्ञस्त्वं देववीतमोऽत्यंतंकामोऽभवः । भवसि । अपि च । दिवि द्युलोके सूर्यमारोहयः । प्रादुर्भावयसि ॥

॥ अथाष्टमी ॥

सोमं उ षुवाणः सोतृभिरधि ष्णुभिरवीनां ।

अश्वयेव हरिता याति धारया मंद्रया याति धारया ॥८॥

सोमः । ऊं इति । सुवानः । सोतृऽभिः । अधि । स्नुऽभिः । अवीनां ।

अश्वयाऽइव । हरिता । याति । धारया । मंद्रया । याति । धारया ॥८॥

सोतृभिरभिषुण्वद्भिर्ऋत्विग्भिः सुवानोऽभिषूयमाणः सोमोऽवीनां स्नुभिः । मांस्पृत्स्नूनामुपसंख्यानमिति सानुशब्दस्य स्नुभावः । समुच्छ्रितैर्वालैः पवित्रैरधि याति । अधिकं गच्छति । उ इति प्रसिद्धौ । अश्वयेव वडवयेव हरिता हरितवर्णया धारया याति । मंद्रया मदकारिण्या धारया द्रोणकलशमभिगच्छति ॥

॥ अथ नवमी ॥

अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।

समुद्रं न संवरणान्यग्मन्मंदी मदाय तोशते ॥९॥

अनूपे । गोऽमान् । गोभिः । अक्षारिति । सोमः । दुग्धाभिः । अक्षारिति ।

समुद्रं । न । संऽवरणानि । अग्मन् । मंदी । मदाय । तोशते ॥९॥

गोमान्गोयुक्तः सोमोऽनूपे निम्ने देशे कलशे गोभिर्गोविकारैः क्षीरादिभिः सहाक्षाः । क्षरति । तदेवोच्यते । स सोम आत्मनो मिश्रणार्थं दुग्धाभिर्गोभिः सहाक्षाः । क्षरति ॥ क्षरतेर्लुङि रूपं ॥ किंच । समुद्रं न यथा समुद्रमुदकानि गच्छंति तद्वत्संवरणानि संभजनीयानि रसरूपाण्यन्नानि द्रोणकलशमग्मन् । गच्छंति ॥ गमेर्लुङि च्लेर्लुकि रूपं । किंच । मदी मदकरः सोमो मदाय मदार्थं तोशते । हन्यते । अभिषूयते । तोशतिर्वधकर्मा ॥

॥ अथ दशमी ॥

आ सोम सुवानो अद्रिभिस्तिरो वाराण्यव्यया ।

जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे ॥१०॥

आ । सोम । सुवानः । अद्रिऽभिः । तिरः । वाराणि । अव्यया ।
जनः । न । पुरि । चम्वोः । विशत् । हरिः । सदः । वनेषु । दधिषे ॥१०॥

हे सोम अद्रिभिर्ग्रावभिः सुवानोऽभिषूयमाणस्त्वमव्ययाविमयानि वाराणि वालानि पवित्राणि तिरस्कुर्वन् व्यवधायकानि कुर्वाणः सन् आ पवस इति शेषः । हरिर्हरितवर्णः स सोमश्चम्वोरधिषवणफलकयोरुपरि स्थिते कलशे विशत् । प्रविशति । तत्र दृष्टांतः । जनो न यथा जनः पुरि पुरे प्रविशति । स त्वं वनेषु काष्ठनिर्मितेषु पात्रेषु सदः स्थानं दधिषे । करोषि ॥

॥ इति सप्तमस्य पंचमे त्रयोदशो वर्गः ॥

॥ अथैकादशी ॥

स मामृजे तिरो अण्वानि मेष्यो मीळ्हे सप्तिर्न वाजयुः ।
अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ॥११॥

सः । ममृजे । तिरः । अण्वानि । मेष्यः । मीळ्हे । सप्तिः । न । वाजऽयुः ।
अनुऽमाद्यः । पवमानः । मनीषिऽभिः । सोमः । विप्रेभिः । ऋक्वऽभिः ॥११॥

वाजयुरन्नकामोऽण्वान्यणूनि सूक्ष्माणि मेष्यो मेष्या अवे रोमाणि पवित्राणि तिरस्कुर्वन् व्यवधायकानि कुर्वाणः सन् आ पवस इति शेषः । हरिर्हरितवर्णः स सोमो ममृजे । परिशोध्यते । अलंक्रियते वा । तत्र दृष्टांतः । सप्तिर्न । यथा जयकामैरश्वो मीळ्हे संग्रामेऽलंक्रियते । कीदृशः । अनुमाद्योऽनुमोदनीयः सर्वैः पवमानो मनीषिभिर्ऋत्विग्भिः पूयमानस्तथर्क्वभिः । छंदसीवनिपाविति वनिप् । स्तुतिमद्भिर्विप्रैर्मेधाविभिरभिष्टुतो मृज्यते ॥

॥ अथ द्वादशी ॥

प्र सोम देववीतये सिंधुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतं ॥१२॥

प्र । सोम । देवऽवीतये । सिंधुः । न । पिप्ये । अर्णसा ।
अंशोः । पयसा । मदिरः । न । जागृविः । अच्छ । कोशं । मधुऽश्चुतं ॥१२॥

हे सोम देववीतये देवानां पानाय तदर्थमर्णसा वसतीवर्याख्येनोदकेन प्र पिप्ये । प्रप्यायसे । तत्र दृष्टांतः । सिंधुर्न यथा सिंधुरुदकेन प्रपिप्ये प्रप्यायते

तद्वत्। प्यायतेर्लिटि लिड्यङोश्चेति पीभावः। ततः स त्वं मदिरो न मदकरः सुरादिरिव जागृविर्जागरणशीलः। यद्वा। न संप्रत्यर्थे। इदानीं मदकरो जागरणशीलस्त्वमंशोर्लताखंडस्य पयसा रसेन मधुश्चुतं रसस्य स्रावयितारं कोशं द्रोणकलशमच्छाभिगच्छसि ॥

॥ अथ त्रयोदशी ॥

आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः।
तमीं हिन्वंत्यपसो यथा रथं नदीष्वा गभस्त्योः ॥१३॥

आ। हर्यतः। अर्जुने। अत्के। अव्यत। प्रियः। सूनुः। न। मर्ज्यः।
तं। ईं। हिन्वंति। अपसः। यथा। रथं। नदीषु। आ। गभस्त्योः ॥१३॥

हर्यतः स्पृहणीयः प्रियः प्रीणयिता सूनुर्न सूनुरिव मर्ज्यो मार्जनीयः सोमोऽर्जुनेऽर्जुनवर्णेऽत्के रूपे पवित्रेऽव्यत। आवृणोति। तमीमेनं सोममंगुलयो नदीषु नदमानासु वसतीवरीषु गभस्त्योर्बाह्वोराभिमुख्येन हिन्वंति। प्रेरयंति। तत्र दृष्टांतः। अपसो यथा वेगवंतो जना रथं संग्रामेषु प्रेरयंति तद्वत् ॥

॥ अथ चतुर्दशी ॥

अभि सोमास आयवः पवंते मद्यं मदं।
समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः ॥१४॥

अभि। सोमासः। आयवः। पवंते। मद्यं। मदं।
समुद्रस्य। अधि। विष्टपि। मनीषिणः। मत्सरासः। स्वःऽविदः ॥१४॥

आयवो गमनशीलाः सोमासः सोमा मद्यं मदकरं मदमात्मीयं रसमभि पवंते। अभितो निर्गमयंति। कुत्रेत्युच्यते। समुद्रस्यांतरिक्षस्याधि विष्टप्यधिकं समुच्छ्रिते पवित्रे। यद्वा। समुद्रस्य। समुद्द्रवंत्यस्माद्रसाः। तस्य कलशस्याध्युपरि विष्टपि स्थाने पवित्रे निर्गमयंति। कीदृशाः। मनीषिणो मनस ईशितारो मत्सरासो मदकराः स्वर्विदः सर्वस्य लंभकाः ॥

॥ अथ पंचदशी ॥

तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत्।
अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥१५॥

तर॑त् । स॒मु॒द्रम् । पव॑मानः । ऊ॒र्मिणा॑ । राजा॑ । दे॒वः । ऋ॒तम् । बृ॒हत् ।
अर्ष॑त् । मि॒त्रस्य॑ । वरु॑णस्य । धर्म॑णा । प्र । हि॒न्वा॒नः । ऋ॒तम् । बृ॒हत् ॥ १५ ॥

पवमानः पूयमानो देवो द्योतमानो बृहदत्यंतमृतं सत्यभूतं राजा सोमः समुद्रमंतरिक्षं कलशं वोर्मिणा धारया तरत् । तरति । हिन्वानः प्रेर्यमाण ऋतं बृहदत्यंतं सत्यभूतः स सोमो मित्रस्य वरुणस्य मित्रावरुणयोर्धर्मणा धारणार्थं प्रार्षत् । प्रगच्छति ॥

॥ इति सप्तमस्य पंचमे चतुर्दशो वर्गः ॥

॥ अथ षोडशी ॥

नृभि॑र्येमा॒नो ह॑र्य॒तो वि॑चक्ष॒णो राजा॑ दे॒वः स॑मु॒द्रियः॑ ॥ १६ ॥
नृऽभिः॑ । ये॒मा॒नः । ह॒र्य॒तः । वि॒ऽच॒क्ष॒णः । राजा॑ । दे॒वः । स॒मु॒द्रियः॑ ॥ १६ ॥

नृभिः कर्मनेतृभिर्येमानो नियम्यमानो हर्यतः स्पृहणीयो विचक्षणो विद्रष्टा देवो दीप्यमानः समुद्रियोऽतरिक्षे भवो राजा सोम इंद्रार्थं पवत इत्युत्तरेण संबंधः । समुद्राभ्राद्घ इति भावार्थे घप्रत्ययः ॥

॥ अथ सप्तदशी ॥

इंद्रा॑य पवते॒ मदः॒ सोमो॑ म॒रुत्व॑ते सु॒तः ।
स॒हस्र॑धारो॒ अत्यव्य॑मर्षति॒ तमी॑ मृजंत्या॒यवः॑ ॥ १७ ॥
इंद्रा॑य । प॒व॒ते॒ । मदः॑ । सोमः॑ । म॒रुत्व॑ते । सु॒तः ।
स॒हस्र॑ऽधारः । अति॑ । अव्य॑म् । अ॒र्ष॒ति॒ । तम् । ई॒मिति॑ । मृ॒जं॒ति॒ । आ॒यवः॑ ॥ १७ ॥

मदो मादकः सुतोऽभिषुतः सोमो मरुत्वते मरुद्भिस्तद्वत इंद्रायेंद्रार्थं पवते । क्षरति । ततः सहस्रधारो बहुधारोपेतः सोमोऽव्यमविमयं पवित्रमत्यर्षति । अतिगच्छति । तमिमं सोममायवो मनुष्या ऋत्विजो मृजंति । शोधयंति ॥

॥ अथाष्टादशी ॥

पु॒ना॒नश्च॒मू ज॒नय॑न्म॒तिं क॒विः सोमो॑ दे॒वेषु॑ रण्यति ।
अ॒पो वसा॑नः॒ परि॒ गोभि॒रुत्त॑रः॒ सीद॒न्वने॑ष्वव्यत ॥ १८ ॥

पुनानः । चमू इति । जनयन् । मतिं । कविः । सोमः । देवेषु । रण्यति ।
अपः । वसानः । परि । गोभिः । उत्ऽतरः । सीदन् । वनेषु । अव्यत ॥ १८ ॥

चमू । सप्तम्याः पूर्वसवर्णदीर्घः । चम्वोरधिषवणफलकयोः पुनानः पूयमानोऽभिषूयमाणो मतिं स्तुतिं जनयन् उत्पादयन् कविः क्रांतप्रज्ञ एतादृशः सोमो देवेष्विंद्रादिषु रण्यति । किंच । अपो वसतीवरीर्वसान आच्छादयन् वनेषु काष्ठेषु पात्रेषु सीदन् सोमो गोभिर्गोविकारैः क्षीरादिभिः पर्यव्यत । परिदीयते । आच्छाद्यते ॥

॥ अथैकोनविंशी ॥

तवाहं सोम रारण सख्य इंदो दिवेदिवे ।
पुरूणि बभ्रो नि चरंति मामव परिधींरति ताँ इहि ॥ १९ ॥
तव । अहं । सोम । ररण । सख्ये । इंदो इति । दिवेऽदिवे ।
पुरूणि । बभ्रो इति । नि । चरंति । मां । अव । परिऽधीन् । अति । तान् । इहि ॥ १९ ॥

हे इंदो हे सोम तव सख्ये सखिकर्मण्यहं दिवेदिवेऽन्वहं रारण ॥ रणेर्लिट्युत्तमे णलि रूपं ॥ हे बभ्रो बभ्रुवर्ण सोम पुरूणि बहूनि रक्षांसि मां तव सख्ये स्थितं न्यवचरंति । नीचीनं चरंति । बाधंते । ये मां बाधंते तान्परिधीन्राक्षसांस्त्वमतीहि । अतीत्य गच्छ । जहीति यावत् ॥

॥ अथ विंशी ॥

उताहं नक्तमुत सोम ते दिवा सख्याय बभ्र ऊधनि ।
घृणा तपंतमति सूर्यं परः शकुना इव पप्तिम ॥ २० ॥
उत । अहं । नक्तं । उत । सोम । ते । दिवा । सख्याय । बभ्रो इति । ऊधनि ।
घृणा । तपंतं । अति । सूर्यं । परः । शकुनाःऽइव । पप्तिम ॥ २० ॥

हे बभ्रो बभ्रुवर्ण हे सोम उतापि च नक्तमुतापि च दिवाहोरात्रयोः सख्याय सख्यार्थं तवोधनि समीपेऽहं रम इति शेषः । ते वयं घृणा दीप्त्या तपंतं ज्वलंतं परः परमस्थानस्थितं सूर्यं तदात्मकं त्वामति पप्तिम । तत्र स्थितं त्वां प्राप्तुमतिपेतिम । कथमिव । शकुना इव । यथा सुपर्णादयः पक्षिणः

सूर्यमतिगच्छंति तद्वत् ॥ पत्लृ गतौ । अस्माच्छांदसे लिटि तनिपत्योश्छंदसीत्युपधालोपः ॥

॥ इति सप्तमस्य पंचमे पंचदशो वर्गः ॥

यावस्तोत्रेऽभिरूपकरणे सोमे मृज्यमान एकस्तृचः । तत्र मृज्यमान इत्येषा तृतीया । सूत्रितं च । मृज्यमानः सुहस्त्य दशभिर्विवस्वते । आ० ५.१२. । इति ॥

॥ सैषा सूक्त एकविंशी ॥

मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।
रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥२१॥

मृज्यमानः । सुऽहस्त्य । समुद्रे । वाचं । इन्वसि ।
रयिं । पिशंगं । बहुलं । पुरुऽस्पृहं । पवमान । अभि । अर्षसि ॥२१॥

हे सुहस्त्य । हस्ते भवा हस्त्या अंगुलयः । शोभनांगुलिक सोम मृज्यमानः शोध्यमानस्त्वं समुद्रेऽतरिक्षे कलशे वा वाचं शब्दमिन्वसि । प्रेरयसि । किंच । हे पवमान पूयमान सोम पिशंगं हिरण्यैः पिशंगवर्णं बहुलं प्रभूतं पुरुस्पृहं बहुभिः स्पृहणीयं रयिं धनमभ्यर्षसि । स्तोतॄणामभिक्षरसि । प्रयच्छसि ॥

॥ अथ द्वाविंशी ॥

मृजानो वारे पवमानो अव्यये वृषाव चक्रदो वने ।
देवानां सोम पवमान निष्कृतं गोभिरंजानो अर्षसि ॥२२॥

मृजानः । वारे । पवमानः । अव्यये । वृषा । अव । चक्रदः । वने ।
देवानां । सोम । पवमान । निःऽकृतं । गोभिः । अंजानः । अर्षसि ॥२२॥

हे सोम वृषा वर्षिता त्वं मृजानो वसतीवरीभिर्मृज्यमानोऽलंक्रियमाणोऽव्ययेऽविमये वारे वाले पवित्रे पवमानः पूयमानः सन् वने वननीय उदके काष्ठे कलशे वाव चक्रदः । अवक्रंदसि । शब्दायसे । ततो हे सोम हे पवमान त्वं गोभिर्गव्यैः क्षीरादिभिरंजानोऽज्यमानः सन् निष्कृतं संस्कृतं देवानां स्थानमर्षसि । गच्छसि ॥

॥ अथ त्रयोविंशी ॥

पवस्व वाजसातयेऽभि विश्वानि काव्या ।
त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ॥२३॥
पवस्व । वाजऽसातये । अभि । विश्वानि । काव्या ।
त्वं । समुद्रं । प्रथमः । वि । धारयः । देवेभ्यः । सोम । मत्सरः ॥२३॥

हे सोम विश्वानि सर्वाणि काव्या कविकर्माणि स्तोत्राण्यभि लक्ष्य वाजसातयेऽन्नलाभाय पवस्व । क्षर । हे सोम देवेभ्यो देवानां मत्सरो मदकरः प्रथमः सर्वदेवानां मुख्यस्त्वं समुद्रमंतरिक्षं कलशं वा वि धारयः । विशेषेण धारयसि ॥

॥ अथ चतुर्विंशी ॥

स तू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः ।
त्वां विप्रासो मतिभिर्विचक्षण शुभ्रं हिन्वंति धीतिभिः ॥२४॥
सः । तु । पवस्व । परि । पार्थिवं । रजः । दिव्या । च । सोम । धर्मऽभिः ।
त्वां । विप्रासः । मतिऽभिः । विऽचक्षण । शुभ्रं । हिन्वंति । धीतिऽभिः ॥२४॥

हे सोम तादृशस्त्वं पार्थिवं रजो लोकं प्रति दिव्यानि च रजांसि प्रति धर्मभिर्धारकैः सह तु क्षिप्रं परि पवस्व । परितः क्षर । हे विचक्षण विद्रष्टः सोम विप्रासो विप्रा मेधाविनो मतिभिः स्तुतिभिर्धीतिभिरंगुलीभिश्च शुभ्रं श्वेतवर्णं त्वां हिन्वंति । प्रेरयंति ॥

॥ अथ पंचविंशी ॥

पवमाना असृक्षत पवित्रमति धारया ।
मरुत्वंतो मत्सरा इंद्रिया हया मेधामभि प्रयांसि च ॥२५॥
पवमानाः । असृक्षत । पवित्रं । अति । धारया ।
मरुत्वंतः । मत्सराः । इंद्रियाः । हयाः । मेधां । अभि । प्रयांसि । च ॥२५॥

पवमानाः पूयमानाः सोमा धारयात्मीयया पवित्रमतीत्यासृक्षत । सृज्यंते । कीदृशाः । मरुत्वंतो मरुद्भिर्युक्ता मत्सरा मदकरा इंद्रिया इंद्रजुष्टाः । मेधां स्तुतिं प्रयांस्यन्नानि चाभि लक्ष्य स्तोतृभ्य उभयं कर्तुं वा हया गंतार एते सृज्यंते ॥

॥ अथ षड्विंशी ॥

अपो वसानः परि कोशमर्षतींदुर्हियानः सोतृभिः ।
जनयञ्ज्योतिर्मंदना अवीवशद्गाः कृण्वानो न निर्णिजं ॥२६॥
अपः । वसानः । परि । कोशं । अर्षति । इंदुः । हियानः । सोतृऽभिः ।
जनयन् । ज्योतिः । मंदनाः । अवीवशत् । गाः । कृण्वानः । न । निःऽनिजं ॥२६॥

अपो वसतीवरीर्वसान आच्छादयन् सोतृभिरभिषुण्वद्भिर्हियानः प्रेर्यमाण इंदुः सोमः कोशं कलशं पर्यर्षति । प्रति गच्छति । किंच ज्योतिर्दीप्तिं जनयन् उत्पादयन् गा गव्यानि क्षीरादीनि निर्णिजमात्मनो रूपं कृण्वानः कुर्वन् मिश्रयन् सोऽयं सोमः । न संप्रत्यर्थे । इदानीं मंदनाः स्तुतीरवीवशत् । कामयते । वश कांतौ । लुङि चङि रूपं ॥

॥ इति सप्तमस्य पंचमे षोडशो वर्गः ॥

पवस्वेति षोडशर्चं पंचमं सूक्तं । आद्यदृचस्य गौरिवीतिर्नाम शक्तिपुत्र ऋषिः । तृतीयायाः शक्तिर्नाम वासिष्ठः । ततः पंचानां दृचानामूरुर्नामांगिरस ऋजिश्वा नाम भारद्वाज ऊर्ध्वसद्मा नामांगिरसः कृतयशा नाम कश्चित् सोऽप्यांगिरस ऋणंचयो नाम राजर्षिरित्येते क्रमेणर्षयः । एवं त्रयोदश गताः । ततस्तिसृणां वासिष्ठः शक्तिः । प्रथमातृतीयाद्या अयुजः ककुभः । द्वितीयाचतुर्थ्याद्या युजः सतोबृहत्यः । स सुन्वे यो वसूनामित्येषा तु यवमध्या गायत्री । पवमानः सोमो देवता । तथा चानुक्रम्यते । पवस्व षोळश गौरिवीतिर्दृचं शक्तिरेकामूरुर्ऋजिश्वोर्ध्वसद्मा कृतयशा ऋणंचय इत्यृषयो दृचास्तिस्रः शक्तिः काकुभाः प्रगाथाः स सुन्वे गायत्री यवमध्येति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

पवस्व मधुमत्तम इंद्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥१॥
पवस्व । मधुमत्ऽतमः । इंद्राय । सोम । क्रतुवित्ऽतमः । मदः ।
महि । द्युक्षऽतमः । मदः ॥१॥

हे सोम मधुमत्तमोऽतिशयेन माधुर्योपेतस्त्वमिंद्रायेंद्रार्थं मदो मदकरः सन्

पवस्व । क्षर । कीदृशः । क्रतुवित्तमोऽत्यंतं प्रज्ञायाः कर्मणो वा लंभको महि महान् मंहनीयो वा द्युक्षतमोऽत्यंतं दीप्तो मदो मदहेतुः ॥

॥ अथ द्वितीया ॥

यस्य॑ ते पी॒त्वा वृ॑ष॒भो वृ॑षा॒यते॒ऽस्य पी॒ता स्व॒र्विदः॑ ।
स सु॒प्रके॑तो अ॒भ्य॑क्रमी॒दिषो॒ऽच्छा॒ वाजं॒ नैत॑शः ॥२॥

यस्य॑ । ते॒ । पी॒त्वा । वृ॒ष॒भः । वृ॒ष॒ऽयते॑ । अ॒स्य । पी॒ता । स्वः॒ऽविदः॑ ।
सः । सु॒ऽप्रके॑तः । अ॒भि । अ॒क्र॒मी॒त् । इषः॑ । अच्छ॑ । वाजं॑ । न । एत॑शः ॥२॥

वृषभः कामानां वर्षक इंद्रो यस्य ते त्वां पीत्वा वृषायते वृषभवदाचरति । किंच । स्वर्दृशः सर्वस्य दर्शकस्यास्य ते तव पीता पाने सति सुप्रकेतः सुप्रज्ञः स इंद्र इषः शत्रूणामन्नान्यभ्यक्रमीत् । अभिक्रामति । तत्र दृष्टांतः । वाजं नैतशः । एतश इत्यश्वनाम । यथाश्वो वाजं संग्राममभिगच्छति तद्वत् ॥

॥ अथ तृतीया ॥

त्वं ह्यं१॒॑ग दैव्या॒ पव॑मान॒ जनि॑मानि द्यु॒मत्त॑मः ।
अ॒मृ॒त॒त्वाय॑ घो॒षयः॑ ॥३॥

त्वं । हि । अं॒ग । दैव्या॑ । पव॑मान । जनि॑मानि । द्यु॒मत्ऽत॑मः ।
अ॒मृ॒त॒ऽत्वाय॑ । घो॒षयः॑ ॥३॥

हे पवमान पूयमान सोम द्युमत्तमोऽतिशयेन दीप्तिमान् त्वं हि त्वमेव दैव्या देवसंबंधीनि जनिमानि जन्मानि । देवानित्यर्थः । तानभिलक्ष्यामृतत्वाय तेषाममरणायांग क्षिप्रं घोषयः । शब्दायसे । घुषिर् विशब्दने । एयंतस्य लेटि रूपं । हियोगादनिघातः ॥

॥ अथ चतुर्थी ॥

येना॒ नव॑ग्वो द॒ध्यङ्ङ॑पोर्णु॒ते येन॒ विप्रा॑स आपि॒रे ।
दे॒वानां॑ सु॒म्ने अ॒मृत॑स्य॒ चारु॑णो॒ येन॒ श्रवां॑स्यान॒शुः ॥४॥

येन॑ । नव॑ऽग्वः । द॒ध्यङ् । अ॒प॒ऽऊ॒र्णु॒ते । येन॑ । विप्रा॑सः । आ॒पि॒रे ।
दे॒वानां॑ । सु॒म्ने । अ॒मृत॑स्य । चारु॑णः । येन॑ । श्रवां॑सि । आ॒न॒शुः ॥४॥

नवग्वो नवनीयगतिर्यद्वा नवभिर्मासैः सत्रस्यानुष्ठाता दध्यङ् एतन्नामकोऽंगिरा येन सोमेन पणिभिरपहृतानां गवां द्वारमपोर्णुतेऽपाच्छादयति विवृतमकार्षीत् विप्रासस्तन्मुखाः सर्वे मेधाविनोऽंगिरसो येन च सोमेनापिर एतैरपहृता गा आप्नुवन् किंच देवानामिंद्रादीनां सुम्ने सुखे यज्ञेन संजाते सति चारुणः कल्याणस्यामृतस्योदकस्य संबंधीनि श्रवांस्यन्नानि येन च सोमेन यजमाना आनशुराप्नुवन् अलभंत स त्वं देवानाममृतत्वाय शब्दायस इति पूर्वेण समन्वयः ॥

॥ अथ पंचमी ॥

एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिंतमः ।
क्रीळन्नूर्मिरपामिव ॥५॥

एषः । स्यः । धारया । सुतः । अव्यः । वारेभिः । पवते । मदिन्ऽतमः ।
क्रीळन् । ऊर्मिः । अपांऽइव ॥५॥

स्यः स एष सुतोऽभिषुतः सोमोऽव्योऽवेर्वारेभिर्वालैस्तेभ्यः पवित्रेभ्यो धारयात्मीयया पवते । कलशमभिलक्ष्य क्षरति । कीदृशः । मदिंतमो मादयितृतमोऽपामिवोदकानामूर्मिः संघात इव क्रीळन् इतस्ततः संक्रीडमानः पवते ॥

॥ इति सप्तमस्य पंचमे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

य उस्रिया अप्या अंतरश्मनो निर्गा अकृंतदोजसा ।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ॥६॥

यः । उस्रियाः । अप्याः । अंतः । अश्मनः । निः । गाः । अकृंतत् । ओजसा ।
अभि । व्रजं । तत्निषे । गव्यं । अश्व्यं । वर्मीऽइव । धृष्णो इति । आ । रुज ॥६॥

यः सोम उस्रिया उत्सरणशीला अप्याः । अप इत्यंतरिक्षनाम । तस्माद्भवे छंदसीति यत् । अंतरिक्षस्था अहिप्रभृतिभिरसुरैरपहृत्य निहिता गा अपोऽश्मनः । मेघनामैतत् । मेघादंतरोजसा बलेन निरकृंतत् निरच्छिनत् । अंतरिक्षाद्वृष्टिमकार्षीदित्यर्थः । स त्वमसुरैरपहृतं गव्यं गोसंबंधिनमश्व्यमश्वेषु भवं व्रजं समूहमभि तत्निषे । अभितो व्याप्नोषि ॥ तनु विस्तारे । छांदसे लिटि तनिपत्योश्छंदसीत्युप-

धालोपः। किंच। हे धृष्णो शत्रुधर्षणशील सोम स त्वं वर्मीव कवचीव शूर आ रुज। असुरानाजहि॥

॥ अथ सप्तमी ॥

आ सोता परि षिंचताश्वं न स्तोममप्तुरं रजस्तुरं।
वनक्रक्षमुदप्रुतं ॥७॥

आ। सोत। परि। सिंचत। अश्वं। न। स्तोमं। अप्ऽतुरं। रजःऽतुरं।
वनऽक्रक्षं। उदऽप्रुतं ॥७॥

हे ऋत्विज आ सोत। सोममभिषुणुत। षुञ् अभिषवे। लोटि छांदसो विकरणस्य लुक्। तप्तनप्तनथनाश्चेति तस्य तबादेशः। किंच। परि षिंचत। परितस्तं वसतीवर्यादिभिः सिंचत। कीदृशं। अश्वं नाश्वमिव वेगिनं स्तोमं स्तोतव्यमप्तुरमंतरिक्षस्थितानामुदकानां प्रेरकं रजस्तुरं तेजसां च प्रेरकं। वनक्रक्षमुदकानां वर्षकं। यद्वा। काष्ठेषु पात्रेषु विप्रकीर्णं। उदप्रुतमुदके गच्छंतं प्लवमानं सोममभिषुणुताभिषिंचत च॥

॥ अथाष्टमी ॥

सहस्रधारं वृषभं पयोवृधं प्रियं देवाय जन्मने।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥८॥

सहस्रऽधारं। वृषभं। पयःऽवृधं। प्रियं। देवाय। जन्मने।
ऋतेन। यः। ऋतऽजातः। विऽववृधे। राजा। देवः। ऋतं। बृहत् ॥८॥

सहस्रधारं बहुधारोपेतं वृषभं कामानां वर्षकं पयोवृधमुदकानां वर्धकं प्रियं प्रीणयितारं तं सोमं देवाय देवसंबंधिने जन्मने देवेभ्यस्तदर्थमभिषुणुत। ऋतजात उदकाज्जातो यो राजा सोम ऋतेन वसतीवर्याख्येनोदकेन वि ववृधे। विशेषेण वर्धते। कीदृशः। देवो द्योतमानः स्तोतव्यो वा। ऋतं सत्यभूतः सन् बृहत् महान्। तमासुनुतेति पूर्वेण समन्वयः॥

॥ अथ नवमी ॥

अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुः।
वि कोशं मध्यमं युव ॥९॥

अभि। द्युम्नं। बृहत्। यशः। इषः। पते। दिदीहि। देव। देवऽयुः।
वि। कोशं। मध्यमं। युव ॥९॥

हे इषस्पतेऽन्नस्य पते हे देव स्तोतव्य सोम देवयुर्देवकामस्त्वं द्युम्नं द्योतमानं बृहत्प्रभूतं यशोऽन्नमस्मभ्यमभि दिदीहि। आभिमुख्येन प्रकाशय। प्रयच्छेत्यर्थः॥ आमंत्रितस्याविद्यमानवत्त्वेन पादादित्वादनिघातः॥ किंच मध्यममंतरिक्षस्थितं कोशं मेघं वि युव। वृष्ट्यर्थं विगमय। विश्लेषय॥

॥ अथ दशमी ॥

आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः।
वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः ॥१०॥

आ। वच्यस्व। सुऽदक्ष। चम्वोः। सुतः। विशां। वह्निः। न। विश्पतिः।
वृष्टिं। दिवः। पवस्व। रीतिं। अपां। जिन्व। गोऽइष्टये। धियः ॥१०॥

हे सुदक्ष सुबल सोम चम्वोरधिषवणफलकयोः सुतोऽभिषुतस्त्वं विशां प्रजानां वह्निर्न वोढा विश्पती राजेव सर्वासां प्रजानां वोढा त्वमा वच्यस्व। आगच्छ। कलशमापवस्व॥ वचेर्गत्यर्थस्य व्यत्ययेन श्यनि रूपं। किंच। त्वं वृष्टिं वृष्यमाणामपामुदकानां रीतिं गतिं दिवो द्युलोकात्पवस्व। कुरु। ततो गविष्टये गामात्मन इच्छते यजमानाय धियः कर्माणि जिन्व। आपूरय॥

॥ इति सप्तमस्य पंचमेऽष्टादशो वर्गः ॥

॥ अथैकादशी ॥

एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवो दुहुः।
विश्वा वसूनि बिभ्रतं ॥११॥

एतं। ऊं इति। त्यं। मदऽच्युतं। सहस्रऽधारं। वृषभं। दिवः। दुहुः।
विश्वा। वसूनि। बिभ्रतं ॥११॥

दिवः देवान्कामयमाना ऋत्विज एतं त्यं तमिमं सोममेव दुहुः। दुदुहुः। दुहंति। ग्रावाणो वत्सा ऋत्विजो दुहंतीति तैत्तिरीयकब्राह्मणं। कीदृशं सोमं। मदच्युतं मदस्य प्रेरकं सहस्रधारं बहुधारं वृषभं कामानां वर्षकं विश्वा सर्वाणि वसूनि धनानि बिभ्रतं धारयंतं सोमं दुहंति॥

॥ अथ द्वादशी ॥

वृषा वि जज्ञे जनयन्नमर्त्यः प्रतपञ्ज्योतिषा तमः ।

स सुष्टुतः कविभिर्निर्णिजं दधे त्रिधात्वस्य दंससा ॥१२॥

वृषा । वि । जज्ञे । जनयन् । अमर्त्यः । प्रऽतपन् । ज्योतिषा । तमः ।

सः । सुऽस्तुतः । कविऽभिः । निःऽनिजं । दधे । त्रिऽधातु । अस्य । दंससा ॥१२॥

वृषा कामानां वर्षकोऽमर्त्यो मनुष्यधर्मरहितः सोमो वि जज्ञे । विज्ञायते । किं कुर्वन् । जनयन् शब्दं ज्योतिर्वोत्पादयन् ज्योतिषा स्वीयेन तमः प्रतपन् प्रज्वलयन् विनाशयन् प्रादुर्भवति । ततः कविभिर्मेधाविभिः स्तोतृभिः सुष्टुतः स सोमो निर्णिजं निर्णेजनहेतुं मिश्रणं गव्यं दधे । धारयति । अथ त्रिधातु त्रिषु सवनेषु देवानां पोषकं । यद्वा । त्रयः सोमधारका द्रोणकलशादयो यस्मिन् तद्यज्ञार्थं कर्मास्य सोमस्य दंससा कर्मणा ध्रियते खलु ॥

॥ अथ त्रयोदशी ॥

स सुन्वे यो वसूनां यो रायामानेता य इळानां ।

सोमो यः सुक्षितीनां ॥१३॥

सः । सुन्वे । यः । वसूनां । यः । रायां । आऽनेता । यः । इळानां ।

सोमः । यः । सुऽक्षितीनां ॥१३॥

स सोमः सुन्वेऽभिसुषुव ऋत्विग्भिर्यः सोमो वसूनां धनानामानेता यश्च रायां । रांति प्रयच्छंति क्षीरादिकमिति रायो गावः । तेषामानेता यश्चेळानामन्नानां च यश्च सोमः सुक्षितीनां सुनिवासानां शोभनमनुष्ययुक्तानां गृहाणामानेता विद्यते सोऽभिषुतोऽभूदिति ॥

॥ अथ चतुर्दशी ॥

यस्य न इंद्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।

आ येन मित्रावरुणा करामह एंद्रमवसे महे ॥१४॥

यस्य । नः । इंद्रः । पिबात् । यस्य । मरुतः । यस्य । वा । अर्यमणा । भगः ।

आ । येन । मित्रावरुणा । करामहे । आ । इंद्रं । अवसे । महे ॥१४॥

नोऽस्मदीयं यस्य यं सोममिंद्रः पिबात्पिबति ॥ पा पाने लेट्यडागमः ॥ यं च सोमं मरुतः पिबंति । वा अपि चार्यमणैतन्नामकेन देवेन सह भगो देवो यं सोमं पिबति । येन सोमेन मित्रावरुणा मित्रावरुणौ वयमाकरामहेऽभिमुखीकुर्महे तथा महे महतेऽवसे रक्षणाय येन च सोमेनेंद्रमभिमुखीकुर्महे स सोमोऽभिषूयते ॥

॥ अथ पंचदशी ॥

इंद्राय सोम पातवे नृभिर्यतः स्वायुधो मदिंतमः ।
पवस्व मधुमत्तमः ॥१५॥

इंद्राय । सोम । पातवे । नृऽभिः । यतः । सुऽआयुधः । मदिन्ऽतमः ।
पवस्व । मधुमत्ऽतमः ॥१५॥

हे सोम मधुमत्तमोऽतिशयेन माधुर्योपेतस्त्वमिंद्राय पातवे पानार्थं पवस्व । कलशे क्षर । कीदृशः । नृभिः कर्मनेतृभिर्ऋत्विग्भिर्यतः संयतः । स्वायुधः शोभनस्फ्यकपालाद्यायुधोपेतो मदिंतमो मादयितृतमः ॥

॥ अथ षोडशी ॥

इंद्रस्य हार्दि सोमधानमा विश समुद्रमिव सिंधवः ।
जुष्टो मित्राय वरुणाय वायवे दिवो विष्टंभ उत्तमः ॥१६॥

इंद्रस्य । हार्दि । सोमऽधानं । आ । विश । समुद्रंऽइव । सिंधवः ।
जुष्टः । मित्राय । वरुणाय । वायवे । दिवः । विष्टंभः । उत्ऽतमः ॥१६॥

हे सोम त्वमिंद्रस्य हार्दि हृदयंगमं हृदयभूतं वा सोमधानं । सोमो निधीयतेऽस्मिन्निति सोमधानः कलशः । तमा विश । प्रविश । तत्र दृष्टांतः । समुद्रमिव यथा समुद्रं सिंधवो नद्यः प्रविशंति तद्वत् । कीदृशस्त्वं । मित्राय वरुणाय वायवे च तेभ्यो जुष्टः । दिवो द्युलोकस्य विष्टंभो विष्टंभयिता स्थापयितोत्तमः सर्वेषामुत्कृष्टतमस्त्वं कलशमाविश ॥

॥ इति सप्तमस्य पंचम एकोनविंशो वर्गः ॥

परि प्रेति द्वाविंशत्यृचं द्वैपदं षष्ठं सूक्तं । यज्ञे सदस्यवस्थितहोत्रीयादिधिष्ण्योपेता अग्नयो नामेश्वरपुत्रा ऋषयः । विंशतिका द्विपदा विराजः ।

पवमानः सोमो देवता । तथा चानुक्रांतं । परि प्र द्यधिकाग्नयो धिष्ण्या ऐश्वरा द्वैपदमिति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

परि प्र धन्वेंद्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥१॥

परि । प्र । धन्व । इंद्राय । सोम । स्वादुः । मित्राय । पूष्णे । भगाय ॥१॥

हे सोम स्वादुः स्वादुरसस्त्वमिंद्राय मित्राय पूष्णे भगायैतेभ्यो देवेभ्यः परि प्र धन्व । परितः पात्रेषु प्रक्षर ॥

॥ अथ द्वितीया ॥

इंद्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ॥२॥

इंद्रः । ते । सोम । सुतस्य । पेयाः । क्रत्वे । दक्षाय । विश्वे । च । देवाः ॥२॥

हे सोम सुतस्याभिषुतस्य ते तव स्वं भागमिंद्रः पेयाः । पेयात् । पिबतु ॥ पातेराशीर्लिङि रूपं । पुरुषव्यत्ययः ॥ किमर्थं । क्रत्वे क्रतवे प्रज्ञानाय दक्षाय बलाय च । किंच । अमी सर्वे विश्वे देवाश्च त्वदीयमंशं पिबंतु ॥

॥ अथ तृतीया ॥

एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥३॥

एव । अमृताय । महे । क्षयाय । सः । शुक्रः । अर्ष । दिव्यः । पीयूषः ॥३॥

हे सोम शुक्रो दीप्तो दिव्यो दिवि भवः पीयूषो देवैः पातव्यः स त्वममृतायामरणाय महे महते क्षयाय निवासाय चैवार्ष । एवं पवस्व । क्षर ॥

॥ अथ चतुर्थी ॥

पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥४॥

पवस्व । सोम । महान् । समुद्रः । पिता । देवानां । विश्वा । अभि । धाम ॥४॥

हे सोम महान् देवेभ्यो दीयमानत्वेन महत्त्वयुक्तः समुद्रः समुंदनः । यस्मात्त्वत्समुद्द्रवंति रसास्तादृशः । पिता सर्वेषां पालयिता त्वं देवानां विश्वा । विश्वानि सर्वाणि धाम धामानि शरीराण्यभिलक्ष्य पवस्व ॥

॥ अथ पंचमी ॥

शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै ॥५॥

शुक्रः । पवस्व । देवेभ्यः । सोम । दिवे । पृथिव्यै । शं । च । प्रऽजायै ॥५॥

हे सोम शुक्रो दीप्तस्त्वं देवेभ्यो देवार्थं पवस्व । क्षर । किंच दिवे पृथिव्यै च द्यावापृथिवीभ्यां च ततः प्रजायै प्रजाभ्यश्च शं सुखं च कुरु ॥

॥ अथ षष्ठी ॥

दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥६॥

दिवः । धर्ता । असि । शुक्रः । पीयूषः । सत्ये । विऽधर्मन् । वाजी । पवस्व ॥६॥

हे सोम शुक्रो दीप्तः पीयूषः पातव्यस्त्वं दिवो द्युलोकस्य धर्ता धारकोऽसि । वाजी बलवान् स त्वं सत्ये सत्यभूते विधर्मन् विधर्मणि । विविधकर्माण ऋत्विजो यस्मिन् । यद्वा विविधसोमादिहविषां धारकेऽस्मिन्यज्ञे पवस्व । क्षर ॥

॥ अथ सप्तमी ॥

पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः ॥७॥

पवस्व । सोम । द्युम्नी । सुऽधारः । महां । अवीनां । अनु । पूर्व्यः ॥७॥

हे सोम द्युम्नी । द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः । अन्नवान् यशस्वी वा सुधारः शोभनधारायुक्तः पूर्व्यः पुरातनस्त्वं महां महतामवीनां रोम्णां रोमभ्यः सकाशादनुक्रमेण पवस्व । क्षर ॥

॥ अथाष्टमी ॥

नृभिर्येमानो जज्ञानः पूतः क्षरद्विश्वानि मंद्रः स्वर्वित् ॥८॥

नृऽभिः । येमानः । जज्ञानः । पूतः । क्षरत् । विश्वानि । मंद्रः । स्वःऽवित् ॥८॥

नृभिः कर्मनेतृभिर्ऋत्विग्भिर्येमानो नियम्यमानो जज्ञानो जायमानः पूतः पवित्रेण शोधितो मंद्रो मोदमानः स्वर्वित्सर्वज्ञ एतादृशः सोमो विश्वानि सर्वाणि धनान्यस्मभ्यं क्षरत् क्षरतु । ददातु ॥

॥ अथ नवमी ॥

इंदुः पुनानः प्रजामुराणः करद्विश्वानि द्रविणानि नः ॥९॥

इंदुः। पुनानः। प्रऽजां। उराणः। करत्। विश्वानि। द्रविणानि। नः ॥९॥

पुनानः पूयमान उराणः। उराण उरु कुर्वाण इति यास्कः। देवान् बहु कुर्वाण इंदुः सोमो नोऽस्माकं प्रजामपत्यादिकां विश्वानि व्याप्तानि द्रविणानि धनानि च करत्। करोतु। करोतेर्लेङि रूपं ॥

॥ अथ दशमी ॥

पवस्व सोम क्रत्वे दक्षायाश्वो न निक्तो वाजी धनाय ॥१०॥

पवस्व। सोम। क्रत्वे। दक्षाय। अश्वः। न। निक्तः। वाजी। धनाय ॥१०॥

हे सोम अश्वो नाश्व इव निक्तो वसतीवरीभिरद्भिर्निक्तो वाजी वेगवांस्त्वं क्रत्वे क्रतवे प्रज्ञानाय दक्षाय बलाय धनाय धनार्थं च पवस्व। क्षर ॥

॥ इति सप्तमस्य पंचमे विंशो वर्गः ॥

॥ अथैकादशी ॥

तं ते सोतारो रसं मदाय पुनंति सोमं महे द्युम्नाय ॥११॥

तं। ते। सोतारः। रसं। मदाय। पुनंति। सोमं। महे। द्युम्नाय ॥११॥

सोतारोऽभिषोतार ऋत्विजो हे सोम ते तव स्वभूतं रसं मदाय मदार्थं पुनंति। तदेवोच्यते। महे महते द्युम्नाय। द्युम्नं द्योततेर्यशो वान्नं वा। अन्नाय यशसे वा सोमं पुनंति। शोधयंति। यद्वा। सोममभिषूयमाणं तं रसं पुनंतीत्येकवाक्यतया योजनीयं ॥

॥ अथ द्वादशी ॥

शिशुं जज्ञानं हरिं मृजंति पवित्रे सोमं देवेभ्य इंदुं ॥१२॥

शिशुं। जज्ञानं। हरिं। मृजंति। पवित्रे। सोमं। देवेभ्यः। इंदुं ॥१२॥

शिशुमपां पुत्रभूतं जज्ञानं जायमानं हरिं हरितवर्णमिंदुं दीप्तं सोमं देवेभ्यो देवार्थं पवित्रे मृजंति। ऋत्विजो मार्जयंति ॥

॥ अथ त्रयोदशी ॥

इंदुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥१३॥

इंदुः । पविष्ट । चारुः । मदाय । अपां । उपऽस्थे । कविः । भगाय ॥१३॥

चारुः कल्याणरूपः कविः क्रांतप्रज्ञ इंदुरपामुदकानामुपस्थ उपस्थानेऽंतरिक्षे पवित्रे वा मदाय मदार्थं भगाय भजनीयधनार्थं च पविष्ट। पवते ॥

॥ अथ चतुर्दशी ॥

बिभर्ति चार्विंद्रस्य नाम येन विश्वानि वृत्रा जघान ॥१४॥

बिभर्ति । चारु । इंद्रस्य । नाम । येन । विश्वानि । वृत्रा । जघान ॥१४॥

स सोमश्चारु कल्याणमिंद्रस्य नाम शरीरं बिभर्ति। धारयति। पोषयति। येन शरीरेणेंद्रो विश्वानि सर्वाणि वृत्राणि पापरूपाणि रक्षांसि जघान। हतवान् ॥

॥ अथ पंचदशी ॥

पिबंत्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य ॥१५॥

पिबंति । अस्य । विश्वे । देवासः । गोभिः । श्रीतस्य । नृऽभिः । सुतस्य ॥१५॥

विश्वे सर्वे देवासो देवा गोभिर्गोविकारैः श्रीतस्य मिश्रितं नृभिः कर्मनेतृभिर्ऋत्विग्भिः सुतस्याभिषुतमस्यामुं सोमं पिबंति ॥ द्वितीयार्थे षष्ठ्यः ॥

॥ अथ षोडशी ॥

प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यं ॥१६॥

प्र । सुवानः । अक्षारिति । सहस्रऽधारः । तिरः । पवित्रं । वि । वारं । अव्यं ॥१६॥

सुवानोऽभिषूयमाणोऽत एव सहस्रधारो बहुधारायुक्तः सोमोऽव्यमविभवं वारं वालं पवित्रं तिरो व्यवधायकं कुर्वन् प्राक्षाः। विविधं प्रक्षरति ॥ क्षरतेर्लुङि रूपं ॥

॥ अथ सप्तदशी ॥

स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥१७॥

सः । वाजी । अक्षारिति । सहस्रऽरेताः । अत्ऽभिः । मृजानः । गोभिः । श्रीणानः ॥१७॥

वाजी वेगवान्बलवान्वा स सोमोऽक्षाः । क्षरति । कीदृशः । सहस्ररेता बहुरेतस्को बहूदकोऽद्भिर्वसतीवरीभिर्मृजानो मृज्यमानो गोभिर्गोविकारैः क्षीरादिभिः श्रीणानः श्रीयमाणः ॥

॥ अथाष्टादशी ॥

प्र सोम याहींद्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ॥१८॥

प्र । सोम । याहि । इंद्रस्य । कुक्षा । नृऽभिः । येमानः । अद्रिऽभिः । सुतः ॥१८॥

हे सोम नृभिर्ऋत्विग्भिर्येमानो नियम्यमानोऽद्रिभिर्ग्रावभिः सुतोऽभिषुतस्त्वमिंद्रस्य कुक्षा ॥ सप्तम्या डादेशः ॥ कुक्षावुदरभूते कलशे वा प्र याहि । प्रकर्षेण गच्छ ॥

॥ अथैकोनविंशी ॥

असर्जि वाजी तिरः पवित्रमिंद्राय सोमः सहस्रधारः ॥१९॥

असर्जि । वाजी । तिरः । पवित्रं । इंद्राय । सोमः । सहस्रऽधारः ॥१९॥

वाजी बलवान्वेगवान्वा पवित्रं तिरस्कुर्वन् सहस्रधारो बहुधारः सोम इंद्रायेंद्रार्थमसर्जि । सृज्यते ॥

॥ अथ विंशी ॥

अंजंत्येनं मध्वो रसेनेंद्राय वृष्ण इंदुं मदाय ॥२०॥

अंजंति । एनं । मध्वः । रसेन । इंद्राय । वृष्णे । इंदुं । मदाय ॥२०॥

वृष्णे कामानां वर्षित्र इंद्रायेंद्रस्य मदाय मदार्थं मध्वो मधुनो रसेन गव्येनैनमिंदुं सोममृत्विजोऽजंति । संयोजयंति ॥

॥ अथैकविंशी ॥

देवेभ्यस्त्वा वृथा पाजसेऽपो वसानं हरिं मृजंति ॥२१॥

देवेभ्यः । त्वा । वृथा । पाजसे । अपः । वसानं । हरिं । मृजंति ॥२१॥

हे सोम अप उदकानि वसानमाच्छादयंतं हरिं हरितवर्णं त्वा त्वां वृथानायासेनर्त्विजो मृजंति । शोधयंति । किमर्थं । देवेभ्यो देवानां पानार्थं । पाजसे तेषां बलार्थं ॥

॥ अथ द्वाविंशी ॥

इंदुरिंद्राय तोशते नि तोशते श्रीणन्नुग्रो रिणन्नपः ॥२२॥

इंदुः । इंद्राय । तोशते । नि । तोशते । श्रीणन् । उग्रः । रिणन् । अपः ॥२२॥

इंदुः सोम इंद्रायेंद्रार्थं तोशते । हन्यते । अभिषूयते । नि तोशते । नितराम-भिषूयते ॥ तोशतिर्वधकर्मा ॥ कीदृशः श्रीणन् प्रेरयन् सोमोऽभिषूयते ॥

॥ इति सप्तमस्य पंचम एकविंशो वर्गः ॥

पर्यू ष्विति द्वादशर्चं सप्तमं सूक्तं । त्र्यरुणत्रसदस्यू राजर्षी अस्य सूक्तस्य द्रष्टारौ । आदितस्तिस्रः पिपीलिकमध्या अनुष्टुभो द्वादशकाष्टकद्वादशकवत्यः । ततः षड्ऊर्ध्व-बृहत्यो द्वादशकत्रयवत्यः । अथ दशम्याद्यास्तिस्रो विराजः । पवमानः सोमो देवता । तथा चानुक्रांतं । पर्यू षु द्वादश त्र्यरुणत्रसदस्यू तिस्रोऽनुष्टुभः पिपीलि-कमध्याः षळूर्ध्वबृहत्यस्तिस्रश्च विराज इति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।

द्विषस्तरध्या ऋणया न ईयसे ॥१॥

परि । ऊं इति । सु । प्र । धन्व । वाजऽसातये । परि । वृत्राणि । सक्षणिः ।

द्विषः । तरध्यै । ऋणऽयाः । न । ईयसे ॥१॥

हे सोम सु सुष्ठु वाजसातयेऽस्मभ्यमन्नदानायैव परि प्र धन्व । परितः प्रगच्छ । यद्वा । वाजसातयेऽन्नलाभाय संग्रामं प्रगच्छ । किंच । सक्षणिः सहनशीलस्त्वं वृत्राणि शत्रून्परिगच्छ । तदेवोच्यते । नोऽस्माकमृणया ऋणानां यापयिता त्वं द्विषः शत्रून्तरध्यै तरीतुं हंतुमीयसे । परिगच्छसि ॥

॥ अथ द्वितीया ॥

अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।

वाजाँ अभि पवमान प्र गाहसे ॥२॥

अनु । हि । त्वा । सुतं । सोम । मदामसि । महे । समर्यऽराज्ये ।

वाजान् । अभि । पवमान । प्र । गाहसे ॥२॥

हे सोम सुतमभिषुतं त्वा त्वां वयमनु मदामसि हि। अनुमदामः। अनुक्रमेणाभिष्टुमः खलु। हे पवमान सोम स त्वं महे महति समर्यराज्ये। महत्समनुष्यं त्वदीयं राज्यमनुपालयितुं वाजाञ्शत्रुबलान्यभिलक्ष्य प्र गाहसे। प्रगच्छसि॥

॥ अथ तृतीया ॥

अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः।

गोजीरया रंहमाणः पुरंध्या ॥३॥

अजीजनः। हि। पवमान। सूर्यं। विऽधारे। शक्मना। पयः।

गोऽजीरया। रंहमाणः। पुरंऽध्या ॥३॥

हे पवमान सोम त्वं पयः पयस उदकस्य विधारे विधारकेऽन्तरिक्षे शक्मना समर्थेन बलेन सूर्यमजीजनो हि। उत्पादितवानभवसि खलु। कीदृशः। गोजीरया स्तोतृभ्यो गवां प्रेरकेण। स्तोतॄणां प्रेरितपशुकेनेत्यर्थः। तादृशेन पुरंध्या बहुविधप्रज्ञानेन युक्तो रंहमाणो वेगं कुर्वाणस्त्वं सूर्यमजीजनः॥

॥ अथ चतुर्थी ॥

अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः।

सदासरो वाजमच्छा सनिष्यदत् ॥४॥

अजीजनः। अमृत। मर्त्येषु। आ। ऋतस्य। धर्मन्। अमृतस्य। चारुणः।

सदा। असरः। वाजं। अच्छ। सनिस्यदत् ॥४॥

हे अमृत मरणधर्मरहित सोम त्वमृतस्य सत्यभूतस्य चारुणः कल्याणस्यामृतस्योदकस्य धर्मन्धारकेऽन्तरिक्षे सूर्यमजीजनः। किमर्थं। मर्त्येष्वा मनुष्येष्वभिमुखीभवनाय। किंच सनिष्यदत् संभजन् स त्वं वाजमच्छ संग्राममभिलक्ष्य सदासरः। सरसि गच्छसि॥

॥ अथ पंचमी ॥

अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितं।

शर्याभिर्न भरमाणो गभस्त्योः ॥५॥

अभिऽअभि। हि। श्रवसा। ततर्दिथ। उत्सं। न। कं। चित्। जनऽपानं। अक्षितं।

शर्याभिः। न। भरमाणः। गभस्त्योः ॥५॥

हे सोम त्वं श्रवसान्नेन हेतुनाभ्यभि ततर्दिथ हि। पवित्रमभितृणवानसि। छिन्नवानसि। तत्र दृष्टांतद्वयं। उत्सं न यथा कश्चिज्जनपानं। अस्मिञ्जना उदकं पिबंति। तमक्षितमक्षीणं कं चित् कंचनोत्समुत्सरणशीलं वाप्यादिकमभितृणत्ति। अथवा कश्चिद्गभस्त्योर्बाह्वोः शर्याभिरंगुलीभिर्भरमाण उदकं संभरन् कंचिदभितृणत्ति तद्वत्॥

॥ अथ षष्ठी ॥

आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत।
वारं न देवः सविता व्यूर्णुते ॥६॥

आत्। ईं। के। चित्। पश्यमानासः। आप्यं। वसुऽरुचः। दिव्याः। अभि। अनूषत।
वारं। न। देवः। सविता। वि। ऊर्णुते ॥६॥

आदनंतरं पश्यमानास एनं पश्यंतो दिव्या दिवि भवा वसुरुचो नाम केचिदाप्यं बंधुं साधुमीमेनं सोममभ्यनूषत। अभ्यस्तुवन्। कस्मादनंतरमित्युच्यते। देवो द्योतमानः सविता सर्वस्य प्रेरकः सूर्यो वारमावरकमंधकारं न व्यूर्णुते। नापगमयति। तदैनमस्तुवन्। सूर्योदयात्प्रागेव हि सोमं स्तुवंति खलु॥

॥ इति सप्तमस्य पंचमे द्वाविंशो वर्गः॥

॥ अथ सप्तमी ॥

त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः।
स त्वं नो वीर वीर्याय चोदय ॥७॥

त्वे इति। सोम। प्रथमाः। वृक्तऽबर्हिषः। महे। वाजाय। श्रवसे। धियं। दधुः।
सः। त्वं। नः। वीर। वीर्याय। चोदय ॥७॥

हे सोम प्रथमाः पुरातनाः। यद्वा। यष्टृत्वेन सर्वेषां जनानां मुख्या वृक्तबर्हिषः। वृक्तं छिन्नं बर्हिर्यैर्यज्ञार्थमिति वृक्तबर्हिषो यजमानाः। महे महते वाजाय बलाय श्रवसेऽन्नाय च धियं बुद्धिं त्वे त्वयि दधुः। निहितवंतः। तस्मात् हे वीर समर्थ सोम स ताहशस्त्वं नोऽस्मानपि संग्रामे वीर्याय सामर्थ्याय चोदय। प्रेरय। यद्वा। वीर्याय वीरे पुत्रे भवाय सुखायास्मान्प्रेरय॥

॥ अथाष्टमी ॥

दि॒वः पी॒यूषं॑ पू॒र्व्यं यदु॒क्थ्यं॑ म॒हो गा॒हाद्दि॒व आ निर॑धुक्षत ।
इंद्र॑म॒भि जाय॑मानं॒ सम॑स्वरन् ॥८॥
दि॒वः । पी॒यूषं॑ । पू॒र्व्यं । यत् । उ॒क्थ्यं॑ । म॒हः । गा॒हात् । दि॒वः । आ । निः । अ॒धु॒क्ष॒त ।
इंद्रं॑ । अ॒भि । जाय॑मानं । सं । अ॒स्व॒र॒न् ॥८॥

दिवो द्युलोकात् तत्र स्थितैर्देवैः पीयूषं पातव्यं पूर्व्यं प्रत्नं यत्सोमरूपमन्नमुक्थ्यं प्रशस्यमस्ति तं सोमं महो महतो गाहाद्गहनाद्दिवो द्युलोकान्निरधुक्षत । आभिमुख्येन निर्दुहंति । ततो दुग्धमिंद्रमभिलक्ष्य जायमानं तं सोमं समस्वरन् । स्तोतारः संस्तुवंति ॥

॥ अथ नवमी ॥

अध॒ यदि॒मे पव॑मान॒ रोद॑सी इ॒मा च॒ विश्वा॒ भुव॑ना॒भि म॒ज्मना॑ ।
यू॒थे न नि॒ःष्ठा वृ॑ष॒भो वि ति॑ष्ठसे ॥९॥
अध॑ । यत् । इ॒मे इति॑ । प॒व॒मा॒न॒ । रोद॑सी॒ इति॑ । इ॒मा । च॒ । विश्वा॑ । भुव॑ना । अ॒भि ।
म॒ज्मना॑ ।
यू॒थे । न । नि॒ःऽस्थाः । वृ॒ष॒भः । वि । ति॒ष्ठ॒से ॥९॥

हे पवमान सोम अधानंतरं यद्यथेमे रोदसी द्यावापृथिव्याविमेमानि विश्वा विश्वानि भुवना भूतजातानि च मज्मना बलेनाभि तिष्ठसि स त्वं तथा कुर्वन् भुवनेषु वि तिष्ठसे । तत्र दृष्टांतः । यूथे न । यथा कश्चिद्वृषभो गवां यूथे वृंदे निःष्ठा निःष्ठितो वर्तते तद्वद्यूथस्थानीयेषु भूतजातेषु निःष्ठितो भवसि ॥

॥ अथ दशमी ॥

सोमः॑ पुना॒नो अ॒व्यये॒ वारे॒ शिशु॒र्न क्रीळ॒न्पव॑मानो अक्षाः ।
स॒हस्र॑धारः श॒तवा॑ज॒ इंदुः॑ ॥१०॥
सोमः॑ । पु॒ना॒नः । अ॒व्यये॑ । वारे॑ । शिशुः॑ । न । क्रीळ॑न् । पव॑मानः । अ॒क्षा॒रिति॑ ।
स॒हस्र॑ऽधारः । श॒तऽवा॑जः । इंदुः॑ ॥१०॥

पुनानः पूयमानः पवमानः पूतः सोमोऽव्ययेऽविमये वारे वाले पवित्रे

शिशुर्न शिशुरिव क्रीळन् इतस्ततः संक्रीडमानः सन् अश्वाः। क्षरति। कीदृशः। सहस्रधारो बहुधारायुक्तः शतवाजो बहुबल इंदुर्दीप्तः ॥

॥ अथैकादशी ॥

एष पुनानो मधुमाँ ऋतावेंद्रायेंदुः पवते स्वादुरूर्मिः।
वाजसनिर्वरिवोविद्वयोधाः ॥११॥

एषः। पुनानः। मधुऽमान्। ऋतऽवा। इंद्राय। इंदुः। पवते। स्वादुः। ऊर्मिः।
वाजऽसनिः। वरिवःऽवित्। वयःऽधाः ॥११॥

पुनानः पूयमानो मधुमान् माधुर्योपेत ऋतवर्तवान् यज्ञवान् इंदुः क्षरणशीलः स्वादुः स्वादुकर ऊर्मिरेष धारासंघ इंद्रायेंद्रार्थं पवते। क्षरति। कीदृशः। वाजसनिरन्नस्य दाता वरिवोविद्धनस्य लंभको वयोधा आयुषो दाता ॥

॥ अथ द्वादशी ॥

स पवस्व सहमानः पृतन्यून्त्सेधन्रक्षांस्यप दुर्गहाणि।
स्वायुधः सासह्वान्त्सोम शत्रून् ॥१२॥

सः। पवस्व। सहमानः। पृतन्यून्। सेधन्। रक्षांसि। अप। दुःऽगहानि।
सुऽआयुधः। ससह्वान्। सोम। शत्रून् ॥१२॥

हे सोम स तादृशस्त्वं पवस्व। किं कुर्वन्। पृतन्यून् ॥ कव्यध्वरपृतनस्यर्चि लोप इति क्यचि परतोऽकारलोपः ॥ संग्रामकामाञ्शत्रून् सहमानोऽभिभवन् तथा दुर्गहाणि केश्चिदपि दुर्गमाणि रक्षांस्यपसेधन् अपगमयन् हिंसन्। किंच। स्वायुधः शोभनायुधः सन् शत्रून्सासह्वान् अभिभवन् अभितपन् पवस्व ॥

॥ इति सप्तमस्य पंचमे त्रयोविंशो वर्गः ॥

अया रुचेति तृचमष्टमं सूक्तं परुच्छेपपुत्रस्यानानताख्यस्यार्षमत्यष्टिच्छंदस्कं। पवमानसोमदेवताकं। तथा चानुक्रम्यते। अया रुचा तृचमनानतः पारुच्छेपिरात्यष्टमिति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः।
धारा सुतस्य रोचते पुनानो अरुषो हरिः।
विश्वा यद्रूपा परियात्यृक्वभिः सप्तास्येभिरृक्वभिः ॥१॥

अया। रुचा। हरिण्या। पुनानः। विश्वा। द्वेषांसि। तरति। स्वयुग्वऽभिः। सूरः। न। स्वयुग्वऽभिः।
धारा। सुतस्य। रोचते। पुनानः। अरुषः। हरिः।
विश्वा। यत्। रूपा। परिऽयाति। ऋक्वऽभिः। सप्तऽआस्येभिः। ऋक्वऽभिः ॥१॥

पुनानः पूयमानः सोमो हरिण्या हरितवर्णयायानया रुचा रोचमानया धारया विश्वा सर्वाणि द्वेषांसि द्वेष्टॄणि रक्षांसि तरति। विनाशयति। तत्र दृष्टांतः। सूरो न। यथा सूर्यः स्वयुग्वभिः स्वयं युक्तै रश्मिभिस्तमांसि हिनस्ति तद्वत्। स्वयुग्वभिरिति द्विरुक्तिरादरार्था। यद्वा धारया युक्तः सोमः स्वीयैर्युक्तैस्तेजोभी रक्षांसि तरति। तस्य सुतस्याभिषुतस्य सोमस्य धारा रोचते। दीप्यते। पुनानः पूयमानो हरिर्हरितवर्णः सोमोऽरुष आरोचमानो भवति। यद्यः सोमः सप्तास्येभी रसहरणशीलास्यैर्ऋक्वभिः स्तुतिमद्भिर्ऋक्वभिस्तेजोभिर्विश्वा विश्वानि व्याप्तानि रूपा रूपाणि नक्षत्राणि परियाति। गच्छति। व्याप्नोति ॥

॥ अथ द्वितीया ॥

त्वं त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे।
परावतो न साम तद्यत्रा रणंति धीतयः।
त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥२॥

त्वं। त्यत्। पणीनां। विदः। वसु। सं। मातृऽभिः। मर्जयसि। स्वे। आ। दमे। ऋतस्य। धीतिऽभिः। दमे।
पराऽवतः। न। साम। तत्। यत्र। रणंति। धीतयः।
त्रिधातुऽभिः। अरुषीभिः। वयः। दधे। रोचमानः। वयः। दधे ॥२॥

हे सोम त्वं त्यत्पणीनां वसु पणिभिरपहृतं गवात्मकं धनं विदः। अलभथाः।

आ अपि चर्तस्य यज्ञस्य धीतिभिर्धात्रीभिर्मातृभिर्वसतीवरीभिः स्व आत्मीये दमे गृहभूते दमे यज्ञे सं मर्जयसि। सम्यक् शुद्धो भवसि। परावतो न दूरस्थाद्देशाद्यथा साम सामध्वनिः श्रूयते तथा तव तत्सामध्वनिः सर्वैः श्रूयते। असौ सोमाभिषवाभिप्रायेणोक्तः। यत्र यस्मिञ्शब्दे धीतयः कर्मणो धर्तारो यजमाना रणंति रमंते। रोचमानः सोमस्त्रिधातुभिस्त्रयाणां लोकानां धारयित्रीभिर्मातृभिर्वसतीवरीभिररुषीभिरारोचमानाभिर्दीप्तिभिर्वयोऽन्नं दधे। स्तोतृभ्यः प्रयच्छति। पुनर्वयो दध इत्यादरार्थं॥

॥ अथ तृतीया॥

पूर्वामनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः।
अग्मन्नुक्थानि पौंस्येंद्रं जैत्राय हर्षयन्।
वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता॥३॥

पूर्वां। अनु। प्रऽदिशं। याति। चेकितत्। सं। रश्मिऽभिः। यतते। दर्शतः। रथः। दैव्यः। दर्शतः। रथः।
अग्मन्। उक्थानि। पौंस्या। इंद्रं। जैत्राय। हर्षयन्।
वज्रः। च। यत्। भवथः। अनपऽच्युता। समत्ऽसु। अनपऽच्युता॥३॥

चेकितज्जानानः सोमः पूर्वां प्राचीं प्रदिशं प्रकृष्टां दिशमनु याति। अनुगच्छति। किंच दर्शतः सर्वैर्दर्शनीयो दैव्यो देवेषु भवस्तव रथः सूर्यरश्मिभिः सं यतते। संगच्छते। पुनर्दर्शतो रथ इत्यादरार्थं। ततः पौंस्या पुंस्त्वावगमान्युक्थानि स्तोत्राण्यग्मन्। इंद्रं गच्छंति। तथा जैत्राय जयार्थं तानि स्तोत्राणींद्रं हर्षयन्। हर्षयंति। तथा तस्य वज्रश्च तमिंद्रं गच्छति। यद्यदा समत्सु संग्रामेष्वनपच्युतानपच्युतौ शत्रुभिरपराजितौ सोम त्वं चेंद्रश्च युवां सह भवथस्तदा स्तोत्रागमनादीनि भवंति। पुनरनपच्युतेत्यादरार्थं॥

॥ इति सप्तमस्य पंचमे चतुर्विंशो वर्गः॥

नानानमिति चतुर्ऋचं नवमं सूक्तमांगिरसस्य शिशुनाम्न आर्षं। पंचपदा पंक्तिश्छंदः। पवमानः सोमो देवता। तथा चानुक्रांतं। नानानं चतुष्कं शिशुः पांक्तं हीति। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

नानानं वा उं नो धियो वि व्रतानि जनानां ।
तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वंतमिच्छतींद्रायेंदो परि स्रव ॥१॥
नानानं । वै । ऊं इति । नः । धियः । वि । व्रतानि । जनानां ।
तक्षा । रिष्टं । रुतं । भिषक् । ब्रह्मा । सुन्वंतं । इच्छति । इंद्राय । इंदो इति । परि । स्रव ॥१॥

ऋषिरेतदादिभिस्त्रिभिः सूक्तैरपरिस्रवतः सोमस्य जामित्वाय मनसो विनोदनं कुर्वन्नाह । हे सोम नोऽस्माकं धियः कर्माणि नानानं नानाजातीयकानि बहूनि भवंति । वैशब्दः प्रसिद्ध्यर्थद्योतनार्थः । ऊं इति पूरणः । तथान्येषामपि जनानां व्रतानि कर्माणि विविधानि भवंति । तक्षा त्वष्टा रिष्टं दारुतक्षणमिच्छति । तथा भिषग्वैद्यश्चिकित्सको रुतं रोगमिच्छति । ब्रह्मा ब्राह्मणः सुन्वंतं सोमाभिषवं कुर्वंतं यजमानमिच्छति । तथाहं त्वत्परिस्रवणमिच्छामि । तस्माद्धे इंदो सोमेंद्रायेंद्रार्थं परि स्रव । परितः क्षर ॥

॥ अथ द्वितीया ॥

जरंतीभिरोषधीभिः पर्णेभिः शकुनानां ।
कार्मारो अश्मभिर्द्युभिर्हिरण्यवंतमिच्छतींद्रायेंदो परि स्रव ॥२॥
जरंतीभिः । ओषधीभिः । पर्णेभिः । शकुनानां ।
कार्मारः । अश्मऽभिः । द्युऽभिः । हिरण्यऽवंतं । इच्छति । इंद्राय । इंदो इति । परि । स्रव ॥२॥

जरतीभिर्जीर्णाभिरोषधीभिरिषवः क्रियंते । तथा शकुनानां पर्णेभिरिषूणां पक्षभूतैः पर्णैश्च क्रियंते तथा द्युभिर्दीप्ताभिरिषूणां तेजनार्थाभिरश्मभिः शिलाभिश्च क्रियंते । एतैः कार्मारोऽयस्कारो हिरण्यवंतमाढ्यं पुरुषमिच्छति । तथाहं त्वत्परिस्रवणमिच्छामि । तस्मादिंदो इंद्राय परिस्रव ॥

॥ अथ तृतीया ॥

कारुरहं ततो भिषगुपलप्रक्षिणी नना ।
नानाधियो वसूयवोऽनु गा इव तस्थिमेंद्रायेंदो परि स्रव ॥३॥

कारुः । अहं । ततः । भिषक् । उपलऽप्रक्षिणी । नना ।
नानाऽधियः । वसुऽयवः । अनु । गाःऽइव । तस्थिम । इंद्राय । इंदो इति । परि । स्रव ॥३॥

ऋषिः प्रवृत्तसोमयागः सन् दशापवित्रात्सोमे क्षरति प्रतिबंधकपापापनुत्तये पुरश्चरितानुकीर्तनपुरःसरमध्येषणां चकार । तावदहं कारुः स्तोमानां कर्तास्मि । तत इति संताननाम । तन्यतेऽस्मादिति ततः पिता । तन्यतेऽसाविति वा ततः पुत्रः । भिषक् भेषजकृत् । यज्ञस्य ब्रह्मेत्यर्थः । सर्वे त्रय्या विद्यया भिषज्यतीति श्रुतेः । तथोपलप्रक्षिणी । उपलेषु वालुकासु प्रक्षिणाति यवान्हिनस्ति भृज्जतीति । यद्वा दृषदादिषूपलेषु भृष्टान्यवान्हिनस्ति चूर्णयतीति । अथवा धानासक्तुकरंभादीनां कारिका वासौ नना माता दुहिता वा । नमनक्रियायोग्यत्वात् । माता खल्वपत्यं प्रति स्तनपानादिना नमनशीला भवति । दुहिता वा शुश्रूषार्थं । एवं सर्वेषां परिचरणेन नानाधियो नानाकर्माणो वसूयवो धनकामा वयमनु तस्थिम । लोकमन्वास्थिताः स्मः । तत्र दृष्टांतः । गा इव । छांदसो जसः शसादेशः । गावो यथा गोष्ठमनुतिष्ठंति स्वपयःप्रदानेन परिचरंति वा एवं वयमपि परिचरामः । एतज्ज्ञात्वा हे इंदो सोमेंद्राय परि स्रव । दशापवित्रात्क्षर । एवमेषाध्येषणा सत्कारपूर्विका । अत्र निरुक्तं । उपलप्रक्षिणीत्युपलेषु प्रक्षिणात्युपलप्रक्षेपिणी वा । कारुरहमस्मि कर्ता स्तोमानां ततो भिषक् तत इति संताननाम पितुर्वा पुत्रस्य वा । उपलप्रक्षिणी सक्तुकारिका नना नमतेर्माता वा दुहिता वा । नानाधियो नानाकर्माणो वसूयवो वसुकामा अन्वास्थिताः स्मो गाव इव लोकं । नि॰ ६.५. । इति ॥

॥ अथ चतुर्थी ॥

अश्वो वोळ्हा सुखं रथं हसनामुपमंत्रिणः ।
शेपो रोमण्वंतौ भेदौ वारिन्मंडूक इच्छतींद्रायेंदो परि स्रव ॥४॥
अश्वः । वोळ्हा । सुऽखं । रथं । हसनां । उपऽमंत्रिणः ।
शेपः । रोमण्ऽवंतौ । भेदौ । वाः । इत् । मंडूकः । इच्छति । इंद्राय । इंदो इति । परि । स्रव ॥४॥

वोळ्हा लक्ष्यं देशं प्रापयन्नश्वः सुखं कल्याणं रथमिच्छति । उपमंत्रिण उपमंत्रवंतो नर्मसचिवा हसनामुपहसनां वाचमिच्छंति । तथा शेपः । शेपो वैतस इति पुंस्प्रजननस्येति यास्कः । नि॰ ३.२१. । यथा शेपो रोमण्वंतौ भेदाविच्छति ।

मंडूकी वारित्। इदवधारणे। उदकमेवेच्छति। तथाहं त्वत्परिस्रवणमिच्छामि। तस्मादिंद्रायेंदो परि स्रवेति ॥

॥ इति सप्तमस्य पंचमे पंचविंशो वर्गः ॥

शर्यणावतीत्येकादशर्चं दशमं सूक्तं मारीचस्य कश्यपस्यार्षं। पूर्ववच्च हीत्युक्तत्वादिदमुत्तरं च पांक्तं। पवमानसोमदेवताकं। तथा चानुक्रम्यते। शर्यणावत्येकादश कश्यप इति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

शर्यणावति सोममिंद्रः पिबतु वृत्रहा।
बलं दधान आत्मनि करिष्यन्वीर्यं महदिंद्रायेंदो परि स्रव ॥१॥
शर्यणाऽवति। सोमं। इंद्रः। पिबतु। वृत्रऽहा।
बलं। दधानः। आत्मनि। करिष्यन्। वीर्यं। महत्। इंद्राय। इंदो इति। परि। स्रव ॥१॥

शर्यणावति। शर्यणावन्नाम कुरुक्षेत्रस्य जघनार्धे सरः। तत्र स्थितं सोमं वृत्रहेंद्रः पिबतु। कीदृशः। आत्मनि बलं दधानो बलं निदधानः। अत एव महद्वीर्यं करिष्यन् शत्रून्प्रति। तस्मादिंद्रायेंदो परि स्रव ॥

॥ अथ द्वितीया ॥

आ पवस्व दिशां पत आर्जीकात्सोम मीढ्वः।
ऋतवाकेन सत्येन श्रद्धया तपसा सुत इंद्रायेंदो परि स्रव ॥२॥
आ। पवस्व। दिशां। पते। आर्जीकात्। सोम। मीढ्वः।
ऋतऽवाकेन। सत्येन। श्रद्धया। तपसा। सुतः। इंद्राय। इंदो इति। परि। स्रव ॥२॥

हे दिशां पते प्राच्यादीनां दिशां प्रकाशकत्वेन स्वामिन्। हे मीढ्वः कामानां सेक्तः। हे सोम आर्जीकात्। ऋजीकानामदूरभव आर्जीको जनपदः। तस्मादा पवस्व। अस्मद्यज्ञं प्रत्यागच्छ। यद्वा। आर्जीकादृजोरकुटिलात्पवित्रात्क्षर। कीदृशः। ऋतवाकेनर्ततस्य वचनेन सत्येन। सत्यर्तयोरल्पो भेदो द्रष्टव्यः। श्रद्धया तपसा युक्तैर्दीक्षितैः सुतोऽभिषुतस्त्वं पवस्व ॥

॥ अथ तृतीया ॥

पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहिताभरत् ।
तं गंधर्वाः प्रत्यगृभ्णन्तं सोमे रसमादधुरिंद्रायेंदो परि स्रव ॥३॥
पर्जन्यऽवृद्धं । महिषं । तं । सूर्यस्य । दुहिता । आ । अभरत् ।
तं । गंधर्वाः । प्रति । अगृभ्णन् । तं । सोमे । रसं । आ । अदधुः । इंद्राय । इंदो इति । परि । स्रव ॥३॥

सूर्यस्य दुहिता । श्रद्धा वै सूर्यस्य दुहितेति वाजसनेयकं । सा पर्जन्यवृद्धं पर्जन्यवत्समर्थं । यद्वा । पर्जन्येन तत्कार्यत्वेनोद्केन प्रवृद्धं महिषं महांतं पूज्यं वा तं सोममाभरत् । आहरत् । द्युलोकादाहृतवती । तमाह्रियमाणं सोमं गंधर्वा विश्वावसुप्रभृतयः प्रत्यगृभ्णन् । प्रत्यगृह्णन् । प्रतिगृहीतवंतः । हृग्रहोर्भः । ततो गंधर्वाः प्रतिगृहीतं रसं सोमे प्रत्यक्षमादधुः । दधातेर्लिङि । तस्मात्परि स्रव ॥

॥ अथ चतुर्थी ॥

ऋतं वदन्नृतद्युम्न सत्यं वदन्त्सत्यकर्मन् ।
श्रद्धां वदन्त्सोम राजन्धात्रा सोम परिष्कृत इंद्रायेंदो परि स्रव ॥४॥
ऋतं । वदन् । ऋतऽद्युम्न । सत्यं । वदन् । सत्यऽकर्मन् ।
श्रद्धां । वदन् । सोम । राजन् । धात्रा । सोम । परिऽकृतः । इंद्राय । इंदो इति । परि । स्रव ॥४॥

हे ऋतद्युम्न ऋतेन द्योतमान सत्ययशस्क वा सत्यकर्मन् यथार्थकर्मन् हे सोम अभिषूयमाण राजन् सर्वेषां यज्ञनिष्पादकत्वेन स्वामिन् हे सोम ऋतं यज्ञं वदन् सत्यं वदन् उच्चारयन् श्रद्धां यजमानानामात्मनोपेक्षितां वदन् धात्रा कर्मणां धारकेण देवानां पोषकेण वा यजमानेन परिष्कृतोऽलंकृतस्त्वमिंद्राय परि स्रव ॥ संपर्युपेभ्य इति भूषणार्थे करोतेः सुट् ॥

॥ अथ पंचमी ॥

सत्यमुग्रस्य बृहतः सं स्रवंति संस्रवाः ।
सं यंति रसिनो रसाः पुनानो ब्रह्मणा हर इंद्रायेंदो परि स्रव ॥५॥
सत्यंऽउग्रस्य । बृहतः । सं । स्रवंति । संऽस्रवाः ।
सं । यंति । रसिनः । रसाः । पुनानः । ब्रह्मणा । हरे । इंद्राय । इंदो इति । परि । स्रव ॥५॥

सत्यमुग्रस्य संग्रामे सत्येन शत्रूणामुद्गारयितुः। यद्वोद्गूर्णसत्यस्य। यद्वा यथार्थभूतमुद्गूर्णं बलं यस्य तस्य। पृषोदरादित्वादूपसिद्धिः। बृहतो महतः सोमस्य तव संस्रवाः सम्यक्स्रवणशीला धाराः संस्रवंति। सम्यग्गच्छंति। किंच। रसिनो रसवतस्तव स्वभूता रसाः सं यंति। संगच्छंते। तस्मात् हे हरे हरितवर्ण सोम ब्रह्मणा ब्राह्मणेन मंत्रेण वा पुनानः पूयमानः स त्वमिंद्रार्थं परि स्रव ॥

॥ इति सप्तमस्य पंचमे षड्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

यत्र ब्रह्मा पवमान छंदस्यां३ वाचं वदन्।

ग्राव्णा सोमे महीयते सोमेनानंदं जनयन्निंद्रायेंदो परि स्रव ॥६॥

यत्र। ब्रह्मा। पवमान। छंदस्यां। वाचं। वदन्।

ग्राव्णा। सोमे। महीयते। सोमेन। आऽनंदं। जनयन्। इंद्राय। इंदो इति। परि। स्रव॥६॥

हे पवमान पूयमान सोम त्वदर्थं छंदस्यां सप्तच्छंदोभिः कृतां तेषु भवां वाचं स्तुतिं वदन् उच्चारयन् सोमे सोमाभिषवार्थं ग्राव्णाभिषवं कुर्वता युक्तस्तेनाभिषुतेन सोमेन देवानामानंदं संतोषं जनयन्नुत्पादयन्ब्रह्मा ब्राह्मणो यत्र यस्मिन्देशे महीयते देवैः पूज्यते तत्र हे सोम त्वं परि स्रव ॥

॥ अथ सप्तमी ॥

यत्र ज्योतिरजस्रं यस्मिँल्लोके स्वर्हितं।

तस्मिन्मां धेहि पवमानामृते लोके अक्षित इंद्रायेंदो परि स्रव ॥७॥

यत्र। ज्योतिः। अजस्रं। यस्मिन्। लोके। स्वः। हितं।

तस्मिन्। मां। धेहि। पवमान। अमृते। लोके। अक्षिते। इंद्राय। इंदो इति। परि। स्रव॥७॥

हे पवमान यत्र यस्मिँल्लोके ज्योतिः सर्वं तेजोऽजस्रं सर्वदाविनश्वरं वर्तते। यस्मिंश्च लोके स्वरादित्याख्यं ज्योतिर्हितं निहितमस्ति। तस्मिन्नमृते मरणधर्मरहितेऽत एवाक्षितेऽक्षीणे लोके मां सोमाभिषवं कुर्वंतं धेहि। निधेहि। तस्मान्मामुत्तमलोकं प्रापयितुं त्वमिंद्राय परि स्रव ॥

॥ अथाष्टमी ॥

यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।
यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधीद्रायेंदो परि स्रव ॥८॥
यत्र । राजा । वैवस्वतः । यत्र । अवऽरोधनं । दिवः ।
यत्र । अमूः । यह्वतीः । आपः । तत्र । मां । अमृतं । कृधि । इंद्राय । इंदो इति । परि । स्रव ॥८॥

यत्र यस्मिँल्लोके वैवस्वतो विवस्वत्पुत्रो राजा भवति । यत्र च लोके दिव आदित्यस्यावरोधनं भूतानां प्रवेशनं । किंच । यत्र लोके यह्वतीर्महत्योऽमूरिमा गंगाद्या आपस्तिष्ठंति तत्र तादृशे लोके माममृतं मरणधर्मरहितं कृधि । कुरु । मम देवत्वं प्रापयेत्यर्थः । ततः कारणात्परि स्रव ॥

॥ अथ नवमी ॥

यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।
लोका यत्र ज्योतिष्मंतस्तत्र माममृतं कृधीद्रायेंदो परि स्रव ॥९॥
यत्र । अनुऽकामं । चरणं । त्रिऽनाके । त्रिऽदिवे । दिवः ।
लोकाः । यत्र । ज्योतिष्मंतः । तत्र । मां । अमृतं । कृधि । इंद्राय । इंदो इति । परि । स्रव ॥९॥

यत्र त्रिदिवे तृतीयस्यां दिवि द्युलोके त्रिनाके । तत्राधरमध्यमोत्तमभावेन त्रीणि स्थानानि संति । तत्र तृतीये नाक उत्तमे स्थाने दिव आदित्यस्यानुकामं कामानुगुणं चरणमस्ति । किंच यत्र यस्मिँल्लोके लोका ज्योतिष्मंतो ज्योतिर्युक्तास्तिष्ठंति तत्र तादृशे लोके माममृतं कृधि । यथा ममोत्तमलोको भवति तथा त्वमिंद्राय परि स्रव ॥

॥ अथ दशमी ॥

यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपं ।
स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीद्रायेंदो परि स्रव ॥१०॥
यत्र । कामाः । निऽकामाः । च । यत्र । ब्रध्नस्य । विष्टपं ।
स्वधा । च । यत्र । तृप्तिः । च । तत्र । मां । अमृतं । कृधि । इंद्राय । इंदो इति । परि । स्रव ॥१०॥

यत्र यस्मिँल्लोके कामाः काम्यमाना देवा निकामा नितरामवश्यं प्रार्थ्यमाना

इंद्रादयश्च विद्यंते। यद्वा। सूर्येण विना कर्माणि न घटंत इति सर्वेषां कर्मणां मूलभूतस्यादित्यस्य विष्टपं सहस्थानं यत्र विद्यते तत्र लोके। स्वधान्नं स्वधाकारेण वा दत्तमन्नं तृप्तिस्तर्पणं हर्षणं हर्षश्च यत्र विद्यते तत्र लोके माममृतं कृधि ॥

॥ अथैकादशी ॥

यत्रानंदाश्च मोदाश्च मुदः प्रमुद आसते।
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीद्रायेंदो परि स्रव ॥११॥
यत्र। आऽनंदाः। च। मोदाः। च। मुदः। प्रऽमुदः। आसते।
कामस्य। यत्र। आप्ताः। कामाः। तत्र। मां। अमृतं। कृधि। इंद्राय। इंदो इति।
परि। स्रव ॥११॥

यत्र यस्मिँल्लोक आनंदादय आसते। तेषामल्पो भेदो द्रष्टव्यः। यत्र च लोके कामस्य काम्यमानस्य देवस्य सर्वे कामा आप्ताः प्राप्ता भवंति तत्र माममृतं कृधि। एतत्तु त्वया विना न घटत इति हे सोम त्वं परि स्रव ॥

॥ इति सप्तमस्य पंचमे सप्तविंशो वर्गः ॥

य इंदोरिति चतुर्ऋचमेकादशं सूक्तं। ऋष्याद्याः पूर्ववत्। तथा चानुक्रम्यते। य इंदोश्चतुष्कमिति। गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

य इंदोः पवमानस्यानु धामान्यक्रमीत्।
तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इंद्रायेंदो परि स्रव ॥१॥
यः। इंदोः। पवमानस्य। अनु। धामानि। अक्रमीत्।
तं। आहुः। सुऽप्रजाः। इति। यः। ते। सोम। अविधत्। मनः। इंद्राय। इंदो इति।
परि। स्रव ॥१॥

पवमानस्य पूयमानस्येंदोः सोमस्य धामानि स्थानानि द्रोणकलशादीनि यद्वा धामानि तेजांसि यो ब्राह्मणोऽन्वक्रमीत् अनुक्रामत्यनुगच्छति तं जनं सुप्रजाः शोभनप्रजननः कल्याणपुत्रादिप्रजायुक्त इत्याहुः ॥ नित्यमसिच् प्रजामेधयोरित्यसिच् समासांतः ॥ यः सोममभिषुणोति स पुत्रादियुक्तो भवतीत्यर्थः।

किंच । हे सोम यो मनुष्यस्ते त्वदर्थं मनोऽविधत् करोति । यद्वा । ते त्वदीयं मनोऽविधत् परिचरति । विधतिः परिचरणकर्मा । तमपि कल्याणजननमित्याहुः । तस्मात्त्वं परि स्रव ॥

॥ अथ द्वितीया ॥

ऋषे मंत्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः ।
सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिंद्रायेंदो परि स्रव ॥२॥

ऋषे । मंत्रऽकृतां । स्तोमैः । कश्यप । उत्ऽवर्धयन् । गिरः ।
सोमं । नमस्य । राजानं । यः । जज्ञे । वीरुधां । पतिः । इंद्राय । इंदो इति । परि । स्रव ॥२॥

ऋषिः स्वात्मानं प्रत्याह । हे ऋषे सूक्तद्रष्टर्हे कश्यप आत्मन् त्वं मंत्रकृतामृषीणां स्तोमैः स्तोत्रैर्गिरः स्तुतिरूपा वाच उद्वर्धयन् उपर्युपरि वर्धयन् राजानं सर्वेषां स्वामिनं तं सोमं नमस्य । पूजय । नमस पूजायां । नमोवरिव इति क्यच् । यः सोमो वीरुधां वनस्पतीनां पतिः पालको जज्ञे जातस्तं नमस्य । हे सोम यथात्मना सुतो भवसि तथा परि स्रव ॥

॥ अथ तृतीया ॥

सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ।
देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इंद्रायेंदो परि स्रव ॥३॥

सप्त । दिशः । नानाऽसूर्याः । सप्त । होतारः । ऋत्विजः ।
देवाः । आदित्याः । ये । सप्त । तेभिः । सोम । अभि । रक्ष । नः । इंद्राय । इंदो इति । परि । स्रव ॥३॥

सप्त दिशः । सोमो यस्यां दिशि वर्तते तद्व्यतिरिक्ताः सप्त भवंति । ता नानासूर्या नानाविधैः सूर्यैरधिष्ठिता ऋतवो भवंति । नानालिंगत्वादृतूनां नानासूर्यत्वमित्याम्नानात् । यद्वा । नानासूर्या इति दिग्विशेषणं । तथा होतारो वषट्कर्तारो होत्रादयः सप्तर्त्विजो भवंति । किंच । सप्तादित्या अदितेः पुत्रा धात्रादयो मार्तांडवर्जिता ये सप्त देवाः संति । एतत्स्वष्टौ पुत्रासो अदितेः । ऋग्वे॰ १०.७२.८. । इत्यत्र प्रपंचयिष्यते । हे सोम तेभिस्तैर्दिगादिभिः सर्वैर्नोऽस्मानभि रक्ष । एतत्तु त्वया विना न घटत इति तस्मादिंद्रायेंदो परि स्रव ॥

उपाकरणोत्सर्जनयोर्मंडलाद्यंतहोमे यत्ते राजन्नित्येषा । सूचितं च । यत्ते राजञ्छृतं हविरिति तृचाः समानी व आकूतिरित्येका । आ० गृ० ३.५. । इति ॥

॥ तत्रैषा सूक्ते चतुर्थी ॥

यत्ते राजञ्छृतं हविस्तेन सोमाभि रक्ष नः ।
अरातीवा मा नस्तारीन्मो च नः किं चनाममदिंद्रायेंदो परि स्रव ॥४॥

यत् । ते । राजन् । शृतं । हविः । तेन । सोम । अभि । रक्ष । नः ।
अरातिऽवा । मा । नः । तारीत् । मो इति । च । नः । किं । चन । आममत् । इंद्राय ।
इंदो इति । परि । स्रव ॥४॥

हे राजन् सर्वेषां कर्मसाधनत्वेन स्वामिन् हे सोम ते त्वदर्थं शृतं पक्कं यद्धविरस्ति । शृतं पाक इति निष्ठायां निपातितः । तेन हविषा नोऽस्मानभि रक्ष । अभिपालय । तस्मात्त्वदभिरक्षितानस्मानरातीवारातिवाञ्शत्रुर्नोऽस्मान्मा तारीत् । मा वधीत् । किंच नोऽस्माकं किं चन किंचिदपि धनादिकं शत्रुर्मो आममत् । मा हिंसीत् । यदेतदेतैः सूक्तैरुक्तं तद्यथास्माकं भवति तथा हे इंदो इंद्राय परि स्रव । एवं स्वादिष्ठयेत्यादिभिरेतदंतैः सूक्तैर्बहुविधं सोममाहात्म्यमभ्यधायि । तस्मादैहिकामुष्मिकफलसिद्धये सोमयागः करणीय इत्युक्तं भवति ॥

॥ इति सप्तमस्य पंचमेऽष्टाविंशो वर्गः ॥

॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे दाशतय्यां नवमे मंडले सप्तमोऽनुवाकः समाप्तं च नवमं मंडलं ॥

॥ दशमं मंडलं ॥

दशमे मंडले द्वादशानुवाकाः। तत्र प्रथमानुवाके षोडश सूक्तानि। तत्राग्ने बृहन्निति सप्तर्चं प्रथमं सूक्तं। आप्त्यस्य त्रितस्यार्षं। अनादेशपरिभाषया त्रिष्टुप्। मंडलादिपरिभाषयाग्निर्देवता। तथा चानुक्रम्यते। अग्ने सप्त त्रित इति ॥ प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छंदसीदमादीन्यष्ट सूक्तान्यष्टमस्यांत्यास्तिस्रो वर्जयित्वा। सूत्र्यते हि। अग्ने नयाग्ने बृहन्नित्यष्टानामुत्तमादुत्तमास्तिस्र उद्धरेदिति त्रैष्टुभं। आ॰ ४.१३.। इति ॥ प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्य सहस्रावममोदेतोः शंसेदिति च ॥ होमार्थं प्रणीत आहवनीये प्राग्घोमादुपशांते ज्योतिष्मद्गुणकाग्निदेवताका काचिदिष्टिः। तत्राद्या याज्या। सूचितं च। इष्टिरग्निर्ज्योतिष्मान्वरुण उदग्ने शुचयस्तवाग्ने बृहन्नुषसामूर्ध्वो अस्थात्। आ॰ ३.१२.। इति ॥ उपाकरणोत्सर्जनयोर्मंडलादिहोमेऽप्येषा। सूत्रमुदाहृतं ॥

॥ तत्र प्रथमा ॥

अग्ने॑ बृ॒हन्नु॒षसा॑मू॒र्ध्वो अ॑स्थान्निर्ज॒गन्वा॒न्तम॑सो॒ ज्योति॒षागा॑त्।
अ॒ग्निर्भा॒नुना॒ रुश॑ता॒ स्वंग॒ आ जा॒तो विश्वा॒ सद्मा॒न्यप्राः ॥१॥

अग्ने॑। बृ॒हन्। उ॒षसा॑म्। ऊ॒र्ध्वः। अ॒स्था॒त्। निः॒ऽज॒ग॒न्वान्। तम॑सः। ज्योति॑षा। आ। अ॒गा॒त्।
अ॒ग्निः। भा॒नुना॑। रुश॑ता। सु॒ऽअंगः॑। आ। जा॒तः। विश्वा॑। सद्मा॑नि। अ॒प्राः॒ ॥१॥

बृहन्महानेषोऽग्निरुषसामग्र उषसामुपरि। उषःकाले। ऊर्ध्वः प्रज्वलितः सन् ज्वालारूपेणास्थात्। तिष्ठति। ततस्तमसः। रात्रिनामैतत्। रात्रेर्निर्जगन्वान् निर्गतः ॥ गमेः क्वसाविडभावे रूपं ॥ निर्गतो निष्क्रांतवान् सोऽग्निर्ज्योतिषा स्वीयेन तेजसा लक्षितः सन् आगात्। गार्हपत्याद्विह्रियमाण आहवनीयं प्रत्यागच्छति। अनंतरं स्वंगः शोभनज्वालावयवो जातः कर्मार्थं समुत्पन्न एषोऽग्नी रुशता। रोचतेर्ज्वलतिकर्मण इदं रूपं। आरोचमानेन। यद्वा रुशतिर्हिंसार्थः। तमसां हिंसकेन भानुना तेजसा विश्वा सद्मानि सर्वाँल्लोकान्। यद्वा सदनानि

यद्वगृहाण्याप्राः। आपूरयति ॥ प्रा पूरणे। तिङां तिङो भवंतीति तिपः सिबादेशः ॥ अत्र वाजसनेयकं। अग्ने बृहन्नुषसामूर्ध्वो अस्थादित्यग्रे ह्येष बृहन्नुषसामूर्ध्वस्तिष्ठति। निर्जगन्वान्तमसो ज्योतिषागादिति निर्जगन्वान्रात्रेस्तमसो ज्योतिषेति। अग्निर्भानुना रुशता स्वंग इत्यग्निर्वा एष भानुना रुशता स्वंग आ जातो विश्वा सद्मान्यप्रा इतीमे वै लोका विश्वा सद्मानि तानेष जात आपूरयति। श॰ब्राह्म॰ ६.७.३.१०.। इति ॥

॥ अथ द्वितीया ॥

स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु।
चित्रः शिशुः परि तमांस्यक्तून्प्र मातृभ्यो अधि कनिक्रदद्गाः ॥२॥

सः। जातः। गर्भः। असि। रोदस्योः। अग्ने। चारुः। विऽभृतः। ओषधीषु।
चित्रः। शिशुः। परि। तमांसि। अक्तून्। प्र। मातृऽभ्यः। अधि। कनिक्रदत्। गाः ॥२॥

हे अग्ने जात उत्पन्नश्चारुः कल्याणरूप ओषधीष्वोषधिविकारेष्वरणीषु विभृतो विशेषेण मथित आहवनीयाद्यात्मना विविधं ह्रियमाण ओषधीषु वर्तमानः स त्वं रोदस्योर्द्यावापृथिव्योर्गर्भोऽसि। गर्भो भवसि। अग्निरूप आदित्यरूपश्चेति। किंच चित्रश्चित्रवर्णः काली कराली च मनोजवेत्यादिसप्तजिह्वाभिर्नानारूपः। यद्वा चित्रश्चायनीयः शिशुरोषधीनां शिशुरग्निस्तमांस्यक्तून् रात्रिवत्कृष्णान्शत्रूंश्च परि भवसि। स्वतेजसाभिभवसि। स त्वं मातृभ्यो मातृभूताभ्य ओषधीभ्यः। अधिः पंचम्यर्थद्योतकः। ताभ्यः कनिक्रदत् पुनः पुनः शब्दं कुर्वन्प्र गाः। प्रगच्छसि। प्रजायसे॥

॥ अथ तृतीया ॥

विष्णुरित्था परममस्य विद्वान् जातो बृहन्नभि पाति तृतीयं।
आसा यदस्य पयो अक्रत स्वं सचेतसो अभ्यर्चन्त्यत्र ॥३॥

विष्णुः। इत्था। परमं। अस्य। विद्वान्। जातः। बृहन्। अभि। पाति। तृतीयं।
आसा। यत्। अस्य। पयः। अक्रत। स्वं। सऽचेतसः। अभि। अर्चंति। अत्र ॥३॥

विद्वान् जानानो जातः प्रादुर्भूतो बृहन्महान् विष्णुरित्थेत्यमनेन प्रकारेण विष्णुर्व्यापनशीलो ज्ञानादिगुणयुक्तोऽग्निरस्य मे तृतीयं त्रयाणां पूरकं चित्तं मामभि पाति। अभिरक्षतु ॥ एकतो द्वितस्त्रित इति त्रयो बभूवुरिति यास्केनोक्तं॥ किंच। अस्याग्नेः स्वमात्मीयं पय उदकमासास्येन यद्यदाक्रत कुर्वंति यजमाना

याचंते तदानीमत्रास्मिँल्लोके स्थिताः स्तोतारः सचेतसः समानमनस्का भूत्वेन-मभ्यर्चंति । अभिष्टुवंति ॥

॥ अथ चतुर्थी ॥

अतं उ त्वा पितुभृतो जनित्रीरन्नावृधं प्रति चरंत्यन्नैः ।
ता ईं प्रत्येषि पुनरन्यरूपा असि त्वं विक्षु मानुषीषु होता ॥४॥

अतः । ऊं इति । त्वा । पितुऽभृतः । जनित्रीः । अन्नऽवृधं । प्रति । चरंति । अन्नैः ।
ताः । ईं । प्रति । एषि । पुनः । अन्यऽरूपाः । असि । त्वं । विक्षु । मानुषीषु । होता ॥४॥

हे अग्ने अतः । ऊ इत्यवधारणे । अस्मादेव कारणात् पितुभृतः पितुनान्नेन सर्वस्य जगतो धारयित्र्यः पोषयित्र्यो वा जनित्रीर्जनयित्र्य ओषधयोऽन्नावृधमन्नस्य वर्धकं त्वा त्वामन्नैर्हेतुभिः प्रति चरंति । परिचरंति । अभिगच्छंति । ततस्त्वमीमेनास्ता ओषधीः प्रत्येषि । प्रतिगच्छसि । पुनरप्यन्यरूपा जीर्णा ओषधीर्दावभूतस्त्वं गच्छसि । किंच मानुषीषु मनुष्यजातिषु विक्षु प्रजासु । यद्वा विक्ष्वग्निहोत्रादिक्रियास्वभिनिविशंतीषु मानुषीषु मनुष्यजातिषु होता देवानामाह्वाता होमनिष्पादको वासि । भवसि । मनुष्येषु स्थित इत्यर्थे ब्राह्मणं देवो ह्येष मर्त्येष्विति ॥

आतिथ्यायां स्विष्टकृतोऽनुवाक्या होतारमित्येषा । सूचितं च । होतारं चित्रर-थमध्वरस्य प्र प्रायमग्निर्भरतस्य शृण्व इति संयाज्ये । आ० ४.५. । इति ॥

॥ सैषा सूक्ते पंचमी ॥

होतारं चित्ररथमध्वरस्य यज्ञस्ययज्ञस्य केतुं रुशंतं ।
प्रत्यर्धिं देवस्यदेवस्य मह्ना श्रिया त्व१ग्निमतिथिं जनानां ॥५॥

होतारं । चित्रऽरथं । अध्वरस्य । यज्ञस्यऽयज्ञस्य । केतुं । रुशंतं ।
प्रतिऽअर्धिं । देवस्यऽदेवस्य । मह्ना । श्रिया । तु । अग्निं । अतिथिं । जनानां ॥५॥

अध्वरस्य यज्ञस्य होतारमेतन्नामानमृत्विजं । यद्वा होतारं देवानामाह्वातारं चित्ररथं नानारूपरथमध्वरस्य रक्षोभिरहिंसितस्य यज्ञस्य सर्वस्य यज्ञस्य केतुं प्रज्ञापकं पताकास्थानीयं वा रुशंतं श्वेतवर्णं मह्ना स्वमहत्त्वेन देवस्य देवस्य सर्वेषां देवानामर्धिमिंद्रं प्रति भवंतं । यत्सर्वेषामर्धिमिंद्रं प्रतीति ब्राह्मणं । तादृशं

जनानां यजमानानामतिथिमतिथिवत्पूज्यमग्निं तु क्षिप्रं श्रिया श्रियोऽर्थं वयं स्तुमः ॥

॥ अथ षष्ठी ॥

स तु वस्त्राण्यध पेशनानि वसानो अग्निर्नाभा पृथिव्याः ।
अरुषो जातः पद इळायाः पुरोहितो राजन्यक्षीह देवान् ॥ ६॥
सः । तु । वस्त्राणि । अध । पेशनानि । वसानः । अग्निः । नाभा । पृथिव्याः ।
अरुषः । जातः । पदे । इळायाः । पुरःऽहितः । राजन् । यक्षि । इह । देवान् ॥ ६॥

हे राजन् दीप्यमानाग्ने वस्त्राण्याच्छादकानि तेजांसि । अधापि च पेशनानि तेषां तेजसां काष्र्ण्यशौक्ल्यादीनि रूपाणि । यद्वा । अधानंतरं पेशनानि । पेश इति हिरण्यनाम । हिरण्यवत् । हिरण्यसदृशानि भास्वराणि तेजांसि वसान आच्छादयन् पृथिव्या नाभा नाभौ नाभिस्थानीय इलायास्पद उत्तरवेद्यां । एतद्वा इलायास्पदं यदुत्तरवेदिनाभिरित्याम्नानात् । तस्यां जातः समुत्पन्नोऽरुष आरोचमानो योऽग्निरेवंविधोऽसि स त्वं पुरोहितः पुरतो निहितः पूर्वस्यां दिश्याहवनीयायतने स्थापितः सन् इहास्मिन्यज्ञे देवानिंद्रादीन्यज । पूजय ॥

॥ अथ सप्तमी ॥

आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततंथ ।
प्र याह्यच्छोशतो यविष्ठाथा वह सहस्येह देवान् ॥ ७॥
आ । हि । द्यावापृथिवी इति । अग्ने । उभे इति । सदा । पुत्रः । न । मातरा । ततंथ ।
प्र । याहि । अच्छ । उशतः । यविष्ठ । अथ । आ । वह । सहस्य । इह । देवान् ॥ ७॥

हे अग्ने त्वमुभे द्यावापृथिवी द्यावापृथिव्यौ सदा सर्वदा ततंथ । आतेनिथ । स्वतेजोभिर्विस्तारयसि खलु ॥ बभूथाततंथेति थलि निपातितः ॥ तत्र दृष्टांतः । पुत्रो न । यथा पुत्रो मातरा मातापितरौ क्षीणौ धनैस्तनोति तद्वत् । किंच हे यविष्ठ युवतम स त्वमुशतः कामयमानानच्छाभिलक्ष्य प्र याहि । प्रकर्षेणागच्छ । अथानंतरं हे सहस्य सहसो बलस्य पुत्र हे अग्ने त्वमिहास्मदीये यज्ञे देवानिंद्रादीना वह । प्रापय ॥

॥ इति सप्तमस्य पंचम एकोनत्रिंशो वर्गः ॥

पिप्रीहीति सप्तर्चं द्वितीयं सूक्तं । ऋषाद्याः पूर्ववत् । पिप्रीहीत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः ॥ दर्शपूर्णमासयोराद्या स्विष्टकृतोऽनुवाक्या । सूचितं च । अथ स्विष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठेत्यनुवाक्या । आ० १.६. । इति ॥

॥ तत्र प्रथमा ॥

पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँर्ऋतुपते यजेह ।
ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः ॥१॥

पिप्रीहि । देवान् । उशतः । यविष्ठ । विद्वान् । ऋतून् । ऋतुऽपते । यज । इह ।
ये । दैव्याः । ऋत्विजः । तेभिः । अग्ने । त्वं । होतॄणां । असि । आऽयजिष्ठः ॥१॥

हे यविष्ठ युवतमाग्ने उशतः स्तुतीः श्रोतुं कामयमानान्देवान्पिप्रीहि । हविर्भिः प्रीणय । हे ऋतुपते ऋतूनां देवयागकालानां स्वामिन्नग्ने ऋतून्यागकालान्विद्वान् जानानस्त्वमिहास्मिन्यज्ञे तान्यज । पूजय । किंच । हे अग्ने दैव्या देवेषु भवा अग्निर्होताश्विनावध्वर्यू त्वष्टाग्नीन्मित्र उपवक्तेत्यत्रोक्ता ये ऋत्विजः संति तेभिस्तैः सह देवान्यज । यद्वा दैव्या देवेषु भवा ऋत्विज आश्वलायनेनोक्ताश्चंद्रमा ब्रह्मादित्योऽध्वर्युः पर्जन्य उद्गातेति । तैः सह यज । यस्मात्त्वं होतॄणां मध्य आयजिष्ठ आभिमुख्येन देवानां यष्टृतमोऽसि । भवसि ॥

॥ अथ द्वितीया ॥

वेषि होत्रमुत पोत्रं जनानां मंधातासि द्रविणोदा ऋतावा ।
स्वाहा वयं कृणवामा हवींषि देवो देवान्यजत्वग्निरर्हन् ॥२॥

वेषि । होत्रं । उत । पोत्रं । जनानां । मंधाता । असि । द्रविणःऽदाः । ऋतऽवा ।
स्वाहा । वयं । कृणवाम । हवींषि । देवः । देवान् । यजतु । अग्निः । अर्हन् ॥२॥

हे अग्ने जनानां यजमानार्थं होत्रं होतुः कर्म तेन क्रियमाणं स्तोत्रं वेषि । कामयसे । उतापि च पोत्रं पोतुः कर्म तेन क्रियमाणां स्तुतिं कामयसे । किंच मंधाता मेधावी ऋतवान् सत्यवांस्त्वं द्रविणोदा असि । धनस्य प्रदाता भवसि । अथ परोक्षकृतः । वयं देवेभ्यो हवींषि स्वाहा कृणवाम । स्वाहा करवाम । प्रयच्छाम । ततो देवो दीप्यमानोऽर्हन् प्रशंस्यो यजमानयोग्यो वाग्निर्देवान्यजतु । तैर्हविर्भिः पूजयतु ॥

दर्शपूर्णमासातिपत्त्यादौ निमित्ते पाथिकृतीष्टिः कर्तव्या। तत्र देवानामित्येषा याज्या। सूत्रितं च। वेत्था हि वेधो अध्वन आ देवानामपि पंथामगन्म। आ० ३.१०.। इति ॥ प्रायणीयायामप्येषैव याज्योदयनीयायां सैवानुवाक्या। सूत्रितं च। अग्ने नय सुपथा राये अस्माना देवानामपि पंथामगन्म। आ० ४.३.। इति। विपरीताश्च याज्यानुवाक्या इति ॥

॥ सैषा सूक्ते तृतीया ॥

आ देवानामपि पंथामगन्म यच्छक्नवाम तदनु प्रवोळ्हुं।

अग्निर्विद्वान्स यजात्सेदु होता सो अध्वरान्स ऋतून्कल्पयाति ॥३॥

आ। देवानां। अपि। पंथां। अगन्म। यत्। शक्नवाम। तत्। अनु। प्रऽवोळ्हुं।

अग्निः। विद्वान्। सः। यजात्। सः। इत्। ऊं इति। होता। सः। अध्वरान्। सः।

ऋतून्। कल्पयाति ॥३॥

देवानां देवलोकादिगमनसाधनं देवानां स्वभूतं पंथां पंथानं तमपि वैदिकमार्गं वयमागन्म। आगतवंतो भवेम। येन देवान्प्राप्नुमः। तथा वयं यत्कर्मानुष्ठातुं शक्नवाम शक्नुमः समर्था भवामस्तत्कर्मानुक्रमेण प्रवोळ्हुं प्रकर्षेण वोढुं समाप्तिं प्रापयितुं समर्था भवेम। अनंतरं विद्वान् तं पंथानं जानानः सोऽग्निर्यजात्। देवान्यजतु। सेदु स एव खलु होता मनुष्याणां होमनिष्पादकः। ततः स एवाग्निरध्वरान्यज्ञान् किंच ऋतून् कालान्कल्पयाति। कल्पयतु। करोतु ॥

व्रतातिपत्तौ व्रातपतीष्टिः कर्तव्या। तत्र यद्वो वयमित्येषा याज्या। सूत्रितं च। त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानि। आ० ३.१३.। इति ॥

॥ सैषा चतुर्थी ॥

यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः।

अग्निष्टद्विश्वमा पृणाति विद्वान्येभिर्देवाँ ऋतुभिः कल्पयाति ॥४॥

यत्। वः। वयं। प्रऽमिनाम। व्रतानि। विदुषां। देवाः। अविदुःऽतरासः।

अग्निः। तत्। विश्वं। आ। पृणाति। विद्वान्। येभिः। देवान्। ऋतुऽभिः। कल्पयाति ॥४॥

हे देवा अविदुष्टरासोऽविद्वत्तरा अत्यंतमजानंतो वयं युष्माकं यत् यत्किंचि-

वृतानि कर्माणि विदुषां भवतां जानतामेव प्रमिनाम प्रहिंसितवंतः। भवत्सु जानत्सु नित्यनैमित्तिककर्माणि विलोपितवंत इत्यर्थः। विद्वान् एतत्सर्वं जानानोऽग्निः स्विष्टकृत्तद्विश्वं सर्वं कर्मजातमा पृणाति। आपूरयतु। फलसहितं करोत्वित्यर्थः। केनापूरयतु तत्राह। येभिर्ऋतुभिर्यागयोग्यैः कालैर्देवान्कल्पयाति कल्पयति कर्मांगभावाय समर्थयति तैरापूरयतु ॥

॥ अथ पंचमी ॥

यत्पा॑क॒त्रा मन॑सा दी॒नद॑क्षा॒ न य॒ज्ञस्य॑ मन्व॒ते मर्त्या॑सः।
अ॒ग्निष्टद्धोता॑ क्रतु॒विद्वि॑जा॒नन्यजि॑ष्ठो दे॒वाँ ऋ॑तु॒शो य॑जाति ॥५॥
यत्। पा॒क॒ऽत्रा। मन॑सा। दी॒नऽद॑क्षाः। न। य॒ज्ञस्य॑। म॒न्व॒ते। मर्त्या॑सः।
अ॒ग्निः। तत्। होता॑। क्र॒तु॒ऽवित्। वि॒ऽजा॒नन्। यजि॑ष्ठः। दे॒वान्। ऋ॒तु॒ऽशः। य॒जा॒ति ॥५॥

दीनदक्षा दीनबला दीनोत्साहा वा मर्त्यासो मर्त्या मनुष्या ऋत्विजः पाकत्रा पाकेन ॥ बहुलग्रहणादस्मादपि तृतीयार्थे त्राप्रत्ययः ॥ पाकेन पक्तव्येन विशिष्टज्ञानरहितेनाल्पेन वा मनसा युक्ताः संतो यज्ञसंबंधि यत्कर्म न मन्वते न जानंति तत्कर्म विजानन् होता देवानामाह्वाता होमनिष्पादको वा क्रतुवित् कर्मविद्यजिष्ठो देवानामतिशयेन यष्टा सोऽग्निः स्विष्टकृत् ऋतुश ऋतावृतौ स्वे स्वे यागयोग्ये काले देवान्यजाति। यजतु। हविर्भिः पूजयतु ॥

॥ अथ षष्ठी ॥

विश्वे॑षां॒ ह्य॑ध्व॒राणा॒मनी॑कं चि॒त्रं के॒तुं जनि॑ता त्वा ज॒जान॑।
स आ य॑जस्व नृ॒वती॒रनु॒ क्षाः स्पा॒र्हा इषः॑ क्षु॒मती॑र्वि॒श्वज॑न्याः ॥६॥
विश्वे॑षां। हि। अ॒ध्व॒राणा॑म्। अनी॑कं। चि॒त्रं। के॒तुं। जनि॑ता। त्वा॒। ज॒जान॑।
सः। आ। य॒ज॒स्व॒। नृ॒ऽवतीः॑। अनु॑। क्षाः। स्पा॒र्हाः। इषः॑। क्षु॒ऽमतीः॑। वि॒श्वऽज॑न्याः ॥६॥

हे अग्ने विश्वेषां सर्वेषामध्वराणां यज्ञानामनीकं मुखं प्रधानं चित्रं चायनीयं नानारूपं केतुं प्रज्ञापकं त्वा त्वां जनिता जनयिता प्रजापतिर्यजमानो वा जजान। जनयामास। उत्पादितः स त्वं नृवतीर्दासादियुक्ताः क्षाः। पृथिवीनामैतत्। क्षयंत्यत्रेति क्षा भूमिः। अन्वा यजस्व। अनुप्रयच्छ। यद्वा। नृवतीर्नृभिः संस्कृतानि क्षा अनु पृथिवीं वेदिलक्षणामनुगतानि वेद्यामासादितानि स्पार्हाः

स्पृहणीयानि क्षुमतीः स्तुतिमंत्रलक्षणशब्दवंति विश्वजन्याः सर्वजनहितानि वृष्ट्यन्नहेतुत्वात् तानीषोऽन्नानि हविर्लक्षणानि यजस्व । देवेभ्यः प्रयच्छ ॥

॥ अथ सप्तमी ॥

यं त्वा द्यावापृथिवी यं त्वापस्त्वष्टा यं त्वा सुजनिमा जजान ।

पंथामनु प्रविद्वान्पितृयाणं द्युमदग्ने समिधानो वि भाहि ॥७॥

यं । त्वा । द्यावापृथिवी इति । यं । त्वा । आपः । त्वष्टा । यं । त्वा । सुऽजनिमा । जजान ।

पंथां । अनु । प्रऽविद्वान् । पितृऽयानं । द्युऽमत् । अग्ने । संऽइधानः । वि । भाहि ॥७॥

हे अग्ने यं त्वा त्वां द्यावापृथिवी जनितवत्यौ । आदित्यात्मनाग्न्यात्मना वा । तथा यं त्वामापो मेघोदरगता विद्युदात्मना स्थितं जनितवत्यः । यद्वाप इत्यंतरिक्षनाम । द्यावापृथिवी अंतरिक्षं चेमे त्रयो लोका यं त्वामजीजनन् । किंच सुजनिमा शोभनजननस्त्वष्टा प्रजापतिर्यं त्वां जजान जनयामास हे अग्ने पितृयाणं पितरो येन मार्गेण गच्छंति तं पंथां हविर्वहनमार्गमनु प्रविद्वान् प्रजानंस्त्वं समिधानः समिध्यमानः सन् द्युमद्दीप्तियुक्तं यथा भवति तथा वि भाहि । विशेषेण दीप्यसे ॥

॥ इति सप्तमस्य पंचमे त्रिंशो वर्गः ॥

इनो राजन्निति सप्तर्चं तृतीयं सूक्तं । ऋष्याद्याः पूर्ववत् । इन इत्यनुक्रांतं । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि ।

चिकिद्वि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥१॥

इनः । राजन् । अरतिः । संऽइद्धः । रौद्रः । दक्षाय । सुसुऽमान् । अदर्शि ।

चिकित् । वि । भाति । भासा । बृहता । असिक्नीं । एति । रुशतीं । अपऽअजन् ॥१॥

हे राजन् दीप्यमानाग्ने त्वमिन ईश्वरः सर्वस्य भवसि । अथ परोक्षः । अरतिर्हविरादाय देवान्प्रति गंता समिद्धः संदीप्तो रौद्रः शत्रूणां भयंकरः सुषुमान् । ओषध्यात्मना स्थितोऽंशुः सुष्ठु सूयत इति सुषुः सोमः । तेन तद्वान् शोभनप्रसवो वा सोऽग्निर्दक्षाय यजमानानां धनादिवृद्ध्यर्थमदर्शि । सर्वैर्दृश्यते । किंच । चिकित्

सर्वं जानानोऽग्निर्वि भाति। विशेषेण दीप्यते। तथा बृहता महता भासा तेजसा ज्वालालक्षणेनासिक्नीं रात्रिमेति। सायंहोमसिद्ध्यर्थमेव गच्छति। किं कुर्वन् रुशतीं श्वेतवर्णां दीप्तिमपाजन् अपगमयन् रात्रिं गच्छति। सामर्थ्याद्रात्रिं परित्यजन् उषसं प्रातर्होमसिद्ध्यर्थं गच्छतीत्यर्थो लक्ष्यते ॥

॥ अथ द्वितीया ॥

कृष्णां यदेनीमभि वर्पसा भूज्जनयन्योषां बृहतः पितुर्जाम् ।
ऊर्ध्वं भानुं सूर्यस्य स्तभायन् दिवो वसुभिररतिर्वि भाति ॥२॥

कृष्णाम्। यत्। एनीम्। अभि। वर्पसा। भूत्। जनयन्। योषाम्। बृहतः। पितुः। जाम्।
ऊर्ध्वम्। भानुम्। सूर्यस्य। स्तभायन्। दिवः। वसुऽभिः। अरतिः। वि। भाति ॥२॥

सोऽग्निर्यद्यदा कृष्णां कृष्णवर्णामेनीं गच्छन्तीं रात्रिं वर्पसात्मीयेन ज्वालालक्षणेन रूपेणाभि भूत् अभिभवति। किं कुर्वन् बृहतो महतः पितुः सर्वस्य जगतः पालयितुः पितृभूतादादित्याज्जां जायमानां योषामुषसं जनयन् अभिव्यंजयन्। तदानीमरतिर्गमनशीलोऽग्निर्दिवो द्युलोकस्य वसुभिर्वासयितृभिराच्छादकैः संधुक्षणसमर्थैरात्मीयैस्तेजोभिः सूर्यस्य भानुं दीप्तिमूर्ध्वमुपरिष्टात् स्तभायन् स्तंभयन् वि भाति। विशेषेण दीप्यते ॥

॥ अथ तृतीया ॥

भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥३॥

भद्रः। भद्रया। सचमानः। आ। अगात्। स्वसारम्। जारः। अभि। एति। पश्चात्।
सुऽप्रकेतैः। द्युऽभिः। अग्निः। विऽतिष्ठन्। रुशत्ऽभिः। वर्णैः। अभि। रामम्। अस्थात् ॥३॥

भद्रो भजनीयः कल्याणो भद्रया भजनीयया दीप्त्योषसा वा सचमानः सेव्यमानः संगच्छमानो वाग्निरागात्। आजगाम। गार्हपत्यादाहवनीयमागच्छति। ततः पश्चाज्जारो जरयिता शत्रूणां सोऽग्निः स्वसारं स्वयंसारिणीं भगिनीं वागतामुषसमभ्येति। अभिगच्छति। तथा सुप्रकेतैः सुप्रज्ञानैर्द्युभिर्दीप्तैस्तेजोभिः सह वितिष्ठन् सर्वतो वर्तमानः सोऽग्नी रुशद्भिः श्वेतैर्वर्णैर्वारकैरात्मीयैस्तेजोभी रामं कृष्णं शार्वरं तमोऽभ्यस्थात्। सायंहोमकालेऽभिभूय तिष्ठति ॥

॥ अथ चतुर्थी ॥

अस्य यामा॑सो बृ॒हतो॒ न व॒ग्नूनिन्धा॑ना अ॒ग्नेः सख्यु॑ः शि॒वस्य॑ ।
ईड्य॑स्य॒ वृष्णो॑ बृह॒तः स्वासो॒ भामा॑सो॒ याम॑न्न॒क्तव॑श्चिकित्रे ॥४॥

अस्य । यामा॑सः । बृ॒हतः॑ । न । व॒ग्नून् । इन्धा॑नाः । अ॒ग्नेः । सख्यु॑ः । शि॒वस्य॑ ।
ईड्य॑स्य । वृष्णः॑ । बृ॒ह॒तः । सु॒ऽआसः॑ । भामा॑सः । याम॑न् । अ॒क्तवः॑ । चि॒कि॒त्रे॒ ॥४॥

बृहतो महतोऽस्याग्नेः संबंधिन इंधाना दीप्यमाना यामासः । यांति गच्छंतीति यामा रश्मयः । न वग्नून् स्तुतिकारिणो जनान् न बाधंते किंतु सख्युः स्तुत्यस्तोतृत्वयष्टृयष्टव्यलक्षणेन सख्येन सखिभूतस्य शिवस्य कल्याणस्य भक्तानां सुखकरस्येड्यस्य स्तोतव्यस्य वृष्णः कामानां वर्षितुर्बृहतो महतः स्वासः शोभनास्यस्यास्याग्नेः स्वभूता अक्तवस्तमांस्यंजंतोऽपगमयंत आहुतिभिः संगता वा भामासः । भाम क्रोधे । तीक्ष्णा अप्रसह्या रश्मयो यामन् । याति देवान्प्रति तर्पणाय यांति देवा एतं प्रत्यंगभावायेति यामा यज्ञः । तस्मिंश्चिकित्रे । सर्वतो जज्ञिरे । प्रथिता अभूवन् ॥

॥ अथ पंचमी ॥

स्व॒ना न यस्य॒ भामा॑सः॒ पव॑न्ते॒ रोच॑मानस्य बृह॒तः सु॒दिवः॑ ।
ज्येष्ठे॑भि॒र्यस्तेजि॑ष्ठैः क्री॒ळु॒मद्भि॒र्वर्षि॑ष्ठेभि॒र्भानु॑भि॒र्नक्ष॑ति॒ द्याम् ॥५॥

स्व॒नाः । न । यस्य॑ । भामा॑सः । पव॑न्ते । रोच॑मानस्य । बृ॒ह॒तः । सु॒ऽदिवः॑ ।
ज्येष्ठे॑भिः । यः । तेजि॑ष्ठैः । क्री॒ळु॒मत्ऽभिः॑ । वर्षि॑ष्ठेभिः । भा॒नु॒ऽभिः॑ । नक्ष॑ति । द्याम् ॥५॥

रोचमानस्य दीप्यमानस्य बृहतो महतः सुदिवः शोभनदीप्तेर्वा यस्याग्नेः स्वभूता भामासः । भा दीप्तौ । दीप्ता रश्मयः स्वना न स्वनंतो मरुत इव पवंते सर्वतः शब्दं कुर्वंतो गच्छंति । किंच योऽग्निर्ज्येष्ठेभिरत्यंतं प्रशस्तैस्तेजिष्ठैस्तेजस्वितमैः क्रीळुमद्भिः क्रीडनवद्भिर्वर्षिष्ठेभिर्वृद्धतमैर्भानुभिरात्मीयैस्तेजोभिर्द्यां द्युलोकं नक्षति व्याप्नोतीति स त्वं देवानावहेत्युत्तरेण संबंधः ॥

॥ अथ षष्ठी ॥

अस्य॒ शुष्मा॑सो ददृशा॒नप॑वे॒र्जेह॑मानस्य स्वनयन्नि॒युद्भिः॑ ।
प्र॒त्नेभि॒र्यो रुश॑द्भिर्दे॒वत॑मो॒ वि रेभ॑द्भिरर॒तिर्भाति॒ विभ्वा॑ ॥६॥

अस्य। शुष्मासः। ददृशानऽपवेः। जेहमानस्य। स्वनयन्। नियुत्ऽभिः।
प्रत्नेभिः। यः। रुशत्ऽभिः। देवऽतमः। वि। रेभत्ऽभिः। अरतिः। भाति। विऽभ्वा॥ ६॥

ददृशानपवेर्दर्शनीयज्वालाग्नेः। यद्वा। पविर्वज्र आयुधं। दृश्यमानायुधस्य जेहमानस्य। जेहतिर्गतिकर्मा। हविरादाय देवान्प्रति गच्छतोऽस्याग्नेः स्वभूताः शुष्मासः शोषका नियुद्भिः। नियुतो वायोरिति वायोरश्वा नियुतः। तद्युक्तैर्वायुभिः संयुक्ता रश्मयः स्वनयन्। शब्दायंते। किंच देवतमो देवानां मुख्योऽरतिर्गंता विभ्वा विभवनशीलो महान् योऽग्निः प्रत्नेभिः पुराणै रुशद्भिः श्वेतवर्णै रेभद्भिः शब्दायमानैस्तेजोभिर्वि भाति। विविधं दीप्यते॥

॥ अथ सप्तमी ॥

स आ वक्षि महि न आ च सत्सि दिवस्पृथिव्योररतिर्युवत्योः।
अग्निः सुतुकः सुतुकेभिरश्वै रभस्वद्भी रभस्वाँ एह गम्याः॥ ७॥

सः। आ। वक्षि। महि। नः। आ। च। सत्सि। दिवःऽपृथिव्योः। अरतिः। युवत्योः।
अग्निः। सुऽतुकः। सुऽतुकेभिः। अश्वैः। रभस्वत्ऽभिः। रभस्वान्। आ। इह। गम्याः॥ ७॥

हे अग्ने स तादृशस्त्वं नोऽस्मदीये यज्ञे महि महान् देवाना वक्षि। आवह प्रापय। किंच युवत्योः परस्परं मिश्रितयोस्तरुण्योर्वा दिवस्पृथिव्योर्द्यावापृथिव्योर्मध्येऽरतिरग्निः सूर्यात्मना गंता त्वमा सत्सि। अस्माकं यज्ञमासीद। तथा सुतुकः। तुकिर्गत्यर्थः। सुगमः स्तोतृभिर्यष्टृभिश्च सुखेन प्राप्तव्यः। रभस्वान्वेगवानग्निरंगनादिगुणयुक्तस्त्वं सुतुकेभिः सुगमै रभस्वद्भिर्वेगवद्भिरश्वै रोहिदाख्यैः सहेहास्मदीये यज्ञ आ गम्याः। आगच्छ॥

॥ इति सप्तमस्य पंचम एकत्रिंशो वर्गः ॥

प्र त इति सप्तर्चं चतुर्थं सूक्तं। ऋष्याद्याः पूर्ववत्। प्र त इत्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वंद्यो नो हवेषु।
धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन्॥ १॥

प्र । ते । यक्षि । प्र । ते । इयर्मि । मन्म । भुवः । यथा । वंद्यः । नः । हवेषु ।
धन्वन्ऽइव । प्रऽपा । असि । त्वं । अग्ने । इयक्षवे । पूरवे । प्रत्न । राजन् ॥१॥

हे अग्ने ते तुभ्यं हविः प्र यक्षि । प्रयच्छामि । यजिर्दानार्थः । तथा मन्म मननीयां स्तुतिं ते त्वदर्थं प्रेयर्मि । प्रेरयामि । प्रोच्चारयामि । वंद्यः सर्वैर्वंदनीयस्त्वं नोऽस्मदीयेषु हवेषु देवाह्वानेषु यथा त्वं संनिहितो भुवो भवसि तथा हविः प्रयच्छामि स्तौमि च । हे प्रत्न पुराण राजन् सर्वस्य जगतः स्वामिन् हे अग्ने स त्वमियक्षवे यष्टुमिच्छते पूरवे । पूरुरिति मनुष्यनाम । मनुष्याय यजमानाय हविर्भिर्देवान्पूरयित्रे जनाय धन्वन्निव प्रपा असि । यथा धन्वन् धन्वनि मरौ निरुदकप्रदेशे प्रपा । प्रपिबंत्यत्रेति प्रपा । सा यथोदकप्रदानेन जनेभ्यः सुखदा भवति एवं त्वं धनदानेन तस्मै सुखदाता भवसि ॥

॥ अथ द्वितीया ॥

यं त्वा जनासो अभि संचरंति गाव उष्णमिव व्रजं यविष्ठ ।
दूतो देवानामसि मर्त्यानामंतर्महाँश्चरसि रोचनेन ॥२॥

यं । त्वा । जनासः । अभि । संऽचरंति । गावः । उष्णंऽइव । व्रजं । यविष्ठ ।
दूतः । देवानां । असि । मर्त्यानां । अंतः । महान् । चरसि । रोचनेन ॥२॥

हे यविष्ठ युवतमाग्ने यं त्वा त्वां जनासो जना यजमानाः फलप्राप्त्यर्थमभि संचरंति । अभितः परिचरंति । सेवंते । तत्र दृष्टांतः । गाव उष्णमिव । यथा गावः शीतार्ता उष्णं शीतजनितदुःखापनोदनार्थमुष्णं व्रजं गोष्ठमभि गच्छंति तद्वत् । स त्वं देवानामिंद्रादीनां मर्त्यानां मनुष्याणां च दूतोऽसि हविःप्रापणद्वारा । ततो महांस्त्वमंतर्द्यावापृथिव्योर्मध्ये हवींष्यादाय रोचनेनांतरिक्षेण लोकेन चरसि । गच्छसि । तं त्वां स्तुम इति शेषः ॥

॥ अथ तृतीया ॥

शिशुं न त्वा जेन्यं वर्धयंती माता बिभर्ति सचनस्यमाना ।
धनोरधि प्रवता यासि हर्यन् जिगीषसे पशुरिवावसृष्टः ॥३॥

शिशुं । न । त्वा । जेन्यं । वर्धयंती । माता । बिभर्ति । सचनस्यमाना ।
धनोः । अधि । प्रऽवता । यासि । हर्यन् । जिगीषसे । पशुःऽइव । अवऽसृष्टः ॥३॥

हे अग्ने जेन्यं जयशीलं त्वा त्वां शिश्वुं न पुत्रमिव वर्धयंती पोषयंती माता पृथिवी सचनस्यमाना संपर्कमिच्छंती सती बिभर्ति । धारयति । स त्वं हर्यन् कामयमानस्तस्मिँल्लोके धनोरधि । अधिः सप्तम्यर्थद्योतकः । अंतरिक्षात्प्रवता प्रवणेन मार्गेण यासि । यद्वा प्रत्यागच्छसि । किंच त्वमवसृष्टो यष्टृभिर्हविरादाय जिगीषसे । देवान्प्रति गंतुमिच्छसि । कथमिव । पशुरिव । यथा विमुक्तः पशुर्गोष्ठं प्रत्यागच्छति तद्वत् ॥

॥ अथ चतुर्थी ॥

मूरा अमूर न वयं चिकित्वो महित्वमग्ने त्वमंग वित्से ।
शये वव्रिश्चरति जिह्वयादन्रेरिह्यते युवतिं विश्पतिः सन् ॥४॥

मूराः । अमूर । न । वयं । चिकित्वः । महिऽत्वं । अग्ने । त्वं । अंग । वित्से ।
शये । वव्रिः । चरति । जिह्वया । अदन् । रेरिह्यते । युवतिं । विश्पतिः । सन् ॥४॥

हे अमूर अमूढ अत एव चिकित्वश्चेतनवन् हे अग्ने मूरा मूढा वयं तव माहात्म्यं न जानीमः । किंतु हे अग्ने त्वमंग । अंगेति निपात एवार्थे । त्वमेव तव महित्वं माहात्म्यं वित्से । जानासि । त्वत्तः कोऽन्यो वेदितुमर्हति । किंच । वव्रिर्जीर्णे ओषधीसंगः शये । शेते । तिष्ठति । यद्वा । वव्रिरिति रूपनाम सामर्थ्याच्चांतर्णीतमत्वर्थं द्रष्टव्यं । आहवनीयाख्येन रूपेण रूपवान् । शये । चरति । अथ जिह्वया ज्वालाख्ययादन् हवींषि भक्षयन् चरति । वाक्यभेदादनिघातः । किंच विश्पतिर्विशां स्वामी सन्नग्निर्युवतिमात्मनो मिश्रयित्रीमाहुतिं दीर्घप्रसृतया ज्वालया जिह्वया रेरिह्यते । अत्यर्थं लेढि । आस्वादयति ॥ लिह आस्वादने । यङि रूपं ॥ यद्वा । सोऽग्निर्युवतिं तरुणीं जीर्णौषधिकां पृथिवीमास्वादयति ॥

॥ अथ पंचमी ॥

कूचिज्जायते सनयासु नव्यो वने तस्थौ पलितो धूमकेतुः ।
अस्नातापो वृषभो न प्र वेति सचेतसो यं प्रणयंत मर्ताः ॥५॥

कूऽचित् । जायते । सनयासु । नव्यः । वने । तस्थौ । पलितः । धूमऽकेतुः ।
अस्नाता । आपः । वृषभः । न । प्र । वेति । सऽचेतसः । यं । प्रऽनयंत । मर्ताः ॥५॥

नव्यो नवतरः स्तुत्यो वाग्निः कूचित् क्वचित्प्रदेशे जायते । कुत्र । सनयासु

पुराणीषु जीर्णास्वोषधीष्वरण्योः । तथा पलितः पालयिता श्वेतवर्णो धूमकेतुर्धूमप्रज्ञानोऽग्निर्वने सर्वस्मिन्नरण्ये तस्थौ । तिष्ठति । यद्वा वन उदके मेघगते विद्युदात्मना तिष्ठति च । अस्नाता स्नानमकुर्वन् अनपेक्षितस्नानः सर्वदाशुद्धः सोऽग्निरापः । सुब्व्यत्ययः । अप उदकानि शांत्यर्थं प्र वेति । प्रगच्छति । तत्र दृष्टांतः । वृषभो न । यथा वृषभस्तृष्णोपशमनार्थमरण्यमध्यस्थान्युदकानि प्रगच्छति तद्वत् । मर्ता मनुष्या ऋत्विजः सचेतसः समानमनस्काः समानप्रज्ञानाः संतो यमग्निं प्रणयंत । हविर्भिः प्रीणयंति ॥

॥ अथ षष्ठी ॥

तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीतां ।
इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरंगैः ॥६॥

तनूत्यजाऽइव । तस्करा । वनर्गू इति । रशनाभिः । दशऽभिः । अभि । अधीतां ।
इयं । ते । अग्ने । नव्यसी । मनीषा । युक्ष्व । रथं । न । शुचयत्ऽभिः । अंगैः ॥६॥

हे अग्ने वनर्गू वनगामिनौ तनूत्यजा चौर्ये मर्तुं कृतनिश्चयौ धृष्टौ तस्करा तस्करौ यथा पथिकं मोषणार्थं रज्ज्वा बद्ध्वाकृष्य च क्वचित्प्रदेशे स्थापयतः । तद्वत् । तथा यास्कः । तनूत्यक् तनूत्यक्ता वनर्गू वनगामिनावग्निमंथनौ बाहू तस्कराभ्यामुपमिमीते । नि० ३.१४. । इत्यादि । अधीतां ॥ दधातेर्लुङि सिचो लुकि छंदस्युभयथेति तस आर्धधातुकत्वेन ङित्त्वाद्घुमास्थेतीकारः ॥ ततो हे अग्ने ते त्वदर्थं नव्यसी नवतरेयं मनीषा स्तुतिर्मया क्रियते । एतज्ज्ञात्वा शुचयद्भिः सर्वं प्रकाशयद्भिरात्मीयैरंगैस्तेजोभिरात्मानं मदीयं यज्ञं प्रति युक्ष्व । योजय । कथमिव । रथं न । यथा रथमश्वैः संयोजयंति तद्वत् ॥

उखासंभरणीयेष्टावग्नेर्ब्रह्मण्वतो याज्या ब्रह्म च त इत्येषा । सूचितं च । ब्रह्म च ते जातवेदो नमश्च पुरूण्यग्ने पुरुधा त्वाया । आ० ४.१. । इति ॥

॥ सैषा सूक्ते सप्तमी ॥

ब्रह्म च ते जातवेदो नमश्चेयं च गीः सदमिद्वर्धनी भूत् ।
रक्षा णो अग्ने तनयानि तोका रक्षोत नस्तन्वो३अप्रयुच्छन् ॥७॥

ब्रह्म । च । ते । जातऽवेदः । नमः । च । इयं । च । गीः । सदं । इत् । वर्धनी । भूत् ।
रक्ष । नः । अग्ने । तनयानि । तोका । रक्ष । उत । नः । तन्वः । अप्रऽयुच्छन् ॥७॥

हे जातवेदो जातप्रज्ञाग्ने ते त्वदर्थं ब्रह्मास्माभिर्दीयमानं हवीरूपमन्नं वर्धनी वर्धनं भूत्। भवतु। तथा नमो नमस्कारश्च। किंचेयमिदानीं क्रियमाणैषा स्तुतिः सदमित् सदैव वर्धनी वर्धयित्री भूत्। भवतु। तस्माद्धे अग्ने नोऽस्माकं तनयानि पुत्रान् तोका पौत्रांश्च रक्ष। पालय। उतापि चाप्रयुच्छन् अप्रमाद्यंस्त्वं नोऽस्माकं तन्वोऽङ्गानि रक्ष ॥

॥ इति सप्तमस्य पंचमे द्वाविंशो वर्गः ॥

एकः समुद्र इति सप्तर्चं पंचमं सूक्तं। ऋष्याद्याः पूर्ववत्। विनियोगश्च। एक इत्यनुक्रांतं ॥

॥ तत्र प्रथमा ॥

एकः समुद्रो धरुणो रयीणामस्मद्धृदो भूरिजन्मा वि चष्टे।
सिषक्त्यूधर्निण्योरुपस्थ उत्सस्य मध्ये निहितं पदं वेः ॥१॥

एकः। समुद्रः। धरुणः। रयीणां। अस्मत्। हृदः। भूरिऽजन्मा। वि। चष्टे।
सिसक्ति। ऊधः। निण्योः। उपऽस्थे। उत्सस्य। मध्ये। निऽहितं। पदं। वेरिति वेः॥१॥

समुद्रः यस्माद्धनान्युदकानि वा समुद्द्रवंतीति तादृशो रयीणां धनानां धरुणो धारयितैकोऽसहायो भूरिजन्मा बहुविधजननो नानायज्ञेष्वाहवनीयादिभावेन बहुजननः सोऽग्निरस्मत् ॥ सुपां सुलुगिति षष्ठ्या लुक् ॥ अस्माकं हृदो हृदयान्यभिलषितानि वि चष्टे। विपश्यति जानाति। उक्तं च। मनो वै देवा मनुष्यस्य जानंतीति। किंच निण्योः। अंतर्हितनामैतत्। अंतर्हितयोर्ज्योतिस्तमोभ्यामाच्छादितयोः प्रातःसायंकालयोरुपस्थ उपस्थाने समीपे वर्तमानमूधो रात्रिं सिषक्ति। सेवते। उपजीवति। यद्वा निण्योरंतर्हितस्यांतरिक्षस्य समीपे वर्तमानमूधो मेघं सेवते। अथ प्रत्यक्षः। हे अग्ने उत्सस्योदकधारकस्य लोकस्य मध्ये पदमपां स्थानं निहितं। तन्माध्यमिकां वाचं वेः। गच्छ। यद्वा। उत्सस्य मेघस्य मध्ये निहितं पदं विद्युदाख्यं तत् स्वात्मतया गच्छ ॥ वेः। वी गत्यादिषु। लङि सिपि रूपं। वाक्यभेदादनिघातः ॥

॥ अथ द्वितीया ॥

समानं नीळं वृषणो वसानाः सं जग्मिरे महिषा अर्वतीभिः।
ऋतस्य पदं कवयो नि पांति गुहा नामानि दधिरे पराणि ॥२॥

समानं। नीळं। वृषणः। वसानाः। सं। जग्मिरे। महिषाः। अर्वतीभिः।
ऋतस्य। पदं। कवयः। नि। पांति। गुहा। नामानि। दधिरे। पराणि ॥२॥

वृषण आहुतीनां सेक्तारः समानमेकं नीळं नीलस्थानमग्निं वसाना मंचत आच्छादयंतो महिषा महांतो यजमाना अर्वतीभिर्वडवाभिः सं जग्मिरे। समगच्छंत। अश्ववंतोऽभूवन्। यद्वा अग्निमेवात्मीययज्ञं प्रत्यागंतुं रोहिदाख्याभिर्वडवाभिः संयोजितवंतः। तथा कवयो मेधाविन ऋतस्योदकस्य पदमावासस्थानमग्निं नि पांति। नितरां रक्षंति। हविर्भिः स्तुतिभिश्चाराधयंतीत्यर्थः। ततो गुहा गुहायामंतरिक्षे स्थितानि दिव्यानि नामान्युदकानि दधिरे। धारयंति। यद्वा। गुहा गूढे संवृते हृदये पराणि प्रधानान्यग्निर्जातवेदा वैश्वानर इत्यादीनि नामानि दधिरे। कुर्वंति। स्तुवंतीत्यर्थः॥

॥ अथ तृतीया ॥

ऋतायिनी मायिनी सं दधाते मित्वा शिशुं जज्ञतुर्वर्धयंती।
विश्वस्य नाभिं चरतो ध्रुवस्य कवेश्चित्तंतुं मनसा वियंतः ॥३॥

ऋतयिनी इत्यृतऽयिनी। मायिनी इति। सं। दधाते इति। मित्वा। शिशुं। जज्ञतुः। वर्धयंती इति।
विश्वस्य। नाभिं। चरतः। ध्रुवस्य। कवेः। चित्। तंतुं। मनसा। विऽयंतः ॥३॥

ऋतायिनी ऋतवत्यौ सत्यवत्यौ अत एव मायिनी प्रज्ञावत्यौ कर्मयुक्ते वा द्यावापृथिव्यौ यज्ञसाधनभूते अरणी वेममग्निं सं दधाते। सम्यक् धारयतः। अग्निं सूर्यात्मना केवलाग्न्यात्मना वा संदधाते। मित्वा कालपरिमाणं कृत्वा यद्वा संपरिच्छिद्य शिशुं शंसनीयं बालमग्निं जज्ञतुः। जनयतः। वर्धयंती वर्धयंत्यौ द्यावापृथिव्यौ। लोके यथा परिच्छेदाय पुत्रं पितरौ जनयतस्तद्वत्। ततो विश्वस्य सर्वस्य चरतो जंगमस्य ध्रुवस्य स्थावरस्य च जगतो नाभिं नाभिभूतं मध्यं प्रधानभूतं वा कवेर्मेधाविनोऽग्नेस्तंतुं तनितारं वैश्वानराख्यमंशमेव मनसा वियंतो विविधं गच्छंतो मनुष्याः सुखेन युज्यंत इति शेषः। तं वयं यजाम इति ॥

॥ अथ चतुर्थी ॥

ऋतस्य हि वर्तनयः सुजातमिषो वाजाय प्रदिवः सचंते।
अधीवासं रोदसी वावसाने घृतैरन्नैर्वावृधाते मधूनां ॥४॥

ऋतस्य॑ । हि । व॒र्तन॑यः । सु॒ऽजा॑तं । इषः॑ । वाजा॑य । प्र॒ऽदिवः॑ । सचं॑ते ।

अ॒धी॒वा॒सं । रोद॑सी॒ इति॑ । व॒व॒सा॒ने इति॑ । घृ॒तैः । अन्नैः॑ । व॒वृ॒धा॒ते इति॑ । मधू॑नां ॥४॥

ऋतस्य यज्ञस्य वर्तनयः प्रवर्तका इषोऽभिलषितानीच्छंतः प्रदिवः पुरातना ऋत्विग्यजमानाः सुजातमाधानकाले सुष्ठूत्पन्नमग्निं वाजाय बलार्थमन्नार्थं वा सचंते हि । सेवंते खलु । अपि च । वावसाने सर्वस्य जगत आच्छादयित्र्यौ रोदसी द्यावापृथिव्यावधीवासमोषधिनक्षत्राद्यात्मना निवसंतं । यद्वाधिरूपर्यर्थे । त्रयाणां लोकानामुपर्यग्निविद्युदादित्यात्मना निवसंतमग्निं मधूनामुदकानां जन्यत्वेन संबंधिभिर्घृतैरन्नैः पुरोडाशादिभिश्च वावृधाते । वर्धयां चक्रतुः । वर्धयतः । तस्मादयमपि तमग्निमभिष्टुम इत्यभिप्रायः ॥

॥ अथ पंचमी ॥

स॒प्त स्वसॄ॒ररु॑षीर्वावशा॒नो वि॒द्वान्मध्व॒ उज्ज॑भारा दृ॒शे कं ।

अं॒तर्ये॑मे अं॒तरि॑क्षे पुरा॒जा इ॒च्छन्व॒व्रिम॑विदत्पूष॒णस्य॑ ॥५॥

स॒प्त । स्वसॄः॑ । अरु॑षीः । वा॒व॒शा॒नः । वि॒द्वान् । मध्वः॑ । उत् । ज॒भा॒र॒ । दृ॒शे । कं ।

अं॒तः । ये॒मे॒ । अं॒तरि॑क्षे । पु॒रा॒ऽजाः । इ॒च्छन् । व॒व्रिं । अ॒वि॒द॒त् । पू॒ष॒णस्य॑ ॥५॥

वावशानः कामयमानो वाश्यमानः स्तोतृभिः स्तूयमानो वा विद्वान् सर्वं जानानः सोऽग्निररुषीरारोचमानाः सप्त सप्तसंख्याकाः स्वसॄः स्वयंसारिणीः काली कराली चेत्यादिकाः सप्त जिह्वा मध्वो मदकराद्यज्ञादुज्जभार । उज्जहार । ऊर्ध्वं हृतवान् । यज्ञे स्वतेजसा प्रादुर्भूत इत्यर्थः । किमर्थं कं सुखेन दृशे सर्वेषामेव पदार्थानां दर्शनार्थं । किंच । पुराजाः पुराजातः सोऽग्निर्द्यावापृथिव्योरंतर्मध्येऽंतरिक्षे स्थितस्ता जिह्वा येमे । नियमितवान् । सर्वत्र तेजोयुक्तो वर्तत इत्यर्थः । अपि च इच्छन् यजमानान्कामयमानोऽग्निः पूषणस्य । पूषेति पृथिवीनाम । पार्थिवस्य लोकस्य वव्रिं रूपं पृश्निवर्णमविदत् प्रायच्छत् । यद्वा मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ।ऋग्वे॰१०.८८.६.। इति मंत्रांतरे दर्शनादादित्यात्मनाग्निः स्तूयते । कामयमानः सूर्यात्माग्निः सप्तसंख्याकान् स्वसॄ रश्मीन् मध्वः समुद्रोदकादुद्धृतवान् । प्राप्तः । अंतरिक्षे विद्युदात्मना स्थित्वा वृष्टिलक्षणं रूपं पृथिव्याः प्रयच्छति ॥

॥ अथ षष्ठी ॥

सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात् ।
आयोर्ह स्कंभ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ ॥६॥
सप्त । मर्यादाः । कवयः । ततक्षुः । तासां । एकां । इत् । अभि । अंहुरः । गात् ।
आयोः । ह । स्कंभः । उपऽमस्य । नीळे । पथां । विऽसर्गे । धरुणेषु । तस्थौ ॥६॥

कवयो मेधाविन ऋषयः सप्त मर्यादाः कामजेभ्यः क्रोधजेभ्यश्चोद्धृताः पानमक्षाः स्त्रियो मृगया दंडः पारुष्यमन्यदूषणमिति सप्त मर्यादाः । यद्वा । स्तेयं गुरुतल्पारोहणं ब्रह्महत्यां सुरापाणं दुःकृतकर्मणः पुनःपुनःसेवां पातकेऽनृतोद्यमिति निरुक्ते निर्दिष्टाः सप्त मर्यादा अवस्थितास्ततक्षुः । तक्षतिः करोतिकर्मा । सुष्ठु लंघनीयाश्चक्रुः । त्यक्तवंत इत्यर्थः । तासां मर्यादानामेकामिदेकामेवांहुरः पापवान् पुरुषोऽभि गात् अभिगच्छति । यस्त्वेवं करोति स पापवान्भवतीत्यर्थः । किंच । आयोस्तस्य मनुष्यस्य स्कंभः स्कंभयिता निरोधकोऽग्निरुपमस्य समीपभूतस्यायोर्नीळे स्थाने पथामादित्यरूपस्य स्वस्य रश्मीनां विसर्गे विसर्जनस्थानेऽतरिक्षमध्ये वर्तमानेषु धरुणेषूदकेषु तस्थौ । विद्युदात्मना तिष्ठति । अनेन लोकत्रयवर्तित्वमिति ॥

॥ अथ सप्तमी ॥

असच्च सच्च परमे व्योमन्दक्षस्य जन्मन्नदितेरुपस्थे ।
अग्निर्ह नः प्रथमजा ऋतस्य पूर्व आयुनि वृषभश्च धेनुः ॥७॥
असत् । च । सत् । च । परमे । विऽओमन् । दक्षस्य । जन्मन् । अदितेः । उपऽस्थे ।
अग्निः । ह । नः । प्रथमऽजाः । ऋतस्य । पूर्वे । आयुनि । वृषभः । च । धेनुः ॥७॥

असदव्याकृतं सच्च व्याकृतं । असदेवेदमग्र आसीत् तत्सदासीत् तत्समभवदिति श्रुतेः । सदसदात्मकं जगत्सर्वं परम उत्तमे ज्ञानसहिते व्योमनि कारणात्मनि जातमभूत्तदा । अदितेः पृथिव्या उपस्थ उपस्थाने समीपे दक्षस्य प्रजापतेः । यद्वा दक्षस्य स त्रेधात्मानं व्यभजतादित्यं तृतीयं वायुं तृतीयमिति श्रुतेः । तृतीयस्य द्युलोकस्याधिष्ठातृत्वादादित्यस्य जन्मन् जन्मनि । तत एवं सति मनुष्यस्य सृष्टिक्रमात्पूर्वमग्निर्हाग्निरेवर्तस्य कर्मफलस्य भोक्तॄणां नोऽस्माकं प्रथमजाः प्रथमजातः समुत्पन्नः । तेजोरसो निरवर्तताग्निरिति श्रवणात् । पश्चात्तत्प्रकरणे ततो

मनुष्या अजायंतेति प्रथमत एव मनुष्यसृष्टेरभिहितत्वात् अनंतरं पूर्वं। उत्तरसृष्टिमपेक्ष्य पूर्वत्वं। आयुनि कालेऽयमग्निरेव वृषभश्चासीत् धेनुश्चाभवत्। स्त्रीपुंसवत् स्त्रीपुंसात्मकोऽभवदित्यर्थः ॥

॥ इति सप्तमस्य पंचमे त्रयस्त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके पंचमोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
सप्तमस्याष्टकस्येत्थं व्याकार्षीत्पंचमं सुधीः।
सायणाह्वस्ततः षष्ठमध्यायं व्याचिकीर्षति ॥

दशमे मंडले प्रथमेऽनुवाके षोडश सूक्तानि। तत्रायं स यस्येति सप्तर्चं षष्ठं सूक्तं। आप्त्यस्य त्रितस्यार्षं त्रैष्टुभमाग्नेयं। अयमित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

अयं स यस्य शर्मन्नवोभिरग्नेरेधते जरिताभिष्टौ।
ज्येष्ठेभिर्यो भानुभिर्ऋषूणां पर्येति परिवीतो विभावा ॥१॥

अयं। सः। यस्य। शर्मन्। अवःऽभिः। अग्नेः। एधते। जरिता। अभिष्टौ।
ज्येष्ठेभिः। यः। भानुऽभिः। ऋषूणां। परिऽएति। परिऽवीतः। विभाऽवा ॥१॥

जरिता स्तोताभिष्टौ यागे कृते यस्याग्नेरवोभिः पालनैः शर्मन् शर्मणि स्वगृह एधते वर्धते सोऽयमग्निर्यागार्थमस्माभिराहूत इति शेषः। विभावा दीप्तिमान्

योऽग्निर्ऋषूणां सूर्यरश्मीनां ज्येष्ठेभिः प्रशस्तैर्भानुभिस्तेजोभिः परिवीतः परिवृतः पर्येति सर्वतो गच्छति । यत्र यत्र गंतव्यं तत्र तत्राप्रतिहतगतिर्गच्छतीत्यर्थः ॥

॥ अथ द्वितीया ॥

यो भानुभिर्विभावा विभात्यग्निर्देवेभिर्ऋतावाजस्रः ।

आ यो विवाय सख्या सखिभ्योऽपरिह्वृतो अत्यो न सप्तिः ॥२॥

यः । भानुऽभिः । विभाऽवा । विऽभाति । अग्निः । देवेभिः । ऋतऽवा । अजस्रः ।

आ । यः । विवाय । सख्या । सखिऽभ्यः । अपरिऽह्वृतः । अत्यः । न । सप्तिः ॥२॥

ऋतवा सत्यवाकवान् यज्ञवान्वाजस्रोऽनुपक्षीणोऽहिंसितो वा । केनचिद्नभिभूत इत्यर्थः । विभावा दीप्तिमान्योऽग्निर्देवेभिर्देवैर्द्योतमानैर्भानुभिस्तेजोभिर्विभाति विविधं दीप्यते किंच योऽग्निः सख्या सख्यानि सखिभिः कर्तव्यानि कर्माणि हविरादीनि कर्तुमिति शेषः । सखिभ्यः सखिभूतानां यजमानानामर्थायापरिह्वृतोऽपरिहिंसितः । अपरिश्रांत इत्यर्थः । आ विवाय आभिमुख्येन गच्छति । तत्र दृष्टांतः । सप्तिः सदासर्पण इत्यर्थः । अत्यो न यथा सततगमनसमर्थोऽश्वोऽपरिश्रांतो गच्छति तद्वत् । सोऽयमग्निरस्माभिर्योगार्थमाहूत इति पूर्ववद्योज्यं ॥

॥ अथ तृतीया ॥

ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ ।

आ यस्मिन्मना हवींष्यग्नावरिष्टरथः स्कभ्नाति शूषैः ॥३॥

ईशे । यः । विश्वस्याः । देवऽवीतेः । ईशे । विश्वऽआयुः । उषसः । विऽउष्टौ ।

आ । यस्मिन् । मना । हवींषि । अग्नौ । अरिष्टऽरथः । स्कभ्नाति । शूषैः ॥३॥

योऽग्निर्विश्वस्या देववीतेः सर्वस्य यज्ञस्येश ईष्टे । अपि च विश्वायुः सर्वत्राप्रतिहतगमन उषसो व्युष्टौ विवासन उदयकाले होमार्थं यजमानानामीश ईष्टे । शूषैः शत्रुबलैररिष्टरथोऽहिंसितयज्ञरथः सर्व एव यजमानो यस्मिन्नग्नौ मना मननीयानि हवींषि स्कभ्नात्यादरेण प्रतिबध्नाति प्रक्षिपति सोऽयमग्निरस्माभिर्योगार्थमाहूत इत्यर्थः ॥

॥ अथ चतुर्थी ॥

शूषेभिर्वृधो जुषाणो अर्कैर्देवाँ अच्छा रघुपत्वा जिगाति ।
मंद्रो होता स जुह्वा३ यजिष्ठः संमिश्लो अग्निरा जिघर्ति देवान् ॥४॥
शूषेभिः । वृधः । जुषाणः । अर्कैः । देवान् । अच्छ । रघुऽपत्वा । जिगाति ।
मंद्रः । होता । सः । जुह्वा । यजिष्ठः । संऽमिश्लः । अग्निः । आ । जिघर्ति । देवान् ॥४॥

वृधो वर्धितोऽग्निः शूषेभिर्हविर्लक्षणैर्बलैः । बलनिमित्तैर्हविर्भिरित्यर्थः । अर्कैः स्तोत्रैश्च जुषाणः सेव्यमानः सन् देवानिंद्रादीनच्छाप्तुं रघुपत्वा लघुपतनः शीघ्रगामी जिगाति । गच्छति । गत्वा च मंद्रः स्तुत्यो होता देवानामाह्वाता होमनिष्पादको वा यजिष्ठो यष्टृतमः संमिश्लः स्वगुणैर्देवैर्वा संप्रयुक्तः सोऽग्निर्देवान्प्रति हविरा जिघर्ति । आहारयति । देवेभ्यो हविर्ददातीत्यर्थः ॥

॥ अथ पंचमी ॥

तमुस्रामिंद्रं न रेजमानमग्निं गीर्भिर्नमोभिरा कृणुध्वं ।
आ यं विप्रासो मतिभिर्गृणंति जातवेदसं जुह्वं सहानां ॥५॥
तं । उस्रां । इंद्रं । न । रेजमानं । अग्निं । गीःऽभिः । नमःऽभिः । आ । कृणुध्वं ।
आ । यं । विप्रासः । मतिऽभिः । गृणंति । जातऽवेदसं । जुह्वं । सहानां ॥५॥

हे ऋत्विजो यूयमुस्रां भोगानामुत्स्राविणं दातारं रेजमानं ज्वालात्मना कंपमानं तमग्निमिंद्रं नेंद्रमिव गीर्भिः स्तुतिभिर्नमोभिर्हविर्भिश्चा कृणुध्वं । अस्मदभिमुखं कुरुत । विप्रासो मेधाविनः स्तोतारः सहानां शत्रुबलाद्यभिभवितॄणां देवानां जुह्वमाह्वातारं जातवेदसं जातधनं जातप्रज्ञं वा यमग्निमा गृणंति । आदरेण स्तुवंति । तमाकृणुध्वमिति पूर्वेण संबंधः ॥

॥ अथ षष्ठी ॥

सं यस्मिन्विश्वा वसूनि जग्मुर्वाजे नाश्वाः सप्तीवंत एवैः ।
अस्मे ऊतीरिंद्रवाततमा अर्वाचीना अग्न आ कृणुष्व ॥६॥
सं । यस्मिन् । विश्वा । वसूनि । जग्मुः । वाजे । न । अश्वाः । सप्तिऽवंतः । एवैः ।
अस्मे इति । ऊतीः । इंद्रवातऽतमाः । अर्वाचीनाः । अग्ने । आ । कृणुष्व ॥६॥

हे अग्ने यस्मिंस्त्वयि विश्वानि वसूनि धनानि सं जग्मुः। स्वत्वेन संगतानि भवंति। तत्र दृष्टांतः। एवैर्गमनैः सप्तीवंतः सर्पणवंतः शीघ्रगमनसमर्था अश्वा वाजे न यथा संग्रामे संगतास्तद्वत्। हे अग्ने स त्वमिंद्रवाततमा इंद्रेणाभिगता ऊती रक्षा अस्मे अस्मास्वर्वाचीना अभिमुखीरा कृणुष्व। आदरेण कुरु ॥

॥ अथ सप्तमी ॥

अधा ह्यग्ने मह्ना निषद्या सद्यो जज्ञानो हव्यो बभूथ।

तं ते देवासो अनु केतमायन्नधावर्धंत प्रथमास ऊमाः ॥७॥

अध। हि। अग्ने। मह्ना। निऽसद्य। सद्यः। जज्ञानः। हव्यः। बभूथ।

तं। ते। देवासः। अनु। केतं। आयन्। अध। अवर्धंत। प्रथमासः। ऊमाः ॥७॥

अधानंतरं हि यस्माद्धे अग्ने त्वं मह्ना महत्त्वेन जज्ञानो जायमानो ज्वलन्निषद्योपविश्य सद्यस्तस्मिन्प्रजननकाल एव हव्यो हवनार्ह आहुतिप्रक्षेपणार्हो बभूथ भवसि तस्मात्कारणाद्देवासो हविषां दातार ऋत्विग्यजमानास्ते तव स्वभूतं तं तादृशं केतं प्रज्ञानलक्षणमन्वायन्। अनुगच्छंति। दीप्ते त्वयि हवींषि जुह्वतीत्यर्थः। अधानंतरमृत्विगादयः प्रथमासः क्रियाभिजनविद्यागुणैरुत्कृष्टा ऊमास्त्वया रक्षिताः संतोऽवर्धंत। वर्धंते ॥

॥ इति सप्तमस्य षष्ठे प्रथमो वर्गः ॥

स्वस्ति न इति सप्तर्चं सप्तमं सूक्तं। ऋष्याद्याः पूर्ववत्। स्वस्तीत्यनुक्रांतं। उक्तः सूक्तविनियोगः। स्वस्त्ययन्यां प्रधानस्य स्वस्ति न इत्येषानुवाक्या। सूचितं च। अग्निः स्वस्तिमान् स्वस्ति नो दिवो अग्ने पृथिव्याः। आ० २.१०। इति ॥

॥ तत्र प्रथमा ॥

स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव।

सचेमहि तव दस्म प्रकेतैरुरुष्या ण उरुभिर्देव शंसैः ॥१॥

स्वस्ति। नः। दिवः। अग्ने। पृथिव्याः। विश्वऽआयुः। धेहि। यजथाय। देव।

सचेमहि। तव। दस्म। प्रऽकेतैः। उरुष्य। नः। उरुऽभिः। देव। शंसैः ॥१॥

हे देव दानादिगुणविशिष्टाग्ने त्वं दिवः पृथिव्या द्यावापृथिव्योः सकाशान्नोऽस्मभ्यं विश्वायुः सर्वान्नं स्वस्ति पुत्रादि यजथाय देवयागार्थं धेहि। प्रयच्छ।

सर्वोपद्रवरहिताः सर्वान्नपुत्रयुक्ताश्च संतो वयं यथा यज्वानो भवेम तथास्मान्कुर्विति वाक्यशेषः। अपि च वयं सचेमहि। हे दस्म दर्शनीय देवाग्ने उरुभिर्बहुभिः शंसैः शंसनीयैस्तव संबंधिभिः प्रकेतैः पालनोपायप्रज्ञानैर्नोऽस्मानुरुष्य। रक्ष॥

॥ अथ द्वितीया ॥

इमा अग्ने मतयस्तुभ्यं जाता गोभिरश्वैरभि गृणंति राधः।

यदा ते मर्तो अनु भोगमानड्वसो दधानो मतिभिः सुजात ॥२॥

इमाः। अग्ने। मतयः। तुभ्यं। जाताः। गोभिः। अश्वैः। अभि। गृणंति। राधः।

यदा। ते। मर्तः। अनु। भोगं। आनट्। वसो इति। दधानः। मतिऽभिः। सुऽजात॥२॥

हे अग्ने इमा ईदृश्यो मतयः स्तुतयस्तुभ्यं त्वदर्थं जाता अस्मदादिस्तोतृमुखादुत्पन्नाः। उच्चारिता इत्यर्थः। गोभिरश्वैश्च सहितं राधस्त्वया दीयमानं हिरण्यादिकं धनमभि गृणंति। अभिष्टुवंति। अस्मत्स्तुत्यनुरूपान्नमस्मभ्यं त्वया दत्तमिति प्रशंसंति। यदा मर्तोऽस्मदादिको मनुष्यस्ते त्वया दीयमानं भोगं भोगार्हं धनमन्वानट् प्राप्नोति लभते तदा हे वसो प्रशस्यवसुमन्। यद्वा स्वेन तेजसा सर्वस्याच्छादयितः। हे सुजात शोभनकर्मार्थमुत्पन्नाग्ने त्वं दधानोऽस्मभ्यं धनं प्रयच्छन् मतिभिरस्मदीयाभिः स्तूयस इति शेषः॥

॥ अथ तृतीया ॥

अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित्सखायं।

अग्नेरनीकं बृहतः सपर्यं दिवि शुक्रं यजतं सूर्यस्य ॥३॥

अग्निं। मन्ये। पितरं। अग्निं। आपिं। अग्निं। भ्रातरं। सदं। इत्। सखायं।

अग्नेः। अनीकं। बृहतः। सपर्यं। दिवि। शुक्रं। यजतं। सूर्यस्य ॥३॥

अहं स्तोता पितरमग्निमेव मन्ये। जाने। आपिं बंधुमग्निमेव मन्ये। भ्रातरमग्निमेव मन्ये। सदमित् सदैवाविसंवादिनं सखायमग्निमेव जानामि। बृहतो महतोऽग्नेरनीकमाहवनीयाख्यं मुखं सपर्यं। परिचरामि। तत्र लुप्तोपममेतत्। दिवि द्युलोके स्थितं यजतं यष्टव्यं पूजनीयं सूर्यस्य संबंधि शुक्रं दीप्तिमन्मंडलं यथा कश्चिदभिप्रेतार्थसिद्धय आराधयति तद्वत्॥

॥ अथ चतुर्थी ॥

सिध्रा अग्ने धियो अस्मे सनुत्रीर्यं त्रायसे दम आ नित्यहोता ।
ऋतावा स रोहिदश्वः पुरुक्षुर्द्युभिरस्मा अहभिर्वाममस्तु ॥ ४ ॥
सिध्राः । अग्ने । धियः । अस्मे इति । सनुत्रीः । यं । त्रायसे । दमे । आ । नित्यऽहोता ।
ऋतऽवा । सः । रोहित्ऽअश्वः । पुरुऽक्षुः । द्युऽभिः । अस्मै । अहऽभिः । वामं । अस्तु ॥ ४ ॥

हे अग्ने सनुत्रीः संभक्त्र्योऽस्मे अस्माकं संबंधिन्यो धियः स्तुतयः सिध्राः सिद्धा निष्पन्नाः । त्वदर्थमस्माभिः कृता इत्यर्थः । दम आ अस्मद्यज्ञगृहे मर्यादतयावस्थितस्त्वं नित्यहोता सततं होमनिष्पादको देवानामाह्वाता वा सन् यं त्रायसे कर्मवैगुण्याद्रक्षसि सोऽहं त्वत्प्रसादात्त्वत्सायुज्यं गतः सन् ऋतवा यज्ञवान् सत्यवान् वा स्यामिति शेषः । रोहिदश्वो रोहित्संज्ञकाश्वः पुरुक्षुः बह्वन्नश्च स्यां । किंच । अस्मा ईदृग्भूताय तुभ्यं द्युभिर्दीप्तैरहभिरहःसु दिवसेषु वामं वननीयं हविरस्तु ॥

॥ अथ पंचमी ॥

द्युभिर्हितं मित्रमिव प्रयोगं प्रत्नमृत्विजमध्वरस्य जारं ।
बाहुभ्यामग्निमायवोऽजनंत विक्षु होतारं न्यसादयंत ॥ ५ ॥
द्युऽभिः । हितं । मित्रंऽइव । प्रऽयोगं । प्रत्नं । ऋत्विजं । अध्वरस्य । जारं ।
बाहुऽभ्यां । अग्निं । आयवः । अजनंत । विक्षु । होतारं । नि । असादयंत ॥ ५ ॥

द्युभिर्हितं दीप्तिराहितं मित्रमिव स्निग्धमिव प्रयोगं प्रयोक्तव्यं प्रत्नं पुराणमृत्विजं होतृसंज्ञकं । अग्निर्वै देवानां होतासीदिति श्रुतेः । अध्वरस्य जारं समापयितारमेवंभूतमग्निमायवो यजमाना मनुष्या बाहुभ्यामजनंत । जनितवंतः । किंच विक्षु मनुष्येषु तदाकारेषु देवेष्वित्यर्थः । होतारमाह्वातारं न्यसादयंत । नियमेन सादितवंतः । देवानां यागार्थं निरूपितवंत इत्यर्थः ॥

॥ अथ षष्ठी ॥

स्वयं यजस्व दिवि देव देवान्किं ते पाकः कृणवदप्रचेताः ।
यथायज ऋतुभिर्देव देवानेवा यजस्व तन्वं सुजात ॥ ६ ॥

स्वयं। यजस्व। दिवि। देव। देवान्। किं। ते। पाकः। कृणवत्। अप्रऽचेताः।
यथा। अयजः। ऋतुऽभिः। देव। देवान्। एव। यजस्व। तन्वं। सुऽजात ॥ ६॥

हे देव द्योतमानाग्ने त्वं दिवि द्युलोके स्थितान्देवानिंद्रादीन् स्वयमात्मनैव यजस्व। पाकः पक्तव्यप्रज्ञोऽप्रचेता अप्रकृष्टज्ञानो मनुष्यस्ते तव किं कृणवत्। किं करोति। त्वयानधिष्ठितः किंचिदपि न जानातीत्यर्थः। किंच हे देव त्वमृतुभिः कालविशेषैर्देवान्यथायज इष्टवानसि एवैवं हे सुजात शोभनजन्मन्नग्ने तन्वमात्मानमपि यजस्व ॥

॥ अथ सप्तमी ॥

भवा नो अग्नेऽवितोत गोपा भवा वयस्कृदुत नो वयोधाः।
रास्वा च नः सुमहो हव्यदातिं त्रास्वोत नस्तन्वोऽअप्रयुच्छन् ॥ ७॥

भव। नः। अग्ने। अविता। उत। गोपाः। भव। वयःऽकृत्। उत। नः। वयःऽधाः।
रास्व। च। नः। सुऽमहः। हव्यऽदातिं। त्रास्व। उत। नः। तन्वः। अप्रऽयुच्छन्॥ ७॥

हे अग्ने त्वं नोऽस्माकमविताहृष्टभयेभ्यो रक्षको भव। भूयाः। उतापि च गोपा अदृष्टभयेभ्यो गोप्ता रक्षको भव। उतापि च वयस्कृदन्नस्य कर्ता भव। वयोधा अन्नस्य दाता भव। हे सुमहः सुष्ठु पूजनीयाग्ने त्वं स्वभूतां हव्यदातिं हविषो दातिं नोऽस्मभ्यं रास्व च। प्रयच्छ। उतापि च नोऽस्माकं स्वभूतास्तन्वः शरीराण्यप्रयुच्छन् अप्रमाद्यन् त्रास्व। पालय ॥

॥ इति सप्तमस्य षष्ठे द्वितीयो वर्गः ॥

प्र केतुनेति नवर्चमष्टमं सूक्तं त्रैष्टुभं। त्वष्टृपुत्रस्त्रिशिरा नामर्षिः। आदितः षडाग्नेय्यस्ततस्तिस्र ऐंद्र्यः। तथा चानुक्रांतं। प्र केतुना नव त्रिशिरास्त्वाष्ट्रस्तृचोऽंत्य ऐंद्र इति। आदितः षण्णां प्रातरनुवाकाश्विनशस्त्रयोराग्नेयक्रतावुक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति।
दिवश्चिदंताँ उपमाँ उदानळपामुपस्थे महिषो ववर्ध ॥ १॥

प्र। केतुना। बृहता। याति। अग्निः। आ। रोदसी इति। वृषभः। रोरवीति।
दिवः। चित्। अंतान्। उपऽमान्। उत्। आनट्। अपां। उपऽस्थे। महिषः। ववर्ध॥ १॥

अग्निर्बृहता महता केतुना प्रज्ञानेन युक्तः सन् आ इदानीं रोदसी द्यावापृथिव्यौ प्र याति । प्रकर्षेण गच्छति । किंच देवानामाह्वानकाले वृषभ इव रोरवीति । अत्यर्थं शब्दं करोति । दिवश्चित् द्युलोकस्याप्यंतानवसानानुपमान् समीपांश्च प्रदेशान् ज्वलनात्मनादित्यात्मना वा स्थित उदानट् । ऊर्ध्वं व्याप्नोति । अपां वृष्टिलक्षणानामुदकानामुपस्थ उपस्थानेऽंतरिक्षे वैद्युतात्मना महिषो महान्ववर्ध । वर्धते ॥

॥ अथ द्वितीया ॥

मुमोद गर्भो वृषभः ककुद्मानस्रेमा वत्सः शिमीवाँ अरावीत् ।
स देवतात्युद्यतानि कृण्वन्स्वेषु क्षयेषु प्रथमो जिगाति ॥२॥

मुमोद । गर्भः । वृषभः । ककुत्ऽमान् । अस्रेमा । वत्सः । शिमीऽवान् । अरावीत् ।
सः । देवऽताति । उत्ऽयतानि । कृण्वन् । स्वेषु । क्षयेषु । प्रथमः । जिगाति ॥२॥

गर्भो द्यावापृथिव्योरंतर्गतो वृषभः कामानां वर्षिताग्निः ककुद्मान् उन्नततेजस्को मुमोद । मोदते । किंच । अस्रेमा । प्रशस्यनामैतत् । प्रशस्तो वत्सो नक्तोषसोर्वत्सभूतः सायंप्रातराहुत्युपजीवनात् शिमीवान् हविर्वहनदेवाह्वानादिकर्मवानग्निरराबीत् । देवाह्वानादिशब्दं करोति । सोऽग्निर्देवताति यज्ञ उद्यतान्युद्यमान्युत्साहकर्माणि कृण्वन् कुर्वन् स्वेषु क्षयेष्वात्मीयेष्वाहवनीयादिस्थानेषु स्थितः प्रथमो देवानां स्थानेषु मुख्यो जिगाति । गच्छति ॥

॥ अथ तृतीया ॥

आ यो मूर्धानं पित्रोररब्ध न्यध्वरे दधिरे सूरो अर्णः ।
अस्य पत्मन्नरुषीरश्वबुध्ना ऋतस्य योनौ तन्वो जुषंत ॥३॥

आ । यः । मूर्धानं । पित्रोः । अरब्ध । नि । अध्वरे । दधिरे । सूरः । अर्णः ।
अस्य । पत्मन् । अरुषीः । अश्वऽबुध्नाः । ऋतस्य । योनौ । तन्वः । जुषंत ॥३॥

योऽग्निः पित्रोर्मातापितृभूतयोर्द्यावापृथिव्योर्मूर्धानमारब्ध । स्वतेजोभिरारभते । यद्वा । मातापितृभूतयोररण्योर्मूर्धानं शिरोवत्प्रधानभूतं मंथनप्रदेशं । आङीषदर्थे । आरब्धेषद्विनस्ति । निर्मथनकालेऽपि दाहेन दग्धुं समर्थः । सूरः सुवीर्यस्याग्नेरर्णो गमनशीलं तेजोऽध्वरे यज्ञे नि दधिरे । यष्टारो नियमेन

धारयंति । अस्याग्नेः पत्मन् पतनेऽरुषीरारोचमाना ऋतस्य यज्ञस्य योनौ स्थानेऽश्वबुध्ना व्याप्तमूला अशनबंधना वा । हविराहारान्विता इत्यर्थः । तन्वः स्वदीयास्तनूर्जुषंत । कवयः सेवंते ॥

॥ अथ चतुर्थी ॥

उष उषो हि वसो अग्रमेषि त्वं यमयोरभवो विभावा ।
ऋताय सप्त दधिषे पदानि जनयन्मित्रं तन्वे३स्वायै ॥४॥
उषःऽउषः । हि । वसो इति । अग्रं । एषि । त्वं । यमयोः । अभवः । विभाऽवा ।
ऋताय । सप्त । दधिषे । पदानि । जनयन् । मित्रं । तन्वे । स्वायै ॥४॥

हे वसो स्वेन तेजसा सर्वस्याच्छादयितर्वसुमन्वा प्रशस्य वाग्ने त्वमुष उषः सर्वस्या एवोषसोऽग्रं पूर्वमेषि । प्राप्नोषि । अपि च । यमयोर्युग्मयोः परस्परमवियुक्तयोरहोरात्रयोर्विभावा दीप्तिमानभवः । भवसि । तन्वे स्वाया आत्मीयाच्छरीरान्मित्रमादित्यं जनयन् उत्पादयन् सप्त पदानि सप्तसंख्याकानि धिष्ण्यादिस्थानान्यृताय यज्ञार्थं दधिषे । धारयसि ॥

॥ अथ पंचमी ॥

भुवश्चक्षुर्मह ऋतस्य गोपा भुवो वरुणो यदृताय वेषि ।
भुवो अपां नपाज्जातवेदो भुवो दूतो यस्य हव्यं जुजोषः ॥५॥
भुवः । चक्षुः । महः । ऋतस्य । गोपाः । भुवः । वरुणः । यत् । ऋताय । वेषि ।
भुवः । अपां । नपात् । जातऽवेदः । भुवः । दूतः । यस्य । हव्यं । जुजोषः ॥५॥

महो महत ऋतस्य यज्ञस्य हे अग्ने त्वं चक्षुरिव प्रकाशको भुवः । भवसि । गोपा यज्ञस्य रक्षकस्त्वमेव भवसि । यद्यदृताय सोमरसलक्षणस्योदकस्यादानार्थं वरुण आदित्यो वेषि गच्छसि तदा त्वमेव भुवो । भवसि । हे जातवेदो जातप्रज्ञाग्नेऽपां वृष्टिलक्षणानामुदकानां नपात् पौत्रस्त्वमेव भुवो । भवसि । अद्भ्यो हि मेघो जायते मेघादग्निर्विद्युद्रूपो जायत इत्यपां पौत्रत्वमुच्यते । यस्य यजमानस्य हव्यं हविर्जुषोषः सेवसे तस्य दूतो भुवः । भवसि ॥

॥ इति सप्तमस्य षष्ठे तृतीयो वर्गः ॥

दर्शपूर्णमासयोराग्नेयस्य याज्या भुवो यज्ञस्येत्येषा। सूचितं च। तासां याज्यानुवाक्या अग्निर्मूर्धा भुवो यज्ञस्य। आ० १.६.। इति ॥ आग्नेयी काचित्काम्येष्टिः। तस्यामेषैव याज्या। सूचितं च। आग्नेय्या उत्तरे नित्ये मूर्धन्वतः। आ० २.१०.। इति ॥

॥ सैषा सूक्ते षष्ठी ॥

भुवो॑ यज्ञस्य॒ रज॑सश्च ने॒ता यत्रा॑ नि॒युद्भिः॒ सच॑से शि॒वाभिः॑।

दि॒वि मू॒र्धानं॑ दधिषे स्व॒र्षां जि॒ह्वाम॑ग्ने चकृषे हव्य॒वाह॑म् ॥६॥

भुवः॑। य॒ज्ञस्य॑। रज॑सः। च॒। ने॒ता। यत्र॑। नि॒युत्ऽभिः॑। सच॑से। शि॒वाभिः॑।

दि॒वि। मू॒र्धानं॑। द॒धि॒षे॒। स्वः॒ऽसाम्। जि॒ह्वाम्। अ॒ग्ने॒। च॒कृ॒षे॒। ह॒व्य॒ऽवाह॑म् ॥६॥

हे अग्ने त्वं यत्र यस्मिन्नंतरिक्षे शिवाभिः कल्याणीभिर्नियुद्भिर्नियुत्संज्ञकाभिरश्वजातिभिः संबद्धं वायुं सचसे संगच्छसे तस्मिन्नंतरिक्षे यज्ञस्य रजसश्चोदकस्य च नेता प्रापयिता भुवः। भवसि। अग्निर्वा इतो वृष्टिं समीरयतीति श्रुतेः। किंच दिवि द्युलोके मूर्धानं शिरोवत्प्रधानभूतं स्वर्षां सर्वस्य संभक्तारमादित्यं दधिषे। हविर्वहनद्वारेण धारयसि। हे अग्ने त्वं जिह्वां ज्वालां हव्यवाहं हविषो वोढ्रीं चकृषे। करोषि ॥

॥ अथ सप्तमी ॥

अ॒स्य त्रि॒तः क्रतु॑ना व॒व्रे अ॒न्तरि॒च्छन्धी॒तिं पि॒तुरे॒वैः पर॑स्य।

स॒च॒स्यमा॑नः पि॒त्रोरु॒पस्थे॑ जा॒मि ब्रु॑वा॒ण आयु॑धानि वेति ॥७॥

अ॒स्य। त्रि॒तः। क्रतु॑ना। व॒व्रे। अ॒न्तः। इ॒च्छन्। धी॒तिम्। पि॒तुः। ए॒वैः। पर॑स्य।

स॒च॒स्यमा॑नः। पि॒त्रोः। उ॒पऽस्थे॑। जा॒मि। ब्रु॒वा॒णः। आयु॑धानि। वे॒ति॒ ॥७॥

अस्मिंस्तृच इंद्र इममर्थं ब्रवीति। हे त्रित सर्वेषामायुधानि वेत्ता त्वं त्वष्टृपुत्रस्य त्रिशिरसो वधार्थं मम साहाय्यं कुर्विंतींद्रेणैवं पृष्टस्त्रितः स्ववीर्यवृद्ध्यर्थं यज्ञभागं वव्रे। स चेंद्रस्तस्मै पाणिप्रक्षालनार्थं जलं यज्ञभागं च दत्तवान्। अनेन यज्ञभागेन वृद्धवीर्यस्त्रित एतत्संज्ञक ऋषिरेवैरात्मनो रक्षणैर्युक्तोऽन्तर्यज्ञस्य मध्ये धीतिं भागमिच्छन् परस्योत्कृष्टस्य पितुः सर्वस्य जगतः पालयितुरस्येंद्रस्य क्रतुना त्रिशिरसो मम वधार्थं साहाय्यभूतेन कर्मणा निमित्तेन वव्रे। सखायं वृतवान्। किंच। पित्रोर्मातापितृभूतयोर्द्यावापृथिव्योरुपस्थे समीपस्थे यज्ञे सचस्यमान

त्रृत्विग्भिः सेव्यमानस्त्रितो जामि योग्यमिंद्रस्यानुरूपं स्तोत्रं ब्रुवाण इंद्रस्य बलवृद्ध्यर्थमुच्चारयन् आयुधानि स्वभूतानि वेत्ति । त्वष्टृपुत्रस्य मम वधार्थमागच्छति ॥

॥ अथाष्टमी ॥

स पित्र्याण्यायुधानि विद्वानिंद्रेषित आप्त्यो अभ्ययुध्यत् ।
त्रिशीर्षाणं सप्तरश्मिं जघन्वान् त्वाष्ट्रस्य चिन्निः ससृजे त्रितो गाः ॥८॥

सः । पित्र्याणि । आयुधानि । विद्वान् । इंद्रऽइषितः । आप्त्यः । अभि । अयुध्यत् ।
त्रिऽशीर्षाणं । सप्तऽरश्मिं । जघन्वान् । त्वाष्ट्रस्य । चित् । निः । ससृजे । त्रितः । गाः ॥८॥

आप्त्य आप्तस्य पुत्रोऽपां पुत्रो वा । तकारोपजनश्छांदसः । स त्रितः पित्र्याणि स्वपितृसंबंधीन्यायुधानि विद्वान् जानन् इंद्रेषितस्त्रिशिरसा मया सह युद्धार्थमिंद्रेण प्रेषितः सन् अभ्ययुध्यत् । आभिमुख्येन युद्धवान् । तदनंतरं सप्तरश्मिं शत्रुनियमनार्थं सप्तप्रग्रहहस्तं । यद्वा । सप्तरश्मिरादित्यः । तत्सदृशं त्रिशीर्षाणं त्रिशिरस्कं मां जघन्वान् हतवान् । मूर्छितं कृतवानित्यर्थः । किंच त्रितस्त्वाष्ट्रस्य चित् त्वष्टृपुत्रस्य ममापि गाः पशून्निः ससृजे । विसृष्टवान् । अपहृतवानित्यर्थः ॥

॥ अथ नवमी ॥

भूरीदिंद्र उदिनक्षंतमोजोऽवाभिनत्सत्पतिर्मन्यमानं ।
त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क् ॥९॥

भूरि । इत् । इंद्रः । उत्ऽइनक्षंतं । ओजः । अव । अभिनत् । सत्ऽपतिः । मन्यमानं ।
त्वाष्ट्रस्य । चित् । विश्वऽरूपस्य । गोनां । आऽचक्राणः । त्रीणि । शीर्षा । परा ।
वर्गिति वर्क् ॥९॥

सत्पतिः सतां पालक इंद्रो भूरीद्बह्वेव पूर्वतुल्यमतिरिक्तं वौजो बलमुदिनक्षंतं व्याप्नुवंतं मन्यमानं शूरमित्यात्मानं चिंतयंतं । यद्वा मन्यतिर्दीप्तिकर्मा क्रोधकर्मा वा । दीप्यमानं क्रुध्यंतं वा त्वष्टृपुत्रं मामवाभिनत् । वज्रेण विदारितवान् । विदार्य त्वाष्ट्रस्य चित् त्वष्टृपुत्रस्यापि गोनां गवां स्वामिन इति शेषः । विश्वरूपस्य मम त्रीणि शीर्षा शीर्षाण्याचक्राण आ समंताच्छब्दं कुर्वन् परा वर्क् ।

पराङ्मुखस्य वृक्णवान्। छिन्नवानित्यर्थः। ईदृशं भावि वस्तु विश्वरूपः स्वप्नांतेऽनेन तृचेन दृष्टवान् ॥

॥ इति सप्तमस्य षष्ठे चतुर्थो वर्गः ॥

आपो हीति नवर्चं नवमं सूक्तं। अंबरीषस्य राज्ञः पुत्रः सिंधुद्वीप ऋषिस्त्वष्टृपुत्रस्त्रिशिरा वा। इदमाप इत्यादिके द्वे अनुष्टुभौ ईशाना इति वर्धमाना। आपः पृणीतेति प्रतिष्ठा। शिष्टा गायत्र्यः। आपो देवता। तथा चानुक्रांतं। आपो हि सिंधुद्वीपो वांबरीष आपं गायत्रं ह्यनुष्टुबंतं पंचमी वर्धमाना सप्तमी प्रतिष्ठेति॥ गतः सूक्तविनियोगः। आग्निमारुत आपो हि ष्ठेत्याद्यास्तिस्रः। सूचितं च। आपो हि ष्ठेति तिस्रो वियतमप उपस्पृशन्। आ० ५.२०.। इति ॥

॥ तत्र प्रथमा ॥

आपो॒ हि ष्ठा म॑यो॒भुव॒स्ता न॑ ऊ॒र्जे द॑धातन। म॒हे रणा॑य॒ चक्ष॑से ॥१॥

आपः॑। हि। स्थ। म॒यः॒ऽभुवः॑। ताः। नः॒। ऊ॒र्जे। द॒धा॒त॒न। म॒हे। रणा॑य। चक्ष॑से॥१॥

हि यस्मात्कारणादापो या यूयं मयोभुवः सुखस्य भावयित्र्यः स्थ भवथ तास्तादृश्यो यूयं नोऽस्मानूर्जेऽन्नाय दधातन। धत्त। अन्नप्राप्तियोग्यानस्मान् कुरुत। अन्नमस्मभ्यं दत्तेत्यर्थः। महे महते रणाय रमणीयाय चक्षसे दर्शनाय सम्यग्ज्ञानाय च धत्त। अस्मान् सम्यग्ज्ञानं प्रति योग्यान्कुरुतेत्यर्थः ॥

॥ अथ द्वितीया ॥

यो वः॑ शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयते॒ह नः॑। उ॒श॒तीरि॑व मा॒तरः॑ ॥२॥

यः। व॒ः। शि॒वऽत॑मः। रसः॑। तस्य॑। भा॒ज॒य॒त॒। इ॒ह। नः॒। उ॒श॒तीःऽइ॑व। मा॒तरः॑॥२॥

हे आपः वो युष्माकं स्वभूतो यो रसः शिवतमः सुखतम इहास्मिँल्लोके तस्य तं रसं नोऽस्मान् भाजयत। सेवयत। उपयोजयतेत्यर्थः। तत्र दृष्टांतः। उशतीरिव। उशत्य इव पुत्रसमृद्धिं कामयमाना मातरः स्तन्यं रसं यथा भाजयंति प्रापयंति तद्वत् ॥

॥ अथ तृतीया ॥

तस्मा॒ अरं॑ गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ। आपो॑ ज॒नय॑था च नः ॥३॥

तस्मै॑। अरं॑। ग॒मा॒म॒। व॒ः। यस्य॑। क्षया॑य। जिन्व॑थ। आपः॑। ज॒नय॑थ। च॒। नः॒ ॥३॥

हे आपो यूयं यस्य पापस्य क्षयाय विनाशायास्माञ्जिन्वथ प्रीणयथ तस्मै तादृशाय पापक्षयायारं क्षिप्रं वो युष्मान् गमाम । गमयाम । वयं शिरसि प्रक्षिपामेत्यर्थः । यद्वा यस्यान्नस्य क्षयाय निवासार्थं यूयमोषधीर्जिन्वथ तर्पयथ तस्मै तदन्नमुद्दिश्य वयमरमलं पर्याप्तं यथा भवति तथा वो युष्मान्गमाम । गच्छाम । किंच हे आपो नोऽस्माञ्जनयथ च । पुत्रपौत्रादिजनने प्रयोजयतेत्यर्थः ॥

॥ अथ चतुर्थी ॥

शं नो देवीरभिष्टय आपो भवंतु पीतये । शं योरभि स्रवंतु नः ॥४॥

शं । नः । देवीः । अभिष्टये । आपः । भवंतु । पीतये । शं । योः । अभि । स्रवंतु । नः ॥४॥

नोऽस्माकं पापापनोदद्वारेण शं सुखं भवंतु देवीर्दिव्य आपः । अभिष्टयेऽस्मद्यज्ञाय भवंतु । यज्ञांगभावाय च भवंत्वित्यर्थः । पीतये पानाय च भवंतु । तथा शमुत्पन्नानां रोगाणां शमनं योर्यावनमनुत्पन्नानां पृथक्करणं च कुर्वंतु । अपि च । नोऽस्माकमभ्युपरि स्रवंतु । शुद्ध्यर्थं सिंचंतु ॥

॥ अथ पंचमी ॥

ईशाना वार्याणां क्षयंतीश्चर्षणीनां । अपो याचामि भेषजं ॥५॥

ईशानाः । वार्याणां । क्षयंतीः । चर्षणीनां । अपः । याचामि । भेषजं ॥५॥

वार्याणां वारिप्रभवानां व्रीहियवादीनां यद्वा वरणीयानां धनानामीशाना ईश्वराश्चर्षणीनां मनुष्याणां क्षयंतीर्निवासयित्रीरप उदकानि भेषजं । सुखनामैतत् । पापापनोदनं सुखं याचामि । अहं प्रार्थये ॥

॥ अथ षष्ठी ॥

अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा । अग्निं च विश्वशंभुवं ॥६॥

अप्ऽसु । मे । सोमः । अब्रवीत् । अंतः । विश्वानि । भेषजा । अग्निं । च । विश्वऽशंभुवं ॥६॥

॥ अथ सप्तमी ॥

आपः पृणीत भेषजं वरूथं तन्वे३ मम । ज्योक् च सूर्यं दृशे ॥७॥

आपः । पृणीत । भेषजं । वरूथं । तन्वे । मम । ज्योक् । च । सूर्यं । दृशे ॥७॥

॥ अथाष्टमी ॥

इदमापः प्र वहत यत्किं च दुरितं मयि ।
यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं ॥८॥

इदं । आपः । प्र । वहत । यत् । किं । च । दुःऽइतं । मयि ।
यत् । वा । अहं । अभिऽदुद्रोह । यत् । वा । शेपे । उत । अनृतं ॥८॥

॥ अथ नवमी ॥

आपो अद्यान्वचारिषं रसेन समगस्महि ।
पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥९॥

आपः । अद्य । अनु । अचारिषं । रसेन । सं । अगस्महि ।
पयस्वान् । अग्ने । आ । गहि । तं । मा । सं । सृज । वर्चसा ॥९॥

अप्सु मे सोमो अब्रवीदित्यादिकाश्चतस्र ऋचः प्रथमाष्टके द्वितीयाध्याये विनियोगपुरःसरं व्याख्याताः ॥

॥ इति सप्तमस्य षष्ठे पंचमो वर्गः ॥

ओ चिदिति चतुर्दशर्चं दशमं सूक्तं । अत्रानुक्रम्यते । ओ चित्षळूना वैवस्वतयोर्यमयम्योः संवादः षष्ठ्ययुग्भिर्यमी मिथुनार्थं यमं प्रोवाच स तां नवमीयुग्भिरनिच्छन् प्रत्याचष्ट इति । ततः षष्ठ्यां प्रथमातृतीयाद्ययुक्षु विवस्वतः पुत्री यम्यृषिर्यमो देवता । यस्य वाक्यं स ऋषिर्या तेनोच्यते सा देवतेति न्यायात् । तथा नवम्यां द्वितीयाचतुर्थीप्रभृतिषु युक्षु वैवस्वतो यम ऋषिर्यमी देवता । अनादेशपरिभाषया त्रिष्टुप् । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् ।
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥१॥

ओ इति । चित् । सखायं । सख्या । ववृत्यां । तिरः । पुरु । चित् । अर्णवं । जगन्वान् ।
पितुः । नपातं । आ । दधीत । वेधाः । अधि । क्षमि । प्रऽतरं । दीध्यानः ॥१॥

अत्रास्मिन्सूक्ते वैवस्वतयोर्यमयम्योः संवाद उच्यते । अस्यामृचि यमं प्रति यमी प्रोवाच । तिरोऽन्तर्हितमप्रकाशमानं । निर्जनप्रदेशमित्यर्थः । पुरु चिद्बह्वपि विस्तीर्णं चार्णवं समुद्रैकदेशमवांतरद्वीपं जगन्वान् । गतवती यमी । चिदिति पूजार्थे । पूजितमिष्टं । श्रेष्ठमित्यर्थः । सखायं गर्भवासादारभ्य सखीभूतं यमं सख्या सख्याय स्त्रीपुरुषसंपर्कजनितमित्रत्वाय ओ ववृत्यां । आवर्तयामि । आभिमुख्येन स्थित्वा लज्जां परित्यज्य त्वत्संभोगं करोमीत्यर्थः । धर्मस्य त्वरिता गतिरिति न्यायेन कामस्य त्वरितत्वात् । अपि च पितुरावयोर्भविष्यतः पुत्रस्य पितृभूतस्य तवार्थायाधि क्षमि । अधि पृथिव्यां । पृथिवीस्थानीये ममोदर इत्यर्थः । प्रतरं प्रकृष्टं । सर्वगुणोपेतमित्यर्थः । नपातं गर्भलक्षणमपत्यं वेधा विधाता प्रजापतिर्दीध्यान आवयोरनुरूपस्य पुत्रस्य जननार्थमावां ध्यायन् आदधीत । प्रजापतिर्धाता गर्भं दधातु त इत्युक्तत्वात् ॥

॥ अथ द्वितीया ॥

न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति ।
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन् ॥२॥
न । ते । सखा । सख्यं । वष्टि । एतत् । सऽलक्ष्मा । यत् । विषुऽरूपा । भवाति ।
महः । पुत्रासः । असुरस्य । वीराः । दिवः । धर्तारः । उर्विया । परि । ख्यन् ॥२॥

यम आत्मानं परोक्षीकृत्य यमीं प्रत्युवाच । हे यमि ते तव सखा गर्भवासलक्षणेन सखीभूतो यम एतदीदृशं त्वयोक्तं स्त्रीपुरुषलक्षणं सख्यं न वष्टि । न कामयते । यद्यस्मात्कारणाद्यमी सलक्ष्मा समानयोनित्वलक्षणा विषुरूपा भगिनीत्वाद्विषमरूपा भवाति भवति तस्मान्न वष्टीत्यर्थः । इदानीं तिरः पुरू चिदर्णवं जगन्वानित्यस्य प्रतिवचनमुच्यते । महो महतोऽसुरस्य प्राणवतः प्रज्ञावतो वा प्रजापतेः पुत्रासः पुत्रभूता वीराः । वीरो वीरयत्यमित्रान्वेतेर्वा स्याद्गतिकर्मणो वीरयतेर्वा । नि° १.७. । इति निरुक्तं । शत्रूणां विविधमीरयितारो धर्तारो धारयितारो दिवो द्युलोकस्य । प्रदर्शनमेतत् । द्युप्रभृतीनां लोकानामित्यर्थः ॥

॥ अथ तृतीया ॥

उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य ।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्व१मा विविश्याः ॥३॥

उशंति । घ । ते । अमृतासः । एतत् । एकस्य । चित् । त्यजसं । मर्त्यस्य ।
नि । ते । मनः । मनसि । धायि । अस्मे इति । जन्युः । पतिः । तन्वं । आ । विविश्याः ॥ ३ ॥

पुनरपि यमी यमं प्रत्युवाच । घेति निपातोऽप्यर्थे । हे यम ते प्रसिद्धा अमृतासः प्रजापत्यादयोऽपि देवा एतदीदृशं शास्त्रेणागम्यत्वेनोक्तं त्यजसं । त्यज्यते परस्मै प्रदीयत इति त्यजसं दुहितृभगिन्यादिस्त्रीजातमुशंति । कामयंते । एकस्य चित् सर्वस्य जगतो मुख्यस्यापि प्रजापत्यादेः स्वदुहितृभगिन्यादीनां संबंधोऽस्तीति शेषः । अतः कारणात्ते तव मनश्चित्तमस्मे अस्माकं । ममेत्यर्थः । मनसि चित्ते नि धायि । निधीयतां । अहं त्वां कामये त्वं मामपि कामयस्वेत्यर्थः । अपि च जन्युरिति लुप्तोपममेतत् । जन्युरिव यथा जनयिता प्रजापतिः पतिर्भर्ता भूत्वा स्वदुहितुः शरीरं संभोगेनाविष्टवान् तथा त्वमपि मम पतिर्भूत्वा तन्वं मदीयं शरीरमा विविश्याः । संभोगेनाविश । योनौ प्रजननप्रक्षेपोपगूहचुंबनादिना मां संभुंक्ष्वेत्यर्थः ॥

॥ अथ चतुर्थी ॥

न यत्पुरा चकृमा कद्ध नूनमृता वदंतो अनृतं रपेम ।
गंधर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥ ४ ॥

न । यत् । पुरा । चकृम । कत् । ह । नूनं । ऋता । वदंतः । अनृतं । रपेम ।
गंधर्वः । अप्ऽसु । अप्या । च । योषा । सा । नः । नाभिः । परमं । जामि । तत् । नौ ॥ ४ ॥

यमो यमीं पुनर्ब्रूते । पुरा पूर्वं प्रजापतेर्यदगम्यागमनमपरिमितसामर्थ्योपेतत्वात्कृतं तथा वयं न चकृम । नाकुर्म । वयमृतानि सत्यानि वदंतो ब्रुवंतोऽनृतमसत्यं कद्ध कदा खलु नूनं निश्चितं रपेम । वदेम । न कदाचिदपीत्यर्थः । अगम्यागमनं न कुर्म इति यावत् । अपि च अप्सु । अंतरिक्षनामैतत् । अंतरिक्षे स्थितो गंधर्वः । गवां रश्मीनामुदकानां वा धारयितादित्योऽप्यांतरिक्षस्था सा प्रसिद्धा योषादित्यस्य भार्या सरण्यूश्च नो नावावयोर्नाभिरुत्पत्तिस्थानं । मातापितरावित्यर्थः । तत्तस्मात्कारणान्नावावयोर्जामि बांधवमुत्कृष्टं । एवं सत्यावयोरगम्यागमनरूपत्वात्कर्तुमयुक्तं तस्मादेतन्न करोमीत्यभिप्रायः ॥

॥ अथ पंचमी ॥

गर्भे नु नौ जनिता दंपती कर्देवस्त्वष्टा सविता विश्वरूपः ।
नकिरस्य प्र मिनंति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥ ५ ॥

गर्भे। नु। नौ। जनिता। दंपती इति दंऽपती। कः। देवः। त्वष्टा। सविता। विश्वऽरूपः।
नकिः। अस्य। प्र। मिनंति। व्रतानि। वेद। नौ। अस्य। पृथिवी। उत। द्यौः ॥५॥

त्वष्टा रूपाणां कर्ता सविता सर्वेषां शुभाशुभस्य प्रेरको विश्वरूपः सर्वात्मको देवो दानादिगुणयुक्तो जनिता जनयिता प्रजापतिर्गर्भे नु गर्भावस्थायामेव नावावां दंपती जायापती कः। कृतवान् एकोदरे सहवासित्वात्। अस्य प्रजापतेर्व्रतानि कर्माणि नकिः प्र मिनंति। न केचित्प्रहिंसंति। न लोपयंतीत्यर्थः। अतः कारणाद्गर्भावस्थायामेवावयोः प्रजापतिकृते दंपतित्वे सति संभोगं कुर्वित्यर्थः। अपि च नावावयोरस्येदं मातुरुदरे सहवासजनितं दंपतित्वं पृथिवी भूमिर्वेद। जानाति। उतापि च द्यौर्द्युलोकोऽपि जानाति ॥

॥ इति सप्तमस्य षष्ठे षष्ठो वर्गः ॥

॥ अथ षष्ठी ॥

को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत्।
बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥६॥
कः। अस्य। वेद। प्रथमस्य। अह्नः। कः। ईं। ददर्श। कः। इह। प्र। वोचत्।
बृहत्। मित्रस्य। वरुणस्य। धाम। कत्। ऊं इति। ब्रवः। आहनः। वीच्या। नॄन् ॥६॥

प्रथमस्याह्नः संबंध्यस्येदमन्योन्यसंगमनं को वेद। जानाति। प्रथमेऽहनि यत्क्रियते तदनुमानमाश्रित्य न कश्चिदपि ज्ञातुं शक्नोतीत्यर्थः। इहास्मिन्प्रदेशे प्रत्यक्षतः क ईमिदं संगमनं ददर्श। पश्यति। कः प्र वोचत्। प्रख्यापयति। न कोऽपीत्यर्थः। मित्रस्य वरुणस्य मित्रावरुणयोर्बृहन्महद्धाम स्थानमहोरात्रं यदस्ति तत्र नॄन् मनुष्यान् वीच्या नरकेण हे आहन आहंतर्मर्यादया हिंसितः। स्वकृतशुभाशुभकर्मापेक्षया मनुष्यादिप्राणिनां नरकपातेन स्वर्गप्रापणेन निग्रहानुग्रहयोः कर्तरित्यर्थः। एवंभूत हे यम त्वं कदु ब्रवः। किं वा ब्रवीषि ॥

॥ अथ सप्तमी ॥

यमस्य मा यम्यं१ काम आगन्त्समाने योनौ सहशेय्याय।
जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा ॥७॥

यमस्यं । मा । यम्यं । कामः । आ । अगन् । समाने । योनौ । सहऽशेय्याय ।
जायाऽइंव । पत्ये । तन्वं । रिरिच्यां । वि । चित् । वृहेव । रथ्याऽइव । चक्रा ॥७॥

यमस्य तव कामोऽभिलाषो यम्यं यमी मा मां प्रत्यागन् आगच्छतु । ममोपरि तव यमस्य संभोगेच्छा जायतामित्यर्थः । किमर्थं । समाने योनावेकस्मिन् स्थाने शय्याख्ये सहशेय्याय सहशयनार्थं । तदनंतरं पूर्णमनोरथा सती जायेव पत्ये यथा भार्या पत्युरर्थाय परया प्रीत्या विश्वस्ता सती रतिकामा स्वशरीरं प्रकाशयति एवं तन्वमात्मीयं शरीरं रिरिच्यां । विविच्यां । त्वदर्थं प्रकाशयेयमित्यर्थः । किंच । चिदिति पूरणः । वि वृहेव । वृह उद्यमने । धर्मार्थकामान्विविधमुद्यच्छावः । तत्र दृष्टांतः । रथ्येव चक्रा । रथस्यावयवभूते चक्रे यथा रथमुद्यच्छतस्तद्वत् ॥

॥ अथाष्टमी ॥

न तिष्ठंति न नि मिषंत्येते देवानां स्पश इह ये चरंति ।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥८॥

न । तिष्ठंति । न । नि । मिषंति । एते । देवानां । स्पशः । इह । ये । चरंति ।
अन्येन । मत् । आहनः । याहि । तूयं । तेन । वि । वृह । रथ्याऽइव । चक्रा ॥८॥

यम्या प्रख्यातो यमः पुनराह । इहास्मिँल्लोके देवानां संबंधिनो ये स्पशोऽहोरात्रादयश्चाराश्चरंति सर्वेषां शुभाशुभलक्षणकर्मप्रत्यवेक्षणार्थं परिभ्रमंत्येते चाराः क्षणमात्रमपि चरणव्यापाररहिता न तिष्ठंति । न नि मिषंति । मेषणं न कुर्वंति । शुभमशुभं वा यः करोति तं निरीक्षंते चेत्यर्थः । हे आहनो ममापहंत्रि असह्यभाषणेन दुःखयित्रि त्वं मत् मत्तोऽन्येन त्वत्सदृशेन सह तूयं क्षिप्रं याहि । संगच्छ । गत्वा च तेन वि वृह । धर्मार्थकामानुद्यच्छ । तत्र दृष्टांतः । रथ्येव चक्रा । यथा रथावयवभूते चक्रे रथमुद्यच्छतस्तद्वत् ॥

॥ अथ नवमी ॥

रात्रीभिरस्मा अहभिर्दशस्येत्सूर्यस्य चक्षुर्मुहुरुन्मिमीयात् ।
दिवा पृथिव्या मिथुना सबंधू यमीर्यमस्य बिभृयादजामि ॥९॥

रात्रीभिः । अस्मै । अहऽभिः । दशस्येत् । सूर्यस्य । चक्षुः । मुहुः । उत् । मिमीयात् ।
दिवा । पृथिव्या । मिथुना । सबंधू इति सऽबंधू । यमीः । यमस्य । बिभृयात् । अजामि ॥९॥

रात्रिभिरहभिरहोरात्रयोरस्मै यमाय कल्पितं भागं सर्वो यजमानो दशस्येत्। प्रयच्छतु। सूर्यस्य संबंधि चक्षुस्तेजो मुहुर्मुहुरस्मै यमायोन्मिमीयात्। उदेतु। दिवा पृथिव्या द्यावापृथिवीभ्यां सह मिथुना मिथुनौ सबंधू समानबंधू अहोरात्रे अस्मै यमाय। एतज्ज्ञात्वेयं यमीर्यमस्याजाम्यभ्रातरं बिभृयात्। धारयतु। यत्नेन परिगृह्णात्वित्यर्थः ॥

॥ अथ दशमी ॥

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥१०॥
आ। घ। ता। गच्छान्। उत्ऽतरा। युगानि। यत्र। जामयः। कृणवन्। अजामि।
उप। बर्बृहि। वृषभाय। बाहुं। अन्यं। इच्छस्व। सुऽभगे। पतिं। मत् ॥१०॥

यत्र येषु कालेषु जामयो भगिन्योऽजाम्यभ्रातरं पतिं कृणवन् करिष्यंति ता तान्युत्तराणि युगानि कालविशेषा आ गच्छन्। आ गमिष्यंति। घेति पूरणः। यस्मादेवं तस्माद्धे सुभगे त्वमिदानीं मत् मत्तोऽन्यं पतिं भर्तारमिच्छस्व। कामयस्व। तदनंतरं वृषभाय तव योनौ रेतः सेक्त्रे पुरुषायात्मीयं बाहुमुप बर्बृहि। शयनकाल उपबर्हणं कुरु ॥

॥ इति सप्तमस्य षष्ठे सप्तमो वर्गः ॥

॥ अथैकादशी ॥

किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात्।
कामंमूता बह्वे३तद्रपामि तन्वा मे तन्वं१ सं पिपृग्धि ॥११॥
किं। भ्राता। असत्। यत्। अनाथं। भवाति। किं। ऊं इति। स्वसा। यत्।
निःऽर्ऋतिः। निऽगच्छात्।
कामंऽमूता। बहु। एतत्। रपामि। तन्वा। मे। तन्वं। सं। पिपृग्धि ॥११॥

यमी यमेन प्रत्याख्याता पुनराह। यद्यस्मिन्भ्रातरि सति स्वस्रादिकमनाथं नाथरहितं भवति स भ्राता किमसत्। किं भवति। न भवतीत्यर्थः। किंच यस्यां भगिन्यां सत्यां भ्रातरं निर्ऋतिर्दुःखं निगच्छात् नियमेन गच्छति प्राप्नोति सा स्वसा किमु। किं वा भवति। भ्रातृभगिन्योश्च परस्परं प्रीतिर्येन केनचिदुपायेनावश्यं

कार्येत्यभिप्रायः। साहं काममूता कामेन मूर्छिता सती बहु नानाप्रकारमेतदीदृशमुक्तं वक्ष्यमाणं च रपामि। प्रलपामि। एतज्ज्ञात्वा मे मम तन्वा शरीरेण तन्वं शरीरं सं पिपृग्धि। संपर्चय। संभोगेन संश्लेषय। मां सम्यक् भुंक्ष्वेत्यर्थः॥

॥ अथ द्वादशी ॥

न वा उ ते तन्वा तन्वं१सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात्।
अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत्॥१२॥

न। वै। ऊं इति। ते। तन्वा। तन्वं। सं। पपृच्यां। पापं। आहुः। यः। स्वसारं। निऽगच्छात्।
अन्येन। मत्। प्रऽमुदः। कल्पयस्व। न। ते। भ्राता। सुऽभगे। वष्टि। एतत्॥१२॥

यमो यमीं प्रत्युक्तवान्। हे यमि ते तव तन्वा शरीरेण तन्वमात्मीयं शरीरं न वै सं पपृच्यां। नैव संपर्चयामि। नैवाहं त्वां संभोक्तुमिच्छामीत्यर्थः। यो भ्राता स्वसारं भगिनीं निगच्छात् नियमेनोपगच्छति। संभुंक्त इत्यर्थः। तं पापं पापकारिणमाहुः। शिष्टा वदंति। एतज्ज्ञात्वा हे सुभगे सुष्ठु भजनीये हे यमि त्वं मत् मत्तोऽन्येन त्वद्योग्येन पुरुषेण सह प्रमुदः संभोगलक्षणान्प्रहर्षान्कल्पयस्व। समर्थय। ते तव भ्राता यम एतदीदृशं त्वया सह मैथुनं कर्तुं न वष्टि। न कामयते। नेच्छति॥

॥ अथ त्रयोदशी ॥

बतो बतासि यम नैव ते मनो हृदयं चाविदाम।
अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजाते लिबुजेव वृक्षं॥१३॥

बतः। बत। असि। यम। न। एव। ते। मनः। हृदयं। च। अविदाम।
अन्या। किल। त्वां। कक्ष्याऽइव। युक्तं। परि। स्वजाते। लिबुजाऽइव। वृक्षं॥१३॥

यमी प्रत्युवाच। हे यम त्वं बतो दुर्बलोऽसि। बतेति निपातः खेदानुकंपयोः। अनुकंप्यश्चासि। ते त्वदीयं मनो मनोगतं संकल्पं हृदयं च बुद्धिगतमध्यवसायं च नैवाविदाम। वयं न जानीम एव। मत्तोऽन्या काचित्स्त्री त्वां परि ष्वजाते किल। तत्र दृष्टांतद्वयमुच्यते। कक्ष्येव युक्तं। यथा कक्ष्या रज्जुर्युक्तमात्मना संबद्धमश्वं परिष्वजते तद्वत्। लिबुजेव वृक्षं। यथा लिबुजा व्रततिर्गाढं वृक्षं परिष्वजते तद्वच्च। अन्यस्यां स्त्रियामासक्तस्त्वं मां परिष्वक्तुं नेच्छसीत्यर्थः॥

॥ अथ चतुर्दशी ॥

अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षं ।
तस्य वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्रां ॥१४॥

अन्यं। ऊं इति। सु। त्वं। यमि। अन्यः। ऊं इति। त्वां। परि। स्वजाते। लिबुजाऽइव। वृक्षं।
तस्य। वा। त्वं। मनः। इच्छ। सः। वा। तव। अध। कृणुष्व। संऽविदं। सुऽभद्रां ॥१४॥

यमः पुनरप्याह। हे यमि त्वमन्यमु अन्यं पुरुषमेव सु सुष्ठु परिष्वज। अन्य उ अन्योऽपि पुरुषस्त्वां परि ष्वजाते। तत्र दृष्टांतः। लिबुजेव वृक्षं। यथा वल्ली गाढं वृक्षं परिष्वजते तद्वत्। तथा सति। वाशब्दः समुच्चये। त्वं तस्य च पुरुषस्य मन इच्छ। कामय। तस्य त्वं वशवर्तिनी भवेत्यर्थः। स च पुरुषस्तव मन इच्छतु। अधाथ परस्परवशवर्तित्वानंतरं त्वं तेन सह सुभद्रां सुकल्याणीं संविदं परस्परसंभोगसुखसंवित्तिं कृणुष्व। कुरुष्व ॥

॥ इति सप्तमस्य षष्ठेऽष्टमो वर्गः ॥

वृषेति नवर्चमेकादशं सूक्तमांगेर्हविर्धानस्यार्षमाग्नेयं। सप्तम्याद्यास्तिस्रस्त्रिष्टुभः शिष्टा जगत्यः। तथा चानुक्रांतं। वृषा नवांगिर्हविर्धान आग्नेयं तु त्रिष्टुबंतमिति। गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः ।
विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजतु यज्ञियाँ ऋतून् ॥१॥

वृषा। वृष्णे। दुदुहे। दोहसा। दिवः। पयांसि। यह्वः। अदितेः। अदाभ्यः।
विश्वं। सः। वेद। वरुणः। यथा। धिया। सः। यज्ञियः। यजतु। यज्ञियान्। ऋतून् ॥१॥

वृषाहुतिद्वारेण वृष्टेर्वर्षिता यह्वो महान् अदाभ्यः केनाप्यहिंस्योऽग्निरदितेरक्षीणयागक्रियस्य वृष्णे यज्ञद्वारेण स्तुतीनां हविषां वा वर्षितुर्यजमानस्यार्थाय दोहसा दोहनेन महता प्रक्षारणेन दिवः सकाशात्पयांसि वृष्टिलक्षणान्युदकानि दुदुहे। दोग्धि। प्रक्षारयति। किंच यथा वरुण आदित्यो धियात्मानुरूपया प्रज्ञया विश्वं सर्वं वेद जानाति तथा सोऽयमग्निर्जानातीत्यर्थः। यज्ञियो यज्ञार्हो यज्ञियान् यज्ञार्हानृतून्यजतु। पूजयतु ॥

॥ अथ द्वितीया ॥

रपद्गंधर्वीरप्या च योषणा नदस्य नादे परि पातु मे मनः ।
इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥२॥
रपत् । गंधर्वीः । अप्या । च । योषणा । नदस्य । नादे । परि । पातु । मे । मनः ।
इष्टस्य । मध्ये । अदितिः । नि । धातु । नः । भ्राता । नः । ज्येष्ठः । प्रथमः । वि । वोचति ॥२॥

रपत् रपितवत्यग्निगुणानुक्तवती गंधर्वीर्गंधर्वस्य स्त्र्यप्याद्भिः संस्कृता योषणाहुतिलक्षणा स्त्री च । अग्निं तर्पितवतीति शेषः । नदस्य । स्तोतृनामैतत् । स्तोतुर्मे मम स्वभूतं मनो नादे स्तुतिलक्षणे शब्दे परि पातु । अग्निः सम्यग्रक्षतु । अहं समाहितमना भूत्वा सम्यक् स्तुतिं करोमीत्यर्थः । किंच अदितिरखंडनीयोऽग्निर्नोऽस्मानिष्टस्य यागस्य मध्ये नि धातु । निदधातु । नितरां स्थापयतु । प्रथमः सर्वेषां यजमानानां मुख्यो नोऽस्माकं ज्येष्ठो भ्राता वि वोचति । विशेषेण ब्रवीति । स्तौतीत्यर्थः । नाहमेव केवलो यजनशीलः किंतु सर्व एवास्मत्कुलीनो देवयागप्रिय इत्यर्थः ॥

॥ अथ तृतीया ॥

सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती ।
यदीमुशंतमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन् ॥३॥
सो इति । चित् । नु । भद्रा । क्षुऽमती । यशस्वती । उषाः । उवास । मनवे । स्वःऽवती ।
यत् । ईं । उशंतं । उशतां । अनु । क्रतुं । अग्निं । होतारं । विदथाय । जीजनन् ॥३॥

भद्रा भजनीया क्षुमती शब्दवती यशस्वत्यन्नवती कीर्तिमती वा सो चित् सैव प्रसिद्धोषा मनवे मनुष्याय यजमानाय स्वर्वत्यादित्यवती सती नु क्षिप्रमुवास । उषितवती । उदितवतीत्यर्थः । कदोदितवतीत्युच्यते । यद्यदेशंतं स्तुतिं हविश्च कामयमानमुशतां यष्टुं कामयमानानां संबंधिनं होतारं देवानामाह्वातारं होमनिष्पादकं वेमेनमग्निमनु क्रतुं स्तुतिकर्मणः पश्चाद्विदथाय यजनीयाय यज्ञार्थं जीजनन् । ऋत्विग्यजमाना जनयंतीत्यर्थः । तदोदितवतीति संबंधः ॥

॥ अथ चतुर्थी ॥

अध त्यं द्रप्सं विभ्वं विचक्षणं विराभरदिषितः श्येनो अध्वरे ।
यदी विशो वृणते दस्ममार्या अग्निं होतारमध धीरजायत ॥४॥

अध । त्यं । द्रप्सं । विऽभ्वं । विऽचक्षणं । विः । आ । अभरत् । इषितः । श्येनः । अध्वरे ।
यदि । विशः । वृणते । दस्मं । आर्याः । अग्निं । होतारं । अध । धीः । अजायत ॥४॥

अधाथानंतरं श्येनः श्येनाख्यो विः पक्ष्यध्वरे याग इषितोऽग्निप्रेषितो विभ्वं महांतं विचक्षणं सर्वस्य विशेषेण द्रष्टारं त्यं तं प्रसिद्धं द्रप्सं नात्यल्पं नातिबहुलं सोममाभरत् । आहृतवान् । अपि च । यदि यदार्या अभिगमनीयं तं व्रजंतो विशो यजमाना मनुष्या दस्मं दर्शनीयं शत्रूणामुपक्षपयितारं वा होतारमग्निं वृणते प्रार्थयंते अध तदा धीर्यागादिक्रियाजायत । यज्वभिः प्रतायत इत्यर्थः ॥

॥ अथ पंचमी ॥

सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः ।
विप्रस्य वा यच्छशमान उक्थ्यं१वाजं ससवाँ उपयासि भूरिभिः ॥५॥

सदा । असि । रण्वः । यवसाऽइव । पुष्यते । होत्राभिः । अग्ने । मनुषः । सुऽअध्वरः ।
विप्रस्य । वा । यत् । शशमानः । उक्थ्यं । वाजं । ससऽवान् । उपऽयासि । भूरिऽभिः ॥५॥

हे अग्ने त्वं सदा सततं रण्वोऽसि । रमणीयो भवसि । तत्र दृष्टांतः । यवसेव पुष्यते । यथा यवसानि तृणानि च पुष्टिं कुर्वते हस्त्यश्वगोमहिषादिचतुष्पदाय सर्वदा रमणीयानि भवंति तद्वत् । अपि च हे अग्ने मनुषो मनुष्यस्य स्वभूतैर्होत्राभिः । होत्रेति यज्ञनामैतत् । यज्ञैः स्वध्वरः शोभनयज्ञो भवेति शेषः । विप्रस्य वा स्तोतुर्वा यद्यस्य यजमानस्य वा स्वभूतमुक्थ्यं स्तोत्रं शशमानः प्रशंसन् वाजं हविर्लक्षणमन्नं ससवान् संभजमानश्च भूरिभिर्बहुभिर्देवैः सहोपयासि । उपगच्छसि ॥

॥ इति सप्तमस्य षष्ठे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति ।
विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ॥६॥

उत्। ईरय। पितरा। जारः। आ। भगं। इयक्षति। हर्यतः। हृत्तः। इष्यति।
विवक्ति। वह्निः। सुऽअपस्यते। मखः। तविष्यते। असुरः। वेपते। मती ॥६॥

हे अग्ने त्वदीयं ज्योतिः पितरा पितरौ सर्वप्राणिनां मातापितृभूते द्यावापृथिव्यौ प्रत्युद्गमय। तत्र दृष्टांतः। आकार उपमार्थे। रात्रेर्नक्षत्रादिदीप्तीनां च जरयितृत्वाज्जार आदित्यः। स यथा द्यावापृथिव्यौ प्रति भगं भजनीयं ज्योतिरुद्गमयति तद्वत्। हर्यतो यागं कामयमानान्प्रतीयक्षति। यजमानो यष्टुमिच्छति। हृत्तो हृदयेन चेष्यति। इषिरयं गत्यर्थः श्रुडोऽप्युपसर्गपूर्वो द्रष्टव्यः। अधीष्यति देवान्यष्टुमधिगच्छति। विवक्ति। विवक्षति। शस्त्रलक्षणाः स्तुतीर्वक्तुमिच्छति। वह्निर्वोढा स्तुतीनां देवान्प्रति प्रापयिता होता च स्वपस्यते। शोभनमात्मीयं कर्म कर्तुमिच्छति। मखः। यज्ञनामैतत्। अत्र तत्प्रयोक्ताध्वर्युरुच्यते। स च तविष्यते। तविषिर्वृद्ध्यर्थः। स चात्रांतर्णीतसनर्थश्च द्रष्टव्यः। तुतुविषति। स्तोत्रलक्षणाः स्तुतीर्वर्धयितुमिच्छतीत्यर्थः। असुरः प्राणवान् प्रज्ञावान्वा। ब्रह्मेति शेषः। मती मत्या बुद्ध्या वेपते। कर्मवैगुण्याद्बिभ्यत्कंपते। हे अग्ने यतो यजमानः सर्वर्त्विजश्च स्वस्वकर्म कर्तुं त्वामागच्छंति अतस्त्वं शीघ्रमुद्गमयेत्यर्थः ॥

॥ अथ सप्तमी ॥

यस्ते अग्ने सुमतिं मर्तो अक्षत्सहसः सूनो अति स प्र शृण्वे।
इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान्भूषति द्यून् ॥७॥

यः। ते। अग्ने। सुऽमतिं। मर्तः। अक्षत्। सहसः। सूनो इति। अति। सः। प्र। शृण्वे।
इषं। दधानः। वहमानः। अश्वैः। आ। सः। द्युऽमान्। अमऽवान्। भूषति। द्यून् ॥७॥

हे सहसः सूनो बलस्य पुत्राग्ने त्वदीयां सुमतिं शोभनामनुग्राहिकां बुद्धिं यो मर्तो मनुष्यो यजमानोऽक्षत् अश्नुते। अनुग्रहशीलं त्वां स्तुतिभिर्हविर्भिश्च परिचरतीत्यर्थः। स यजमानोऽति प्र शृण्वे। सर्वांल्लोकानतीत्य प्रकर्षेण श्रूयते। प्रख्यातो भवतीत्यर्थः। कीदृशः। इषमन्नं दधानः। अर्थिभ्यः प्रयच्छन्। अश्वैर्वहमानः। किंच स एव द्युमान् दीप्तिमान् शरीरपतनानंतरं द्युस्थानवान्वा। अमवान् बलवान् आ द्यून्। द्युरित्यहर्नाम। कालाध्वनोरत्यंतसंयोग इत्येषा द्वितीया। आदित्यकर्तृकाण्यहानि। आचंद्रार्कमित्यर्थः। भूषति। भवति ॥

महाव्रते संस्थिते मरुत्वतीये यदग्न एषेत्यनया चतुर्गृहीतमाज्यं जुहुयात् । तथैव पंचमेऽरण्यके सूचितं । यदग्न एषा समितिर्भवाति । ऐ० आ० ५.१.। इति ॥

॥ सैषाष्टमी ॥

यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र ।
रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमंतं वीतात् ॥८॥
यत् । अग्ने । एषा । संऽइतिः । भवाति । देवी । देवेषु । यजता । यजत्र ।
रत्ना । च । यत् । विऽभजासि । स्वधाऽवः । भागं । नः । अत्र । वसुऽमंतं । वीतात् ॥८॥

हे यजत्र यष्टव्याग्ने यद्यदैषा समितिरस्मत्कर्तृका स्तुतिसंहतिर्यजता यजतेषु यष्टव्येषु देवेषु मध्ये देवी द्योतमाना भवाति । यष्टव्या देवा अस्माभिः स्तूयंत इज्यंते चेत्यर्थः । हे स्वधावो हविर्लक्षणान्नवन्नग्ने त्वं यद्यदा रत्ना च रत्नानि रमणीयानि धनानि स्तोतृभ्यो यष्टृभ्यश्च विभजासि विभजसि अत्र तदानीं तथा नोऽस्मान्प्रति वसुमंतं धनवंतं नानाधनावयवभूतं भागमंशं वीतात् ॥ वी गत्यादिषु । तुह्योस्तातङ्ङाशिष्यन्यतरस्यामिति हेः स्थाने तातङ् । अंतर्णीतण्यर्थश्चात्र द्रष्टव्यः ॥ वयय । आगमय । अस्मभ्यं प्रयच्छेत्यर्थः ॥

॥ अथ नवमी ॥

श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुं ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥९॥
श्रुधि । नः । अग्ने । सदने । सधऽस्थे । युक्ष्व । रथं । अमृतस्य । द्रवित्नुं ।
आ । नः । वह । रोदसी इति । देवपुत्रे इति देवऽपुत्रे । माकिः । देवानां । अप ।
भूः । इह । स्याः ॥९॥

हे अग्ने सधस्थे सहस्थाने सर्वदेवतासाधारणे सदने यज्ञगृहे स्थितः सन् नोऽस्मदीयं वचनं श्रुधि । शृणु । किं तद्वचनं । उच्यते । अमृतस्य देवपानस्य मधुनो द्रवित्नुं द्रावकं रथमात्मीयं युक्ष्व । आह्वानार्थं देवान्प्रति गमनायाश्वैः संयुक्ष्व । संयुक्तेन रथेन गत्वा नोऽस्माकं यज्ञं प्रति देवपुत्रे देवस्य प्रजापतेर्दुहितरौ यद्वा देवाः पुत्रा ययोस्ते रोदसी द्यावापृथिव्यावा वह । प्रापय । देवानां

मध्ये कश्चिद्देवोऽपभूरपभवितास्मद्यज्ञमपगंता माकिः स्यात्। त्वं चेहास्मिन्यज्ञे स्याः। संनिहितो भव ॥

॥ इति सप्तमस्य षष्ठे दशमो वर्गः ॥

द्यावेति नवर्चं द्वादशं सूक्तमांगेर्हविर्धानस्यार्षं त्रैष्टुभमाग्नेयं। द्यावेत्यनुक्रांतं॥ गतो विनियोगः॥

॥ तत्र प्रथमा ॥

द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा।
देवो यन्मर्तान्यजथाय कृण्वन् सीदद्धोता प्रत्यङ् स्वमसुं यन्॥१॥
द्यावा। ह। क्षामा। प्रथमे इति। ऋतेन। अभिऽश्रावे। भवतः। सत्यऽवाचा।
देवः। यत्। मर्तान्। यजथाय। कृण्वन्। सीदत्। होता। प्रत्यङ्। स्वं। असुं। यन्॥१॥

सत्यवाचा सत्यवाचौ सत्यवादिन्यौ प्रथमे प्रधानभूते द्यावा क्षामा द्युक्षामे द्यावापृथिव्यावृतेन सत्यभूतेन देवयजनेन सहाभिश्रावे। आभिमुख्येन श्रूयत इत्यभिश्राव आह्वानं। तस्मिन्नस्मद्यज्ञनिमित्तेऽग्नेः संबंधिन्याह्वाने भवतः। लोडर्थे लट्। भवतां। यद्यदा देवो द्योतमानोऽग्निर्यजथाय यज्ञाय मर्तान् मनुष्यान् कृण्वन् प्रेरयन् प्रत्यङ् आह्वानार्थं देवानां प्रत्यंचिता स्वमसुमात्मीयं ज्वालालक्षणं प्राणं यन् प्राप्नुवन् होता देवानामाह्वाता सीदद्वेद्यां निषीदति तदास्मद्यजनकाले द्यावापृथिवी प्रमुखोऽग्निराह्वयत्वित्यर्थः॥

॥ अथ द्वितीया ॥

देवो देवान्परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान्।
धूमकेतुः समिधा भाऋजीको मंद्रो होता नित्यो वाचा यजीयान्॥२॥
देवः। देवान्। परिऽभूः। ऋतेन। वह। नः। हव्यं। प्रथमः। चिकित्वान्।
धूमऽकेतुः। सम्ऽइधा। भाःऽऋजीकः। मंद्रः। होता। नित्यः। वाचा। यजीयान्॥२॥

देवो द्योतमानोऽग्निस्त्वं देवानिंद्रादीन्परिभूराह्वानहविर्नयनद्वारेण परिभूः परिगृह्णन् ऋतेन यज्ञेन सह नोऽस्माकं हव्यं हविर्वह। प्रापय। कीदृशस्त्वं। प्रथमो देवानां मुख्यः। चिकित्वान् सर्वं जानन् धूमकेतुर्धूमस्य कर्ता वा धूमध्वजो वा धूमप्रज्ञानो वा। समिधा समिंधनेन दीपनेन भाऋजीक ऋजुदीप्तिः। ऊर्ध्वज्वलन

इत्यर्थः । मंद्रः स्तुत्यो होताह्वाता नित्यो ध्रुवो वाचा यजीयान् अतिशयेन यष्टा च ॥

॥ अथ तृतीया ॥

स्वावृ॑ग्दे॒वस्या॒मृतं॒ यदी॒ गोरतो॑ जा॒तासो॑ धारयंत उ॒र्वी ।
विश्वे॑ दे॒वा अनु॒ तत्ते॒ यजु॑र्गुर्दु॒हे यदेनी॑ दि॒व्यं घृ॒तं वाः ॥३॥
स्वावृ॑क् । दे॒वस्य॑ । अ॒मृत॑म् । यदि॑ । गोः । अतः॑ । जा॒तासः॑ । धा॒रयं॑ते । उ॒र्वी इति॑ ।
विश्वे॑ । दे॒वाः । अनु॑ । तत् । ते॒ । यजुः॑ । गुः॒ । दु॒हे । यत् । एनी॑ । दि॒व्यम् । घृ॒तम् । वारिति॒ वाः ॥३॥

देवस्याग्नेः स्वावृक् स्वार्जनममृतमुदकं स्वतेजसः सकाशाद्यदि यदोत्पद्यते तदातोऽस्माद्गोरुदकाज्जातास उत्पन्ना ओषधय उर्वी द्यावापृथिव्यौ धारयंति । विश्वे देवाः सर्वे स्तोतारस्ते तव संबंधि तद्यजुरुदकस्य तद्दानमनु गुः । अनुगायंति । एनी श्वेता दीप्तिर्दिव्यं दिवि भवं घृतं क्षरद्यद्वा वृष्टिलक्षणं यदुदकं दुहे । दोग्धि ॥

॥ अथ चतुर्थी ॥

अर्चा॑मि वां॒ वर्धा॒याप॑ो घृतस्नू॒ द्यावा॑भूमी शृणु॒तं रो॑दसी मे ।
अहा॒ यद्द्यावोऽसु॑नीति॒मय॒न्मध्वा॑ नो॒ अत्र॑ पि॒तरा॑ शिशी॒तां ॥४॥
अर्चा॑मि । वां॒ । वर्धा॑य । अपः॑ । घृ॒त॒स्नू॒ इति॑ घृतऽस्नू । द्यावा॑भूमी॒ इति॑ । शृणु॒तं ।
रो॒द॒सी॒ इति॑ । मे॒ ।
अहा॑ । यत् । द्यावः॑ । असु॑ऽनीतिं । अय॑न् । मध्वा॑ । नः॒ । अत्र॑ । पि॒तरा॑ । शि॒शी॒तां॒ ॥४॥

हे अग्ने त्वमपो मदीयं यज्ञरूपं कर्म वर्धाय । प्रोत्सर्पिते सति हे घृतस्नू वृष्ट्युदकस्य प्रसविच्यौ हे द्यावाभूमी द्यावापृथिव्यौ वां युवामर्चामि । ऋच स्तुतौ । स्तौमि । हे रोदसी द्यावापृथिव्यौ युवां मे मदीयं स्तोत्रं शृणुतं । यद्यस्मिन्नहा । अहःशब्दसामर्थ्यादहोरात्रसाध्यं कर्मोच्यते ॥ सुपां सुलुगिति सप्तम्येकवचनस्याजादेशः ॥ अहन्यहोरात्रसाध्यकर्मणि द्यावः स्तोतारोऽसुनीतिं । असुः प्रज्ञा । तया नीयत इत्यसुनीतिः स्तुतिः । तामयन् गच्छंति अत्रास्मिन्कर्मणि पितरा सर्वस्य मातापितृभूते द्यावापृथिव्यौ नोऽस्मान्वृष्ट्युदकेन शिशीतां । स्नानपानादिना संस्कुरुतां ॥

॥ अथ पंचमी ॥

किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद।
मित्रश्चिद्धि ष्मा जुहुराणो देवाञ्छ्लोको न यातामपि वाजो अस्ति ॥५॥
किं। स्वित्। नः। राजा। जगृहे। कत्। अस्य। अति। व्रतं। चकृम। कः। वि। वेद।
मित्रः। चित्। हि। स्म। जुहुराणः। देवान्। श्लोकः। न। यातां। अपि। वाजः। अस्ति॥५॥

किंस्विच्छब्दो वितर्कार्थे। किंवा राजा दीप्यमानोऽग्निर्नोऽस्माकं स्वभूतानि हवींषि स्तुतीश्च जगृहे परिगृह्णीयात् किंवास्याग्नेरति व्रतमतिपूजितं परिचरणाख्यं कर्म चकृम वयं क्रियास्म। कर्मवैगुण्याद्भीतस्य पूर्वार्धे एतद्वचनमुक्तं। उत्तरार्धे इदानीं तन्निराक्रियते। हि स्मेतीमौ पूरणौ। चिदित्युपमार्थे। जुहुराणः स्निग्धमाहूयमानो मित्रः स्निग्धो यथा आगच्छेत् तथा। नेति संप्रत्यर्थे। श्लोकोऽस्मदीया स्तुतिलक्षणा वाग्देवानिंद्रादीन्यातां। गच्छतु। अपि वाजो हविराख्यं चान्नं यदस्ति तदपि देवान्प्रति गच्छतु। देवाः स्तुतिं हविश्च प्रतिगृह्णंत्वित्यर्थः॥

॥ इति सप्तमस्य षष्ठ एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

दुर्मंत्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति।
यमस्य यो मनवते सुमंत्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥६॥
दुःऽमंतु। अत्र। अमृतस्य। नाम। सऽलक्ष्मा। यत्। विषुऽरूपा। भवाति।
यमस्य। यः। मनवते। सुऽमंतु। अग्ने। तं। ऋष्व। पाहि। अप्रऽयुच्छन् ॥६॥

॥ अथ सप्तमी ॥

यस्मिन्देवा विदथे मादयंते विवस्वतः सदने धारयंते।
सूर्ये ज्योतिरदधुर्मास्य१क्तून्परि द्योतनिं चरतो अजस्रा ॥७॥
यस्मिन्। देवाः। विदथे। मादयंते। विवस्वतः। सदने। धारयंते।
सूर्ये। ज्योतिः। अदधुः। मासि। अक्तून्। परि। द्योतनिं। चरतः। अजस्रा ॥७॥

यस्मिन्नग्नौ यज्ञस्य प्रधानांशे सति देवा इंद्रादयो विदथे यज्ञे मादयंते हविषात्मानं तर्पयंति तृप्यंति वा। अपि च विवस्वतो मनुष्यस्य यजमानस्य

स्वभूते सदने वेद्याख्ये स्थाने धारयंत आत्मानं स्थापयंति वा। किंच सूर्ये ज्योतिरहराख्यं तेजोऽदधुः। स्थापितवंतः। मासि चद्रमस्यक्तून् रात्रीः स्थापितवंतः। तदनंतरमजस्रानुपक्षीणौ सूर्याचंद्रमसौ द्योतनिं दीप्तिं परि चरतः। परिगच्छतः। सर्वत्र प्राप्नुतः ॥

॥ अथाष्टमी ॥

यस्मिन्देवा मन्मनि संचरंत्यपीच्ये३न वयमस्य विद्म।

मित्रो नो अत्रादितिरनागान् सविता देवो वरुणाय वोचत् ॥८॥

यस्मिन्। देवाः। मन्मनि। संऽचरंति। अपीच्ये। न। वयं। अस्य। विद्म।

मित्रः। नः। अत्र। अदितिः। अनागान्। सविता। देवः। वरुणाय। वोचत् ॥८॥

देवा इंद्रादयोः यस्मिन्नग्नौ मन्मनि ज्ञानभूते ज्ञानवत्सर्वप्रकाशके सति संचरंति स्वाधिकारे संप्रवर्तंते। अपीच्येऽंतर्हिते स्थितमग्नेः स्वरूपं वयं न विद्म। तत्त्वतो न जानीमः। अत्रास्मिन्यज्ञेऽंगभावाय वर्तमानो मित्रो वरुणाय सर्वेषां पापानां निवारयित्रेऽग्नये नोऽस्माननागान् अपापान्वोचत् ब्रवीतु। तथादितिर्देवमाता सविता सर्वस्य प्रेरको देवश्च ब्रवीतु ॥

॥ अथ नवमी ॥

श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रवित्नुं।

आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥९॥

श्रुधि। नः। अग्ने। सदने। सधऽस्थे। युक्ष्व। रथं। अमृतस्य। द्रवित्नुं।

आ। नः। वह। रोदसी इति। देवपुत्रे इति देवऽपुत्रे। माकिः। देवानां। अप।
भूः। इह। स्याः ॥९॥

श्रुधी न इत्येषा नवमी पूर्वसूक्ते व्याख्याता ॥

॥ इति सप्तमस्य षष्ठे द्वादशो वर्गः ॥

युजे वामिति पंचर्चं त्रयोदशं सूक्तं। अदितेः पुत्रस्य विवस्वत आर्षं। हविर्धानाख्ये ये द्वे शकटे तद्देवत्यमिदं। अंत्या जगती शिष्टास्त्रिष्टुभः। तथा चानुक्रांतं। युजे पंच विवस्वानादित्यो हविर्धानं जगत्यंतमिति। गतः सूक्तविनियोगः। हविर्धानप्रवर्तने युजे वामित्येका। सूचितं च। अंतरा वर्त्मपादयोर्युजे वां ब्रह्म पूर्व्यं नमोभिः। आ॰ ४.९.। इति ॥

॥ तत्र प्रथमा ॥

युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वंतु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥१॥

युजे । वां । ब्रह्म । पूर्व्यं । नमःऽभिः । वि । श्लोकः । एतु । पथ्याऽइव । सूरेः ।
शृण्वंतु । विश्वे । अमृतस्य । पुत्राः । आ । ये । धामानि । दिव्यानि । तस्थुः ॥१॥

हे हविर्धानशकटे वां युवामहं पूर्व्यं पूर्वस्मिन्काले भवं । अनादिकालप्रवृत्तमित्यर्थः । एवंभूतं ब्रह्म मंत्रमुच्चार्येति शेषः । नमोभिः सोमादिहविर्लक्षणैरन्नैर्युजे । युनज्मि । युवयोरुपरि सोमादिकमारोप्य पत्नीशालांते हविर्धानं प्रति युवां नयामीत्यर्थः । एवंभूतयोर्युवयोः श्लोकः शब्दो व्येतु । विश्वान्देवान्प्रति विविधं गच्छतां । तत्र दृष्टांतः । पथ्येव सूरेः । यथा स्तोतुः स्वभूता पथ्या परिणामसुखावहाहुतिर्विश्वान्देवान्प्रति विविधं गच्छति तद्वत् । अमृतस्यामरणधर्मणः प्रजापतेः पुत्रा विश्वे देवा एवंभूतं शब्दं शृण्वंतु ये देवा दिव्यानि दिवि भवानि धामानि स्थानान्या तस्थुः । अधिष्ठितवंतः । ते शृण्वंत्वित्यर्थः ॥

अत्रैव हविर्धानप्रवर्तने यमे इवेत्येषा । सूचितं च । यमे इव यतमाने यदैतमधि द्वयोरदधा उक्थ्यं वच इत्यर्धर्चे आरमेत् । आ॰ ४.९. । इति ॥

॥ तत्रैषा द्वितीया ॥

यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयंतः ।
आ सीदतं स्वमु लोकं विदाने स्वासस्थे भवतमिंदवे नः ॥२॥

यमे इवेति यमेऽइव । यतमाने इति । यत् । ऐतं । प्र । वां । भरन् । मानुषाः । देवऽयंतः ।
आ । सीदतं । स्वं । ऊं इति । लोकं । विदाने इति । स्वासस्थे इति सुऽआसस्थे । भवतं । इंदवे । नः ॥२॥

यमे इव यथा सहोत्पन्ने अपत्ये संचरतस्तथा यतमाने गमनहविर्धारणादिस्वाधिकारकर्मणि प्रवर्तमाने हविर्धानशकटे युवां यद्यदैतं हविर्धानस्थानं प्रतिगच्छतस्तदा देवयंतो देवकामा मानुषा यजमाना वां युवां प्र भरन् । प्रभरंति । किंच युवां स्वमु लोकमात्मीयमेव हविर्धानाख्यं स्थानं विदाने जानती आ सीदतं । ततो नोऽस्माकमिंदवे सोमार्थं स्वासस्थे शोभननिवासस्थाने भवतं ॥

॥ अथ तृतीया ॥

पंचं पदानिं रुपो अन्वरोहं चतुंष्पदीमन्वेंमि व्रतेनं ।
अक्षरेंण प्रतिं मिम एतामृतस्यं नाभावधिं सं पुंनामि ॥३॥

पंचं । पदानिं । रुपः । अनुं । अरोहं । चतुंःऽपदीं । अनुं । एमि । व्रतेनं ।
अक्षरेंण । प्रतिं । मिमे । एतां । ऋतस्यं । नाभौं । अधिं । सं । पुनामि ॥३॥

रुपो यष्टॄणां स्वर्गमारोपयितुर्यज्ञस्यांगत्वेन संबंधीनि पंचसंख्याकानि धानासोमपशुपुरोडाशाज्याख्यानि पदानि वृष्टिहेतुत्वेन देवान्प्रति गंतॄणि हवींष्यन्वरोहं । अनुरोहामि । शकटयोः स्थापनवहनानंतरं करणं करोमीत्यर्थः । किंच चतुष्पदीं चतुर्भिः पादैर्युक्तां त्रिष्टुबादिच्छंदस्कां क्रियां व्रतेन प्रयोगकर्मणान्वेमि । अनुगच्छामि । यथाकालं प्रयुनज्मीत्यर्थः । अक्षरेण प्रणवाख्येनैतामुपस्थितां प्रतिगरक्रियां प्रति मिमे । निर्ममे । अपि च ऋतस्य यज्ञस्य । अधीति सप्तम्यर्थानुवादी । नाभौ नाभिभूते वेद्याख्ये स्थाने सं पुनामि । संशोधयामि । दशापवित्रेण सोमं संस्करोमीत्यर्थः ॥

॥ अथ चतुर्थी ॥

देवेभ्यः कर्मवृणीत मृत्युं प्रजायै कममृतं नावृंणीत ।
बृहस्पतिं यज्ञमंकृण्वत ऋषिं प्रियां यमस्तन्वं१प्रारिरेचीत् ॥४॥

देवेभ्यः । कं । अवृणीत । मृत्युं । प्रऽजायैं । कं । अमृतं । न । अवृणीत ।
बृहस्पतिं । यज्ञं । अकृण्वत । ऋषिं । प्रियां । यमः । तन्वं । प्र । अरिरेचीत् ॥४॥

देवेभ्यो देवानां मृत्युं मारयितारं कं स्वपुरुषमवृणीत । प्रार्थयते । प्रयुंक्ते । किंच प्रजायै देवव्यतिरिक्ताया मनुष्यादिकायाः प्रजाया अमृतममारकमविनाशकं कं वा स्वपुरुषं नावृणीत । न प्रयुंक्ते । हविर्धारणक्रियायां प्रवृत्तायां सत्यां पूर्वोक्तानां सर्वेषां स्थितेरवश्यंभावित्वान्न कंचिदपि विनाशकं स्वपुरुषं यमो निरूपयतीत्यर्थः । अपि च बृहस्पतिं बृहतां देवानां हविर्धारणे पालकं बृहतां मंत्राणां स्वामिनं वर्षिं सर्वस्य दृष्टादृष्टफलस्य द्रष्टारं यज्ञमकृण्वत । ऋत्विग्यजमानाः कुर्वंति । अपि च यमः प्रियां तन्वमस्मदीयमिष्टं शरीरं प्रारिरेचीत् । धातूनामनेकार्थत्वाद्रिचिरत्र परिहारार्थे वर्तते । प्ररेचयति । मृत्योः सकाशात्परिहरति । कर्मवैगुण्यजनितदोषभावादस्माकं जीवितं नापहरतीत्यर्थः ॥

॥ अथ पंचमी ॥

सप्त क्षरंति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवतन्नृतं ।
उभे इदस्योभयस्य राजत उभे यतेते उभयस्य पुष्यतः ॥५॥

सप्त । क्षरंति । शिशवे । मरुत्वते । पित्रे । पुत्रासः । अपि । अवीवतन् । ऋतं ।
उभे इति । इत् । अस्य । उभयस्य । राजतः । उभे इति । यतेते इति । उभयस्य । पुष्यतः ॥५॥

मरुत्वते । मरुतः स्तोतारः । स्तुतिद्वारेण तद्वते पित्र ऋत्विजां पितृभूताय शिशवे शंसनीयाय हविर्धानशकटयोः सुखासीनभूताय सोमाय सप्त छंदांसि क्षरंति । स्तुतित्वेन गच्छंति । अपि च पुत्रासोऽपि सोमस्य पुत्रभूता ऋत्विजोऽप्यृतं सत्यभूतं स्तोत्रमवीवतन् । संगमयंति । सद्गुणग्राहिणीं स्तुतिं कुर्वंतीत्यर्थः । उभे इत् द्वे एव हविर्धानशकटे अस्योभयस्य देवजातस्य मनुष्यजातस्य च राजतः । ईशाने । उभे एव शकटे यतेते । कर्मानुष्ठाने प्रयत्नं कुरुतः । उभयस्य देवजातस्य मनुष्यजातस्य च पुष्यतः । हविर्धारणद्वारेण पुष्टिं कुरुत इत्यर्थः ॥

॥ इति सप्तमस्य षष्ठे त्रयोदशो वर्गः ॥

परेयिवांसमिति षोडशर्चं चतुर्दशं सूक्तं विवस्वतः पुत्रस्य यमस्यार्षं । अंगिरसो नः पितरो नवग्वा इति षष्ठ्या अंगिरःपित्रथर्वभृगुलक्षणा लिंगोक्ता देवताः । प्रेहीत्याद्यास्तिस्रो लिंगोक्तदेवताकाः पितृदेवताका वा । अति द्रव सारमेयावित्यादिकस्तृचः सरमापुत्रौ यौ श्वानौ परलोकमार्गमभितः स्थितौ तद्देवताकः । शिष्टा यमदेवत्याः । यमाय सोममिति त्रयोदश्याद्या अनुष्टुभः । यमाय मधुमत्तममित्येषा बृहती । आदितो द्वादश त्रिष्टुभः । तथा चानुक्रांतं । परेयिवांसं षोळश यमो यामं षष्ठी लिंगोक्तदेवता । पराश्च तिस्रः पित्र्या वा तृचः श्वभ्यां परा अनुष्टुभो बृहत्युपांत्येति ॥ गतः सूक्तविनियोगः । महापितृयज्ञे यमयागाख्या याज्या । सूत्रितं च । इमं यज्ञं प्रस्तरमा हि सीदेति द्वे परेयिवांसं प्रवतो महीरनु । आ० २.१९. । इति ॥

॥ तत्र प्रथमा ॥

परेयिवांसं प्रवतो महीरनु बहुभ्यः पंथामनुपस्पशानं ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ॥१॥

परेयिऽवांसं । प्रऽवतः । महीः । अनु । बहुऽभ्यः । पंथां । अनुऽपस्पशानं ।
वैवस्वतं । संऽगमनं । जनानां । यमं । राजानं । हविषा । दुवस्य ॥१॥

हे मदीयांतरात्मन् यजमान वा त्वं राजानं पितॄणां स्वामिनं यमं हविषा पुरोडाशादिना दुवस्य । परिचर । कीदृशं । प्रवतः प्रकृष्टकर्मवतो भूलोकवर्तिभोगसाधनं पुण्यमनुष्ठितवतः पुरुषान्महीस्तत्तद्भोगोचितभूप्रदेशविशेषान् अनु परेयिवांसं क्रमेण मरणादूर्ध्वं प्रापितवंतं । तथा बहुभ्यः स्वर्गार्थिभ्यः पुण्यकृद्भ्यः पुण्यकृतार्थं पंथां स्वर्गस्योचितं मार्गमनुपस्पशानमबाधमानं । पापिन एव पुरुषान् स्वर्गमार्गबाधेन नरकं प्रापयति न तु पुण्यकृत इत्यर्थः। वैवस्वतं विवस्वतः सूर्यस्य पुत्रं जनानां पापिनां संगमनं गंतव्यस्थानरूपं ॥

॥ अथ द्वितीया ॥

यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उं ।

यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या३ अनु स्वाः ॥२॥

यमः । नः । गातुं । प्रथमः । विवेद । न । एषा । गव्यूतिः । अपऽभर्तवै । ऊं इति ।

यत्र । नः । पूर्वे । पितरः । पराऽईयुः । एना । जज्ञानाः । पथ्याः । अनु । स्वाः ॥२॥

प्रथमः सर्वेषां मुख्यो यमो नोऽस्माकं प्रजानां गातुं शुभाशुभनिमित्तं विवेद। जानाति। एषा गव्यूतिर्नापभर्तवा उ। अतिशयज्ञानयोगाद्यमस्य न केनचिदपहर्तुमपनेतुं शक्यत इत्यर्थः। यत्र यस्मिन्मार्गे नोऽस्माकं पूर्वे पितरः परेयुः एनानेन मार्गेण गच्छंतो जज्ञाना जाताः सर्वे स्वाः स्वभूताः पथ्याः स्वकर्ममार्गभूता गतीरनु गच्छंति ॥

आग्निमारुते मातली कव्यैरित्येषा धाय्या। सूत्रितं च। इमं यम प्रस्तरमा हि सीद मातली कव्यैर्यमो अंगिरोभिरुदीरतामवर उत्परासः।आ० ५.२०.। इति ॥

॥ सैषा सूक्ते तृतीया ॥

मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।

यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदंति ॥३॥

मातली । कव्यैः । यमः । अंगिरःऽभिः । बृहस्पतिः । ऋक्वऽभिः । ववृधानः ।

यान् । च । देवाः । ववृधुः । ये । च । देवान् । स्वाहा । अन्ये । स्वधया । अन्ये । मदंति ॥३॥

मातली । मातलिरिंद्रस्य सारथिः । तद्वानिंद्रो मातली । स कव्यैः कव्यभाग्भिः पितृभिः सह ववृधानो वर्धमानो भवति । यमश्चांगिरोभिः पितृविशेषैः सह

वर्धमानो भवति । ˆ˜ । तत्र देवा इंद्रादयो यांश्च कव्यभागादीन्पितॄन्ववृधुर्वर्धयंति ये च कव्यभागादयः पितरो देवानिंद्रादीन्वर्धयंति तेषां मध्येऽन्य इंद्रादयः स्वाहा मदंति । स्वाहाकारेण हृष्यंति । अन्ये पितरः स्वधया स्वधाकारेण हृष्यंति ॥

महापितृयज्ञे यमस्येमं यमेत्यादिके द्वे अनुवाक्ये । इमं यम प्रस्तरमा हि सीदेति द्वे । आ० २.१९. । इति हि सूचितं । सैषाग्निमारुतेऽपि धाय्या । सूक्तं पूर्वमेवोदाहृतं ॥

॥ सैषा सूक्ते चतुर्थी ॥

इमं यम प्रस्तरमा हि सीदांगिरोभिः पितृभिः संविदानः ।
आ त्वा मंत्राः कविशस्ता वहंत्वेना राजन्हविषा मादयस्व ॥४॥

इमं । यम । प्रऽस्तरं । आ । हि । सीद । अंगिरःऽभिः । पितृऽभिः । संऽविदानः ।
आ । त्वा । मंत्राः । कविऽशस्ताः । वहंतु । एना । राजन् । हविषा । मादयस्व ॥४॥

हे यम अंगिरोभिरेतन्नामकैः पितृभिः संविदान ऐकमत्यं गतस्त्वमिमं प्रस्तरं विस्तीर्णं यज्ञविशेषमा सीद । आगत्योपविश । हि यस्मादेवं तस्मात्कविशस्ता विद्वद्भिर्ऋत्विग्भिः प्रयुक्ता मंत्रास्त्वा त्वामा वहंतु । हे राजन् एनैतेन हविषा तुष्टो मादयस्व । यजमानं हर्षय ॥

॥ अथ पंचमी ॥

अंगिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।
विवस्वंतं हुवे यः पिता तेऽस्मिन्यज्ञे बर्हिष्या निषद्य ॥५॥

अंगिरःऽभिः । आ । गहि । यज्ञियेभिः । यम । वैरूपैः । इह । मादयस्व ।
विवस्वंतं । हुवे । यः । पिता । ते । अस्मिन् । यज्ञे । बर्हिषि । आ । निऽसद्य ॥५॥

हे यम वैरूपैर्विविधरूपयुक्तैर्वैरूपसामप्रियैर्वा यज्ञियेभिर्यज्ञयोग्यैरंगिरोभिः सहा गहि । आगच्छ । आगत्य चेहास्मिन्यज्ञे मादयस्व । यजमानं हर्षय । यो विवस्वान् ते तव पितास्ति अस्मिन्यज्ञे तं विवस्वंतं हुवे । आह्वयामि । स चास्तीर्णे बर्हिष्या निषद्योपविश्य यजमानं हर्षयतु ॥

॥ इति सप्तमस्य षष्ठे चतुर्दशो वर्गः ॥

॥ अथ षष्ठी ॥

अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ६ ॥
अंगिरसः । नः । पितरः । नवऽग्वाः । अथर्वाणः । भृगवः । सोम्यासः ।
तेषां । वयं । सुऽमतौ । यज्ञियानां । अपि । भद्रे । सौमनसे । स्याम ॥ ६ ॥

अंगिरसोऽगिरोनामका अथर्वाणोऽथर्वनामका भृगवो भृगुनामकाश्च नोऽस्माकं पितरो नवग्वा अभिनवगमनयुक्ताः । यद्वा नूतनवत्प्रीतिजनका इत्यर्थः । ते च सोम्यासः । सोममर्हंतीति सोम्याः । यज्ञियानां यज्ञार्हाणां तेषां सुमतावनुग्रहयुक्तायां बुद्धौ वयं स्याम । सर्वदा तिष्ठेम । अपि च सौमनसे भद्रे सौमनसस्य कारणे कल्याणे फले स्याम । सर्वदा तिष्ठेम ॥

सत्त्रमध्ये दीक्षितस्य मरणे प्रेहीत्याद्याः पंचर्चस्तृतीयावर्जिता होत्रा शंसनीयाः । सूचितं च । प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति पंचानां तृतीयामुद्धरेत् । आ० ६.१०. । इति ॥

॥ तासां प्रथमा सूक्ते सप्तमी ॥

प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदंता यमं पश्यासि वरुणं च देवं ॥ ७ ॥
प्र । इहि । प्र । इहि । पथिऽभिः । पूर्व्येभिः । यत्र । नः । पूर्वे । पितरः । पराऽईयुः ।
उभा । राजाना । स्वधया । मदंता । यमं । पश्यासि । वरुणं । च । देवं ॥ ७ ॥

यत्र यस्मिन्स्थाने नोऽस्माकं पूर्वे पुरातनाः पितरः पितामहादयः परेयुः पूर्व्येभिः पूर्वस्मिन्काले भवैः । अनादिकालप्रवृत्तैरित्यर्थः । पथिभिर्मार्गैर्हे मत्पितस्तत्स्थानं प्रेहि । प्रगच्छ । शीघ्रं गच्छ । गत्वा च स्वधयामृतान्नेन मदंतौ तृप्यंतौ राजाना राजानावुभोभौ यमं देवं द्योतमानं वरुणं च पश्यासि । पश्य ॥

॥ अथाष्टमी ॥

सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः ॥ ८ ॥

सं । गच्छस्व । पितृऽभिः । सं । यमेन । इष्टापूर्तेन । परमे । विऽओमन् ।

हित्वाय । अवद्यं । पुनः । अस्तं । आ । इहि । सं । गच्छस्व । तन्वा । सुऽवर्चाः ॥८॥

हे मदीय पितः ततस्त्वं परम उत्कृष्टे व्योमन् व्योमनि स्वर्गाख्ये स्थाने स्वभूतैः पितृभिः सह सं गच्छस्व । इष्टापूर्तेन श्रौतस्मार्तदानफलेन संगच्छस्व । तत इष्टापूर्तेन सहागम्यावद्यं पापं हित्वा परित्यज्यास्तं म्रियमाणाख्यं गृहमेहि । आगच्छ । ततः सुवर्चाः । तृतीयार्थे प्रथमा । सुवर्चसा शोभनदीप्तियुक्तेन तन्वा स्वशरीरेण संगच्छस्व ॥

पैतृमेधिके कर्मणि श्मशानायतनं प्रोक्षत्यपेत वीतेति । सूत्रितं च । गर्तोदकेन शमीशाखया त्रिः प्रसव्यमायतनं परिव्रजन् प्रोक्षत्यपेत वीत वि च सर्पतातः । आ० गृ० ४.२. । इति ॥

॥ सैषा सूक्ते नवमी ॥

अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।

अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥९॥

अप । इत । वि । इत । वि । च । सर्पत । अतः । अस्मै । एतं । पितरः । लोकं । अक्रन् ।

अहःऽभिः । अत्ऽभिः । अक्तुऽभिः । विऽअक्तं । यमः । ददाति । अवऽसानं । अस्मै ॥९॥

श्मशाने पूर्वं स्थिता हे पिशाचादयः अतोऽस्मान्मृतयजमानदहनस्थानादपेत । अपगच्छत । वीत । विशेषेण गच्छत । वि सर्पत च । इदं स्थानं परित्यज्य नानाभावेन दूरतरं देशं गच्छतेत्यर्थः । पितरोऽस्मै मृतयजमानस्यार्थायैतं लोकमिदं दहनस्थानमक्रन् । यमस्याज्ञयान्वकुर्वन् । यमोऽप्यहोभिर्दिवसैरद्भिरभ्युक्षणोदकैरक्तुभी रात्रिभिर्व्यक्तं संगतं । शुद्धिनिमित्तैः कालोदकादिभिः शोधितमित्यर्थः । अवसानं दहनस्थानमस्मै मृतयजमानस्यार्थाय ददाति । दत्तवान् ॥

अनुस्तरण्या वृक्कौ पार्श्वयोराम्रफलाकृती । तावुद्धृत्य प्रेतस्य हस्तयोर्निदधात्यति द्रव सारमेयाविति द्वाभ्यां । सूत्रितं च । वृक्कावुद्धृत्य पाण्योरादध्यादति द्रव सारमेयौ श्वानौ । आ० गृ० ४.३. । इति ॥

॥ तत्रैषा दशमी ॥

अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।

अथा पितॄन्त्सुविदत्राँ उपेहि यमेन ये सधमादं मदन्ति ॥१०॥

अति । द्रव । सारमेयौ । श्वानौ । चतुःऽअक्षौ । शबलौ । साधुना । पथा ।
अथ । पितॄन् । सुऽविदत्रान् । उप । इहि । यमेन । ये । सधऽमादं । मदंति ॥१०॥

हे अग्ने साधुना पथा समीचीनेन मार्गेण श्वानावुभावति द्रव । अतिक्रम्य गच्छ । यमसंबंधिनौ यौ श्वानौ प्रेतस्य बाधकौ तौ परित्यज्य समीचीनेन मार्गेण प्रेतं नयेत्यर्थः । कीदृशौ श्वानौ । सारमेयौ । सरमा नाम काचित्प्रसिद्धा देवशुनी । तस्याः पुत्रौ । चतुरक्षौ । उपरिभागे पुनरप्यक्षिद्वयं ययोस्तादृशौ । अथ शोभनमार्गेण गमनानंतरं ये पितरो यमेन सधमादं सहर्षं मदंति प्राप्नुवंति तान्सुविदत्रान् सुष्ठुभिज्ञान्पितॄनुपेहि । उपगच्छ ॥

॥ इति सप्तमस्य षष्ठे पंचदशो वर्गः ॥

॥ अथैकादशी ॥

यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परि देहि राजन् स्वस्ति चास्मा अनमीवं च धेहि ॥११॥

यौ । ते । श्वानौ । यम । रक्षितारौ । चतुःऽअक्षौ । पथिरक्षी इति पथिऽरक्षी ।
नृऽचक्षसौ ।
ताभ्यां । एनं । परि । देहि । राजन् । स्वस्ति । च । अस्मै । अनमीवं । च । धेहि ॥११॥

हे राजन् हे यम ते त्वदीयौ यौ श्वानौ विद्येते ताभ्यां हे राजन् यमैनं प्रेतं परि देहि । रक्षार्थं प्रयच्छ । कीदृशौ श्वानौ । रक्षितारौ । यमगृहस्य रक्षकौ । चतुरक्षौ । अक्षिचतुष्टययुक्तौ । पथिरक्षी । मार्गस्य रक्षकौ । नृचक्षसौ । मनुष्यैः ख्याप्यमानौ । श्रुतिस्मृतिपुराणाभिज्ञाः पुरुषास्तौ प्रख्यापयंति । ताभ्यां श्वभ्यां दत्वास्मै प्रेताय स्वस्ति च क्षेममप्यनमीवं च रोगाभावमपि धेहि । संपादय ॥

॥ अथ द्वादशी ॥

उरूणसावसुतृपा उदुंबलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रं ॥१२॥

उरुऽनसौ । असुऽतृपौ । उदुंबलौ । यमस्य । दूतौ । चरतः । जनान् । अनु ।
तौ । अस्मभ्यं । दृशये । सूर्याय । पुनः । दातां । असुं । अद्य । इह । भद्रं ॥१२॥

यमस्य संबंधिनौ दूतौ श्वानौ जनाँ अनु प्राणिनो लक्षीकृत्य सर्वत्र चरतः ।

कीदृशौ । उरुणसौ दीर्घनासिकायुक्तौ । असुतृपौ परकीयान्प्राणान् स्वीकृत्य तैस्तृप्यंतावुदुंबलावुरुबलौ विस्तीर्णबलौ तावुभौ दूतौ सूर्याय दृशये सूर्यस्य दर्शनार्थमद्य दिन इह कर्मणि भद्रमसुं समीचीनं प्राणं पुनरस्मभ्यं दातां । अदत्तां ॥

॥ अथ त्रयोदशी ॥

यमाय सोमं सुनुत यमाय जुहुता हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥१३॥
यमाय । सोमं । सुनुत । यमाय । जुहुत । हविः ।
यमं । ह । यज्ञः । गच्छति । अग्निऽदूतः । अरंऽकृतः ॥१३॥

हे ऋत्विजो यमाय यमदेवतार्थं सोमं सुनुत । लतात्मकं सोममभिषुणुत । तथा यमार्थं हविर्जुहुत । अग्निर्दूतो यस्मिन्यज्ञे सोऽयमग्निदूतः । अग्नेर्दूतत्वमन्यत्राम्नातं । अग्निर्देवानां दूत आसीदिति । अरंकृतो बहुभिर्द्रव्यैरलंकाररूपैर्युक्तः । तादृशो यज्ञो यमं ह यममेव गच्छति ॥

॥ अथ चतुर्दशी ॥

यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत ।
स नो देवेष्वा यमद्दीर्घमायुः प्र जीवसे ॥१४॥
यमाय । घृतऽवत् । हविः । जुहोत । प्र । च । तिष्ठत ।
सः । नः । देवेषु । आ । यमत् । दीर्घं । आयुः । प्र । जीवसे ॥१४॥

हे ऋत्विजो यूयं यमाय घृतवदाज्येन संयुक्तं हविः पुरोडाशादिकं जुहोत । जुहुत । प्र च तिष्ठत । यमं यूयमुपतिष्ठध्वं च । देवेषु मध्ये स यमो देवः प्र जीवसे प्रकृष्टजीवनार्थं नोऽस्माकं दीर्घमायुरा यमत् । प्रयच्छतु ॥

॥ अथ पंचदशी ॥

यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन ।
इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥१५॥
यमाय । मधुमत्ऽतमं । राज्ञे । हव्यं । जुहोतन ।
इदं । नमः । ऋषिऽभ्यः । पूर्वऽजेभ्यः । पूर्वेभ्यः । पथिकृत्ऽभ्यः ॥१५॥

हे ऋत्विजो यमाय राज्ञे मधुमत्तममतिशयेन मधुरं हव्यं पुरोडाशादिकं हविर्जुहोतन । जुहुत । पूर्वजेभ्यः सृष्ट्यादावुत्पन्नेभ्योऽत एव पूर्वेभ्योऽस्मत्तः पूर्वभाविभ्यः पथिकृद्भ्यः शोभनमार्गकारिभ्य ऋषिभ्य इदं प्रत्यक्षं यथा भवति तथा नमोऽस्तु ॥

॥ अथ षोडशी ॥

त्रिकद्रुकेभिः पतति षळुर्वीरेकमिद्बृहत् ।
त्रिष्टुब्गायत्री छंदांसि सर्वा ता यम आहिता ॥१६॥
त्रिऽकद्रुकेभिः । पतति । षट् । उर्वीः । एकं । इत् । बृहत् ।
त्रिऽस्तुप् । गायत्री । छंदांसि । सर्वा । ता । यमे । आऽहिता ॥१६॥

त्रिकद्रुकेभिः । द्वितीयार्थे तृतीयेषा । त्रिकद्रुकान् ज्योतिर्गौरायुरिति त्रयो यागविशेषास्त्रिकद्रुका उच्यंते । तान्प्रत्यंगभावाय संरक्षणार्थं च पतति । यमस्तान् प्राप्नोति । षट्संख्याका उर्वीर्भूमीः कृताकृतप्रत्यवेक्षणाय प्राप्नोति । ताश्चोर्व्यः शाखांतरमंत्रे समाम्नाताः षण्मोर्वीरंहसस्पांतु द्यौश्च पृथिवी चापश्चौषधयश्चोर्क्च सूनृता चेति । एकमित् एकमेव बृहन्महज्जगद्यमश्च प्रतिपालनीयः प्राप्नोति । किंच यानि त्रिष्टुब्गायत्र्यादीनि छंदांसि संति सर्वाणि तानि छंदांसि यम आहितानि । ऋत्विग्भिः स्तुतित्वेनावस्थितानि ॥

॥ इति सप्तमस्य षष्ठे षोडशो वर्गः ॥

उदीरतामिति चतुर्दशर्चं पंचदशं सूक्तं । अत्रानुक्रम्यते । उदीरतां षळूना शंखः पित्र्यं जगत्येकादशी । यामायनाः परे पंचेति वचनाद्यमपुत्रः शंखाख्य ऋषिः । अग्निष्वात्ता इत्येषा जगती शिष्टास्त्रिष्टुभः । पितरो देवता । गतः सूक्तविनियोगः ॥ अष्टकायामुदीरतामवर इत्याद्या अष्टावृचो होमार्थाः । सूत्रितं च । उदीरतामवर उत्परास इत्यष्टाभिर्हुत्वा । आ० गृ० २.४. । इति ॥ महापितृयज्ञे पितरः सोमवंत इत्यस्यानुवाक्योदीरतामित्येषा । सूत्रितं च । पितरोऽग्निष्वात्ता यम उदीरतामवर उत्परासः । आ० २.१९. । इति ॥ आग्निमारुतेऽप्येषा धाय्या । सूत्रितं च । मातली कव्यैर्यमो अंगिरोभिरुदीरतामवर उत्परासः । आ० ५.२०. । इति ॥

॥ तत्र प्रथमा ॥

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवंतु पितरो हवेषु ॥१॥
उत् । ईरतां । अवरे । उत् । परासः । उत् । मध्यमाः । पितरः । सोम्यासः ।
असुं । ये । ईयुः । अवृकाः । ऋतऽज्ञाः । ते । नः । अवंतु । पितरः । हवेषु ॥१॥

त्रिविधाः पितर उत्तमा मध्यमा अधमाश्चेति । यथाविधं श्रौतं कर्मानुष्ठाय पितृत्वं प्राप्ता उत्तमाः । स्मार्तकर्ममात्रपरा मध्यमाः । अत्रापि केश्चित्संस्कारैर्विकला अधमाः । एतदेवाभिप्रेत्य ये अग्निदग्धा ये अनग्निदग्धा इत्यादिमंत्र आम्नातः । तेष्ववरे निकृष्टा उदीरतां । उत्तमं हविः प्राप्नुवंतु । परास उत्तमाः पितर उदीरतां मध्यमाः पितरश्चोदीरतां । ते सर्वेऽप्यस्मद्विषये सोम्यासः सोम्या अनुग्रहपराः संतु । ये पितरोऽवृका वृकवदरण्यश्ववदस्मासु हिंसामकुर्वंत ऋतज्ञा अस्मदनुष्ठितं यज्ञं जानंतोऽसुमस्मत्प्राणमीयू रक्षितुं प्राप्तास्ते पितरो हवेष्वस्मदीयेष्वाह्वानेषु नोऽस्मानवंतु । रक्षंतु ॥

महापितृयज्ञे पितरो बर्हिषद इत्यस्येदं पितृभ्य इति द्वितीयानुवाक्या । सूत्रं तु पूर्वमेवोदाहृतं ।आ० २.१९.॥ इदं पितृभ्य इत्येषा धाय्या । सूत्रितं च । आहं पितॄन् सुविदत्राँ अवित्सीदं पितृभ्यो नमो अस्त्वद्य स्वादुष्किलायमिति चतस्रः ।आ० ५.२०.। इति ॥

॥ तत्रैषा द्वितीया ॥

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥२॥
इदं । पितृऽभ्यः । नमः । अस्तु । अद्य । ये । पूर्वासः । ये । उपरासः । ईयुः ।
ये । पार्थिवे । रजसि । आ । निऽसत्ताः । ये । वा । नूनं । सुऽवृजनासु । विक्षु ॥२॥

पूर्वासो यजमानोत्पत्तेः पूर्वमुत्पन्ना ज्येष्ठभ्रातृपितामहादयो य ईयुः पितृलोकं प्राप्ताः । ये चान्य उपरासो यजमानजन्मन उपर्युत्पन्नाः कनिष्ठभ्रातृस्वपुत्रादय ईयुः पितृलोकं प्राप्ताः । येऽप्यन्ये पार्थिवे पृथिवीसंबंधिनि रजसि रजोगुणकार्येऽस्मिन्कर्मण्या निषत्ता हविः स्वीकर्तुमागत्योपविष्टाः । ये वा केचिदन्ये बंधुवर्गरूपाः पितरो विक्षु बंधुरूपासु प्रजास्वा निषत्ताः श्राद्धादिस्वीकारायाग-

त्योपविष्टाः । कीदृशीषु विक्षु । सुवृजनासु । वृज्यते परित्यज्यते दारिद्र्यमनेनेति वृजनं धनं । शोभनं वृजनं यासां ताः सुवृजनाः । तादृशीषु धनसमृद्धा आद्धादिकर्मपरास्वित्यर्थः । सर्वेभ्य उक्तेभ्यः पितृभ्योऽद्यास्मिन्कर्मणीदं नमोऽस्तु । अयमाहुतिप्रदानपूर्वको नमस्कारो भवतु ॥

॥ अथ तृतीया ॥

आहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजंत पित्वस्त इहागमिष्ठाः ॥३॥
आ । अहं । पितॄन् । सुऽविदत्रान् । अवित्सि । नपातं । च । विऽक्रमणं । च । विष्णोः ।
बर्हिऽसदः । ये । स्वधया । सुतस्य । भजंत । पित्वः । ते । इह । आऽगमिष्ठाः ॥३॥

अहं यजमानः सुविदत्रान् मदीयां भक्तिं सुष्ठु जानतः पितॄनावित्सि । आभिमुख्येन लब्धवानस्मि । विष्णोर्व्यापिनो यज्ञस्य नपातं च विनाशाभावं च विक्रमणं च विशेषेण प्रवृत्तिं च लब्धवानस्मि । ये पितरो बर्हिषदो बर्हिषि सीदंति त इहास्मिन्कर्मण्यागमिष्ठाः । अतिशयेनागताः । आदरपूर्वं समागत्य स्वधया पुरोडाशाद्यन्नेन सह सुतस्याभिषुतस्य सोमलक्षणस्य पित्वः पितोरन्नस्य भागं भजंत । सेवंते । उपयुंजते ॥

॥ अथ चतुर्थी ॥

बर्हिषदः पितर ऊत्य१र्वागिमा वो हव्या चकृमा जुषध्वं ।
त आ गतावसा शंतमेनाथा नः शं योररपो दधात ॥४॥
बर्हिऽसदः । पितरः । ऊती । अर्वाक् । इमा । वः । हव्या । चकृम । जुषध्वं ।
ते । आ । गत । अवसा । शंऽतमेन । अथ । नः । शं । योः । अरपः । दधात ॥४॥

हे बर्हिषदः । यज्ञे सीदंतीति बर्हिषदः । अत्रापि ये वै यज्वानस्ते पितरो बर्हिषद इत्यत्र श्रुतत्वाद्यागं कृत्वा प्रेत्य पितृलोकं प्राप्ता बर्हिषदः । तादृशा हे पितरोऽर्वागर्वाचीनानामस्माकमूती रक्षा भवद्भिः कर्तव्येति शेषः । वो युष्मदर्थमिमा हव्यैतानि हवींषि चकृम । अतस्तानि जुषध्वं । ते हविर्जुष्टवंतो यूयं शंतमेन सुखतमेनावसा रक्षणेन निमित्तभूतेना गत । आभिमुख्येनास्मान्प्राप्नुत । अथानंतरं नोऽस्मभ्यं शं सुखं योर्दुःखवियोगमरपः पापरहितं च दधात । दत्त ॥

महापितृयज्ञे पितरः सोमवंत इत्यस्य याज्योपहूताः पितर इत्येषा। सूत्रितं च। उपहूताः पितरः सोम्यासस्त्वं सोम प्रचिकितो मनीषा। आ० २.१९.। इति॥

॥ सैषा सूक्ते पंचमी॥

उप॑हूताः पि॒तर॑ः सो॒म्यासो॑ ब॒र्हि॒ष्ये॑षु नि॒धिषु॑ प्रि॒येषु॑।
त आ ग॑मंतु॒ त इ॒ह श्रु॑वं॒त्वधि॑ ब्रुवंतु॒ ते॑ऽवंत्व॒स्मान्॥५॥
उप॑ऽहूताः। पि॒तर॑ः। सो॒म्यास॑ः। ब॒र्हि॒ष्ये॑षु। नि॒ऽधिषु॑। प्रि॒येषु॑।
ते। आ। ग॒मं॒तु॒। ते। इ॒ह। श्रु॒वं॒तु॒। अधि॑। ब्रु॒वं॒तु॒। ते। अ॒वं॒तु॒। अ॒स्मान्॥५॥

सोम्यासः सोम्या अस्मदनुग्रहपराः सोमसंपादिनो वा पितरो बर्हिष्येषु यागार्हेषु प्रियेषु तृप्तिकरेषु निधिषु निधिसदृशेषु हविःषु निमित्तभूतेषु सत्सूपहूता अस्माभिराहूतास्ते पितर आ गमंतु। आगच्छंतु। आगत्य चेहास्मिन्कर्मण्यस्माभिः प्रयुक्ताः स्तुतीः श्रुवंतु। शृण्वंतु। श्रुत्वा चाधि ब्रुवंतु। साधुरयं यजमान इत्यादरेण कथयंतु। ते तादृशाः पितरोऽस्मानवंतु। रक्षंतु॥

॥ इति सप्तमस्य षष्ठे सप्तदशो वर्गः॥

॥ अथ षष्ठी॥

आच्या॒ जानु॑ दक्षिण॒तो नि॒षद्ये॒मं य॒ज्ञम॒भि गृ॑णीत॒ विश्वे॑।
मा हिं॑सिष्ट पितर॒ः केन॑ चिन्नो॒ यद्व॒ आग॑ः पुरु॒षता॒ करा॑म॥६॥
आ॒ऽअच्य॑। जानु॑। द॒क्षि॒ण॒तः। नि॒ऽसद्य॑। इ॒मम्। य॒ज्ञम्। अ॒भि। गृ॒णी॒त॒। विश्वे॑।
मा। हिं॒सि॒ष्ट॒। पि॒त॒रः॒। केन॑। चि॒त्। नः॒। यत्। वः॒। आग॑ः। पु॒रु॒षता॑। करा॑म॥६॥

पितॄणामयं स्वाभाविको धर्मोऽथैनं पितरः प्राचीनावीतिनः सव्यं जान्वाच्येति वचनात्। हे पितरो विश्वे सर्वे यूयं जान्वाच्य भूमौ निपात्य दक्षिणतो दक्षिणपार्श्वे निषद्योपविश्येममस्मदीयं यज्ञमभि गृणीत। अभिष्टुत। विशिष्टतृप्तियोगात्परया प्रीत्या सगुणोऽयं यज्ञ इति प्रशंसतेत्यर्थः। अपि च। वोऽयुष्माकं यत्किंचित्कर्मवैगुण्यजनितमागोऽपराधं पुरुषता मनुष्यत्वेन हेतुना कराम वयं कृतवंतो हे पितरः तेन केनचिदप्यपराधेन नोऽस्मान्मा हिंसिष्ट॥

॥ अथ सप्तमी ॥

आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥७॥

आसीनासः । अरुणीनां । उपऽस्थे । रयिं । धत्त । दाशुषे । मर्त्याय ।
पुत्रेभ्यः । पितरः । तस्य । वस्वः । प्र । यच्छत । ते । इह । ऊर्जं । दधात ॥७॥

अरुणीनामारोचमानानां ज्वालानां वा देवतानां वोपस्थे समीपस्थाने वेद्याख्य आसीनास उपविष्टाः पितरो यूयं दाशुषे हविर्दत्तवते मर्त्याय मनुष्याय यजमानाय रयिं धनं धत्त । दत्त । हे पितरो यूयं तस्य यजमानस्य पुत्रेभ्यो वस्वो वसु धनं प्र यच्छत । ते तादृशा यूयमिहास्मिन्नस्मदीये कर्मण्यूर्जं धनं दधात । निधत्त ॥

॥ अथाष्टमी ॥

ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥८॥

ये । नः । पूर्वे । पितरः । सोम्यासः । अनुऽऊहिरे । सोमऽपीथं । वसिष्ठाः ।
तेभिः । यमः । संऽरराणः । हवींषि । उशन् । उशत्ऽभिः । प्रतिऽकामं । अत्तु ॥८॥

सोम्यासः सोमसंपादिनो वसिष्ठा वस्तृतमाः कृताच्छादना धनवत्तमा वा नोऽस्माकं ये पूर्वे पितरः सोमपीथं सोमपानमनूहिरेऽनुपूर्व्येण देवेभ्यश्च पितृभ्यश्च प्राप्नुवंतः । दत्तवंत इत्यर्थः । उशन् पितृभिः सह संभोगं कामयमानो यमः पितृपतिरुशद्भिर्यमेन सह संभोगं कामयमानैस्तेभिस्तैरस्मदीयैः पितृभिः सह रराणो रममाणो हवींष्यस्माभिर्दत्तानि प्रतिकामं कामं कामं प्रत्यत्तु । यानि यानि हवींषि कामयते तानि तानि भक्षयत्वित्यर्थः ॥

महापितृयज्ञेऽग्नेः कव्यवाहनस्य ये तातृषुरित्येषा प्रथमानुवाक्या । सूचितं च । ये तातृषुर्देवत्रा जेहमानास्त्वदग्ने काव्या त्वन्मनीषाः । आ॰ २.१९. । इति ॥

॥ सैषा सूक्ते नवमी ॥

ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः ।
आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ॥९॥

ये । ततृषुः । देवऽत्रा । जेहमानाः । होत्राऽविदः । स्तोमऽतष्टासः । अर्कैः ।

आ । अग्ने । याहि । सुऽविदत्रेभिः । अर्वाङ् । सत्यैः । कव्यैः । पितृऽभिः । घर्मसत्ऽभिः ॥९॥

देवत्रा देवाञ्जेहमानाः क्रमेण गच्छंतः । क्रमेण देवत्वं प्राप्ता इत्यर्थः । होत्राविदो यज्ञान्सम्यक्कर्तुं वेदितारोऽर्कैरर्चनीयैः स्तोत्रैः स्तोमतष्टासः स्तोमानां च सम्यक्कर्तारो ये पितरस्तातृषुस्तृष्यंति हे अग्ने त्वं तैः पितृभिरर्वाङस्मदभिमुख आ याहि । आगच्छ । कीदृशैः । सुविदत्रेभिः सुविदत्रैः सत्यैरविसंवादिभिः कव्यैः । कव्यं नाम पितृदेवत्यं हविः । तत्संबंधिभिः । यद्वा । कव्यैः कविभिर्मेधाविभिः । स्वार्थिको यत् । घर्मसद्भिर्यज्ञसादिभिः ॥

॥ अथ दशमी ॥

ये सत्यासो हविरदो हविष्पा इंद्रेण देवैः सरथं दधानाः ।

आग्ने याहि सहस्रं देववंदैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ॥१०॥

ये । सत्यासः । हविःऽअदः । हविःऽपाः । इंद्रेण । देवैः । सऽरथं । दधानाः ।

आ । अग्ने । याहि । सहस्रं । देवऽवंदैः । परैः । पूर्वैः । पितृऽभिः । घर्मसत्ऽभिः ॥१०॥

सत्यासः सत्या ये पितरो हविरदो भक्षणयोग्यस्य हविषोऽत्तारो भक्षयितारो हविष्पाः पानयोग्यस्य हविषः पातार इंद्रेण देवैः सरथं समानमेकं तुल्यं वा रथं दधानाः । लडर्थे शानच् । गमनाय सदा धारयंति । हे अग्ने तैः पितृभिः सहा याहि । आगच्छ । कीदृशः । सहस्रं । तृतीयार्थे प्रथमा । सहस्रेण । बहुभिरित्यर्थः । देववंदैर्देवसंबंधिभिः स्तोत्रैर्युक्तः । परैः परकालीनैः पूर्वैः पूर्वकालीनैर्घर्मसद्भिर्यज्ञसादिभिर्महावीरसादिभिरादित्यसादिभिर्वा ॥

॥ इति सप्तमस्य षष्ठेऽष्टादशो वर्गः ॥

महापितृयज्ञे पितरोऽग्निष्वात्ता इत्यस्याग्निष्वात्ताः पितर इत्येषा प्रथमानुवाक्या । सूचितं च । अग्निष्वात्ताः पितर एह गच्छत ये चेह पितरो ये च नेह । आ०२.१९. । इति ॥

॥ तत्रैषैकादशी ॥

अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।

अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ॥११॥

अग्निऽस्वात्ताः। पितरः। आ। इह। गच्छत। सदःऽसदः। सदत। सुऽप्रनीतयः।
अत्त। हवींषि। प्रऽयतानि। बर्हिषि। अथ। रयिं। सर्वऽवीरं। दधातन ॥११॥

अग्निष्वात्ता अग्निना स्वादिता एतन्नामकाः पितरो यूयमिहास्मिन्पितृकर्मण्या गच्छत। आगत्य च हे सुप्रणीतयोऽभिपूजितप्रणयना यूयं सदः सदस्तत्तत्स्थानं सदत। सीदत। तत्र तत्र स्थाने यथेष्टमुपविशतेत्यर्थः। उपविश्य च बर्हिष्या-सादितानि प्रयतानि शुचि हवींष्यत्त। भक्षयत। अथानंतरं सर्ववीरं सर्वैर्वीरैः पुत्रपौत्रैरुपेतं रयिं धनं दधातन। अस्मभ्यं दत्त ॥

महापितृयज्ञे वषट्कारक्रियायां त्वमग्न ईळित इत्येषा स्विष्टकृतो याज्या। सूचितं च। योऽग्निः कव्यवाहनस्त्वमग्न ईळितो जातवेद इति संयाज्ये। आ० २.१९.। इति ॥

॥ सैषा द्वादशी ॥

त्वम॑ग्न ईळितो जा॑तवेदोऽवा॑ड्ढ॒व्यानि॑ सुर॒भीणि॑ कृ॒त्वी।
प्रादाः॑ पि॒तृभ्यः॑ स्व॒धया॑ ते अ॑क्षन्न॒द्धि त्वं दे॑व॒ प्रय॑ता ह॒वींषि॑ ॥१२॥

त्वं। अग्ने। ईळितः। जातऽवेदः। अवाट्। हव्यानि। सुरभीणि। कृत्वी।
प्र। अदाः। पितृऽभ्यः। स्वधया। ते। अक्षन्। अद्धि। त्वं। देव। प्रऽयता। हवींषि ॥१२॥

हे जातवेदः। जातं सर्वं जगद्वेत्तीति जातवेदाः। तथाविध हे अग्न ईळि-तोऽस्माभिः स्तुतस्त्वं हव्यान्यस्मदीयानि हवींषि सुरभीणि सुगंधीनि कृत्वी कृत्वावाट्। वहनं कृतवानसि। कृत्वा च पितृभ्यः प्रादाः। ते च पितरः स्वधया स्वधाकारेण दत्तं हविरक्षन्। अदंतु। हे देव त्वमपि प्रयता प्रयत्नसंपादितानि हवींष्यद्धि। भक्षय ॥

महापितृयज्ञे ये चेहेति द्वितीयानुवाक्या। सूत्रमुक्तं ॥

॥ सैषा त्रयोदशी ॥

ये चे॒ह पि॒तरो॒ ये च॒ नेह यांश्च॑ वि॒द्म याँ उ॑ च॒ न प्र॑वि॒द्म।
त्वं वे॑त्थ॒ यति॒ ते जा॑तवेदः स्व॒धाभि॑र्य॒ज्ञं सुकृ॑तं जुषस्व ॥१३॥

ये। च। इह। पितरः। ये। च। न। इह। यान्। च। विद्म। यान्। ऊं इति। च। न। प्रऽविद्म।
त्वं। वेत्थ। यति। ते। जातऽवेदः। स्वधाभिः। यज्ञं। सुऽकृतं। जुषस्व ॥१३॥

ये च पितर इहास्मत्समीपे वर्तंते ये चेह न संति । यांश्च पितॄन्विद्म संनिकृष्टत्वाज्जानीमो याँ उ च नापि च न प्रविद्म विप्रकृष्टत्वाद्वयं न विजानीमः । यति ते यावंतस्ते भवंति तान्सर्वान्यथोक्तान् हे जातवेद उत्पन्नसर्ववस्तुविषयज्ञानाग्ने त्वं वेत्थ जानासि । स्वधाभिर्हविर्लक्षणैरन्नैः सुकृतं साधु कृतं यज्ञं जुषस्व । प्रीत्या गृहाण ॥

पूर्वोक्त एव यागे ये अग्निदग्धा इत्येषा याज्या । सूचितं च । ये अग्निदग्धा ये अनग्निदग्धा इमं यम प्रस्तरमा हि सीदेति द्वे । आ० २.१९. । इति ॥

॥ सैषा सूक्ते चतुर्दशी ॥

ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयंते ।
तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व ॥१४॥

ये । अग्निऽदग्धाः । ये । अनग्निऽदग्धाः । मध्ये । दिवः । स्वधया । मादयंते ।
तेभिः । स्वऽराट् । असुऽनीतिं । एतां । यथाऽवशं । तन्वं । कल्पयस्व ॥१४॥

ये पितरोऽग्निदग्धा अग्निना भस्मीकृताः । श्मशानं प्राप्ता इत्यर्थः । ये च पितरोऽनग्निदग्धाः श्मशानकर्म न प्राप्ता मध्ये दिवो द्युलोकस्य मध्ये स्वधया हविर्लक्षणेनान्नेन मादयंते तृप्यंति हे अग्ने स्वराट् स्वकर्मोपभोगेन दीप्यमानस्तेभिस्तैः पितृभिः सहितः सन् असुनीतिं प्राणानां विषयेषु नेतारमस्मत्पित्रंतरात्मानमेतां तन्वमेतद्देवताशरीरं यथावशं यथाकामं कल्पयस्व । समर्थयस्व । ग्रासयेत्यर्थः ॥

॥ इति सप्तमस्य षष्ठ एकोनविंशो वर्गः ॥

मैनमिति चतुर्दशर्चं षोडशं सूक्तं । यमपुत्रस्य दमनस्यार्षं । आदितो दश त्रिष्टुभस्ततश्चतस्रोऽनुष्टुभः । अग्निर्देवता । तथा चानुक्रांतं । मैनं दमन आग्नेयं चतुरनुष्टुबंतमिति । दीक्षितमरण आद्याः षडृचः शंसनीयाः । सूचितं च । मैनमग्ने वि दहो माभि शोच इति षट् पूषा त्वेतश्च्यावयतु प्र विद्वान् । आ० ६.१०. । इति ॥ दह्यमानस्य प्रेतस्योपस्थानेऽप्येताः शंसनीया ॥

॥ तत्र प्रथमा ॥

मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरीरं ।
यदा शृतं कृणवो जातवेदोऽथेमेनं प्र हिणुतात्पितृभ्यः ॥१॥

मा । एनं । अग्ने । वि । दहः । मा । अभि । शोचः । मा । अस्य । त्वचं । चिक्षिपः । मा । शरीरं ।

यदा । शृतं । कृणवः । जातऽवेदः । अथ । ईं । एनं । प्र । हिणुतात् । पितृऽभ्यः ॥१॥

हे अग्ने एनं प्रेतं मा वि दहः । विशेषेण दग्धं भस्मीभूतं मा कुरु । माभि शोचः । अभितः शोकेन संतापेन युक्तं मा कुरु । अस्य त्वचं मा चिक्षिपः । इतस्ततो विक्षिप्तां मा कुरु । शरीरमपि विक्षिप्तं मा कुरु । हे जातवेदोऽग्ने यदा त्वं शृतं पक्कं सुदग्धं कृणवः करिष्यसि अथ तदानीमीमेनं प्रेतं पितृभ्यः प्र हिणुतात् । पितृसमीपे प्रेरय ॥

॥ अथ द्वितीया ॥

शृतं यदा करसि जातवेदोऽथेमेनं परि दत्तात्पितृभ्यः ।
यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति ॥२॥

शृतं । यदा । करसि । जातऽवेदः । अथ । ईं । एनं । परि । दत्तात् । पितृऽभ्यः ।
यदा । गच्छाति । असुऽनीतिं । एतां । अथ । देवानां । वशऽनीः । भवाति ॥२॥

हे जातवेदो यदा प्रेतशरीरं शृतं पक्कं करसि करिष्यसि अथैं तदानीमेवैनं प्रेतं पितृभ्यः परि दत्तात् । प्रयच्छ । यदायं प्रेत एतामग्निना कृतामसुनीतिं प्राणस्य नयनं प्राणप्रेरणं गच्छाति प्राप्नोति अथ तदानीमेव देवानां वशनीर्देवानां वशं प्रापितो भवति ॥

॥ अथ तृतीया ॥

सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा ।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ॥३॥

सूर्यं । चक्षुः । गच्छतु । वातं । आत्मा । द्यां । च । गच्छ । पृथिवीं । च । धर्मणा ।
अपः । वा । गच्छ । यदि । तत्र । ते । हितं । ओषधीषु । प्रति । तिष्ठ । शरीरैः ॥३॥

हे प्रेत ते त्वदीयं चक्षुरिंद्रियं सूर्यं गच्छतु । प्राप्नोतु । आत्मा प्राणो वातं वाह्यं वायुं गच्छतु । अपि च त्वमपि धर्मणा सुकृतेन तत्फलं भोक्तुं द्यां च । अत्र चशब्दो विकल्पार्थे । द्युलोकं वा पृथिवीं च पृथिवीं वा गच्छ । प्राप्नुहि ।

अपो वांतरिक्षलोकं गच्छ। प्राप्नुहि। तत्रांतरिक्षे हितं स्थापितं ते तव कर्मफलमोषधीषु शरीरैः शरीरावयवैः प्रति तिष्ठ॥

॥ अथ चतुर्थी ॥

अजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः।
यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकं॥४॥

अजः। भागः। तपसा। तं। तपस्व। तं। ते। शोचिः। तपतु। तं। ते। अर्चिः।
याः। ते। शिवाः। तन्वः। जातऽवेदः। ताभिः। वह। एनं। सुऽकृतां। ऊं इति।
लोकं॥४॥

अजो जननरहितः शरीरेंद्रियादिभागव्यतिरिक्तोऽतरपुरुषलक्षणो यो भागोऽस्ति हे अग्ने ते त्वदीयेन तपसा तापनेन तं तादृशं भागं तपस्व। तप्तं कुरु। तथा ते तव शोचिः शोकहेतुर्ज्वालाविशेषस्तं भागं तपतु। संस्करोतु। अपि च ते तवार्चिर्भासको ज्वालाविशेषस्तं भागं तपतु। संस्करोतु। तपःशोचिरर्चिःशब्दानां संतापतारतम्येन भेदः। हे जातवेदः ते तव यास्तन्वो मूर्तयः शिवाः सुखहेतवो न तु तापप्रदास्ताभिरेनं तनूभिः प्रेतं सुकृतां शोभनकर्मकारिणां लोकं स्थानं वह। प्रापय। उशब्दः पूरणः॥

॥ अथ पंचमी ॥

अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः।
आयुर्वसान उप वेतु शेषः सं गच्छतां तन्वा जातवेदः॥५॥

अव। सृज। पुनः। अग्ने। पितृऽभ्यः। यः। ते। आऽहुतः। चरति। स्वधाभिः।
आयुः। वसानः। उप। वेतु। शेषः। सं। गच्छतां। तन्वा। जातऽवेदः॥५॥

हे अग्ने यः प्रेतः पुमान् आहुतश्चितौ मंत्रेण समर्पितः सन् स्वधाभिः स्वधाकारसमर्पितैरुदकादिभिः सह चरति तं प्रेतं पितृभ्यः पितृप्राप्त्यर्थं पुनरव सृज। भूयः प्रेरय। अयं प्रेत आयुर्जीवनं वसान आच्छादयन्। आयुषा युक्त इत्यर्थः। शेषः शिष्यमाणमस्थिलक्षणं यजनीयं शरीरमुप वेतु। उपगच्छतु। हे जातवेदस्तव प्रसादात्तन्वा शरीरेण सं गच्छतां। संगतो भवतु॥

॥ इति सप्तमस्य षष्ठे विंशो वर्गः॥

॥ अथ षष्ठी ॥

यत्ते॑ कृ॒ष्णः श॑कु॒न आ॑तु॒तोद॑ पिपी॒लः स॒र्प उ॒त वा॒ श्वाप॑दः ।
अ॒ग्निष्टद्वि॒श्वाद॑ग॒दं कृ॑णोतु॒ सोम॑श्च॒ यो ब्रा॑ह्म॒णाँ आ॑वि॒वेश॑ ॥ ६॥

यत् । ते॒ । कृ॒ष्णः । श॒कु॒नः । आ॒ऽतु॒तोद॑ । पि॒पी॒लः । स॒र्पः । उ॒त । वा॒ । श्वाप॑दः ।
अ॒ग्निः । तत् । वि॒श्वऽअ॑त् । अ॒ग॒दम् । कृ॒णो॒तु॒ । सोम॑ः । च॒ । यः । ब्रा॒ह्म॒णान् । आ॒ऽवि॒वेश॑ ॥ ६॥

हे मृतशरीर ते तव संबंधि यदंगं कृष्णः शकुनः काकाख्य आतुतोद । आङी-षदर्थे । ईषत्तुन्नवान् । तथा पिपीलः पिपीलिका वा सर्पो वोत वापि वा श्वापदश्च शृगालादिः । एतेषामन्यतमो यदि तुन्नवानित्यर्थः । विश्वात् सर्व-स्यात्ताग्निस्तत्तादृशमंगमगदं कृणोतु । दोषरहितं करोतु । संस्करोत्वित्यर्थः । तथा सोमश्च देवतारूप ओषधिरूपो वा संस्करोतु । यः सोमो ब्राह्मणान् ऋत्विगा-दीनाविवेश । प्रविष्टवान् ॥

अनुस्तरण्या वपया प्रेतस्य मुखमग्नेर्वर्मेत्यनया प्रोर्णुयात् । सूचितं च । अनुस्तरण्या वपामुत्खिद्य शिरोमुखं प्रच्छादयेदग्नेर्वर्म परि गोभिर्व्ययस्वेति । आ० गृ० ४.३. । इति ॥

॥ सैषा सूक्ते सप्तमी ॥

अ॒ग्नेर्वर्म॒ परि॒ गोभि॑र्व्ययस्व॒ सं प्रोर्णु॑ष्व॒ पीव॑सा॒ मेद॑सा च ।
नेत्त्वा॑ धृ॒ष्णुर्हर॑सा॒ जर्हृ॑षाणो द॒धृग्वि॑ध॒क्ष्यन्प॑र्य॒ङ्खया॑ते ॥ ७॥

अ॒ग्नेः । वर्म॑ । परि॑ । गोभिः॑ । व्य॒य॒स्व॒ । सम् । प्र । ऊ॒र्णु॒ष्व॒ । पीव॑सा । मेद॑सा । च॒ ।
न । इत् । त्वा॒ । धृ॒ष्णुः । हर॑सा । जर्हृ॑षाणः । द॒धृक् । वि॒ऽध॒क्ष्यन् । प॒रि॒ऽअ॒ङ्खया॑ते ॥ ७॥

हे प्रेत अग्नेः स्वभूतं वर्म ज्वालालक्षणं कवचं गोभिरनुस्तरणीगोचर्मणा परि व्ययस्व । परितः संवृणु । किंच । पीवसा स्थूलेन मेदसा मांसेन सम्यक् प्रोर्णुष्व । आच्छादय । एवं कृते सति हरसा तेजसा धृष्णुर्धर्षणशीलो जर्हृषाणोऽत्यर्थं हृष्यन् दधृक् धृष्टः प्रगल्भः । ऋत्विगित्यादिना दधृक्शब्दो निपातितः । विधक्ष्यन् विविधं भस्मीकरिष्यन् । एवंभूतोऽग्निस्त्वा त्वां नेत्पर्यंखयाते । नैव सर्वतो विस्तारयति । अखेर्गत्यर्थाल्लेट्युडागमः ॥

इममग्ने चमसमित्यनया प्रणीताप्रणयनमनुमंत्रयते । सूचितं च । इममग्ने चमसं मा वि जिह्वर इति प्रणीताप्रणयनमनुमंत्रयते । आ० गृ० ४.३. । इति ॥

॥ सैषाष्टमी ॥

इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानां ।
एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयंते ॥८॥
इमं । अग्ने । चमसं । मा । वि । जिह्वरः । प्रियः । देवानां । उत । सोम्यानां ।
एषः । यः । चमसः । देवऽपानः । तस्मिन् । देवाः । अमृताः । मादयंते ॥८॥

हे अग्ने इमं चमसं प्रणीताप्रणयनं मा वि जिह्वरः । मा विचालीः । यश्चमसो देवानामिंद्रादीनां प्रिय उतापि च सोम्यानां सोमार्हाणां पितॄणां प्रियः । किंच । य एष चमसो देवपानः । देवाः पिबंत्यस्मिन्निति । देवपानस्थानीयो भवति तस्मिंश्चमसेऽमृता मरणवर्जिता देवाः पितरश्च मादयंते । हव्यैश्च हृष्टा भवंति ॥

॥ अथ नवमी ॥

क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥९॥
क्रव्यऽअदं । अग्निं । प्र । हिणोमि । दूरं । यमऽराज्ञः । गच्छतु । रिप्रऽवाहः ।
इह । एव । अयं । इतरः । जातऽवेदाः । देवेभ्यः । हव्यं । वहतु । प्रऽजानन् ॥९॥

आहिताग्निमरण एतदादिके द्वे ऋचावौपासनोद्वासने विनियुक्ते । तत्र प्रथमायाः पूर्वार्धेन दक्षिणस्यां दिशि चतुष्पथादावौपासनाग्निं निरस्यति । उत्तरेण शांतिकर्मार्थमादत्ते । आ० गृ० ४. ६. ॥ क्रव्यादं । क्रव्यमामिषं । तस्यात्तारं तीव्रमग्निं दूरं विप्रकृष्टदेशे प्र हिणोमि । प्रगमयामि । हि गतौ स्वादिः । रिप्रवाहः । रिप्रं पापं तस्य वोढा सोऽग्निर्यमराज्ञो यमो राजा येषां तान्यमराजकानन्यप्रदेशान्गच्छतु । प्राप्नोतु । अथ शांतिकर्मार्थमुपासन इतरः क्रव्यादादन्यो जातवेदा जातानां वेदिता जातधनो वा प्रजानन् सर्वैर्विज्ञायमानोऽग्निरिहैव देशे देवेभ्यो देवार्थं हव्यं हवनयोग्यं हविर्वहतु । प्रापयतु ॥

॥ अथ दशमी ॥

यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसं ।
तं हरामि पितृयज्ञाय देवं स घर्ममिन्वात्परमे सधस्थे ॥१०॥

यः। अग्निः। क्रव्यऽअत्। प्रऽविवेश। वः। गृहं। इमं। पश्यन्। इतरं। जातऽवेदसं।
तं। हरामि। पितृऽयज्ञाय। देवं। सः। घर्मं। इन्वात्। परमे। सधऽस्थे ॥१०॥

यः क्रव्यादोऽग्निर्देवो युष्माकं गृहिणां गृहं प्रविवेश प्रविष्टवान् तं क्रव्यादं देवं हरामि। गृहाद्बहिर्निष्क्रामयामीत्यर्थः। किमर्थं। पितृयज्ञाय तदर्थं। किं कुर्वन्। इममितरं तस्मादन्यं हव्यवाहं जातवेदसं पश्यन् पर्यालोचयन्। तथा सति क्रव्यादात्परोऽग्निः परम उत्कृष्टे सधस्थे सहस्थाने घर्मं यज्ञमिन्वात् प्राप्नोतु। पितृभिर्घर्मपैः सहेति शेषः ॥

॥ इति सप्तमस्य षष्ठ एकविंशो वर्गः ॥

महापितृयज्ञे वषट्कारक्रियायां यो अग्निः कव्यवाहन इत्येषा स्विष्टकृतो याज्या। सूचितं च। यो अग्निः कव्यवाहनस्त्वमग्न ईळितो जातवेद इति संयाज्ये। आ॰ २.१९.। इति ॥

॥ सैषैकादशी ॥

यो अग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥११॥

यः। अग्निः। कव्यऽवाहनः। पितॄन्। यक्षत्। ऋतऽवृधः।
प्र। इत्। ऊं इति। हव्यानि। वोचति। देवेभ्यः। च। पितृऽभ्यः। आ ॥११॥

कव्यवाहनः कव्यस्य हविषो वोढा योऽग्निः पितॄन् ऋतावृध ऋतस्य यज्ञस्योदकस्य वा वर्धयितॄन् सत्येन वृद्धान्वा देवान्। एतत्पितृविशेषणं वास्तु। तान्यक्षत् यजति। यजेर्लेटि सिप् अडागमः। सोऽग्निर्हव्यानि हवींषि प्र वोचतु। पितृयज्ञे प्रब्रवीतु। युष्मदर्थं मयानीतानीति। इदु पूरणौ। केभ्यः। देवेभ्यश्च पितृभ्यश्च। आकारः समुच्चये ॥

महापितृयज्ञ उशंतस्त्वेत्येषा सामिधेनी। सूत्र्यते हि। उशंतस्त्वा नि धीमहीत्येतां त्रिरनवानन् ताः सामिधेन्यः। आ॰ २.१९.। इति ॥

॥ सैषा द्वादशी ॥

उशंतस्त्वा नि धीमह्युशंतः समिधीमहि।
उशन्नुशत आ वह पितॄन्हविषे अत्तवे ॥१२॥

उशंतः । त्वा । नि । धीमहि । उशंतः । सं । इधीमहि ।

उशन् । उशतः । आ । वह । पितृन् । हविषे । अत्तवे ॥१२॥

हे अग्ने उशंतः कामयमाना वयं त्वा त्वां नि धीमहि । कर्मार्थं स्थापितवंतः । उशंतो वयं समिधीमहि । संदीपयामः । त्वमप्युशन् कामयमानो हविरादिकमुशंत आगंतुकामान्पितृनस्मिन्यज्ञ आ वह । हविषेऽस्माभिः प्रत्तं हविरत्तवेऽत्तुं । अदेस्तु-मर्थे तवेन्प्रत्ययः । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञा ॥

॥ अथ त्रयोदशी ॥

यं त्वमग्ने समदहस्तमु निर्वापया पुनः ।

कियांब्वत्र रोहतु पाकदूर्वा व्यल्कशा ॥१३॥

यं । त्वं । अग्ने । संऽअदहः । तं । ऊं इति । निः । वापय । पुनरिति ।

कियांबु । अत्र । रोहतु । पाकऽदूर्वा । विऽअल्कशा ॥१३॥

हे अग्ने त्वं पितृदहनकाले यं देशं समदहः पुरा सम्यग्दग्धवानसि ॥ तिङि चोदात्तवतीति समो निघातः ॥ तमु तमेव पुनर्निर्वापय । अत्रास्मिन्देशे कियांबु कियत्प्रमाणमुदकं यस्मिन् तत्पुष्करिण्यादिकं रोहतु । उत्पद्यतां । किंच । व्यल्कशा विविधशाखा पाकदूर्वा परिपक्वदूर्वा चोत्पद्यतां ॥

अस्थिसंचयने क्षीरोदकेन शमीशाखया त्रिः प्रसव्यं श्मशानायतनं प्रोक्षति शीतिके शीतिकावतीत्यनया । सूत्रितं च । क्षीरोदकेन शमीशाखया त्रिः प्रसव्यं परिव्रजन्प्रोक्षति शीतिके शीतिकावतीति । आ० गृ० ४.५. । इति ॥

॥ सैषा चतुर्दशी ॥

शीतिके शीतिकावति ह्लादिके ह्लादिकावति ।

मंडूक्या३सु सं गम इमं स्व१ग्निं हर्षय ॥१४॥

शीतिके । शीतिकाऽवति । ह्लादिके । ह्लादिकाऽवति ।

मंडूक्या । सु । सं । गमः । इमं । सु । अग्निं । हर्षय ॥१४॥

हे शीतिके शैत्ययुक्ते हे शीतिकावति । शीतिकाः शैत्ययुक्ता ओषधयः । ताभिस्तद्वति हे ह्लादिक आह्लादयित्रि हे ह्लादिकावत्याह्लादकफलयुक्तैर्वृक्षैस्तद्वति

हे पृथिवि मंडूक्या मंडूकस्त्रिया वृष्टिप्रियया सु सुष्ठु सं गमः। संगच्छस्व ॥ गमेर्लेङि व्यत्ययेन परस्मैपदं ॥ तत इममग्निं सु सुष्ठु हर्षय ॥

॥ इति सप्तमस्य षष्ठे द्वाविंशो वर्गः ॥

॥ इति सायणाचार्यविरचिते माधवीये दाशतय्यां दशमे मंडले प्रथमोऽनुवाकः ॥

द्वितीयेऽनुवाके त्रयोदश सूक्तानि। तत्र त्वष्टा दुहित्र इत्येतच्चतुर्दशर्चं प्रथमं सूक्तं। यमपुत्रो देवश्रवा नामर्षिः। आदितो द्वादश त्रिष्टुभः। त्रयोदशीचतुर्दश्या-वनुष्टुभौ। यद्वा त्रयोदशी पुरस्ताद्बृहती। आदितो द्वयोः सरण्यूर्देवता। पूषा त्वेत इत्याद्याश्चतस्रः पूषदेवत्याः। सरस्वतीं देवयंत इत्याद्यास्तिस्रः सरस्वतीदेवताकाः। आपो अस्मानित्याद्याः पंचर्चोऽब्देवताकाः। तत्र द्रप्सश्चस्कंदेत्याद्यास्तिस्रः सोम-देवत्या वा। अथ चानुक्रांतं। त्वष्टा देवश्रवा द्वे सरण्यूदेवते पौष्ण्यश्चतस्रः सारस्वत्यस्तिस्रः पंचाप्यो द्रप्सस्तिस्रः सौम्यो वांत्ये अनुष्टुभावुपांत्या पुरस्ताद्बृहती वेति ॥ गतः सूक्तविनियोगः ॥ अत्रेतिहासमाचक्षते। त्वष्टृनामकस्य देवस्य सरण्यूस्त्रिशिराश्चेति स्त्रीपुंसात्मकमपत्यद्वयमभूत्। ततस्त्वष्टा सरण्यूनामिकां पुत्रीं विवस्वते प्रायच्छत्। ततस्तस्यां विवस्वतः सकाशाद्यमयम्यौ विजज्ञाते। ततः कदाचिदात्मसदृश्या देवजनितायाः स्त्रियः समीपे तदपत्यद्वयं निधाय स्वयमाश्वं रूपं कृत्वोत्तरान्कुरून्प्रतिजगाम। अथ विवस्वानेतां स्त्रियं सरण्यूमिति मत्वा तामरंसीत्। तस्यां मनुर्नाम राजर्षिरजायत। ततो विवस्वानेषा सरण्यूर्न भव-तीति विज्ञाय स्वयमप्यश्वो भूत्वा तामश्वरूपिणीं प्रायासीत्। ततः संक्रीडमान-योस्तयोः स्वभूतं रेतः पृथिव्यां पपात। अथ सा गर्भकामनया तत्पतितं रेत आजघ्रौ। ततस्तस्याः सकाशान्नासत्यो दस्रश्चेत्युभावश्विनावजायेतामिति ॥

॥ तत्र प्रथमा ॥

त्वष्टा॑ दुहि॒त्रे व॑ह॒तुं कृ॑णो॒तीती॒दं विश्वं॒ भुव॑नं॒ समे॑ति।
य॒मस्य॑ मा॒ता प॑र्यु॒ह्यमा॑ना म॒हो जा॒या विव॑स्वतो ननाश ॥१॥
त्वष्टा॑। दु॒हि॒त्रे। व॒ह॒तुं। कृ॒णो॒ति॒। इति॑। इ॒दं। विश्वं॑। भुव॑नं। सं। ए॒ति॒।
य॒मस्य॑। मा॒ता। परि॒ऽउ॒ह्यमा॑ना। म॒हः। जा॒या। विव॑स्वतः। न॒ना॒श॒ ॥१॥

त्वष्टैतन्नामको देवो दुहित्रे। षष्ठ्यर्थे चतुर्थी। दुहितुः सरण्यूनामिकाया वहतुं वहनं विवाहं। एधिवह्योश्चतुरिति वहेश्चतुप्रत्ययः। तं कृणोति करोतीत्येतेन

हेतुनेदं विश्वं सर्वं भुवनं भूतजातं समेति । तं विवाहं समागमत् । पर्युह्यमाना विवस्वतोड्वोढव्या यमस्य यम्याश्च माता मही महतो विवस्वतो जाया भार्या सरण्यूर्ननाश । उत्तरान्कुरून्प्रति नष्टा । अगच्छदित्यर्थः ॥

॥ अथ द्वितीया ॥

अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते ।
उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ॥२॥

अप । अगूहन् । अमृताम् । मर्त्येभ्यः । कृत्वी । सऽवर्णाम् । अददुः । विवस्वते ।
उत । अश्विनौ । अभरत् । यत् । तत् । आसीत् । अजहात् । ऊं इति । द्वा । मिथुना ।
सरण्यूः ॥२॥

अमृतां मरणधर्मरहितामेतां सरण्यूं मर्त्येभ्यो मनुष्येभ्यस्तदुत्पत्त्यर्थमपागूहन् । अपगूहितवंतः । संवृतवंतः । देवा उपनीतवंत इत्यर्थः । किंच । सवर्णां सरण्युसदृशीमन्यां स्त्रियं कृत्वी कृत्वा तस्मै विवस्वते देवा अददुः । प्रायच्छन् । उतापि च साश्वरूपिणी सरण्यूस्तदाश्विनावभरत् स्वोदरे गर्भभूतौ धारितवती । यद्यदा तज्जायापतिभ्यामश्वरूपात्मना संभोगकाले रेतः पतितमासीत् तदाश्विनौ जनयामासेत्यर्थः । तथा सरण्यूः सरणवत्येतन्नामिका द्वा मिथुना द्वौ मिथुनौ यमयम्यावजहात् त्यक्तवती । जनितवतीत्यर्थः । यद्वा । सरण्यूरेतन्नामिका मध्यमस्थाना देवता मध्यममग्निं माध्यमिकां वाचं चोत्पादितवती ॥

दीक्षितमरणे पूषा त्वेत इत्याद्याश्चतस्रः शंसनीयाः । सूचितं च । पूषा त्वेतश्च्यावयतु प्र विद्वानिति चतस्रः । आ० ६.१०. । इति ॥

॥ सैषा सूक्ते तृतीया ॥

पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥३॥

पूषा । त्वा । इतः । च्यवयतु । प्र । विद्वान् । अनष्टऽपशुः । भुवनस्य । गोपाः ।
सः । त्वा । एतेभ्यः । परि । ददत् । पितृऽभ्यः । अग्निः । देवेभ्यः । सुऽविदत्रियेभ्यः ॥३॥

पूषा पोषयितैतन्नामको देवस्त्वा त्वामितोऽस्माद्देशाल्लोकात्प्र च्यावयतु । प्रकर्षेणोत्तमलोकं गमयतु । कीदृशः । विद्वान् अस्मद्भक्ततां विजानानः । अनष्ट-

पशुरविनश्वरपशुयुक्तः। यस्मिन्सर्वे पशवस्तिष्ठंति न तु नश्यंतीत्यर्थः। भुवनस्य भूतजातस्य गोपा गोपायिता। किंच। प्रच्यवमय्य स पूषैतेभ्यः पितृभ्यस्त्वा त्वां परि ददत्। परिप्रयच्छतु। तथाग्निश्च सुविदत्रियेभ्यः। सुविदत्रं ज्ञानं धनं वा। तदर्हाः सुविदत्रियाः। छांदसो घप्रत्ययः। शोभनज्ञानेभ्यः सुधनेभ्यो वा देवेभ्यस्त्वां प्रयच्छतु। तेषां लोके स्थापयत्वित्यर्थः॥

॥ अथ चतुर्थी ॥

आयुर्विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात्।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥४॥

आयुः। विश्वऽआयुः। परि। पासति। त्वा। पूषा। त्वा। पातु। प्रऽपथे। पुरस्तात्।
यत्र। आसते। सुऽकृतः। यत्र। ते। ययुः। तत्र। त्वा। देवः। सविता। दधातु ॥४॥

विश्वायुः सर्वान्नः सर्वेच गमनशीलो वायुः। वकारलोपश्छांदसः। वायुः। यद्वा। छंदसीण इत्युणप्रत्यये वृद्धौ च कृतायां रूपं। गंता वायुस्त्वा त्वां परि पासति। परिपातु। पूषानुज्ञया परितो रक्षतु॥ पा रक्षणे। लेटि सिप्यडागमः॥ प्रपथे प्रकृष्टे मार्गे स्वर्गे पुरस्तात्सर्वेषां प्रथममेव वर्तमानः पूषा स्वयमेव त्वा त्वां प्रमितं यजमानं पातु। रक्षतु। सुकृतः पुण्यकर्माणो यत्र यस्मिन्देश आसते तिष्ठंति यत्र वा ते सुकृतो ययुः प्राप्तास्तत्र तस्मिन्स्थाने देवो दीप्यमानः सविता सर्वस्य स्वस्वकर्मणि प्रेरक एतन्नामको देवस्त्वा त्वां दधातु। निदधातु॥

एकादशिनस्य पौष्णस्य पशोर्हविषः पूषेमा इत्यनुवाक्या। पूषेमा आशा अनु वेद सर्वाः पशुर्नः ते अन्यद्यजतं ते अन्यत्। आ० ३.७.। इति हि सूचितं॥

॥ सैषा पंचमी ॥

पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत्।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रजानन् ॥५॥

पूषा। इमाः। आशाः। अनु। वेद। सर्वाः। सः। अस्मान्। अभयऽतमेन। नेषत्।
स्वस्तिऽदाः। आघृणिः। सर्वऽवीरः। अप्रऽयुच्छन्। पुरः। एतु। प्रऽजानन् ॥५॥

पूषा देव इमा सर्वा आशाः प्राच्याद्या दिशोऽनु वेद। आनुपूर्व्येण जानाति। इमाः सुखेन गंतव्या असुखेनेति वैवमनुक्रमेण जानातीत्यर्थः। एवं सत्यस्मान्।

प्रमिते यजमानो ब्रवीति पुत्रमुखेन याजकमुखेन वा। अस्मानभयतमेनात्यंतं भयरहितेन मार्गेण नेषत्। नयतु। कथं। स्वस्तिदाः कल्याणस्य दाताघृणिरागतदीप्तियुक्तः सर्ववीरः सर्ववीरैः कर्मणि समर्थैर्ऋत्विग्भिरुपेतोऽप्रयुच्छन् अप्रमाद्यन् प्रजानन् अस्माकं फलाफले विजानानः सन् पुर एतु। अस्माकं पुरस्तागच्छतु। यथास्माकं भयं न भवति तथा गच्छत्वित्यर्थः ॥

॥ इति सप्तमस्य षष्ठे त्रयोविंशो वर्गः ॥

एकादशिनस्य पौष्णस्य पशोः पुरोडाशस्य प्रपथे पथामिति याज्या। सूत्रितं च। प्रपथे पथामजनिष्ट पूषा पथस्पथः परिपतिं वचस्या। आ० ३.७.। इति ॥

॥ सैषा षष्ठी ॥

प्रप॑थे प॒थाम॑जनिष्ट पू॒षा प्रप॑थे दि॒वः प्रप॑थे पृथि॒व्याः।
उ॒भे अ॒भि प्रि॒यत॑मे स॒धस्थे॒ आ च॒ परा॑ च च॒रति प्रजा॒नन् ॥६॥

प्रऽप॑थे। प॒थाम्। अ॒ज॒नि॒ष्ट॒। पू॒षा। प्रऽप॑थे। दि॒वः। प्रऽप॑थे। पृ॒थि॒व्याः।
उ॒भे इति॑। अ॒भि। प्रि॒यत॑मे इति॑ प्रि॒यऽत॑मे। स॒धस्थे॒ इति॑ स॒धऽस्थे॑। आ। च॒।
परा॑। च॒। च॒र॒ति॒। प्र॒ऽजा॒नन् ॥६॥

पथामंतरिक्षगमनहेतुभूतानां मार्गाणां मध्ये प्रपथे यः प्रकृष्टः पंथास्ति तत्र पूषाजनिष्ट। प्रादुरभूत्। पुण्यकर्मणां सुगतिप्रापणार्थमवस्थित इति भावः। तथा दिवो द्युलोकस्य च मार्गाणां मध्ये प्रपथे प्रकृष्टे मार्गे जातः। तथा पृथिव्याः प्रपथे प्रकृष्टे मार्गे मनुष्याणां तत्तत्कर्मणि प्रवर्तनार्थं प्रादुर्भूत इत्यर्थः। सोऽयं पूषा प्रियतमे सर्वस्येष्टतमे सधस्थे सर्वेषां सहावस्थानभूते उभे द्यावापृथिव्यावभिलक्ष्या चरति। आभिमुख्येन चरति। सुकृतिनां सुकृतफलप्रदर्शनायानुकूलं चरतीत्यर्थः। तथा परा चरति। दुःकर्मणां प्रतिकूलं गच्छति। किं कुर्वन्। प्रजानन्। अनेनेदं कर्म कृतमस्य कर्मण इदं फलमित्यविशेषेण जानानः ॥

व्यूळ्हस्य दशरात्रस्य तृतीये छंदोमे प्रउगशस्त्रे सारस्वततृचस्य सरस्वतीं देवयंत इत्येषाद्या। सूत्र्यते हि। प्र ब्रह्माणो अंगिरसो नक्षंत सरस्वतीं देवयंतो हवंते। आ० ८.११.। इति ॥

॥ सैषा सप्तमी ॥

सरस्वतीं देवयंतो हवंते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो अह्वयंत सरस्वती दाशुषे वार्यं दात् ॥७॥
सरस्वतीं । देवऽयंतः । हवंते । सरस्वतीं । अध्वरे । तायमाने ।
सरस्वतीं । सुऽकृतः । अह्वयंत । सरस्वती । दाशुषे । वार्यं । दात् ॥७॥

देवयंतो देवान्यष्टुं स्तोतुं च कामयमाना यजमानाः सरस्वतीमेतन्नामिकां मध्यमस्थानदेवतां हवंते । कर्मावयवत्वायाह्वयंति । तथा तायमाने स्तुतिभिर्हविर्भिश्च विस्तीर्यमाणेऽध्वरे यज्ञे सरस्वतीं यजंतीति शेषः । सुकृतः पुण्यकर्माणः सरस्वतीमह्वयंत । फलप्रदानाय ह्वयंते । यत एवमतः कारणात्सरस्वती देवी दाशुषे हवींषि दत्तवते यजमानाय वार्यं वरणीयं कर्मफलं दात् । प्रयच्छतु ॥

॥ अथाष्टमी ॥

सरस्वति या सरथं ययाथ स्वधाभिर्देवि पितृभिर्मदंती ।
आसद्यास्मिन्बर्हिषि मादयस्वानमीवा इष आ धेह्यस्मे ॥८॥
सरस्वति । या । सऽरथं । ययाथ । स्वधाभिः । देवि । पितृऽभिः । मदंती ।
आऽसद्य । अस्मिन् । बर्हिषि । मादयस्व । अनमीवाः । इषः । आ । धेहि ।
अस्मे इति ॥८॥

हे सरस्वति हे देवि या त्वं सरथं पितृभिः सह समानेन रथेन युक्तं यथा भवति तथा ययाथ । अस्मदीयं यज्ञं प्राप्नासि । किं कुर्वती । पितृभिः सह स्वधाभिर्हविर्लक्षणैरन्नैर्मदंती माद्यंती यज्ञं गच्छसीति संबंधः । सा त्वं बर्हिष्यस्मिन्वेदिस्तरणे यज्ञ आसद्योपविश्य मादयस्व । हविर्भिस्तृप्ता भव । आत्मानं तर्पय वा । ततस्तृप्ता सती त्वमनमीवाः । अमीवा रोगः । तद्वर्जितान्यरोग्यजननानीषोऽन्नान्यस्मे अस्मभ्यमा धेहि । पर्याप्तं प्रयच्छ ॥

॥ अथ नवमी ॥

सरस्वतीं यां पितरो हवंते दक्षिणा यज्ञमभिनक्षमाणाः ।
सहस्रार्घमिळो अत्र भागं रायस्पोषं यजमानेषु धेहि ॥९॥

सरस्वती। यां। पितरः। हवंते। दक्षिणा। यज्ञं। अभिऽनक्षमाणाः।
सहस्रऽअर्घं। इळः। अत्र। भागं। रायः। पोषं। यजमानेषु। धेहि ॥९॥

यां त्वां सरस्वतीं पितरो हवंत आह्वयंति। कीदृशाः। दक्षिणा। दक्षिणादाजित्याच्प्रत्ययः। पा॰ ५.३.३६.। दक्षिणत आगत्य यज्ञमभिनक्षमाणा अभितो गच्छंतो व्याप्नुवंतः। अत्रास्मिन्यज्ञे सहस्रार्घं बहुभिः पूजनीयमुपयोज्यमिळोऽन्नस्य भागं रायो धनस्य पोषं पुष्टिं च यजमानेषु त्वं धेहि। स्थापय ॥

अवभृथस्थान आपो अस्मानित्येषा। सूचितं च। तत आचम्याप्लवंत आपो अस्मान्मातरः शुंधयंतु। आ॰ ६.१३.। इति ॥ दशमेऽहनि वपामार्जनेऽप्येषा। सूचितं च। इदमापः प्र वहतेत्येतस्याः स्थान आपो अस्मान्मातरः शुंधयंतु। आ॰ ८.१२.। इति ॥

॥ सैषा दशमी ॥

आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु।
विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरा पूत एमि ॥१०॥
आपः। अस्मान्। मातरः। शुंधयंतु। घृतेन। नः। घृतऽप्वः। पुनंतु।
विश्वं। हि। रिप्रं। प्रऽवहंति। देवीः। उत्। इत्। आभ्यः। शुचिः। आ। पूतः। एमि ॥१०॥

मातरो जगतो मातृस्थानीया आपोऽस्माञ्शुंधयंतु। प्रोक्षणेन शोधयंतु। तथा घृतप्वः। घृतमुदकं। तेनान्यान्पुनंतीति। तास्तथोक्ता आपः। यद्वा। घृतप्वः। घृतं गव्यं। तेन पुनंति। तथा ब्राह्मणं। घृतेन नो घृतप्वः पुनंतीति तद्वै सुपूतं यद्घृतेन पूयत इति। ता आपो घृतेन प्रत्यक्षेणोदकेन नोऽस्मान्पुनंतु। हि यस्माद्देवीर्देव्यो देवनशीला आपो विश्वं सर्वं रिप्रं पापं प्रवहंति पुरुषसकाशात्प्रगमयंति। अपनयंतीति यावत्। अनंतरमाभ्योऽद्भ्य आ पूत आभिमुख्येन शुद्धः सन् स्तोताहमुदेमि। उद्गच्छामि। ऊर्ध्वं स्वर्गं गच्छामीत्यर्थः ॥

॥ इति सप्तमस्य षष्ठे चतुर्विंशो वर्गः ॥

सुत्येऽहनि द्रप्सश्चस्कंदेत्यादिके द्वे विप्रुड्ढोमार्थे। सूचितं च। द्रप्सश्चस्कंदेति द्वाभ्यां विप्रुड्ढोमौ हुत्वा। आ॰ ५.२.। इति ॥ स्कन्नहविरभिमर्शनेऽपि द्रप्स इत्येषा। आहुतिर्बहिष्परिधि यदि स्कंदेत्तदानीमाग्नीध्रोऽनया जुहुयात्। स्कन्नमभिमृशेदिति प्रकृत्य सूचितं। द्रप्सश्चस्कंदेत्याहुतिश्चेद्बहिष्परिध्याग्नीध्र एनां जुहुयात्। आ॰ ३.१३.। इति ॥

॥ सैषैकादशी ॥

द्रप्सश्चस्कंद प्रथमाँ अनु द्यूनिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरंतं द्रप्सं जुहोम्यनु सप्त होत्राः ॥११॥

द्रप्सः । चस्कंद । प्रथमान् । अनु । द्यून् । इमं । च । योनिं । अनु । यः । च । पूर्वः ।
समानं । योनिं । अनु । संऽचरंतं । द्रप्सं । जुहोमि । अनु । सप्त । होत्राः ॥११॥

द्रप्सोऽभिषूयमाणस्य सोमस्य रसः प्रथमान् पूर्वभाविनः पार्थिवाँल्लोकान् द्यून् दीप्यमानान्द्युलोकांश्चानु लक्षीकृत्य चस्कंद । स्कन्नवान् गतवान् । तदेवाह । इमं परिदृश्यमानं योनिं स्थानभूतं लोकं च यश्चास्मात्पूर्वोऽस्ति तमनुगतवान् । समानं साधारणं योनिं द्यावापृथिवीलक्षणं स्थानमनु संचरंतं सम्यग्गच्छंतं द्रप्सं सोमरसं विप्रुल्लक्षणं सप्त होत्राः सप्तसंख्याका विप्रुड्ढोमस्य कर्तारो होतृप्रभृतयो वयमन्वानुपूर्व्येण जुहोमि । जुहुमः । यद्वा । होत्राः सप्तहोतृभिः क्रियमाणा यागक्रिया होत्राः । ता अनु पश्चादध्वर्युरहं जुहोमि । यद्वा । द्रुतगामित्वाद्द्रप्स आदित्य उच्यते । स आदित्यः पृथिवीं च दिवं च गच्छति समानं योनिमंतरिक्षं लक्षीकृत्य । सम्यक् चरंतं तं द्रप्समादित्यमुद्दिश्य सप्त होत्राः सप्तसंख्याका दिशः । यस्यां दिशि सूर्यो वर्तते तद्व्यतिरिक्ताः सप्तसंख्याका दिशोऽनु पश्चाज्जुहोमि । यत्र यत्र वर्तते तां तां दिशं द्रप्सत्वेन प्रयच्छामि । प्रतिष्ठापयामीत्यर्थः । अत्र वाजसनेयकं । असौ वा आदित्यो द्रप्सः स दिवं च पृथिवीं च स्कंदतीमं च योनिमनु यश्च पूर्व इतीमं च लोकममुं चेत्येतत् समानं योनिमनु संचरंतमिति समानं ह्येष एतं योनिमनु संचरति द्रप्सं जुहोम्यनु सप्त होत्रा इत्यसौ वा आदित्यो द्रप्सो दिशः सप्त होत्रा अमुं तदादित्यं दिक्षु प्रतिष्ठापयति । श॰ ब्राह्म॰ ७.४.१.२०. । इति ॥

॥ अथ द्वादशी ॥

यस्ते द्रप्सः स्कंदति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतं ॥१२॥

यः । ते । द्रप्सः । स्कंदति । यः । ते । अंशुः । बाहुऽच्युतः । धिषणायाः । उपऽस्थात् ।
अध्वर्योः । वा । परि । वा । यः । पवित्रात् । तं । ते । जुहोमि । मनसा । वषट्ऽकृतं ॥१२॥

हे सोम ते त्वदीयो यो द्रप्सो रसः स्कंदति । अधिषवणचर्मणोऽन्यत्र गच्छति ।

यश्च ते त्वदीयोऽंशू रसादितरः सन् स्कंदति । बाहुच्युतोऽध्वर्योर्बाहुभ्यां प्रच्युतः सन् स्कंदति । यद्वा । बाहुवत्साधनभूता ग्रावाणः । तैः प्रच्युतोऽभिषुतः सन् धिषणायाः । धिषणेत्यधिषवणफलकनाम । प्रत्येकविवक्षयैकवचनं । अधिषवणफलकयोरुपस्थात्समीपस्थात्प्रदेशादन्यत्र गच्छति । तथाध्वर्योर्वाभिषुण्वतोऽध्वर्योर्हस्तात्स्कंदति । वापि वा पवित्राद्दशापवित्रात्परिस्कंदति तं सर्वं द्रप्सं ते त्वदीयं रसं मनसांतःकरणेन स्तोत्रेण वा सह वषट्कृतं वषट्कारेण स्वाहाकारेण कृतं जुहोमि । अग्नौ प्रक्षिपामि ॥

॥ अथ त्रयोदशी ॥

यस्ते द्रप्सः स्कन्नो यस्ते अंशुरवश्च यः परः स्रुचा ।
अयं देवो बृहस्पतिः सं तं सिंचतु राधसे ॥१३॥
यः । ते । द्रप्सः । स्कन्नः । यः । ते । अंशुः । अवः । च । यः । परः । स्रुचा ।
अयं । देवः । बृहस्पतिः । सं । तं । सिंचतु । राधसे ॥१३॥

हे सोम ते त्वदीयो यो द्रप्सो रसोऽन्यत्र स्कन्नो गतो यश्च त्वदीयस्तव कारणभूतोऽंशुर्लताखंडो रसादितरो भवति स्रुचा पात्रविशेषेण गृहीतः सोमोऽवोऽवस्तात्स्कंदते परः परस्ताद्वातिरिक्तो भवति तमिमं सोममयं बृहस्पतिरेतन्नामको देवः सं सिंचतु । सम्यक् प्रक्षारयतु । किमर्थं । राधसेऽस्माकं धनार्थं । स्कन्ने हि सोमे प्रजापश्वादिकमपस्कन्नं भवति खलु ॥

॥ अथ चतुर्दशी ॥

पयस्वतीरोषधयः पयस्वन्मामकं वचः ।
अपां पयस्वदित्पयस्तेन मा सह शुंधत ॥१४॥
पयस्वतीः । ओषधयः । पयस्वत् । मामकं । वचः ।
अपां । पयस्वत् । इत् । पयः । तेन । मा । सह । शुंधत ॥१४॥

इयं प्रत्यक्षकृता । हे आपः । ओषधयः पयस्वतीः पयस्वत्यो वृष्टिलक्षणेनोदकेन सारवत्यो भवंति । मामकं मदीयं वचो वचनं वृष्टिप्रार्थनवचनं पयस्वत्सारवद्भवति । किं बहुना । यत्रेह किंचिदपामुदकानां पयः क्षीरवत्सारभूतं यदस्ति

तत्सर्वं पयस्वत्सारवदेव । तेनोदकसारेण सह मा मां शुंधत । यूयं शोधयत । आपो अद्यान्वचारिषं रसेन समगस्महि । ऋग्वे०१.२३.२३.। इति निगमांतरं ॥

॥ इति सप्तमस्य षष्ठे पंचविंशो वर्गः ॥

परं मृत्यो इति चतुर्दशर्चं द्वितीयं सूक्तं । यमपुत्रस्य संकुसुकस्यार्षं । एकादशी प्रस्तारपंक्तिः । आद्यौ जागतौ ततो द्वौ गायत्रौ । प्रस्तारपंक्तिः पुरतः । पिंग०६.१.। इति । त्रयोदशी जगती चतुर्दश्यनुष्टुप् । शिष्टास्त्रिष्टुभः । तत्रादौ चतस्रो मृत्युदेवत्याः । पंचमी धातृदेवताका । षष्ठी त्वष्टृदेवत्या । सप्तम्याद्याः शिष्टाः पितृमेधाभिधायिन्यः । अतस्तद्देवताकाः । अंत्या त्वनिरुक्तत्वात्प्राजापत्या वा । तथा चानुक्रांतं । परं मृत्यो संकुसुकश्चतस्रो मृत्युदेवताः परा धात्री परा त्वाष्ट्री पराः पितृमेधा एकादशी प्रस्तारपंक्तिर्जगत्युपांत्यांत्यानुष्टुप् प्राजापत्या वा सानिरुक्तेति ॥

॥ तत्र प्रथमा ॥

परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥१॥

परं । मृत्यो इति । अनु । परा । इहि । पंथां । यः । ते । स्वः । इतरः । देवऽयानात् ।
चक्षुष्मते । शृण्वते । ते । ब्रवीमि । मा । नः । प्रऽजां । रिरिषः । मा । उत । वीरान् ॥१॥

हे मृत्यो सर्वेषां मारकैतन्नामक देव परमन्यं पंथां पंथानमन्वानुपूर्व्येण परेहि । पराङ्मुखो गच्छ । यजमानादिति शेषः । कोऽसौ पंथा । ते तव स्वः स्वभूतः । देवयानात् । देवा अनेन मार्गेण गच्छंतीति देवयानो देवमार्गः । तस्मादितरो यः पंथास्तं प्रगच्छ । न केवलमतः परागच्छ अपि तु चक्षुष्मते दर्शनवते शृण्वते सर्वं । अप्रतिहतसर्वेंद्रियविज्ञानायेत्यर्थः । ते तुभ्यं ब्रवीमि । कथयामि । नोऽस्माकं प्रजां दुहितृदौहित्रात्मिकां मा रिरिषः । मा हिंसीः । उतापि च वीरान्पुत्रपौत्रादीन्मा हिंसीः । तत्परागमनेन रक्षेत्यर्थः ॥

॥ अथ द्वितीया ॥

मृत्योः पदं योपयंतो यदैत द्राघीय आयुः प्रतरं दधानाः ।
आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः ॥२॥

मृत्योः । पदं । योपयंतः । यत् । ऐत । द्राघीयः । आयुः । प्रऽतरं । दधानाः ।
आऽप्यायमानाः । प्रऽजया । धनेन । शुद्धाः । पूताः । भवत । यज्ञियासः ॥२॥

हे मृतस्य ज्ञातयो मृत्योः परागच्छतस्तस्य पदं। पद्यतेऽस्मिन्निति पदं पितृयाणः। तं योपयंतो विमोहयंतः परिवर्जयंतो यद्यस्मादेत देवयानीयपथा गतवंतस्तस्माद्द्राघीयो दीर्घतरमायुर्जीवनं प्रतरं प्रकृष्टतरमत्यर्थं दधाना धारयंतो भवथ। किंच। हे यज्ञियासो यज्ञार्हा यज्ञसंपादिनो यजमानाः प्रजया पुत्रपौत्रादिकया धनेन गवाश्वादिकेन चाप्यायमाना वर्धमानाः संतः शुद्धा जन्मांतरसंचितदुरितक्षयाच्छुद्धा भवत। पूता वर्तमानजन्मोपचितदुरितक्षयाच्च पूता भवत॥

पैतृमेधिके कर्मण्यमात्या इमे जीवा वि मृतैरिति सव्यावृतो व्रजंति। सूचितं च। इमे जीवा वि मृतैरिति सव्यावृतो व्रजंति। आ० गृ० ४.४.। इति॥

॥ सैषा तृतीया॥

इमे जीवा वि मृतैराववृत्रन्नभूद्भद्रा देवहूतिर्नो अद्य।
प्रांचो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः॥३॥

इमे। जीवाः। वि। मृतैः। आ। अववृत्रन्। अभूत्। भद्रा। देवऽहूतिः। नः। अद्य।
प्रांचः। अगाम। नृतये। हसाय। द्राघीयः। आयुः। प्रऽतरं। दधानाः॥३॥

इमे जीवा जीवंतः पुरुषा मृतैः पित्रादिभिः। तेभ्य इत्यर्थः। व्याववृत्रन् व्यावृत्ता भवंतु। एते न म्रियंतामिति भावः। किंच। अद्यास्मिन्दिने नोऽस्माकमशौचे विसृष्टे देवहूतिः। देवानामाह्वानं यत्र स देवहूतिः पितृमेधाख्यो यज्ञो भद्रा कल्याणोऽभूत्। भवतु। तत उत्तरं वयं प्रांचः प्राङ्मुखांचना अगाम। गच्छेम। प्रत्यंच इति भावः। नृतये नर्तनाय कर्मणि गात्रविक्षेपाय। स्वकर्मानुष्ठानायेति भावः। हसाय हसनाय पुत्रादिभिः सह क्रीडनाय। कीदृशा वयं। द्राघीय आयुः प्रतरं दधानाः॥

॥ अथ चतुर्थी॥

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतं।
शतं जीवंतु शरदः पुरूचीरंतर्मृत्युं दधतां पर्वतेन॥४॥

इमं। जीवेभ्यः। परिऽधिं। दधामि। मा। एषां। नु। गात्। अपरः। अर्थं। एतं।
शतं। जीवंतु। शरदः। पुरूचीः। अंतः। मृत्युं। दधतां। पर्वतेन॥४॥

अनया जीवरक्षार्थं पाषाणं परिधिरूपेण स्थापयंति। जीवेभ्यो जीवद्भ्यः

पुत्रपौत्रादिभ्यस्तेषां रक्षणार्थमेवं परिधिं मृत्योः परिधानभूतं पाषाणं दधामि । निदधामि । तत एषां जीवतां मध्येऽपरोऽन्य एतमिममर्थं । अर्तेरिदं रूपं । गंतव्यं मरणाख्यं मार्गं नु क्षिप्रं मा गात् । मा गच्छतु । एतदर्थं परिधिं स्थापयामीति संबंधः । किंच पुरूचीर्बह्वंचना बहुगमनाः शतं शरद एतत्संख्याकान्वर्षाञ्जीवंतु । स्वस्वप्राणान्धारयंतु । तथा पर्वतेन शिलोच्चयेन मृत्युं सर्वेषां मारकमेतन्नामकमंतर्दधतां । अंतर्हितं कुर्वंतु । यथा नागच्छति तथा कुर्वतामित्यर्थः ॥

॥ अथ पंचमी ॥

यथाहान्यनुपूर्वं भवंति यथ ऋतव ऋतुभिर्यंति साधु ।
यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषां ॥५॥

यथा । अहानि । अनुऽपूर्वं । भवंति । यथा । ऋतवः । ऋतुऽभिः । यंति । साधु ।
यथा । न । पूर्वं । अपरः । जहाति । एव । धातः । आयूंषि । कल्पय । एषां ॥५॥

यथा येन प्रकारेणाहान्यहोरात्रात्मकानि दिनान्यनुपूर्वं पूर्वमनुक्रमेण भवंति परिवर्तंते । यथा चर्तवो वसंतादय ऋतुभिः सह साधु शोभनमविपर्यासेन यंति गच्छंति । यथा च पूर्वं पूर्वकालीनं पितरमपरोऽर्वाक्कालीनः पुत्रो न जहाति न परित्यजति पूर्वमरणेनैवेवं तेनैवोक्तप्रकारेण हे धातः सर्वेषां धारयितरेतन्नामक देवैषामस्मत्कुलीनानां जीवानामायूंषि जीवनानि कल्पय । समर्थय । कुर्वित्यर्थः ॥

॥ इति सप्तमस्य षष्ठे षड्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ ।
इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः ॥६॥

आ । रोहत । आयुः । जरसं । वृणानाः । अनुऽपूर्वं । यतमानाः । यति । ष्ठ ।
इह । त्वष्टा । सुऽजनिमा । सऽजोषाः । दीर्घं । आयुः । करति । जीवसे । वः ॥६॥

हे मृतस्य स्वजनाः पुत्रपौत्रादयो जरसं जरां वृणानाः संभजमाना यूयमायुर्जीवनमा रोहत । अधितिष्ठत । अनुपूर्वमानुपूर्व्येण । अव्ययीभावः । पूर्वो ज्येष्ठः । ज्येष्ठानुपूर्व्या यतमानाः प्रयत्नं कुर्वंतो यूयं यति स्थ यत्संख्याका भवथ ।

यच्छन्दाच्छांदसो डतिः । सुजनिमा शोभनजननस्त्वष्टैतन्नामको देवः सजोषा भवद्भिः संगतः सन् इहास्मिन्कर्मणि प्रवृत्तानां वो युष्माकं जीवसे जीवनाय दीर्घं प्रभूतमायुः करति । करोतु ॥

॥ अथ सप्तमी ॥

इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा सं विशंतु ।
अनश्रवोऽनमीवाः सुरत्ना आ रोहंतु जनयो योनिमग्रे ॥७॥
इमाः । नारीः । अविधवाः । सुऽपत्नीः । आऽअंजनेन । सर्पिषा । सं । विशंतु ।
अनश्रवः । अनमीवाः । सुऽरत्नाः । आ । रोहंतु । जनयः । योनिं । अग्रे ॥७॥

अविधवाः । धवः पतिः । अविगतपतिकाः । जीवद्भर्तृका इत्यर्थः । सुपत्नीः शोभनपतिका इमा नारीर्नार्य आंजनेन सर्वतोऽंजनसाधनेन सर्पिषा घृतेनाक्तनेत्राः सत्यः सं विशंतु । स्वगृहान्प्रविशंतु । तथानश्रवोऽश्रुवर्जिता अरुदत्योऽनमीवाः । अमीवा रोगः । तद्वर्जिताः । मानसदुःखवर्जिता इत्यर्थः । सुरत्नाः शोभनधनसहिता जनयः । जनयंत्यपत्यमिति जनयो भार्याः । ता अग्रे सर्वेषां प्रथमत एव योनिं गृहमा रोहंतु । आगच्छंतु ॥

देवरादिकः प्रेतपत्नीमुदीर्ष्व नारीत्यनया भर्तृसकाशादुत्थापयेत् । सूचितं च । तामुत्थापयेद्देवरः पतिस्थानीयोऽंतेवासी जरद्दासो वोदीर्ष्व नार्यभि जीवलोकं । आ॰ गृ॰ ४.२. । इति ॥

॥ सैषाष्टमी ॥

उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥८॥
उत् । ईर्ष्व । नारि । अभि । जीवऽलोकं । गतऽअसुं । एतं । उप । शेषे । आ । इहि ।
हस्तऽग्राभस्य । दिधिषोः । तव । इदं । पत्युः । जनिऽत्वं । अभि । सं । बभूथ ॥८॥

हे नारि मृतस्य पत्नि जीवलोकं जीवानां पुत्रपौत्रादीनां लोकं स्थानं गृहमभिलक्ष्योदीर्ष्व । अस्मात्स्थानादुत्तिष्ठ । ईर गतौ । आदादिकः । गतासुमपक्रांतप्राणमेतं पतिमुप शेषे । तस्य समीपे स्वपिषि । तस्मात्त्वमेहि । आगच्छ । यस्मात्त्वं हस्तग्राभस्य पाणिग्राहं कुर्वतो दिधिषोर्गर्भस्य निधातुस्तवास्य पत्युः

संबंधादागतमिदं जनित्वं जायात्वमभिलक्ष्य सं बभूथ संभूतास्यनुसरणनिश्चयमकार्षीस्तस्मादागच्छ ॥

क्षत्रियस्य धनुर्हस्तादित्यनया धनुः प्रहरेत्। सूत्रितं च। धनुर्हस्तादाददानो मृतस्येति धनुः। आ॰ गृ॰ ४.२.। इति ॥

॥ सैषा नवमी ॥

धनुर्हस्तादाददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय।

अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम ॥९॥

धनुः। हस्तात्। आऽददानः। मृतस्य। अस्मे इति। क्षत्राय। वर्चसे। बलाय।

अत्र। एव। त्वं। इह। वयं। सुऽवीराः। विश्वाः। स्पृधः। अभिऽमातीः। जयेम ॥९॥

मृतस्य क्षत्रियस्य हस्ताद्धनुराददानः। किमर्थं। अस्मे अस्माकं क्षत्राय प्रजापालनसमर्थाय बलाय वर्चसे तेजसे बलाय सेनालक्षणाय च धनुराददानोऽहं ब्रवीमीति शेषः। किमिति त्वमत्रैवास्मिन्स्थान एव भव वयं चेहास्मिँल्लोके सुवीराः सुपुत्रयुक्ता भवंतो विश्वाः सर्वानभिमातीरभिमन्यमानान्स्पृधः संघर्षयित्रीन्बाधकाञ्शत्रूञ्जयेम। सहेमहि ॥

दीक्षितमरण उप सर्प मातरमित्याद्याश्चतस्रः शंसनीयाः। सूत्रितं च। उप सर्प मातरं भूमिमेतामिति चतस्रः सोम एकेभ्यः। आ॰ ६.१०.। इति ॥ उप सर्पेत्यनया संचितान्यस्थीनि गर्ते निदध्युः। आ॰ गृ॰ ४.५.॥

॥ सैषा दशमी ॥

उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवां।

ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् ॥१०॥

उप। सर्प। मातरं। भूमिं। एतां। उरुऽव्यचसं। पृथिवीं। सुऽशेवां।

ऊर्णऽम्रदाः। युवतिः। दक्षिणाऽवते। एषा। त्वा। पातु। निःऽऋतेः। उपऽस्थात् ॥१०॥

मातरं मातृभूतां भूमिमस्माभिर्भूमौ निधीयमानस्त्वमुप सर्प। उपगच्छ। अनुप्रविशेत्यर्थः। कीदृशीं। उरुव्यचसं बहुव्याप्तिकां पृथिवीं विस्तीर्णां सुशेवां सुसुखां। सर्वेषां सुखदात्रीमित्यर्थः। तामुपगच्छ। युवतिर्यौवनान्विता स्त्रीरूपेयं भूमिर्दक्षिणावत ऋत्विग्भ्यो देयत्वेन धनवते यजमानायोर्णम्रदाः। ऊर्णेवोर्णास्तुक

इव मृद्वी भवति। सुकुमारा भवति। न बाधयित्रीत्यर्थः। सैषा पृथिवी निर्ऋतेर्मृत्युदेवताया उपस्थात्समीपस्थानात्त्वा त्वामस्थिरूपं यजमानं पातु। रक्षतु ॥

॥ इति सप्तमस्य षष्ठे सप्तविंशो वर्गः ॥

उच्छ्वंचस्वेत्येतया पांसूनवकिरेत्। सूच्यते हि। उत्तरया पांसूनवकिरेत्। आ० गृ० ४.५.। इति ॥

॥ सैषैकादशी ॥

उच्छ्वंचस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवंचना।

माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥११॥

उत्। श्वंचस्व। पृथिवि। मा। नि। बाधथाः। सुऽउपायना। अस्मै। भव। सुऽउपवंचना।

माता। पुत्रं। यथा। सिचा। अभि। एनं। भूमे। ऊर्णुहि ॥११॥

हे पृथिवि उच्छ्वंचस्व। ऊर्ध्वगतोच्छ्वासमेनं कुरु। अधस्तान्मा कृथा इत्यर्थः। किंच मा नि बाधथाः। मा संपीड़य। तथास्मै यजमानार्थं सूपायना शोभनोपगमना सूपचारिका भवेत्यर्थः। सूपवंचना। उपवंचनं प्रलंभनं। शोभनप्रलंभा सुप्रतिष्ठा भव। अपि च। माता पुत्रमात्मीयं बालकं सिचा वस्त्रांतेन यथाच्छादयति तद्वद्धे भूम्येनमस्थिरूपं यजमानं त्वमभ्यूर्णुहि। आभिमुख्येनाच्छादय ॥

॥ अथ द्वादशी ॥

उच्छ्वंचमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयंतां।

ते गृहासो घृतश्चुतो भवंतु विश्वाहास्मै शरणाः संत्वत्र ॥१२॥

उत्ऽश्वंचमाना। पृथिवी। सु। तिष्ठतु। सहस्रं। मितः। उप। हि। श्रयंतां।

ते। गृहासः। घृतऽश्चुतः। भवंतु। विश्वाहा। अस्मै। शरणाः। संतु। अत्र ॥१२॥

पांसुभिः प्रच्छाद्यैतां पठंति। उच्छ्वंचमानास्थिकुंभमवष्टभ्योर्ध्वं गच्छंती पृथिवी सु तिष्ठतु। प्रतिष्ठिता भवतु। किंच। सहस्रं सहस्रसंख्याका मितः प्रक्षिप्ताः ॥ मिनोतेरौणादिके कर्मणि क्विपि तुगागमः। ततो जस्। यद्वा। सहस्रं। तृतीयार्थे प्रथमा। मित इति निष्ठांतं रूपं। व्यत्ययेन बहुवचनस्यैकवचनं। स्वरो वृषादित्वाद्द्रष्टव्यः ॥ सहस्रेण संमिता बहुसंख्याकाः पार्थिवाः पांसव उप श्रयंतां।

एनमुपसेवंतां। तं संपरिवार्य तिष्ठंत्वित्यर्थः। हिरवधारणे। तथा ते पांसवोऽस्मै गृहासो गृहा भवंतो घृतश्चुतो घृतस्योदकस्य सर्पिषो वा क्षारयितारो भवंतु। अत्रास्मिँल्लोके विश्वाहा सर्वेष्वहःसु सर्वदास्मा अस्य शरणाः संतु। आश्रयभूता भवंतु ॥

उत्ते स्तभ्नामीति कपालेनास्थीन्यपिदध्यात्। सूचितं च। उत्ते स्तभ्नामीति कपालेनापिधाय। आ॰गृ॰४.५.। इति ॥

॥ सैषा त्रयोदशी ॥

उत्ते॑ स्तभ्नामि पृथि॒वीं त्वत्परी॒मं लो॒गं नि॒दध॒न्मो अ॒हं रि॑षं।

ए॒तां स्थूणां॑ पि॒तरो॑ धारयंतु॒ तेऽत्रा॑ य॒मः साद॑ना ते मिनोतु ॥१३॥

उत्। ते॒। स्त॒भ्ना॒मि॒। पृ॒थि॒वीं। त्वत्। परि॑। इ॒मं। लो॒गं। नि॒ऽदध॑त्। मो इति॑। अ॒हं। रि॒ष॒ं।

ए॒तां। स्थूणां॑। पि॒तरः॑। धा॒र॒यं॒तु॒। ते॒। अत्र॑। य॒मः। सद॑ना। ते॒। मि॒नो॒तु॒ ॥१३॥

हेऽस्थिकुंभ त्वत्परि। परिशब्दयोगे पंचमी। तवोपरि ते त्वदीयेन कपालेन पृथिवीमुत्स्तभ्नामि। प्रतिबध्नामि। यथा पृथिवी तवोपरि मा गच्छति तथापिदधामीत्यर्थः। इमं लोगं कपाललक्षणं लोष्टं निदधदुपरि स्थापयन्नहं मो रिषं। मा हिंसिषं। किंच। एतां मया निहितां स्थूणां ते त्वदीयां पृथिव्या धारयित्रीं कपाललक्षणां पितरो धारयंतु। निश्चलां कुर्वंतु। ततस्ते त्वदीयेऽस्मिन्स्थाने यमः पितृपतिः सदनानि स्थानानि मिनोतु। परिच्छिनत्तु। करोत्वित्यर्थः ॥

॥ अथ चतुर्दशी ॥

प्र॒ती॒ची॒ने॒ मामह॒नीष्वाः॑ प॒र्णमि॒वा द॑धुः।

प्र॒ती॒चीं॑ जग्रभा॒ वाच॒मश्वं॑ रश॒नया॑ यथा ॥१४॥

प्र॒ती॒ची॒ने॑। मां। अह॑नि। इष्वाः॑। प॒र्णऽइ॑व। आ। द॒धुः॒।

प्र॒ती॒चीं॑। ज॒ग्र॒भ॒। वाचं॑। अश्वं॑। र॒श॒नया॑। य॒था ॥१४॥

॥ इति सप्तमस्य षष्ठेऽष्टाविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके षष्ठोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
अष्टके सप्तमे षष्ठं व्याख्याय श्रुतिकोविदः।
सायणार्यस्ततोऽध्यायं सप्तमं व्याचिकीर्षति ॥

अथ द्वादशानुवाकात्मकस्य दशममंडलस्य द्वितीयेऽनुवाके त्रयोदश सूक्तानि। तत्र नि वर्तध्वमित्यष्टर्चं तृतीयं सूक्तं। अस्य यमपुत्रो मथिताख्य ऋषिर्वरुणपुत्रो भृगुर्वाथवा भार्गवश्च्यवनः। षष्ठी गायत्री शिष्टा अनुष्टुभः। इदमब्देवताकं गोदेवताकं वा। अग्नीषोमा पुनर्वसू इत्यर्धर्चोऽग्नीषोमदेवताकः। तथा चानुक्रांतं। नि वर्तध्वमष्टौ मथितो भृगुर्वा वारुणिर्भार्गवश्च्यवनो वाप्यं गव्यं वानुष्टुभमग्नीषोमीयो द्वितीयोऽर्धर्चः षष्ठी गायत्रीति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

नि वर्तध्वं मानु गातास्मान्त्सिषक्त रेवतीः।
अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिं ॥१॥

नि। वर्तध्वं। मा। अनु। गात। अस्मान्। सिसक्त। रेवतीः।
अग्नीषोमा। पुनर्वसू इति पुनःऽवसू। अस्मे इति। धारयतं। रयिं ॥१॥

हे गावो हे आपो वा यूयं नि वर्तध्वं। अस्मान्प्रत्यागच्छत। मानु गात। अस्मद्व्यतिरिक्तं यजमानं मा गच्छत। आगत्य च हे रेवती रेवत्यो धनवत्यो यूयमस्मान्सिषक्त। सेचयत। अवगाहत। गोदोहनस्नानपानादिद्वारेण सेवध्व-

मित्यर्थः। हे पुनर्वसू पुनः पुनर्वस्तारौ स्तोतृणां यष्टृणामाच्छादयितारावेतन्नामकौ देवौ युवामस्मे अस्मासु रयिं व्रीह्यादिलक्षणं धनं धारयतं। स्थापयतं॥

॥ अथ द्वितीया ॥

पुनरेना नि वर्तय पुनरेना न्या कुरु।
इंद्र एणा नि यच्छत्वग्निरेना उपाजंतु ॥२॥
पुनः। एनाः। नि। वर्तय। पुनः। एनाः। नि। आ। कुरु।
इंद्रः। एनाः। नि। यच्छतु। अग्निः। एनाः। उपऽअजंतु ॥२॥

अत्र मंत्रद्रष्टा स्वात्मानं प्रतिब्रूते। हे मदीयात्मन् त्वमेना एता अन्यतोऽभिगंत्रीर्गा अपो वा पुनर्नि वर्तय। पुनः पुनर्मदभिमुखीकुरु। तदनंतरमेना एताः पुनर्भूयो भूयो न्या कुरु। नियता आत्मायत्ताः कुरु। किंच। इंद्रोऽपि तव सहायभूतः सन् एना एता नि यच्छतु। त्वदायत्ताः करोतु। अग्निश्चैना एता गा अपो वोपाजतु। उपगमयतु। उपक्षिपतु वा। उपायोग्याः करोत्वित्यर्थः॥

॥ अथ तृतीया ॥

पुनरेता नि वर्ततामस्मिन्पुष्यंतु गोपतौ।
इहैवाग्ने नि धारयेह तिष्ठतु या रयिः ॥३॥
पुनः। एताः। नि। वर्ततां। अस्मिन्। पुष्यंतु। गोऽपतौ।
इह। एव। अग्ने। नि। धारय। इह। तिष्ठतु। या। रयिः ॥३॥

एना एता ईदृश्यो गाव आपो वा पुनर्नि वर्ततां। भूयो भूयो मां प्रत्यागच्छंतु। आगत्य च गोपतौ सात्त्वादिमतीनां धेनूनां वृष्टिलक्षणानामपां पालकेऽस्मिन्नीदृशे मयि पुष्यंतु। आत्मायत्तत्वेन स्थित्वा पुष्टा भवंतु। पुष्टाः सतीस्ता हे अग्ने त्वमिहैवास्मिन्नेव मयि नि धारय। नियमेन स्थापय। या रयिर्यदपि व्रीह्यादिकं धनमस्ति तदपि धनं गोसहितमिहास्मिन्नेव गोपतौ मयि तिष्ठतु। निवसतु॥

॥ अथ चतुर्थी ॥

यन्नियानं न्ययनं संज्ञानं यत्परायणं।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥४॥

यत्। निऽयानं। निऽअयनं। संऽज्ञानं। यत्। पराऽअयनं।

आऽवर्तनं। निऽवर्तनं। यः। गोपाः। अपि। तं। हुवे ॥४॥

नियानं। अधिकरणे ल्युट्। नियमेन यांत्यागच्छंति गावोऽत्रेति नियानं गोष्ठाख्यं स्थानं। यदस्तीति शेषः। यच्छब्दयोगात्तच्छब्दोऽध्याहर्तव्यः। हुव इति क्रियापदं सर्वत्रानुषज्यते। तत्स्थानं हुवे। आह्वयामि। आह्वानमभिमुखीकरणं तेन चात्र तत्पूर्विका प्रार्थना लक्ष्यते। गोसहितं गोष्ठं प्रार्थय इत्यर्थः। न्ययनं। भावे ल्युट्। नियमेन गृहं प्रति प्राप्तिलक्षणं गमनं यदस्ति तदपि प्रार्थये। निवर्तनं वने चरित्वा गृहं प्रति यदागमनमस्ति तदपि प्रार्थये। योऽपि गोपा गवां पालकोऽस्ति तमपि हुवे। प्रार्थये। सर्वगुणोपेता गाः प्रार्थय इत्यर्थः ॥

॥ अथ पंचमी ॥

य उदानड्व्ययनं य उदानट्परायणं।

आवर्तनं निवर्तनमपि गोपा नि वर्ततां ॥५॥

यः। उत्ऽआनट्। विऽअयनं। यः। उत्ऽआनट्। पराऽअयनं।

आऽवर्तनं। निऽवर्तनं। अपि। गोपाः। नि। वर्ततां ॥५॥

यो गोपा गोपालो व्ययनं नष्टानां गवामन्वेषणार्थं विविधं गमनमुदानट्। व्याप्नोति। अनुभवति। यः परायणं परागमनमुदानट्। व्याप्नोति। वनं प्रति गवां चरणाय गमनमित्यर्थः। यश्चावर्तनं वनचारिणीभिर्गोभिः सह प्रवर्तनमनुभवति। योऽपि गोपा निवर्तनं गोभिः सह वनाद्गृहं प्रति निर्गमनमनुभवति सोऽपि गोपालो नि वर्ततां। गोभिः सह वनाद्गृहं प्रति क्षेमेणागच्छतु ॥

॥ अथ षष्ठी ॥

आ निवर्त नि वर्तय पुनर्न इंद्र गा देहि।

जीवाभिर्भुनजामहै ॥६॥

आ। निऽवर्त। नि। वर्तय। पुनः। नः। इंद्र। गाः। देहि।

जीवाभिः। भुनजामहै ॥६॥

हे इंद्र त्वमा निवर्त। आनिवर्तस्व। अस्मदभिमुखो भव। ततोऽन्यतो गच्छतीर्गा नि वर्तय। अस्मदभिमुखीः कुरु। एवं कृत्वा च हे इंद्र त्वं पुनः

पश्चान्नोऽस्मभ्यं गा धेहि । प्रयच्छ । त्वया दत्ताभिर्जीवाभिश्चिरं जीवतीभिः सर्वस्य जीवयित्रीभिर्वा गोभिर्भुनजामहै । वयं भुंजीमहि । यद्वा । भुजिरंतर्भावितण्यर्थः । देवपितॄन्संभोजयेमहि ॥

॥ अथ सप्तमी ॥

परि वो विश्वतो दध ऊर्जा घृतेन पयसा ।

ये देवाः के च यज्ञियास्ते रय्या सं सृजंतु नः ॥७॥

परि । वः । विश्वतः । दधे । ऊर्जा । घृतेन । पयसा ।

ये । देवाः । के । च । यज्ञियाः । ते । रय्या । सं । सृजंतु । नः ॥७॥

हे देवा विश्वतः सर्वतः स्थितान्वो युष्मानूर्जा गोसंबंधिना दधिलक्षणेनान्नेन घृतेनाज्येन पयसा क्षीरेण च परि दधे । संधारयामि । युष्मभ्यं हविर्द्वारेण प्रयच्छामि । न केवलमात्मानं पुष्णामीत्यर्थः । एतज्ज्ञात्वा ये के च देवा यज्ञिया यज्ञार्हाः संति ते देवा नोऽस्मान् रय्या गोलक्षणेन धनेन सं सृजंतु । संयोजयंतु ॥

॥ अथाष्टमी ॥

आ निवर्तन वर्तय नि निवर्तन वर्तय ।

भूम्याश्चतस्रः प्रदिशस्ताभ्य एना नि वर्तय ॥८॥

आ । निऽवर्तन । वर्तय । नि । निऽवर्तन । वर्तय ।

भूम्याः । चतस्रः । प्रऽदिशः । ताभ्यः । एनाः । नि । वर्तय ॥८॥

मंत्रद्रष्टर्षिः स्वात्मानं गाश्च संबोध्याह । हे मदीयात्मन् त्वं गा आ वर्तय । आकारोऽप्यनेनापि संबध्यते । मदभिमुखीः कुरु । स्तुत्या यागेन च ताः प्रसाद्योपनमयेत्यर्थः । हे गावो यूयमपि प्रसाद्यमाना आ निवर्तन । आनिवर्तध्वं । आभिमुख्येनागच्छत । पुनरप्याह । हे मदीयात्मन् त्वं नि वर्तय । गोसंचरणस्थानादपगच्छंतीर्गा इतोऽभिगंत्रीः कुरु । यूयमपि हे गावो निवर्त्यमानाः सत्यो निवर्तन । निवर्तध्वं । इदानीं स्वात्मा गावश्चर्षिं प्रति ब्रुवते । हे ऋषेऽहं कुतो गा निवर्तयामीति कुतो वयं निवर्तयामह इत्यात्मना गोभिश्च पृष्टः सन्नाह । भूम्याः पृथिव्याश्चतस्रः प्रदिशश्चतुःसंख्यायुक्ताः प्रकृष्टा या दिशः संति ताभ्यो दिग्भ्य एना गा नि वर्तय । हे आत्मन् मदभिमुखीः कुरु । हे गावो यूयमपि

ताभ्यो दिग्भ्यो निवर्तध्वमिति सामर्थ्याल्लब्धं । यद्वा । अध्देवतपक्षेऽपि सूक्तार्थो यथा घटते तथा योजना कर्तव्या ॥

॥ इति सप्तमस्य सप्तमे प्रथमो वर्गः ॥

भद्रमिति दशर्चं चतुर्थं सूक्तं । आद्यैकपदा दशाक्षरा विराट् । अग्निमीळे भुजामित्येषानुष्टुप् नवमी विराट् दशमी त्रिष्टुप् मध्ये षड्गायत्र्यः । इदमादीनां सप्त सूक्तानामिंद्रपुत्रः प्रजापतिपुत्रो वा विमद ऋषिर्वसुक्रपुत्रो वसुकृदाख्यो वा । इदमुत्तरं चाग्नेयं । तथा चानुक्रांतं । भद्रं दश सप्तोत्तराण्यैंद्रो विमदः प्राजापत्यो वा वासुक्रो वसुकृद्वाग्नेयं तु गायत्रमाद्यैकपदा पाद एव वा शांत्यर्थः । परानुष्टुप् अंत्ये विराट्त्रिष्टुभाविति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

भद्रं नो अपि वातय मनः ॥१॥

भद्रं । नः । अपि । वातय । मनः ॥१॥

हे अग्ने त्वं नोऽस्माकं मनो भद्रं शुभयुक्तमपि वातय । अपिरत्र धात्वर्थानुवादी । आगमय । त्वत्संबंधिस्तोत्रकरणे प्रेरयेत्यर्थः ॥

॥ अथ द्वितीया ॥

अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्धरीतुं ।

यस्य धर्मन्त्स्व१रेनीः सपर्यंति मातुरूधः ॥२॥

अग्निं । ईळे । भुजां । यविष्ठं । शासा । मित्रं । दुःऽधरीतुं ।

यस्य । धर्मन् । स्वः । एनीः । सपर्यंति । मातुः । ऊधः ॥२॥

भुजां हविर्भुजां देवानां मध्ये यविष्ठमहन्यहन्यग्निहोत्रादिकर्मार्थं जायमानत्वादतिशयेन युवानं शासानुशासनेन मित्रं । यस्मादिदं कर्तव्यमिदं न कर्तव्यमिति सर्वमनुशास्ति तस्मात्सर्वस्य मित्रभूतमित्यर्थः । दुर्धरीतुं दुर्धरणीयं संग्रामे शत्रुभिर्दुर्निवारणीयं । एवंभूतमग्निमीळे । स्तौमि । अपि च । यस्याग्नेर्धर्मन्धर्मण्यग्निहोत्रादिके कर्मणि स्वर्द्युलोकमादित्यं सर्वं देवजातं वैनीरेन्यः प्रतिगंत्र्य आहुतयः स्तुतयश्च सपर्यंति । परिचरंति । सेवंते । यद्वा । स्वः सपर्यंतीत्यनयोः सामानाधिकरण्यं । अत्र स्वरित्ययं सर्वशब्दो निपातः । स्वः सर्वे देवा एनीरात्मनः

प्रतिगंत्रीराहुतीः स्तुतीश्च सपर्यंति । सेवंते । उपजीवंतीत्यर्थः । तत्र दृष्टांतः । लुप्तोपममेतत् । मातुर्गोरूधः क्षीरोपसंहारस्थानं प्रति यथा वत्सा उपजीवंति तद्वत् । तमग्निमीळ इति पूर्वेण संबंधः ॥

॥ अथ तृतीया ॥

यमासा कृपनीळं भासाकेतुं वर्धयंति ।

भ्राजते श्रेणिदन् ॥३॥

यं । आसा । कृपऽनीळं । भासाऽकेतुं । वर्धयंति ।

भ्राजते । श्रेणिऽदन् ॥३॥

स्तोतारो यष्टारश्चासा स्तुतिहविर्लक्षणेनोपासनेन यमग्निं वर्धयंति । कीदृशं । कृपनीळं कर्मस्थानं कर्माधारमित्यर्थः । भासाकेतुं ज्वालालक्षणज्ञापकं दीप्तेः कर्तारं वा । यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः । सोऽग्निः श्रेणिदन् स्तोतृभ्यो यष्टृभ्योऽभीष्टफलसमूहप्रदः शत्रुभ्यो ज्वालापंक्तिप्रदो वा । एवंभूतः सन् भ्राजते । भासते ॥

॥ अथ चतुर्थी ॥

अर्यो विशां गातुरेति प्र यदानड्दिवो अंतान् ।

कविरभ्रं दीद्यानः ॥४॥

अर्यः । विशां । गातुः । एति । प्र । यत् । आनट् । दिवः । अंतान् ।

कविः । अभ्रं । दीद्यानः ॥४॥

विशां यजमानमनुष्याणामर्यो गंतव्यो गातुर्गमनशीलोऽग्निर्दीद्यानो दीप्यमानो यद्यदैत्यूर्ध्वं गच्छति तदा दिवो द्युलोकस्यांतान्पर्यंतान्कविर्मेधावी सोऽग्निः प्राणट् । प्रकर्षेण व्याप्नोति । अभ्रं मेघोपलक्षितमंतरिक्षं च व्याप्नोति ॥

॥ अथ पंचमी ॥

जुषद्धव्या मानुषस्योर्ध्वस्तस्थावृभ्वा यज्ञे ।

मिन्वन्त्सद्म पुर एति ॥५॥

जुषत् । हव्या । मानुषस्य । ऊर्ध्वः । तस्थौ । ऋभ्वा । यज्ञे ।

मिन्वन् । सद्म । पुरः । एति ॥५॥

मानुषस्य यजमानस्य यज्ञे यजनीये यागे हव्या हव्यानि हवींषि जुषत्सेवमानोऽग्निरूर्ध्वोरूर्ध्वभूतो बहुज्वालोपेत ऊर्ध्वस्तस्थौ। उत्तिष्ठति। ऊर्ध्वं ज्वलतीत्यर्थः। अपि चायमग्निः प्राग्वंशादारभ्य सद्म सदनं सौमिकीं वेदिं मिन्वन् परिच्छिंदन् पुरः पुरस्तादुत्तरवेदिशालामुखीयात्प्रणीयमानः सन् एति। गच्छति॥

॥ अथ षष्ठी ॥

स हि क्षेमो॑ ह॒विर्य॒ज्ञः श्रु॒ष्टीद॑स्य गा॒तुरे॑ति।

अ॒ग्निं दे॒वा वाशी॑मंतं ॥६॥

सः। हि। क्षेमः॑। ह॒विः। य॒ज्ञः। श्रु॒ष्टी। इत्। अ॒स्य॒। गा॒तुः। ए॒ति॒।

अ॒ग्निं। दे॒वाः। वाशी॑ऽमंतं ॥६॥

य उक्तगुणविशिष्टोऽग्निः। हीत्येतदवधारणे। स एवाग्निः क्षेमः कुशलहेतुः सर्वस्य परिपालनहेतुरित्यर्थः। हविः पुरोडाशादिकं च स एव हविषस्तन्निमित्तत्वात्। यज्ञो यागोऽपि स एव तस्यापि तद्धेतुत्वात्। किंच श्रुष्टीत् क्षिप्रमेवास्याग्नेर्गातुर्गमनशीलोऽधिष्ठाताप्येति। देवानामाह्वानार्थं गच्छति। गत्वा च प्रत्यागच्छंतं वाशीमंतं स्तुतिलक्षणया वाचोपेतमग्निं प्रति देवा अपि गच्छंतीति शेषः॥

॥ इति सप्तमस्य सप्तमे द्वितीयो वर्गः ॥

॥ अथ सप्तमी ॥

य॒ज्ञा॒सा॒हं॑ दुव॑ इषे॒ऽग्निं पूर्व॑स्य॒ शेव॑स्य।

अद्रेः॑ सू॒नुमा॒युमा॑हुः ॥७॥

य॒ज्ञ॒ऽस॒हं॑। दुवः॑। इ॒षे॒। अ॒ग्निं। पूर्व॑स्य। शेव॑स्य।

अद्रेः॑। सू॒नुं। आ॒युं। आ॒हुः॒ ॥७॥

अत्रैकवाक्यतायै यत्तच्छब्दावध्याहार्यौ। अपरार्धर्चः पूर्वं व्याख्येयः। आयुं देवानामाह्वानार्थं दूत्येन गंतारं यमग्निमद्रेः सूनुमश्मनः पुत्रमाहुः। त्वमद्भ्यस्त्वमश्मनस्परि। ऋग्वे॰ २.१.१. इत्येवमादयो मंत्रा वदंति। यज्ञसहं यागस्य वोढारं धारयितारमित्यर्थः। तमग्निमभिलक्ष्य दुवः परिचरणमिषे। इच्छामि। किमर्थं। पूर्वस्य। अत्र पूर्वशब्द उत्कृष्टवाची। उत्कृष्टस्य शेवस्य स्वर्गापवर्गलक्षणसुखस्य प्राप्त्यर्थमिति शेषः॥

॥ अथाष्टमी ॥

नरो ये के चास्मदा विश्वेत्ते वाम आ स्युः ।
अग्निं हविषा वर्धंतः ॥८॥

नरः । ये । के । च । अस्मत् । आ । विश्वा । इत् । ते । वामे । आ । स्युरिति स्युः ।
अग्निं । हविषा । वर्धंतः ॥८॥

नरो नेतारो ये के च ये केचित्पुत्रपौत्रादयोऽस्मदस्माकं संति । आकारः पूरकः । ते पुत्रपौत्रादयो वामे वननीये संभजनीये विश्वेद्विश्वस्मिन्नेव पश्वादिधन आ स्युः । आ समंताद्भवेयुः । उपविशेयुरित्याशास्महे । किं कुर्वंतः । अग्निमंगनादिगुणविशिष्टं देवं हविषा पुरोडाशादिकेन वर्धंतो वर्धयंतः ॥

॥ अथ नवमी ॥

कृष्णः श्वेतोऽरुषो यामो अस्य ब्रध्न ऋज्र उत शोणो यशस्वान् ।
हिरण्यरूपं जनिता जजान ॥९॥

कृष्णः । श्वेतः । अरुषः । यामः । अस्य । ब्रध्नः । ऋज्रः । उत । शोणः । यशस्वान् ।
हिरण्यऽरूपं । जनिता । जजान ॥९॥

अत्र यच्छब्दमध्याहृत्य योज्यं । यामः । याति गच्छत्यस्मिन्निति यामो रथः प्रजापतिना निर्मितः । कीदृशः । कृष्णोऽसितवर्णः श्वेतः सितवर्णोऽरुष आरोचमानो ब्रध्नो महान् ऋज्र ऋजुगाम्युतापि च शोणो रक्तवर्णो यशस्वान्कीर्तिमान् । यद्वा । यश इति धननाम । हविर्लक्षणेन धनेन युक्तः । हिरण्यरूपं सुवर्णसदृशं तं रथमस्याग्नेरर्थाय जनिता सर्वस्य जगतो जनयिता प्रजापतिर्जजान । जनयामास । अस्मै दत्तवानित्यर्थः । कथमेकस्यैव रथस्य कृष्णादिनानारूपत्वं संभवतीति चेत् अग्नेः सामर्थ्यातिशयेन संभवतीत्यर्थः । यद्वा हिरण्यरूपमिति रथवाचिना शब्देन सह सामानाधिकरण्यात्कृष्णादिशब्दा द्वितीयांतत्वेन योज्याः । अत्र सर्वगुणोक्तरथवत्तयाग्निः स्तूयत इत्यर्थः ॥

॥ अथ दशमी ॥

एवा ते अग्ने विमदो मनीषामूर्जो नपादमृतेभिः सजोषाः ।
गिर आ वक्षत्सुमतीरियान इषमूर्जं सुक्षितिं विश्वमाभाः ॥१०॥

एव । ते । अग्ने । विऽमदः । मनीषाम् । ऊर्जः । नपात् । अमृतेभिः । सऽजोषाः ।
गिरः । आ । वक्षत् । सुऽमतीः । इयानः । इषम् । ऊर्जम् । सुऽक्षितिम् । विश्वम् । आ ।
अभारित्यभाः ॥१०॥

एवमुक्तप्रकारेण हे ऊर्जो नपादोषधिवनस्पतिपितृभूतस्यान्नस्य पौत्र हे अग्नेऽमृतेभिरमृतैर्हविर्लक्षणैरन्नैः सजोषाः संगतो विमदो नामर्षिर्मनीषां प्रकृष्टां बुद्धिं कामयमानः सन् ते तुभ्यं गिरः स्तुतिलक्षणा वाच आ वक्षत् आभिमुख्येनोक्तवान् । वक्तेश्छंदसि लेटि रूपं । ततस्त्वमेतज्ज्ञात्वा सुमतीरियानः शोभनलक्षणा बुद्धीः संगमयन् इषमन्नमूर्जं क्षीरादिकं रसं च सुक्षितिं शोभननिवासं । यद्वा । क्षितयो मनुष्याः । शोभनपुत्रपौत्रादिकं यत्किंचिद्देयमस्ति तद्विश्वं धनं चाभाः । तस्मै विमदायाहर । देहि ॥

॥ इति सप्तमस्य सप्तमे तृतीयो वर्गः ॥

अग्निं नेत्यष्टर्चं पंचमं सूक्तमास्तारपंक्तिच्छंदस्कं । आद्यौ गायत्रौ पादौ ततो द्वौ जागतौ सास्तारपंक्तिः । ऋषिदेवते पूर्ववत् । तथा चानुक्रांतं । अग्निं नाष्टावास्तारपांक्तमिति ॥ पृष्ठ्यस्य चतुर्थेऽहन्याग्निं न स्ववृक्तिभिरित्याज्यं । आ॰ ७.११. । इति ॥ महाव्रत आग्निमारुते यावतीषूक्थ्विळांदं साम स्तुवीरन् तदानीमादितस्तावत्य ऋचोऽनुरूपार्थाः । सूचितं च । यदीळांदं भूयसीषु चेत् स्तुवीरन्नाग्निं न स्ववृक्तिभिरिति तावतीरनुरूपः । ऐ॰ आ॰ ५.१३. । इति ॥

॥ तत्र प्रथमा ॥

आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।
यज्ञाय स्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे ॥१॥

आ । अग्निम् । न । स्ववृक्तिऽभिः । होतारम् । त्वा । वृणीमहे ।
यज्ञाय । स्तीर्णऽबर्हिषे । वि । वः । मदे । शीरम् । पावकऽशोचिषम् । विवक्षसे ॥१॥

हे अग्ने वस्तव स्वभूते विमद एतदाख्य ऋषौ मयीयं स्तुतिः प्रवृत्तास्ति । नेति संप्रत्यर्थे । अतो वयमिदानीं स्ववृक्तिभिः स्वयंकृताभिर्दोषवर्जिताभिः स्तुतिभिर्होतारं देवानामाह्वातारं होमनिष्पादकं वाग्निं त्वा त्वामा वृणीमहे । आभिमुख्येन संभजामहे । किमर्थं । स्तीर्णबर्हिषे यज्ञाय । तादर्थ्ये चतुर्थी ।

यज्ञार्थं। कीदृशं। शीरमोषध्यादिषु सर्वत्रानुशायिनं। पावकशोचिषं शोधकदीप्तिं। विवक्षसे। महन्नामैतत्। हे अग्ने त्वमपि महान्भवसि। यद्वा विमदे यज्ञस्य संबंधिनः सोमस्य पानजन्यविविधमदार्थं त्वामावृणीमह इति योज्यं ॥

॥ अथ द्वितीया ॥

त्वामु ते स्वाभुवः शुंभंत्यश्वराधसः।
वेति त्वामुपसेचनी वि वो मद ऋजीतिरग्न आहुतिर्विवक्षसे ॥२॥

त्वां। ऊं इति। ते। सुऽआभुवः। शुंभंति। अश्वऽराधसः।
वेति। त्वां। उपऽसेचनी। वि। वः। मदे। ऋजीतिः। अग्ने। आऽहुतिः। विवक्षसे ॥२॥

स्वाभुवः स्वप्रकाशेन दीप्यमाना अश्वराधसो व्याप्तधनास्ते यजमाना हे अग्ने त्वामु त्वामेव शुंभंति। शोभयंति। यज्ञे हविर्भिर्दीपयंतीत्यर्थः। किंच उपसेचनी तवोपरिक्षरणशीलर्जीतिर्ऋजुगामिनी हूयमानाहुतिर्हे अग्ने त्वां वेति। गच्छति। किमर्थं। वस्तव मदे मदनिमित्ते। तृप्त्यर्थमित्यर्थः। किंच त्वमपि विवक्षसे। महान्भवसि ॥

॥ अथ तृतीया ॥

त्वे धर्माण आसते जुहूभिः सिंचतीरिव।
कृष्णा रूपाण्यर्जुना वि वो मदे विश्वा अधि श्रियो धिषे विवक्षसे ॥३॥

त्वे इति। धर्माणः। आसते। जुहूभिः। सिंचतीःऽइव।
कृष्णा। रूपाणि। अर्जुना। वि। वः। मदे। विश्वाः। अधि। श्रियः। धिषे। विवक्षसे ॥३॥

धर्माणो यज्ञस्य धारयितार ऋत्विजो जुहूभिः संपूर्णाहुतिभिर्होमपात्रैस्त्वे त्वामेवासते। सेवंते। तत्र दृष्टांतः। सिंचतीरिव। वृष्टिलक्षणाः पृथिवीं सिंचंत्य आप अग्निं यथा स्वपितृत्वेन सेवंते तद्वत्। अग्नेराप इति श्रुतेस्तस्यापां पितृत्वं। यद्वा। जुहूभिः सिंचतीरिव। सिच्यमाना आहुतय इव धर्माणस्त्वया धार्यमाणा रश्मयस्त्वे त्वय्यासते। निवसंति। हे अग्ने त्वं कृष्णा कृष्णवर्णान्यर्जुनार्जुनानि श्वेतवर्णानि ज्वालांतर्गतरूपाणि च विश्वाः सर्वाः श्रियः शोभा अधि धिषे। अधिकं यथा भवति तथा धारयसि। किमर्थं। वो युष्माकं सर्वेषां देवानां विमदे विविधसोमपानजन्यमदार्थं। यत एवमतो विवक्षसे। त्वं महान्भवसि ॥

॥ अथ चतुर्थी ॥

यमग्ने मन्यसे रयिं सहसावन्नमर्त्य ।
तमा नो वाजसातये वि वो मदे यज्ञेषु चित्रमा भरा विवक्षसे ॥४॥
यं । अग्ने । मन्यसे । रयिं । सहसाऽवन् । अमर्त्य ।
तं । आ । नः । वाजऽसातये । वि । वः । मदे । यज्ञेषु । चित्रं । आ । भर । विवक्षसे ॥४॥

हे अमर्त्य अमरणधर्मन् सहसावन् बलवन् एवंभूत हे अग्ने त्वं यं रयिं मन्यसे सर्वेषु धनेषु यद्धनं वरिष्ठमिति जानासि चित्रं चायनीयं तं रयिं नोऽस्माकं वाजसातयेऽन्नलाभाया भर । आहर । प्रयच्छ । किमर्थं । वो युष्माकं सर्वेषां देवानां यज्ञेषु विमदे विविधसोमादिहविर्जन्यमदनिमित्ते । यागेषु नानाप्रकारैर्हविर्भिर्युष्माकं तर्पणायेत्यर्थः । त्वमपि विवक्षसे । महान्भवसि ॥

॥ अथ पंचमी ॥

अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या ।
भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे ॥५॥
अग्निः । जातः । अथर्वणा । विदत् । विश्वानि । काव्या ।
भुवत् । दूतः । विवस्वतः । वि । वः । मदे । प्रियः । यमस्य । काम्यः । विवक्षसे ॥५॥

अथर्वणैतन्नाम्नर्षिणा जातो जनितोऽग्निः । कथमवगम्यते । त्वामग्ने पुष्करादध्यथर्वा निरमंथत । ऋग्वे० ६.१६.१३. । इति मंत्रांतरात् । विश्वानि समस्तानि काव्या काव्यानि स्तोतृकर्माणि विदत् । वेत्ति । विवस्वतो यजमानस्य दूतो देवानामाह्वानार्थं भुवत् भवति । किंच । यमस्य संयंतुर्यजमानस्य प्रिय इष्टः सन् काम्यः कमनीयः प्रार्थनीयो भवतीत्यर्थः । शिष्टं स्पष्टं ॥

॥ इति सप्तमस्य सप्तमे चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

त्वां यज्ञेष्वीळतेऽग्ने प्रयत्यध्वरे ।
त्वं वसूनि काम्या वि वो मदे विश्वा दधासि दाशुषे विवक्षसे ॥६॥
त्वां । यज्ञेषु । ईळते । अग्ने । प्रऽयति । अध्वरे ।
त्वं । वसूनि । काम्या । वि । वः । मदे । विश्वा । दधासि । दाशुषे । विवक्षसे ॥६॥

हे अग्ने त्वां प्रयति प्रकर्षेण गच्छति प्रवर्तमानेऽध्वरे यागे यज्ञेषु यजनीयेषु हविःष्वासन्नेषु सत्स्वीकृते । ऋत्विग्यजमानाः स्तुवंति । अपि च । हे अग्ने त्वं विश्वा विश्वानि काम्या काम्यानि कमनीयानि वसूनि धनानि दाशुषे हविर्दत्तवते यजमानाय विमदे सोमादिहविर्जन्यतृप्तौ सत्यां दधासि । प्रयच्छसि । अतः कारणाद्विवक्षसे । त्वं महान्भवसि ॥

॥ अथ सप्तमी ॥

त्वां य॒ज्ञेष्वृ॒त्विजं॒ चारु॑मग्ने॒ नि षे॑दिरे ।
घृ॒तप्र॑तीकं॒ मनु॑षो॒ वि वो॒ मदे॑ शु॒क्रं चेति॑ष्ठम॒क्षभि॒र्विव॑क्षसे ॥७॥
त्वां । य॒ज्ञेषु॑ । ऋ॒त्विज॑म् । चारु॑म् । अ॒ग्ने॒ । नि । से॒दि॒रे॒ ।
घृ॒तऽप्र॑तीकम् । मनु॑षः । वि । वः॒ । मदे॑ । शु॒क्रम् । चेति॑ष्ठम् । अ॒क्षऽभिः॑ । विव॑क्षसे ॥७॥

हे अग्ने त्वां मनुष्या यजमाना यज्ञेषु यागेषु नि षेदिरे । नियमेन स्थापयंति । कीदृशं । ऋत्विजं होतृनामकं चारुं रमणीयं घृतप्रतीकमाज्याहुतिपूर्णमुखं शुक्रं ज्वलंतमक्षभिर्व्याप्तैस्तेजोभिश्चेतिष्ठमतिशयेन ज्ञातारं । किमर्थं । वि वो मदे । तव सोमादिहविर्जन्यविविधतृप्त्यर्थं । यस्मादेवं तस्माद्विवक्षसे । महान्भवसि ॥

॥ अथाष्टमी ॥

अग्ने॑ शु॒क्रेण॑ शो॒चिषो॒रु प्र॑थयसे बृ॒हत् ।
अ॒भि॒क्रन्द॑न्वृषायसे॒ वि वो॒ मदे॒ गर्भं॑ दधासि जा॒मिषु॒ विव॑क्षसे ॥८॥
अग्ने॑ । शु॒क्रेण॑ । शो॒चिषा॑ । उ॒रु । प्र॒थ॒य॒से॒ । बृ॒हत् ।
अ॒भि॒ऽक्रन्द॑न् । वृ॒ष॒ऽय॒से॒ । वि । वः॒ । मदे॑ । गर्भ॑म् । द॒धा॒सि॒ । जा॒मिषु॑ । विव॑क्षसे ॥८॥

हे अग्ने बृहन्महांस्त्वं शुक्रेण दीप्तेन शोचिषा तेजसोरु प्रथयसे । विस्तीर्णं यथा भवति तथा प्रख्यातो भवसि । किंच । अभिक्रंदन् आभिमुख्येन युद्धार्थं शत्रूनाह्वयन् वृषायसे । वृष इवाचरसि । युद्धकाले दर्पितवृष इव रोरुवन्नवसीत्यर्थः । त्वं माध्यमिकः सन् जामिषु भगिनीभूतास्वोषधीषु गर्भं बीजलक्षणं दधासि । वृष्टिद्वारेण धारयसि । एकस्मात्प्रजापतेः सकाशादुद्भूतत्वादग्न्योषध्योर्जामित्वमुपचर्यते । कस्मिन्सति । वि वो मदे । तव विविधसोमादिहविर्जन्यमदे संजाते सति ।

यस्मादेवं कृतवानसि तस्मात्त्वं विवक्षसे। महान्भवसि। विवक्षस इति महन्नाम वक्तेर्वा वहतेर्वा सनंतस्य रूपमिति॥

॥ इति सप्तमस्य सप्तमे पंचमो वर्गः॥

कुहेति पंचदशर्चं षष्ठं सूक्तमैंद्रं। पंचदशी त्रिष्टुप्पंचमीसप्तमीनवम्यस्तिस्रोऽनुष्टुभः। शिष्टाः पुरस्ताद्बृहत्यः। आद्यद्वादशकत्र्यष्टकवती पुरस्ताद्बृहती। पूर्ववदृषिः। तथा चानुक्रांतं। कुह पंचोना पुरस्ताद्बार्हतं त्रिष्टुबंतं त्वं त्या चिदानस्त्वं नोऽनुष्टुभ इति॥ चतुर्थेऽहनि निष्केवल्य एतत्सूक्तं। सूचितं च। कुह श्रुत इंद्रो युध्मस्य त इति निष्केवल्यं। आ॰७.११.। इति॥

॥ तत्र प्रथमा॥

कुह॑ श्रु॒त इंद्रः॒ कस्मि॑न्न॒द्य जने॑ मि॒त्रो न श्रू॑यते।

ऋषी॑णां वा॒ यः क्षये॒ गुहा॑ वा॒ चर्कृ॑षे गि॒रा॥१॥

कुह॑। श्रु॒तः। इंद्रः॑। कस्मि॑न्। अ॒द्य। जने॑। मि॒त्रः। न। श्रू॒य॒ते॒।

ऋषी॑णां। वा॒। यः। क्षये॑। गुहा॑। वा॒। चर्कृ॑षे। गि॒रा॥१॥

अद्यास्मिन्दिन इंद्रः कुह कुत्र स्थाने श्रुतो विश्रुतः प्रख्यातः। कस्मिञ्जने यजमान ईज्यत्वेन स्तुत्यत्वेनावस्थितः श्रूयते। प्रख्यायते। तत्र दृष्टांतः। मित्रो न। सूर्य इव सखेव वा तद्वत्। य इंद्र ऋषीणां भृग्वादीनां क्षये निवास आश्रमे गुहा वा गुहायामरण्ये वा गिरा स्तुतिलक्षणया वाचा चर्कृषेऽत्यर्थमाकृष्यते। अत्यर्थं स्तूयत इत्यर्थः। स इंद्रः कुह श्रुत इति पूर्वेण संबंधः॥

॥ अथ द्वितीया॥

इ॒ह श्रु॒त इंद्रो॑ अ॒स्मे अ॒द्य स्तवे॑ व॒ज्र्यृची॑षमः।

मि॒त्रो न यो जने॒ष्वा यश॑श्च॒क्रे अ॒साम्या॥२॥

इ॒ह। श्रु॒तः। इंद्रः॑। अ॒स्मे इति॑। अ॒द्य। स्तवे॑। व॒ज्री। ऋची॑षमः।

मि॒त्रः। न। यः। जने॑षु। आ। यशः॑। च॒क्रे। अ॒सा॑मि। आ॥२॥

इहास्मिन्यज्ञ इंद्रः श्रुतः। प्रख्यातः। अद्यास्मिन्दिवस अस्मे अस्माभिः स्तवे। स्तूयते। कीदृशः। वज्री वज्रवान् ऋचीषमः। यद्याव इंद्र ते शतं शतं भूमीरुत स्युः न त्वा वज्रिन्। ऋग्वे॰८.७०.५.। इत्यादिकया स्तुत्या समानगुण इत्यर्थः।

य इंद्रो मित्रो न सूर्य इव स्निग्ध इव वा जनेषु स्तोतृजनेषु यशोऽन्नं कीर्तिं वाचक्रे । करोति । कीदृशं । असामि । असाधारणं । स इंद्रोऽस्माभिः स्तूयत इति पूर्वेण संबंधः ॥

॥ अथ तृतीया ॥

महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतुजिः ।
भर्ता वज्रस्य धृष्णोः पिता पुत्रमिव प्रियं ॥३॥

महः । यः । पतिः । शवसः । असामि । आ । महः । नृम्णस्य । तूतुजिः ।
भर्ता । वज्रस्य । धृष्णोः । पिता । पुत्रंऽइव । प्रियं ॥३॥

य इंद्रो महो महतः शवसो बलस्य पतिरीश्वरः असाम्या । आङ् मर्यादायां । आ समाप्तेः । अनंतगुण इत्यर्थः । महो महतो नृम्णस्य धनस्य च तूतुजिः स्तोतृभ्यः प्रेरकः । किंच । धृष्णोः शत्रूणां धर्षकस्य वज्रस्य स्वकीयस्यायुधस्य भर्ता य इंद्रो धारयिता स इंद्रोऽस्मान्पात्विति शेषः । तत्र दृष्टांतः । पिता पुत्रमिव प्रियं । यथा पितेप्सितं सुतं पाति तद्वत् ॥

॥ अथ चतुर्थी ॥

युजानो अश्वा वातस्य धुनी देवो देवस्य वज्रिवः ।
स्यंता पथा विरुक्मता सृजानः स्तोष्यध्वनः ॥४॥

युजानः । अश्वा । वातस्य । धुनी इति । देवः । देवस्य । वज्रिऽवः ।
स्यंता । पथा । विरुक्मता । सृजानः । स्तोषि । अध्वनः ॥४॥

हे वज्रिवो वज्रवन्निंद्र । एको मत्वर्थीयोऽनुवादकः । देवो द्योतमानस्त्वं देवस्य द्योतमानस्य वातस्य वायोर्धुनी प्रेरकौ । वायोरपि शीघ्रगामिनावित्यर्थः । अश्वाश्वौ त्वदीयौ हरिनामकौ युजानः स्वरथे संयोजयन् । कीदृशौ । विरुक्मता विरोचनवता पथा मार्गेण स्यंता स्यंतौ गच्छंतौ । अध्वनो युद्धे गमनमार्गान्सृजान उत्पादयन् स्तोषि । सततं स्तूयसे ॥

॥ अथ पंचमी ॥

त्वं त्या चिद्वातस्याश्वागा ऋज्रा त्मना वहध्यै ।
ययोर्देवो न मर्त्यो यंता नकिर्विदाय्यः ॥५॥

त्वं । त्या । चित् । वातस्य । अश्वा । आ । अगाः । ऋज्रा । त्मना । वहध्यै ।
ययोः । देवः । न । मर्त्यः । यंता । नकिः । विदाय्यः ॥५॥

यच्छब्दसंबंधादुत्तरोऽर्धर्चः पूर्वं व्याख्यायते । ययोस्त्वदीययोर्यंता नियंता निवारयिता देवो न देवानां मध्ये कश्चिदपि देवो नास्ति मर्त्यो मनुष्याणां मध्ये कश्चिदपि नास्ति। नकिर्न कश्चिदपि विदाय्यो वेत्ता जवस्य बलस्येति वा शेषः। हे इंद्र त्वं वातस्य वायोर्बलेन जवेन च युक्तावृजर्जुगामिनौ त्या चित्तावप्यश्वा त्वदीयावश्वौ त्मनात्मनैव । सारथिनिरपेक्षेणेत्यर्थः । वहध्यै वहनार्थं । अभिप्रेत-देशप्रापणायेत्यर्थः । आगाः । आभिमुख्येन गच्छसि ॥

॥ इति सप्तमस्य सप्तमे षष्ठो वर्गः ॥

॥ अथ षष्ठी ॥

अध ग्मंतोशना पृच्छते वां कदर्था न आ गृहं ।
आ जग्मथुः पराकाद्दिवश्च ग्मश्च मर्त्यं ॥६॥
अध । ग्मंता । उशना । पृच्छते । वां । कत्ऽअर्था । नः । आ । गृहं ।
आ । जग्मथुः । पराकात् । दिवः । च । ग्मः । च । मर्त्यं ॥६॥

अधाथ यज्ञसमाप्त्यनंतरमुशना भार्गव ऋषिर्हे इंद्राग्नी ग्मंता स्वस्थानं प्रति गच्छंतौ वां युवां पृच्छते। पृच्छति स्म। यद्वोशनेति विभक्तिव्यत्ययः। उशनसमिंद्रस्य सखिभूतं भार्गवमिंद्रं च युवां सर्वो यजमानः पृच्छति। किं पृष्टवानिति उच्यते। युवां कदर्था कदर्थौ किंप्रयोजनवंतौ संतौ नोऽस्मदीयं। आकारः प्रतीत्यस्यार्थे। गृहं प्रति पराकात्। दूरनामैतत्। दूरादा जग्मथुः। आगतवंतौ स्थः। तदेवोक्तं। दिवश्च द्युलोकाच्च ग्मश्च भूलोकाच्च मर्त्यं मनुष्यं मां प्रत्यागतवंतौ । युवयोः कृतार्थत्वादच्चागमनमस्मदनुग्रहार्थमेव न स्वार्थमिति ब्रुवन्ननुव्रजतीत्यर्थः ॥

॥ अथ सप्तमी ॥

आ न इंद्र पृक्षसेऽस्माकं ब्रह्मोद्यतं ।
तत्त्वा याचामहेऽवः शुष्णं यद्धन्नमानुषं ॥७॥
आ । नः । इंद्र । पृक्षसे । अस्माकं । ब्रह्म । उत्ऽयतं ।
तत् । त्वा । याचामहे । अवः । शुष्णं । यत् । हन् । अमानुषं ॥७॥

हे इंद्र त्वं। न इति तृतीयार्थे षष्ठी। नोऽस्माभिरुद्यतमुत्क्षिप्तं। दत्तमित्यर्थः। अस्माकमस्मदीयं ब्रह्म हविर्लक्षणमन्नं। आङ्मर्यादायां। आ तृप्तेरित्यर्थः। पृक्षसे। आत्मना संपर्चय। पृची संपर्के इति धातो रूपं। आभक्षयेत्यर्थः। किंच वयमपि त्वेवंभूतं त्वां तत्। यदुत्कृष्टमस्तीति शेषः। तत्ताहशमन्नमवस्त्रद्रक्षणं च याचामहे। प्रार्थयामहे। तथा यच्छुष्णं बलं चामानुषं मनुष्यादन्यं राक्षसादिकं हन् हंति तदुत्कृष्टं बलं च याचामहे। यद्वा। हे इंद्र त्वं शुष्णमेतन्नामानममानुषं मनुष्यव्यतिरिक्तमसुरं हन् हतवानसि। हत्वा च यद्येन रक्षणेन त्रैलोक्यं पालितवानसि तदवः पालनमस्माकमपि भवेदिति त्वां याचामह इति वाक्यार्थः॥

॥ अथाष्टमी ॥

अकर्मा दस्युरभि नो अमंतुरन्यव्रतो अमानुषः।

त्वं तस्यामित्रहन्वधर्दासस्य दंभय ॥८॥

अकर्मा। दस्युः। अभि। नः। अमंतुः। अन्यऽव्रतः। अमानुषः।

त्वं। तस्य। अमित्रऽहन्। वधः। दासस्य। दंभय ॥८॥

अकर्माविद्यमानयागादिकर्मा दस्युरुपक्षपयिताभ्याभिमुख्येन स्वरूपतो नोऽस्मानमंतुरज्ञाता। यद्वा। अचावेत्युपसर्गस्य वकारलोपो द्रष्टव्यः। अवमंतुरवमंताभिभवितान्यव्रतः श्रुतिस्मृतिव्यतिरिक्तकर्मामानुषो मनुष्यसंव्यवहाराद्बाह्यः। असुरप्रकृतिरित्यर्थः। य एवंभूतोऽस्ति हे अमित्रहन् शत्रूणां हंतरिंद्र त्वं दासस्योपक्षपयितव्यस्य वधर्हंता सन् दंभय। तं शत्रुं हिंधि॥

॥ अथ नवमी ॥

त्वं नं इंद्र शूर शूरैरुत त्वोतासो बर्हणा।

पुरुत्रा ते वि पूर्तयो नवंत क्षोणयो यथा ॥९॥

त्वं। नः। इंद्र। शूर। शूरैः। उत। त्वाऽऊतासः। बर्हणा।

पुरुऽत्रा। ते। वि। पूर्तयः। नवंत। क्षोणयः। यथा ॥९॥

हे शूर विक्रांतेंद्र त्वं शूरैर्भटैर्मरुद्भिः सहितः सन् नोऽस्मान्पाहीति शेषः। उतापि च त्वोतासस्त्वया रक्षिता वयं बर्हणा परिबर्हणायां शत्रूणां हिंसायां समर्था भवेम। किंच। ते त्वदीयाः पूर्तयः कामानां पूरणानीप्सितार्थप्रदानानि

पुरुत्रा बहून्स्तोतॄन्वि नवंत । विविधं व्याप्नुवंति । श्रोणयः । मनुष्यनामैतत् । मनुष्याः स्वकीयं स्वामिनं सेवार्थं यथा व्याप्नुवंति तद्वत् ॥

॥ अथ दशमी ॥

त्वं तान्वृ॑त्रहत्ये॑ चोदयो॒ नॄन्का॑र्पा॒णे शू॑र वज्रिवः ।
गुहा॒ यदी॑ कवीनां विशां नक्ष॑त्रशवसां ॥१०॥
त्वं । तान् । वृत्रऽहत्ये॑ । चोदयः॒ । नॄन् । कार्पा॒णे । शू॑र । वज्रिऽवः॒ ।
गुहा॑ । यदि॑ । कवीनां । विशां । नक्ष॑त्रऽशवसां ॥१०॥

हे वज्रिवो वज्रधर शूरेंद्र त्वं कार्पाणे । असिः कृपाणः । तेन साध्यं युद्धं कार्पाणं । तस्मिन्वृत्रहत्ये शत्रुहननार्थं नॄन् नरान् तान्प्रसिद्धान्मरुद्गणाञ्चोदयः । चोदयसि । प्रेरयसि । यदि यदा त्वं कवीनां मेधाविनां नक्षत्रशवसां देवान् प्रतिगच्छत्स्तोतृबलानां विशां स्तोतृजनानां संबंधीनि गुहा गूढानि गुणैः संवृतानि स्तोत्राणि शृणोषीति शेषः । तदा प्रेरयसीति पूर्वेणान्वयः ॥

॥ इति सप्तमस्य सप्तमे सप्तमो वर्गः ॥

॥ अथैकादशी ॥

म॒क्षू ता त॑ इंद्र दा॒नाप्न॑स आक्षा॒णे शू॑र वज्रिवः ।
यद्ध॒ शुष्ण॑स्य दं॒भयो॑ जा॒तं विश्वं॑ स॒याव॑भिः ॥११॥
म॒क्षु । ता । ते॒ । इं॒द्र॒ । दा॒न॒ऽअ॒प्न॒सः॒ । आ॒क्षा॒णे । शू॒र॒ । व॒ज्रि॒ऽवः॒ ।
यत् । ह॒ । शुष्ण॑स्य । दं॒भयः॑ । जा॒तं । विश्वं॑ । स॒याव॑ऽभिः ॥११॥

हे शूर विक्रांत वज्रिवो वज्रोपेतेंद्र दानाप्नसो दानकर्मणः । स्तोतृभ्यः सततमभीष्टफलप्रदस्येत्यर्थः । ते तव स्वभूतानि मक्षु क्षिप्राण्यविलंबितानि । क्षिप्रकारणयुक्तानीत्यर्थः । आक्षाणे योद्धृभिर्व्याप्यमाने त्वय्यवस्थितानि ता तानि कर्माणि स्तोतारः स्तुवंतीति शेषः । सयावभिः सहयातृभिर्मरुद्भिः सहितस्त्वं शुष्णस्यासुरस्य विश्वं जातं सर्वमपत्यजातं दंभयः । अदंभयः । हिंसितवानसि । यद्ध । एवमादीनि यानि खलु कर्माणि संति तानि स्तुवंतीति पूर्वेण संबंधः ॥

॥ अथ द्वादशी ॥

माकुध्र्यगिंद्र शूर वस्वीरस्मे भूवन्नभिष्टयः ।
वयंवयं त आसां सुम्ने स्याम वज्रिवः ॥१२॥

मा । अकुध्र्यक् । इंद्र । शूर । वस्वीः । अस्मे इति । भूवन् । अभिष्टयः ।
वयंऽवयं । ते । आसां । सुम्ने । स्याम । वज्रिऽवः ॥१२॥

हे शूर विक्रांतेंद्र अस्मे अस्माकं स्वभूता वस्वीर्महत्योऽभिष्टय आभिमुख्येष्टयः इज्याः । यद्वा । आभिमुख्येच्छा अभीप्सितप्रार्थनाः कुध्र्यक् कुत्सिताः । विफला इत्यर्थः । मा भूवन् । किंतर्हि हे वज्रिवो वज्रिन्निंद्र ते तव प्रसादाद्वयंवयमृत्विग्यजमानाः । द्विर्वचनमतित्वराप्रदर्शनार्थं । आसामिज्यानामिच्छानां वा संबंधिनि सुम्ने सुखेऽवस्थिताः स्याम । भवेम । वयमभिष्टिजन्येन दृष्टादृष्टसुखेन युक्ताः शीघ्रं भवेमेत्याशास्महे इत्यर्थः ॥

॥ अथ त्रयोदशी ॥

अस्मे ता त इंद्र संतु सत्याहिंसंतीरुपस्पृशः ।
विद्याम यासां भुजो धेनूनां न वज्रिवः ॥१३॥

अस्मे इति । ता । ते । इंद्र । संतु । सत्या । अहिंसंतीः । उपऽस्पृशः ।
विद्याम । यासां । भुजः । धेनूनां । न । वज्रिऽवः ॥१३॥

हे इंद्र अस्मे अस्माकं स्वभूताः । ता सत्येत्युभयत्र प्रथमाबहुवचनस्य छांदस आकारः सति निर्देशस्याविशेषणत्वात् । ता तास्तादृश्य उपस्पृशः । त्वामुपगम्य स्पृशंतीत्युपस्पृशः स्तुतयः । ते तव प्रसादात्सत्या सत्याः संतु । यथार्था भवंतु । तव सद्गुणग्राहिण्य इत्यर्थः । अपि चाहिंसंतीस्त्वामहिंसंत्यश्च भवंतु । सत्स्तुतित्वादनुद्वेजयंत्यश्च भवंत्वित्यर्थः । हे वज्रिव इंद्र यासां स्तुतीनां संबंधिनो भुजो दृष्टादृष्टान्भोगान्विद्याम । वयं लभेमहि । तत्र दृष्टांतः । धेनूनां न । गवां क्षीरादिभोगान्यथा गोस्वामी लभते तद्वत् । ताः सत्या भवंत्विति पूर्वेणान्वयः ॥

॥ अथ चतुर्दशी ॥

अहस्ता यदपदी वर्धत क्षाः शचीभिर्वेद्यानां ।
शुष्णं परि प्रदक्षिणिद्विश्वायवे नि शिश्नथः ॥१४॥

अहस्ता। यत्। अपदी। वर्धत। क्षाः। शचीभिः। वेद्यानां।

शुष्णं। परि। प्रऽदक्षिणित्। विश्वऽआयवे। नि। शिश्नथः ॥१४॥

हे इंद्र यद्यदा क्षा भूमिरहस्ता पाणिरहितापदी चरणवर्जिता च। अमनुष्यकर्मेत्यर्थः। वेद्यानां स्तोत्रयोग्यानां त्वत्प्रभृतीनां देवानां संबंधिभिः शचीभिः कर्मभिर्वर्धत। अवर्धत। धनधान्यादिभिः समृद्धेत्यर्थः। तदा त्वं परि प्रदक्षिणिदेवंभूतां पृथिवीं परिवेष्ट्य प्रदक्षिणं यथा भवति तथा स्थितं शुष्णमसुरं विश्वायवे। तादर्थ्ये चतुर्थी। सर्वत्राप्रतिहतगामिन एतदाख्यस्यौर्वशेयराज्ञोऽर्थाय नि शिश्नथः। नितरां ताडितवानसि। यद्वा यदा शुष्णस्याच्छादनार्थं हस्तपादवर्जिता काचित्पृथिवी वेदितव्यानामसुराणां मायारूपैः कर्मभिः शुष्णमसुरं वेष्ट्य प्रदक्षिणं यथा भवति तथावस्थितावर्धत तदानीं तां मायोत्पादितां पृथिवीं विश्वायवे सर्वव्यापकस्य मरुद्गणस्य प्रवेशनार्थं नि शिश्नथः ॥

॥ अथ पंचदशी ॥

पिबापिबेदिंद्र शूर सोमं मा रिषण्यो वसवान वसुः सन्।

उत त्रायस्व गृणतो मघोनो महश्च रायो रेवतस्कृधी नः ॥१५॥

पिबऽपिब। इत्। इंद्र। शूर। सोमं। मा। रिषण्यः। वसवान। वसुः। सन्।

उत। त्रायस्व। गृणतः। मघोनः। महः। च। रायः। रेवतः। कृधि। नः ॥१५॥

पिबपिबेति वीप्सातित्वराप्रदर्शनार्थं। हे शूर वीरेंद्र त्वमभिषुतं सोमं शीघ्रं पिब। यागकालातिपातो यावन्न भवति तावच्छीघ्रं सोमं पिबेत्यर्थः। इदिति पूरणः। हे वसवान वसूनां धनानामानेतस्त्वं वसुः प्रशस्तः सन् मा रिषण्यः। यागकालातिक्रमजातेन दोषेणास्मान्मा हिंसीः। प्रशस्तस्य तव कर्मवैगुण्यकरणेन हिंसितुमयुक्तमित्यर्थः। उतापि च। हे इंद्र त्वं गृणतस्त्वां स्तुवतः स्तोतॄन्मघोनो हविर्लक्षणधनवतो यजमानांश्च त्रायस्व। प्रमादजनितकर्मवैगुण्यदोषात्पालयस्व। किंच महश्च राय इत्युभयत्र तृतीयार्थे षष्ठी। महो महता रायो धनेन च नोऽस्मान्रेवतः कृधि। धनवतः कुरु ॥

॥ इति सप्तमस्य सप्तमेऽष्टमो वर्गः ॥

यजामह इति सप्तर्चं सप्तमं सूक्तं। प्रथमासप्तम्यौ त्रिष्टुभौ। पंचम्यभिसारिणी। द्विर्दशकद्विर्द्वादशकवतीत्यभिसारिणीत्युच्यते। शिष्टाश्चतस्रो जगत्यः। पूर्ववदृषि-

देवते । तथा चानुक्रांतं । यजामहे सप्ताद्यांत्ये त्रिष्टुभौ पंचम्यभिसारिणीति ॥ चतुर्थेऽहनि माध्यंदिनसवने तृतीयापंचम्योरावर्तनेन त्रीस्तृचान् होत्रका एकैकं तृचमावपेरन् । सूचितं च । यजामह इंद्रं वज्रदक्षिणमिति द्वितीयानेवमेव । आ० ७.११. । इति ॥

॥ तत्र प्रथमा ॥

यजामह इंद्रं वज्रदक्षिणं हरीणां रथ्यं विव्रतानां ।
प्र श्मश्रु दोधुवदूर्ध्वथा भूद्वि सेनाभिर्दयमानो वि राधसा ॥१॥
यजामहे । इंद्रं । वज्रऽदक्षिणं । हरीणां । रथ्यं । विऽव्रतानां ।
प्र । श्मश्रु । दोधुवत् । ऊर्ध्वऽथा । भूत् । वि । सेनाभिः । दयमानः । वि । राधसा ॥१॥

वयमिंद्रं यजामहे । सोमलक्षणैर्हविर्भिः पूजयामः । कीदृशं । वज्रदक्षिणं शत्रुवधाय सततं वज्रो दक्षिणे हस्ते यस्य तं । विव्रतानां रथवहनादिविविधकर्मणां हरीणामेतत्संज्ञकानामश्वानां रथ्यमानेतारं । स इंद्रः सोमपानानंतरं श्मश्रु स्वकीयानि श्मश्रूणि दोधुवत् पुनः पुनर्धून्वानः सन् ऊर्ध्वथोर्ध्वं प्र भूत् । प्रादुरभूत् । किंच । सेनाभिर्मरुदादिस्वकीयैः सैन्यैर्वि दयमानो विविधं शत्रून्हिंसन् राधसा । द्वितीयार्थे तृतीया । राधो धनं । वीत्युपसर्गश्रुतेर्योग्यक्रियाध्याहारः । विविधं स्तोतृभ्यो ददाति ॥

॥ अथ द्वितीया ॥

हरी न्वस्य या वने विदे वस्विंद्रो मघैर्मघवा वृत्रहा भुवत् ।
ऋभुर्वाज ऋभुक्षाः पत्यते शवोऽव क्ष्णौमि दासस्य नाम चित् ॥२॥
हरी इति । नु । अस्य । या । वने । विदे । वसु । इंद्रः । मघैः । मघऽवा । वृत्रऽहा । भुवत् ।
ऋभुः । वाजः । ऋभुक्षाः । पत्यते । शवः । अव । क्ष्णौमि । दासस्य । नाम । चित् ॥२॥

अस्येंद्रस्य संबंधिनौ या यौ हरी अश्वौ वने । वन्यंते संभज्यंतेऽस्मिन्देवा इति वनं यज्ञोऽरण्यं वा । तस्मिन्वस्वृजीषलक्षणं धनं यवसलक्षणं वा नु क्षिप्रं विदे । विंदेते । लभेते । यद्वा । यौ हरी अस्येंद्रस्य वने संभजनार्थं वसु वसुनो लाभाय क्षिप्रं भवत इति शेषः । ताभ्यां हरिभ्यां मघैर्धनैर्मघवान्धनवानिंद्रो वृत्रहा वृत्राख्यस्यासुरस्य मेघस्य वा हंता भुवत् । भवति । अपि च । ऋभुर्दीप्तो वाजो बलवान् ऋभुक्षा महानिंद्रः शवः शवसो बलस्य धनस्य वा पत्यते । ईष्टे । यद्वा ।

शत्रूणां बलं प्रति पत्यते। प्रतिपद्यते। गच्छति। अहमपि तस्य प्रसादाद्धासस्योपक्षपयितव्यस्य शत्रोर्नाम चित्। नम्यतेऽनेनेति नाम शिरः। तदप्येव क्ष्णौमि। अवहन्मि। किमुतान्यदंगं। अथवा। नामधेयमपि नाशयामि किमुत शत्रुं ॥

॥ अथ तृतीया ॥

यदा वज्रं हिरण्यमिदथा रथं हरी यमस्य वहतो वि सूरिभिः।
आ तिष्ठति मघवा सनश्रुत इंद्रो वाजस्य दीर्घश्रवसस्पतिः ॥३॥

यदा। वज्रं। हिरण्यं। इत्। अथ। रथं। हरी इति। यं। अस्य। वहतः। वि। सूरिऽभिः।
आ। तिष्ठति। मघऽवा। सनऽश्रुतः। इंद्रः। वाजस्य। दीर्घऽश्रवसः। पतिः ॥३॥

यदेंद्रो हिरण्यं हितरमणीयं वज्रं स्वकीयमायुधं शत्रुहननाय गृह्णातीति शेषः। इदिति पूरणः। अथ तदानीमस्येंद्रस्य हरी अश्वौ यं रथं वहतो गंतृप्रदेशं विशेषेण प्रापयतो मघवा धनवानिंद्रः सूरिभिः स्तोतृभिः कुत्सादिभिः सह तं रथमा तिष्ठति। आरोहति। कीदृशः। सनश्रुतः। चिरप्रख्यातः। जगति स्वभावत एव विख्यात इत्यर्थः। दीर्घश्रवसो बहुकीर्तेर्वाजस्यान्नस्य पतिः स्वामी। एवंभूत इंद्रस्तं रथमारोहतीत्यर्थः ॥

॥ अथ चतुर्थी ॥

सो चिन्नु वृष्टिर्यूथ्या३ स्वा सचाँ इंद्रः श्मश्रूणि हरिताभि प्रुष्णुते।
अव वेति सुक्षयं सुते मधूदिद्धूनोति वातो यथा वनं ॥४॥

सो इति। चित्। नु। वृष्टिः। यूथ्या। स्वा। सचा। इंद्रः। श्मश्रूणि। हरिता। अभि। प्रुष्णुते।
अव। वेति। सुऽक्षयं। सुते। मधु। उत्। इत्। धूनोति। वातः। यथा। वनं ॥४॥

तच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्तव्यः। या महती वृष्टिरस्ति सो सा वृष्टिर्नु क्षिप्रं। चिदित्युपमार्थे। यथा सर्वं सिंचति तथेंद्रः स्वा स्वानि यूथ्या यूथानि मरुदादिगणलक्षणानि सचा सह स्वानि श्मश्रूणि च हरिता हरिद्वर्णेन सोमेनाभि प्रुष्णुते। प्रुष प्लुष स्नेहनसेचनपूरणेष्विति धातुः। आभिमुख्येन स्थित्वा क्षिप्रं सिंचति। सोमं पाययति पिबति चेत्यर्थः। अपि च। सुक्षयं शोभनं यज्ञगृहमव वेति। अभिगच्छति। गत्वा च सुते सोमेऽभिषुते सति मधु मधुररसोपेतं सोमं पीत्वा। मत्तः सन्निति शेषः। उदिद्धूनोति स्वशरीरमुत्कंपयति। तत्र दृष्टांतः। वातो वायुर्यथा वनं वृक्षसमूहमुत्कंपयति तद्वत् ॥

॥ अथ पंचमी ॥

यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघान ।

तत्तदिदस्य पौंस्यं गृणीमसि पितेव यस्तविषीं वावृधे शवः ॥५॥

यः । वाचा । विऽवाचः । मृध्रऽवाचः । पुरु । सहस्रा । अशिवा । जघान ।

तत्ऽतत् । इत् । अस्य । पौंस्यं । गृणीमसि । पिताऽइव । यः । तविषीं । ववृधे । शवः ॥५॥

य इंद्रो वाचा वाङ्मात्रेणैव विवाचो विविधवाचः स्वशत्रून् मृध्रवाचो हिंसितवाचः कृत्वेति शेषः । पुरु पुरूणि बहून्यशिवाशिवान्यसुखकराणि । दुःखकराणीत्यर्थः । सहस्रा शत्रूणां सहस्राणि जघान हंति । अपि च यश्चेंद्रः पितेव यथा पिता पुत्रस्य तविषीं बलमन्नप्रदानैर्ववृधे वर्धयति । तथा वृष्टिद्वारेण सर्वस्य जगतः शवो बलं ववृधे वर्धयति । अस्येंद्रस्य तत्तदित्तत्तदेव पौंस्यं बलं गृणीमसि । वयं स्तुमः । इंद्रो येन येन बलेन शत्रून्हंति तस्य तत्तद्बलं वयं स्तुम इत्यर्थः ॥

॥ अथ षष्ठी ॥

स्तोमं त इंद्र विमदा अजीजनन्नपूर्व्यं पुरुतमं सुदानवे ।

विद्मा ह्यस्य भोजनमिनस्य यदा पशुं न गोपाः करामहे ॥६॥

स्तोमं । ते । इंद्र । विऽमदाः । अजीजनन् । अपूर्व्यं । पुरुऽतमं । सुऽदानवे ।

विद्म । हि । अस्य । भोजनं । इनस्य । यत् । आ । पशुं । न । गोपाः । करामहे ॥६॥

हे इंद्र ते तुभ्यं सुदानवे शोभनदानस्यार्थाय विमदा विमदनामानो वयं स्तोमं स्तोत्रविशेषमजीजनन् । जनितवंतः । कृतवंत इत्यर्थः । अत्र पूर्वोत्तरयोरेकवाक्ययोः पुरुषव्यत्ययः । कीदृशं । अपूर्व्यं । अपूर्वमन्यैः पूर्वमकृतं । उत्कृष्टमित्यर्थः । पुरुतमं बहुतमं । नानाप्रकारोपेतमित्यर्थः । हि यस्मात्कारणाद्वे इंद्रेनस्येश्वरस्यास्येदृशस्य तव यद्भोजनं धनमस्तीति विद्म वयं जानीमस्तस्मात्कारणात्त्वदीयं तद्धनमा करामहे । वयमस्मदभिमुखं कुर्महे । तत्र दृष्टांतः । पशुं न गोपाः । यथा गोपालो धेनुमाह्वयन् स्वस्याभिमुखीं करोति तद्वत् ॥

॥ अथ सप्तमी ॥

माकिर्न एना सख्या वि यौषुस्तव चेंद्र विमदस्य च ऋषेः ।

विद्मा हि ते प्रमतिं देव जामिवदस्मे ते संतु सख्या शिवानि ॥७॥

मार्किः। नः। एना। सख्या। वि। यौषुः। तव। च। इंद्र। विऽमदस्य। च। ऋषेः।
विद्म। हि। ते। प्रऽमतिं। देव। जामिऽवत्। अस्मे इति। ते। संतु। सख्या। शिवानि॥७॥

हे इंद्र तव च विमदस्यर्षेर्मम च नः। अस्मदो द्वयोश्चेति द्वयोर्बहुवचनं। आवयोरेनैनानि सख्या सख्यानि स्तुत्यस्तोतृत्वेज्ययष्टृत्वलक्षणानि सखिकर्माणि माकिर्वि यौषुः। क्वचिदपि न विश्लथयेयुः। अपि च हि यस्मात्कारणाद्धे देव द्योतमानेंद्र ते तव प्रमतिमनुग्राहिकां बुद्धिं विद्म वयं जनीमः। तत्र दृष्टांतः। जामिवत्। यथा भ्राता स्वभगिन्यां स्नेहयुक्तां मतिं जानाति तद्वत् तस्मात्कारणादस्मे अस्माकं ते तव च सख्या सख्यानि शिवानि संतु। मंगलानि भवंतु। अनपायानीत्यर्थः॥

॥ इति सप्तमस्य सप्तमे नवमो वर्गः॥

इंद्र सोममिति षडृचमष्टमं सूक्तं चतुर्थ्याद्यास्तिस्रोऽनुष्टुभोऽश्विदेवत्याः। आदितस्तिस्र ऐंद्र्य आस्तारपंक्तिच्छंदस्काः। आदितो द्वौ गायत्रौ ततो द्वौ जागतौ सास्तारपंक्तिः। ऋषिः पूर्ववत्। तथा चानुक्रांतं। इंद्र सोमं षळास्तारपांक्तं त्वाश्विन्योऽंत्यास्तिस्रोऽनुष्टुभ इति। गतो विनियोगः॥

॥ तत्र प्रथमा॥

इंद्र सोममिमं पिब मधुमंतं चमू सुतं।
अस्मे रयिं नि धारय वि वो मदे सहस्रिणं पुरूवसो विवक्षसे॥१॥

इंद्र। सोमं। इमं। पिब। मधुऽमंतं। चमू इति। सुतं।
अस्मे इति। रयिं। नि। धारय। वि। वः। मदे। सहस्रिणं। पुरुवसो इति पुरुऽवसो। विवक्षसे॥१॥

हे इंद्र त्वमिममीदृशं सोमं पिब। कीदृशं। मधुमंतं मधुररसोपेतं चमू चम्वोरधिषवणफलकयोः सुतमभिषुतं। तदनंतरं पुरुवसो बहुधन हे इंद्र वस्तव विमदे विशेषेण सोमजन्यमदे सत्यस्मे अस्मासु रयिं धनं नि धारय। नितरां स्थापय। कीदृशं। सहस्रिणं सहस्रसंख्यायुक्तं। प्रभूतमित्यर्थः। त्वया दत्तेन धनेन यस्माद्वयं पुनरपि त्वदर्थं यागं कुर्मस्तस्मादस्मासु धनं निधेहीत्यर्थः। अतः कारणाद्विवक्षसे। महन्नामैतत्। त्वं महान्भवसि॥

॥ अथ द्वितीया ॥

त्वां यज्ञेभिरुक्थैरुप हव्येभिरीमहे ।

शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्यं विवक्षसे ॥२॥

त्वां । यज्ञेभिः । उक्थैः । उप । हव्येभिः । ईमहे ।

शचीऽपते । शचीनां । वि । वः । मदे । श्रेष्ठं । नः । धेहि । वार्यं । विवक्षसे ॥२॥

हे इंद्र वयं यज्ञेभिर्यज्ञैः सोमयागादिभिरुक्थैः शस्त्रलक्षणैः स्तोत्रैर्हव्येभिर्हव्यैः पुरोडाशादिभिश्च । उपेत्युपसर्गश्रुतेर्योग्यपदाध्याहारः । त्वामुपेत्येमहे । अभिलषितं धनं याचामहे । अतो हे शचीपते कर्मणां पालयितः । त्वं केषांचित्कर्मणां पालको न भवसीति न किंतु शचीनां सर्वेषां कर्मणां पालको भवसीत्यर्थः । एवं याचितस्त्वं नोऽस्मभ्यं वार्यं वरणीयं श्रेष्ठं प्रशस्ततमं पश्वादिधनं धेहि । देहि । शिष्टं स्पष्टं ॥

॥ अथ तृतीया ॥

यस्पतिर्वार्याणामसि रध्रस्य चोदिता ।

इंद्र स्तोतॄणामविता वि वो मदे द्विषो नः पाह्यंहसो विवक्षसे ॥३॥

यः । पतिः । वार्याणां । असि । रध्रस्य । चोदिता ।

इंद्र । स्तोतॄणां । अविता । वि । वः । मदे । द्विषः । नः । पाहि । अंहसः । विवक्षसे ॥३॥

हे इंद्र यस्त्वं वार्याणां वरणीयानां धनानां पतिरसि स्वामी भवसि । रध्रस्य राधकस्य स्तोतुश्च चोदिता धनदानेन कर्मसु नियोक्ता च भवसि । किंच । हे इंद्र यस्त्वं स्तोतॄणामविता रक्षकोऽसि । स त्वं वि वो मदे तव विविधे सोमजन्यमदे सति द्विषो द्वेष्टुः सकाशान्नोऽस्मान्पाहि । रक्ष । अंहसः पापाच्च रक्ष । कस्मादेवमुच्यसे । यस्मात्त्वं विवक्षसे महान्भवसि ॥

॥ अथ चतुर्थी ॥

युवं शक्रा मायाविना समीची निरमंथतं ।

विमदेन यदीळिता नासत्या निरमंथतं ॥४॥

युवं । शक्रा । मायाऽविना । समीची इति सम्ऽईची । निः । अमंथतं ।

विऽमदेन । यत् । ईळिता । नासत्या । निःऽअमंथतं ॥४॥

हे शक्रा शक्रौ शत्रुवधादिकर्मसु समर्थौ हे अश्विनौ मायाविना मायाविनौ प्रज्ञावंतौ शत्रुवंचनकुशलौ वा युवं युवां सम्मीची परस्परं संगतौ निरमंथतं । अग्निं निरमथ्नीतं । अश्विनावध्वर्यू इति ब्राह्मणोक्तत्वादग्निमंथनमप्यश्विनोरुपपन्नमिति । कदाश्विनौ निर्मंथितवंतौ । उच्यते । यद्यदा नासत्या नासत्यौ युवां विमदेन मर्येळितौ स्तुतौ निरमंथतं निरमथ्नीतं तदानीं युवां परस्परं संगतौ निर्मंथितवंतौ स्थ इत्यर्थः ॥

॥ अथ पंचमी ॥

विश्वे देवा अकृपंत समीच्योर्निष्पतंत्योः ।
नासत्यावब्रुवन्देवाः पुनरा वहतादिति ॥५॥
विश्वे । देवाः । अकृपंत । संऽईच्योः । निःऽपतंत्योः ।
नासत्यौ । अब्रुवन् । देवाः । पुनः । आ । वहतात् । इति ॥५॥

हे अश्विनौ युवाभ्यामग्निमंथनकाले प्रेर्यमाणयोः समीच्योः परस्परेण संयुक्तयोररण्योर्निष्पतंत्योर्विस्फुलिंगान्निर्गमयंत्योः सत्योर्विश्वे सर्वे इंद्रादयो देवा अकृपंत । युवामस्तुवन् । किंच । देवा नासत्यावश्विनौ युवामब्रुवन् अवोचन् । किमिति पुनरा वहतादिति । पुनः पुनरीदृशानि जगत्स्थितिहेतुभूतानि कर्माणि युवामाभिमुख्येन स्थित्वावहतं । यद्वा । युवाभ्यामुत्पाद्यमानः पुनश्चायमग्निरस्मदीयानि हवींष्यावहत्विति देवा नासत्यावब्रुवन् ॥

॥ अथ षष्ठी ॥

मधुमन्मे परायणं मधुमत्पुनरायनं ।
ता नो देवा देवतया युवं मधुमतस्कृतं ॥६॥
मधुऽमत् । मे । पराऽअयनं । मधुऽमत् । पुनः । आऽअयनं ।
ता । नः । देवा । देवतया । युवं । मधुऽमतः । कृतं ॥६॥

हे अश्विनौ मे मदीयं परायणं गृहात्परागमनं मधुमत् । अत्र रसविशेषवाचिना मधुशब्देन तद्गता प्रीतिर्लक्ष्यते । युवयोः प्रसादात्प्रीतियुक्तं भवत्विति शेषः । पुनरायनं गृहं प्रत्यागमनं मधुमत् प्रीतियुक्तं भवतु । अपि च । हे देवा

देवौ द्योतमानौ ता तौ युवं युवां नोऽस्मान्मधुमतः प्रीतियुक्तान्कृतं कुरुतं । केनेति उच्यते । देवतया । देवत्वेन । अणिमादिदेवतैश्वर्ययोगेनेत्यर्थः ॥

॥ इति सप्तमस्य सप्तमे दशमो वर्गः ॥

भद्रमित्येकादशर्चं नवमं सूक्तं । तुह्यादिपरिभाषयेदमप्यास्तारपांक्तं । सोमदेवताकं । ऋषिश्चान्यस्मादिति परिभाषया प्राजापत्य ऐंद्रो वा विमदो वा वासुक्रो वसुकृद्वर्षिः । तथा चानुक्रांतं । भद्रमेकादश सौम्यमिति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

भद्रं नो अपि वातय मनो दक्षमुत क्रतुं ।
अधा ते सख्ये अंधसो वि वो मदे रणन्गावो न यवसे विवक्षसे ॥१॥
भद्रं । नः । अपि । वातय । मनः । दक्षं । उत । क्रतुं ।
अध । ते । सख्ये । अंधसः । वि । वः । मदे । रणन् । गावः । न । यवसे । विवक्षसे ॥१॥

हे सोम त्वं नोऽस्मदीयं मनो भद्रं कल्याणं वातय । गमय । अस्माकं मनः शुभसंकल्पं कुर्वित्यर्थः । तथा दक्षमुत दक्षमपि । दक्ष वृद्धौ । वृद्धं सर्वव्यापिनमंतरात्मानमपि भद्रं शुभकारित्वलक्षणं प्रापय । अस्माकमंतरात्मानं शुभकारिणं कुर्वित्यर्थः । उतापि च क्रतुं प्रज्ञानं भद्रं शुभाध्यवसायलक्षणं प्रापय । शुभाध्यवसायिनं कुर्वित्यर्थः । अधाथ स्तोतारस्ते तव सख्ये स्तुत्यस्तोतृत्वेज्ययष्टृत्वलक्षणे सखिकर्मणि रणन् । रमंतां । तत्र दृष्टांतः । गावो न यवसे । यथा धेनवो घासे रमंते प्रीतिं कुर्वंति तद्वत् । कस्मिन्सति । अंधसः सोमाख्यस्यान्नस्य संबंधिनि वस्तव विमदे विविधसोमजन्यमदनिमित्ते सति । कस्मादेवं । यस्माद्विवक्षसे । महान्भवसि ॥

॥ अथ द्वितीया ॥

हृदिस्पृशस्त आसते विश्वेषु सोम धामसु ।
अधा कामा इमे मम वि वो मदे वि तिष्ठंते वसूयवो विवक्षसे ॥२॥
हृदिऽस्पृशः । ते । आसते । विश्वेषु । सोम । धामऽसु ।
अध । कामाः । इमे । मम । वि । वः । मदे । वि । तिष्ठंते । वसुऽयवः । विवक्षसे ॥२॥

हे सोम ते तव हृदिस्पृशः स्तुतिभिर्हृदयं स्पृशंत ऋत्विजो विश्वेषु धामसु सर्वेषु

स्थानेष्वासते। त्वां स्तुवंतस्तिष्ठंति। अधाथेदृग्भूताः कामा अभिलाषा वि वो मदे तव सोमपानजन्यविविधमदनिमित्ते सति। सोमयागार्थमित्यर्थः। वसूयवो वसुकामा धनमिच्छंतो मम। हृदयादिति शेषः। वि तिष्ठंते। उत्तिष्ठंति। कस्मादेवं। यस्माद्विवक्षसे। महान्भवसि॥

॥ अथ तृतीया ॥

उत व्रतानि सोम ते प्राहं मिनामि पाक्या।

अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद्वधाद्विवक्षसे ॥३॥

उत। व्रतानि। सोम। ते। प्र। अहं। मिनामि। पाक्या।

अध। पिताऽइव। सूनवे। वि। वः। मदे। मृळ। नः। अभि। चित्। वधात्। विवक्षसे ॥३॥

उतापि च हे सोमाहं ते तुभ्यं व्रतानि यागादिकर्माणि पाक्या परिपक्कया सर्वार्थदर्शिन्या प्रज्ञया। यद्वा पाक्येति व्रतविशेषणमेतत्। पाक्यानि परिपक्कानि परिनिष्ठितानीत्यर्थः। प्र मिनामि। प्रहिनस्मि। प्रकर्षेण करोमीत्यर्थः। अधाथ यागानंतरं वि वो मदे तव विविधे मदे सति नोऽस्मान्मृळ। सुखय। अभि चिद्वधादाभिमुख्येन स्थित्वा शत्र्वादिवधाच्चास्मान्पालयेति शेषः। तत्र दृष्टांतः। पितेव सूनवे। यथा पिता पुत्रार्थं सुखयति सर्वस्मात्पुत्रमेव पालयति तद्वत्। यस्मात्सुख्यमानः पाल्यमानश्चाहं युष्मदर्थं पुनः पुनः सोमयागं करोमि तस्मान्मां सुखय पालय चेत्यर्थः। कस्मादेवमुच्यसे। यस्मात्त्वं विवक्षसे। महान्भवसि। महांतश्च भक्तान्सुखयंति पालयंति चेति यावत्॥

॥ अथ चतुर्थी ॥

समु प्र यंति धीतयः सर्गासोऽवताँ इव।

क्रतुं नः सोम जीवसे वि वो मदे धारया चमसाँ इव विवक्षसे ॥४॥

सं। ऊं इति। प्र। यंति। धीतयः। सर्गासः। अवतान्ऽइव।

क्रतुं। नः। सोम। जीवसे। वि। वः। मदे। धारय। चमसान्ऽइव। विवक्षसे ॥४॥

हे सोम धीतयो देवतागुणान्दधति गृह्णंतीति धीतयः स्तुतयोऽस्मदीयाः समु संभूयैव प्र यंति। प्रकृष्टया गत्या त्वां गच्छंति। तत्र दृष्टांतः। सर्गासोऽवतानिव। विसृज्यंत उदकपानार्थमिति सर्गा गोसंघाः। यंत्रस्था घटसंघा वा। ते यथोदक-

पानार्थमादानार्थं वावतान्। कूपनामैतत्। कूपान्प्रति गच्छंति तद्वत्। त्वमप्येतज्ज्ञात्वा क्रतुं यागादिकं कर्म प्रज्ञां वा नोऽस्माकं जीवसे चिरं जीवनाय धारय। महतादरेण स्थापय। तत्र दृष्टांतः। चमसानिव। यथा वस्तव विमदे विविधसोमजन्यमदे कर्तव्यत्वेन निमित्तभूते सत्यध्वर्युर्हविर्धाने महता यत्नेन चमसान्सोमपात्राणि स्थापयति तद्वत्। कस्मादेवमुच्यसे। यस्मात्त्वं विवक्षसे महान्भवसि। यद्वा। धीतयः। अंगुलिनामैतत्। धयंति पिबंत्याभिरिति धीतयोऽंगुलयः। हे सोम त्वां सम्‌ प्र यंति। सहैव प्रकर्षेण त्वां प्राप्नुवंति। किमिव। अवतानिव। जलोद्धरणार्थं विसृज्यंत इति सर्गा रज्जवः। यथा कूपान्प्रति गच्छंति तद्वत्। ततस्त्वं नोऽस्माकं जीवसे चिरं जीवनाय क्रतुं कर्म धारय। यथा संपूर्णं भवति तथा पूरय। किमिव। यथा चमसान्स्वयं पूरयसि तद्वत्॥

॥ अथ पंचमी ॥

तव त्ये सोम शक्तिभिर्निकामासो व्यृण्विरे।
गृत्सस्य धीरास्तवसो वि वो मदे व्रजं गोमंतमश्विनं विवक्षसे ॥५॥

तव। त्ये। सोम। शक्तिऽभिः। निऽकामासः। वि। ऋण्विरे।
गृत्सस्य। धीराः। तवसः। वि। वः। मदे। व्रजं। गोऽमंतं। अश्विनं। विवक्षसे ॥५॥

निकामासो दृष्टादृष्टफले नियतकामास्त्ये ते प्रसिद्धा धीरा मेधाविन ऋत्विजः शक्तिभिर्यागादिकर्मभिः सह हे सोम गृत्सस्य मेधाविनस्तवसो महतस्तव व्यृण्विरे। विविधाः स्तुतीर्गमयंति। प्रापयंति। कुर्वंतीत्यर्थः। अतः कारणाद्वि वो मदे तव सोमपानजन्यविविधमदनिमित्तभूते सत्यस्मभ्यं गोमंतं गोसहितमश्विनमश्वसहितं व्रजं गोष्ठं। सामर्थ्यान्मंदुरा लभ्यते। मंदुरां च देहीति शेषः। कस्मादेवमुच्यसे। यस्माद्विवक्षसे। महान्भवसि॥

॥ इति सप्तमस्य सप्तम एकादशो वर्गः ॥

॥ अथ षष्ठी ॥

पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत्।
समाकृणोषि जीवसे वि वो मदे विश्वा संपश्यन्भुवना विवक्षसे ॥६॥

पशुं। नः। सोम। रक्षसि। पुरुऽत्रा। विऽस्थितं। जगत्।
संऽआकृणोषि। जीवसे। वि। वः। मदे। विश्वा। संऽपश्यन्। भुवना। विवक्षसे॥६॥

हे सोम त्वं नोऽस्मदीयं पशुं देवयागार्थमुपाकृतं रक्षसि । पालयसि । न केवलं पशुं किंतु पुरुत्रा बहुधा विष्ठितं सुरनरतिर्यग्योन्यादिभावेनावस्थितं जगच्च रक्षसि । किंच । स त्वं समाकृणोषि । जगतो वृत्तिं सम्यगाकरोषीत्यर्थः । किमर्थं । जीवसे । जीवनार्थं । किं कुर्वन् । विश्वा भुवना विश्वानि भुवनानि भूतजातानि संपश्यन् । किमर्थमेतदादिकं सर्वं करोषि उच्यते । वि वो मदे । युष्माकं सर्वेषां देवानां विविधहविर्जन्यतृप्त्यर्थं । उक्तं हि । इतः प्रदानमुत देवा उपजीवंत्यमुतः प्रदानं मनुष्या उपजीवंति । तै॰ सं॰ ३.२.९.७. । इति । अत एव त्वं विवक्षसे । महान्भवसि । महतामेतत्सर्वमुचितमित्यर्थः ॥

॥ अथ सप्तमी ॥

त्वं नः सोम विश्वतो गोपा अदाभ्यो भव ।

सेध राजन्नप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे ॥७॥

त्वं । नः । सोम । विश्वतः । गोपाः । अदाभ्यः । भव ।

सेध । राजन् । अप । स्रिधः । वि । वः । मदे । मा । नः । दुःऽशंसः । ईशत । विवक्षसे ॥७॥

हे सोम अदाभ्यः केनाप्यहिंस्यस्त्वं विश्वतः सर्वतो नोऽस्माकं गोपा रक्षिता भव । अपि च । हे राजन् राजमान सोम त्वं स्रिधोऽस्माकमुपक्षपयितॄनप सेध । अस्मत्तोऽपगमय । अपजहि वा । नोऽस्माकं दुःशंसो विद्यमानानामविद्यमानानां कर्मणां शंसिता प्रख्यापयिता मेशत । ईशिता मा भूत् । तव प्रसादादस्माकमपवक्ता कश्चिदपि मा भूदित्यर्थः । किमर्थमेतत्सर्वं प्रार्थ्यते । वि वो मदे । तव विविधसोमादिहविर्जन्यतृप्त्यर्थं । अतो विवक्षसे । त्वं महान्भवसि ॥

॥ अथाष्टमी ॥

त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि ।

क्षेत्रवित्तरो मनुषो वि वो मदे द्रुहो नः पाह्यंहसो विवक्षसे ॥८॥

त्वं । नः । सोम । सुऽक्रतुः । वयःऽधेयाय । जागृहि ।

क्षेत्रवित्ऽतरः । मनुषः । वि । वः । मदे । द्रुहः । नः । पाहि । अंहसः । विवक्षसे ॥८॥

हे सोम सुक्रतुः शोभनप्रज्ञः क्षेत्रवित्तरः क्षेत्रस्यातिशयेन लंभकस्त्वं नोऽस्माकं वयोधेयायान्नदानाय जागृहि । किंच । द्रुहो द्रोग्धुर्मनुषो मनुष्याच्छत्रोः सका-

शान्नोऽस्मान्पाहि। रक्ष। अंहसः पापाच्च नोऽस्मान्पाहि। किमर्थं। वि वो मदे। तव सोमादिहविर्जन्यतृप्त्यर्थमित्यर्थः। विवक्षसे। त्वं महान्भवसि ॥

॥ अथ नवमी ॥

त्वं नों वृत्रहंतमेंद्रस्येंदो शिवः सखा।

यत्सीं हवंते समिथे वि वो मदे युध्यमानास्तोकसातौ विवंक्षसे ॥९॥

त्वं। नः। वृत्रहन्ऽतम। इंद्रस्य। इंदो इति। शिवः। सखा।

यत्। सीं। हवंते। संऽइथे। वि। वः। मदे। युध्यमानाः। तोकऽसातौ। विवंक्षसे ॥९॥

हे वृत्रहंतम शत्रूणामतिशयेन हंतर्हे इंदो हे सोम यस्त्वमिंद्रस्य शिवः सुखकरः सखा मित्रभूतोऽसि स त्वं नोऽस्मान्पाहीति शेषः। कदेति उच्यते। तोकसातौ। तोक इत्यपत्यनाम। सातिः। षणु दान इत्यस्माद्धातो रूपं। दीयतेऽस्मिन्नपत्यमिति तोकसातिः संग्रामविशेषणं। तस्मिन्। अतिमहतीत्यर्थः। समिथे संग्रामे युध्यमाना युद्धं कुर्वाणाः शत्रुजनाः सीं सर्वतो यद्यदा हवंते। युद्धार्थमस्मानाह्वयंति। तदास्माकं रक्षिता भवेत्यर्थः। कस्मिन्निमित्ते। वि वो मदे। तव विविधहविर्जन्यहर्षनिमित्ते। विवक्षसे। त्वं महान्भवसि। महतां हि पालनं युक्तमेवेति ॥

॥ अथ दशमी ॥

अयं घ स तुरो मद इंद्रस्य वर्धत प्रियः।

अयं कक्षीवंतो महो वि वो मदें मतिं विप्रस्य वर्धयद्विवंक्षसे ॥१०॥

अयं। घ। सः। तुरः। मदः। इंद्रस्य। वर्धत। प्रियः।

अयं। कक्षीवंतः। महः। वि। वः। मदे। मतिं। विप्रस्य। वर्धयत्। विवंक्षसे ॥१०॥

अयं घेदृशः खलु स प्रसिद्धोऽस्माभिरभिषुतः सोमस्तुरः सर्वकार्येषु त्वरणशीलो मदो मदकरः प्रिय इंद्रस्य तर्पयिता वर्धत। अस्मदीयां मतिमवर्धयत्। अयं सोमः कक्षीवत एतदाख्यस्यर्षेः। कीदृशस्य। महो महतो विप्रस्य मेधाविनो मतिं प्रज्ञां वर्धयत्। अवर्धयत्। तद्वदस्माकमपि मतिमवर्धयदित्यर्थः। शिष्टं गतं ॥

॥ अथैकादशी ॥

अयं विप्राय दाशुषे वाजाँ इयर्ति गोमंतः।

अयं सप्तभ्य आ वरं वि वो मदे प्रांधं श्रोणं च तारिषद्विवंक्षसे ॥११॥

अयं। विप्राय। दाशुषे। वाजान्। इयर्ति। गोऽमतः।

अयं। सप्तऽभ्यः। आ। वरं। वि। वः। मदे। प्र। अंधं। श्रोणं। च। तारिषत्।

विवक्षसे ॥११॥

अयं सोमो विप्राय मेधाविने दाशुषे हविर्दत्तवते यजमानाय गोमतः पशुयुक्तानि वाजानन्नानीयर्ति। प्रेरयति। प्रयच्छतीत्यर्थः। किंच। अयमेव सोमः सप्तभ्यो होतृभ्यो वरं वरणीयं धनमा। प्रयच्छति। अंधं नेत्रहीनं दीर्घतमसमृषिं चक्षुःप्रदानेन श्रोणं च पंगुं परावृजमृषिं चरणप्रदानेन एवमुभावृषी प्र तारिषत्। प्रकर्षेण वर्धितवान्। शिष्टं स्पष्टं ॥

॥ इति सप्तमस्य सप्तमे द्वादशो वर्गः ॥

प्र हीति नवर्चं दशमं सूक्तमानुष्टुभं पूषदेवताकं। आद्याचतुर्थ्यावुष्णिहौ। ऋषिः पूर्ववत्। तथा चानुक्रांतं। प्र हि नव पौष्णमानुष्टुभमाद्याचतुर्थ्यौ उष्णिहाविति। गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र ह्यच्छा मनीषाः स्पार्हा यंति नियुतः।

प्र दस्रा नियुद्रथः पूषा अविष्टु माहिनः ॥१॥

प्र। हि। अच्छ। मनीषाः। स्पार्हाः। यंति। निऽयुतः।

प्र। दस्रा। नियुत्ऽरथः। पूषा। अविष्टु। माहिनः ॥१॥

हि यस्मात्कारणान्मनीषा अस्मदीयाः स्तुतिलक्षणा वाचोऽच्छ गुणग्रहणद्वारेण पूषणमभिप्राप्तुं प्र यंति प्रकर्षेण गच्छंति। कीदृश्यः। स्पार्हाः सर्वगुणोपेतत्वात्स्पृहणीयाः। नियुतः नियमनाद्वा नियोजनाद्वेत्येतद्रूपं। अस्माभिर्नियमिता वा नियुक्ता वा। उच्चारिता इत्यर्थः। एतज्ज्ञात्वोपकारस्य प्रत्युपकारं कर्तुं दस्रा दर्शनीयो नियुद्रथो गमनाय सर्वदा नियतरथो नियुक्तरथो वा माहिनो महान्पूषा देवः प्राविष्टु। अस्मान्प्रकर्षेण रक्षतु। यद्वा। दस्रा दंसयितारौ कर्मणामुपक्षपयितारौ। परिसमापयितारावित्यर्थः। एवंभूतौ पत्नीयजमानौ पूषा रक्षत्विति योज्यं ॥

॥ अथ द्वितीया ॥

यस्य त्यन्महित्वं वाताप्यमयं जनः ।
विप्र आ वंसद्धीतिभिश्चिकेत सुष्टुतीनां ॥२॥
यस्य । त्यत् । महिऽत्वं । वाताप्यं । अयं । जनः ।
विप्रः । आ । वंसत् । धीतिऽभिः । चिकेत । सुऽस्तुतीनां ॥२॥

विप्रो मेधाव्ययं जनो यजमानः । यस्य पूष्णः संबंधि त्यत्तत्प्रसिद्धं महित्वं महत्त्वं वाताप्यं मंडले संभृतं परिपक्वमुदकं धीतिभिर्योगादिकर्मभिरा वंसत् संभजते स देवः सुष्टुतीनां तदीयाः शोभनाः स्तुतीश्चिकेत । जानातु ॥

॥ अथ तृतीया ॥

स वेद सुष्टुतीनामिंदुर्न पूषा वृषा ।
अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति ॥३॥
सः । वेद । सुऽस्तुतीनां । इंदुः । न । पूषा । वृषा ।
अभि । प्सुरः । प्रुषायति । व्रजं । नः । आ । प्रुषायति ॥३॥

य उक्तगुणः स पूषा सुष्टुतीनां शोभनस्तोत्राणां । स्वरूपमिति शेषः । वेद । जानाति । अपि चेंदुर्न सोम इव तथायं पूषा वृषा कामानां वर्षिता भवति । प्सुरो रूपवान् स अभ्यस्मानभिलक्ष्य प्रुषायति । सिंचति । तथा नोऽस्माकं व्रजं गोष्ठं चा प्रुषायति । आभिमुख्येन सिंचति । अस्मभ्यं हिरण्यपश्वादिकं ददातीत्यर्थः ॥

॥ अथ चतुर्थी ॥

मंसीमहिं त्वा वयमस्माकं देव पूषन् ।
मतीनां च साधनं विप्राणां चाधवं ॥४॥
मंसीमहिं । त्वा । वयं । अस्माकं । देव । पूषन् ।
मतीनां । च । साधनं । विप्राणां । च । आऽधवं ॥४॥

हे देव द्योतमान पूषन् वयं स्तोतारस्त्वा त्वां मंसीमहि । स्तुमः । कीदृशं । अस्माकमस्मदीयानां मतीनां चाभिलषितानां च साधनं साधयितारं । विप्राणां च मेधाविनामप्याधवं परिचर्यादरेण कंपयितारं ॥

॥ अथ पंचमी ॥

प्रत्यर्धिर्यज्ञानामश्वहयो रथानां ।

ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः ॥५॥

प्रतिऽअर्धिः । यज्ञानां । अश्वऽहयः । रथानां ।

ऋषिः । सः । यः । मनुःऽहितः । विप्रस्य । यवयत्ऽसखः ॥५॥

ऋषिः सर्वस्य द्रष्टा स पूषा यज्ञानां प्रत्यर्धिरर्धभाक् रथानामश्वहयः । हयतिर्गतिकर्मा । रथानां संबंधिभिरश्वैर्गमनशीलो भवति । अश्वयुक्तेन रथेन सदा गंतेत्यर्थः । मनुर्हितो मनुष्यहितो यो विप्रस्य मेधाविनः स्तोतुर्यावयत्सखः शत्रूणां पृथक्कर्ता सखा भवति स इति पूर्वेण संबंधः ॥

॥ इति सप्तमस्य सप्तमे त्रयोदशो वर्गः ॥

॥ अथ षष्ठी ॥

आधीषमाणायाः पतिः शुचायाश्च शुचस्य च ।

वासोवायोऽवीनामा वासांसि मर्मृजत् ॥६॥

आऽधीषमाणायाः । पतिः । शुचायाः । च । शुचस्य । च ।

वासःऽवायः । अवीनां । आ । वासांसि । मर्मृजत् ॥६॥

आधीषमाणाया आत्मार्थं धीयमानायाः शुचायाश्च दीप्ताया अजायाश्च पतिः स्वामी । न केवलं स्त्रीमात्रस्य किंतु शुचस्य दीप्तस्य पुंपशोश्च पतिरित्यर्थः । एवंभूतः पूषा देवोऽवीनामुरणानां संबंधिभी रोमभिर्वासोवायो दशापवित्रादीनि वस्त्राणि प्रेरयन् वासांसि रजकशोध्यानि तानि वस्त्राण्या मर्मृजत् । आ समंतात्प्रकाशोष्णाभ्यां शोधयन्भवति ॥

॥ अथ सप्तमी ॥

इनो वाजानां पतिरिनः पुष्टीनां सखा ।

प्र श्मश्रु हर्यतो दूधोद्वि वृथा यो अदाभ्यः ॥७॥

इनः । वाजानां । पतिः । इनः । पुष्टीनां । सखा ।

प्र । श्मश्रु । हर्यतः । दूधोत् । वि । वृथा । यः । अदाभ्यः ॥७॥

इन ईश्वरः पूषा वाजानां हविरादीनां सर्वेषामन्नानां पतिः स्वामीनः प्रभुः पुष्टीनां सर्वेषां प्राणिनां स्वभूतानां पोषणानां करणे सखा मित्रभूतः। सर्वस्योपकारित्वात्। किंच। हर्यतः कामयमानस्य यजमानस्य स्वभूतं सोमं पिबन्निति शेषः। श्मश्रु श्मश्रूणि वृथानायासेनाप्रयत्नेन प्रव्यदूधोत् प्रकर्षेण विविधं कंपयति यः पूषादाभ्यः शत्रुभिरहिंस्यः स इति पूर्वेण संबंधः॥

॥ अथाष्टमी ॥

आ ते रथस्य पूषन्नजा धुरं ववृत्युः।
विश्वस्यार्थिनः सखा सनोजा अनपच्युतः॥८॥
आ। ते। रथस्य। पूषन्। अजाः। धुरं। ववृत्युः।
विश्वस्य। अर्थिनः। सखा। सनःऽजाः। अनपऽच्युतः॥८॥

हे पूषन् देव ते त्वदीयस्य रथस्य धुरमजा वाहनत्वेना ववृत्युः। आवर्तयंति। आवहंतीत्यर्थः। यस्त्वं विश्वस्य सर्वस्यार्थिनो याचकस्याभिलषितार्थप्रदातृत्वात्सखिभूतः सनोजाश्चिरं जातोऽनपच्युतः स्वाधिकारादनपगतः। तस्य ते रथमिति संबंधः॥

॥ अथ नवमी ॥

अस्माकमूर्जा रथं पूषा अविष्टु माहिनः।
भुवद्वाजानां वृध इमं नः शृणवद्धवं॥९॥
अस्माकं। ऊर्जा। रथं। पूषा। अविष्टु। माहिनः।
भुवत्। वाजानां। वृधः। इमं। नः। शृणवत्। हवं॥९॥

माहिनो महान्पूषास्माकं स्वभूतं रथमूर्जा बलेनान्नेन वाविष्टु। अवतु। रक्षतु। किंच। वाजानामन्नानां वृधो वर्धको भुवत् भवतु। नोऽस्मदीयमिममीदृग्भूतं हवमाह्वानं शृणवत्। शृणोतु॥

॥ इति सप्तमस्य सप्तमे चतुर्दशो वर्गः॥

असत्सु म इति चतुर्विंशत्यृचमेकादशं सूक्तं। इंद्रपुत्रस्य वसुक्रस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। असत्सु चतुर्विंशतिरैंद्रो वसुक्र इति॥ महाव्रते मरुत्वतीयशस्त्र एतत्सूक्तं। तथैव पंचमारण्यके सूचितं च। असत्सु मे जरितः साभिवेगः पिबा सोममभि यमुग्र तर्द इति॥

॥ तत्र प्रथमा ॥

असत्सु मे जरितः साभिवेगो यत्सुन्वते यजमानाय शिक्षं ।

अनाशीर्दामहमस्मि प्रहंता सत्यध्वृतं वृजिनायंतमाभुं ॥१॥

असत् । सु । मे । जरितरिति । सः । अभिऽवेगः । यत् । सुन्वते । यजमानाय । शिक्षं ।

अनाशीःऽदां । अहं । अस्मि । प्रऽहंता । सत्यऽध्वृतं । वृजिनऽयंतं । आभुं ॥१॥

वासुक्रेषु सूक्तेषु बाहुल्येनेंद्रः स्तूयते । इदानीमिंद्रो वसुक्रं स्तोतुमुद्यतं पुत्रं संबोध्य स्वसामर्थ्यं कथयति येन विज्ञातदेवतारूपः सन् सुखेन स्तोष्यतीति । यद्वा । कार्यकारणयोरेकत्वोपचारादात्मा वै पुत्रनामासीति वचनादिंद्ररूपेणावस्थितो वसुक्र आत्मानं स्तौति । क्वचित्क्वचिदिंद्रं चेति । हे जरितः स्तोतर्मे मम सु शोभनः स तादृशोऽभिवेगोऽभिगमनं मनसो वृत्तिविशेषोऽसत् । अस्ति । विद्यते । यद्येनाभिवेगेन सुन्वते मदर्थं सोमाभिषवं कुर्वते यजमानाय यज्वने शिक्षं । अभिलषितमर्थं ददामि । किंच । अहमनाशीर्दा । आशीरन्यत्र प्रार्थना । इह तु सामर्थ्यात्प्रार्थितं हविरुच्यते । तद्धद्यमददतं जनं । यद्वा । आशीरिति सोमाश्रयणं दध्युच्यते । तस्यादातारं । असोमयाजिनमित्यर्थः । प्रहंतास्मि । प्रकर्षेण हिंसिता भवामि । कीदृशं । सत्यध्वृतं सत्यस्य हिंसकं । अनृतवादिनं चेत्यर्थः । वृजिनायंतं पापं कर्तुमिच्छंतमाभुं व्याप्नुवंतं ॥

॥ अथ द्वितीया ॥

यदीदहं युधये संनयान्यदेवयून्तन्वा३ शूशुजानान् ।

अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पंचदशं नि षिंचं ॥२॥

यदि । इत् । अहं । युधये । संऽनयानि । अदेवऽयून् । तन्वा । शूशुजानान् ।

अमा । ते । तुम्रं । वृषभं । पचानि । तीव्रं । सुतं । पंचऽदशं । नि । सिंचं ॥२॥

यद्यदाहमेव युधये युद्धार्थमदेवयून् देवान्यष्टुमनिच्छतोऽयज्वनः संनयानि संगमयामि । कीदृशान् । तन्वा स्वशरीरेण शूशुजानान् आत्मंभरित्वात्पुष्टिलक्षणया दीप्त्या युक्तान् । पुष्टानित्यर्थः । तदा हे इंद्राहममर्त्विगादिभिः सहितस्ते तुभ्यं तुम्रं प्रेरकं बलिनं । पीवानमित्यर्थः । वृषभं सेचनसमर्थं पुंपशुं पचानि । किंच । तीव्रं मदकररसं सुतमभिषुतं पंचदशं । प्रतिपत्प्रभृतिपंचदशसंख्याकासु तिथिषु

शुक्लपक्ष एकोत्तरवृद्ध्या पर्वाणि जायंते । कृष्णपक्षे तु तद्वन्निहीयंते । एवंभूतत्वात्पंचदशः सोम उच्यते । तं । यद्वा त्रिवृत्पंचदशस्तोमोपेतं माध्यंदिनसवनकमित्यर्थः । नि षिंचं । दशापवित्रे द्रोणकलशे चमसपात्रेऽग्नौ वा सिंचामि । प्रक्षिपामीत्यर्थः ॥

॥ अथ तृतीया ॥

नाहं तं वेद य इति ब्रवीत्यदेवयूनत्समरणे जघन्वान् ।

यदावाख्यत्समरणमृघावदादिद्ध मे वृषभा प्र ब्रुवंति ॥३॥

न । अहं । तं । वेद । यः । इति । ब्रवीति । अदेवऽयून् । संऽअरणे । जघन्वान् ।

यदा । अवऽअख्यत् । संऽअरणं । ऋघावत् । आत् । इत् । ह । मे । वृषभा । प्र । ब्रुवंति ॥३॥

यो जनोऽदेवयून् देवानकामयमानान्देवद्विषो राक्षसादीन्समरणे संग्रामे जघन्वान् अहं हतवानिति ब्रवीति वदति तं तादृशं मद्व्यतिरिक्तं जनमहं न वेद । न जानामि । मत्तोऽन्यः संग्रामे शत्रूणां हंता नास्तीत्यर्थः । किंच । यदा यस्मिन्काले समरणं संग्राममवाख्यत् अवाकृतं न्यकृतमहं पश्यामि । कीदृशं । ऋघावद्दघावंतं परस्परं हिंसायुक्तं । अत्यंतक्रूरमित्यर्थः । आत्तदानीं मे मम स्वभूतानि वृषभा वृषभकर्माणि दर्पितवृषभस्येव विक्रांतकर्माणि प्र ब्रुवंति । विद्वज्जना इति शेषः । इद्धेतीमौ पदपूरणौ ॥

॥ अथ चतुर्थी ॥

यदज्ञातेषु वृजनेष्वासं विश्वे सतो मघवानो म आसन् ।

जिनामि वेत्क्षेम आ संतमाभुं प्र तं क्षिणां पर्वते पादगृह्य ॥४॥

यत् । अज्ञातेषु । वृजनेषु । आसं । विश्वे । सतः । मघऽवानः । मे । आसन् ।

जिनामि । वा । इत् । क्षेमे । आ । संतं । आभुं । प्र । तं । क्षिणां । पर्वते । पादऽगृह्य ॥४॥

यद्यदाज्ञातेषु शरीरवस्त्रास्त्रबलादिभिरपरिज्ञातेषु वृजनेषु संग्रामेष्वासमहं युद्धार्थमुपविशामि तदा विश्वे सर्वे मघवानो हविर्लक्षणतपोलक्षणधनवंत ऋषयः सत एवं वर्तमानस्य मे ममेंद्रस्य समीप आसन् । उपविशंति । मम वीर्यवृद्ध्यर्थं मां स्तुवंतस्तिष्ठंतीत्यर्थः । अपि च । क्षेमे जगत्पालने निमित्त आ संतं । आकारोऽभीत्यस्यार्थे वर्तते । सर्वमभिभवंतमाभुं महांतं शत्रुं जिनामि

वा । विनाशयाम्येव । नात्र विनाशे संशयः । इदिति पूरणः । तं महांतं शत्रुं पादगृह्य पादौ गृहीत्वा पर्वते गिरौ प्र क्षिणां । प्रहिनस्मि । प्रक्षिपामि ॥

॥ अथ पंचमी ॥

न वा उ मां वृजने वारयंते न पर्वतासो यदहं मनस्ये ।
मर्म स्वनात्कृधुकर्णो भयात एवेदनु द्यून्किरणः समेजात् ॥५॥
न । वै । ऊं इति । मां । वृजने । वारयंते । न । पर्वतासः । यत् । अहं । मनस्ये ।
मर्म । स्वनात् । कृधुऽकर्णः । भयाते । एव । इत् । अनु । द्यून् । किरणः । सं । एजात् ॥५॥

वै उ इत्येवैव । वृजने संग्रामे मां युद्धार्थमुपस्थितं संतं न वारयंते । केचिन्निवारयितुं समर्था न भवंति । अहं यत्कर्म मनस्ये मनसा कर्तुमिच्छामि पर्वतासोऽवितरणक्षमा हिमवदादयो गिरयस्तत्कर्म मनसा प्रोढुं न शक्नुवंतीत्यर्थः । किंच । ममेंद्रस्य स्वनाच्छब्दादेव कृधुकर्णो नामासुरः । यद्वा कृधुकर्णो ह्रस्वकर्णो मंदश्रवणेंद्रियो बधिरः स्थावरपिपीलिकादिरपि भयाते । बिभेति । अपि च । एवेदेवमेव कृधुकर्णवदनु द्यून्प्रतिदिनमित्यर्थः । किरणः । अंतर्णीतमत्वर्थमेतत् । किरणवान् रश्मिवानादित्यः समेजात् । सम्यक् कंपयते । चलति । नियमेन प्रयातीत्यर्थः ॥

॥ इति सप्तमस्य सप्तमे पंचदशो वर्गः ॥

॥ अथ षष्ठी ॥

दर्शन्नवत्र शृतपाँ अनिंद्रान्बाहुक्षदः शरवे पत्यमानान् ।
घृषुं वा ये निंनिदुः सखायमध्यू न्वेषु पवयो ववृत्युः ॥६॥
दर्शन् । नु । अत्र । शृतऽपान् । अनिंद्रान् । बाहुऽक्षदः । शरवे । पत्यमानान् ।
घृषुं । वा । ये । निनिदुः । सखायं । अधि । ऊं इति । नु । एषु । पवयः । ववृत्युः ॥६॥

अत्रास्मिञ्जगति शृतपान् शृतानि पक्वानि सोमादिहवींष्यपहृत्य पिबतः । अनिंद्रान् इंद्रेण मया वर्जितान् बाहुक्षदो बाहुभिर्यजमानाञ्शकलीकुर्वतः शरवे हिंसार्थं पत्यमानानभिपततोऽसुरादीन् नु क्षिप्रं दर्शन् । अहमिंद्रः पश्यामि । एवंभूतेष्वेष्वध्युपरि पवयो मदीयान्यायुधानि ववृत्युः । वर्तंते । वाशब्दः समुच्चये ।

घृषुं महांतं च सखायं सखिवत्प्रियं हितस्य कर्तारं मां ये निनिदुर्निंदंति। उ इति समुच्चये। एषु चोपरि मदीयान्यायुधानि क्षिप्रं वर्तंते ॥

॥ अथ सप्तमी ॥

अभूर्वौक्षीर्व्यु१आयुरानड्दर्षन्नु पूर्वो अपरो नु दर्षत्।
द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेषं ॥७॥

अभूः। ऊं इति। औक्षीः। वि। ऊं इति। आयुः। आनट्। दर्षत्। नु। पूर्वः। अपरः।
नु। दर्षत्।
द्वे इति। पवस्ते इति। परि। तं। न। भूतः। यः। अस्य। पारे। रजसः। विवेषं ॥७॥

अत्र मध्यमपुरुषत्वेनेंद्रस्योच्यमानत्वाद्वसुक्र इंद्रं स्तौति। उ इत्यवधारणे। हे इंद्र अभूः। त्वमेव प्रादुर्भवसि। औक्षीः। काले काले त्वमेव पृथिवीं सिंचसि। नान्य इत्यर्थः। आनडित्यादौ सर्वत्र परोक्षनिर्देशे प्रत्यक्षीकरणार्थं मध्यमपुरुषेण प्रकृतत्वादेकवाक्यतायै युष्मच्छब्दसमानार्थो भवच्छब्दोऽध्याहर्तव्यः। वि इति वैविध्ये। उ इति चार्थे। आयुर्जीवितमुच्यते। इंद्रो भवान्विविधमायुश्चानट्। व्याप्नोति। अभूतसंप्लवं जीवतीत्यर्थः। किंच। पूर्वः पुरातनो भवानिंद्रो नु क्षिप्रं दर्षत्। दॄ विदारणे। सिब्बहुलं लेटि। वज्रेण शत्रून्विदारयति। अपरोऽन्यः शत्रुर्नु दर्षत्। नु इति निषेधार्थे। भवंतमिंद्रं न विदारयति। भवानेव सर्वं शत्रुजातं हिनस्तीत्यर्थः। अपि च। यो भवानिंद्रोऽस्येदृशस्य रजसो लोकस्य। त्रैलोक्यस्येत्यर्थः। पारे परतः। परमसूक्ष्मवायुरूपेण सृष्टिकारणात्मना स्थित्वेति शेषः। विवेष सर्वतो व्याप्नोति तं भवंतमिंद्रं द्वे इति सामर्थ्याद्द्यावापृथिव्यौ न परि भूतः। न परिभवतः। अभिभवितुं न शक्नुत इत्यर्थः। कीदृश्यौ। पवस्ते। पवतिर्गतिकर्मा। अस्मादौणादिकोऽस्तप्रत्ययः। अतोऽजाद्यतष्टाप्। पा० ४.१.४.। इति टापि कृते प्रथमाद्विवचने चैतद्रूपं भवति। महत्त्वेन सर्वस्याभिभवनाय गच्छंत्यौ ॥

॥ अथाष्टमी ॥

गावो यवं प्रयुता अर्यो अक्षन्ता अपश्यं सहगोपाश्चरंतीः।
हवा इदर्योऽअभितः समायन्कियदासु स्वपतिश्छंदयाते ॥८॥

गावः। यवं। प्रऽयुताः। अर्यः। अक्षन्। ताः। अपश्यं। सहऽगोपाः। चरंतीः।
हवाः। इत्। अर्यः। अभितः। सं। आयन्। कियत्। आसु। स्वऽपतिः। छंदयाते ॥८॥

गावो धेनवः प्रयुताः प्रकर्षेण मिश्रिताः परस्परेण सह भूता यवं मद्वृष्टिजनितयवादिघासमक्षन् । अदंति । भक्षयंति । अर्यः सर्वस्य स्वाम्यहं ता गा अपश्यं । पश्यामि । कीदृशीः । सहगोपाः । पशुपालकेन सहिताश्चरंतीर्घासं भक्षयंतीः । एवंभूतास्ताः परया प्रीत्या पश्यामीत्यर्थः । किंच । हवा वाहनदोहनार्थमाह्वानार्हा गावो अर्यः । द्वितीयार्थे प्रथमा । अर्यं स्वामिनं प्रत्यभितः सर्वतः समायन् । समित्येकीभावे । एकीभूयागच्छंति । इदिति पूरणः । आगतास्वासु गोषु स्वपतिः स्वानां गवां स्वामी कियत्क्षीरं छंदयाते । दोग्धुं कामयते । मदर्थं दोग्धीत्यर्थः । गाव आशिरं दुहत इति वचनात् ॥

॥ अथ नवमी ॥

सं यद्वयं यवसादो जनानामहं यवाद उर्वज्रे अंतः ।

अत्रा युक्तोऽवसातारमिच्छादथो अयुक्तं युनजद्ववन्वान् ॥९॥

सं । यत् । वयं । यवसऽअदः । जनानां । अहं । यवऽअदः । उरुऽअज्रे । अंतरिति ।

अत्र । युक्तः । अवऽसातारं । इच्छात् । अथो इति । अयुक्तं । युनजत् । ववन्वान् ॥९॥

॥ अथ दशमी ॥

अत्रेदु मे मंससे सत्यमुक्तं द्विपाच्च यच्चतुष्पात्संसृजानि ।

स्त्रीभिर्यो अत्र वृषणं पृतन्यादयुद्धो अस्य वि भजानि वेदः ॥१०॥

अत्र । इत् । ऊं इति । मे । मंससे । सत्यं । उक्तं । द्विऽपात् । च । यत् । चतुःऽपात् । संऽसृजानि ।

स्त्रीभिः । यः । अत्र । वृषणं । पृतन्यात् । अयुद्धः । अस्य । वि । भजानि । वेदः ॥१०॥

मे ममात्रास्मिन्स्तोत्र उक्तं मया कथितं सत्यमिद्यथाभूतमेव मंससे । त्वं जानीहि । अर्थवादरूपेण नैतदध्यारोपितगुणमित्यर्थः । उ इति पूरणः । किंच द्विपाच्च मनुष्यादिकं च चतुष्पाच्च पश्वादिकं च यत्स्थावरजंगमात्मकं जगत्संसृजानि । अहमुत्पादयामीति । अत्रास्मिञ्जगति स्त्रीभिः स्त्रीसदृशैर्बलादिहीनैः पुरुषैः सह यः शूरंमन्यो जनो वृषणमभिलषितस्य वर्षितारं मां । परित्यज्येति शेषः । पृतन्याद्युद्धं कर्तुमिच्छति अहमस्येदृशस्य स्वभूतं वेदो धनमयुद्धस्तेन पुरुषेणायोद्धा सन् बलादपहृत्य वि भजानि । स्तोतृभ्यो यष्टृभ्यश्च ददामीत्यर्थः ॥

॥ इति सप्तमस्य सप्तमे षोडशो वर्गः ॥

॥ अथैकादशी ॥

यस्यानक्षा दुहिता जात्वास कस्तां विद्वाँ अभि मन्याते अंधां ।
कतरो मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात् ॥११॥
यस्य । अनक्षा । दुहिता । जातु । आस । कः । तां । विद्वान् । अभि । मन्याते । अंधां ।
कतरः । मेनिं । प्रति । तं । मुचाते । यः । ईं । वहाते । यः । ईं । वा । वरेऽयात् ॥११॥

यस्येंद्रस्य मम कारणरूपेणावस्थितस्यानक्षाक्षिवर्जिता दर्शनहीना । अचेतनेत्यर्थः । दुहिता प्रकृत्याख्या जातु कदाचिदास । असतेर्गत्यर्थस्य लिटि रूपं । सामर्थ्यान्महाप्रलये मय्येव लीना सती सर्वत्र वर्तते तां प्रकृतिं विद्वान् मय्येव लीनां जानन् मत्तोऽन्यो देवः को भवति । न कोऽपीत्यर्थः । अपि चांधां दर्शनहीनामचेतनां तामभि मन्याते । आत्मन्याश्रयप्रदानेन को देवोऽभिपूजयति । यद्वा । क्षीरोदकवत् घटाकाशवच्च मया सहैकीभूतां तामाभिमुख्येन को जानाति । अहमेव सर्वज्ञः स्वात्मन्याश्रयप्रदानेनाभिपूजयामि । मया सहैकीभूतां तां तत्त्वतोऽहमेव जानामि । नान्य इति । किंच । कतरो देवो मेनिं वज्रं तं प्रसिद्धं वृत्रादिशत्रुं प्रति मुचाते । मुंचति । स्वयमेव प्रश्नमुत्थाप्येदानीं प्रतिब्रूते । यो देव ईमेनं शत्रुं वहाते । वहति । अपि वा । य ईमेनं वरेयात् । वरयितुमिच्छति । स चाहमेव नान्यो मत्सदृशोऽस्तीत्यर्थः ॥

॥ अथ द्वादशी ॥

कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण ।
भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित् ॥१२॥
कियती । योषा । मर्यतः । वधूऽयोः । परिऽप्रीता । पन्यसा । वार्येण ।
भद्रा । वधूः । भवति । यत् । सुऽपेशाः । स्वयं । सा । मित्रं । वनुते । जने । चित् ॥१२॥

कियती किंपरिमाणा योषा स्त्रीजातिर्मर्यतो मनुष्यसंबंधिनो भोगानाचरतो वधूयोः स्त्रीकामस्य सर्वात्मकस्यांतर्यामिरूपेणावस्थितस्येंद्रस्य परिप्रीता । अनुरक्ता । वशवर्तिनीत्यर्थः । कीदृशस्य । वार्येण वरणीयेन पन्यसा स्तोत्रेण । स्तुतस्य सत इति शेषः । अपि च यद्या वधूर्भद्रा कल्याणी सुपेशाः शोभनरूपा च भवति सा द्रौपदीदमयंत्यादिका वधूः स्वयमात्मनैव जने चिज्जनमध्येऽवस्थितमिति

मित्रं प्रियमर्जुननलादिकं पतिं वनुते। याचते। स्वयंवरधर्मेण प्रार्थयते। स च प्रीयमाणो वरजनोऽहमेवेत्यभिप्रायः। रूपं रूपं प्रतिरूपो बभूवेति मंत्रलिंगात्सर्वात्मकत्वादिति॥

॥ अथ त्रयोदशी ॥

पत्वो जगार प्रत्यंचमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथं।
आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिं॥१३॥

पत्वः। जगार। प्रत्यंचं। अत्ति। शीर्ष्णा। शिरः। प्रति। दधौ। वरूथं।
आसीनः। ऊर्ध्वा। उपसि। क्षिणाति। न्यङ्। उत्तानां। अनु। एति। भूमिं॥१३॥

अत्रादित्यात्मनेंद्रः स्तूयते तदंशत्वात्। आदित्यरूपींद्रः पत्वो रश्म्याख्यैः पादैर्जगार। वृष्टिलक्षणमुदकं गिरति गृह्णाति वा। गृहीत्वा च प्रत्यंचमात्मानं प्रतिगतमुदकमत्ति। भक्षयति। मंडलेऽवस्थापयतीत्यर्थः। तदनंतरं वरूथं वरणीयं वृष्टिलक्षणमुदकं शीर्ष्णा शिरःस्थानीयेन रश्मिजालेन शिरः सर्वस्य लोकस्य मस्तकं प्रति दधौ। दधाति। प्रतिक्षिपतीत्यर्थः। किंचोपस्युपस्थे स्वसमीपस्थाने मंडल आसीन उपविष्टः सन् ऊर्ध्वामुन्नतां स्वदीप्तिं क्षिणाति। हिनस्ति। आलोककरणाय प्रक्षिपतीत्यर्थः। न्यङ् रश्मिसमूहरूपेण नीचैरंचिता गंता सन् उत्तानां विस्तृतां भूमिमन्वेति। अनुगच्छति॥

॥ अथ चतुर्दशी ॥

बृहन्नच्छायो अपलाशो अर्वा तस्थौ माता विषितो अत्ति गर्भः।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः॥१४॥

बृहन्। अच्छायः। अपलाशः। अर्वा। तस्थौ। माता। विऽसितः। अत्ति। गर्भः।
अन्यस्याः। वत्सं। रिहती। मिमाय। कया। भुवा। नि। दधे। धेनुः। ऊधः॥१४॥

वसुक्रोऽनयादित्यात्मानमिंद्रं स्तौति। बृहन्महानादित्योऽच्छायश्छायावर्जितः। तमोरहित इत्यर्थः। अपलाशः पर्णरहितः। पलाशनवर्जितः। विनाशरहित इत्यर्थः। अर्वा सततगामी तस्थौ। तिष्ठति। किंच माता वृष्टिप्रदानद्वारेण सर्वस्य जगतो निर्माता विषितो विमुक्तः। निरालंबन इत्यर्थः। गर्भस्त्रैलोक्यस्य गर्भभूत आदित्यात्मेंद्रोऽत्ति। हवींषि भक्षयति। यद्वा। अनेन विनाशनं लक्ष्यते। पापानि नाशयति। किंचान्यस्या अदित्याख्याया देवमातुर्वत्समपत्यभूतमादित्यं

रिहत्यास्वादयंत्युपजीवंती वर्धयंती मिमाय। निर्मिमीते। पूर्वस्यां दिश्यहन्यहन्युत्पादयतीत्यर्थः। कया भुवा केन भावेनाभिप्रायेण। भक्त्या भयेन वेत्यर्थः। धेनुर्द्यौरुदकस्याधारत्वात् क्षरितृत्वाच्चोधः स्थानीयमादित्यं नि दधे। स्थापयति। यद्वा। धेनुर्गौरूधो यथा तद्वदादित्यं द्यौर्धारयति॥

॥ अथ पंचदशी ॥

सप्त वीरासो अधरादुदायन्नष्टोत्तरात्तात्समजग्मिरन्ते।

नव पश्चातात्स्थिविमंत आयन्दश प्राक्सानु वि तिरंत्यश्नः॥१५॥

सप्त। वीरासः। अधरात्। उत्। आयन्। अष्ट। उत्तरात्तात्। सं। अजग्मिरन्। ते।

नव। पश्चातात्। स्थिविऽमंतः। आयन्। दश। प्राक्। सानु। वि। तिरंति। अश्नः॥१५॥

अनयेंद्रः प्रजापतिरूपेण स्तूयते। सप्त सप्तसंख्याका वीरासः प्रजापतेः पुत्रा विश्वामित्रादयोऽधरात्प्रजापतेरधःकायादुदायन्। उत्पन्ना बभूवुः। अष्टाष्टसंख्याकास्ते प्रसिद्धा वालखिल्यादय उत्तरात्तादुत्तरात्कायप्रदेशात्समजग्मिरन्। संजज्ञिरे। स्थिविमंतः स्थानवंतो नव नवसंख्याका भृगवः पश्चातात्पृष्ठत आयन्। आगता उत्पन्ना इत्यर्थः। तथा दश दशसंख्याका अंगिरसः प्राक् अग्रत उत्पन्नाः संतोऽश्नोऽशनवतो द्युलोकस्य सानून्नतप्रदेशं वि तरंति। वर्धयंति॥ अपर आह। सप्तसंख्योपेता वीरा मरुतोऽधरादिंद्रस्य दक्षिणभागादुदगमन्। अष्टसंख्याकास्ते मरुत उत्तरभागात्संगच्छंते। स्थानवंतो नवसंख्याकास्ते मरुतः पृष्ठभागादागच्छंति। दशसंख्याकास्तेऽश्नोऽशनवत इंद्रस्य प्राक्प्रदेशे स्थिताः समुच्छ्रितमुदकं तेजो वा वितरंति। मरुतः प्रतिदिशमवस्थायेंद्रस्य साहाय्यं कुर्वंतीत्यर्थः॥

॥ इति सप्तमस्य सप्तमे सप्तदशो वर्गः॥

॥ अथ षोडशी ॥

दशानामेकं कपिलं समानं तं हिन्वंति क्रतवे पार्याय।

गर्भं माता सुधितं वक्षणास्ववेनंतं तुषयंती बिभर्ति॥१६॥

दशानां। एकं। कपिलं। समानं। तं। हिन्वंति। क्रतवे। पार्याय।

गर्भं। माता। सुऽधितं। वक्षणासु। अवेनंतं। तुषयंती। बिभर्ति॥१६॥

दशानां दशसंख्याकानां पूर्वोक्तानामेवांगिरसां मध्य एकं मुख्यं कपिलमे-

तन्नामानं तं प्रसिद्धमृषिं। कीदृशं। समानं सदृशं। केन। सामर्थ्यात्प्रजापतिना। हिन्वंति। अवशिष्टा अंगिरसः प्रेरयंति। किमर्थं। ऋतवे यज्ञादिजगत्प्रवर्तनकर्मणे। यद्वा सम्यग्ज्ञानलक्षणप्रज्ञानाय। कीदृशाय। पार्याय परिसमापयितव्याय। प्रणेतव्याय वा यज्ञादिकर्मोपदेशनायेत्यर्थः। माता प्रकृत्याख्या च वक्षणासु। वक्षणा इति नद्य उच्यंते। ताभिश्चात्रापो लक्ष्यंते। प्रकृतिस्थासु सूक्ष्मास्वप्सु सुधितं सुहितं। प्रजापतिना स्थापितमित्यर्थः। अवेनंतं। वेनतिः कांतिकर्मा। निवासमकामयमानं तादृशं प्रजापतेर्गर्भं तुषयंती तुष्यंती सम्यग्ज्ञानादुपदेष्टुं योग्योऽयमिति प्रीता सती बिभर्ति। प्रजापतेर्नियोगाद्धारयति॥

॥ अथ सप्तदशी ॥

पीवा॑नं मे॒षम॑पचंत वी॒रा न्यु॑प्ता अ॒क्षा अनु॑ दी॒व आ॑सन्।
द्वा धनुं॑ बृह॒तीम॒प्स्व१॒॑तः प॒वित्र॑वंता चरतः पु॒नंता॑ ॥१७॥

पीवा॑नं। मे॒षं। अ॒प॒चं॒त॒। वी॒राः। निऽउ॑प्ताः। अ॒क्षाः। अनु॑। दी॒वे। आ॒स॒न्।
द्वा। धनुं॑। बृ॒ह॒ती। अ॒प्ऽसु। अं॒तरिति॑। प॒वित्र॑ऽवंता। च॒र॒तः। पु॒नंता॑ ॥१७॥

वीराः प्रजापतेः पुत्रा अंगिरसः पीवानं स्थूलं। मेदोमांसादियुक्तमित्यर्थः। मेषमजमपचंत। प्रजापतिरूपस्येंद्रस्यार्थाय पक्ववंतोऽभवन्। पशुयागं कुर्वंत इत्यर्थः। किंच लुप्तोपममेतत्। यथा देवानामक्षा दीवे देवने रमणस्थाने न्युप्ता निक्षिप्ताः संतोऽन्वासन् संक्रीडमानयोर्द्वयोरेकतरस्यानुगता भवंति तथा सर्वेऽगिरसः प्रजापतेरनुगता भवंति। यद्वा। अंगिरसां मध्ये द्वावंगिरसौ धनुं। धनुशब्दोऽत्र धनुःशब्दपर्यायो धनशब्दपर्यायो वा। धनुर्यथा वधसाधनं तथाज्ञानादिवधसाधनं धनवत्प्रीतिकरं वा कपिलमित्यर्थः। बृहती प्रजापतेराज्ञया वर्धयित्री प्रकृतिमप्स्वंतः प्रकृतिस्थानां सूक्ष्माणामुदकानां मध्ये चरतः। प्राजापत्यादेशादाराधयतः। कीदृशौ। पवित्रवंता पवित्रवंतौ। मंत्रः पवित्रमुच्यते। ध्यानसाधनप्रणवमंत्रवंतौ पुनंता शुद्धौ प्रणवध्यानेनात्मानं संस्कुर्वंतावित्यर्थः॥

॥ अथाष्टादशी ॥

वि क्रो॑शना॒सो॒ वि॒ष्वं॑च आय॒न्पचा॑ति॒ नेमो॒ न॒हि पक्ष॑द॒र्धः।
अ॒यं मे॑ दे॒वः स॑वि॒ता तदा॑ह॒ द्र्व॑न्न इ॒द्व॑नवत्स॒र्पिर॑न्नः ॥१८॥

वि। क्रोशनासः। विष्वंचः। आयन्। पचाति। नेमः। नहि। पक्षत्। अर्धः।
अयं। मे। देवः। सविता। तत्। आह। द्रुऽअन्नः। इत्। वनवत्। सर्पिःऽअन्नः॥१८॥

विक्रोशनासो विविधं प्रजापतिं पितरमाह्वयंतो विष्वंचो नानागतयो नानापूजना वा सर्वेऽगिरस आयन्। आगच्छन्। प्रजापतेः सकाशादुत्पन्ना इत्यर्थः। उत्पद्यमानो नेमोऽर्धोऽगिरसां मध्य एको भागः पचाति। प्रजापत्यर्थं हवींषि पचति। अर्धोऽपरो भागो नहि पक्षत्। नहि पचति। एतत्सर्वं कथमज्ञायि। उच्यते। अयमीदृशो देवो द्योतमानः सविता सर्वस्य प्रेरक आदित्यो वा प्रजापतिर्वा मे मह्यं तत्सर्वं यथोक्तमाह। किंच। सर्पिरन्नो घृतौदनो द्रुन्न इत् दार्वोदनोऽग्निरपि वनवत्। हविर्द्वारेण प्रजापतिं वनुते। संभजते॥

॥ अथैकोनविंशी ॥

अपश्यं ग्रामं वहमानमारादचक्रया स्वधया वर्तमानं।
सिषक्त्यर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान्॥१९॥
अपश्यं। ग्रामं। वहमानं। आरात्। अचक्रया। स्वधया। वर्तमानं।
सिसक्ति। अर्यः। प्र। युगा। जनानां। सद्यः। शिश्ना। प्रऽमिनानः। नवीयान्॥१९॥

अपश्यं वसुक्रोऽहं प्रजापतिरूपमिंद्रं सम्यग्ज्ञानेन दृष्टवानस्मि। कीदृशं। ग्रामं ग्रामभूतं संघं वहमानं वाहयंतं। सृजंतमित्यर्थः। कुतः। आराद्दूरात्। उपादानकारणात्प्रकृतित इत्यर्थः। अचक्रया चक्रवर्जितया रथहीनया स्वधया स्वयमात्मानं धारयंत्या सेनया वर्तमानमागच्छंतं। एवंभूतमपश्यमित्यर्थः। किंच। अर्यः सर्वस्य स्वामींद्रो जनानां यजमानानां कार्यत्वेन संबंधिनो युगा युग्मानि यज्ञकालविशेषान्प्र सिषक्ति। प्रकर्षेण सेवते। कीदृशः। सद्यस्तदानीमेव शिश्ना शिश्नानि। शिश्नं श्नथतेरिति निर्वचनात् श्नथितॄणि ताडयितॄणि राक्षसादिवृंदानि प्रमिनानः प्रकर्षेण हिंसन् नवीयान् शरीरेण च बलपौरुषनयनादिभिश्च नवतरः॥

॥ अथ विंशी ॥

एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधीर्मुहुरिन्ममंधि।
आपश्चिदस्य वि नशंत्यर्थं सूरश्च मर्क उपरो बभूवान्॥२०॥

एतौ। मे। गावौ। प्रऽमरस्य। युक्तौ। मो इति। सु। प्र। सेधीः। मुहुः। इत्। ममंधि।
आपः। चित्। अस्य। वि। नशंति। अर्थं। सूरः। च। मर्कः। उपरः। बभूवान् ॥२०॥

कार्यकारणयोरुपचाराद्दात्मा वै पुत्रनामासीति वचनाच्चेंद्ररूपेणावस्थितस्य प्रमरस्य प्रकर्षेण शत्रूणां मारयितुर्मे मम स्वभूतावेतावेताहशौ युक्तौ सुष्ठु पूजितौ गावौ शत्रून्यज्ञांश्च प्रति गंतारौ हरी मो प्र सेधीः। स्तुत्युपसंहारकरणेनास्मद्यज्ञान्मापगमय। किं तर्हि मुहुरित् मुहुर्मुहुर्ममंधि। पुनः पुनः स्तुहि ममात्मन्नित्यर्थः। आपश्चिद्वृष्टिलक्षणान्युदकान्यपस्येंद्रस्यार्थं गतिं वि नशंति। विनशतिर्व्याप्तिकर्मा। व्याप्नुवंति। तथा सूरश्च सूर्यश्च व्याप्नोति। कीहशः। मर्को मार्जयिता सर्वस्य शोधयितोपरो मेघसदृशो बभूवान् भवन्। मेघवच्छीघ्रगतिः सन्नित्यर्थः ॥

॥ इति सप्तमस्य सप्तमेऽष्टादशो वर्गः ॥

॥ अथैकविंशी ॥

अयं यो वज्रः पुरुधा विवृत्तोऽवः सूर्यस्य बृहतः पुरीषात्।
श्रव इदेना परो अन्यदस्ति तदव्यथी जरिमाणस्तरंति ॥२१॥

अयं। यः। वज्रः। पुरुधा। विऽवृत्तः। अवः। सूर्यस्य। बृहतः। पुरीषात्।
श्रवः। इत्। एना। परः। अन्यत्। अस्ति। तत्। अव्यथी। जरिमाणः। तरंति ॥२१॥

योऽयं वज्र इंद्रस्य स्वभूतः सूर्यस्यादित्यस्य बृहतो महतः पुरीषात्पूरकान्मंडलादवोऽवस्ताद्धोभागे स्थितेषु विवृत्तो वृष्ट्यर्थं प्रवृत्तः पतितः। इच्छब्दोऽप्यर्थे। तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः। परः परस्तादंतरिक्षलोकस्योपरि स्थिते सूर्यमंडले स्थितमेनैतत्। श्रव इत्यन्ननाम। तद्धेतुत्वादुदकं श्रव इत्युच्यते। यदप्युदकं मेघोदरगतादुदकादन्यदप्यस्ति अव्यथी व्यथारहिता जरिमाणः स्तोतारो मरुदादयस्तत्तादृशमुदकं तरंति। अंतरिक्षलोकं प्रत्यवतारयंति ॥

॥ अथ द्वाविंशी ॥

वृक्षेवृक्षे नियता मीमयद्गौस्ततो वयः प्र पतान्पूरुषादः।
अथेदं विश्वं भुवनं भयात इंद्राय सुन्वदृषये च शिक्षत् ॥२२॥

वृक्षेऽवृक्षे। निऽयता। मीमयत्। गौः। ततः। वयः। प्र। पतान्। पुरुषऽअदः।
अथ। इदं। विश्वं। भुवनं। भयाते। इंद्राय। सुन्वत्। ऋषये। च। शिक्षत् ॥२२॥

वृक्षे वृक्षे सर्वस्मिन्वृक्षमये धनुषि नियता संबद्धा गौर्गोसंबंधिनी स्नायुमती मौर्वी मीमयत्। मीमयतिः शब्दकर्मा। आकृष्यमाणा सती शब्दं करोति। ततस्तस्माद्धनुषः पुरुषादः शत्रुजनानामत्तारः। मारयितार इत्यर्थः। वयः पक्षिसदृशा गंतारो बाणाः प्र पतान्। शत्रून्प्रति प्रपतंति। अथ तदानीमिंद्रायेंद्रार्थं सुन्वत् सोमयागं कुर्वेहषये च शिक्षत् कर्मणां द्रष्ट्र ऋत्विजे च संपूर्णां दक्षिणां ददत्पीदमीदृशं विश्वं समस्तं भुवनं भूतजातं भयाते। इंद्राद्बिभेति। अन्यत्किमुतेत्यर्थः॥

॥ अथ त्रयोविंशी ॥

देवानां माने प्रथमा अतिष्ठन्कृंतत्रादेषामुपरा उदायन्।
त्रयस्तपंति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषं ॥२३॥

देवानां। माने। प्रथमाः। अतिष्ठन्। कृंतत्रात्। एषां। उपराः। उत्। आयन्।
त्रयः। तपंति। पृथिवीं। अनूपाः। द्वा। बृबूकं। वहतः। पुरीषं ॥२३॥

देवानां सर्वेषां माने निर्माणे। सृष्टिकाल इत्यर्थः। जगत्स्थितिहेतुभूतरसानुप्रदानकर्मणि स्रष्टव्यत्वेन प्रथमा अतिष्ठन्। इंद्रादेशादेते पूर्वे स्थिताः। क एते। मेघाः। कुत एतदवगम्यते। परस्मिन्पादे तेषामनुकथनात्। उक्तं हि। मेघा एव माध्यमिका देवगणा इति। एषामेवंभूतानां मेघानां कृंतत्राच्छेदनादुपराः। मेघनामैतत्। तत्रस्था आप उच्यंते। मेघस्था आप उदायन्। उत्पन्नाः। वृष्टिभावेन भूमौ निपातिता इत्यर्थः। पातितास्वप्स्विंद्रस्याज्ञया पर्जन्यो वायुरादित्य इत्येते त्रयो देवाः पृथिवीं भूमिं। तत्रस्था ओषधीरित्यर्थः। तपंति। वृष्टिशीतोष्णैः संतापयंति। पाचयंतीत्यर्थः। कीदृशाः। अनूपाः। वर्षादीनामानुपूर्व्येण वप्तारः प्रभावयितारः। प्रक्षेप्तार इत्यर्थः। द्वा द्वौ वाय्वादित्यौ पाचितास्वोषधीषु स्थितं पुरीषं सर्वस्य प्रीणयितृ वा बृबूकमुदकमादित्यमंडलं प्रति वहतः। वायुः शोषयन् आदित्यो रश्मिभिराददान इत्यर्थः॥

॥ अथ चतुर्विंशी ॥

सा ते जीवातुरुत तस्य विद्धि मा स्मैतादृगप गूहः समर्ये।
आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते ॥२४॥

सा। ते। जीवातुः। उत। तस्य। विद्धि। मा। स्म। एतादृक्। अप। गूहः। सऽमर्ये।
आविः। स्व१रिति स्वः। कृणुते। गूहते। बुसं। सः। पादुः। अस्य। निःऽनिजः।
न। मुच्यते ॥२४॥

अत्रांतरात्मनेंद्रः स्तूयते। हे अंतरात्मन् ते तव सा तादृश्यादित्यात्मिका देवता जीवातुर्जीविका जीवनहेतुः। उतापि च तस्यादित्यस्यैतादृगीदृशं स्वरूपं समर्ये। संग्रामवाची समर्यशब्दोऽत्र यज्ञवाची। यज्ञे विद्धि। जानीहि। स्तुत्यत्वेनेति शेषः। मा स्माप गूहः। मा खल्वपवृणोः। किंच। निर्णिजः सर्वस्य शोधयितुरादित्यस्य स पादुस्तच्च पादनं गमनं रश्मिद्वारेण गत्वा स्वः सर्वं त्रैलोक्यमाविष्कृणुते। प्रकाशीकरोति। बुसमुदकं गूहते। संवृणोति। आदत्त इत्यर्थः। अस्मै प्रयोजनद्वयायादित्येन निर्वेदनाच्छ्रमेण वा गमनं न मुच्यते। न कदाचित्परित्यज्यत इत्यर्थः ॥

॥ इति सप्तमस्य सप्तम एकोनविंशो वर्गः ॥

विश्वो हीति द्वादशर्चं द्वादशं सूक्तं त्रैष्टुभं। इंद्रवसुक्रयोः पितापुत्रयोः संवादोऽत्र क्रियते। पुरा वसुक्रे यज्ञं कुर्वाणे सतींद्रः प्रच्छन्नरूप आजगाम। तं वसुक्रपत्नीद्रागमनाकांक्षिणी विप्रकृष्टमिवाद्ययास्तौत्। अतस्तस्याः सर्षिरिंद्रो देवता। अथ तस्याः प्रीत्यै वसुक्रेण सहेंद्रः संवादमकरोत्। द्वितीयादियुजश्चतुर्थीरहिताः पंचर्च इंद्रवाक्यानि। अतस्तासां स ऋषिः। यद्यप्यासु वसुक्रः संबोध्यत्वाद्देवता तथापि ता ऋच ऐंद्रे कर्मणि विनियोक्तव्या इंद्रलिंगसद्भावात्। चतुर्थीसहिताः शिष्टास्तृतीयाद्या वसुक्रवाक्यानि। अतः स ऋषिस्तासामिंद्रो देवता। तथा चानुक्रांतं। विश्वो हि द्वादशेंद्रवसुक्रयोः संवाद ऐंद्रः सूक्तस्य प्रथमयेंद्रस्य स्नुषा परोक्षवदिंद्रमाहेंद्रस्य युजः शेषा ऋषेश्चतुर्थी चेति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

विश्वो ह्य१न्यो अरिराजगाम ममेदह श्वशुरो ना जगाम।
जक्षीयाद्धाना उत सोमं पपीयात्स्वाशितः पुनरस्तं जगायात् ॥१॥
विश्वः। हि। अन्यः। अरिः। आऽजगाम। मम। इत्। अह। श्वशुरः। न। आ। जगाम।
जक्षीयात्। धानाः। उत। सोमं। पपीयात्। सुऽआशितः। पुनः। अस्तं। जगायात् ॥१॥

अनया वसुक्रपत्नीद्रं स्तौति। अन्य इंद्रव्यतिरिक्तोऽरिरर्य ईश्वरो विश्वो हि सर्व एव देवगण आजगाम। अस्मद्यज्ञं प्रत्याययौ। इदित्यवधारणे। अहेत्यद्भुते। सर्वदेवगण आगते सति ममैव श्वशुर इंद्रो ना जगाम। स इंद्रो यद्यागच्छेत्तर्हि धाना भृष्टयवाञ्जक्षीयात् भक्षयेत् उतापि च सोममभिषुतं पपीयात्। पिबेत्। ततः स्वाशितः सुष्ठु भुक्तस्तृप्तः सन् पुनर्भूयोऽस्तं स्वगृहं प्रति जगायात्। गच्छेत् ॥

॥ अथ द्वितीया ॥

स रोरुवद्वृषभस्तिग्मशृंगो वर्ष्मन्तस्थौ वरिमन्ना पृथिव्याः।
विश्वेष्वेनं वृजनेषु पामि यो मे कुक्षी सुतसोमः पृणाति ॥२॥

सः। रोरुवत्। वृषभः। तिग्मऽशृंगः। वर्ष्मन्। तस्थौ। वरिमन्। आ। पृथिव्याः।
विश्वेषु। एनं। वृजनेषु। पामि। यः। मे। कुक्षी इति। सुतऽसोमः। पृणाति ॥२॥

वृषभः कामानां वर्षिता तिग्मशृंगस्तीक्ष्णरश्मिः स इंद्रोऽहं पृथिव्या अंतरिक्षस्य वर्ष्मन् वर्ष्मणि। वर्ष्मञ्शब्द उन्नतवचनः स्थिरवचनो वा। एवंभूते वरिमन् विस्तीर्णे प्रदेशे रोरुवद्भृशं शब्दायमानः सन् आ तस्थौ। आतिष्ठामि। एवंभूतोऽहं विश्वेषु सर्वेषु वृजनेषु संग्रामेष्वेनमीदृशं वसुक्रं यजमानं पामि। रक्षामि। यो यजमानः सुतसोमोऽभिषुतसोमो मे मम कुक्षी उभौ पार्श्वौ पृणाति। सोमरसपुरोडाशादिहविर्भिः पूरयति। ईदृशं रक्षामीति संबंधः ॥

॥ अथ तृतीया ॥

अद्रिणा ते मंदिनं इंद्र तूयान्त्सुन्वंति सोमान्पिबसि त्वमेषां।
पचंति ते वृषभाँ अत्सि तेषां पृक्षेण यन्मघवन्हूयमानः ॥३॥

अद्रिणा। ते। मंदिनः। इंद्र। तूयान्। सुन्वंति। सोमान्। पिबसि। त्वं। एषां।
पचंति। ते। वृषभान्। अत्सि। तेषां। पृक्षेण। यत्। मघऽवन्। हूयमानः ॥३॥

हे इंद्र ते त्वदर्थं मंदिनो मादयितॄन् तूयानविलंबितान्सोमानद्रिणाभिषवग्राव्णा सुन्वंति। यजमाना अभिषुण्वंति। एषामस्मदादियजमानानां संबंधिनः सोमान्त्वं पिबसि। किंच त्वदर्थं वृषभान्पशून्ये च यजमानाः पचंति तेषां संबंधिनो हविर्भूतान्पशूनत्सि। भक्षयसि। हे मघवन् धनवन्निंद्र त्वं यदा पृक्षेण हविर्भूतेनान्नेन निमित्तेन हूयमानो यजमानैर्हूयसे तदेति पूर्वेण संबंधः ॥

॥ अथ चतुर्थी ॥

इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्यो वहंति ।
लोपाशः सिंहं प्रत्यंचमत्साः क्रोष्टा वराहं निरतक्त कक्षात् ॥४॥
इदं । सु । मे । जरितः । आ । चिकिद्धि । प्रतिऽइपं । शापं । नद्यः । वहंति ।
लोपाशः । सिंहं । प्रत्यंचं । अत्सारिति । क्रोष्टा । वराहं । निः । अतक्त । कक्षात् ॥४॥

हे जरितः शत्रूणां जरयितरिंद्र त्वं मे मम सु शोभनमपीदमीदृशं रूपं सामर्थ्यमा चिकिद्धि । आ समंताज्जानीहि । कीदृशं । नद्यो गंगाद्याः सरितः प्रतीपं प्रतिकूलं शापमुदकं वहंति । अपि च लोपाशः । लुप्यमानं तृणमश्नातीति लोपाशो मृगः । मया प्रेषितः सन् प्रत्यंचमात्मानं प्रति गच्छंतं सिंहमत्साः । अत्सात् । आभिमुख्येन गच्छति । तथा क्रोष्टा शृगालो वराहं बलवंतमपि सूकरं कक्षादभिगहनदेशान्निरतक्त । निर्गमयति । एतदपि सर्वं सामर्थ्यं त्वत्पुत्रे मयि त्वत्प्रसादाल्लब्धमपि जानीहीत्यर्थः ॥

॥ अथ पंचमी ॥

कथा त एतदहमा चिकेतं गृत्सस्य पाकस्तवसो मनीषां ।
त्वं नो विद्वाँ ऋतुथा वि वोचो यमर्धं ते मघवन्क्षेम्या धूः ॥५॥
कथा । ते । एतत् । अहं । आ । चिकेतं । गृत्सस्य । पाकः । तवसः । मनीषां ।
त्वं । नः । विद्वान् । ऋतुऽथा । वि । वोचः । यं । अर्धं । ते । मघऽवन् । क्षेम्या । धूः ॥५॥

हे इंद्र पाकः पक्तव्यप्रज्ञोऽहं गृत्सस्य मेधाविनस्तवसो वृद्धस्य ते तव मनीषां स्तुतिं । कर्तुमिति शेषः । एतदीदृशं त्वदीयं सामर्थ्यं कथा कथं केन प्रकारेण चिकेतं । आ समंताज्जानामि । त्वदुपदेशं विना न जानामीत्यर्थः । तस्मात्कारणाद्विद्वान् सर्वज्ञस्त्वमेव नोऽस्मभ्यमृतुथा काले काले वि वोचः । विशेषेण ब्रूहि । हे मघवन् धनवन्निंद्र ते तवार्धं यं स्तुत्यवयवं कुर्मः सा स्तुतिर्धूः क्षेम्या क्षेमे भवा क्लेशरहिता वोढुं शक्यास्ति । यस्मात्तव स्तुत्यवयवमेव वयमक्लेशेन कर्तुं न शक्नुमोऽस्माकं मंदबुद्धित्वात्तस्मात्त्वमेवास्मभ्यं स्वसामर्थ्यं स्तुतिप्रकारं च पुनरपि कथयेत्यर्थः ॥

॥ अथ षष्ठी ॥

एवा हि मां तवसं वर्धयंति दिवश्चिन्मे बृहत उत्तरा धूः ।
पुरू सहस्रा नि शिशामि साकमशत्रुं हि मा जनिता जजान ॥६॥
एव । हि । मां । तवसं । वर्धयंति । दिवः । चित् । मे । बृहतः । उत्ऽतरा । धूः ।
पुरु । सहस्रा । नि । शिशामि । साकं । अशत्रुं । हि । मा । जनिता । जजान ॥६॥

हि यस्मात्कारणादेवैवमुक्तप्रकारेण तवसं प्रवृद्धं मां स्तोतारः स्तुतिभिः स्तुवंतो वीर्येण वर्धयंति तस्मात्कारणाद्बृहतो महतो मे ममेंद्रस्य दिवश्चिद्द्युलोकादपि धूः स्तुतिरुत्तरोन्नततराधिकतरा । किंच । पुरु पुरूणि बहूनि सहस्रा शत्रूणां सहस्राणि साकं युगपन्नि शिशामि । तनूकरोमि । हिनस्मीत्यर्थः । हि यस्मात्कारणाज्जनिता सर्वस्य जनयिता प्रजापतिर्मा मामिंद्रमशत्रुमविद्यमानशत्रुं जजान । जनितवान् ॥

॥ इति सप्तमस्य सप्तमे विंशो वर्गः ॥

॥ अथ सप्तमी ॥

एवा हि मां तवसं जज्ञुरुग्रं कर्मन्कर्मन्वृषणमिंद्र देवाः ।
वधीं वृत्रं वज्रेण मंदसानोऽप व्रजं महिना दाशुषे वं ॥७॥
एव । हि । मां । तवसं । जज्ञुः । उग्रं । कर्मन्ऽकर्मन् । वृषणं । इंद्र । देवाः ।
वधीं । वृत्रं । वज्रेण । मंदसानः । अप । व्रजं । महिना । दाशुषे । वं ॥७॥

हि यस्मात्कारणादेवैवमनेनोक्तप्रकारेण हे इंद्र देवा मरुदादय ऋत्विग्यजमाना वा तवसं महांतं त्वमुचं त्वद्रूपेणावस्थितं संतं वसुक्रं मां कर्मन्कर्मन् वृत्रवधाग्निहोत्रादौ सर्वस्मिन्कर्मण्युग्रं शूरमसह्यं वा वृषणं वर्षितारं हविषां दातारं जज्ञुर्जानंति अतो मंदसानो मोदमानोऽहं वज्रेणायुधेन वृत्रं मेघासुरं वधीं । अवधिषं । किंच दाशुषे हविर्दत्तवते यजमानाय वृष्टिप्रदानार्थं महिना महत्त्वेन व्रजं मेघसमूहमप वं । अपावं । अपवृणोमि ॥

॥ अथाष्टमी ॥

देवास आयन्परशूँरबिभ्रन्वना वृश्चंतो अभि विड्भिरायन् ।
नि सुद्रं१दधतो वक्षणासु यत्रा कृपीटमनु तद्दहंति ॥८॥

देवासः। आयन्। पर्शून्। अबिभ्रन्। वना। वृश्चंतः। अभि। विट्ऽभिः। आयन्।
नि। सुऽद्रं। दधंतः। वक्षणासु। यत्र। कृपीटं। अनु। तत्। दहंति ॥८॥

देवासो देवा इंद्रेण चोदिताः संत आयन्। गच्छंति। मेघवधार्थं पर्शून्वज्रानबिभ्रन्। धारयंति च। तदनंतरं विड्भिर्मरुदादिप्रजाभिः सहिता वृश्चंतो मेघाञ्छिंदंतो वना वनानि वृष्टिलक्षणान्युदकान्यभ्यायन्। आभिमुख्येन गच्छंति। ततः सुद्रं शोभनद्रवणं वृष्ट्युदकं वक्षणासु नदीषु नि दधतो नियमेन स्थापयंतो यत्र यस्मिन्मेघजाते कृपीटं। उदकनामैतत्। निगूढमुदकं तिष्ठति त इमे देवास्तन्मेघजातमनु लक्षीकृत्य दहंति। उदकनिर्गमनार्थं शोषयंति ॥

॥ अथ नवमी ॥

शशः क्षुरं प्रत्यंचं जगाराद्रिं लोगेन व्यभेदमारात्।
बृहंतं चिदृहते रंधयानि वयद्वत्सो वृषभं शूशुवानः ॥९॥

शशः। क्षुरं। प्रत्यंचं। जगार। अद्रिं। लोगेनं। वि। अभेदं। आरात्।
बृहंतं। चित्। ऋहते। रंधयानि। वयत्। वत्सः। वृषभं। शूशुवानः ॥९॥

वसुक्र इंद्रं प्रतिब्रूते। शश एतत्संज्ञितो मया प्रेरितो मृगविशेषः प्रत्यंचं वधायात्मानं प्रति गच्छंतं क्षुरं क्षुरवंतं दृढदीर्घतीक्ष्णनखं सिंहव्याघ्रादिकं। बलवत्क्रूरं मृगमित्यर्थः। जगार। गिरति गृह्णाति वा। किंच। लोगेन लोष्टेनाद्रिं हिमवदादिकं पर्वतमाराद्दूरे स्थितमपि व्यभेदं। अहं भिनद्मि। बृहंतं चिन्महांतमपि हस्त्यादिकमृहते ह्रस्वकायाल्पाय शशकादिकाय रंधयानि। वशं गमयानि। शूशुवानो वीर्येण वर्धमानो वत्सो वृषभं महोक्षं वयत्। युद्धाय गच्छति। हे इंद्र एतदपि सर्वं त्वत्प्रसादादहं करोमीत्यर्थः ॥

॥ अथ दशमी ॥

सुपर्ण इत्था नखमा सिषायावरुद्धः परिपदं न सिंहः।
निरुद्धश्चिन्महिषस्तर्ष्यावान्गोधा तस्मा अयथं कर्षदेतत् ॥१०॥

सुऽपर्णः। इत्था। नखं। आ। सिसाय। अवंऽरुद्धः। परिऽपदं। न। सिंहः।
निऽरुद्धः। चित्। महिषः। तर्ष्याऽवान्। गोधा। तस्मै। अयथं। कर्षत्। एतत् ॥१०॥

सुपर्णः पक्षिरूपा गायत्रीत्थामुत्र द्युलोके नखमात्मीयमा सिषाय। सोमा-

हरणकाल इंद्रार्थमाबबंध। इंद्रस्य प्रसादाद्दिवि पदं न्यस्तवतीत्यर्थः। तत्र दृष्टांतः। अवरुद्धः पंजरेणावृतः परिवेष्टितः सिंहः परिपदं न। यथा कस्योपरि सर्वतः पादमवबध्नाति। किंच चिदित्युपमार्थे। यथा केनापि बद्धपादो निरुद्धो महिषस्तर्षावान् उदकाभावे तृषावान्भवत्येवमिंद्रः सोमाहरणात्पूर्वं सोमाभावे तृषितवानभूदिति शेषः। तस्मै। तादर्थ्ये चतुर्थी। तादृशस्य तृषितस्येंद्रस्यार्थं गोधा। गमयति वर्णानिति गौर्वाक् तत्र निधीयमानत्वाद्गायत्री गोधा। यद्वा। गुधिर्निष्कर्षणार्थः। निष्कृष्यसोमाहरणाद्गोधा गायत्री। अयथमयत्नेन। लीलयेत्यर्थः। एतत्सोमजातं कर्षत्। आकृष्टवती। दिवः सकाशादाहृतवतीत्यर्थः॥

॥ अथैकादशी ॥

तेभ्यो गोधा अयथं कर्षदेतद्ये ब्रह्मणः प्रतिपीयंत्यन्नैः।
सिम उक्ष्णोऽवसृष्टाँ अदंति स्वयं बलानि तन्वः शृणानाः॥११॥

तेभ्यः। गोधा। अयथं। कर्षत्। एतत्। ये। ब्रह्मणः। प्रतिऽपीयंति। अन्नैः।
सिमः। उक्ष्णः। अवऽसृष्टान्। अदंति। स्वयं। बलानि। तन्वः। शृणानाः॥११॥

ये मरुदादिदेवगणा ब्रह्मणः परिवृढस्येंद्रस्य स्वभूतैरन्नैः सोमाख्यैस्तृप्ताः संत इति शेषः। प्रतिपीयंति। पीयतिर्हिंसाकर्मा। इंद्रादेशाद्धिंसकान्प्रतिहिंसंति तेभ्यस्तेषां देवगणानामर्थाय गोधा पूर्वोक्ता गायत्र्ययथमनायासेनैतत्सोमजातं कर्षत्। आकृष्टवती। किंच। सिमः सिमान् श्रेष्ठान्। यद्वा सिमशब्दः सर्वशब्दपर्यायः। सर्वानुक्ष्णः सिंचतोऽवसृष्टानिंद्रेण निसृष्टाननुज्ञातान्हविर्भूतान्सोमान्यज्ञेष्वदंति। भक्षयंति। किं कुर्वंतः। स्वयमात्मनैव बलानि शत्रूणां सैन्यानि तन्वः शरीराणि च शृणाना हिंसंतः। गायत्रींद्रादेशाद्देवेभ्यः सोममाहृतवतीत्यर्थः॥

॥ अथ द्वादशी ॥

एते शमीभिः सुशमी अभूवन्ये हिन्विरे तन्व१ः सोम उक्थैः।
नृवद्वदन्नुप नो माहि वाजान्दिवि श्रवो दधिषे नाम वीरः॥१२॥

एते। शमीभिः। सुऽशमी। अभूवन्। ये। हिन्विरे। तन्वः। सोमे। उक्थैः।
नृऽवत्। वदन्। उप। नः। माहि। वाजान्। दिवि। श्रवः। दधिषे। नाम। वीरः॥१२॥

ये देवर्ष्यादयस्तन्वः शरीराणि सोमे सोमयाग उक्थैः शस्त्रैर्हिन्विरे वर्धयंति

एते देवादय इंद्रादेशात्सोम आहृते सति शमीभिः सोमयागकर्मभिः सुशमी सुकर्माणोऽभूवन्। नृवन्मनुष्यवद्वदन् इदं युष्मभ्यं मया दत्तमिति व्यक्तां वाचमुच्चारयन् नोऽस्मभ्यमुप माहि। उपगम्य वाजानन्नानि बलानि वा हे इंद्र त्वं देहीति शेषः। अतः कारणाद्वीरो दानशूरस्त्वं दिवि द्युलोके श्रवो दानपतिरिति कीर्तितं नाम नामधेयं दधिषे। धारयसि ॥

॥ इति सप्तमस्य सप्तम एकविंशो वर्गः ॥

वने न वेत्यष्टर्चं चयोदशं सूक्तं वसुक्रस्यार्षं चैष्टुभमैंद्रं। अनुक्रांतं च। वने नाष्टाविति॥ चतुर्थेऽहनि स्तोमवृद्धौ ब्राह्मणाच्छंसिन एतत्सूक्तमावापार्थं। सूचितं च। स्तोमे वर्धमाने को अद्य नर्यो वने न वा यः। आ० ७.१२.। इति ॥ महाव्रते निष्केवल्ये तत्सूक्तं। सूचितं च। प्र वो महे मंदमानायांधस इति निविद्धानं वने न वा यो न्यधायि चाकन्। ऐ० आ० ५.३.। इति ॥

॥ तच प्रथमा ॥

वने न वा यो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः।
यस्येदिंद्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् ॥१॥

वने। न। वा। यः। नि। अधायि। चाकन्। शुचिः। वां। स्तोमः। भुरणौ। अजीगरिति।
यस्य। इत्। इंद्रः। पुरुऽदिनेषु। होता। नृणां। नर्यः। नृऽतमः। क्षपाऽवान् ॥१॥

वने न वायो न्यधायीति वने न वन इव वृक्ष इव शकुनिः स्वे नीडे वायमात्मीयं पुत्रं न्यधायि निदधाति शिशुकमजातपक्षं। स यथा तत्र निहितश्चाकन्पश्यन् भयाद्दिशो निरीक्षमाण आसीत्। अथवा कामयमानस्तदुत्सुकमना आसीत्। एवमयमस्मासु वृक्षस्य नीडभूतेषु शकुनिपुत्रभूतः शुचिर्व्यपगतसर्वदोषो युवयोः स्वभूतः स्तोमः। हे भुरणौ भर्तारावश्विनौ शीघ्रौ वा। भुरण्युरिति क्षिप्रनामेति। किंच। यस्य स्तोमस्य पुरुदिनेषु बहुष्वहःस्विंद्रो होतेंद्रोऽप्याह्वाता भवति ममायं स्तोमः स्यादिति। किंलक्षणः पुनरिंद्र आह्वाता। यो नृणां मनुष्याणां नृतमः। मनुष्याणामपि मनुष्यतमः। शूराणामपि मध्ये शूरतम इत्यर्थः। नर्यश्च नृभ्यो हितो यः क्षपावांश्च रात्रिपर्यायेषु सोमभागः। एवंगुणयुक्तेन यः स्तोम इंद्रेणापि प्रार्थ्यतेऽस्मासु वर्तमानः स युवां प्रत्यजीगः। नित्यकालमेव गच्छतीत्यर्थः। एतावदेतामृचमाश्विनीमिति कृत्वा व्याचक्षते। तदसाधु।

ऐंद्रे हि सूक्ते प्रथमैवेयं भवति। तच्च पुनः पृष्ठ्यस्य षष्ठेऽहनि स्तोमे वर्धमाने माध्यंदिने सवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुज्यते। हे भुरणी भर्तारौ देवानां पती य एष स्तोमोऽस्मासु निहितः शुचिर्व्यपगतदोषः शकुनिपुत्र इव वने वनावयवे वृक्षे चाकन्पश्यन्निव कामयमान इव वेंद्रमास्ते। यस्य स्तोमस्य किमिति। यस्येंद्रः पुरुदिनेषु बहुष्वहःस्वाह्वाताभूत् अपि नाम मामनेन स्तोमेन स्तुयुरिति। किंलक्षणः पुनराह्वाता। यस्येदिंद्र इति नृणां नृतमो नर्यश्च क्षपावांश्च समानमेतत्पूर्वेणार्थेन। यमेवमिंद्रः प्रार्थयते स एष स्तोमस्तं प्रत्यजीगः। गच्छतीत्यर्थः। अथवा स एष स्तोमोऽस्माभिरुदीर्यमाणस्तस्येंद्रस्य गुणान्गृह्णातीति स्यात्। जिगर्तिर्गृह्णातिकर्मेति ह्युक्तं। एवमत्र चाकन्नित्यस्य चायन्निति वा कामयमान इति वेत्येतौ विपरिणामावुपपद्येते शब्दसारूप्यादर्थाविरोधाच्च। एतस्मिन्निगमे पदविभागगतः कश्चिद्विचारोऽस्ति। तमाह भाष्यकारः। वेति च य इति च चकार शाकल्य इति। वा इति य इति च पदे चकार शाकल्यः पदकारः। तदेतद्विचार्यमाणं न साधु भवति। किं कारणं। उदात्तं त्वेवमाख्यातमभविष्यत्। एवमेतस्मिन्पदद्वये सति यदेतदाख्यातं न्यधायीति तदुदात्तमभविष्यत्। यद्वृत्तात्परस्य नित्यमाख्यातस्य निघातो न भवतीति लक्षणविदो मन्यंते। न चेदमुदात्तं तस्माद्य इति नेदं यद्वृत्तं किंतर्हि वाय इत्येकमेव पदं। किंच। असुसमाप्तश्चार्थः। अपुष्कलः। एवमेव तस्मिन्पदद्वये सति मंत्रस्यार्थोऽसुसमाप्तो भवति॥

॥ अथ द्वितीया ॥

प्र ते॑ अ॒स्या उ॒षसः॒ प्राप॑रस्या नृ॒तौ स्या॑म॒ नृत॑मस्य नृ॒णां।
अनु॑ त्रि॒शोकः॑ श॒तमाव॑हन्नॄ॒न्कुत्से॑न॒ रथो॒ यो अस॑त्सस॒वान्॥२॥

प्र। ते॒। अ॒स्याः। उ॒षसः॑। प्र। अप॑रस्याः। नृ॒तौ। स्या॒म॒। नृऽत॑मस्य। नृ॒णां।
अनु॑। त्रि॒ऽशोकः॑। श॒तं। आ। अ॒व॒ह॒त्। नॄन्। कुत्से॑न। रथः॑। यः। अस॑त्। स॒स॒ऽवान्॥२॥

अस्या वर्तमानाया ईदृश्या उषसो नृतौ। नृ नये। नयने प्रापणे। उदयकाल इत्यर्थः। नृणां नेतॄणां मध्ये नृतमस्यातिशयेन नेतुस्ते तवेंद्रस्य स्तुत्या यागेन च प्र स्याम। वयं प्रकृष्टा भवेम। तथा हे इंद्रापरस्या आगामिन्याश्चोषसो नृतौ प्रापणे तव स्तुत्या यागेन च वयं प्रकृष्टा भवेमेत्याशास्महे। किंच त्रिशोको नामर्षिर्हे इंद्र त्वामाराध्य त्वत्प्रसादाच्छतं बहूनन्वनुचरभूतान् नॄन्मनुष्यानावहत्।

प्रापितवान् । लब्धवानित्यर्थः । तथा तव कुत्सस्य च ससवान् सनिता युगपदेव संभक्ता यो रथोऽसदस्ति स रथः कुत्सेन । कुत्सो लब्धवानिति शेषः । तथा च मंत्रांतरे श्रूयते । यासि कुत्सेन सरथमवस्युः । ऋग्वे० ४.१६.११. । इति । यस्मादेवं तस्मात्त्वत्प्रसादाद्वयं प्रकृष्टा भवेमेत्यर्थः ॥

॥ अथ तृतीया ॥

कस्ते मद इंद्र रंत्यो भूद्दुरो गिरो अभ्युग्रो वि धाव ।

कद्वाहो अर्वागुप मा मनीषा आ त्वा शक्यामुपमं राधो अन्नैः ॥३॥

कः । ते । मदः । इंद्र । रंत्यः । भूत् । दुरः । गिरः । अभि । उग्रः । वि । धाव ।

कत् । वाहः । अर्वाक् । उप । मा । मनीषा । आ । त्वा । शक्यां । उपऽमं । राधः । अन्नैः ॥३॥

हे इंद्र ते तवेषन्मध्यमोत्तमानां सोमजन्यानां मदानां मध्ये को मदो रंत्यो रमयिता प्रीतिकरो भूत् । भवति । त्वत्प्रीतिकरमदयोग्यसोमदानाभिप्रायेणायं प्रश्नः । उग्र ओजस्वी त्वं दुरो यज्ञगृहद्वाराणि गिरः स्तुतिलक्षणा वाचश्चाभि वि धाव । अभ्यागच्छ । किंच कत् कदा वाहः । इंद्रं प्रत्युह्यत इति वाहः सोम उच्यते । एवंभूतोऽर्वाक् त्वत्प्रसादात्फलदानायास्मदभिमुखो भविष्यतीति शेषः । अपि च कदा मनीषा सर्वार्थदर्शना प्रज्ञा सर्वगुणग्राहिणी स्तुतिर्वा मा मां त्वत्प्रसादादुपगमिष्यतीति शेषः । कदा हे इंद्र त्वा त्वां । आ इत्युपसर्गश्रुतेर्योग्यपदाध्याहारः । आराध्य वयमन्नैः सह राधो धनमुपमं मत्समीपं शक्यां । शकिरत्र गत्यर्थोऽतर्भावितण्यर्थः । संगमयेयं ॥

॥ अथ चतुर्थी ॥

कदु द्युम्नमिंद्र त्वावतो नॄन्कया धिया करसे कन्न आगन् ।

मित्रो न सत्य उरुगाय भृत्या अन्ने समस्य यदसन्मनीषाः ॥४॥

कत् । ऊं इति । द्युम्नं । इंद्र । त्वाऽवतः । नॄन् । कया । धिया । करसे । कत् । नः । आ । अगन् ।

मित्रः । न । सत्यः । उरुऽगाय । भृत्यै । अन्ने । समस्य । यत् । असन् । मनीषाः ॥४॥

हे इंद्र त्वं कदु कदा वा द्युम्नं हविर्लक्षणमस्मदीयमन्नं भुंक्ष्वेति शेषः । कया धिया केन कर्मणा नॄन् नेतॄनस्मान् त्वावतस्त्वत्सदृशान्करसे । करिष्यसि । कत् कदा नोऽस्मान्प्रत्यागन् । आगमिष्यसि । सत्यः । अनवद्य इत्यर्थः । मित्रो न

सखेव तथा। हे उरुगाय बहुकीर्त इंद्र त्वं भृत्यै भरणाय पोषणाय भवसीति शेषः। यद्यदा समस्यास्मदादिकस्य सर्वस्य जगतोऽन्ने जगत्स्थितिनिमित्त आहारे मनीषा अन्नाभिलक्षणा बुद्धयोऽसन् भवेयुस्तदा सर्वस्य पोषणाय त्वं भवसीत्यर्थः ॥

॥ अथ पंचमी ॥

प्रेरय सूरो अर्थं न पारं ये अस्य कामं जनिधा इव ग्मन्।
गिरश्च ये ते तुविजात पूर्वीर्नर इंद्र प्रतिशिक्षंत्यन्नैः ॥५॥

प्र। ईरय। सूरः। अर्थं। न। पारं। ये। अस्य। कामं। जनिधाःऽइव। ग्मन्।
गिरः। च। ये। ते। तुविऽजात। पूर्वीः। नरः। इंद्र। प्रतिऽशिक्षंति। अन्नैः ॥५॥

सूरः सूर्योऽर्थं न यथार्तारं गंतारं योगिनमनुगृह्णन् पारं संसारस्यांतमपवर्गं गमयति तथा हे इंद्र त्वं यजमानान्संसारस्यांतं प्रेरय। गमय। येऽस्मदादयो यजमाना अस्य तवेंद्रस्य कामं सोमपानेच्छां ग्मन्। गमिरत्र विपूर्वोऽतर्भावितण्यर्थश्च द्रष्टव्यः। विगमयंति महता सोमपानेनापनयंति। तत्र दृष्टांतः। जनिधा इव। जनीनां जायानां संभोगकाले शय्यासु धारयितारः पतयो यथा प्रभूतसंभोगप्रदानेन मैथुनेच्छामपनयंति तद्वत्। किंच नरो नेतारोऽस्मदादयो ये यजमाना हे तुविजात बहुरूप। रूपं रूपं प्रतिरूपो बभूवेति वचनात्। सर्वात्मन्निंद्र ते तुभ्यं पूर्वीरनादिकालप्रवृत्ता गिरश्च स्तुतिलक्षणा वाचश्चान्नैः पुरोडाशादिहविर्भिः सह प्रतिशिक्षंति प्रतिकालं प्रयच्छंति तानस्मदीयान्यजमानान्पारं गमयेति पूर्वेण संबंधः ॥

॥ इति सप्तमस्य सप्तमे द्वाविंशो वर्गः ॥

॥ अथ षष्ठी ॥

माचे नु ते सुमिते इंद्र पूर्वी द्यौर्मज्मना पृथिवी काव्येन।
वराय ते घृतवंतः सुतासः स्वाद्मन्भवंतु पीतये मधूनि ॥६॥

माचे इति। नु। ते। सुमिते इति सुऽमिते। इंद्र। पूर्वी इति। द्यौः। मज्मना।
पृथिवी। काव्येन।
वराय। ते। घृतऽवंतः। सुतासः। स्वाद्मन्। भवंतु। पीतये। मधूनि ॥६॥

हे इंद्र ते तव स्वभूतेन मज्मना शत्रूणां मज्जकेन काव्येन कर्मणा द्यौः पृथिवी द्यावापृथिव्यौ नु क्षिप्रं सुमिते। निर्मिते। कीदृश्यौ। मात्रे निर्मात्र्यौ पूर्वी पूर्व्यौ महत्यौ। यस्मादीदृशेन महत्त्वेन युक्तस्तस्माद्धृतवंतोऽग्निमुखत्वात् त्वां क्षरंतो दीप्तिमंतो वा सुसंस्कृतत्वाद्यद्वाज्यसंयुक्ताः सुतासोऽभिषुताः सोमा वराय श्रेष्ठाय तुभ्यमिंद्राय स्वाद्मन् भवंतु। आस्वादिताः संतु। किमर्थं। पीतये पानाय। मधूनि मधुररसात्मकानि पुरोडाशादीन्यन्नानि हवींषि भक्षणार्थं दत्तानि भवंतु॥

॥ अथ सप्तमी ॥

आ मध्वो अस्मा असिचन्नमंत्रमिंद्राय पूर्णं स हि सत्यराधाः।

स वावृधे वरिमन्ना पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश्च ॥७॥

आ। मध्वः। अस्मै। असिचन्। अमंत्रं। इंद्राय। पूर्णं। सः। हि। सत्यऽराधाः।

सः। ववृधे। वरिमन्। आ। पृथिव्याः। अभि। क्रत्वा। नर्यः। पौंस्यैः। च॥७॥

अस्मा इंद्रायेंद्रार्थं मध्वो मधुररसस्य सोमस्य पूर्णममत्रं ग्रहचमसादिकं पात्रमासिचन्। आभिमुख्येन स्थित्वा परया भक्त्या अस्मदीया ऋत्विजः सिक्तवंतः। अग्नौ प्रक्षिप्तवंतः। हि यस्मात्कारणात्स इंद्रः सत्यराधाः सत्यधनः। यजमानेभ्यो दातव्यत्वेनाविसंवादिधन इत्यर्थः। तस्मादसिचन्निति संबंधः। अग्नावासिक्तेन तेन पात्रेण तृप्तः स इंद्रः पृथिव्या अंतरिक्षस्य वरिमन्नतिशयेन विस्तीर्णे स्थान आगत्याभि ववृधे। अभिवर्धते। कीदृश इंद्रः। नर्यो नृभ्यो हितः। क्रत्वा वृत्रवधादिकर्मणा प्रज्ञानेन वा पौंस्यैश्च युक्त इति शेषः॥

॥ अथाष्टमी ॥

व्यानळिंद्रः पृतनाः स्वोजा आस्मै यतंते सख्याय पूर्वीः।

आ स्मा रथं न पृतनासु तिष्ठ यं भद्रया सुमत्या चोदयासे ॥८॥

वि। आनट्। इंद्रः। पृतनाः। सुऽओजाः। आ। अस्मै। यतंते। सख्याय। पूर्वीः।

आ। स्म। रथं। न। पृतनासु। तिष्ठ। यं। भद्रया। सुऽमत्या। चोदयासे॥८॥

स्वोजाः शोभनबल इंद्रः पृतनाः शत्रुसेना व्यानट्। व्याप्नोति। स इंद्रः संग्रामेषु केनाप्यप्रतिहन्यमानः सन् शत्रूञ्जयतीत्यर्थः। किंच। पूर्वीः। अत्र पूर्वशब्द उत्कृष्टवाची। उत्कृष्टाः शत्रुसेना अप्रभवंत्यः सत्योऽस्मा अस्येंद्रस्य सख्याय

संधित्वलक्षणाय सखित्वाया यतंते । संधिं कर्तुमिच्छंतीत्यर्थः । अपरोऽर्धर्चः प्रत्यक्षकृतत्वाद्भिन्नं वाक्यं । हे इंद्र त्वं यं स्वीयं रथं भद्रया कल्याण्या सुमत्या शोभनया परानुग्रहया बुद्ध्या चोदयासे यज्ञान्प्रति प्रेरयसि तं रथमस्मद्यज्ञं प्रत्यागंतुं महतादरेण तिष्ठ । आरोह । तत्र दृष्टांतः । पृतनासु संग्रामेषु रथं न । यथा स्वरथं महतादरेणातिष्ठसि तद्वत् । स्मेति पदपूरणः ॥

॥ इति सप्तमस्य सप्तमे त्रयोविंशो वर्गः ॥

॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे दाशतय्या दशमे मंडले द्वितीयोऽनुवाकः ॥

तृतीयेऽनुवाके त्रयोदश सूक्तानि । तत्र प्र देवत्रेति पंचदशर्चं प्रथमं सूक्तं । इलूषपुत्रस्य कवषस्यार्षं त्रैष्टुभमब्देवत्यमपांनपाद्देवताकं वा । तथा चानुक्रांतं । प्र देवत्रा पंचोना कवष ऐलूष आपमपोनप्त्रीयं वेति ॥ अपर्यिष्य होतरित्युक्तः सन् होता प्र देवत्रेत्याद्या नवर्चोऽनुब्रूयात् । सूत्रितं च । प्र देवत्रा ब्रह्मणे गातुरेत्विति नव हिनोता नो अध्वरं देवयज्येति दशमी । आ० ५.१. । इति ॥

॥ तत्र प्रथमा ॥

प्र दे॑व॒त्रा ब्रह्म॑णे गा॒तुरे॑त्व॒पो अच्छा॒ मन॑सो॒ न प्रयु॑क्ति ।
म॒ही मि॒त्रस्य॒ वरु॑णस्य धा॒सिं पृ॑थु॒ज्रय॑से रीरधा सुवृ॒क्तिं ॥१॥

प्र । दे॒व॒ऽत्रा । ब्रह्म॑णे । गा॒तुः । ए॒तु॒ । अ॒पः । अच्छ॑ । मन॑सः । न । प्रऽयु॑क्ति ।
म॒ही । मि॒त्रस्य॑ । वरु॑णस्य । धा॒सिं । पृ॒थु॒ऽज्रय॑से । री॒र॒ध॒ । सु॒ऽवृ॒क्तिं ॥१॥

ब्रह्मणे । तृतीयार्थे चतुर्थी । ब्रह्मणा स्तोत्रेण स्तूयमान इति शेषः । गातुर्देवानपो वा प्रतिगमनशीलः सोमो देवत्रा देवीर्द्योतमाना अपो वसतीवर्येकधनालक्षणान्युदकान्यच्छाभि प्रैतु । प्रकर्षेण गच्छतु । तत्र दृष्टांतः । मनसो न प्रयुक्ति । यथा मनसः प्रयुक्तिः प्रयोग उद्योगः शीघ्रं गच्छति तद्वत् । एवं सोमेऽपः प्रतिगते सति हे मदीयात्मन् अध्वर्यो वा मही धासिं महत्सोमलक्षणमन्नं मित्रस्य वरुणस्य चार्थाय पृथुज्रयसे विस्तीर्णजवाय । महागतेरिंद्रस्य चार्थायेत्यर्थः । रीरध । संसाधय । संस्कुरु । दानयोग्यं कुरु । सुवृक्तिं सुष्ठु दोषैर्वर्जितां स्तुतिं च कुरु ॥

॥ अथ द्वितीया ॥

अध्व॑र्यवो ह॒विष्म॑न्तो॒ हि भू॒ताच्छा॒प इ॑तोश॒तीरु॑शन्तः ।
अव॒ याश्चष्टे॑ अ॒रुणः॑ सु॑प॒र्णस्तमास्य॑ध्वमू॒र्मिम॒द्य सु॑हस्ताः ॥२॥

अध्वर्यवः। हविष्मंतः। हि। भूत। अच्छ। अपः। इत। उशतीः। उशंतः।
अव। याः। चष्टे। अरुणः। सुऽपर्णः। तं। आ। अस्यध्वं। ऊर्मिं। अद्य। सुऽहस्ताः॥२॥

हे अध्वर्यवो यूयं हविष्मंतो ह्यभिषोतव्येन सोमलक्षणेन हविषा युक्ताः खलु भूत। भवत। किंच। हे उशंतः सोमाभिषवं कर्तुं कामयमाना अध्वर्यवो यूयमुशतीः सोमाभिषवांगभावमभिलषंतीरेकधनालक्षणा अपोऽच्छाभिमुख्येनेत। गच्छत। अरुणो रक्तवर्णः सुपर्णः सुपतनः सोमोऽवाधस्तादंतरिक्षे या मेघोदरगता अपश्चष्टे पश्यति। हे सुहस्ताः सोमाभिषवादिशोभनकर्मकारित्वात् सुवर्णमयपवित्राद्यलंकृताः। यद्वा। शोभनहस्ता एतेऽध्वर्यवो यूयमद्येदानीं तं तादृशमूर्मिं सोमसंघातं ताभिरद्भिः सहास्यध्वं। आभिमुख्येन स्थित्वा महतादरेण दशापवित्रे शोधनार्थं प्रक्षिपत॥

॥ अथ तृतीया ॥

अध्वर्यवोऽप इता समुद्रमपां नपातं हविषा यजध्वं।
स वो दददूर्मिमद्या सुपूतं तस्मै सोमं मधुमंतं सुनोत॥३॥
अध्वर्यवः। अपः। इत। समुद्रं। अपां। नपातं। हविषा। यजध्वं।
सः। वः। ददत्। ऊर्मिं। अद्य। सुऽपूतं। तस्मै। सोमं। मधुऽमंतं। सुनोत॥३॥

हे अध्वर्यवो यूयमप एकधनालक्षणान्युदकान्याहर्तुमिति शेषः। समुद्रमुदधिस्थानीयं जलाशयमित। गच्छत। इदानीमुत्तरोऽर्धर्चो व्याख्यायते पश्चाद्द्वितीयः पादः। स्वार्थिकोऽयं क्रमः। अद्येदानीं सोऽपां नपाद्वो जलाशयं प्रतिगतेभ्यो युष्मभ्यं सुपूतं सुष्टुशुद्धमूर्मिं जलसमूहं ददत्। ददातु। यूयमपि तेन समूहेन तस्मा अपां नपाते मधुमंतं मधुरस्वादूपेतं सोमं सुनोत। अभिषुणुत। अभिषुतेन सोमाख्येन हविषापां नपातं वृष्टिकर्मण्यधिकृतं देवं यजध्वं॥

॥ अथ चतुर्थी ॥

यो अनिध्मो दीदयदप्स्व१ंतर्यं विप्रास ईळते अध्वरेषु।
अपां नपान्मधुमतीरपो दा याभिरिंद्रो वावृधे वीर्याय॥४॥
यः। अनिध्मः। दीदयत्। अप्ऽसु। अंतः। यं। विप्रासः। ईळते। अध्वरेषु।
अपां। नपात्। मधुऽमतीः। अपः। दाः। याभिः। इंद्रः। ववृधे। वीर्याय॥४॥

उत्तरार्धस्य प्रत्यक्षकृतत्वादेकवाक्यतायै युष्मच्छब्देन समानार्थो भवच्छब्दः प्रथमार्धेऽध्याहार्यः। यो भवानपांनपादप्स्वंतरपां मध्ये मेघस्थानेऽनिध्मः काष्ठवर्जितः सन् दीदयत् दीप्यते विप्रासो मेधाविन ऋत्विग्यजमाना अध्वरेषु यागेषु यं भवंतमीळते स्तुवंति हे अपांनपात् स त्वं मधुमतीर्मधुररसयुक्ता अपो वृष्टिलक्षणा दाः। अस्मभ्यं देहि। याभिर्वसतिवर्यैकधनाख्याभिः सोमेन मिश्रिताभिरद्भिरिंद्रो वीर्याय वृत्रवधादिशूरकर्मणे वावृधे वर्धते ता अपो देहीति संबंधः ॥

॥ अथ पंचमी ॥

याभिः सोमो मोदते हर्षते च कल्याणीभिर्युवतिभिर्न मर्यः ।
ता अध्वर्यो अपो अच्छा परेहि यदासिंचा ओषधीभिः पुनीतात् ॥५॥

याभिः। सोमः। मोदते। हर्षते। च। कल्याणीभिः। युवतिऽभिः। न। मर्यः।
ताः। अध्वर्यो इति। अपः। अच्छ। परा। इहि। यत्। आऽसिंचाः। ओषधीभिः।
पुनीतात् ॥५॥

अभिषुतः सोमो याभिर्वसतीवर्यैकधनाख्याभिरद्भिः सह मोदते मुदितो भवति। हर्षते च। पुनरुक्तिरादरार्था। अत्यर्थं हृष्यतीत्यर्थः। तत्र दृष्टांतः। कल्याणीभिः कमनीयाभिर्युवतिभिस्तरुणीभिः स्त्रीभिः सह मर्यो न यथा मनुष्यो मोदते तद्वत् हे अध्वर्यो त्वं तास्तादृशीरपोऽच्छाभिप्राप्तुं परेहि। जलाशयं प्रतिगच्छ। किंच। यद्यदाहृताभिस्ताभिरद्भिरासिंचा आ समंतात्सोमानासिंचसि तदौषधीभिः सोमैः सहापश्च पुनीतात्। दशापवित्रेण पुनीहि ॥

॥ इति सप्तमस्य सप्तमे चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

एवेद्यूने युवतयो नमंत यदीमुशन्नुशतीरेत्यच्छ ।
सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिषणापश्च देवीः ॥६॥

एव। इत्। यूने। युवतयः। नमंत। यत्। ईं। उशन्। उशतीः। एति। अच्छ।
सं। जानते। मनसा। सं। चिकित्रे। अध्वर्यवः। धिषणा। आपः। च। देवीः ॥६॥

युवतयस्तरुण्यः स्त्रियो यूने तरुणाय नमंत यथा प्रह्वीभवंत्येवैवं वसतीवर्य-

कधनाख्या आपः सोमाय प्रह्वीभवंति । यद्वा युवतयः सोमेन सह मिश्रयित्र्य आपो यूनेऽभिषवादिकर्मणामात्मना सह मिश्रयित्रे कर्त्रेऽध्वर्यवे नमंत । प्रह्वीभवंत्येव । इदिति पूरणः । कदा । यद्यदोशन् अभिषवार्थं वसतीवरीः कामयमानः सोमः सोमाभिषवं कर्तुं कामयमानोऽध्वर्युर्वोशतीः सोमेन सह मिश्रीभावमभिषवादिकर्मांगभावं च कामयमाना ईमेना अपोऽच्छ प्राप्नुमेति गच्छति तदोपनमंते । अध्वर्यवो धिषणा तदीया स्तुतिलक्षणा वाक् च देवीर्देव्य आपश्च मनसा विशिष्टया बुद्ध्या सं जानते । सम्यग्जानंति । सं चिकित्रे । स्वं स्वमधिकारं परस्परोपकारं च चक्षुषा सम्यक् पश्यंति ॥

॥ अथ सप्तमी ॥

यो वो वृताभ्यो अकृणोदु लोकं यो वो मह्या अभिशस्तेरमुंचत् ।
तस्मा इंद्राय मधुमंतमूर्मिं देवमादनं प्र हिणोतनापः ॥७॥
यः । वः । वृताभ्यः । अकृणोत् । ऊं इति । लोकं । यः । वः । मह्याः । अभिऽशस्तेः । अमुंचत् ।
तस्मै । इंद्राय । मधुऽमंतं । ऊर्मिं । देवऽमादनं । प्र । हिणोतन । आपः ॥७॥

य इंद्रो वृताभ्यो मेघैरावृताभ्यः परिवेष्टिताभ्यो वो युष्मभ्यमद्भ्यो लोकं मेघोदरान्निर्गमनमार्गमकृणोदकरोत् । उ इति पूरणः । किंच । यो वो युष्मानपो मह्या महत्या अभिशस्तेर्मेघपरिवेष्टिता हिंसनादमुंचत् । मोचितवान् । हे आपो यूयं तस्मै तादृशायेंद्राय मधुमंतं मधुरस्वादुयुक्तं देवमादनमिंद्रादिदेवानां सोमेन सह मिश्रीभूय तर्पयितारमूर्मिमप्संघातं प्र हिणोतन । अस्मद्यज्ञं प्रति गमयत । सोमाभिषवकर्मांगभावाय प्रस्थापयत ॥

॥ अथाष्टमी ॥

प्रास्मै हिनोत मधुमंतमूर्मिं गर्भो यो वः सिंधवो मध्व उत्सः ।
घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः शृणुता हवं मे ॥८॥
प्र । अस्मै । हिनोत । मधुऽमंतं । ऊर्मिं । गर्भः । यः । वः । सिंधवः । मध्वः । उत्सः ।
घृतऽपृष्ठं । ईड्यं । अध्वरेषु । आपः । रेवतीः । शृणुत । हवं । मे ॥८॥

अत्र यच्छब्दसंबंधाद्द्वितीयः पादः पूर्वं व्याख्येयः । हे सिंधवः स्यंदनशीला आपो वो युष्माकं यो गर्भो मध्वो मधुररसस्योत्स उत्स्यंदनः प्रस्रवणः । यच्छब्द-

योगात्तच्छब्दोऽध्याहार्यः। तं मधुमंतं मधुररसोपेतमूर्मिमप्संघातं। सारमित्यर्थः। अस्मा अस्येंद्रस्यार्थाय प्र हिनोत। प्रहिणुत ॥

॥ अथ नवमी ॥

तं सिंधवो मत्सरमिंद्रपानमूर्मिं प्र हेत य उभे इयर्ति।
मदच्युतमौशानं नभोजां परि त्रितंतुं विचरंतमुत्सं ॥९॥
तं। सिंधवः। मत्सरं। इंद्रऽपानं। ऊर्मिं। प्र। हेत। यः। उभे इति। इयर्ति।
मदऽच्युतं। औशानं। नभःऽजां। परि। त्रिऽतंतुं। विऽचरंतं। उत्सं ॥९॥

हे सिंधवः स्यंदनशीला आपो यो युष्मदीयः सारभूतः समूह उभे अस्मभ्यं दृष्टादृष्टफले दाता सन् इयर्ति कर्मांगभावं प्रतिपद्यते मत्सरं मादयितारमिंद्रादिदेवानां तर्पयितारमिंद्रपानं देवानां प्रमुखेनेंद्रेण पानीयं तं तादृशमूर्मिमुदकसमूहं प्र हेत। प्रगमयत। अस्मद्यज्ञं प्रति प्रेरयत। कीदृशं। मदच्युतं मदस्य च्यावकमौशानं सोमेन सह मिश्रीभावं कामयमानं नभोजं नभस्यंतरिक्षे वृष्टिरूपेण जातं परि सर्वतस्त्रितंतुं त्रयाणां लोकानां तनितारं विस्तारयितारं विचरंतं यज्ञपात्रेषु गच्छंतमुत्समुत्स्यंदनं तर्पितारं देवान्प्रत्यूर्ध्वं गंतारमित्यर्थः ॥

अपोनप्त्रीय एकधनास्वावृत्तास्वाववृततीरित्येषा। सूत्रितं च। आववृततीरध नु द्विधारा इत्यावृत्तास्वेकधनासु। आ० ५.१.। इति। तत्रैव हिनोता न इत्येषा। सूत्रं पूर्वमुदाहृतं ॥

॥ तत्रैषा सूक्ते दशमी ॥

आववृततीरध नु द्विधारा गोषुयुधो न नियवं चरंतीः।
ऋषे जनित्रीर्भुवनस्य पत्नीरपो वंदस्व सवृधः सयोनीः ॥१०॥
आऽववृततीः। अध। नु। द्विऽधाराः। गोषुऽयुधः। न। निऽयवं। चरंतीः।
ऋषे। जनित्रीः। भुवनस्य। पत्नीः। अपः। वंदस्व। सऽवृधः। सऽयोनीः ॥१०॥

अधाथानंतरं गोषुयुधो न। गोष्वप्सु निमित्तभूतासु मेघैः सह युध्यत इति गोषुयुदिंद्रः। तस्य यथा वृष्टिलक्षणा अपो द्विधाराः। द्विशब्दोऽत्रानेकत्ववाची। अनेकधाराः। अपर्यंतधारा इत्यर्थः। अस्माकमप्येवंस्थिता आववृततीरावृत्ता नियवं सोमं प्रति निश्चयेन मिश्रीभावं चरंतीर्गच्छंतीर्भुवनस्य लोकस्य जनि-

वीर्जनयित्रीः पत्नीः पालयित्रीश्च सवृधः सह सोमस्य वर्धयित्रीः सयोनीः सोमेन सह समानस्थाना हे ऋषे मदीयांतरात्मन् अध्वर्यो वा त्वमेवंभूता अपो नु क्षिप्रं वंदस्व । स्तुहीत्यर्थः ॥

॥ इति सप्तमस्य सप्तमे पंचविंशो वर्गः ॥

॥ अथैकादशी ॥

हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानां ।

ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः ॥११॥

हिनोत । नः । अध्वरं । देवऽयज्या । हिनोत । ब्रह्म । सनये । धनानां ।

ऋतस्य । योगे । वि । स्यध्वं । ऊधः । श्रुष्टीऽवरीः । भूतन । अस्मभ्यं । आपः ॥११॥

हे ऋत्विजो हिनोत प्रहिणुत प्रगमयत प्रोत्सर्पयतैतमध्वरं यज्ञं देवयज्या देवयज्यायै देवयजनार्थं । किंच । प्रहिणुत ब्रह्म स्तुत्याख्यं यथाशास्त्रक्रमेण सनये लब्धये नोऽस्माकं धनानां । किंच । ऋतस्य यज्ञस्य योगे संयोगे यदेतदूधरिव सोमपूर्णमधिषवणचर्म वर्तते । अथवा योगसंबंधाच्छकटं योगः । तद्धि तत्रैव युज्यते । तेनाधिषवणचर्मणा ऊधसोऽधस्तादवस्थितेनेति मन्यमानो निरुक्तकारो ब्रवीति याज्ञे शकट इति वा । नि॰६.२२. । इति । यदेतद्यज्ञशकटस्याधस्तादुपरि वाधिषवणचर्मैतद्वि ष्यध्वं । विमुंचध्वं । ग्रहचमसस्थाल्यादिषु यो निषेकः सोमस्यैतद्विमोचनमधिषवणचर्मोधसः । तद्धि सोम उत्सिच्यमाने श्लथीभवति यथेतरद्गोरूधो दुह्यमानायां गवि । एवमृत्विज उक्त्वाधुनैव सोमसंमिश्रा अपो ब्रवीति । यूयमपि हे आप एभिर्ऋत्विग्भिरुत्सिच्यमानाः श्रुष्टीवरीः सुखवत्यो भूतन । भवतास्मभ्यं । एवमत्र प्रशब्देनार्थस्य सुतरां प्रकटना भवतीति भाष्यकारेण प्रशब्दोऽध्याहृतः प्रहिणुतेति । अध्वरमित्यनेन संबंधाद्धिनोतेर्गत्यर्थत्वमुपपद्यते । एतस्या ऋचो व्याख्यानं निरुक्तटीकाया उद्धृतं ॥

प्रातरनुवाकस्यापो रेवतीरित्येषा प्रतिपत् । सूचितं च । आपो रेवतीः क्षयथा हि वस्व उप प्रयंत इति सूक्ते । आ॰४.१३. । इति ॥

॥ तत्रैषा द्वादशी ॥

आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च ।

रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धात् ॥१२॥

आपः। रेवतीः। क्षयथ। हि। वस्वः। क्रतुं। च। भद्रं। बिभृथ। अमृतं। च।
रायः। च। स्थ। सुऽअपत्यस्य। पत्नीः। सरस्वती। तत्। गृणते। वयः। धात्॥१२॥

हे आपो रेवती रेवत्यो धनवत्यो यूयं वस्वो वसुनो धनस्य क्षयथ हि। ईशिध्वे खलु। किंच। भद्रं भजनीयं क्रतुं च सोमयागादिलक्षणं कर्म चामृतं चामरणरूपं तज्जन्यफलं च बिभृथ। धारयथ। पुष्णीथ वा। तथा रायश्च धनस्य च स्वपत्यस्य शोभनपुत्रस्य च पत्नीः पत्न्यः पालयित्र्यः स्थ। भवथ। तथा सरस्वती तदभिमानिनी देवता गृणते स्तुवते मह्यं तदिदं सर्वं वयोऽन्नलक्षणं धनं धात्। ददातु॥

अपोनप्त्रीये प्रति यदाप इत्येषा। सूत्रितं च। प्रति यदापो अदृश्रमायतीरिति प्रतिदृश्यमानासु। आ० ५.१.। इति॥

॥ तत्रैषा त्रयोदशी ॥

प्रति यदापो अदृश्रमायतीर्घृतं पयांसि बिभ्रतीर्मधूनि।
अध्वर्युभिर्मनसा संविदाना इंद्राय सोमं सुषुतं भरंतीः॥१३॥

प्रति। यत्। आपः। अदृश्रं। आऽयतीः। घृतं। पयांसि। बिभ्रतीः। मधूनि।
अध्वर्युऽभिः। मनसा। संऽविदानाः। इंद्राय। सोमं। सुऽसुतं। भरंतीः॥१३॥

हे आप आयतीरस्मद्यज्ञं प्रत्यागच्छंतीर्यत्। सुपां सुलुगिति विभक्तेर्लुक्। या युष्मान्प्रत्यदृश्रं प्रतिपश्यामि घृतं सोमसंसृष्टमाज्यं मधूनि मधुसदृशानि मृष्टरसानि पयांस्युदकानि च संभूय बिभ्रतीर्यागकाले धारयंतीस्तथाध्वर्युभिर्मनसांतःकरणेन संविदानाः संभाषमाणाः। किंच। इंद्रायेंद्रार्थं सुषुतं सुष्ठु सुतं सोमं भरंतीर्धारयंतीरेवंभूतास्ता युष्मान्स्तौमीति शेषः॥

अपोनप्त्रीय एमा अग्मन्निति द्वे। सूत्रितं च। एमा अग्मन्रेवतीर्जीवधन्या इति द्वे सन्नासूत्तरया परिधाय। आ० ५.१.। इति॥

॥ सैषा चतुर्दशी ॥

एमा अग्मन्रेवतीर्जीवधन्या अध्वर्यवः सादयता सखायः।
नि बर्हिषि धत्तन सोम्यासोऽपां नप्त्रा संविदानास एनाः॥१४॥

आ। इमाः। अग्मन्। रेवतीः। जीवऽधन्याः। अध्वर्यवः। सादयत। सखायः।
नि। बर्हिषि। धत्तन। सोम्यासः। अपां। नप्त्रा। संऽविदानासः। एनाः ॥१४॥

रेवती रेवत्यो धनवत्यो जीवधन्या जीवानां पालयित्र्यः प्रीणयित्र्यो वेमा ईदृग्भूता आपोऽग्मन्। अस्मद्यज्ञं प्रत्यागच्छन्। एतज्ज्ञात्वा हे सखायः सखिभूता हे अध्वर्यवो यूयमपां नप्त्रा वृष्टिकर्मस्वधिकृतेन देवेन सह संविदानाः संमंत्रयमाणा एना एता अपः सादयत। स्थापयत। कुत्र सादयामीति उच्यते। सोम्यासः सोमसंपादिनोऽध्वर्यवो यूयं बर्हिषि वेद्यामास्तीर्णे कुशमये नि धत्तन। नियमेन स्थापयत ॥

॥ अथ पंचदशी ॥

आग्मन्नाप उशतीर्बर्हिरेदं न्यध्वरे असदन्देवयंतीः।
अध्वर्यवः सुनुतेंद्राय सोममभूदु वः सुशका देवयज्या ॥१५॥

आ। अग्मन्। आपः। उशतीः। बर्हिः। आ। इदं। नि। अध्वरे। असदन्। देवऽयंतीः।
अध्वर्यवः। सुनुत। इंद्राय। सोमं। अभूत्। ऊं इति। वः। सुऽशका। देवऽयज्या ॥१५॥

आपो वसतीवर्येकधनाख्या इदमीदृशं बर्हिर्वेदिस्तरणमुशतीरुशत्यः कामयमाना अग्मन्। आगच्छन्। अस्मद्यज्ञं प्रत्या आगत्य चाध्वरेऽस्मदीये यज्ञे देवयंतीर्देवान्कामयमानाः। तर्पयितुमिच्छंत्य इत्यर्थः। न्यसदन्। न्यसीदन्। एतज्ज्ञात्वा हे अध्वर्यवो यूयमिंद्रायेंद्रार्थं सोमं सुनुत। अभिषुणुत। इदानीमपां प्रसादाद्वो युष्माकं देवयज्या देवानिंद्रादीनुद्दिश्य क्रियमाणा यागक्रिया सुशका सुष्ठु कर्तुं शक्याभूदु। आसीदेव ॥

॥ इति सप्तमस्य सप्तमे षड्विंशो वर्गः ॥

आ न इत्येकादशर्चं द्वितीयं सूक्तं कवषस्यार्षं त्रैष्टुभं वैश्वदेवं। अनुक्रांतं च। आ न एकादश वैश्वदेवमिति। गतः सूक्तविनियोगः। एकादशिनस्य वैश्वदेवस्य पशोः पुरोडाशस्या न इत्येषानुवाक्या। सूचितं च। विश्वे अद्य मरुतो विश्व ऊत्या नो देवानामुप वेतु शंसः। आ॰ ३.७। इति ॥

॥ तत्र प्रथमा ॥

आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः।
तेभिर्वयं सुषखायो भवेम तरंतो विश्वा दुरिता स्याम ॥१॥

आ। नः। देवानां। उप। वेतु। शंसः। विश्वेभिः। तुरैः। अवसे। यजत्रः।
तेभिः। वयं। सुऽसखायः। भवेम। तरंतः। विश्वा। दुःऽइता। स्याम ॥१॥

देवानां स्तोतॄणां नोऽस्माकं शंसः स्तोतव्यो यजत्रो यष्टव्य एवंभूत इंद्रस्तुरैस्त्वरणशीलैर्विश्वेभिः सर्वैर्मरुद्भिः सहावसेऽस्मद्यज्ञरक्षणार्थमोप वेतु। उपागच्छतु। वयमपि तेभिस्तैः सह सुसखायः शोभनसखायो भवेम। स्याम। किंच। विश्वा दुरिता विश्वानि दुरितानि पापानि तरंतः स्याम ॥

॥ अथ द्वितीया ॥

परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत्।
उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ॥२॥

परि। चित्। मर्तः। द्रविणं। ममन्यात्। ऋतस्य। पथा। नमसा। आ। विवासेत्।
उत। स्वेन। क्रतुना। सं। वदेत। श्रेयांसं। दक्षं। मनसा। जगृभ्यात् ॥२॥

मर्तो मनुष्यो यजमानः परि चित्सर्वतो द्रविणं विश्वेषां देवानां यागार्थं धनं ममन्यात्। मन्यतिः कांतिकर्मा। कामयेत लब्धुमिच्छेत्। धनं लब्ध्वा चर्तस्य यज्ञस्य पथा मार्गेण नमसा हविराख्येनान्नेना विवासेत्। परिचरेत्। उतापि च स्वेनात्मीयेन क्रतुना प्रज्ञानेन। मनसेत्यर्थः। सं वदेत। संवादोऽत्र समाध्यानमुच्यते। हविर्गृहीत्वा वषट्करिष्यन्विश्वान्देवान्मनसाध्यायेदित्यर्थः। विश्वेषां देवानां यागानंतरं च तत्प्रसादाच्छ्रेयांसमतिशयेन प्रशस्यमात्मानं दक्षं प्रवृद्धं सर्वव्यापिनं मनसा ध्यानसाधनेनांतःकरणेन जगृभ्यात्। गृह्णीयात् ॥

॥ अथ तृतीया ॥

अधायि धीतिरससृग्रमंशास्तीर्थे न दस्ममुप यंत्यूमाः।
अभ्यानश्म सुवितस्य शूषं नवेदसो अमृतानामभूम ॥३॥

अधायि। धीतिः। असंसृग्रं। अंशाः। तीर्थे। न। दस्मं। उप। यंति। ऊमाः।
अभि। आनश्म। सुवितस्य। शूषं। नवेदसः। अमृतानां। अभूम ॥३॥

धीतिर्देवयागक्रियाधायि। निहिता स्थापिता। अस्माभिः प्रवर्तितेत्यर्थः। तदनंतरमूमा अवितारस्तर्पयितारोऽंशा अस्माभिर्दत्ता हविर्भागा दस्मं दर्शनीयं शत्रूणामुपक्षपयितारं वासमृग्रमसमानसृष्टिं। उत्कृष्टजन्मानमित्यर्थः। एवंभूतं

देवसंघमुप यंति। उपगच्छंति। तत्र दृष्टांतः। तीर्थे न यथा गंगादितीर्थे तर्पणमुखे विसृष्टा अपामंशा देवसंघमुपगच्छंति तद्वत्। तदनंतरं वयं सुवितस्य सु इतस्य सुष्ठु प्राप्तस्य स्वर्गादिकस्य भूषं सुखमभ्यानश्म। अभिप्राप्नुवाम। किंच। वयममृतानां देवानां नवेदसः। न वेदेत्येतस्मिन्नर्थे नवेदःशब्दो नभ्राणनपान्नवेदा इति निपातितः। न न वेत्तारो वेत्तार एव। स्वरूपतो ज्ञातार एवेत्यर्थः। अभूम। भवेमेत्याशास्महे॥

॥ अथ चतुर्थी ॥

नित्यश्चाकन्यात्स्वपतिर्दमूना यस्मा उ देवः सविता जजान।
भगो वा गोभिरर्यमेमनज्यात्सो अस्मै चारुश्छदयदुत स्यात्॥४॥

नित्यः। चाकन्यात्। स्वऽपतिः। दमूनाः। यस्मै। ऊं इति। देवः। सविता। जजान।
भगः। वा। गोभिः। अर्यमा। ईं। अनज्यात्। सः। अस्मै। चारुः। छदयत्। उत। स्यात्॥४॥

नित्यः कल्पावस्थायी प्रजापतिश्चाकन्यात् तस्मै दृष्टादृष्टफलं दातुं कामयतां। कीदृशः। स्वपतिः। स्वीयानां प्रजानां स्वामी धनपतिर्वा दमूना दानमनाः। कस्मै कामयतामिति उच्यते। उ उतापि च यस्मै यजमानाय मह्यं सविता सर्वस्य प्रेरको देवो जजान जनितवान् दृष्टादृष्टफलं दत्तवानित्यर्थः। वाशब्दः समुच्चये। तथा भगो देवश्च गोभिरस्मदीयाभिः स्तुतिरूपाभिर्वाग्भिरर्यमा देवश्चेमीदृग्भूतं दृष्टादृष्टफलमनज्यात्। व्यक्तीकुर्यात्। दद्यादित्यर्थः। उतापि च स्यात् अन्योऽपि यो देवगणोऽस्ति चारु रमणीयः सोऽपि देवगणोऽस्मै यजमानाय मह्यं छदयत्। दृष्टादृष्टफलं दातुं कामयतामित्येतदाशास्महे॥

॥ अथ पंचमी ॥

इयं सा भूया उषसामिव क्षा यद्ध क्षुमंतः शवसा समायन्।
अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यंतु वाजाः॥५॥

इयं। सा। भूयाः। उषसांऽइव। क्षाः। यत्। ह। क्षुऽमंतः। शवसा। संऽआयन्।
अस्य। स्तुतिं। जरितुः। भिक्षमाणाः। आ। नः। शग्मासः। उप। यंतु। वाजाः॥५॥

क्षुमंतः। क्षुशब्दोऽन्नवाची शब्दवाची वा। अन्नवंतः स्तुतिमंतः कीर्तिमंतो वेत्यर्थः। एवंभूता देवाः शवसा बलेन यद्यामस्मदीयां स्तुतिं प्रति समायन्

समागच्छन् संप्राप्ताः सेयं स्तुतिर्देवानां प्राप्या भूयाः। भूयात्। भवतु। उषसामिव स्थाः। यथा पृथिव्युषसां व्याप्ता सर्वेषां प्राप्या भवति तद्वत्। किंच। जरितुः स्तोतुरस्य मम स्तुतिं भिक्षमाणा याचमानाः शग्मासः। शग्ममिति सुखनाम। सुखाः सुखकरा वाजाः सुधन्वनः पुत्रास्त्रयोऽप्यृभुर्विभ्वा वाज इत्येते नोऽस्मानाभिमुख्येनोप यंतु। उपगच्छंतु ॥

॥ इति सप्तमस्य सप्तमे सप्तविंशो वर्गः ॥

॥ अथ षष्ठी ॥

अस्येदेषा सुमतिः पप्रथानाभवत्पूर्व्या भूमना गौः।
अस्य सनीळा असुरस्य योनौ समान आ भरणे बिभ्रमाणाः ॥६॥
अस्य। इत्। एषा। सुऽमतिः। पप्रथाना। अभवत्। पूर्व्या। भूमना। गौः।
अस्य। सऽनीळाः। असुरस्य। योनौ। समाने। आ। भरणे। बिभ्रमाणाः ॥६॥

इदिदानीमस्य देवगणसंबंधिन्येषा सुमतिः सुष्ठु स्तुतिः पप्रथानाभवत्। विस्तीर्यमाणाभूत्। अस्माभिः क्रियमाणेत्यर्थः। कीदृशी। पूर्व्या पूर्वकालीना भूमना भूम्ना बहुत्वेन युक्तेति शेषः। सर्वदेवसंबंधित्वाद्भृशं जातेत्यर्थः। गौर्देवान्प्रतिगंत्री। एतज्ज्ञात्वा सर्वे देवा असुरस्य प्रज्ञारूपबलवतोऽस्य मम संबंधिनि समाने सर्वदेवसाधारणे भरणे सर्वेषां देवानां पुष्टिकरे योनौ यज्ञाख्ये स्थाने सनीळाः समानस्थाना बिभ्रमाणा असदर्थं दृष्टादृष्टफलं धारयंत आ गच्छंत्विति शेषः ॥

॥ अथ सप्तमी ॥

किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।
संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरंत ॥७॥
किं। स्वित्। वनं। कः। ऊं इति। सः। वृक्षः। आस। यतः। द्यावापृथिवी इति।
निःऽततक्षुः।
संतस्थाने इति संऽतस्थाने। अजरे इति। इतऊती इतीतःऽऊती। अहानि।
पूर्वीः। उषसः। जरंत ॥७॥

यतो यस्माद्वृक्षाद्द्यावापृथिवी द्यावापृथिव्यौ निष्टतक्षुर्देवा निःशेषेण कृतवंतः स तादृशो वृक्षः क उ आस। कीदृग्वा बभूव। तदुत्पादकं वनमरण्यं किं स्वित्।

संतस्थाने सम्यक् तिष्ठंत्यावजरे जरावर्जिते इतऊती इत एतेभ्यो देवेभ्यो रक्षणं ययोस्ते। किंच। अहानि सर्वाणि दिनानि पूर्वीर्बह्वीरुषसश्च देवा निष्टतक्षुः। एवंभूतान्देवाञ्जरंत। स्तोतारः स्तुवंति ॥

॥ अथाष्टमी ॥

नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति।
त्वचं पवित्रं कृणुत स्वधावान्यदीं सूर्यं न हरितो वहंति ॥८॥

न। एतावत्। एना। परः। अन्यत्। अस्ति। उक्षा। सः। द्यावापृथिवी इति। बिभर्ति।
त्वचं। पवित्रं। कृणुत। स्वधाऽवान्। यत्। ईं। सूर्यं। न। हरितः। वहंति ॥८॥

द्यावापृथिव्योर्निर्माणरूपमेतावद्देवजातं सामर्थ्येन युक्तमिति न। अपि त्वेनैतेभ्यो देवेभ्यः पर उत्कृष्टोऽन्यदन्यो हिरण्यगर्भोऽस्ति। उक्षा सेक्ता प्रजानां स्रष्टेत्यर्थः। हिरण्यगर्भः परमसूक्ष्मो वायुरूपो लिंगात्मापः प्रविश्य द्यावापृथिवी द्यावापृथिव्यौ बिभर्ति। धारयति। किंच। स्वधावान्बलवानन्नवान्वा स हिरण्यगर्भः पवित्रं पवित्रमयं त्वचमात्मीयं शरीरं दीप्तं मंत्रं वा कृणुत। करोति। कदेति उच्यते। यद्यदेमिमां त्वचं हरितोऽश्वाः सूर्यं न वहंति। न प्रापयंति तदेति। सृष्टेः प्रागित्यर्थः ॥

॥ अथ नवमी ॥

स्तेगो न क्षामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम।
मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकं ॥९॥

स्तेगः। न। क्षां। अति। एति। पृथ्वीं। मिहं। न। वातः। वि। ह। वाति। भूम।
मित्रः। यत्र। वरुणः। अज्यमानः। अग्निः। वने। न। वि। असृष्ट। शोकं ॥९॥

स्तेगः। स्त्यै ष्ट्यै शब्दसंघातयोः। रश्मिसंघात्यादित्यः पृथ्वीं विस्तीर्णां क्षां भूमिं तेजसा नात्येति। नातिगच्छति। मर्यादया तिष्ठतीत्येवमादित्यः स्तूयते। वातो वायुरपि खलु भूम भूमिं मिहं वृष्टिं न वि वाति। समर्थोऽपि सन् विविधं न गमयति। भूमिं प्रति सावशेषमेव वर्षयतीति वातः स्तूयते। यत्र यस्मिन्प्रजापतौ मित्रो देवोऽज्यमानो व्यज्यमानो व्यक्तीभवन्। उत्पाद्यमान इत्यर्थः। शोकं स्वीयां दीप्तिं व्यसृष्ट विसृजति सर्वतो विक्षिपति तथा वरुणश्च व्यक्तीभवन्स्व-

दीप्तिं विक्षिपति । तत्र दृष्टांतः । अग्निर्देवो वने न यथा वृक्षसंघाते स्वदीप्तिं सर्वतो विसृजति तद्वत् । तादृशं प्रजापतिं स्तौमीति शेषः ॥

॥ अथ दशमी ॥

स्तरीर्यत्सूत सद्यो अज्यमाना व्यथिरव्यथीः कृणुत स्वगोपा ।

पुत्रो यत्पूर्वः पित्रोर्जनिष्ट शम्यां गौर्जगार यद्ध पृच्छान् ॥१०॥

स्तरीः । यत् । सूत । सद्यः । अज्यमाना । व्यथिः । अव्यथीः । कृणुत । स्वऽगोपा ।

पुत्रः । यत् । पूर्वः । पित्रोः । जनिष्ट । शम्यां । गौः । जगार । यत् । ह । पृच्छान् ॥१०॥

अरण्योः कारणभूतां शमीं गोत्वेन रूपयति । स्तरीर्निवृत्तप्रसवा गौः सद्यः शीघ्रमज्यमाना निषिच्यमानरेतस्का सती यद्यदा सूत वत्सं प्रसूते तदा व्यथिर्दुःखानां बाधयित्री स्वगोपा स्वायत्तगोप्तृका स्वभूतरक्षणा वा सती सा गौरव्यथीर्व्यथारहिताः प्रजाः कृणुत । करोति । यदा शमी पुत्रस्थानीयमश्वत्थं प्रसूते तदानीमरण्याहरणाय तादृशमश्वत्थमन्विष्यतामृत्विजामश्वत्थस्य जनयित्री शमी सुखहेतुर्भवतीत्यर्थः । शमीगर्भादश्वत्थादरणी आहर्तव्ये । श्रूयते हि । शमीगर्भादग्निं मंथंतीति । अपि च । पूर्वः पुरातनः पुत्रः । पुन्नाम्नो नरकात्त्राता । यद्वा । पुत्रस्थानीयोऽग्निः पित्रोर्जनयित्र्योररण्योः सकाशाद्यद्यदा जनिष्ट मथनेन प्रादुर्भवति तदानीं गौः पृथिवी तयोररण्योर्मातृभूतां शम्यामश्वत्थगर्भां तां शमीं । सुपां सुलुगिति सुपो ड्यादेशः । जगार । उद्गिरति । यद्ध यां खलु शमीं पृच्छान् ऋत्विजः पृच्छंति । वीप्संति । गवेषयंति ॥

॥ अथैकादशी ॥

उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी ।

प्र कृष्णाय रुशदपिन्वतोधर्ऋतमत्र नकिरस्मा अपीपेत् ॥११॥

उत । कण्वं । नृऽसदः । पुत्रं । आहुः । उत । श्यावः । धनं । आ । अदत्त । वाजी ।

प्र । कृष्णाय । रुशत् । अपिन्वत । ऊधः । ऋतं । अत्र । नकिः । अस्मै । अपीपेत् ॥११॥

उतापि च कण्वमृषिं नृषदः पुत्रमाहुः । वेदवादिनो वदंति । उतापि च वाजी हविर्लक्षणान्नवान्कण्वः श्यावः श्यामवर्णः सन् अस्मादग्नेः सकाशाद्धनमादत्त । अगृह्णात् । कृष्णाय श्यामवर्णाय नार्षदाय कण्वायाग्नेरूधा रुशद्रोचमानरूपं

प्रापिन्वत। प्रासिंचत्। अचेत्थमग्निव्यतिरिक्तः कश्चिदपि देवोऽस्मै कण्वायते यज्ञं नकिरपीपेत्। नावर्धयत्। युवं श्यावाय रुशतीमदत्तं। ऋग्वे० १.११७.८.। इत्युक्तं॥

॥ इति सप्तमस्य सप्तमेऽष्टाविंशो वर्गः ॥

प्र सु ग्मंतेति नवर्चं तृतीयं सूक्तं। आदितः पंच जगत्यः। अथ चतस्रस्त्रिष्टुभः। पूर्ववदृषिदेवते। तथा चानुक्रांतं। प्र सु ग्मंता नव पंचाद्या जगत्य इति। गतो विनियोगः॥

॥ तत्र प्रथमा ॥

प्र सु ग्मंता धियसानस्य सक्षणि वरेभिर्वराँ अभि षु प्रसीदतः।
अस्माकमिंद्र उभयं जुजोषति यत्सोम्यस्यांधसो बुबोधति ॥१॥
प्र। सु। ग्मंता। धियसानस्य। सक्षणि। वरेभिः। वरान्। अभि। सु। प्रऽसीदतः।
अस्माकं। इंद्रः। उभयं। जुजोषति। यत्। सोम्यस्य। अंधसः। बुबोधति ॥१॥

इंद्रः स्वभूतौ हरी धियसानस्येंद्रागमनं चिंतयतो यजमानस्य मम संबंधिनि सक्षणि सेवायां सद्गुणके सेव्ये यज्ञे निमित्ते ग्मंतागच्छंतौ सु सुष्ठु प्रेरयति। ततः स इंद्रो वरेभिर्वरणीयैर्मार्गैः प्रसीदतो हविरासादवतो यजमानस्य वरानुत्कृष्टान्हविर्विशेषान् स्तुतिविशेषांश्चाभि लक्षीकृत्य सु सुष्ठागच्छतु। इंद्र आगतः सन् अस्माकं स्वभूतमुभयं हविश्च स्तुतिश्चेत्येतद्द्वयं जुजोषति। सेवतां। भक्षयतु शृणोतु चेत्यर्थः। यद्यदा सोम्यस्य सोमसंपादिनो ममांधसः। अन्नरूपस्य सोमस्य रसमिति शेषः। बुबोधति बुध्यते। जिह्वया विजानाति। सोमं पिबतीत्यर्थः। तदा जुजोषतीति पूर्वेण संबंधः॥

॥ अथ द्वितीया ॥

वींद्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुष्टुत।
ये त्वा वहंति मुहुरध्वराँ उप ते सु वन्वंतु वग्वनाँ अराधसः ॥२॥
वि। इंद्र। यासि। दिव्यानि। रोचना। वि। पार्थिवानि। रजसा। पुरुऽस्तुत।
ये। त्वा। वहंति। मुहुः। अध्वरान्। उप। ते। सु। वन्वंतु। वग्वनान्। अराधसः॥२॥

हे इंद्र दिव्यानि दिवि भवानि रोचना रोचनानि दीप्तिस्वभावकानि ज्योतींषि। यद्वा। दिव्याँल्लोकान्वि यासि। व्याप्नोषि। हे पुरुष्टुत बहुभिः स्तुतेंद्र

पार्थिवानि पृथिव्यां भवानि रजसात्मीयेन ज्योतिषा विद्युल्लक्षणेन । यद्वा रजः-शब्दाज्जस आकारः । पार्थिवाँल्लोकान्व्याप्नोषि । ये त्वदीया अश्वा मुहुः पुनः पुनरध्वरानस्मदीयान्यज्ञान्प्रति त्वा त्वामुप वहंति समीपे प्रापयंति तेऽश्वा वग्वनान् वचनेन स्तुत्या संभकृन् अराधसो धनरहितानस्मान् सु सुष्ठु वन्वंतु । धनप्रदानार्थं संभजंतां ॥

॥ अथ तृतीया ॥

तदिन्मे छंत्सद्वपुषो वपुष्टरं पुत्रो यज्जानं पित्रोरधीयति ।

जाया पतिं वहति वग्नुना सुमत्पुंस इद्भद्रो वहतुः परिष्कृतः ॥३॥

तत् । इत् । मे । छंत्सत् । वपुषः । वपुःऽतरं । पुत्रः । यत् । जानं । पित्रोः । अधिऽइयति ।

जाया । पतिं । वहति । वग्नुना । सुऽमत् । पुंसः । इत् । भद्रः । वहतुः । परिऽकृतः ॥३॥

वपुषः । वपू रूपं । तद्वाँल्लक्ष्यते । वपुष्मतोऽपि वपुष्टरं रूपवत्तरमत्यंतं सुरूपं तद्यज्ञकर्म मे मह्यं छंत्सत् । इंद्रः कामयतां । यद्यदा पुत्रो जानं जन्मात्मन उत्पत्तिं पित्रोर्मातापित्रोः सकाशादधीयति संकीर्तनद्वारेणाधिगच्छति । सुब्रह्मण्याह्वान-कालेऽमुकशर्मणः पुत्रो यजत इत्यात्मनो जन्म संकीर्तयति । यद्वा । यज्जनना-दागतं धनं पित्रोः सकाशात्पुत्रोऽधिगच्छति तदेव मह्यमिच्छतु । जाया पत्नी पतिं यजमानं सुमत्कल्याणेन वग्नुना वाग्रूपेण शब्देन वहति । आत्मसमीपं प्रापयति । भद्रो भजनीयः परिष्कृतः सुसंस्कृतः पुंस इत् । पत्युरेवेत्यर्थः । वहतुर्जायायै प्रदातव्यः । तदुक्तं । सुभद्रमर्यं भोजनं बिभर्षि । ऋग्वे० ८.१.३४. । इति । यद्वा पुंसोऽतिशूरस्येंद्रस्यार्थाय भद्रो भजनीयो वहतुर्वहनशीलो देवान्प्रति स सोमः परिष्कृतः संस्कृतो भवति । तदेंद्रः कामयतामित्यर्थः ॥

॥ अथ चतुर्थी ॥

तदित्सधस्थमभि चारु दीधय गावो यच्छासन्वहतुं न धेनवः ।

माता यन्मंतुर्यूथस्य पूर्व्याभि वाणस्य सप्तधातुरिज्जनः ॥४॥

तत् । इत् । सधऽस्थं । अभि । चारु । दीधय । गावः । यत् । शासन् । वहतुं । न । धेनवः ।

माता । यत् । मंतुः । यूथस्य । पूर्व्या । अभि । वाणस्य । सप्तऽधातुः । इत् । जनः ॥४॥

तदित् तदेव सधस्थं । सह तिष्ठंत्यत्रेति सधस्थं स्थानं यज्ञाख्यं चारु शोभनमभि

दीधय। हे इंद्राभितो दीप्यस्व। यद्यदा गावः स्तुतिलक्षणा वाच इंद्र आगच्छ हरिव आगच्छेत्येवमाद्याः शासन् अस्मद्यज्ञं प्रति त्वदागमनमाशासते। तत्र दृष्टांतः। वहतुं न धेनवः। यथा धेनवो नवप्रसूता गावः प्रापणसाधनं गृहमाशासते तद्वत्। यत आगत्यप्रकाशस्ततोऽत्र कारणमाह। यद्यस्मान्मंतुः। मन्यतिरर्चतिकर्मा। अर्चकस्य मम स्वभूता माता देवतागुणानां निष्पादयित्री स्तुतिर्यूथस्य यष्टृस्तोतृगणस्य पूर्व्या प्रथमभाविनी खलु। यस्माच्च सप्तधातुः। धार्यंते क्रियंते कर्माण्येष्विति धातवश्छंदांस्यृतवो वा। सप्तच्छंदस्कः सप्तर्तुकः सप्तहोत्रात्मको वायं जनो वाणस्य स्तुतिशब्दस्याभि कर्ता खलु। तस्माच्छीघ्रमागच्छेति भावः। यद्वा। यत्कल्याणं तदेव स्थानमस्माकमभि धारय। प्रयच्छ। यस्मिन्स्थाने धेनवः पयःप्रदानेन प्रीणयित्र्यो गावो वहतुं। उह्यते पुरुषोऽनेनेति वहतुरन्नं। पयोघृताद्यनुशासति। न संप्रत्यर्थे। इदानीं प्रयच्छंति। तथा यस्मिन्मंतुर्मंतव्या पूजनीया पुत्रसमूहस्य माताभि गच्छति वाणस्य वाद्यस्य सप्तधातुर्निषादादिसप्तस्वरोपेतो जनोऽभिगच्छति तद्वत्तद्गुणोपेतं प्रयच्छेति भावः॥

॥ अथ पंचमी ॥

प्र वोऽच्छा॑ रिरिचे देव॒युष्प॒दमेको॑ रु॒द्रेभि॑र्याति तु॒र्वणिः॑।
ज॒रा वा॒ येष्व॒मृते॑षु दा॒वने॒ परि॑ व॒ ऊमे॑भ्यः सिंचता॒ मधु॑ ॥५॥

प्र। वः॒। अच्छ॑। रि॒रि॒चे॒। दे॒व॒ऽयुः। प॒दं। एकः॑। रु॒द्रेभिः॑। या॒ति॒। तु॒र्वणिः॑।
ज॒रा। वा॒। येषु॑। अ॒मृते॑षु। दा॒वने॑। परि॑। वः॒। ऊमे॑भ्यः। सिं॒च॒त॒। मधु॑ ॥५॥

हे यजमाना देवयुर्देवान्कामयमानो होता वो युष्माकं पदमच्छ स्थानं प्रति प्र रिरिचे। प्ररिक्तोऽभूत्। अथ होतृभ्यः सकाशादेको मुख्य इंद्रो रुद्रेभी रुद्रपुत्रैर्मरुद्भिः सह तुर्वणिः क्षिप्रगामी सन्याति। गच्छति युष्मदीयं यज्ञं। जरा वा। वाशब्दोऽप्यर्थे। स्तुतिरपि येष्वमृतेषु मरणधर्मरहितेषु देवेषु दावने धनप्रदानाय समर्था भवति। तस्माद्वो यूयं। छांदसो वसादेशः। ऊमेभ्यो रक्षितृभ्यो देवेभ्यो मधु मदकरं सोममद्भिः परि षिंचत॥

॥ इति सप्तमस्य सप्तम एकोनत्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

निधीयमानमपगूळ्हमप्सु प्र मे देवानां व्रतपा उवाच ।
इंद्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगां ॥ ६ ॥
निऽधीयमानं । अपऽगूळ्हं । अप्ऽसु । प्र । मे । देवानां । व्रतऽपाः । उवाच ।
इंद्रः । विद्वान् । अनु । हि । त्वा । चचक्ष । तेन । अहं । अग्ने । अनुऽशिष्टः । आ । अगां ॥ ६ ॥

कुरुश्रवणस्य यज्ञे निधीयमानोऽग्निरभिधीयते । निधीयमानमध्वर्युणाहवनीयेऽग्नावप्सु मातृभूतास्वपगूळ्हमंतर्हितं देवानां व्रतपाः कर्मणो रक्षक इंद्रो मे मह्यं प्रोवाच । प्रावादीत् । हे अग्ने विद्वान् जानान इंद्रः स्वाधिकारमस्मज्ञकृतां वा त्वा त्वामनु हि चचक्ष । अनुगतः पश्चाद्दर्श । तेनेंद्रेणानुशिष्टोऽहमनेन पथा त्वया स्वर्गो गंतव्य इत्येवमुपदिष्टः सन् आगां । आभिमुख्येन स्वर्गं गच्छेयं ॥

॥ अथ सप्तमी ॥

अक्षेत्रवित्क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः ।
एतद्वै भद्रमनुशासनस्योत स्रुतिं विंदत्यंजसीनां ॥ ७ ॥
अक्षेत्रऽवित् । क्षेत्रऽविदं । हि । अप्राट् । सः । प्र । एति । क्षेत्रऽविदा । अनुऽशिष्टः ।
एतत् । वै । भद्रं । अनुऽशासनस्य । उत । स्रुतिं । विंदति । अंजसीनां ॥ ७ ॥

सेयमनुशासनस्तुतिः प्रासंगिकी । अक्षेत्रवित् । क्षि निवासगत्योः । क्षीयते गम्यतेऽनेनेति क्षेत्रं पंथाः । पंथानमजानन् पुरुषः क्षेत्रविदं क्षेत्रज्ञं पुरुषमप्राट् । पृष्टवान् । स क्षेत्रविदा पथिज्ञेन तेनानुशिष्टः प्रदर्शितमार्गः सन् प्रैति । स्वाभिलषितं देशं गच्छति । अनुशासनस्य मार्गोपदेशरूपस्यैतद्वा एतत्खलु भद्रं भजनीयं कल्याणकरं । किं तत् । उतापि चांजसीनामृजुना मार्गेण गंतव्यानामपां स्रुतिं मार्गे पिपासितः सन् विंदति । लभते । यद्वा । अंजसीनामिति स्रुतेर्विशेषणं । ऋजुमकुटिलमप्रयासेन गंतव्यं मार्गं लभते खलु ॥

॥ अथाष्टमी ॥

अद्येदु प्राणीदममन्निमाहापीवृतो अधयन्मातुरूधः ।
एमेनमाप जरिमा युवानमहेळन्वसुः सुमना बभूव ॥ ८ ॥

अद्य । इत् । ऊं इति॑ । प्र । आनी॑त् । अम॑मन् । इ॒मा । अहा॑ । अपि॑ऽवृतः । अ॒धय॑त् । मा॒तुः । ऊध॑ः ।

आ । ई॒म् । ए॒न॒म् । आ॒प॒ । ज॒रि॒मा । युवा॑नम् । अहे॑ळन् । वसु॑ः । सु॒ऽमना॑ः । ब॒भू॒व ॥ ८ ॥

अयमग्निरद्येदद्यैवास्मिन्दिने प्राणीत् । मथनेन चेष्टितोऽभवत् । श्वस प्राणने । अन चेति धातुः । तदानीमेवेमेमान्यहाहानि सौमिकान्यममन् । नेतुममन्यत । मन ज्ञाने । व्यत्ययेन श्लुः । तिङ उत्तरत्वादनिघातः । अपि चापीवृतस्तेजोभिः परिवृतः सन् मातुः पृथिव्या ऊधः सारभूतं सोमादिकं हविरधयत् । पिबति । तथा युवानं नित्यतरुणं देवानां हविषा मिश्रयंतं वेनमग्निं जरिमा । जरतिः स्तुतिकर्मा । तस्मादौणादिक इमनिच् । स्तोतृभिः क्रियमाणा स्तुतिराप । आभिमुख्येन व्याप्नोति । ईमिति पूरणः । ततोऽहेळन् अक्रुध्यन् स्तोतॄन्प्रति वसुर्वासयिता सर्वेषां धनदानेनाच्छादयिता तेजोभिः शत्रूणां वा वसुमान्वाग्निः सुमनाः शोभनमनस्को बभूव ॥

॥ अथ नवमी ॥

ए॒तानि॑ भ॒द्रा क॑लश क्रियाम॒ कुरु॑श्रवण॒ दद॑तो म॒घानि॑ ।
दा॒न इद्वो॑ मघवान॒ः सो अ॑स्त्व॒यं च॒ सोमो॑ हृ॒दि यं बिभ॑र्मि ॥ ९ ॥

ए॒तानि॑ । भ॒द्रा । क॒ल॒श॒ । क्रि॒या॒म॒ । कुरु॑ऽश्रवण । दद॑तः । म॒घानि॑ ।
दा॒नः । इत् । वः॒ । म॒घ॒ऽवा॒नः॒ । सः । अ॒स्तु॒ । अ॒यम् । च॒ । सोम॑ः । हृ॒दि । यम् । बिभ॑र्मि ॥ ९ ॥

हे कलश सर्वकलापरिपूर्ण । यद्वा लुप्तमत्वर्थीयः । द्रोणकलशवन् हे कुरुश्रवण । कुरव ऋत्विजः । तेषां स्वभूतानां स्तुतीनां श्रोतर्हे इंद्र मघानि धनानि स्तोतृभ्यो यष्टृभ्यश्च ददतः प्रयच्छतस्तवेंद्रस्यार्थमेतानि भद्रा भजनीयानि हवींषि स्तोत्राणि च क्रियाम । विधेयास्म । करोतेराशीर्लिङि रिङ् शयग्लिंक्ष्विति रिङादेशः । अथ स्तोतॄन्प्रत्याह । हे मघवानो महनीयस्तोत्ररूपधनवंतो वो युष्माकं स इंद्रो दान इत् । धनादेर्दातैवास्तु । भवतु । अयं च यज्ञे स्थितः सोमो दातास्तु हृदय आत्मीये यं पीतं सोमं बिभर्मि । धारयामि ॥ डुभृञ् धारणपोषणयोः । जौहोत्यादिकः । भृञामिदित्यभ्यासस्येत्वं । यद्योगादनिघातः ॥ यद्वा । हे कलशकुलजात हे कुरुश्रवणैतन्नामक त्रसदस्योः पुत्र राजन् ऋत्विग्भ्यो धनानि प्रयच्छतस्तवार्थं वयं कर्माणि क्रियाम । मघवानः कुरुश्रवणाः । पूजायां

बहुवचनपदं । यागकर्म कुर्वाणस्य तवेंद्रो दाता भवतु । अयं सोमश्च धनानि प्रयच्छतु ॥

॥ इति सप्तमस्य सप्तमे त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके सप्तमोऽध्यायः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथाष्टमोऽध्याय आरभ्यते । तत्र प्र मेति नवर्चं चतुर्थं सूक्तं । ऐलूषस्य कवषस्यार्षं । आद्या त्रिष्टुप् सा च वैश्वदेवी । द्वितीयातृतीये बृहतीसतोबृहत्यावैंद्र्यौ । पराः षड्गायत्र्यः । कुरुश्रवणमावृणीति द्वाभ्यां त्रसदस्युपुत्रस्य कुरुश्रवणनाम्नो राज्ञो दानं तुष्टाव । अतस्तद्देवताके । अथ यस्य मस्वादस इत्यादिभिश्चतसृभिर्मित्रातिथिनाम्नि राज्ञि परलोकं गते शोकाभिभूतं तस्य पुत्रमुपमश्रवोनामानं कवष ऋषिः स्नेहवशादभिगत्य विगतशोकमकरोत् । अतस्तासां तद्देवतात्वं । तथा चानुक्रांतं । प्र माद्या वैश्वदेव्यैंद्रः प्रगाथः परा गायत्र्यो द्वे कुरुश्रवणस्य त्रासदस्यवस्य दानस्तुतिः । पराभिर्मृते मित्रातिथौ राज्ञि तत्स्नेहादृषिरुपमश्रवसं पुत्रमस्य व्यशोकयदिति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्र मा॑ युयुज्रे प्र॒युजो॒ जना॑नां॒ वहा॑मि स्म पू॒षण॒मंत॑रेण ।
विश्वे॑ दे॒वासो॒ अध॒ मामर॑क्षन्दुः॒शासु॒रागा॒दिति॒ घोष॑ आसीत् ॥ १ ॥

प्र । मा॒ । यु॒यु॒ज्रे॒ । प्र॒ऽयुजः॑ । जना॑नां । वहा॑मि । स्म॒ । पू॒षणं॑ । अं॒तरे॑ण ।
विश्वे॑ । दे॒वासः॑ । अध॑ । मां॒ । अ॒र॒क्ष॒न् । दुः॒ऽशासुः॑ । आ । अ॒गा॒त् । इति॑ । घोषः॑ । आ॒सी॒त् ॥ १ ॥

जनानां यजमानानां प्रयुजः प्रयोक्तारो देवा मा मां कवषमृषिं प्र युयुज्रे। कुरुश्रवणं प्रति युक्तवंतः। अंतरेण मार्गे पूषणं देवमध्वनां पतिं सखायमहं वहामि स्म। ऊढवानस्मि। तथा श्रूयते। ऐंद्राग्नमेकादशकपालं निर्वपेज्जनतामेष्यन्नित्युपक्रम्य पौष्णं चरुमनुनिर्वपेत्। तै॰ सं॰ २.२.१.४.। इति। अधाथ मार्गे विश्वे देवा मां कवषमरक्षन्। रक्षितवंतः। दुःशासुः केनापि दुःशासनोऽयमृषिरागादागच्छतीति घोषः शब्दश्च मार्ग आसीत्। अभूत्॥

॥ अथ द्वितीया ॥

सं मा॑ तपंत्य॒भितः॑ स॒पत्नी॑रिव॒ पर्श॑वः।
नि बा॑धते॒ अम॑तिर्न॒ग्नता॒ जसु॒र्वेर्न वे॑वीयते म॒तिः॥२॥

सं। मा। त॒पं॒ति॒। अ॒भितः॑। स॒पत्नीः॑ऽइव। पर्श॑वः।
नि। बा॒ध॒ते॒। अम॑तिः। न॒ग्नता॑। जसुः॑। वेः। न। वे॒वी॒य॒ते॒। म॒तिः॥२॥

मा मां देवताप्रसादरहितं कवषं पर्शवः पार्श्वास्थीन्यन्नाभावाद्दौर्बल्यात्कृशयनांच सपत्नीरिव यथा सपत्न्यस्तद्वदभित उभयतः सं तपंति। दुःखयंतीत्यर्थः। किंच। अमतिर्दारिद्र्यादागता दुर्मतिः सर्वार्थविषया सा मां नि बाधते। मां पीडयति। वस्त्राभावादागता नग्नता च मां नि बाधते। जसुरशनाभावादागत उपक्षयोऽपि मां नि बाधते। किंच। वेर्न यथा पक्षिणो मतिः शाकुनिकव्याधभयात्कंपयते तथा मे मतिः शत्रोर्वेवीयते। भृशं कंपयते॥

॥ अथ तृतीया ॥

मूषो॒ न शि॒श्ना व्य॑दंति मा॒ध्यः॑ स्तो॒तारं॑ ते शतक्रतो।
स॒कृत्सु नो॑ मघवन्निंद्र मृळ॒याधा॑ पि॒तेव॑ नो भव॥३॥

मूषः॑। न। शि॒श्ना। वि। अ॒दं॒ति॒। मा॒। आ॒ऽध्यः॑। स्तो॒तार॑म्। ते॒। श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो।
स॒कृत्। सु। नः॒। म॒घ॒ऽव॒न्। इं॒द्र॒। मृ॒ळ॒य॒। अध॑। पि॒ताऽइ॑व। नः॒। भ॒व॒॥३॥

हे शतक्रतो बहुकर्मन् मघवन् धनवन्निंद्र ते तव स्तोतारं मा मां कवषमाध्य आधयो मूषो न यथा मूषिकाः शिश्नास्नातानि सूत्राण्यश्नंति तथा व्यदंति। विविधमदंति। तथा च यास्कः। संतपंति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवास्नातानि सूत्राणि व्यदंति स्वांगाभिधानं वा स्याच्छि-

आनि व्यदंतीति संतपंति माध्यः कामाः । नि॰ ४.६.। इति । तथा च सति नोऽस्मान्सकृत्सु मृळय । अभीष्टप्रदानेन सम्यक् सुखय । अधाथ नोऽस्माकं पितेव यथा पिता तद्वद्रक्षिता भव ॥

॥ अथ चतुर्थी ॥

कुरुश्रवणमावृणि राजानं त्रासदस्यवं ।
मंहिष्ठं वाघतामृषिः ॥४॥
कुरुऽश्रवणं । आऽवृणि । राजानं । त्रासदस्यवं ।
मंहिष्ठं । वाघतां । ऋषिः ॥४॥

ऋषिरतींद्रियपदार्थद्रष्टा कवषोऽहं त्रासदस्यवं त्रसदस्योः पुत्रं मंहिष्ठं धनानामतिशयेन दातारं कुरुश्रवणं । कुरव ऋत्विजः । तदीयानां स्तुतीनां श्रोतारं कुरुश्रवणं तन्नामकं राजानं वाघतामृत्विजामर्थायावृणि । धनानि प्रार्थये ॥

॥ अथ पंचमी ॥

यस्य मा हरितो रथे तिस्रो वहंति साधुया ।
स्तवै सहस्रदक्षिणे ॥५॥
यस्य । मा । हरितः । रथे । तिस्रः । वहंति । साधुऽया ।
स्तवै । सहस्रऽदक्षिणे ॥५॥

यस्य कुरुश्रवणाख्यस्य राज्ञः स्वभूतास्तिस्रो हरितस्त्रयोऽश्वा रथे प्रस्थितं मा मां कवषं साधुया साधु वहंति कुरुश्रवणं राजानमहं सहस्रदक्षिणेऽस्मिन्यागे स्तवै । स्तौमि । प्रतिष्ठवाहिनं रथं परिगृह्यर्षिराशास्ते ॥

॥ इति सप्तमस्याष्टमे प्रथमो वर्गः ॥

अतः परं यस्येत्यादिकेन सूक्तशेषेण मित्रातिथौ राज्ञि मृते तत्पुत्रस्योपमश्रवसः समीपमागत्य कवषः स्नेहाच्छोकं निवारयति ॥

॥ अथ षष्ठी ॥

यस्य प्रस्वादसो गिर उपमश्रवसः पितुः ।
क्षेत्रं न रण्वमूचुषे ॥६॥

यस्य॑ । प्रऽस्वा॑दसः । गिरः॑ । उ॒प॒मऽश्र॑वसः । पि॒तुः ।

क्षेत्रं॑ । न । र॒ण्वं । ऊ॒चुषे॑ ॥६॥

हे राजन् उपमश्रवसस्तव पितुर्यस्य मित्रातिथेर्गिरो वाचः प्रस्वादसः प्रकर्षेण स्वादयित्र्यः । तत्र दृष्टांतः । ऊचुषे सेवमानाय दरिद्राय दानार्थं प्रकल्पितं रण्वं रमणीयं क्षेत्रं न यथा क्षेत्रं स्वादयितृ तद्वदित्यर्थः । उत्तरत्र संबंधः ॥

॥ अथ सप्तमी ॥

अधि॑ पुत्रोपमश्रवो॒ नपा॑न्मित्रातिथेरिहि ।

पि॒तुष्टे॑ अस्मि वं॒दि॒ता ॥७॥

अधि॑ । पु॒त्र॒ । उ॒प॒म॒ऽश्र॒वः॒ । नपा॑त् । मि॒त्र॒ऽअ॒ति॒थे॒ः । इ॒हि॒ ।

पि॒तुः । ते॒ । अ॒स्मि॒ । वं॒दि॒ता ॥७॥

हे पुत्रोपमश्रवो मित्रातिथेर्नपात्पुत्रस्त्वमधीहि । मत्समीपमागच्छ । ते तव पितुस्तस्य मित्रातिथेरहं वंदिता स्तोतास्मि । एतज्ज्ञात्वा शोकं मा कुरु । यद्देयं द्रव्यमस्ति तत्सर्वं मह्यं देहि ॥

॥ अथाष्टमी ॥

यदीशी॑यामृ॒ता॑नामु॒त वा॒ मर्त्या॑नां ।

जीवे॒दिन्म॒घवा॒ मम॑ ॥८॥

यत् । ई॒शी॑य । अ॒मृता॑नां । उ॒त । वा॒ । मर्त्या॑नां ।

जीवे॑त् । इत् । म॒घऽवा॑ । मम॑ ॥८॥

उतापि च यद्यद्यमृतानां देवानां मर्त्यानां मनुष्याणां वा मरणहेतूनामीशीयाहमीश्वरः स्यां तर्हि मम कवषस्य याज्यो मघवा धनवान्मित्रातिथी राजा जीवेत् । प्राणान्धारयेत् । तथा च नाहं मरणहेतोरीश्वरस्तस्मादयं राजा मृत इत्यर्थः ॥

॥ अथ नवमी ॥

न दे॒वाना॒मति॑ व्र॒तं श॒ता॑त्मा॑ च॒न जी॑वति ।

तथा॑ यु॒जा वि वा॑वृते ॥९॥

न । देवानां । अति । व्रतं । शतऽआत्मा । चन । जीवति ।
तथा । युजा । वि । ववृते ॥९॥

देवानां ब्रह्मादीनां व्रतं मर्यादालक्षणं कर्मात्यतिक्रम्य शतात्मा चन शतसंवत्सरः कश्चन जीवति । तथा युजा सहायादिना वि ववृते । विवर्तते । वियुक्तो भवतीति ज्ञात्वा शोकं मा कुर्वित्यर्थः ॥

॥ इति सप्तमस्याष्टमे द्वितीयो वर्गः ॥

प्रावेपा इति चतुर्दशर्चं पंचमं सूक्तमैलूषस्य कवषस्यार्षं मूजवतः पुत्रस्याक्षाख्यस्य वा । सप्तमी जगती शिष्टास्त्रयोदश त्रिष्टुभः । अत्र द्वादश्यक्षान्स्तौति नवम्याद्या च सप्तमी । अतस्तास्तद्देवत्याः । त्रयोदशी कृषिं स्तौति । अतस्तस्याः सा देवता । एवं पंच गताः । शिष्टाभिर्नवभिः कितवोऽक्षांश्च निंद्यंते । अतस्ता अपि तद्देवत्याः । तथा चानुक्रांतं । प्रावेपाः षळूना मौजवान्वाक्षोऽक्षकृषिप्रशंसा चाक्षकितवनिंदा च सप्तमी जगतीति । गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्रावेपा मा बृहतो मादयंति प्रवातेजा इरिणे वर्वृतानाः ।
सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥१॥
प्रावेपाः । मा । बृहतः । मादयंति । प्रवातेऽजाः । इरिणे । वर्वृतानाः ।
सोमस्यऽइव । मौजऽवतस्य । भक्षः । विऽभीदकः । जागृविः । मह्यं । अच्छान् ॥१॥

बृहतो महतो विभीदकस्य फलत्वेन संबंधिनः प्रवातेजाः प्रवणे देशे जाता इरिण आस्फारे वर्वृतानाः प्रवर्तमानाः प्रावेपाः प्रवेपिणः कंपनशीला अक्षा मा मां मादयंति । हर्षयंति । किंच । जागृविर्जयपराजययोर्हर्षशोकाभ्यां कितवानां जागरणस्य कर्ता विभीदको विभीदकविकारोऽक्षो मह्यं मामच्छान् । अचच्छदत् । अत्यर्थं मादयति । तत्र दृष्टांतः । सोमस्येव । यथा सोमस्य मौजवतस्य । मूजवति पर्वते जातो मौजवतः । तस्य । तत्र ह्युत्तमः सोमो जायते । भक्षः पानं यजमानान्देवांश्च मादयति तद्वदित्यर्थः । तथा च यास्कः । प्रवेपिणो मा महतो विभीदकस्य फलानि मादयंति । प्रवातेजाः प्रवणेजा इरिणे वर्तमाना इरिणं निर्ऋणमृणातेरपार्णं भवत्यपरता अस्मादोषधय इति वा सोमस्येव मौजवतस्य भक्षो

मौजवतो मूजवति जातो मूजवान्पर्वतो मुंजवान्मुंजो विमुच्यत इषीकयेषीकेष-तेर्गतिकर्मण इयमपीतरेषीकैतस्मादेव विभीदको विभेदनाज्जागृविर्जागरणान्म-ह्यमचच्छदत्। नि॰९.८.। इति ॥

॥ अथ द्वितीया ॥

न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत्।
अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधं ॥२॥

न। मा। मिमेथ। न। जिहीळे। एषा। शिवा। सखिऽभ्यः। उत। मह्यं। आसीत्।
अक्षस्य। अहं। एकऽपरस्य। हेतोः। अनुऽव्रतां। अप। जायां। अरोधं ॥२॥

एषास्मदीया जाया मा मां कितवं न मिमेथ न च चुक्रोध न जिहीळे न च लज्जितवती। सखिभ्योऽस्मदीयेभ्यः कितवेभ्यः शिवा सुखकर्यासीत्। अभूत्। उतापि च मह्यं शिवासीत्। इत्थमनुव्रतामनुकूलां जायामेकपरस्यैकः परः प्रधानं यस्य तस्याक्षस्य हेतोः कारणादहमपारोधं। परित्यक्तवानस्मीत्यर्थः ॥

॥ अथ तृतीया ॥

द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विंदते मर्डितारं।
अश्वस्येव जरतो वस्न्यस्य नाहं विंदामि कितवस्य भोगं ॥३॥

द्वेष्टि। श्वश्रूः। अप। जाया। रुणद्धि। न। नाथितः। विंदते। मर्डितारं।
अश्वस्यऽइव। जरतः। वस्न्यस्य। न। अहं। विंदामि। कितवस्य। भोगं ॥३॥

श्वश्रूर्जायाया माता गृहगतं कितवं द्वेष्टि। निंदतीत्यर्थः। किंच। जाया भार्याप रुणद्धि। निरुणद्धि। अपि च। नाथितो याचमानः कितवो धनं मर्डितारं धन-दानेन सुखयितारं न विंदते। न लभते। इत्थं बुद्ध्या विमृशन्नहं जरतो वृद्धस्य वस्न्यस्य। वस्नं मूल्यं। तदर्हस्याश्वस्येव कितवस्य भोगं न विंदामि। न लभे ॥

॥ अथ चतुर्थी ॥

अन्ये जायां परि मृशंत्यस्य यस्यागृधद्वेदने वाज्य१क्षः।
पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतं ॥४॥

अन्ये। जायां। परि। मृशंति। अस्य। यस्य। अगृधत्। वेदने। वाजी। अक्षः।
पिता। माता। भ्रातरः। एनं। आहुः। न। जानीमः। नयत। बद्धं। एतं ॥४॥

यस्य कितवस्य वेदने धने वाजी बलवानक्षो देवोऽगृधदभिकांक्षां करोति तस्यास्य कितवस्य जायां भार्यामन्ये प्रतिकितवाः परि मृशंति। वस्त्रकेशाद्याकर्षणेन संस्पृशंति। किंच। पिता जननी च भ्रातरः सहोदराश्चैनं कितवमाहुः। वदंति। न वयमस्मदीयमेनं जानीमः। रज्ज्वा बद्धमेतं कितवं हे कितवा यूयं नयत। यथेष्टदेशं प्रापयतेति॥

॥ अथ पंचमी ॥

यदादीध्ये न दविषाण्येभिः परायद्भ्योऽव हीये सखिभ्यः।
न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव ॥५॥

यत्। आऽदीध्ये। न। दविषाणि। एभिः। परायत्ऽभ्यः। अव। हीये। सखिभ्यः।
निऽउप्ताः। च। बभ्रवः। वाचं। अक्रत। एमि। इत्। एषां। निःऽकृतं। जारिणीऽइव॥५॥

यद्यदाहमादीध्ये ध्यायामि तदानीमेभिरक्षैर्न दविषाणि। न दूषये। न परितपामि। यद्वा। न दविषाणि। न देविष्यामीत्यर्थः। परायद्भ्यः स्वयमेव परागच्छद्भ्यः सखिभ्यः सखिभूतेभ्यः कितवेभ्योऽव हीये। अवहितो भवामि। नाहं प्रथममक्षान्विसृजामीति। किंच। बभ्रवो बभ्रुवर्णा अक्षा न्युप्ताः कितवैरवक्षिप्ताः संतो वाचमक्रत। शब्दं कुर्वंति। तदा संकल्पं परित्यज्याक्षव्यसनेनाभिभूयमानोऽहमेषामक्षाणां निष्कृतं स्थानं जारिणीव यथा कामव्यसनेनाभिभूयमाना स्वैरिणी संकेतस्थानं याति तद्वदेमीत्। गच्छाम्येव॥

॥ इति सप्तमस्याष्टमे तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा३ शूशुजानः।
अक्षासो अस्य वि तिरंति कामं प्रतिदीव्ने दधत आ कृतानि ॥६॥

सभां। एति। कितवः। पृच्छमानः। जेष्यामि। इति। तन्वा। शूशुजानः।
अक्षासः। अस्य। वि। तिरंति। कामं। प्रतिऽदीव्ने। दधतः। आ। कृतानि ॥६॥

तन्वा शरीरेण शूशुजानः शोशुचानो दीप्यमानः कितवः कोऽत्रास्ति धनिकस्तं जेष्यामीति पृच्छमानः पृच्छन् सभां कितवसंबंधिनीमेति। गच्छति। तत्र प्रतिदीव्ने प्रतिदेविने कितवाय कृतानि देवनोपयुक्तानि कर्माण्या दधतो जयार्थ-

माभिमुख्येन मर्यादया वा दधतोऽस्य कितवस्य काममिच्छामक्षासोऽक्षा वितिरंति । वर्धयंति ॥

॥ अथ सप्तमी ॥

अक्षास इदंकुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः ।
कुमारदेष्णा जयतः पुनर्हणो मध्वा संपृक्ताः कितवस्य बर्हणा ॥७॥

अक्षासः । इत् । अंकुशिनः । निऽतोदिनः । निऽकृत्वानः । तपनाः । तापयिष्णवः ।
कुमारऽदेष्णाः । जयतः । पुनःऽहनः । मध्वा । संऽपृक्ताः । कितवस्य । बर्हणा ॥७॥

अक्षास इत् अक्षा एवांकुशिनोऽकुशवंतो नितोदिनो नितोदितवतश्च पुरुषस्य कृषौ प्रवर्तमानस्य निकृत्वानः पराजये निकर्तनशीलाश्छेत्तारो वा । तपनाः पराजये कितवस्य संतापकास्तापयिष्णवः सर्वस्वहारकत्वेन कुटुंबस्य संतापनशीलाश्च भवंति । किंच । जयतः कितवस्य कुमारदेष्णा धनदानेन धान्यतां लंभयंतः कुमाराणां दातारो भवंति । अपि च मध्वा मधुना संपृक्ताः प्रतिकितवेन बर्हणा परिवृढेन सर्वस्वहरणेन कितवस्य पुनर्हणः पुनर्हंतारो भवंति ॥

॥ अथाष्टमी ॥

त्रिपंचाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा ।
उग्रस्य चिन्मन्यवे ना नमंते राजा चिदेभ्यो नम इत्कृणोति ॥८॥

त्रिऽपंचाशः । क्रीळति । व्रातः । एषां । देवःऽइव । सविता । सत्यऽधर्मा ।
उग्रस्य । चित् । मन्यवे । न । नमंते । राजा । चित् । एभ्यः । नमः । इत् । कृणोति ॥८॥

एषामक्षाणां त्रिपंचाशस्त्र्यधिकपंचाशत्संख्याको व्रातः संघः क्रीळति । आस्फारे विहरति । अक्षिकाः प्रायेण तावद्भिरक्षैर्दीव्यंति हि । तत्र दृष्टांतः । सत्यधर्मा सविता सर्वस्य जगतः प्रेरकः सूर्यो देव इव । यथा सविता देवो जगति विहरति तद्वदक्षाणां संघ आस्फारे विहरतीत्यर्थः । किंच । उग्रस्य चित् क्रूरस्यापि मन्यवे क्रोधायैतेऽक्षा न नमंते । न प्रह्वीभवंति । न वशे वर्तंते । तं नमयंतीत्यर्थः । राजा चिज्जगत ईश्वरोऽप्येभ्यो नम इन्नमस्कारमेव देवनवेलायां कृणोति । नावज्ञां करोतीत्यर्थः ॥

॥ अथ नवमी ॥

नीचा वर्तंत उपरि स्फुरंत्यहस्तासो हस्तवंतं सहंते ।
दिव्या अंगारा इरिणे न्युप्ताः शीताः संतो हृदयं निर्दहंति ॥९॥

नीचा । वर्तंते । उपरि । स्फुरंति । अहस्तासः । हस्तऽवंतं । सहंते ।
दिव्याः । अंगाराः । इरिणे । निऽउप्ताः । शीताः । संतः । हृदयं । निः । दहंति ॥९॥

अपि चैतेऽक्षा नीचा नीचीनस्थले वर्तंते । तथाप्युपरि पराजयाद्भीतानां द्यूतकराणां कितवानां हृदयस्योपरि स्फुरंति । अहस्तासो हस्तरहिता अप्यक्षा हस्तवंतं द्यूतकरं कितवं सहंते । पराजयकरणेनाभिभवंति । दिव्या दिवि भवा अपकृता अंगारा अंगारसदृशा अक्षा इरिण इंधनरहित आस्फारे न्युप्ताः शीताः शीतस्पर्शाः संतोऽपि हृदयं कितवानामंतःकरणं निर्दहंति । पराजयजनितसंतापेन भस्मीकुर्वंति ॥

॥ अथ दशमी ॥

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥१०॥

जाया । तप्यते । कितवस्य । हीना । माता । पुत्रस्य । चरतः । क्व । स्वित् ।
ऋणऽवा । बिभ्यत् । धनं । इच्छमानः । अन्येषां । अस्तं । उप । नक्तं । एति ॥१०॥

क्व स्वित् क्वापि चरतो निर्वेदाद्गच्छतः कितवस्य जाया भार्या हीना परित्यक्ता सती तप्यते । वियोगजसंतापेन संतप्ता भवति । माता जनन्यपि पुत्रस्य क्वापि चरतः कितवस्य संबंधाद्धीना तप्यते । पुत्रशोकेन संतप्ता भवति । ऋणावाक्ष-पराजयादृणवान् कितवः सर्वतो बिभ्यत् धनं स्तेयजनितमिच्छमानः कामय-मानोऽन्येषां ब्राह्मणादीनामस्तं गृहं । अस्तं पस्त्यमिति गृहनामसु पाठात् । नक्तं रात्रावुपैति । चौर्यार्थमुपगच्छति ॥

॥ इति सप्तमस्याष्टमे चतुर्थो वर्गः ॥

॥ अथैकादशी ॥

स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिं ।
पूर्वाह्णे अश्वान्युयुजे हि बभ्रून्त्सो अग्नेरंते वृषलः पपाद ॥११॥

स्त्रियँ। दृष्ट्वार्य। कितवं। ततापु। अन्येषाँ। जायां। सुऽकृतं। च। योनिं।
पूर्वाह्णे। अश्वान्। युयुजे। हि। बभ्रून्। सः। अग्नेः। अंतें। वृषलः। पपाद॥११॥

कितवं कितवः। विभक्तिव्यत्ययः। अन्येषां स्वव्यतिरिक्तानां पुरुषाणां जायां जायाभूतां स्त्रियं नारीं सुखेन वर्तमानां सुकृतं सुष्ठु कृतं योनिं गृहं च दृष्ट्वाय मज्जाया दुःखिता गृहं चासंस्कृतमिति ज्ञात्वा तताप। तप्यते। पुनः पूर्वाह्णे प्रातःकाले बभ्रून्बभ्रुवर्णानश्वान्व्यापकानक्षान्युयुजे। युनक्ति। पुनश्च वृषलो वृषलकर्मा स कितवो रात्रावग्नेरंते समीपे पपाद। शीतार्त्तः सन् शेते॥

॥ अथ द्वादशी ॥

यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव।
तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि॥१२॥
यः। वः। सेनाऽनीः। महतः। गणस्य। राजा। व्रातस्य। प्रथमः। बभूव।
तस्मै। कृणोमि। न। धना। रुणध्मि। दश। अहं। प्राचीः। तत्। ऋतं। वदामि॥१२॥

हे अक्षा वो युष्माकं महतो गणस्य संघस्य योऽक्षः सेनानीर्नेता बभूव भवति। व्रातस्य च। गणव्रातयोरल्पो भेदः। राजेश्वरः प्रथमो मुख्यो बभूव। तस्मा अक्षाय कृणोम्यहं। अंजलिं करोमि। अतः परं धना धनान्यक्षार्थमहं न रुणध्मि। न संपादयामीत्यर्थः। एतदेव दर्शयति। अहं दश दशसंख्याका अंगुलीः प्राचीः प्राङ्मुखीः करोमि। तदेतदहमृतं सत्यमेव वदामि। नानृतं ब्रवीमीत्यर्थः॥

॥ अथ त्रयोदशी ॥

अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः॥१३॥
अक्षैः। मा। दीव्यः। कृषिं। इत्। कृषस्व। वित्ते। रमस्व। बहु। मन्यमानः।
तत्र। गावः। कितव। तत्र। जाया। तत्। मे। वि। चष्टे। सविता। अयं। अर्यः॥१३॥

हे कितव बहु मन्यमानो मद्वचने विश्वासं कुर्वन्त्वमक्षैर्मा दीव्यः। द्यूतं मा कुरु। कृषिमित्कृषिमेव कृषस्व। कुरु। वित्ते कृष्या संपादिते धने रमस्व। मतिं कुरु। तत्र कृषौ गावो भवंति। तत्र जाया भवति। तदेव धर्मरहस्यं श्रुतिस्मृ-

तिकर्ता सविता सर्वस्य प्रेरकोऽयं दृष्टिगोचरोऽर्य ईश्वरो वि चष्टे । विविधमाख्यातवान् ॥

॥ अथ चतुर्दशी ॥

मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु ।
नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु ॥१४॥

मित्रं । कृणुध्वं । खलु । मृळत । नः । मा । नः । घोरेण । चरत । अभि । धृष्णु ।
नि । वः । नु । मन्युः । विशतां । अरातिः । अन्यः । बभ्रूणां । प्रऽसितौ । नु । अस्तु ॥१४॥

हे अक्षा यूयं मित्रं कृणुध्वं । अस्मासु मैत्रीं कुरुत । खल्विति पूरणः । नोऽस्मान्मृळत । सुखयत च । नोऽस्मान्धृष्णु धृष्णुना । तृतीयार्थे प्रथमा । घोरेणासह्येन माभि चरत । मा गच्छत । किंच । वो युष्माकं मन्युः क्रोधोऽरातिरस्माकं शत्रुर्नि विशतां । अस्मच्छत्रुषु तिष्ठतु । अन्योऽस्माकं शत्रुः कश्चिद्बभ्रूणां बभ्रुवर्णानां युष्माकं प्रसितौ प्रबंधने नु क्षिप्रमस्तु । भवतु ॥

॥ इति सप्तमस्याष्टमे पंचमो वर्गः ॥

अबुध्रमिति चतुर्दशर्चं षष्ठं सूक्तं । धनाकपुत्रस्य लुशस्यार्षं । इदमुत्तरं च वैश्वदेवं । त्रयोदशीचतुर्दश्यौ त्रिष्टुभौ शिष्टा द्वादश जगत्यः । तथा चानुक्रांतं । अबुध्रं लुशो धानाको वैश्वदेवं तु द्वित्रिष्टुबंतं त्विति । गतः सूक्तविनियोगः । एकादशिनस्य वैश्वदेवस्य पशोर्वपायागस्यानुवाक्या विश्वे अद्येत्येषा । सूत्रितं च । विश्वे अद्य मरुतो विश्व ऊत्या नो देवानामुप वेतु शंसः । आ० ३.७. । इति ॥

॥ तत्र प्रथमा ॥

अबुध्रमु त्य इंद्रवंतो अग्नयो ज्योतिर्भरंत उषसो व्युष्टिषु ।
मही द्यावापृथिवी चेततामपोऽद्या देवानामव आ वृणीमहे ॥१॥

अबुध्रं । ऊं इति । त्ये । इंद्रऽवंतः । अग्नयः । ज्योतिः । भरंतः । उषसः । विऽउष्टिषु ।
मही इति । द्यावापृथिवी इति । चेततां । अपः । अद्य । देवानां । अवः । आ । वृणीमहे ॥१॥

इंद्रवंतो यष्टव्यत्वेनेंद्रसंबंधिनस्त्ये तेऽमी आहवनीयादयोऽग्नय उषसो व्युष्टिषु व्युच्छनेषु तमसां विवासनकालेषु ज्योतिस्तेजो भरंतो धारयंतोऽबुध्रं । प्रबुद्धा आसन् । मही महत्यौ द्यावापृथिव्यावपः कर्म । अपोऽप्न इति कर्मनामसु

पाठात् । चेततां । जानीतां । अद्यास्मिन्नहनि देवानामिंद्रादीनामवो रक्षणं वयमा वृणीमहे ॥

॥ अथ द्वितीया ॥

दिवस्पृथिव्योरव आ वृणीमहे मातॄन्त्सिंधून्पर्वताञ्छर्यणावतः ।
अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः ॥२॥
दिवःपृथिव्योः । अवः । आ । वृणीमहे । मातॄन् । सिंधून् । पर्वतान् । शर्यणाऽवतः ।
अनागाःऽत्वं । सूर्यं । उषसं । ईमहे । भद्रं । सोमः । सुवानः । अद्य । कृणोतु । नः ॥२॥

दिवःपृथिव्योर्द्यावापृथिव्योः कार्यत्वेन संबंध्यवो रक्षणं वयमा वृणीमहे । किंच । मातॄन् लोकस्य निर्मातॄन्सिंधून् शर्यणावतः सरसः संबंधिनः पर्वतान् शिलोच्चयांश्च तथा सूर्यमुषसं चानागास्त्वं कर्मवैगुण्यजनितपापराहित्यमीमहे । वयं याचामहे । किंच । अद्यास्मिन्नहनि नोऽस्माकं सुवानोऽभिषूयमाणः सोमो भद्रं कल्याणं कृणोतु । करोतु ॥

॥ अथ तृतीया ॥

द्यावा नो अद्य पृथिवी अनागसो मही त्रायेतां सुविताय मातरा ।
उषा उच्छंत्यप बाधतामघं स्वस्त्य१ग्निं समिधानमीमहे ॥३॥
द्यावा । नः । अद्य । पृथिवी इति । अनागसः । मही इति । त्रायेतां । सुविताय । मातरा ।
उषाः । उच्छंती । अप । बाधतां । अघं । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥३॥

मही महत्यौ मातरा मातरौ सर्वस्य मातृभूते द्यावापृथिवी द्यावापृथिव्याव-द्यास्मिन्नहन्यनागसोऽपराधरहितान् नोऽस्मान्सुविताय सुखाय त्रायेतां । रक्षेतां । किंच । उच्छंती तमांसि विवासयंत्युषा अस्माकमघं पापमप बाधतां । अपनयतु । अपि च । समिधानं सम्यग्दीप्यमानमग्निं स्वस्ति सर्वप्रकाराविनाशमीमहे । वयं याचामहे ॥

॥ अथ चतुर्थी ॥

इयं न उस्रा प्रथमा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु ।
आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्य१ग्निं समिधानमीमहे ॥४॥

इयं । नः । उस्रा । प्रथमा । सुऽदेव्यं । रेवत् । सनिऽभ्यः । रेवती । वि । उच्छतु ।
आरे । मन्युं । दुःऽविदत्रस्य । धीमहि । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥४॥

रेवती धनवती प्रथमा मुख्येयमुस्रा पापानामुत्सारयित्र्युषाः सुदेव्यं शोभनदेवार्हं रेवद्धनवत्प्रधानयागकालत्वं सनिभ्यो भजमानेभ्यो नोऽस्मभ्यं प्रयच्छंती व्युच्छतु । तमांसि विवासयतु । किंच । दुर्विदत्रस्य दुर्धनस्य पुरुषस्य मन्युं क्रोधमारे दूरे धीमहि । निधीमहि । सिद्धमन्यत् ॥

॥ अथ पंचमी ॥

प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरंतीरुषसो व्युष्टिषु ।
भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्य१ग्निं समिधानमीमहे ॥५॥

प्र । याः । सिस्रते । सूर्यस्य । रश्मिऽभिः । ज्योतिः । भरंतीः । उषसः । विऽउष्टिषु ।
भद्राः । नः । अद्य । श्रवसे । वि । उच्छत । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥५॥

या उषसः सूर्यस्य रश्मिभिः किरणैः प्र सिस्रते संगच्छंते व्युष्टिषु व्युच्छनेषु तमसां विवासनकालेषु ज्योतिरात्मीयं तेजो भरंतीर्भरंति च ता यूयं नोऽस्माकमद्यास्मिन्नहनि श्रवसेऽन्नाय भद्रा भजनीया भवत । व्युच्छत । तमांसि विवासयत च । सिद्धमन्यत् ॥

॥ इति सप्तमस्याष्टमे षष्ठो वर्गः ॥

॥ अथ षष्ठी ॥

अनमीवा उषस आ चरंतु न उदग्नयो जिहतां ज्योतिषा बृहत् ।
आयुक्षातामश्विना तूतुजिं रथं स्वस्त्य१ग्निं समिधानमीमहे ॥६॥

अनमीवाः । उषसः । आ । चरंतु । नः । उत् । अग्नयः । जिहतां । ज्योतिषा । बृहत् ।
अयुक्षातां । अश्विना । तूतुजिं । रथं । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥६॥

अनमीवा रोगरहिता उषसो नोऽस्माना चरंतु । आगच्छंतु । बृहद्बृहता महता ज्योतिषा तेजसा युक्ता अग्नयोऽप्युज्जिहतां । उद्गच्छंतु । अश्विनाश्विनौ तूतुजिं क्षिप्रगामिनं रथमायुक्षातां । अस्मान्प्रत्यागंतुं रासभाभ्यां युंक्तां । हरित आदित्यस्य रासभावश्विनोरिति पाठात् । सिद्धमन्यत् ॥

॥ अथ सप्तमी ॥

श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि ।
रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्य१ग्निं समिधानमीमहे ॥७॥

श्रेष्ठं । नः । अद्य । सवितः । वरेण्यं । भागं । आ । सुव । सः । हि । रत्नऽधाः । असि ।
रायः । जनित्रीं । धिषणां । उप । ब्रुवे । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥७॥

हे सवितस्त्वमद्यास्मिन्नहनि नोऽस्मभ्यं वरेण्यं वरणीयं श्रेष्ठं प्रशस्यतमं भागं भजनीयं धनमा सुव । प्रेरय । देहीत्यर्थः । हि यस्मात्प्रार्थितस्त्वं रत्नधाः श्रेष्ठानां धनानां संविभक्तासि भवसि । तथा च निगमांतरं । विभक्तारं हवामहे वसोश्चित्रस्य राधसः । सवितारं नृचक्षसं । ऋग्वे० १.२२.७. । इति । रायो धनस्य जनित्रीं धिषणां सर्वदेवस्तुतिरूपां वाचमुप ब्रुवे । अहमुपब्रवीमि । यद्वा । धिषणां देवीमुप ब्रुवे । उपस्तौमीत्यर्थः । सिद्धमन्यत् ॥

॥ अथाष्टमी ॥

पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या३अमन्महि ।
विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्य१ग्निं समिधानमीमहे ॥८॥

पिपर्तु । मा । तत् । ऋतस्य । प्रऽवाचनं । देवानां । यत् । मनुष्याः । अमन्महि ।
विश्वाः । इत् । उस्राः । स्पट् । उत् । एति । सूर्यः । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥८॥

यदृतस्य यज्ञस्य सत्यस्य वा संबंधि देवानां प्रवाचनं प्रकर्षेण गुणानां कथनं स्तोत्रं मनुष्या वयममन्महि कर्तुं जानीमस्तत्प्रवाचनं मा मां पिपर्तु । पालयतु । किंच । सूर्यो विश्वाः सर्वा उस्रा उषसः स्पट् स्पृशन्ननुगच्छन्वोदेति । सिद्धमन्यत् ॥

॥ अथ नवमी ॥

अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साध ईमहे ।
आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्य१ग्निं समिधानमीमहे ॥९॥

अद्वेषः । अद्य । बर्हिषः । स्तरीमणि । ग्राव्णां । योगे । मन्मनः । साधे । ईमहे ।
आदित्यानां । शर्मणि । स्थाः । भुरण्यसि । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥९॥

अद्यास्मिन्नहनि बर्हिषः स्तरीमणि वेद्यां स्तरणे मन्मनो मननीयस्याभीष्टस्य

फलस्य साधे साधके ग्राव्णामभिषवपाषाणानां योगे सोमेन सह संयोगे च सत्यद्वेषो द्वेषवर्जितानादित्यानीमहे। वयमभीष्टं याचामहे। हे स्तोतस्त्वं तेषामादित्यानां देवानां शर्मणि सुखे स्थाने वा स्थाः। तिष्ठ। भुरण्यसि। कर्तव्यानि कर्माणि बिभर्षि। गच्छसि वा। सिद्धमन्यत्॥

॥ अथ दशमी ॥

आ नो॑ ब॒र्हिः स॑ध॒मादे॑ बृ॒हद्दि॒वि दे॒वाँ ई॑ळे सा॒दया॑ स॒प्त होतॄ॑न्।
इंद्रं॑ मि॒त्रं वरु॑णं सा॒तये॒ भगं॑ स्व॒स्त्य१॒ग्निं स॒मिधा॒नमी॑महे ॥१०॥

आ। नः॒। ब॒र्हिः। स॒ध॒ऽमादे॑। बृ॒हत्। दि॒वि। दे॒वान्। ई॒ळे॒। सा॒दय॑। स॒प्त। होतॄ॑न्।
इंद्र॑म्। मि॒त्रम्। वरु॑णम्। सा॒तये॑। भग॑म्। स्व॒स्ति। अ॒ग्निम्। स॒म्ऽइ॒धा॒नम्। ई॒म॒हे॒ ॥१०॥

नोऽस्माकं बृहद्बृहति महति दिवि दीप्ते सधमादे। सह माद्यंति देवा यत्र तस्मिन्। बर्हिर्बर्हिषि यज्ञे सप्त सप्तसंख्याकान्होतॄन्वषट्कर्तॄनिंद्रं मित्रं च वरुणं च भगं च देवानितरानपि यष्टव्यान्देवान् हे अग्ने त्वमा सादय। अग्नेराभिमुख्यकरणमिहाद्य दैव्यं जनं बर्हिरा सादया वसो इत्येवमादिमंत्रैरवगम्यते। तत्र त्वयासादितांस्तानिंद्रादीन्देवानहं सातये धनलाभायेळे। स्तौमि। सिद्धमन्यत्॥

॥ इति सप्तमस्याष्टमे सप्तमो वर्गः ॥

॥ अथैकादशी ॥

त आ॑दि॒त्या आ ग॑ता स॒र्वता॑तये वृ॒धे नो॑ य॒ज्ञम॑वता सजोषसः।
बृह॒स्पतिं॑ पू॒षण॑म॒श्विना॒ भगं॑ स्व॒स्त्य१॒ग्निं स॒मिधा॒नमी॑महे ॥११॥

ते। आ॒दि॒त्याः। आ। ग॒त॒। स॒र्वऽता॑तये। वृ॒धे। नः॒। य॒ज्ञम्। अ॒व॒त॒। स॒ऽजो॒ष॒सः॒।
बृह॒स्पति॑म्। पू॒षण॑म्। अ॒श्विना॑। भग॑म्। स्व॒स्ति। अ॒ग्निम्। स॒म्ऽइ॒धा॒नम्। ई॒म॒हे॒ ॥११॥

हे आदित्या येऽस्माभिराहूतास्ते यूयं सर्वतातये यज्ञार्थमा गत। आगच्छत। आगत्य च हे सजोषसः संगता यूयं नोऽस्माकं वृधे वर्धनाय यज्ञं प्रत्यवत। गच्छत। वयं च बृहस्पतिं पूषणं चाश्विनाश्विनौ च भगं भगाख्यं देवं च समिधानं सम्यग्दीप्तमग्निं च स्वस्ति सर्वप्रकाराविनाशमीमहे। याचामहे॥

॥ अथ द्वादशी ॥

तन्नो देवा यच्छत सुप्रवाचनं छर्दिरादित्याः सुभरं नृपाय्यं ।
पश्वे तोकाय तनयाय जीवसे स्वस्त्यग्निं समिधानमीमहे ॥१२॥

तत् । नः । देवाः । यच्छत । सुऽप्रवाचनं । छर्दिः । आदित्याः । सुऽभरं । नृऽपाय्यं ।
पश्वे । तोकाय । तनयाय । जीवसे । स्वस्ति । अग्निं । संऽइधानं । ईमहे ॥१२॥

हे आदित्या देवा यूयं सुप्रवाचनमत्यंतं प्रशस्तं सुभरं सुसमृद्धं नृपाय्यं नृणां रक्षकं तदस्मदभिलषितं छर्दिर्गृहं नोऽस्माकं पश्वे पश्वात्मकाय तोकाय पुत्राय तनयाय पौत्राय च जीवसे जीवनार्थं यच्छत । दत्त । सिद्धमन्यत् ॥

॥ अथ त्रयोदशी ॥

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवंत्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमंतु विश्वमस्तु द्रविणं वाजो अस्मे ॥१३॥

विश्वे । अद्य । मरुतः । विश्वे । ऊती । विश्वे । भवंतु । अग्नयः । संऽइद्धाः ।
विश्वे । नः । देवाः । अवसा । आ । गमंतु । विश्वं । अस्तु । द्रविणं । वाजः । अस्मे इति ॥१३॥

अद्यास्मिन्नहनि प्रधानयागदिवसे विश्वे सर्वे मरुतो विश्वे सर्वे मरुद्गणसहचरिता रुद्रादयो देवाश्चोती ऊत्यै रक्षणाय भवंतु । अपि च । विश्वे सर्वेऽग्नय आहवनीयादयः समिद्धाः संदीप्ता भवंतु । अपि च विश्वे सर्वे इंद्रादयो देवा नोऽस्माकमवसा रक्षणेना गमंतु । आगच्छंतु । किंचास्मे अस्मासु विश्वं सर्वं द्रविणं धनं वाजोऽन्नं चास्तु । भवतु ॥

॥ अथ चतुर्दशी ॥

यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः ।
यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ॥१४॥

यं । देवासः । अवथ । वाजऽसातौ । यं । त्रायध्वे । यं । पिपृथ । अति । अंहः ।
यः । वः । गोऽपीथे । न । भयस्य । वेद । ते । स्याम । देवऽवीतये । तुरासः ॥१४॥

हे तुरासोऽभीष्टप्रदाने क्षिप्रा देवासो देवा यूयं वाजसातौ संग्रामे यं मनुष्यमवथ रक्षथ यं च त्रायध्वे शत्रोः पालयथ यं चांहः पापमत्यतिनीय पिपृथ

कामैः पूरयथ यश्चापि मनुष्यो वो युष्माकं कार्यत्वेन संबंधिनि गोपीथे रक्षणे भयस्य भयं न वेद न जानाति ते सर्वे वयं देववीतये यज्ञार्थं स्याम। भवेम॥

॥ इति सप्तमस्याष्टमेऽष्टमो वर्गः ॥

उषासानक्तेति चतुर्दशर्चं सप्तमं सूक्तं। धानाकस्य लुशस्यार्षं। आदितो द्वादश जगत्यस्ततो द्वे त्रिष्टुभौ। विश्वे देवा देवता। पूर्वसूक्ते वैश्वदेवं तु द्वित्रिष्टुबंतं त्वित्युक्तत्वात्। उषासानक्तेत्यनुक्रांतं। आभिप्लविके षष्ठेऽहनि वैश्वदेव इदं वैश्वदेवनिविद्धानं। सूचितं च। कतरा पूर्वोषासानक्तेति वैश्वदेवं। आ०७.७.। इति॥

॥ तत्र प्रथमा ॥

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा।
इंद्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः॥१॥

उषसानक्ता। बृहती इति। सुऽपेशसा। द्यावाक्षामा। वरुणः। मित्रः। अर्यमा। इंद्रं। हुवे। मरुतः। पर्वतान्। अपः। आदित्यान्। द्यावापृथिवी इति। अपः। स्वरिति स्वः॥१॥

बृहती बृहत्यौ महत्यौ सुपेशसा सुरूपे उषासानक्ता रात्र्युषसौ द्यावाक्षामा द्यावापृथिव्यौ च। वरुणो मित्रो मित्रावरुणौ चार्यमा च येऽत्र विहिता देवास्तानेतानिंद्रं मरुतश्च पर्वतांश्चाप उदकानि चादित्यांश्च द्यावापृथिवी द्यावापृथिव्यौ च। पुनर्द्यावापृथिव्योर्ग्रहणमादरार्थं। अपोऽंतरिक्षं च स्वः सर्वं च यष्टव्यं देवजातं हुवे। ह्वयामि॥

॥ अथ द्वितीया ॥

द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः।
मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवानामवो अद्या वृणीमहे॥२॥

द्यौः। च। नः। पृथिवी। च। प्रऽचेतसा। ऋतवरी इत्यृतऽवरी। रक्षतां। अंहसः। रिषः। मा। दुःऽविदत्रा। निःऽऋतिः। नः। ईशत। तत्। देवानां। अवः। अद्य। वृणीमहे॥२॥

प्रचेतसा सुबुद्धी ऋतावरी यज्ञवत्यौ सत्यवत्यौ द्यौश्च पृथिवी च द्यावापृथिव्यावुभे नोऽस्मान्रिषो हिंसकादंहसः पापाच्च रक्षतां। किंच दुर्विदत्रा कुत्सितज्ञाना निर्ऋतिर्मृत्युदेवता नोऽस्माकं मेशत। ईश्वरी मा भूत्। किंच। वयं देवानां

संबंधि तदसाधारणमवो रक्षणमद्यास्मिन्नहनि प्रधानयागदिवसे वृणीमहे । प्रार्थयामहे ॥

॥ अथ तृतीया ॥

विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः ।

स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ॥३॥

विश्वस्मात् । नः । अदितिः । पातु । अंहसः । माता । मित्रस्य । वरुणस्य । रेवतः ।

स्वःऽवत् । ज्योतिः । अवृकं । नशीमहि । तत् । देवानां । अवः । अद्य । वृणीमहे ॥३॥

रेवतो धनवतो मित्रस्य वरुणस्य च धनवतोर्मित्रावरुणयोर्माता जनन्यदितिर्देवी नोऽस्मान्विश्वस्मात्सर्वस्मादंहसः पापात्पातु । रक्षतु । किंच । वयमवृकं बाधकरहितं स्वर्वत् सर्वं ज्योतिस्तेजो नशीमहि । नशिः पलायनकर्मा । पलायनं च शीघ्रगमनं । शीघ्रं प्राप्नुम इत्यर्थः । सिद्धमन्यत् ॥

॥ अथ चतुर्थी ॥

ग्रावा वदन्नप रक्षांसि सेधतु दुःष्वप्न्यं निर्ऋतिं विश्वमत्रिणं ।

आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ॥४॥

ग्रावा । वदन् । अप । रक्षांसि । सेधतु । दुःऽस्वप्न्यं । निःऽऋतिं । विश्वं । अत्रिणं ।

आदित्यं । शर्म । मरुतां । अशीमहि । तत् । देवानां । अवः । अद्य । वृणीमहे ॥४॥

ग्रावाभिषवपाषाणो वदन्नभिषववेलायां शब्दं कुर्वन् रक्षांसि यागविघ्नकारीण्यप सेधतु । विनिवारयतु । दुःस्वप्न्यं दुःष्वप्नप्रभवमस्मदीयमनिष्टं चाप सेधतु । निर्ऋतिं मृत्युदेवतां चाप सेधतु । अत्रिणमदनशीलं विश्वं सर्वं पिशाचादिकं चाप सेधतु । एवं निर्विघ्नत्वेन निष्पन्ने यागे वयमादित्यमादित्यानां संबंधि मरुतां च संबंधि शर्म सुखमशीमहि । प्राप्नुयाम । सिद्धमन्यत् ॥

॥ अथ पंचमी ॥

एंद्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु ।

सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ॥५॥

आ । इंद्रः । बर्हिः । सीदतु । पिन्वतां । इळा । बृहस्पतिः । सामऽभिः । ऋक्वः । अर्चतु ।

सुऽप्रकेतं । जीवसे । मन्म । धीमहि । तत् । देवानां । अवः । अद्य । वृणीमहे ॥५॥

इंद्रो बर्हिरा सीदतु । इळा माध्यमिका स्तनयित्नुलक्षणा वागपि पिन्वतां । किंतु । सामभिर्गीयमान ऋक्कः स्तुतिमान्बृहस्पतिरर्चतु । अस्मान्पूजयतु । किंच । वयं सुप्रकेतं सुप्रज्ञानं मन्म मननीयं धनं स्तोत्रं वा धीमहि निदधीमहि जीवसे जीवनाय । सिद्धमन्यत् ॥

॥ इति सप्तमस्याष्टमे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं सुम्नमिष्टये ।
प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे ॥६॥

दिविऽस्पृशं । यज्ञं । अस्माकं । अश्विना । जीरऽअध्वरं । कृणुतं । सुम्नं । इष्टये ।
प्राचीनऽरश्मिं । आऽहुतं । घृतेन । तत् । देवानां । अवः । अद्य । वृणीमहे ॥६॥

हे अश्विनौ युवां नोऽस्माकं यज्ञं दिविस्पृशं दिवि स्प्रष्टारं गंतारं कृणुतं । कुरुतं । तथा जीराध्वरं क्षिप्रं हिंसारहितं च यज्ञं नोऽस्माकं कृणुतं । कुरुतं । इष्टयेऽभिलषितसिद्ध्यर्थं सुम्नं सुखं च कुरुतं । किंच । घृतेनाज्येनाहुतमग्निं प्राचीनरश्मिं देवाभिमुखं कुरुतमित्यर्थः । सिद्धमन्यत् ॥

॥ अथ सप्तमी ॥

उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शंभुवं ।
रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो अद्या वृणीमहे ॥७॥

उप । ह्वये । सुऽहवं । मारुतं । गणं । पावकं । ऋष्वं । सख्याय । शंऽभुवं ।
रायः । पोषं । सौश्रवसाय । धीमहि । तत् । देवानां । अवः । अद्य । वृणीमहे ॥७॥

सुहवं स्वाह्वानं पावकं शोधकमृष्वं दर्शनीयं शंभुवं सुखस्य भावयितारं रायो धनस्य पोषं पोषकं मारुतं मरुतां संबंधिनं गणं संघं सख्याय सखिभावायोप ह्वये । उपगम्य ह्वयामि । आगतं गणं सौश्रवसाय शोभनान्नवत्त्वाय सुयशस्त्वाय वा वयं धीमहि । बुद्धौ निदधीमहि । सिद्धमन्यत् ॥

॥ अथाष्टमी ॥

अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवमध्वरश्रियं ।
सुरश्मिं सोममिंद्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे ॥८॥

अपां। पेरुं। जीवऽधन्यं। भरामहे। देवऽअव्यं। सुऽहवं। अध्वरऽश्रियं।
सुऽरश्मिं। सोमं। इंद्रियं। यमीमहि। तत्। देवानां। अवः। अद्य। वृणीमहे॥८॥

अपामुदकानां पेरुं पालकं जीवधन्यं। धन्या जीवा यस्मिन्नसौ जीवधन्यः। तं देवाव्यं देवानां तर्पकं सुहवं शोभनाह्वानं शोभनस्तुतिं वाध्वरश्रियं सुरश्मिं शोभनांशुं सोमं भरामहे। धारयामः। पत्नीशालातो हविर्धानं प्रति प्रापयामो वा। भृतं तं सोममिंद्रियं वीर्यं यमीमहि। वयं याचामहे। सिद्धमन्यत्॥

॥ अथ नवमी ॥

सनेम तत्सुसनिता सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः।
ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे॥९॥
सनेम। तत्। सुऽसनिता। सनित्वऽभिः। वयं। जीवाः। जीवऽपुत्राः। अनागसः।
ब्रह्मऽद्विषः। विष्वक्। एनः। भरेरत। तत्। देवानां। अवः। अद्य। वृणीमहे॥९॥

जीवा जीवंतो जीवपुत्रा जीवनवत्पुत्राश्चानागसोऽपराधवर्जिताश्च वयं धनाकांक्षुशाः सनित्वभिः संभक्तृभिः पुत्रपौत्रादिभिः सह सुसनिता शोभनेन भजनेन तद्देवजातं सनेम। स्तुत्या हविःप्रदानेन च संभजेमहि। किंच। ब्रह्मद्विषो ब्राह्मणानामस्माकं द्वेष्टारो विष्वग्नानागच्छदेनोऽस्मदीयं पापं भरेरत। आत्मनि धारयंतु। पोषयंतु। सिद्धमन्यत्॥

॥ अथ दशमी ॥

ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्ददातन।
जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे॥१०॥
ये। स्थ। मनोः। यज्ञियाः। ते। शृणोतन। यत्। वः। देवाः। ईमहे। तत्। ददातन।
जैत्रं। क्रतुं। रयिऽमत्। वीरऽवत्। यशः। तत्। देवानां। अवः। अद्य। वृणीमहे॥१०॥

हे देवा ये यूयं मनोर्मनुष्यस्य यज्ञिया यज्ञार्हाः स्थ भवथ ते यूयं शृणोतन। अस्मदीयां स्तुतिं शृणुत। किंच। हे देवा वो युष्मान्यदभीष्टमीमहे याचामहे तज्जैत्रं जयशीलं क्रतुं प्रज्ञानं रयिमद्धनवद्वीरवत्पुत्राद्युपेतं यशश्च ददातन। नोऽस्मभ्यं प्रयच्छत। सिद्धमन्यत्॥

॥ इति सप्तमस्याष्टमे दशमो वर्गः ॥

॥ अथैकादशी ॥

महद्द्य महतामा वृणीमहेऽवो देवानां बृहतामनर्वणां ।
यथा वसु वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे ॥११॥

महत् । अद्य । महतां । आ । वृणीमहे । अवः । देवानां । बृहतां । अनर्वणां ।
यथा । वसु । वीरऽजातं । नशामहै । तत् । देवानां । अवः । अद्य । वृणीमहे ॥११॥

अद्यास्मिन्नहनि महतां श्रेष्ठानां बृहतां वृद्धानामनर्वणामप्रतिगतानां देवानामिंद्रादीनां संबंधि महदधिकमवो रक्षणमा वृणीमहे । प्रार्थयामहे । किंच । वयं यथा वसु धनं वीरजातमपत्यजातं च नशामहै प्राप्नुयाम तथा ते देवाः कुर्वंत्विति शेषः ॥

॥ अथ द्वादशी ॥

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥१२॥

महः । अग्नेः । सम्ऽइधानस्य । शर्मणि । अनागाः । मित्रे । वरुणे । स्वस्तये ।
श्रेष्ठे । स्याम । सवितुः । सवीमनि । तत् । देवानां । अवः । अद्य । वृणीमहे ॥१२॥

समिधानस्य समिध्यमानस्य महो महतोऽग्नेः शर्मणि सुखे वयं स्याम । भवेम । किंच । वयमनागा अनागसः । वचनव्यत्ययः । स्याम । अपि च । मित्रे वरुणे मित्रावरुणयोः । षष्ठ्यर्थे सप्तमी । सवितुश्च सवीमनि प्रसवे स्वस्तये सर्वप्रकाराविनाशाय स्याम । सिद्धमन्यत् ॥

॥ अथ त्रयोदशी ॥

ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ।
ते सौभगं वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे ॥१३॥

ये । सवितुः । सत्यऽसवस्य । विश्वे । मित्रस्य । व्रते । वरुणस्य । देवाः ।
ते । सौभगं । वीरऽवत् । गोऽमत् । अप्नः । दधातन । द्रविणं । चित्रं । अस्मे इति ॥१३॥

ये विश्वे देवाः सत्यसवस्य सत्यप्रसवस्य सवितुर्मित्रस्य वरुणस्य मित्रावरुणयोश्च व्रते प्रसवाख्ये कर्मणि भवंति ते यूयं सौभगं सौभाग्यं वीरवत्पुत्राद्युपेतं गोमद्गोयुक्तं चित्रं पूजनीयं द्रविणं धनं चाप्नः कर्म चास्मे मह्यं दधातन । प्रयच्छत ॥

॥ अथ चतुर्दशी ॥

सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥१४॥

सविता । पश्चातात् । सविता । पुरस्तात् । सविता । उत्तरात्तात् । सविता । अधरात्तात् ।
सविता । नः । सुवतु । सर्वऽतातिं । सविता । नः । रासतां । दीर्घं । आयुः ॥१४॥

पश्चातात्पश्चिमतः स्थितः सविता पुरस्तात्पूर्वतश्च स्थितः सवितोत्तरात्तादुत्तरतः स्थितश्च सविता नोऽस्माकं सर्वतातिं सर्वमभिलषितं धनादिकं सुवतु । प्रेरयतु । किंच । सवितैव नोऽस्मभ्यं दीर्घं बहुकालीनमायू रासतां । ददातु । बहुधा सवितृपदग्रहणमत्यंतमादरार्थं ॥

॥ इति सप्तमस्याष्टम एकादशो वर्गः ॥

नमो मित्रस्येति द्वादशर्चमष्टमं सूक्तं । अभितपा नाम सूर्यपुत्र ऋषिः । इदमादीनि पंच सूक्तानि जागतानि । अस्य सूक्तस्य दशमी त्रिष्टुप् । सूर्यो देवता । तथा चानुक्रांतं । नमो द्वादश सौर्योऽभितपाः सौर्यं जागतं वै त्रिष्टुब्दशमीति ॥ आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्यकांड एतत्सूक्तं । सूत्रितं च । चित्रं देवानां नमो मित्रस्य । आ० ६.५. । इति ॥ विषुवति निष्केवल्य आद्यस्तृचोऽनुरूपः । सूत्रितं च । विभ्राड्बृहत्पिबतु सोम्यं मधु नमो मित्रस्य वरुणस्य चक्षस इति स्तोत्रियानुरूपौ । आ० ८.६. । इति ॥ स्वपंतमभ्यस्तमये सति रात्रिशेषं स्थित्वा प्रातर्येन सूर्यो ज्योतिषेत्यादिभिः पंचभिः सूर्य उपस्थेयः । सूत्रितं च । अव्याधितं चेत्स्वपंतमादित्योऽभ्यस्तमियाद्वाग्यतोऽनुपविशन्रात्रिशेषं भूत्वा येन सूर्य ज्योतिषा बाधसे तम इति पंचभिरादित्यमुपतिष्ठेत । स्वपंतमभ्युदिते यस्य ते विश्वेत्यादिभिश्चतसृभिः सूर्य उपस्थेयः । सूत्रितं च । अभ्युदियाच्चेदकर्मश्रांतमनभिरूपेण कर्मणा वाग्यत इति समानमुत्तराभिश्चतसृभिरुपस्थानमिति । आ० गृ० ३.७.॥ एकादशिनस्य सौर्यस्य पशोर्हविषो याज्या । सूत्रितं च । शं नो भव चक्षसा शं नो अह्ना वायो भूष शुचिपाः । आ० ३.८. । इति ॥ होत्रकाणां शकलाधाने यद्वो देवा इत्येषा । आ० ६.१२.॥ विवाहे कन्यारोदनीये जीवं रुदंतीत्येषा जप्या । आ० गृ० १.८.॥

॥ तत्र प्रथमा ॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत ॥१॥

नमः । मित्रस्य । वरुणस्य । चक्षसे । महः । देवाय । तत् । ऋतं । सपर्यत ।
दूरेऽदृशे । देवऽजाताय । केतवे । दिवः । पुत्राय । सूर्याय । शंसत ॥१॥

हे ऋत्विजो यूयं मित्रस्य वरुणस्य मित्रावरुणयोश्चक्षसे द्रष्ट्रे महो महते देवाय द्योतमानाय दूरेदृशे दूरे संतमपि पश्यते देवजाताय देवेषु जाताय देवार्थमुत्पन्नाय केतवे विश्वस्य प्रज्ञापकाय दिवः पुत्राय पुत्रभूताय । दिवि जायमानत्वात्तत्पुत्रत्वव्यपदेशः । सूर्याय सूर्यार्थं नमः कृत्वा तद्विहितमृतं यागादिलक्षणं कर्म सपर्यत । पूजयत । शंसत । स्तुतिमपि कुरुत ॥

॥ अथ द्वितीया ॥

सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च ।
विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः ॥२॥

सा । मा । सत्यऽउक्तिः । परि । पातु । विश्वतः । द्यावा । च । यत्र । ततनन् । अहानि । च ।
विश्वं । अन्यत् । नि । विशते । यत् । एजति । विश्वाहा । आपः । विश्वाहा । उत् ।
एति । सूर्यः ॥२॥

सा सत्योक्तिस्तत्सत्यवचनं मा मां विश्वतः सर्वतः परि पातु । परिरक्षतु । यया सत्योक्त्या यत्र यस्मिन्देशे द्यावा च द्यावापृथिव्यावहानि रात्रयश्च ततनन् अतन्वन् तत्र विश्वं सर्वमन्यद्भूतजातं नि विशते । विश्राम्यति । यदेतद्भूतजातमेजति कंपते विश्वाहा सर्वदापश्च स्यंदंते विश्वाहा सर्वदा सूर्यश्चोदेति सा सत्योक्तिर्मां परिपात्वित्यर्थः ॥

॥ अथ तृतीया ॥

न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि ।
प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ॥३॥

न । ते । अदेवः । प्रऽदिवः । नि । वासते । यत् । एतशेभिः । पतरैः । रथर्यसि ।
प्राचीनं । अन्यत् । अनु । वर्तते । रजः । उत् । अन्येन । ज्योतिषा । यासि । सूर्य ॥३॥

हे सूर्य ते तव समीपे प्रदिवः प्रत्नः पुरातनः कश्चिदद्देवोऽसुरो राक्षसो वा न नि वासते । न निवसति । कदेत्यत आह । यद्यदा त्वं पतरैर्गमनशीलैरेतशेभिरश्वै रथर्यसि । रथं कामयसे योक्तुं । किंच प्राचीनमन्यत्त्वदीयं ज्योती रज

उदकमनु वर्तते। अन्येन तेन ज्योतिषोद्यासि। उदेषि। यद्वा प्राचीनमन्यदृजश्वं-द्राख्यं ज्योतिस्त्वामनु वर्तते ततस्त्वमन्येन ज्योतिषा सहोदेषीत्यर्थः ॥

॥ अथ चतुर्थी ॥

येन॑ सूर्य॒ ज्योति॑षा॒ बाध॑से॒ तमो॒ जग॑च्च॒ विश्व॑मुदि॒यर्षि॑ भा॒नुना॑।
तेना॒स्मद्विश्वा॒मनि॑रा॒मना॑हुति॒मपामी॑वा॒मप॑ दुः॒ष्वप्न्यं॑ सुव ॥४॥
येन॑। सूर्य॒। ज्योति॑षा। बाध॑से। तमः॑। जग॑त्। च॒। विश्व॑म्। उत्ऽइ॒यर्षि॑। भा॒नुना॑।
तेन॑। अ॒स्मत्। विश्वा॑म्। अनि॑राम्। अना॑हुतिम्। अप॑। अमी॑वाम्। अप॑। दुः॒ऽस्वप्न्य॑म्। सु॒व॒॥४॥

हे सूर्य त्वं येन ज्योतिषा तेजसा तमोऽधकारं बाधसे निवारयसि। येन च भानुना तेजसा विश्वं सर्वं जगज्जंगममुदियर्षुद्गमयसि तेन ज्योतिषास्मद-स्मत्तोऽनिरामन्नाभावमनाहुतिमहोमं चामीवां रोगजातं चाप सुव। अपगमय। दुःष्वप्न्यं दुःष्वप्नप्रभवमनिष्टं चाप सुव ॥

॥ अथ पंचमी ॥

विश्व॑स्य॒ हि प्रेषि॑तो॒ रक्ष॑सि व्र॒तमहे॑ळयन्नु॒च्चर॑सि स्व॒धा अनु॑।
यद॒द्या त्वा॑ सूर्योपब्र॒वाम॑है॒ तं नो॑ दे॒वा अनु॑ मंसीरत॒ क्रतु॑म् ॥५॥
विश्व॑स्य। हि। प्रऽइ॑षितः। रक्ष॑सि। व्र॒तम्। अहे॑ळयन्। उत्ऽचर॑सि। स्व॒धाः। अनु॑।
यत्। अ॒द्य। त्वा॒। सूर्य॒। उ॒प॒ऽब्र॒वाम॑हे। तम्। नः॒। दे॒वाः। अनु॑। मंसी॑र॒त॒। क्रतु॑म् ॥५॥

हे सूर्य प्रेषितः प्रेरितस्त्वमहेळयन् अक्रुध्यन्विश्वस्य सर्वस्य यजमानस्य व्रतं कर्म रक्षसि हि। यज्ञविध्वंसकेभ्यो राक्षसेभ्यः पालयसि। स्वधा हवींष्यनूच्चरसि। उद्गच्छसि च। प्रातर्होमे निवृत्ते सति पश्चादुद्गच्छसीत्यर्थः। तथा च यद्यदाद्या-स्मिन्नहनि त्वा त्वामुपब्रवामहा उपब्रूमस्तदा नोऽस्माकं तं क्रतुं तत्कर्म देवा इंद्रादयोऽनु मंसीरत। अनुमन्यंतां ॥

॥ अथ षष्ठी ॥

तं नो॒ द्यावा॑पृथि॒वी तन्न॒ आप॒ इंद्रः॑ शृण्वंतु॒ म॒रुतो॒ हवं॒ वचः॑।
मा शूने॑ भूम॒ सूर्य॑स्य सं॒दृशि॑ भ॒द्रं जीवं॑तो जर॒णाम॑शीमहि ॥६॥

तं । नः । द्यावापृथिवी इति । तत् । नः । आपः । इंद्रः । शृण्वंतु । मरुतः । हवं । वचः ।
मा । शूने । भूम । सूर्यस्य । संऽदृशि । भद्रं । जीवंतः । जरणां । अशीमहि ॥ ६ ॥

द्यावापृथिवी द्यावापृथिव्यावापश्चेंद्रश्च मरुतश्च नोऽस्माकं तं हवमाह्वानं नोऽस्माकं तद्वचः स्तुतिरूपं वाक्यं च । न इति द्विरुक्तिरादरार्था । शृण्वंतु । किंच । वयं सूर्यस्य संदृशि संदर्शने शूने प्रवृद्धाय दुःखाय मा भूम । मैव भवेम । किंतु जीवंतश्चिरं प्राणान्धारयंतो वयं भद्रं कल्याणं जरणां वृद्धत्वममरत्वं चाशीमहि । प्राप्नुयाम ॥

॥ इति सप्तमस्याष्टमे द्वादशो वर्गः ॥

॥ अथ सप्तमी ॥

विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावंतो अनमीवा अनागसः ।
उद्यंतं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम सूर्य ॥ ७ ॥
विश्वाहा । त्वा । सुऽमनसः । सुऽचक्षसः । प्रजाऽवंतः । अनमीवाः । अनागसः ।
उत्ऽयंतं । त्वा । मित्रऽमहः । दिवेऽदिवे । ज्योक् । जीवाः । प्रति । पश्येम । सूर्य ॥ ७ ॥

हे सूर्य त्वा त्वां सुमनसः प्रीतियुक्तमनस्काः सुचक्षसः सुदर्शनाः प्रजावंतः पुत्राद्युपेता अनमीवा रोगरहिता अनागसोऽपराधवर्जिताश्च वयं विश्वाहा सर्वदा यजेमेति शेषः । किंच । हे मित्रमहो मित्राणां पूजयितः सूर्य दिवेदिवे प्रतिदिनमुद्यंतमुदयं प्राप्नुवंतं त्वा त्वां ज्योक् चिरं जीवा जीवंतो वयं प्रति पश्येम ॥

॥ अथाष्टमी ॥

महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वंतं चक्षुषेचक्षुषे मयः ।
आरोहंतं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ॥ ८ ॥
महि । ज्योतिः । बिभ्रतं । त्वा । विऽचक्षण । भास्वंतं । चक्षुषेऽचक्षुषे । मयः ।
आऽरोहंतं । बृहतः । पाजसः । परि । वयं । जीवाः । प्रति । पश्येम । सूर्य ॥ ८ ॥

हे विचक्षण विद्रष्टः सूर्य महि महज्ज्योतिस्तेजो बिभ्रतं धारयंतं भास्वंतं दीप्तिमंतं चक्षुषे चक्षुषे सर्वेषां द्रष्टॄणां चक्षुषे मयः सुखकरं बृहतो महतः पाजसो बलवतः परि । महतो बलवतः समुद्रस्योदकस्योपरीत्यर्थः । आरोहंतं त्वा त्वां जीवाश्चिरं जीवंतो वयं प्रति प्रतिदिनं पश्येम ॥

॥ अथ नवमी ॥

यस्य॑ ते॒ विश्वा॒ भुव॑नानि के॒तुना॒ प्र चेर॑ते॒ नि च॑ वि॒शन्ते॑ अ॒क्तुभिः॑ ।
अ॒ना॒गा॒स्त्वेन॑ हरिकेश सूर्याह्नाह्ना नो॒ वस्य॑सावस्यसोदि॑हि ॥९॥

यस्य॑ । ते॒ । विश्वा॑ । भुव॑नानि । के॒तुना॑ । प्र । च॒ । ईर॑ते । नि । च॒ । वि॒शन्ते॑ । अ॒क्तुऽभिः॑ ।
अ॒ना॒गाः॒ऽत्वेन॑ । ह॒रि॒ऽके॒श॒ । सूर्य॑ । अह्नाऽअह्ना । नः॒ । वस्य॑साऽवस्यसा । उत् । इ॒हि॒ ॥९॥

हे हरिकेश हरितवर्णकेश सूर्य यस्य ते तव केतुना प्रज्ञानेन विश्वा विश्वानि भुवनानि भूतजातानि प्र चेरते प्रकर्षेण गच्छंत्यक्तुभी रात्रिभिर्नि विशंते च विश्राम्यंति च । स्वपंतीत्यर्थः । स त्वं नोऽस्माकमनागास्त्वेनापराधवर्जितत्वेन वस्यसा वस्यसात्यंतश्रेयस्करेण वसुमत्तरेण वाह्नाह्ना तेन तेन दिवसेनोदिहि । उद्गच्छ ॥

॥ अथ दशमी ॥

शं नो॑ भव॒ चक्ष॑सा॒ शं नो॒ अह्ना॒ शं भा॒नुना॒ शं हि॒मा शं घृ॒णेन॑ ।
यथा॒ शमध्व॒ञ्छमस॑द्दुरो॒णे तत्सू॑र्य॒ द्रवि॑णं धेहि चि॒त्रं ॥१०॥

शं । नः॒ । भ॒व॒ । चक्ष॑सा । शं । नः॒ । अह्ना॑ । शं । भा॒नुना॑ । शं । हि॒मा । शं । घृ॒णेन॑ ।
यथा॑ । शं । अध्व॑न् । शं । अस॑त् । दु॒रो॒णे । तत् । सू॒र्य॒ । द्रवि॑णं । धे॒हि॒ । चि॒त्रं ॥१०॥

हे सूर्य त्वं चक्षसा तेजसा नोऽस्माकं शं सुखकरो भव । अह्ना दिवसेन च शं सुखकरो नोऽस्माकं भव । भानुना रश्मिना च शं भव । अस्माकं सुखकरो भव । हिमा शैत्येन च शं भव । घृणेनौष्ण्येन च शंकरो भव । यथा यादृशेन नोऽस्माकमध्वन्नध्वनि मार्गे शं भवति दुरोणे गृहे च शं सुखमसद्भवति तच्चित्रं पूजनीयं द्रविणं धनं धेहि । अस्मभ्यं प्रयच्छ ॥

॥ अथैकादशी ॥

अ॒स्माकं॑ देवा उ॒भया॑य॒ जन्म॑ने॒ शर्म॑ यच्छत द्वि॒पदे॒ चतु॑ष्पदे ।
अ॒दत्पिब॑दू॒र्जय॑मान॒माशि॑तं॒ तद॒स्मे शं योर॑र॒पो द॑धातन ॥११॥

अ॒स्माकं॑ । दे॒वाः॒ । उ॒भया॑य । जन्म॑ने । शर्म॑ । य॒च्छ॒त॒ । द्वि॒ऽपदे॑ । चतुः॑ऽपदे ।
अ॒दत् । पिब॑त् । ऊ॒र्जय॑मानं । आशि॑तं । तत् । अ॒स्मे इति॑ । शं । योः । अ॒र॒पः । द॒धा॒त॒न॒ ॥११॥

हे देवाः सूर्येणाभ्यनुज्ञाता यूयमस्माकं द्विपदे मनुष्यात्मकाय चतुष्पदे पश्वात्मकाय चोभयायोभयविधाय जन्मने भूतजाताय शर्म सुखं यच्छत। दत्त। किंच। यथास्मत्पुत्रादिकमदन्नक्षणीयं भक्षयत् पिबत्पानीयं पिबच्चोर्जयमानं बलवंतमिवात्मानमाचरच्चाशितं सुहितं च भवति तथा शं रोगशांतिनिमित्तकं सुखं योर्विषययोगजनितं सुखं चारपोऽपापं च दधातन। प्रयच्छत ॥

॥ अथ द्वादशी ॥

यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनं।

अरावा यो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो नि धेतन ॥१२॥

यत्। वः। देवाः। चकृम। जिह्वया। गुरु। मनसः। वा। प्रऽयुती। देवऽहेळनं।

अरावा। यः। नः। अभि। दुच्छुनऽयते। तस्मिन्। तत्। एनः। वसवः। नि। धेतन ॥१२॥

हे वसवो वासयितारो देवा वो युष्माकं वयं जिह्वया वाचा मनसः प्रयुती प्रयुत्या प्रयोगेण गुरु महद्देवहेळनं देवक्रोधनं च यदेनश्चकृमाकार्ष्म योऽस्मच्छत्रुर्नोऽस्मानभि प्रत्यरावा गमनवान्भूत्वा दुच्छुनायते पापान्याचरत्यस्मानुद्वेजयति वा तस्मिन्नस्मच्छत्रौ तदेनोऽस्माभिः कृतं पापं नि धेतन। सूर्यस्याज्ञया विधत्त। स्थापयतेत्यर्थः ॥

॥ इति सप्तमस्याष्टमे त्रयोदशो वर्गः ॥

अस्मिन्न इति पंचर्चं नवमं सूक्तं जागतमैंद्रं। मुष्कविशिष्ट इंद्राख्य ऋषिः। तथा चानुक्रांतं। अस्मिन्नः पंच मुष्कवानिंद्र इति ॥ गतो विनियोगः ॥ अपरे तु तांडवाशाट्यायनका अस्य सूक्तस्य मुष्कवानिंद्रो देवता लुश ऋषिरिति वर्णयंति ॥

॥ तत्र प्रथमा ॥

अस्मिन्न इंद्र पृत्सुतौ यशस्वति शिमीवति क्रंदसि प्राव सातये।

यत्र गोषाता धृषितेषु खादिषु विष्वक्पतंति दिद्यवो नृषाह्ये ॥१॥

अस्मिन्। नः। इंद्र। पृत्सुतौ। यशस्वति। शिमीऽवति। क्रंदसि। प्र। अव। सातये।

यत्र। गोऽसाता। धृषितेषु। खादिषु। विष्वक्। पतंति। दिद्यवः। नृऽसह्ये ॥१॥

हे इंद्र त्वं यशस्वति कीर्तिमति शिमीवति परस्परप्रहारलक्षणकर्मवत्यस्मिन्नु-

पस्थिते पृत्सुतौ संग्रामे क्रंदसि । सिंहनादं करोषि । सातये धनलाभाय प्राव नोऽस्मान्प्ररक्षसि च । कस्मिन्नित्यत्राह । यत्र यस्मिन्गोषाता गोसातौ लब्धपशुके नृषाह्ये नृणामभिभावुके च संग्रामे खादिषु परस्परखादकेषु च योद्धृषु धृषितेषु धृष्टेषु सत्सु दिद्यव आयुधानि विष्वक् सर्वतः पतंति ॥

॥ अथ द्वितीया ॥

स नः क्षुमंतं सदने व्यूर्णुहि गोअर्णसं रयिमिंद्र श्रवाय्यं ।
स्याम ते जयतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि ॥२॥

सः । नः । क्षुऽमंतं । सदने । वि । ऊर्णुहि । गोऽअर्णसं । रयिं । इंद्र । श्रवाय्यं ।
स्याम । ते । जयतः । शक्र । मेदिनः । यथा । वयं । उश्मसि । तत् । वसो इति । कृधि ॥२॥

हे इंद्र स सर्वानुग्राहकत्वेन प्रसिद्धस्त्वं नोऽस्माकं सदने गृहे क्षुमंतमन्नवंतं शब्दवंतं वा गोअर्णसं । गावोऽर्ण उदकमिव प्रवृद्धा यस्मिन् । तं श्रवाय्यं श्रवणीयं रयिं धनं व्यूर्णुहि । विविधमाच्छादय । किंच । हे वसो वासक शक्रेंद्र जयतः शत्रुं ते तव प्रसादाद्वयं मेदिनो मेदसा युक्ता बलवंतः स्याम । भवेम । किं बहूक्त्या । यथा यद्वयमुश्मसि कामयामहे तत्सर्वं कृधि । कुरु ॥

॥ अथ तृतीया ॥

यो नो दास आर्यो वा पुरुष्टुतादेव इंद्र युधये चिकेतति ।
अस्माभिष्टे सुषहाः संतु शत्रवस्त्वया वयं तान्वनुयाम संगमे ॥३॥

यः । नः । दासः । आर्यः । वा । पुरुऽस्तुत । अदेवः । इंद्र । युधये । चिकेतति ।
अस्माभिः । ते । सुऽसहाः । संतु । शत्रवः । त्वया । वयं । तान् । वनुयाम । संऽगमे ॥३॥

हे पुरुष्टुत बहुस्तुतेंद्र यो दासः कर्मकरः शूद्र आर्यस्त्रैवर्णिकोऽदेवो देवादन्योऽसुरो वा नोऽस्मान्युधये युद्धाय चिकेतति जानाति ते सर्वे शत्रवोऽस्मदरयस्ते तव प्रसादादस्माभिः सुसहाः स्वभिभवाः संतु । भवंतु । किंच । वयं त्वया सहायेन ताञ्शत्रून्संगमे संग्रामे वनुयाम । हन्याम ॥

॥ अथ चतुर्थी ॥

यो दभ्रेभिर्हव्यो यश्च भूरिभिर्यो अभीके वरिवोविन्नृषाह्ये ।
तं विखादे सस्निमद्य श्रुतं नरमर्वाचमिंद्रमवसे करामहे ॥४॥

यः। दभ्रेभिः। हव्यः। यः। च। भूरिऽभिः। यः। अभीके। वरिवःऽवित्। नृऽसह्ये।
तं। विऽखादे। सस्निं। अद्य। श्रुतं। नरं। अर्वाचं। इंद्रं। अवसे। करामहे ॥४॥

नृसह्ये नृणामभिभावुके विखादे विशेषेण भक्षकेऽभीके संग्रामे वरिवोविद्धनस्य लंभको य इंद्रो दभ्रेभिः स्वल्पैर्हव्यो ह्वातव्यो यश्च भूरिभिर्बहुभिर्हव्यस्तं सस्निं शुचिं श्रुतं सर्वत्र विख्यातं नरं नेतारमिंद्रमद्यास्मिन्नहन्यवसेऽस्मद्रक्षणायार्वाचमस्मदभिमुखं करामहे। कुर्मः ॥

॥ अथ पंचमी ॥

स्ववृजं हि त्वामहमिंद्र शुश्रवानानुदं वृषभ रध्रचोदनं।
प्र मुंचस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बद्ध आसते ॥५॥

स्वऽवृजं। हि। त्वां। अहं। इंद्र। शुश्रव। अननुऽदं। वृषभ। रध्रऽचोदनं।
प्र। मुंचस्व। परि। कुत्सात्। इह। आ। गहि। किं। ऊं इति। त्वाऽवान्। मुष्कयोः।
बद्धः। आसते ॥५॥

हे वृषभ कामानां वर्षकेंद्र स्ववृजं स्वयमेव छेत्तारमननुदमनपेक्षितबलानुप्रदानं रध्रचोदनं राधकस्य चोदकं प्रेरकं त्वामहं लुशः शुश्रवाश्रौषं हि यस्मात्तस्मात्प्र मुंचस्व। कुत्सेन वार्ध्रिशतेनांडयोर्बद्धमात्मानं बंधनाद्विमुंच। अथ परि सर्वतः परिवृतस्त्वं कुत्सात्कुत्साख्यादृषेरिहास्मद्याग आ गहि। आगच्छ। किमु त्वावान्त्वत्सदृशोऽन्यः कश्चिन्मुष्कयोर्बद्ध आसते। न कोऽप्येतादृशो निर्लज्जस्त्वत्तोऽन्योऽस्तीत्यभिप्रायः। तत्र शाट्यायनकं। कुत्सश्च लुशश्चेंद्रं व्यह्वयेतां। स कुत्सस्याहवमागच्छत् तं शतेन वार्ध्रीभिरांडयोरबध्नात्तं लुशोऽभ्यवदत् स्ववृजं हि त्वामहमिंद्र शुश्रवानानुदं वृषभं रध्रचोदनं प्र मुंचस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बद्ध आसत इति ताः सर्वाः संलुप्य लुशमभि प्रादुद्रवदिति। छंदोगब्राह्मणमपि कुत्सश्च लुशश्च युगपदिंद्रमाहूतवंतौ स्वं स्वं यज्ञं प्रत्यंगभावाय सखित्वादिंद्रः कुत्सं प्रति जगाम। तं तु गतं वशित्वात्कुत्सो वार्ध्रीशतेनांडयोरबध्नादिति ॥

॥ इति सप्तमस्याष्टमे चतुर्दशो वर्गः ॥

यो वामिति चतुर्दशर्चं दशमं सूक्तं। कक्षीवतो दुहिता घोषा नाम ब्रह्मवादिन्यृषिः। अंत्या त्रिष्टुप्। शिष्टा जगत्यः। अश्विनौ देवता। तथा चानुक्रांतं।

यो वां षळूना काक्षीवती घोषाश्विनं हि त्रिष्टुबंतमिति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्जागते छंदसीदमादीनि त्रीणि सूक्तानि । सूचितं च । यो वां परिज्मेति त्रीणि त्रिश्विनो अद्य । आ० ४.१५. । इति ॥

॥ तत्र प्रथमा ॥

यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता ।
शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे ॥१॥

यः । वां । परिऽज्मा । सुऽवृत् । अश्विना । रथः । दोषां । उषसः । हव्यः । हविष्मता ।
शश्वत्ऽतमासः । तं । ऊं इति । वां । इदं । वयं । पितुः । न । नाम । सुऽहवं । हवामहे ॥१॥

हे अश्विनाश्विनौ वां युवयोः परिज्मा परितो गंता सुवृत्सुष्ठु वर्तमानो यो रथो दोषां रात्रिमुषसश्च । अहोरात्रयोरित्यर्थः । हविष्मता यजमानेन हव्यो ह्वातव्यो वां युवयोः स्वभूतं सुहवं शोभनाह्वानं तमु तमेव रथं शश्वत्तमासोऽतिशयेन चिरंतना वयं पितुर्न यथा पितुरिदं नाम तथा हवामहे । ह्वयामः ॥

॥ अथ द्वितीया ॥

चोदयतं सूनृताः पिन्वतं धिय उत्पुरंधीरीरयतं तदुश्मसि ।
यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतं ॥२॥

चोदयतं । सूनृताः । पिन्वतं । धियः । उत् । पुरंऽधीः । ईरयतं । तत् । उश्मसि ।
यशसं । भागं । कृणुतं । नः । अश्विना । सोमं । न । चारुं । मघवत्ऽसु । नः । कृतं ॥२॥

हे अश्विनाश्विनौ युवां सूनृता वाच उषसो वा चोदयतं । प्रेरयतं । अस्माकं धियः कर्माणि च पिन्वतं । पूरयतं । पुरंधीर्बह्वीः प्रज्ञाश्चोदीरयतं । उद्गमयतं । प्रेरयतं । उत्पादयतमित्यर्थः । तदेतत्त्वयमुश्मसि । वयं कामयामहे । किंच नोऽस्माकं यशसं यशस्विनं भागं भजनीयं धनादिकं कृणुतं । कुरुतं । चारुं कल्याणं सोमं न सोममिव नोऽस्मान्मघवत्सु धनवत्सु कृतं । कुरुतं ॥

॥ अथ तृतीया ॥

अमाजुरश्चिद्भवथो युवं भगोऽनाशोश्चिदवितारापमस्य चित् ।
अंधस्य चिन्नासत्या कृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित् ॥३॥

अमाऽजुरः। चित्। भवथः। युवं। भगः। अनाशोः। चित्। अवितारा। अपमस्य।
चित्।
अंधस्य। चित्। नासत्या। कृशस्य। चित्। युवां। इत्। आहुः। भिषजा। रुतस्य। चित्॥३॥

हे नासत्या नासत्यौ युवं युवाममाजुरश्चित्पितृगृहे जूर्यंत्या अपि दुर्भगाया घोषाया भगो भवथः शोभनरूपेणात्मानं परिणमय्य पतिं दत्तवंतौ स्थ इत्यर्थः। तथा च निगमांतरं। घोषायै चित्पितृषदे दुरोणे पतिं जूर्यंत्या अश्विनावदत्तं। ऋग्वे० १.११७.७.। इति। अनाशोश्चिदनशनस्याप्यवितारा रक्षितारौ युवां भवथः। अपमस्य चिज्जात्यातिनिकृष्टस्यापि रक्षितारौ भवथः। अंधस्य चिच्चक्षुर्विकलस्यापि रक्षितारौ भवथः। कृशस्य चिद्दुर्बलस्यापि रक्षितारौ भवथः। किंच। युवामिद्युवामेव रुतस्य चिद्यज्ञस्यापि भिषजौ वैद्यावाहुर्विद्वांसः॥

॥ अथ चतुर्थी ॥

युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः।
निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या॥४॥
युवं। च्यवानं। सनयं। यथा। रथं। पुनः। युवानं। चरथाय। तक्षथुः।
निः। तौग्र्यं। ऊहथुः। अत्ऽभ्यः। परि। विश्वा। इत्। ता। वां। सवनेषु। प्रऽवाच्या॥४॥

हे अश्विनौ युवं युवां सनयं पुराणं च्यवानमृषिं यथा रथं जीर्णं रथमिव पुनर्युवानं तरुणं चरथाय चरणार्थं तक्षथुः। ततक्षथुः। अकुरुतमित्यर्थः। तथा च यास्कः। युवं च्यवानं सनयं पुराणं यथा रथं पुनर्युवानं चरणाय ततक्षथुर्युवा प्रयौति कर्माणि तक्षतिः करोतिकर्मा। नि० ४.१९.। इति। किंच युवां तौग्र्यं तुग्रपुत्रं भुज्युमद्भ्यः परि समुद्रस्योपरि निरूहथुः। किंच। वां युवयोर्विश्वा विश्वानि ता तानि कर्माणि सवनेषु यज्ञेषु प्रवाच्या प्रवाच्यानि प्रकर्षेण वक्तव्यानि॥

॥ अथ पंचमी ॥

पुराणा वां वीर्या३ प्र ब्रवा जनेऽथो हासथुर्भिषजा मयोभुवा।
ता वां नु नव्याववसे करामहेऽयं नासत्या श्रदरिर्यथा दधत्॥५॥
पुराणा। वां। वीर्या। प्र। ब्रव। जने। अथो इति। ह। आसथुः। भिषजा। मयःऽभुवा।
ता। वां। नु। नव्यौ। अवसे। करामहे। अयं। नासत्या। श्रत्। अरिः। यथा। दधत्॥५॥

हे अश्विनौ वां युवयोः पुराणा पुराणानि वीर्याणि जने लोके प्र ब्रव। प्रब्रवीमि। अथो अपि च हे नासत्या नासत्यौ युवां मयोभुवा सुखस्य भावयितारौ भिषजा भिषजौ वैद्यावासथुः। बभूवथुः। ता तौ युवामवसे रक्षणाय नव्यौ स्तुत्यौ करामहे। कुर्मः। अयमरिर्गता पतिर्यजमानो यथा श्रद्धधत्। श्रद्धध्यादिति॥

॥ इति सप्तमस्याष्टमे पंचदशो वर्गः॥

॥ अथ षष्ठी॥

इयं वामह्वे शृणुतं मे अश्विना पुत्रायेव पितरा मह्यं शिक्षतं।
अनापिरज्ञा असजात्यामतिः पुरा तस्या अभिशस्तेरव स्पृतं॥६॥
इयं। वां। अह्वे। शृणुतं। मे। अश्विना। पुत्रायऽइव। पितरा। मह्यं। शिक्षतं।
अनापिः। अज्ञाः। असजात्या। अमतिः। पुरा। तस्याः। अभिऽशस्तेः। अव। स्पृतं॥६॥

हे अश्विनाश्विनौ वां युवामियं घोषाहमह्वे। आह्वयामि। मे मम संबंधिनमिममाह्वानं शृणुतं। श्रुत्वा चाह्वानं मह्यं पुत्रायेव यथा पुत्राय पितरा मातापितरौ तद्वच्छिक्षतं। धनं दत्तं। अनापिरबंधुरज्ञा अकृतज्ञा असजात्यामतिरश्रद्धेया चाभिशस्तिर्मामागच्छति। तस्या अभिशस्तेः पुरा प्रागेवाव स्पृतं। मामवपारयतं॥

॥ अथ सप्तमी॥

युवं रथेन विमदाय शुंध्युवं न्यूहथुः पुरुमित्रस्य योषणां।
युवं हवं वध्रिमत्या अगच्छतं युवं सुषुतिं चक्रथुः पुरंधये॥७॥
युवं। रथेन। विऽमदाय। शुंध्युवं। नि। ऊहथुः। पुरुऽमित्रस्य। योषणां।
युवं। हवं। वध्रिऽमत्याः। अगच्छतं। युवं। सुऽसुतिं। चक्रथुः। पुरंऽधये॥७॥

हे अश्विनौ युवं युवां पुरुमित्रस्य पुरुमित्रनामधेयस्य योषणां दुहितरं शुंध्युवं नाम जायां विमदाय विमदनामधेयायर्षये रथेन स्वसेनापरिवृतेन रथेन न्यूहथुः। प्रापयतं। विमदस्य गृहं नीतवंतौ स्थ इत्यर्थः। तथा च निगमांतरं। यावभगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन। ऋग्वे० १.११६.१.। इति। किंच। युवं युवां वध्रिमत्याः संग्रामे शत्रुभिश्छिन्नहस्ताया हवमाह्वानमगच्छतं। आगत्य च तस्यै हिरण्मयं हस्तं प्रायच्छतं। तथा च निगमांतरं। अजोहवीन्ना-

सत्या करा वां महे यामन्पुरुभुजा पुरंधिः श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तं । ऋग्वे० १.११६.१३. । इति । किंच । युवं युवां पुरंधये बहुप्रज्ञायै वध्रिमत्यै सुषुतिं सुप्रसवं शोभनमैश्वर्यं वा चक्रथुः । कृतवंतौ स्थः ॥

॥ अथाष्टमी ॥

युवं विप्रस्य जरणामुपेयुषः पुनः कलेरकृणुतं युवद्वयः ।

युवं वंदनमृश्यदादुदूपथुर्युवं सद्यो विश्पलामेतवे कृथः ॥ ८ ॥

युवं । विप्रस्य । जरणां । उपऽईयुषः । पुनरिति । कलेः । अकृणुतं । युवत् । वयः ।

युवं । वंदनं । ऋश्यऽदात् । उत् । ऊपथुः । युवं । सद्यः । विश्पलां । एतवे । कृथः ॥ ८ ॥

हे अश्विनौ युवं युवां विप्रस्य मेधाविनो जरणां जरामुपेयुष उपगतवतः कलेः कलिनामधेयस्यर्षेर्वयः पुनरपि युवद्युवत्वयुक्तमकृणुतं । अकुरुतं । तथा च निगमांतरं । कलिं याभिर्वित्तजानिं दुवस्यथः । ऋग्वे० १.११२.१५. । इति । किंच । युवं युवां वंदनं जायावियोगसंतापेन कूपपतितं वंदनाख्यमृषिमृश्यदात्कूपादुदूपथुः । उदैरयतं । तथा निगमांतरं । उद्वंदनमैरयतं स्वर्दृशे । ऋग्वे० १.११२.५. । इति । किंच । युवं युवां विश्पलां । खेलस्य राज्ञः सेनायां योद्ध्री विश्पला नाम काचित् स्त्री । तां संग्रामे शत्रुभिश्छिन्नजंघां सद्यस्तदैवैतवे गमनाय कृथः । अकुरुतं । तथा च निगमांतरं । चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायां । सद्यो जंघामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तं । ऋग्वे० १.११६.१५. । इति ॥

॥ अथ नवमी ॥

युवं ह रेभं वृषणा गुहा हितमुदैरयतं ममृवांसमश्विना ।

युवमृबीसमुत तप्तमत्रय ओमन्वंतं चक्रथुः सप्तवध्रये ॥ ९ ॥

युवं । ह । रेभं । वृषणा । गुहा । हितं । उत् । ऐरयतं । ममृऽवांसं । अश्विना ।

युवं । ऋबीसं । उत । तप्तं । अत्रये । ओमन्ऽवंतं । चक्रथुः । सप्तऽवध्रये ॥ ९ ॥

हे वृषणा वर्षितारावश्विनाश्विनौ युवं युवां गुहा गुहायां हितमसुरैर्निहितं ममृवांसं म्रियमाणं रेभं रेभाख्यमृषिमुदैरयतं । उत्तारितवंतौ स्थः । तथा च निगमांतरं । दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वंतः । विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण । ऋग्वे० १.११६.२४. । इति । उत

किंच युवं युवां तप्तमृबीसमग्निकुंडमत्रयेऽत्रेरर्थायोमन्वंतमवनवंतं चक्रथुः । वृष्ट्या निशमय्य शीतं कृतवंतौ स्थ इत्यर्थः । तथा च निगमांतरं । हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तं । ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति । ऋग्वे० १.११६.८. । इति । किंच । युवां सप्तवध्रयेऽश्वमेधेन राज्ञा केनचिदपराधेन काष्ठमयमंजूषायां निहितस्य सप्तवध्रिनामधेयस्यर्षेरर्थाय चक्रथुः । मंजूषोद्घाटनं कृतवंतौ स्थ इत्यर्थः । तथा च निगमांतरं । वि जिहीष्व वनस्पते योनिः सूष्यंत्या इव । श्रुतं मे अश्विना हवं सप्तवध्रिं च मुंचतं । ऋग्वे० ५.७८.५. । इति ॥

॥ अथ दशमी ॥

युवं श्वेतं पेदवेऽश्विनाश्वं नवभिर्वाजैर्नवती च वाजिनं ।
चर्कृत्यं ददथुर्द्रावयत्सखं भगं न नृभ्यो हव्यं मयोभुवं ॥१०॥

युवं । श्वेतं । पेदवे । अश्विना । अश्वं । नवऽभिः । वाजैः । नवती । च । वाजिनं ।
चर्कृत्यं । ददथुः । द्रवयत्ऽसखं । भगं । न । नृऽभ्यः । हव्यं । मयःऽभुवं ॥१०॥

हे अश्विनाश्विनौ युवं युवां पेदवे पेदुनामधेयाय राज्ञे श्वेतं श्वेतवर्णं वाजिनं बलिनं नवभिर्नवती नवत्याश्वैः सहितं चर्कृत्यं संग्रामाणामत्यर्थं कर्तारं शत्रूणां जेतारं वा द्रवयत्सखं शत्रुसखीनां द्रावयितारं हव्यं ह्वातव्यं मयोभुवं सुखस्य भावयितारमश्वं नृभ्यो मनुष्येभ्यो भगं न भजनीयं धनमिव ददथुः । प्रायच्छतं ॥

॥ इति सप्तमस्याष्टमे षोडशो वर्गः ॥

॥ अथैकादशी ॥

न तं राजानावदिते कुतश्चन नांहो अश्नोति दुरितं नकिर्भयं ।
यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्न्या सह ॥११॥

न । तं । राजानौ । अदिते । कुतः । चन । न । अंहः । अश्नोति । दुःऽइतं । नकिः । भयं ।
यं । अश्विना । सुऽहवा । रुद्रवर्तनी इति रुद्रऽवर्तनी । पुरःऽरथं । कृणुथः । पत्न्या ।
सह ॥११॥

हे राजानावीश्वरावदिते अदीनौ सुहवौ स्वाह्वानौ रुद्रवर्तनी स्तोत्रयुक्तमार्गौ हे अश्विनाश्विनौ युवां यं जनं पुरोरथमग्रतोरथं पत्न्या सह स्वयंवरे कृणुथः

कुत्थस्तं जनं कुतश्चन कुतोऽप्यंहः पापं नाश्नोति । न व्याप्नोति । दुरितं दुर्गतिरपि नाश्नोति । नकिर्न च भयं संसारभयं न प्राप्नोति ॥

॥ अथ द्वादशी ॥

आ तेन॑ यातं॒ मन॑सो॒ जवी॑यसा॒ रथं॒ यं वा॑मृ॒भव॑श्च॒क्रुर॑श्विना ।
यस्य॒ योगे॑ दुहि॒ता जाय॑ते दि॒व उ॒भे अह॑नी सु॒दिने॒ वि॒वस्व॑तः ॥१२॥

आ । तेन॑ । या॒तं॒ । मन॑सः । जवी॑यसा । रथं॑ । यं । वा॒ं । ऋ॒भवः॑ । च॒क्रुः । अ॒श्वि॒ना॒ ।
यस्य॑ । योगे॑ । दु॒हि॒ता । जाय॑ते । दि॒वः । उ॒भे इति॑ । अह॑नी॒ इति॑ । सु॒दि॒ने॒ इति॑ सु॒ऽदि॒ने॑ ।
वि॒वस्व॑तः ॥१२॥

हे अश्विनाश्विनौ वां युवयोर्यं रथमृभवश्चक्रुरकार्षुः यस्य रथस्य योगे संबंधे सति दिवो दुहितोषा जायते प्रादुर्भवति यस्य च योगे विवस्वतो भास्करादुभे अहनी अहोरात्रे सुदिने शोभने जायेते तेन रथेन मनसोऽपि जवीयसा वेगवत्तरेण यातं । युवामागच्छतं ॥

॥ अथ त्रयोदशी ॥

ता व॒र्तिर्या॑तं ज॒युषा॒ वि पर्व॑तमपि॑न्वतं श॒यवे॑ धे॒नुम॑श्विना ।
वृक॑स्य चि॒द्वर्ति॑कामं॒तरा॒स्या॑द्यु॒वं शची॑भिर्ग्रसि॒ताम॑मुंचतं ॥१३॥

ता । व॒र्तिः । या॒तं॒ । ज॒युषा॑ । वि । पर्व॑तं । अपि॑न्वतं । श॒यवे॑ । धे॒नुं । अ॒श्वि॒ना॒ ।
वृक॑स्य । चि॒त् । वर्ति॑कां । अं॒तः । आ॒स्या॑त् । यु॒वं । शची॑भिः । ग्र॒सि॒तां । अ॒मुं॒च॒तं॒ ॥१३॥

हे अश्विनाश्विनौ ता तौ युवां जयुषा जयशीलेन रथेन पर्वतमद्रिं प्रति वर्तिर्मार्गं वि यातं । विविधं गच्छथः । तथा च निगमांतरं । वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः । ऋग्वे० ६.६२.७. । इति । किंच । युवां शयवे शयोरर्थाय धेनुमपिन्वतं । निवृत्तप्रसवां वृद्धां गां प्रभूतस्य पयसो दोग्ध्रीं कृतवंतौ स्थ इत्यर्थः । तथा च निगमांतरं । युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय । ऋग्वे० १.११८.८. । इति । किंच । युवं युवां वृकस्यांतरनुप्रविष्टां ग्रसितां वृकेण ग्रस्तां वर्तिकां । वर्तिका नाम चटका । तामास्याद्वृकस्य मुखाच्छचीभिः प्रज्ञाभिः कर्मभिर्वामुंचतं । अमोचयतं । तथा च निगमांतरं । अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुंचतं वृकस्य । ऋग्वे० १.११७.१६. । इति ॥

॥ अथ चतुर्दशी ॥

एतं वां स्तोममश्विनावकर्मातक्षाम भृगवो न रथं ।
न्यमृक्षाम योषणां न मर्ये नित्यं न सूनुं तनयं दधानाः ॥१४॥
एतं । वां । स्तोमं । अश्विनौ । अकर्म । अतक्षाम । भृगवः । न । रथं ।
नि । अमृक्षाम । योषणां । न । मर्ये । नित्यं । न । सूनुं । तनयं । दधानाः ॥१४॥

हे अश्विनाश्विनौ ततो वां युवयोरेतं यथोक्तं स्तोमं स्तोत्रमकर्म । अकुर्म । तदेवाह । भृगवो न भृगव इव रथमतक्षाम । वयं स्तोत्रं संस्कृतवंतः । कर्मयोगाद्द्भवो भृगव उच्यंते । अथवा रथकारा भृगवः । किंच । वयं नित्यं शाश्वतं तनयं यागादीनां कर्मणां तनितारं सूनुं नौरसं पुत्रमिव स्तोमं दधाना धारयंतो मर्ये मनुष्ये न्यमृक्षाम । युवयोः स्तुतिं नितरां संस्कृतवंतः । तत्र दृष्टांतः । योषणां न । यथा जायां तद्वदित्यर्थः ॥

॥ इति सप्तमस्याष्टमे सप्तदशो वर्गः ॥

रथं यांतमिति चतुर्दशर्चमेकादशं सूक्तं । काक्षीवत्या घोषाया आर्षं । जागतमाश्विनं । रथं यांतमित्यनुक्रांतं । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

रथं यांतं कुह को ह वां नरा प्रति द्युमंतं सुविताय भूषति ।
प्रातर्यावाणं विभ्वं विशेविशे वस्तोर्वस्तोर्वहमानं धिया शमि ॥१॥
रथं । यांतं । कुह । कः । ह । वां । नरा । प्रति । द्युऽमंतं । सुविताय । भूषति ।
प्रातःऽयावानं । विऽभ्वं । विशेऽविशे । वस्तोःऽवस्तोः । वहमानं । धिया । शमि ॥१॥

हे नरा कर्मणां नेतारावश्विनौ वां युवयोः संबंधिनं द्युमंतं दीप्तिमंतं प्रातर्यावाणं यज्ञं प्रति प्रातःकाले गंतारं विभ्वं विभुं व्यापिनं विशे विशे सर्वेषु मनुष्येषु वस्तोर्वस्तोरन्वहं वहमानं धनं प्रापयंतं यांतं गच्छंतं रथं कुह कस्मिन्देशे को ह कः खलु यजमानः शमि यज्ञरूपे कर्मणि धिया स्तुतिरूपेण कर्मणा सुवितायाभ्युदयार्थं प्रति भूषति । अलंकरोति । कस्मिन्देशे यज्ञे कोऽन्यो यजमानो युवां स्तुतिभिर्हविर्भिश्च पूजितवान् येनास्मद्यज्ञं प्रति विलंबेनागतवंतौ स्थ इत्यभिप्रायः ॥

॥ अथ द्वितीया ॥

कुहं स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः ।
को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥२॥

कुहं । स्वित् । दोषा । कुहं । वस्तोः । अश्विना । कुहं । अभिऽपित्वं । करतः । कुहं । ऊषतुः ।
कः । वां । शयुऽत्रा । विधवाऽइव । देवरं । मर्यं । न । योषा । कृणुते । सधऽस्थे । आ ॥२॥

हे अश्विनाश्विनौ कुह स्वित् क्व चिद्दोषा रात्रौ भवथ इति शेषः । कुह वस्तोः क्व वा दिवा भवथः । कुह क्व वाभिपित्वमभिप्राप्तिं करतः । कुरुथः । कुह क्व वोषथुः । वसथः । किंच । वां युवां को यजमानः सधस्थे सहस्थाने वेद्याख्य आ कृणुते । आकुरुते । परिचरणार्थमात्माभिमुखीकरोति । तत्र दृष्टांतौ दर्शयति । शयुत्रा शयने विधवेव । यथा मृतभर्तृका नारी देवरं भर्तृभ्रातरमभिमुखीकरोति । मर्यं न यथा च सर्वं मनुष्यं योषा सर्वा नारी संभोगकालेऽभिमुखीकरोति तद्वदित्यर्थः । तथा च यास्कः । क्व स्विद्रात्रौ भवथः क्व दिवा क्वाभिप्राप्तिं कुरुथः क्व वसथः । को वां शयने विधवेव देवरं देवरः कस्माद्द्वितीयो वर उच्यते विधवा विधातृका भवति विधवनाद्वा विधावनाद्वेति चर्मशिरा अपि वा धव इति मनुष्यनाम तद्वियोगाद्विधवा देवरो दीव्यतिकर्मा मर्यो मनुष्यो मरणधर्मा योषा यौतेराकुरुते सधस्थाने । नि० ३.१५. । इति ॥

॥ अथ तृतीया ॥

प्रातर्जरेथे जरणेव कापया वस्तोर्वस्तोर्यजता गच्छथो गृहं ।
कस्य ध्वस्रा भवथः कस्य वा नरा राजपुत्रेव सवनाव गच्छथः ॥३॥

प्रातः । जरेथे । जरणाऽइव । कापया । वस्तोःऽवस्तोः । यजता । गच्छथः । गृहं ।
कस्य । ध्वस्रा । भवथः । कस्य । वा । नरा । राजपुत्राऽइव । सवना । अव । गच्छथः ॥३॥

हे नरा नेतारावश्विनौ युवां प्रातः प्रातःकाले जरेथे । स्तोतृभिः स्तूयेथे । तत्र दृष्टांतः । जरणेव । यथा जरणावैश्वर्येण वृद्धौ राजानौ कापया । प्रातःप्रबोधकस्य बंदिनो वाणी कापा । तया स्तूयेते । तद्वदित्यर्थः । किंच । वस्तोर्वस्तोरन्वहं यजता यष्टव्यौ युवां गृहं यजमानस्य मंदिरं गच्छथः । प्राप्नुथः । तौ युवां कस्य यजमानसंबंधिनो दोषस्य ध्वस्रा ध्वंसकौ विनाशयितारौ भवथः ।

कस्य यजमानस्य सवना सवनानि राजपुत्रेव राजकुमाराविव युवामेव गच्छथः। प्राप्नुथः ॥

॥ अथ चतुर्थी ॥

युवां मृगेव वारणा मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे ।

युवं होत्रामृतुथा जुह्वते नरेषं जनाय वहथः शुभस्पती ॥४॥

युवां । मृगाऽइव । वारणा । मृगण्यवः । दोषा । वस्तोः । हविषा । नि । ह्वयामहे ।

युवं । होत्रां । ऋतुऽथा । जुह्वते । नरा । इषं । जनाय । वहथः । शुभः । पती इति ॥४॥

हे अश्विनौ युवं युवां वारणा वारणौ मृगेव यथा शार्दूलौ मृगण्यवो मृगयवस्तद्वद्वयं दोषा रात्रौ वस्तोरहनि च हविषा नि ह्वयामहे। नियमेन ह्वयामः। किंच। हे नरौ नेतारावश्विनौ युवं युवामृतुथा काले काले होत्रामाहुतिं जुह्वते। जुह्वति । यजमाना इति शेषः । किंच । युवां शुभः शुभस्य वृष्ट्युदकस्य पती । स्वामिनौ संतौ जनाय जनार्थमिषमन्नं वहथः । प्रापयथः ॥

॥ अथ पंचमी ॥

युवां ह घोषा पर्यश्विना यती राज्ञ ऊचे दुहिता पृच्छे वां नरा ।

भूतं मे अह्न उत भूतमक्तवेऽश्वावते रथिने शक्तमर्वते ॥५॥

युवां । ह । घोषा । परि । अश्विना । यती । राज्ञः । ऊचे । दुहिता । पृच्छे । वां । नरा ।

भूतं । मे । अह्ने । उत । भूतं । अक्तवे । अश्वऽवते । रथिने । शक्तं । अर्वते ॥५॥

हे नरा नेतारावश्विनौ युवां खलु परि परितो यती गच्छंती राज्ञो दीप्तस्य कक्षीवतो दुहिता पुत्री घोषा घोषाख्याहमूचे । संनिहितेभ्यो वृद्धेभ्य उक्तवत्यस्मि । किंच । वां युवां पृच्छे । वृद्धान्संनिहितान् कीदृशावश्विनाविति पृच्छामि । तथा सति मे ममाह्ने दिवसाय दिवसनिर्वर्त्यकर्मणे भूतं । भवतं । उतापि चाक्तवे रात्र्यै रात्रिनिर्वर्त्यकर्मणे भूतं । भवतं । तथाश्ववतेऽश्वयुक्ताय रथिने रथवते चार्वते भ्रातृव्याय शक्तं । निरसने शक्तौ भवतं ॥

॥ इति सप्तमस्याष्टमेऽष्टादशो वर्गः ॥

॥ अथ षष्ठी ॥

युवं कवी ष्ठः पर्यश्विना रथं विशो न कुत्सो जरितुर्नशायथः ।

युवोर्ह मक्षा पर्यश्विना मध्वासा भरत निष्कृतं न योषणा ॥६॥

युवं । कवी इति । स्थः । परि । अश्विना । रथं । विशः । न । कुत्सः । जरितुः । नशायथः ।
युवोः । ह । मक्षा । परि । अश्विना । मधु । आसा । भरत । निःऽकृतं । न । योषणा ॥६॥

हे अश्विनाश्विनौ कवी मेधाविनौ युवं युवां रथं परि स्थः । परितो भवथः । अथ जरितुः स्तोतुर्यज्ञं प्रति गमनाय नशायथः । रथं प्राप्नुथः । तत्र दृष्टांतः । कुत्सो न । यथा कुत्सश्चेंद्रश्च सरथमधितिष्ठतः । तथा च मंत्रांतरं । यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः । ऋग्वे॰ ४.१६.११. । इति । किंच हे अश्विनाश्विनौ युवोर्ह युवयोः खलु स्वभूतं मधु मक्षा मक्षिकास्येन परि भरत । बिभर्ति । तत्र दृष्टांतः । निष्कृतं न । यथा निष्कृतं संस्कृतं मधु योषणा नारी । तद्वदित्यर्थः । तथा च मंत्रांतरं । उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति । ऋग्वे॰ १. ११९.९. । इति ॥

॥ अथ सप्तमी ॥

युवं ह भुज्युं युवमश्विना वशं युवं शिंजारमुशनामुपारथुः ।
युवो ररावा परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥७॥

युवं । ह । भुज्युं । युवं । अश्विना । वशं । युवं । शिंजारं । उशनां । उप । आरथुः ।
युवोः । ररावा । परि । सख्यं । आसते । युवोः । अहं । अवसा । सुम्नं । आ । चके ॥७॥

हे अश्विनाश्विनौ युवं ह युवां खलु भुज्युं समुद्रमध्ये विपन्ननावं तुग्रपुत्रं भुज्युमुपारथुः । उत्तारयितुमुपगतवंतौ भवथः । किंच । युवं युवां वशं हस्तिबलेन शत्रुभिः पराजयमानं वशनामधेयं राजानं रक्षणायोपारथुः । किंच । युवं युवां शिंजारमत्रिमग्निकूटादुत्तारयितुमुशनां कमनीयां स्तुतिं च श्रोतुमुपारथुः । तथा च मंत्रांतरं । अत्रिं शिंजारमश्विना । ऋग्वे॰ ८.५.२५. । इति । किंच । युवोर्युवयोः सख्यं मित्रत्वं ररावा हविषां प्रदाता यजमानो पर्यासते । पर्यास्ते । वचनव्यत्ययः । किंच । युवोर्युवयोरवसा रक्षणेनाहं घोषा सुम्नं सुखमा चके । कामये ॥

॥ अथाष्टमी ॥

युवं ह कृशं युवमश्विना शयुं युवं विधंतं विधवामुरुष्यथः ।
युवं सनिभ्यः स्तनयंतमश्विनाप व्रजमूर्णुथः सप्तास्यं ॥८॥

युवं । ह । कृशं । युवं । अश्विना । शयुं । युवं । विधंतं । विधवां । उरुष्यथः ।
युवं । सनिऽभ्यः । स्तनयंतं । अश्विना । अप । व्रजं । ऊर्णुथः । सप्तऽआस्यं ॥८॥

हे अश्विनाश्विनौ युवं ह युवां खलु कृशं दुर्बलं कृशनामधेयं वोरुष्यथः। रक्षथः। किंच युवं युवां शयुं शयुनामानमृषिमुरुष्यथः। किंच युवं युवां विधंतं परिचरंतं मनुष्यं विधवां चापतिकां वध्रिमतीं योद्भ्री स्त्रियं चोरुष्यथः। किंच। हे अश्विनाश्विनौ युवं युवां स्तनयंतं शब्दं कुर्वंतं सप्तास्यं सर्पणशीलद्वारं व्रजं मेघं। व्रजः चरुरिति मेघनामसु पाठात्। सनिभ्यो हविषां दातृभ्योऽपोर्णुथः। विवृतद्वारं कृतवंतौ स्थ इत्यर्थः॥

॥ अथ नवमी ॥

जनिष्ट योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु।
आस्मै रीयंते निवनेव सिंधवोऽस्मा अह्ने भवति तत्पतित्वनं॥९॥

जनिष्ट। योषा। पतयत्। कनीनकः। वि। च। अरुहन्। वीरुधः। दंसनाः। अनु।
आ। अस्मै। रीयंते। निवनाऽइव। सिंधवः। अस्मै। अह्ने। भवति। तत्। पतिऽत्वनं॥९॥

हे अश्विनौ युवयोः प्रसादादियं घोषा योषा स्त्रीगुणोपेता सुभगा जनिष्ट। जाता। अस्याः समीपे कनीनकः कन्याकामः पतिः पतयत्। पततु। अस्मै कनीनकाय युवयोर्दंसना अनु वृष्टिलक्षणानि कर्माणि लक्षीकृत्य वीरुध ओषधयो वि चारुहन्। विरोहंतु। प्रादुर्भवंतु। अस्मै कनीनकाय निवनेव प्रवणेनेव सिंधव उदकान्या रीयंते। ता वीरुधोऽभिगच्छंतु। किंच। अह्ने केनाप्यहंतव्या-यास्मै कनीनकाय तत्संभोगसमर्थं पतित्वनं यौवनं भवति। भवतु॥

॥ अथ दशमी ॥

जीवं रुदंति वि मयंते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे॥१०॥

जीवं। रुदंति। वि। मयंते। अध्वरे। दीर्घां। अनु। प्रऽसितिं। दीधियुः। नरः।
वामं। पितृऽभ्यः। ये। इदं। संऽएरिरे। मयः। पतिऽभ्यः। जनयः। परिऽस्वजे॥१०॥

हे अश्विनौ युवयोरनुग्रहाद्ये नरः पतयो जायानां जीवं जीवनमुद्दिश्य रुदंति रोदनेनापि जायानां जीवनमेवाशासत इत्यर्थः। ता जाया अध्वरे यज्ञे वि मयंते निवेशयंति च। किंच तासु दीर्घां महतीं प्रसितिं भुजयोः प्रबंधनमनु दीधि-

युरनुदधति। इदं वामं वननीयमपत्यं पितृभ्यः समेरिरे संप्रेरयंति च तेभ्यः पतिभ्यो जनयो जायाः परिष्वजे परिष्वंगार्थं मयः सुखं कुर्वंतीति शेषः ॥

॥ इति सप्तमस्याष्टम एकोनविंशो वर्गः ॥

॥ अथैकादशी ॥.

न तस्यं विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः क्षेति योनिषु ।
प्रियोस्रियस्य वृषभस्यं रेतिनो गृहं गमेमाश्विना तदुश्मसि ॥११॥

न । तस्यं । विद्म । तत् । ऊं इति । सु । प्र । वोचत । युवा । ह । यत् । युवत्याः । क्षेति । योनिषु ।
प्रियऽउस्रियस्य । वृषभस्यं । रेतिनः । गृहं । गमेम । अश्विना । तत् । उश्मसि ॥११॥

हे अश्विनाश्विनौ तस्य तत्सुखं वयं न विद्म । न जानीमः । तत्सुखं यूयं सु सुष्ठु प्र वोचत । बहुवचनं पूजार्थं । युवा ह तरुणः खलु मत्पतिर्युवत्या यौवनान्विताया मम योनिषु गृहेषु यत्क्षेति निवसतीति । किंच प्रियोस्रियस्य प्रिययुवतेर्वृषभस्य सेक्तू रेतिनो रेतस्विनो मत्पतेर्गृहं गमेम । गच्छेम । वयं तद्गृहमुश्मसि । कामयामहे ॥

॥ अथ द्वादशी ॥

आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अयंसत ।
अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्यां अशीमहि ॥१२॥

आ । वां । अगन् । सुऽमतिः । वाजिनीवसू इति वाजिनीऽवसू । नि । अश्विना । हृत्ऽसु । कामाः । अयंसत ।
अभूतं । गोपा । मिथुना । शुभः । पती इति । प्रियाः । अर्यम्णः । दुर्यान् । अशीमहि ॥१२॥

हे वाजिनीवसू अन्नधनौ शुभस्पती उदकस्य स्वामिनौ हे अश्विनाश्विनौ मिथुना मिथुनौ परस्परं सहितौ वां युवां सुमतिरागन् । आगच्छतु । हृत्स्वस्मदीयेषु हृदयेषु कामा अभिलाषा न्ययंसत । नियम्यंतां । किंच युवां गोपा मम गोपायितारावभूतं । भवतं । अपि च । प्रियाः सत्यो वयमर्यम्णः पत्युर्दुर्यान्गृहानशीमहि । प्राप्नुयाम ॥

॥ अथ त्रयोदशी ॥

ता मंदसाना मनुंषो दुरोण आ धत्तं रयिं सहवींरं वचस्यवें ।
कृतं तीर्थं सुंप्रपाणं शुभस्पती स्थाणुं पंथेष्ठामपं दुर्मतिं हंतं ॥१३॥

ता । मंदसाना । मनुंषः । दुरोणे । आ । धत्तं । रयिं । सहऽवींरं । वचस्यवें ।
कृतं । तीर्थं । सुऽप्रपानं । शुभः । पती इति । स्थाणुं । पथेऽस्थां । अपं । दुःऽमतिं । हतं ॥१३॥

हे अश्विनौ मंदसाना मंदसानौ ता तौ युवां मनुषो मनुष्यस्य मत्पतेर्दुरोणे गृहे वचस्यवे युष्मत्स्तुतिकामायै मह्यं सहवीरं पुत्रादिसहितं रयिं धनमा धत्तं । स्थापयतं । किंच हे अश्विनौ शुभस्पती उदकस्य स्वामिनौ युवां पतिगृहं गच्छंत्या मम तीर्थं पानाय सुप्रपाणं कृतं । कुरुतं । किंच । युवां पथेष्ठां मार्गस्थं स्थाणुं वृक्षं दुर्मतिं दुर्बुद्धिं परिपंथिनं चाप हतं । अपगमयतं ॥

॥ अथ चतुर्दशी ॥

क्वं स्विदद्य कंतमास्वश्विना विक्षु दस्रा मांदयेते शुभस्पती ।
क ईं नि येंमे कतमस्यं जग्मतुर्विप्रंस्य वा यजंमानस्य वा गृहं ॥१४॥

क्वं । स्वित् । अद्य । कतमासुं । अश्विना । विक्षु । दस्रा । मादयेते इति । शुभः । पती इति ।
कः । ईं । नि । येमे । कतमस्यं । जग्मतुः । विप्रंस्य । वा । यजंमानस्य । वा । गृहं ॥१४॥

हे अश्विनाश्विनौ दस्रा दर्शनीयौ शुभस्पती उदकस्य पती स्वामिनौ भवंतौ क्व स्वित्क्व स्थितौ जनपदेऽद्यास्मिन्नहनि कतमासु कासु विक्षु प्रजासु मादयेते । आत्मानं तर्पयतः । किंच । को यजमान ईमेतौ नि येमे । नियच्छति । किंच भवंतौ कतमस्य विप्रस्य मेधाविनः स्तोतुर्यजमानस्य गृहं वा जग्मतुः । गतवंतौ ॥

॥ इति सप्तमस्याष्टमे विंशो वर्गः ॥

समानमिति तृचं द्वादशं सूक्तं घोषायाः पुत्रस्य सुहस्त्यस्यार्षं जागतमाश्विनं । अनुक्रांतं च । समानं तृचं सुहस्त्यो घौषेय इति ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

समानमु त्यं पुंरुहूतमुक्थ्यं१ रथं त्रिचक्रं सवंना गनिंग्मतं ।
परिंज्मानं विदथ्यं सुवृक्तिभिर्वयं व्युष्टा उषसो हवामहे ॥१॥

समानं । ऊं इति । त्यं । पुरुऽहूतं । उक्थ्यं । रथं । त्रिऽचक्रं । सवना । गनिग्मतं ।
परिऽज्मानं । विदथ्यं । सुवृक्तिऽभिः । वयं । विऽउष्टौ । उषसः । हवामहे ॥१॥

हे अश्विनौ युवयोः समानमु साधारणमेव त्यं तं पुरुहूतं बहुभिराहूतमुक्थ्यं प्रशस्यं त्रिचक्रं सवना सवनानि यज्ञान्गनिग्मतं प्रतिगच्छंतं परिज्मानं परितो गंतारं विदथ्यं यज्ञहितं रथमुषसो व्युष्टौ सुवृक्तिभिः सुष्टु दोषवर्जिताभिः स्तुतिभिर्वयं हवामहे । आह्वयामः ॥

॥ अथ द्वितीया ॥

प्रातर्युजं नासत्याधि तिष्ठथः प्रातर्यावाणं मधुवाहनं रथं ।
विशो येन गच्छथो यज्वरीर्नरा कीरेश्चिद्यज्ञं होतृमंतमश्विना ॥२॥

प्रातःऽयुजं । नासत्या । अधि । तिष्ठथः । प्रातःऽयावानं । मधुऽवाहनं । रथं ।
विशः । येन । गच्छथः । यज्वरीः । नरा । कीरेः । चित् । यज्ञं । होतृऽमंतं । अश्विना ॥२॥

हे नासत्या नासत्यभूतौ सत्यस्य प्रणेतारौ वा नरा नेतारावश्विनौ युवां प्रातर्युजं प्रातःकालेऽश्वैर्युज्यमानं प्रातर्यावाणं प्रातर्गंतारं मधुवाहनं मधुनोऽमृतस्य वाहकं तं रथमधि तिष्ठथः । आरोहतमित्यर्थः । यज्वरीर्यजनशीला विशः प्रजा येन रथेन गच्छथः । येन च कीरेश्चित्स्तोतुरपि होतृमंतमृषियुक्तं यज्ञं गच्छथः ॥

॥ अथ तृतीया ॥

अध्वर्युं वा मधुपाणिं सुहस्त्यमग्निधं वा धृतदक्षं दमूनसं ।
विप्रस्य वा यत्सवनानि गच्छथोऽत आ यातं मधुपेयमश्विना ॥३॥

अध्वर्युं । वा । मधुऽपाणिं । सुऽहस्त्यं । अग्निधं । वा । धृतऽदक्षं । दमूनसं ।
विप्रस्य । वा । यत् । सवनानि । गच्छथः । अतः । आ । यातं । मधुऽपेयं । अश्विना ॥३॥

हे अश्विनौ युवां मधुपाणिं सोमपाणिमध्वर्युं वा सुहस्त्यं सुहस्त्यनामानमृषिं मां धृतदक्षं धृतबलं दमूनसं दानमनसमग्निधं वर्त्विग्विशेषं समायातं । तदेव दर्शयति । यद्यद्यपि विप्रस्यान्यस्य मेधाविनः सवनानि यज्ञान्गच्छथस्तथाप्यतस्तेभ्यो यज्ञेभ्यो मधुपेयमस्माकं सोमात्मकं पेयमा यातं । अन्वागच्छतं ॥

॥ इति सप्तमस्याष्टम एकविंशो वर्गः ॥

अस्तेवेत्येकादशर्चं त्रयोदशं सूक्तमांगिरसस्य कृष्णाख्यस्यार्षं त्रैष्टुभमैंद्रं । अनुक्रांतं च । अस्तेवैकादश कृष्ण इति ॥ आभिप्लविकेषूक्थ्येषु स्तोमवृद्धाविदं सूक्तं ब्राह्मणाच्छंसिन आवापार्थं । सूचितं च । यज्ञे दिव इति सूक्ते अस्तेव सु प्रतरं । आ० ७.९. । इति ॥

॥ तत्र प्रथमा ॥

अस्तेव सु प्रतरं लायमस्यन्भूषन्निव प्र भरा स्तोममस्मै ।
वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम इंद्रं ॥१॥
अस्ताऽइव । सु । प्रऽतरं । लायं । अस्यन् । भूषन्ऽइव । प्र । भर । स्तोमं । अस्मै ।
वाचा । विप्राः । तरत । वाचं । अर्यः । नि । रमय । जरितरिति । सोमे । इंद्रं ॥१॥

प्रतरं प्रवृद्धतरं लायं संश्लेषणं हृदयवेधिनं शरं सु सुष्ठस्यन् क्षिपन् अस्तेव यथा क्षेप्ता धानुष्को भूषन्निव यथा चालंकारमलंकुर्वन्नलंकर्ता तद्वत्स्तोममस्मा इंद्राय प्र भर । प्रापय । हे अंतरात्मन् त्वमिति शेषः । किंच । हे विप्रा मेधाविनो यूयं वाचा स्तुत्यार्योऽरेः शत्रोर्वाचं तरत । नितरां तरत । निराकुरुतेत्यर्थः । हे जरितः स्तोतस्त्वं सोमे सोमयाग इंद्रं नि रमय । क्रीडय ॥

॥ अथ द्वितीया ॥

दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिंद्रं ।
कोशं न पूर्णं वसुना न्यृष्टमा च्यावय मघदेयाय शूरं ॥२॥
दोहेन । गां । उप । शिक्ष । सखायं । प्र । बोधय । जरितः । जारं । इंद्रं ।
कोशं । न । पूर्णं । वसुना । निऽऋष्टं । आ । च्यवय । मघऽदेयाय । शूरं ॥२॥

हे जरितस्त्वं दोहेन कामानां दोहनार्थं गां गोरूपं सखायं प्रियमिंद्रमुप शिक्ष । वशं नय । किंच । जारं भूतानां जरयितारमिंद्रं प्र बोधय । स्तुतिभिः प्रबुद्धं कुरु । किंच । पूर्णमुदकेन पूरितं कोशं न पात्रमिव वसुना हिरण्यादिना धनेन न्यृष्टं नीचैर्गतं शूरं वीरमिंद्रं मघदेयाय धनदानाया च्यवय । अभिमुखं कुर्वित्यर्थः ॥

॥ अथ तृतीया ॥

किमंग त्वा मघवन्भोजमाहुः शिशीहि मा शिशयं त्वा शृणोमि ।
अप्नस्वती मम धीरस्तु शक्र वसुविदं भगमिंद्रा भरा नः ॥३॥

किं। अंग। त्वा। मघऽवन्। भोजं। आहुः। शिशीहि। मा। शिशयं। त्वा। शृणोमि।
अप्नस्वती। मम। धीः। अस्तु। शक्र। वसुऽविदं। भगं। इंद्र। आ। भर। नः ॥३॥

अंगेति सामान्याह्वानं। अंग हे मघवन् धनवन् शक्रेंद्र त्वा त्वां किं किमर्थं भोजं स्तोतॄणां भोजकमभीष्टमाहुः सर्वे विद्वांसः। यदि न ददासीत्यध्याहारः। तस्माद्दास्येव स्तोतृभ्यो धनानीत्यर्थः। तथा सति मा स्तोतारं शिशीहि। धनदानेन तीक्ष्णीकुरु। त्वा त्वां शिशयं स्तोतॄणां संस्कर्तारं शृणोमि। किंच। मम धीर्बुद्धिरप्नस्वती कर्मवत्यस्तु। भवतु। किंच नोऽस्माकं वसुविदं धनस्य लंभकं भगं भाग्यमा भर। आहर॥

॥ अथ चतुर्थी ॥

त्वां जना ममसत्येष्विंद्र संतस्थाना वि ह्वयंते समीके।
अत्रा युजं कृणुते यो हविष्मान्नासुन्वता सख्यं वष्टि शूरः ॥४॥

त्वां। जनाः। ममऽसत्येषु। इंद्र। संऽतस्थानाः। वि। ह्वयंते। संऽईके।
अत्र। युजं। कृणुते। यः। हविष्मान्। न। असुन्वता। सख्यं। वष्टि। शूरः ॥४॥

हे इंद्र त्वां जना ममसत्येषु संग्रामेषु वि ह्वयंते। विविधमाह्वयंति साहाय्यार्थं। एतदेव दर्शयति। समीके युद्धे संतस्थानाः सह तिष्ठंतो जना वि ह्वयंत इति। अत्रास्मिन्नाह्वाने स शूरो वीर इंद्रस्तं युजं सखायं कृणुते कुरुते यो हविष्मान्भवति। असुन्वता सोमाभिषवमकुर्वता पुरुषेण सह सख्यं सखित्वं न वष्टि। न कामयते॥

॥ अथ पंचमी ॥

धनं न स्पंद्रं बहुलं यो अस्मै तीव्रान्त्सोमाँ आसुनोति प्रयस्वान्।
तस्मै शत्रून्त्सुतुकान्प्रातरह्नो नि स्वष्ट्रान्युवति हंति वृत्रं ॥५॥

धनं। न। स्पंद्रं। बहुलं। यः। अस्मै। तीव्रान्। सोमान्। आऽसुनोति। प्रयस्वान्।
तस्मै। शत्रून्। सुऽतुकान्। प्रातः। अह्नः। नि। सुऽअष्ट्रान्। युवति। हंति। वृत्रं ॥५॥

प्रयस्वान् हविष्मान्यो यजमानः स्पंद्रं स्पंदनशीलं गवाश्वादिकं बहुलं प्रभूतं धनं न यथा धनं दरिद्राय पात्रभूताय दातुं संस्करोति तद्वदस्मा इंद्राय तीव्रान्तीव्ररसान्सोमानासुनोत्यभिषुणोति। अभिषवाख्येन संस्कारेण संस्करोतीत्यर्थः।

तस्मै यजमानाय प्रातरह्नः पूर्वाह्णे सुतुकान्सुप्रेरणाञ्शोभनपुत्रसहितान्वा स्वष्टाञ्शोभनायुधाञ्शत्रून् नि युवति । स इंद्रः पृथक्करोति । किंच । वृत्रं तदीयमुपद्रवं हंति । हिनस्ति ॥

॥ इति सप्तमस्याष्टमे द्वाविंशो वर्गः ॥

॥ अथ षष्ठी ॥

यस्मिन्वयं दधिमा शंसमिंद्रे यः शिश्राय मघवा काममस्मे ।

आराच्चित्सन्भयतामस्य शत्रुर्न्यस्मै द्युम्ना जन्या नमंतां ॥६॥

यस्मिन् । वयं । दधिम । शंसं । इंद्रे । यः । शिश्राय । मघऽवा । कामं । अस्मे इति ।

आरात् । चित् । सन् । भयतां । अस्य । शत्रुः । नि । अस्मै । द्युम्ना । जन्या । नमंतां ॥६॥

यस्मिन्निंद्रे वयं घोषेयाः सुहस्त्याः शंसं स्तुतिं दधिम विदध्मः । यश्च मघवान्धनवानिंद्रोऽस्मे अस्मासु काममभिलाषं शिश्राय श्राययति अस्येंद्रस्य शत्रुराराद्दूर एव संश्चित् सन्नपि भयतां । बिभेतु । किंचास्मा इंद्राय जन्या जन्यानि शत्रुजनपदभवानि द्युम्ना द्युम्नान्यन्नानि नि नमंतां । प्रह्वीभवंतु । भोजनीयानि भवंत्वित्यर्थः ॥

॥ अथ सप्तमी ॥

आराच्छत्रुमप बाधस्व दूरमुग्रो यः शंबः पुरुहूत तेन ।

अस्मे धेहि यवमद्गोमदिंद्र कृधी धियं जरित्रे वाजरत्नां ॥७॥

आरात् । शत्रुं । अप । बाधस्व । दूरं । उग्रः । यः । शंबः । पुरुऽहूत । तेन ।

अस्मे इति । धेहि । यवऽमत् । गोऽमत् । इंद्र । कृधि । धियं । जरित्रे । वाजऽरत्नां ॥७॥

हे पुरुहूत बहुभिराहूतेंद्र तव य उग्र उद्गूर्णः शंबो वज्रः । तथा च यास्कः ॥ शंब इति वज्रनाम शमयतेर्वा शातयतेर्वा । नि० ५.२४. । इति । तेन वज्रेण शत्रुमस्मदरिमारादस्मत्समीपाद्दूरमप बाधस्व । त्वमपगमय । किंच । अस्मे अस्मासु यवमद्यवयुक्तं गोमद्गोयुक्तं च धनं धेहि । निधेहि । किंच । जरित्रे स्तोत्रे मह्यं वाजरत्नां रमणीयान्नं धियं कर्म कृधि । कुरु ॥

॥ अथाष्टमी ॥

प्र यमंतर्वृषसवासो अग्मन्तीव्राः सोमा बहुलांतास इंद्रं ।

नाहं दामानं मघवा नि यंसन्नि सुन्वते वहति भूरि वामं ॥८॥

प्र । यं । अंतः । वृषऽसवासः । अग्मन् । तीव्राः । सोमाः । बहुलऽअंताः । इंद्रं ।
न । अह । दामानं । मघऽवा । नि । यंसत् । नि । सुन्वते । वहति । भूरि । वामं ॥८॥

अंतर्जठरे यमिंद्रं वृषसवासो वृषसवा अग्नौ सोमस्य वर्षितृभिरध्वर्युभिरभिषुतास्तीव्रास्तीव्ररसा बहुलांतासो बहुलमन्नादिकमंते येभ्यस्ते बहुलांताः सोमाः प्राग्मन् प्रगच्छंति स मघवा धनवानिंद्रो दामानं दातारं यजमानं नाह नैव नि यंसत् । नियच्छति । किंतु सुन्वते सोमाभिषवं कुर्वते यजमानाय भूर्यधिकं वामं वननीयं धनं नि वहति । नितरां प्रापयति ॥

॥ अथ नवमी ॥

उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी विचिनोति काले ।
यो देवकामो न धना रुणद्धि समित्तं राया सृजति स्वधावान् ॥९॥
उत । प्रऽहां । अतिऽदीव्य । जयाति । कृतं । यत् । श्वऽघ्नी । विऽचिनोति । काले ।
यः । देवऽकामः । न । धना । रुणद्धि । सं । इत् । तं । राया । सृजति । स्वधाऽवान् ॥९॥

उतापि चेंद्रः प्रहां प्रहंतारमतिदीव्य । अतिरभिपूजितार्थे वर्तते । दीव्यतिर्गत्यर्थे । अभिपूजितं गमयित्वा जयाति । जयति । किंच । यद्यथा । अत्र प्रकारवचनप्रत्ययस्य लोपो द्रष्टव्यः । श्वघ्नी कितवः कृतं कृतसमयं प्रतिकितवं कितवानां मध्ये विचिनोति परीक्ष्य गृह्णाति तद्वदिंद्रः काले युद्धकाले बलवंतं शत्रुं परीक्ष्य वधार्थं गृह्णातीत्यर्थः । किंच । यो मनुष्यो देवकामो देवान्यष्टुं स्तोतुं वाभिलाषवान्भवति तस्यार्थाय धना धनानि न रुणद्धि । नावृणोति । नाच्छादयतीत्यर्थः । किंतु स्वधावान्बलवानिंद्रस्तं देवकामं राया धनेन सं सृजति । संयोजयत्येव ॥

॥ अथ दशमी ॥

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वां ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥१०॥
गोभिः । तरेम । अमतिं । दुःऽएवां । यवेन । क्षुधं । पुरुऽहूत । विश्वां ।
वयं । राजऽभिः । प्रथमाः । धनानि । अस्माकेन । वृजनेन । जयेम ॥१०॥

हे पुरुहूत बहुभिराहूतेंद्र तव प्रसादाद्दुरेवां दुष्टागमनां दारिद्र्यादागताममतिं

दुर्बुद्धिं वयं घोषेयाः सुहस्त्या गोभिः पशुभिस्तरेम । निस्तरेम । किंच । यवेन विश्वां व्याप्तां क्षुधं तरेम । किंच । प्रथमा मुख्यानि धनानि राजभिर्धनानामीश्वरैः । लभेमहीति शेषः । यद्वा । प्रथमा वयमिति संबंधः । किंचास्माकेनास्मदीयेन वृजनेन बलेन जयेम । शत्रूनिति शेषः ॥

॥ अथैकादशी ॥

बृह॒स्पति॑र्नः॒ परि॑ पातु प॒श्चादु॒तोत्त॑रस्मा॒दध॑रादघा॒योः ।
इंद्रः॑ पु॒रस्ता॑दु॒त म॑ध्य॒तो नः॒ सखा॒ सखि॑भ्यो॒ वरि॑वः कृणोतु ॥ ११ ॥

बृह॒स्पतिः॑ । नः॒ । परि॑ । पा॒तु॒ । प॒श्चात् । उ॒त । उत्ऽत॑रस्मात् । अध॑रात् । अ॒घ॒ऽयोः ।
इंद्रः॑ । पु॒रस्ता॑त् । उ॒त । म॒ध्य॒तः । नः॒ । सखा॑ । सखि॑ऽभ्यः । वरि॑वः । कृ॒णो॒तु॒ ॥ ११ ॥

पश्चात्पश्चिमतो योऽघायुरागच्छति तस्मादघायोः पापकाङ्क्षचोर्नोऽस्मान्बृहस्पतिः परि पातु । रक्षतु । उतापि चोत्तरस्मादुत्तरतोऽधरादधस्ताच्च योऽघायुरागच्छति तस्मादघायोर्नोऽस्मान्परि पातु । उतापि चेंद्रः पुरस्तात्पूर्वतो मध्यतश्च योऽघायुरागच्छति तस्मादघायोर्नोऽस्मान्परि पातु । किंच । सखा सखिभूतेंद्रः सखिभ्यः प्रियेभ्योऽस्मभ्यं वरिवो धनं कृणोतु । करोतु ॥

॥ इति सप्तमस्याष्टमे चयोविंशो वर्गः ॥

॥ इति दशमे मंडले तृतीयोऽनुवाकः ॥

चतुर्थेऽनुवाकेऽष्टादश सूक्तानि । तत्राच्छा म इत्येकादशर्चं प्रथमं सूक्तं । दशम्येकादश्यौ त्रिष्टुभौ । शिष्टा जगत्यः । पूर्ववदृषिदेवते । तथा चानुक्रांतं । अच्छा मे द्वित्रिष्टुबंतमिति । उक्थ्ये ब्राह्मणाच्छंसिनस्तृतीयसवन एतत्सूक्तं । सूचितं च । अच्छा म इंद्रं बृहस्पते युवमिंद्रश्च वस्व इति याज्ये । आ० ६.१. । इति ॥ षष्ठेऽहन्यपस्यैतत्सूक्तं । सूचितं च । अच्छा म इंद्रमिति नित्यमैकाहिकं । आ० ८.३. । इति ॥

॥ तत्र प्रथमा ॥

अच्छा॑ म॒ इंद्रं॑ म॒तयः॑ स्व॒र्विदः॑ स॒ध्रीची॒र्विश्वा॑ उश॒तीर॑नूषत ।
परि॑ ष्वजंते॒ जन॑यो॒ यथा॒ पतिं॒ मर्यं॒ न शुं॒ध्युं म॒घवा॑नमू॒तये॑ ॥ १ ॥

अच्छ॑ । मे॒ । इंद्र॑म् । म॒तयः॑ । स्वः॒ऽविदः॑ । स॒ध्रीचीः॑ । विश्वाः॑ । उ॒श॒तीः । अ॒नू॒ष॒त॒ ।
परि॑ । स्व॒जं॒ते॒ । जन॑यः । यथा॑ । पति॑म् । मर्य॑म् । न । शुं॒ध्युम् । म॒घऽवा॑नम् । ऊ॒तये॑ ॥ १ ॥

